पञ्चम स्कन्धः   श्री १०८ श्रीराधारमणोजयति   पञ्चम स्कन्धः

श्रीमद्भागवतम्।

महर्षिप्रवर श्रीकृष्णद्वैपायन प्रणीतम्।

श्रीश्रीपाद श्रीधरस्वामिकृत भावार्थ दीपिका श्रीराधारमणदास गोस्वामि विरचित दीपिन्याख्य तट्टिप्पणी श्रीमद्वीरराघवाचार्य्यकृतभागवतचंद्रिका श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी श्रीगौडीय वैष्णवाचार्य्यप्रवर श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भ श्रीमद्विश्वनाथचक्रवर्त्ति कृत सारार्थदर्शिनी तथा श्रीनिम्बार्क सम्प्रदायि श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपाख्य टीका समेतम् भाषानुवादसहितञ्च।

परमहंस परिव्राजकाचार्य्य श्रीमत् स्वामि प्रकाशानन्दसरस्वती पूज्यपादशिष्य

श्रीनित्यस्वरूपब्रह्मचारिणा

सम्पादितम्।

वङ्गदेशान्तर्गत ताड़ास भूपति श्रीराधाविनोद प्रेम सेवा परायण राजर्षि राय

श्री वनमालि राय बहादुरस्य

सम्पूर्ण साहाय्येन

प्रकाशितञ्च।

निगमकल्पतरोर्गलितं फलं, शुकमुखादमृतद्रवसंयुतम्।

पिबत भागवतं रसमालयं, मुहुरहो रसिका भुवि भावुकाः॥

श्रीवृन्दावनधामनि

श्रीमद्देवकीनन्दनाख्य स्वकीये यन्त्रे श्रीनित्यस्वरूपब्रह्मचारिणा मुद्रितम्

सम्वत् १९६१

पञ्चम स्कन्धः — श्री १०८ श्रीराधारमणोजयति — पञ्चम खण्ड

श्रीमद्भागवतम्।

महर्षिप्रवर श्रीकृष्णद्वैपायन प्रणीतम्।

श्रीश्रीपाद श्रीधरस्वामिकृत भावार्थ दीपिका श्रीराधारमणदास गोस्वामि विरचित दीपिन्याख्य तट्टिप्पणी श्रीमद्वीरराघवाचार्य्यकृतभागवतचंद्रिका श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी श्रीगौडीय वैष्णवाचार्य्यप्रवर श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भ श्रीमद्विश्वनाथचक्रवर्त्ति कृत सारार्थदर्शिनी तथा श्रीनिम्बार्क सम्प्रदायि श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपाख्य टीका समेतम् भाषानुवादसहितञ्च।

परमहंस परिव्राजकाचार्य्य श्रीमत् स्वामि प्रकाशानन्दसरस्वती पूज्यपादशिष्य

श्रीनित्यस्वरूपब्रह्मचारिणा

सम्पादितम्।

वङ्गदेशान्तर्गत ताड़ास भूपति श्रीराधाविनोद प्रेम सेवा परायण राजर्षि राय

श्री बनमालि राय बहादुरस्य

सम्पूर्ण साहाय्येन

प्रकाशितञ्च।

निगमकल्पतरोर्गलितं फलं, शुकमुखादमृतद्रवसंयुतम्।
पिबत भागवतं रसमालयं, मुहुरहो रसिका भुवि भावुकाः॥

श्रीवृन्दावनधामनि

श्रीमद्देवकीनन्दनाख्य स्वकीये यन्त्रे श्रीनित्यस्वरूपब्रह्मचारिणा मुद्रितम्

सम्वत् १९६१

श्रीमद्भागवतम् ।

पञ्चमस्कन्धः ।

—(:०:)—

प्रथमोऽध्यायः ।

श्रीं नमो भगवते वासुदेवाय ।

॥ राजोवाच ॥

प्रियव्रतो भागवत आत्मारामः कथं मुने ! ।
गृहेऽरमत यन्मूलः कर्मबन्धः पराभवः ॥ १ ॥
न नूनं मुक्तसङ्गानां तादृशानां द्विजर्षभ ! ।
गृहेष्वभिनिवेशोऽयं पुंसां भवितु मर्हति ॥ २ ॥
महतां खलु विप्रर्षे ! उत्तमश्लोकपादयोः ।
छायानिर्वृतचित्तानां न कुटुम्बे स्पृहामतिः ॥ ३ ॥
संशयोऽयं महान् ब्रह्मन् ! दारागारसुतादिषु ।
सक्तस्य यत्सिद्धिरभूत्कृष्णे च मतिरच्युता ॥ ४ ॥

॥ श्रीशुक उवाच ॥

गद्यं । बाढमुक्तं भगवत उत्तमश्लोकस्य श्रीमच्चरणारविन्दमकरन्दरस आवेशितचेतसो भागवतपरमहंसदयितकथां किञ्चिदन्तरायविहतां स्वां शिवतमाम्पदवीं न प्रायेण हिन्वन्ति ॥ ५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नमः श्रीमत्परमहंसास्वादितचरणकमलचिन्मकरन्दाय ।
भक्तजनमानसनिवासाय श्रीरामाय ॥

अथातः पञ्चमस्कन्धव्याख्यानेकविशेषवान् ।
प्रियव्रतान्वयो यत्र सप्रपञ्चः प्रपञ्च्यते ॥ १ ॥
षड्विंशत्यधुनाध्यायैः पञ्चमे स्थानमीर्यते ।
लोकद्वीपादिमर्यादापालनाख्यमनेकधा ॥ २ ॥
पृथिव्युपर्यधोलोकैर्मर्यादा त्रिविधा मता ।
पुनश्चैकैकशस्तेषु मर्यादा बहुधा मता ॥ ३ ॥
भुवि द्वीपादिमर्यादाः पाल्यन्ते राजभिः पृथक् ।
भूमेरुपरि देवाद्यैस्ततश्चाधोऽसुरादिभिः ॥ ४ ॥
तत्राध्यायैस्तु विंशत्या प्रियव्रतपुरःसरैः ।
भुवि द्वीपादिमर्यादाः पालिता इति वर्ण्यते ॥ ५ ॥
त्रिभिः सूर्यादिभिर्ज्योतिश्चक्रादिष्विति कीर्त्यते ।
अतलादिषु दैत्याद्यैः पालनं च ततस्त्रिभिः ॥ ६ ॥
तत्र तु प्रथमेऽध्याये ज्ञानिनो राज्यनिर्वृतिः ।
पुनश्च ज्ञाननिष्ठेति प्रियव्रतकथाद्भुता ॥ ७ ॥
वंशः प्रियव्रतस्यापि निबोध नृपसत्तम ! ।
यो नारदादात्मविद्यामधिगम्य पुनर्महीम् ।
भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात्पदम् ।

इति पूर्वस्कन्धान्ते प्रियव्रतस्य प्रथममात्मविद्या ततो गृहाश्रमस्ततः सर्वसङ्गत्यागेन मोक्ष इत्युक्तम् तत्र विस्मितः पृच्छति प्रियव्रतो

श्रीधरस्वामिकृतभावार्थदीपिका ।

भागवतोऽत एवात्मारामो गृहे कथमरमत ननु रमतां को दोष इति चेदत आह । कर्मणा बन्धः पराभवश्च स्वरूपतिरस्कारो यन्मूलो भवति यद्गृहं मूलं कारणं यस्य ॥ १ ॥

गृहेषु रतिश्च तत्राभिनिवेशात् स्यात्स च भागवतानामात्मारामाणां न सम्भवतीत्याह । न नूनमिति ॥ २ ॥

गृहासक्तिर्हि कुटुम्बादिस्पृहया भवति सा च तेषां नास्तीत्याह । महतामिति । उत्तमश्लोकपादयोश्छाया कामादिसन्तापहारिणी तया निर्वृतं चित्तं येषां तेषां स्पृहायुक्ता मतिर्नास्ति ॥ ३ ॥

दाराद्यासक्तस्य तु मोक्षः श्रीकृष्णेऽस्खलिता मतिश्चाभूदिति यदयं च महान्संशय इत्याह । संशय इति ॥ ४ ॥

अङ्गीकृत्य परिहरति । बाढमभिनिवेशादिकं नास्तीति सत्यमेव तथापि विघ्नवशेन तेषां प्रवृत्तिः पूर्वाभ्यासबलेन पुनर्निवृत्तिश्च सङ्गच्छत इत्याह । भगवतः श्रीमच्चरणारविन्दमकरन्दरूपो यो रसस्तस्मिन्नावेशितं चेतो यैस्तेऽपि केन चिदन्तरायेण विघ्नेन विहतामपि स्वां शिवतमां पदवीं मार्गं न हिन्वन्ति न त्यजन्ति काम् भागवता एव परमहंसास्तेषां दयितस्य प्रियस्य श्रीवासुदेवस्य कथाम् ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तृतीये "स्वायम्भुवस्यापि मनोर्वंशः परमसम्मतः । कथ्यतां भगवन्यत्र मैथुनेनैधिरे प्रजाः । प्रियव्रतोत्तानपादौ सुतौ स्वायम्भुवस्य च । यथा धर्मं जुगुपतुः सप्तद्वीपवतीं महीम्" इति पृष्टे स्वायम्भुववंशं प्रक्रम्य तद्दुहितृवंशः ज्येष्ठपुत्रोत्तानपादवंशश्च कथितः प्रजाः सृजेत्यादिना चतुर्थस्कन्धान्तेन ग्रन्थेन तावतैव शुश्रूषितं सर्वं श्रुतप्रायमिति मन्वानेन क्षत्रा प्रियव्रतचरित्रं न पृष्टं तत्र चतुर्थस्कन्धान्ते यो नारदादात्मविद्यामधिगम्य पुनर्महीं भुक्त्वेत्यधिगतात्मविद्यस्यापि प्रियव्रतस्य पुनर्भोगानुभव उक्तः तदिदमघटमानं पृच्छति । राजा प्रियव्रत इत्यादिना चतुर्भिः । हे मुने ! प्रियव्रतो भागवतः भगवद्धर्मनिष्ठः मुमुक्षुः आत्मारामः प्रकृतिविमुक्तब्रह्मात्मकस्वात्मयाथात्म्यानुभवनिष्ठः कथं गृहेऽरमत गृहशब्दो देहापत्यकलत्रादीनामुपलक्षणमेवंभूतः कथं गृहासक्तोऽभूत् भागवत आत्मारामोऽपि रमतां गृहे को विरोध इति चेत्तत्राह । कर्मबन्धः कर्मरूपो बन्धः तेन पराभवस्तिरस्कारः ज्ञानसङ्कोचश्च यन्मूलः या गृहासक्तिर्मूलं यस्य सः कर्मबन्धान्मुमुक्षोः कर्मबन्धहेतुभूतगृहासक्तिर्विरुद्धा तथासङ्कुचितज्ञानात्मयाथात्म्यनिष्ठस्य ज्ञानसङ्कोचकर्मबन्धनिमित्ता च गृहासक्तिर्न घटत इति भावः ॥ १ ॥

गृहादिष्वासक्तिर्हि तेषां प्रीतिविषयतयाऽदोषदर्शनरूपा तत्त्यागपूर्वकं निरतिशयप्रियस्वात्मपरमात्मस्वरूपमनुभवतां तेषु पुनः कुतः प्रीतिरित्याह । नेति । हे द्विजर्षभ ! तादृशानां भागवतानामात्मारामाणां मुक्तसङ्गानां दुःखहेतुत्वानुसन्धानेन त्यक्तदेहापत्यकलत्राद्यभिनिवेशानां पुंसां पुनर्गृहेष्वभिनिवेशः पूर्वदोषदर्शनेन त्यक्ताभिनिवेशः भवितुं नार्हति नूनं निश्चयः ॥ २ ॥

दोषहेतुत्वेऽपि तादात्विकसुखहेतुत्वादस्त्वभिनिवेश इति चेत्तत्राह । महतामिति । हे विप्रर्षे ! उत्तमश्लोकस्य भगवतः पादयोश्छायायाश्छायावत्तापत्रयनिरसनद्वारानन्दहेतुत्वादनुभूतिः छायाशब्देन विवक्षिता भगवत्पादाब्जानुभूत्या निर्वृतं सुखितं चित्तं येषां महतां कुटुम्बे स्पृहारूपा मतिर्न सम्भवति निरतिशयानन्दरूपभगवच्चरणानुभवसुखितचित्तानां दुःखमिश्रात्यल्पसुखहेतुषु बन्धनिमित्तेष्वभिनिवेशो न सम्भवतीत्यर्थः ॥ ३ ॥

अस्तु वात्मारामस्य प्राक्तनबलप्रतिबन्धवशाद्गृहासक्तिस्तथापि पुनर्गृहासक्तस्य भगवद्भक्तिस्ततो मुक्तिश्च कथं घटत इत्याह । संशय इति । हे ब्रह्मन्नयं महान्संशयः कोऽसावित्यत्राह । दारगृहसुतधनादिष्वासक्तस्य कृष्णे मतिर्भक्तिस्ततो गार्हस्थ्यधर्मैरविच्छिन्ना या मुक्तिश्च कथमभूदिति यदयं महान्संशय इत्यर्थः ॥ ४ ॥

एवमापृष्टो बादरायणिः सत्यमात्मारामस्य गृहासक्तिर्गृहासक्तस्य च पुनर्भक्तिश्च न घटत इति आत्मारामस्य भागवतस्यापि उपाधिवशाद्गृहासक्तत्वेऽपि प्राचीननिर्वृतधर्मानुष्ठानबलात्पुनः भक्तियोगोपसंहारः संभवत्येवेत्याह । बाढमुक्तमिति । सत्यमुक्तमित्यर्थः गृहासक्तस्य भक्तियोगासंभव इत्यत्रानङ्गीकारः आत्मारामस्य पुनः गृहाद्यभिनिवेश इत्यत्राङ्गीकारः प्रियव्रतस्य स्वायंभुवः स्वयंभ्वादिप्रार्थनया गृहाश्रमपरिग्रहः न तु स्वाभिनिवेशेनेत्यात्मारामस्य गृहाद्यभिनिवेशो नास्त्येवेत्याभिप्रायः ज्ञानिनोऽपि गृहाद्यभिनिवेशो नास्तीति तु सम्यगुक्तमपि तु गृहासक्तस्य पुनर्भक्त्युपसंहारो न घटत इत्यप्युक्तमित्याह । किं त्विति । उत्तमैर्ब्रह्मादिभिः श्लोक्यते स्तूयते इत्युत्तमश्लोकः उत्तमः श्लोकः स्तवो यस्येति वा तस्य भगवतः श्रीमतोः श्रिया सेव्यमानयोश्चरणारविन्दयोररविन्दवत्सौगन्ध्यसौकुमार्यलावण्यादिशोभायुक्तयोश्चरणयोर्यो मकरन्दः मकरन्दवत्प्रवाहः सुखरूपो भक्तिरसः तस्मिन्नावेशितं चेतो यैस्ते कथं चिदन्तरायेण विघ्नेन विहतां विच्छिन्नामपि कथंचिदित्यनेन भागवतैर्भक्तेरविचाल्यत्वं व्यज्यते भागवता ये परमहंसा नितरां विशुद्धान्तःकरणाः तेषां दयितस्य प्रीतिविषयस्य भगवतः कथां कथाश्रवणादिजन्यां भक्तिं शिवतमां पदवीं मोक्षमार्गभूतां न हिन्वन्ति न त्यजन्ति किन्तु पूर्ववासनया तामेवानुतिष्ठन्तीत्यर्थः तथा चोक्तम् भगवता "पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते "इत्यादिना । "तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम् । यतते च ततो भूयः संसिद्धौ कुरुनन्दन ! पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि स„ इत्यनेन अत्र प्रायशोन्तरायविहतामित्यन्वयः भक्तियोगस्य विघ्नबहुलत्वात् ननु प्रायेण न हिन्वन्तीत्यन्वयः "जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते । प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः । अनेकजन्मसंसिद्धस्ततो याति परां गतिम्" इति ब्रह्मजिज्ञासायत्नवत्त्वमात्रेणापि भक्त्यर्थयोगाभिधानात् उपक्रान्तभक्तियोगानां कच्चिदपि तत्त्यागायोगात् ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रभवति जगदेतद्यत्कटाक्षेक्षणेन ।
स्थितयति यदुपेक्षालेशतो नाशमेति ।
गतमगतमभिज्ञा जानते यस्य वृत्तम् ।
शरणमिममयेऽहं कालसंज्ञं मुकुन्दम् ॥ १ ॥
गद्यहेमाश्मगहनपद्यमरकतपर्वतम् ।
आम्नायज्ञा महान्तो मे प्रीयन्तामारुरुक्षवे ॥ २ ॥

स्वस्वविहितधर्मसाधनसामग्र्या समुद्भूतेन ज्ञानेन स्वस्वयोग्या

श्रीमद्विजयध्वजतीर्थकृतरत्नावली ।

मुक्तिर्भवतीत्येतस्मिन्नध्यायेनिरूप्यते । तत्र विशेषविवित्सया परीक्षित्क्षुकं पृच्छति । प्रियव्रत इति । जीवात्मनः पराभवः स्वपरमात्माज्ञानलक्षणः यन्मूलः यदहंकलत्रादिलक्षणं मूलं यस्य सः कस्मादित्यत उक्तम् । कर्मेति । दुष्कर्मनिमित्त इत्यर्थः एतादृशे गृहे कथमरमतेत्यन्वयः ॥ १ ॥

न केवलमस्यैवायुक्तं गृहे रमणमन्येषामप्येतादृशानां न युक्तमित्याह । न नूनमिति । मुक्तसङ्गानां फलाभिसन्धिरहितानाम् ॥ २ ॥

अत्र हेतुमाह । महतामिति । ज्ञानलक्षणया छायया (१) संसारसन्तापं परिहरन्त्या आह्लादं जनयन्त्या निर्वृत्तं प्राप्तपरमानन्दं चित्तं येषां ते तथा तेषां कुटुम्बे स्पृहया युक्ता मतिर्न भवतीत्यन्वयः ॥ ३ ॥

सामान्यमुक्त्वा विशिनष्टि । संशय इति । ज्ञानविरोधिषु दारागारादिषु सक्तस्य प्रियव्रतस्य कृष्णे अच्युता निरन्तरमनुवर्तमाना मतिरुपासनलक्षणा च तथा सिद्धिर्मुक्तिलक्षणा चाभूदिति यद्यस्मात्तस्मात्संशयः कुटुम्बासक्तस्य सिद्धावच्युतमतेः प्रयोजिका "उत गृहस्थोऽपि विमुच्यत" इति स्मृतेः "कुटुम्बी शुचौ देशे स्वाध्यायमधीयान" इति श्रुतेश्च चेतसः कुटुम्बभरणलक्षणासक्तिः आहोस्विदुभयमथवा निवृत्तिमार्गानुपमर्देन तत्सक्तिरविरोधिनीति ॥ ४ ॥

तत्र तुरीयपक्षमङ्गीकृत्य परिहरतिबाढमिति । उक्तंबाढमोमिति किं तदाह । भगवत इति । सकलसौभाग्यनिधेःसदा निर्दोषयशसो हरेःसकलसत्पत्करपदकमलमधुरसे आदितः आवेशितचेतसो जन्मप्रभृतिसंस्थापितान्तःकरणस्य पुरुषस्य गृहस्थाश्रमो निवृत्तिमार्गविरोधी न स्यात् इति यत्तदिति शेषः तर्हि कस्य विरोधी इति चतुर्थाश्रमिणः इत्याह । बाढमिति । वेदशिरस्त्वेनोत्तमश्लोको वेदान्तलक्षणो यस्य स तथा तस्य हरेः श्रीमच्चरणारविन्दमकरन्दरसे निरन्तरमनिलक्षणास्वादनोत्सुकान्तःकरणस्य भगवतः सर्वपूज्यस्य सन्यासिनः ।

श्रीभूहिरण्यपशवो यतेर्यस्य परिग्रहाः ।
तादृशं कश्मलं दृष्ट्वा सचैलो जलमाविशेत् ।

इति यन्निन्दावचनं तद्बाढमिति वा सिद्धावच्युतमतिः प्रयोजिकेति यत्तत्रापीदमेवोत्तरं बाढमिति । तर्हि कुटुम्बासक्तिर्विरुणद्धीति तत्राह । भगवत इति । वायोर्विषमिव हरिचरणैकशरणस्य पुंसः कुटुम्बाभिनिवेशो न मुक्तिपदवीपरिपन्थी किन्तु भूषणमेवेत्यभिप्रायः गृहस्थोऽपि विमुच्यत इत्यत्र भगवदर्पणबुद्ध्या यदि कर्म करोति तर्हि ज्ञानजननद्वारा मुक्तिसाधनमन्यथानर्थ इत्यङ्गीकारश्चेदिदमेवोत्तरं बाढमिति नैष्कर्म्यमप्यच्युतभाववर्जितमिति स्वोक्तेः अनेन तृतीयपक्षोऽपि व्याख्यातः अत्रापि भगवत इत्युक्तिरेव हेतुः कुटुम्बभरणव्यासक्तस्य वित्तेषणादिविघ्नैः भगवदुपासनालक्षणपरिचर्याया विहतिरवश्यम्भाविनीति तत्राह । भागवतेति भागवतश्च परमहंससमाजश्च भागवतपारमहंस्यः तस्य दयितः प्रियो जनः स्वां स्वविहितां शिवतमां शुभतमां पदवीं निवृत्तिलक्षणां वित्तैषणाद्यन्तरायैर्विहतां विच्छेदमुखीमपि प्रायेण [२] बहुलं न हिन्वन् न त्यजन् स्थास्यत इत्यन्वयः

(१) ब्रह्मविद्याहरेश्छायेतितृतीयनात्पर्यात् ।

(२) अस्मदादिव्यावृत्तये प्रायेणेति ।

अत्यागे कारणं भागवतेति अथवा भगवत उत्तमश्लोकस्येत्येतदत्रापि हेतुत्वेन सम्बध्यते समावेशितचेतस्त्वादिति भगवतः प्रियं परमहंसाश्रमं दयितः प्राप्तोऽपि "दय दानगतिशोषणादिषु" इति धातुः अत्रापि पूर्वोक्त एव हेतुः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

श्रीकृष्ण कृष्णचैतन्य ससनातन रूपक ।
गोपाल रघुनाथाप्त व्रजजीवक पाहि माम् ॥
पञ्चमक्रमसंन्दर्भे सन्दर्भाणां समाहृतिः ।
क्रियते यन्निदेशेन स मेऽनन्यगतेर्गतिः ॥
अथ पञ्चमस्कन्धस्य क्रमसन्दर्भः ।
स्वामिपादैर्न यद्व्यक्तं यद्व्यक्तं चास्फुटं क्वचित् ।
तत्र तत्रैव लेख्योऽयं सन्दर्भः क्रमनामकः ॥
वैष्णवापरितोषः स्याद्यत्र यत्र ततस्ततः ।
लेख्यं वैष्णवसिद्धान्तदाक्षिण्येनैव किञ्चन ॥

भागवत आत्माराम इति भगवदादिवदात्मारामेष्वपि भागवत इत्यर्थः । मुक्तानामपीत्यादिः अत एवाग्रेऽप्यस्य मुख्यं भागवतत्वमेवानुवदिष्यते नतु गौणात्मारामत्वं ततश्चात्मारामत्वेऽपि गृहारामत्वं न संभवति कुतस्तरां भागवतत्वेऽपीत्याह । कथं मुन इति । ततश्च सुतरां मोक्षमपि न संभवतीत्याह । यन्मूल इति । कर्म्मणा बन्धः पराभवश्च स्वरूपतिरस्कारो यतो भवति यद्गृहं मूलं यस्य ॥ १ ॥

तदेव स्पष्टयति । न नूनमित्यादि ॥ २ ॥

छाया आश्रयः कान्तिर्वा स्पृहा तावन्नास्त्येव मतिस्तदनुसन्धानञ्च नास्तीत्यर्थः ॥ ३ ॥

सिद्धिर्भगवत्सामीप्यादिरूपा न केवलं तस्यामेव संशयः अपितु तत्साधनरूपायां तादृशतन्मतावपीत्याह । कृष्णेचेति ॥ ४ ॥

भागवता ये परमहंसा इति पूर्ववत् । शिवतमामन्तरायेष्वपि भगवच्चित्ततापादनेन परमकल्याणरूपामित्यर्थः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रणम्य श्रीगुरुं भूयः श्रीकृष्णं करुणार्णवम् ।
लोकनाथं जगच्चक्षुः श्रीशुकं तमुपाश्रये ॥
गोपरामाजनप्राणप्रेयसेति प्रभूष्णवे ।
तदीयप्रियदास्याय मां मदीयमहं ददे ॥
त्रिभिः प्रियव्रताग्नीध्रनाभीनां चरितं क्रमात् ।
आर्षभं त्रिभिरध्यायैर्भरतस्य तथा षड्भिः ।
गयोपाख्यानमेकेन चतुर्भिर्जम्बुसंज्ञितः ।
द्वीपो निरूप्यते द्वीपान्तरशैलनगादिकम् ॥
एकेन ज्योतिश्चक्रादि द्वाभ्यां ध्रुवपदं ततः ।
एकेन द्वाभ्यां सूर्याधः अशेषस्थानमुच्यते ॥
एकेन नरकश्चैव पञ्चमस्कन्धसङ्ग्रहः ।
अत्र स्थानं तच्च देवादिभिः पालनमुच्यते ॥
देवासुरनरादीनां सूर्ध्वाधोमध्यवर्त्तिनाम् ।
तत्र तु प्रथमे ब्रह्मा गिरं सम्मानयन् व्यधात् ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

राज्यं प्रियव्रतः पश्चाद्विरज्यावाप माधवम् ।
वंशं प्रियव्रतस्यापि निबोध नृपसत्तम ! ।
यो नारदादात्मविद्यामधिगम्य पुनर्महीम् ।
भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात् पदम् ॥

इति पूर्वस्कन्धान्ते प्रियव्रतस्य प्रथममात्मारामत्वं ततो विषयभोग इति श्रुत्वा विस्मितः पृच्छति । प्रियव्रत इति । भागवत इत्यात्मारामत्वेऽपि भवानिवातिविशिष्ट इत्यर्थः । यन्मूलः गृहासक्तिहेतुकः कर्मबन्धो भवति स च शुद्धः शुद्धजीवस्य तस्य पराभवप्रदत्वात् पराभवः ॥ १ ॥

भागवतत्वे सत्यन्यत्रासक्तिर्न सम्भवतीत्याह । न नूनमिति ॥२॥

भगवत्यासक्तेर्हेतुमाह । महतामिति । छाया संसारसन्ताप निवर्त्तिका तयेति येषां चित्तं सदा भगवच्चरणानुगामीति ध्यानमुक्तं भवति स्पृहा सैवामतिरज्ञानम् ॥ ३ ॥

भवतु वा कथञ्चिदपराधवशात् किन्तु तत्रापि तस्य सिद्धिः कृष्णासक्तिश्च न च्युतेति कथम् ॥ ४ ॥

अङ्गीकृत्य परिहरति । वाढमिति । आत्मारामस्य गृहारामता गृहासक्तस्य च कृष्णासक्तिरित्युभे न सम्भवत इति सत्यमेव तदप्यतिमहतां दुर्विवतर्क्यचरितानां कापि कादाचित्की विषयासक्तिस्त्वया न विश्वसनीयेत्याह । भगवत इति । आवेशितचेतसो जनाः भागवतीं भगवतः सम्बन्धिनी चासौ परमहंसानां दयिता प्रियतमा च या कथा तां किञ्चिन्मात्रेण अन्तरायेण विघ्नेन विहतां स्थगितीकृतां न प्रायेण हिन्वन्ति न त्यजन्ति कीदृशीं स्वां शिवतमां पदवीमिति तत्कथैव भक्तानां पदवी सुखमयवर्त्म तयैव गम्यो भगवानित्यर्थः । ननु "त्वयाभिगुप्ता विचरन्ति निर्भया विनायकानीकपमूर्द्धसु प्रभो !" इत्याद्युक्तेः भक्तानामन्तरायो नास्त्येव सत्यं कालकर्म्मादिहेतुकोऽसौ नास्त्येव किन्त्वन्तरायो हि भक्तानां द्विविधः महदपराधहेतुको भगवदिच्छाहेतुकश्च । तत्र महदपराधो हि समुचितकष्टभोगेन चिरकालत एव तस्यैव महतः कृपया सद्य एव च शाम्यति । यथा द्विविदादीनां रहूगणादीनाञ्च । भगवदिच्छा च स्वभक्तसदाचारशिक्षणार्था । तदुत्थो विघ्नस्तु प्रेमवर्द्धनार्थ एव यथा भरतादीनां तत्र प्रियव्रतस्यापराधाभावाद्भगवदिच्छानिबन्धन एव विघ्नोऽयं तत्र गुणबुद्ध्यापि भक्तेः क्वापि ममता न कर्त्तव्येति यथा भरतस्य मृगपोषणप्रदर्शनया स्वभक्ता भगवता शिक्षिताः तथा महदाज्ञा हि भक्त्यनुपयोगिन्यपि भक्तैः प्रतिपालनीयैवेति प्रियव्रतकर्तृकब्रह्माज्ञाप्रतिपालनप्रदर्शनया शिक्षिता इति ज्ञेयम् ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीहंसं श्रीकुमारं च देवर्षिं निम्बभास्करम् ।
श्रीश्रीनिवासमाचार्यं भाष्यकारं महामुनिम् ॥
सर्वेश्वरं नमस्कृत्य श्रीगुरुं तत्पदाश्रयम् ।
सिद्धान्तद्योतको दीपः पञ्चमे क्रियतेऽधुना ।

अथ क्रमप्राप्तं स्थानम् षड्विंशाध्यायैर्निबद्धेन पञ्चमस्कन्धेन वर्ण्यते । यदुक्तमतिक्रान्तस्कन्धान्ते यो नारदादात्मविद्यामधिगम्य पुनर्महीम् । भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात्पदमिति तत्र प्राप्तात्मविद्यस्य गृहेष्वभिनिवेशो गृहस्थस्य च पुनस्तत्त्यागेन मोक्ष इत्यघटमानं मत्वा पृच्छति । प्रियव्रत इति चतुर्भिः । हे मुने ! प्रियव्रतो राजर्षिः भागवतः भगवद्भक्तः अत एव आत्मारामः आत्मापरमेश्वरः तत्स्वरूपगुणशक्तिचिन्तनरसासक्तः यद्गृहं मूलं यस्य सः कर्मभिर्बन्धः ज्ञानभक्तिसङ्कोचरूपेण पराभवश्च भवति तस्मिन् गृहे कथं केन हेतुना अरमत अभिनिवेशमकरोत् गृह इत्युपलक्षणं दारापत्यादीनाम् ॥ १ ॥ २ ॥

उत्तमश्लोकस्योत्तमकीर्तेर्विष्णोः पादयोः सर्वार्थप्रदत्वगुणयोगात् चरणकल्पद्रुमयोः शरणीक्रियमाणयोः कामादितापहारित्वगुणयोगादनुस्मृतिश्छाया तया निर्वृतं सुखितं चेतो येषां तेषां स्पृहायुक्ता मतिर्नास्ति ॥ ३ ॥

हेब्रह्मन् ! दारादिषु सक्तस्य कृष्णे अच्युता दारादित्यागेन निर्विघ्ना मतिः तया सिद्धिः श्रीकृष्णसाधर्म्यरूपा मुक्तिश्चाभूदिति यत् अयं महान् संशयः प्राप्तविद्यस्यापि यदा दाराद्यासक्तिस्तदा अल्पसंशयः अनादिबद्धस्य जीवस्य मायामोहादिसम्भवात् दाराद्यासक्तस्य तत्त्यागपूर्वकपरमेश्वरभक्तिर्मुक्तिश्चेति तु महान् संशय इति भावः ॥ ४ ॥

उत्तरमाह । वाढमित्यादिना । यद्यपि प्राप्तपरमात्मविद्यस्य गृहासक्तिः गृहासक्तस्य तत्त्यागेन कृष्णे अच्युता मतिर्मुक्तिश्च संशयं जनयतीति भवदुक्तं सर्वं वाढं सत्यमेव तथापि भगवतः षाड्गुण्यनिधेः उत्तमाः श्रुतिस्मृतिरूपाः प्रतिपादकाः श्लोका यस्य तस्य श्रीयुक्तचरणपद्ममकरन्दभूतो यो रसः तत्रावेशितचेतसोऽपि उत्तममार्गस्था अपि किञ्चिदन्तरायेण केनचिद्विघ्नेन विहता उत्तममार्गाच्चालिताः अपि भागवता एव परमहंसाः हेयोपादेयविदस्तेषां दयितस्य प्रियस्य भगवतः कथां स्वां शिवतमां पदवीं मार्गं न हिन्वन्ति किन्तु गृह्णन्त्येव प्रायग्रहणेन कामात्मा कलत्रापत्यकिङ्करः कृपणः अतिमन्दोऽधिकारी किञ्चित्कालं हिन्वतीति द्योत्यते उत्तमाधिकारिणस्तु गार्हस्थ्यं प्रथमत एव न स्वीकुर्वन्ति किं प्रजया किं धनेन त्यागेनैकेनामृतत्वमानशुरित्यादिश्रुतेः मध्यमाधिकारिणस्तु गार्हस्थ्यं स्वीकृत्यापि त्यजन्त्येव यदहरेव विरजेत्तदहरेव परिव्रजेदितिश्रुतेः ॥ ५ ॥

भाषा टीका ।

॥ श्रीमते रामानुजाय नमः ॥

दोहा—रामानुज पद वंदि करि. कृष्ण पाद शिरनाय ।
पञ्चम की भाषा लिखत. लक्ष्मणदास वनाय ॥ १ ॥

श्री परीक्षित् महाराज शुकदेवजी से बोले कि हे महामुनि ! प्रियव्रत जी तो महाभागवत हैं आत्माराम हैं वह घर में कैसे रत भये क्योंकि घरतो महा दुःख संसार बन्धन का मूल है ॥ १ ॥

हे मुनि श्रेष्ठ ! तिस प्रकार के संसार सङ्ग को छोड़ने वाले महा पुरुषों को इस प्रकार का घरों में अभिनिवेश होने के योग्य नहीं है ॥ २ ॥

यर्हि वाव ह राजन्! स राजपुत्रः प्रियव्रतः परमभागवतो नारदस्य चरणोपसेवयाञ्जसावगतपरमार्थसतत्त्वो ब्रह्मसत्रेण दीक्षिष्यमाणोऽवनितलपरिपालनायाम्नातप्रवरगुणगणैकान्तभाजनतया स्वपित्रोपामन्त्रितो भगवति वासुदेव एवाव्यवधानसमाधियोगेन समावेशितसकलकारकक्रियाकलापो नैवाभ्यनन्दद्यद्यपि तदप्रत्याम्नातव्यं तदधिकरण आत्मनोऽन्यस्मादसतोऽपि पराभवमन्वीक्षमाणः ॥ ६ ॥

अथ ह भगवानादिदेव एतस्य गुणविसर्गस्य परिबृंहणानुध्यानव्यवसितसकलजगदभिप्राय आत्मयोनिरखिलनिगमनिजगणपरिवेष्टितः स्वभवनादवततार ॥ ७ ॥

स तत्र तत्र गगनतल उडुपतिरिव विमानावलिभिरनुपथममरपरिवृढैरभिपूज्यमानः पथि पथि च वरूथशः सिद्धगन्धर्वसाध्यचारणमुनिगणैरुपगीयमानो गन्धमादनद्रोणीमवभासयन्नुपससर्प ॥ ८ ॥

तत्र ह वा एनं देवर्षिर्हंसयानेन पितरं भगवन्तं हिरण्यगर्भमुपलभमानः सहसैवोत्थायार्हणेन सह पितापुत्राभ्यामवहिताञ्जलिरुपतस्थे ॥ ९ ॥

भगवानपि भारत ! तदुपनीतार्हणः सूक्तवाकेनातितरामुदितगुणगणावतारसुजयः प्रियव्रतमादिपुरुषस्तं सदयहासावलोक इति होवाच ॥ १० ॥

भाषाटीका ।

हे विप्रर्षि ! उत्तमश्लोक भगवान् के चरण कमल की छाया में जिनका चित्त सन्तुष्ट होरहा है तिनको कुटुम्ब में इच्छा बुद्धि नहीं होती है ॥ ३ ॥

हे ब्रह्मन् ! हमको यह बडा सन्देह है जो कि स्त्री पुत्र गृहादि में आसक्त होने पर भी उनकी मति कृष्ण के विषय में अचल भई और मोक्ष की सिद्धी भी होगई ॥ ४ ॥

श्री शुकदेवजी बोले हे राजन् ! आपने ठीक कहा है परन्तु जिन पुरुषों के चित्त उत्तम श्लोक भगवान् के श्रीमच्चरण कमल के मकरन्द रसमें लगे हैं उन पुरुषों को मध्य में कोई विघ्न आपडते हैं तो भी अपने कल्याण करने वाली महा भागवत परमहंसों के प्रिय जो श्रीकृष्ण तिनकी कथा को प्रायःकरके नहीं त्यागते हैं तिसी से गृहस्थ होने पर भी प्रियव्रत जी की कृष्ण कथा नहीं छूटी तब कथाही से उनकी मोक्षसिद्धी भी होगई तो कुछ आश्चर्य नहीं है ॥ ५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रियव्रतस्य ब्रह्मणैवान्तरायरूपा बभूवेति सप्रसङ्गमाह । यर्हीत्यादिना । विमुक्तसङ्गः प्रकृतिं भजत्त्वेत्यन्तेन यर्हि वाव ह यदा हि वावेति प्रसिद्धार्थौ ह इति च स स्वपित्रा मनुनाऽवनितलपरिपालनायोपामन्त्रितो नियुक्तो नैवाभ्यनन्दत्तैच्छत् अथ ह तदैव भगवानादिदेवो ब्रह्मा स्वभवनादवततारेत्यन्वयः उपामन्त्रणे हेतुः आम्नाता राज्ञां शास्त्रेणोक्ता ये प्रवराः श्रेष्ठा गुणास्तेषां गणस्यैकान्तभाजनतया नियताश्रयत्वेन अनिच्छायां हेतुः परमार्थसतत्त्वमात्मयाथात्म्यमवगतं तद्येन स तथा अतो ब्रह्मसत्रेणात्मध्यानेन कार्येण दीक्षिष्यमाणो नियमं ग्रहीष्यन् प्रागपि वासुदेव एव निरन्तरसमाधियोगेन चित्तैकाग्र्येण समावेशितः समर्पितः सकलकारकाणामिन्द्रियाणां याः क्रियास्तासां कलापो येन सः यद्यपि तत्पित्रोक्तं न प्रत्याख्येयं तथापि तदधिकरणे राज्याधिकारेऽसतोऽपि मिथ्याभूतादपि राज्यप्रपञ्चादात्मनः पराभवमालोचयन्नाभ्यनन्दत् ॥ ६ ॥

गुणविसर्गस्य गुणसृष्टेः परिबृंहणं समृद्धिस्तदनुचिन्तया व्यवसितः सकलजगतामभिप्रायो येन सः यथा राज्ञा चारैर्मण्डलेश्वराणामभिप्रायो निश्चीयते तद्वत् अखिलैर्निगमैर्मूर्तिमद्भिर्वेदैर्निजगणैश्च मरीच्यादिभिः परिवृतः सत्यलोकादवतीर्णः ॥ ७ ॥

स च ब्रह्मा तत्र तत्रोडुपतिश्चन्द्र इव प्रकाशमानो गन्धमादनस्य द्रोणीं दरीमवभासयन्नुपससर्पेत्यन्वयः अमरपरिवृढैर्देवेन्द्रादिभिः ॥ ८ ॥

हंसयानेनोपलक्षणेनैनं पितरमुपलभमानो मत्पितायमिति लक्षयन्पितापुत्राभ्यां मनुप्रियव्रताभ्यां सह नारदः कृताञ्जलिः सन्सहसैवाभ्युत्थायार्हणेन पूजया सहोपतस्थे तुष्टाव प्रियव्रतं तदा मन्दरद्रोण्यां नारद उपदिशति मनुश्च तं नेतुमागतोऽस्तीति ज्ञातव्यम् ॥ ९ ॥

हे भारत! भगवानादिपुरुषो ब्रह्मापि तं प्रियव्रतमिति होवाचेत्यन्वयः तेन नारदेनोपनीतमर्हणं यस्य सः सूक्तवाक्येन यथोचितवाक्येन अतिशयेनोदिता वर्णिता गुणगणा अवताराः सुजयाः सर्वोत्कर्षाश्च यस्य ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदुक्तं स्वात्मपरमात्मयाथात्म्यानुभवनिष्ठस्य कथं गृहाद्यभिनिवेश इति तत्परिजिहीर्षुस्तस्य प्रथमं निवृत्तिधर्मनिष्ठां स्वायम्भुवब्रह्मभूप्रार्थनया गृहाश्रमपरिग्रहं चाह । यर्ही-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्यादिना । वावेति निपातसमुदायःप्रसिद्धिद्योतकः यदा हि राज्ञः मनोः पुत्रः स प्रियव्रतः सर्वोत्कृष्टभागवतधर्मनिष्ठः नारदस्य गुरोश्चरणसेवयाञ्जसा सुखेनैव तत्त्वेन सहितः सतत्त्वः तत्त्वग्रहणं हितस्याप्युपलक्षणम् अधिगतः परमपुरुषार्थः सतत्त्वः तत्त्वहिताभ्यां युक्तः येन अधिगततत्त्वहितपुरुषार्थ इत्यर्थः अवगतपरमपुरुषार्थतत्त्व इति पाठेऽप्ययमेवार्थः पुरुषार्थतत्त्वग्रहणस्य उपायस्याप्युपलक्षणत्वात् ब्रह्मसत्रेण ज्ञानयज्ञेन दीक्षिष्यमाणः स्वपरयाथात्म्यविज्ञाननिष्ठो भवेयमिति कृतसंकल्पः भगवति वासुदेव एवाविच्छिन्नध्यानयोगेन समाधियोगेनेति हेत्वर्थे तृतीया हेतुरिह फलमध्ययनेन वसतीतिवत् अव्यवधानसमाधियोगार्थं समावेशितः ब्रह्मार्पणं ब्रह्महविरिति न्यायेन भगवति समर्पितः सकलकारकाणि कर्त्रादीनि षट् तेषां क्रियास्तद्व्यापारास्तासां च कलापः समूहो येन कर्तृकरणत्वादिकं ब्रह्मण एवानुसंदधत् कारकव्यापाराणां ब्रह्माराधनरूपतां चानुसंदधानः भक्तियोगानुग्राहकत्वेन फलासङ्गकर्तृत्वत्यागपूर्वकमीश्वराराधनैकवेषस्ववर्णाश्रमोचितधर्मानुष्ठानपर इत्यर्थः स्वपित्रा स्वायंभुवमनुना उपामन्त्रणकर्त्रा आम्नाता राज्ञां गुणत्वेन नीतिशास्त्रेषु कथिता ये श्रेष्ठाः गुणास्तेषामेकान्तभाजनतया नियताश्रयत्वेन हेतुना ऽवनितलपालनाय उपामन्त्रित उपच्छन्दितोऽपिप्रार्थितोऽपि नैवाभ्यनन्दन्नैच्छत् अवनितलपालनमिति विभक्तिव्यत्ययेनानुषङ्गः नन्वेतावदेव शुश्रूषा कार्या पितरि पुत्रकैः बाढमित्यनुमन्येत सादरं यद्गुरोर्वच इत्यादिशास्त्रार्थं जानन् सद्गुणाश्रयः कथं नैच्छदित्याशङ्क्य समाधत्ते । यद्यपीति । तत्पित्रोक्तं यद्यपि न प्रत्याख्येयं तथापि तदधिकरणे राज्याधिकरणे सर्वात्मनः अन्यस्मादसतः प्रकृतिपरिणामरूपाद्देहात्तत्प्रयुक्तरागादेश्च पराभवं ज्ञानसंकोचमन्वीक्षमाणः निरूपयन्नाभ्यनन्ददित्यनुषङ्गस्तेनैवान्वयो वा ॥ ६ ॥

अथ पितृप्रार्थनानभिनन्दनानन्तरं ह्वावेति पूर्वप्रसिद्धिद्योतको निपातसमुदायः देवानामाद्यो भगवानात्मयोनिर्ब्रह्मा गुणपरिणामरूपस्यैतस्य जगतः परिबृंहणं ज्ञानेन परितो व्याप्तिरनुध्यानमनुचिन्तनं ताभ्यामवसितः सकलजगदभिप्रायो येन सः स्वधर्मभूतज्ञानेनाभितो व्याप्य तद्बुद्धिविषयं साक्षात्कृत्य एवंविधोऽस्य लोकस्याभिप्राय इतिकृतनिश्चय इत्यर्थः अखिलैर्निगमैर्मूर्त्तिमद्भिर्वेदैर्निजगणैर्मरीच्यादिभिश्च परिवृतः स्वभवनात्सत्यलोकादवतीर्णः ॥ ७ ॥

अवतरन्तं ब्रह्माणं विंशिषन्प्रियव्रतसमीपं जगामेत्याह । तत्रेति । तत्र तत्र लोके ऽर्वाचीने गगनतले उडुपतिश्चन्द्र इव प्रकाशमानः अनुपदं पदेपदे प्रतिक्षणमित्यर्थः अमरश्रेष्ठैर्देवेन्द्रादिभिरभितः कार्त्स्न्येन पूज्यमानः प्रतिमार्गे वरूथशः संघीभूतैः सिद्धानां गणैः प्रत्येकं सिद्धादिसङ्घाभिप्रायेण गणशब्दः प्रयुक्तः अतो न पौनरुक्त्यमुपसमीपमेत्य गीयमानस्य गन्धमादनस्य गिरेर्द्रोणीं प्रकाशयन्नुपससर्प समीपं गतः ॥ ८ ॥

तत्रह देवर्षिर्नारदः एनमवतरन्तं हंसवाहनेनोपलक्षणेन पितरं भगवन्तं चतुर्मुखमुपलभमानः हिरण्यगर्भोऽयमितिजानन् स आश्वेव पितापुत्राभ्यां मनुप्रियव्रताभ्यां सहोत्थायार्हणेन पूजया सह कृताञ्जलिर्बद्धाञ्जलिरुपतस्थे तुष्टाव तदा मन्दरद्रोण्यां प्रियव्रतस्य ज्ञानोपदेशाय नारद आगत्य स्थित इति बोध्यम् ॥ ९ ॥

हेभारत ! भगवान् हिरण्यगर्भोऽपि तेन नारदेन उपनीतं कृतमर्हणं पूजनं यस्य सम्यगुक्तेन वाक्येन समीचीनस्तुतिरूपेण वाक्येन नितरामुदितः वर्णितः गुणगणावतारः सत्यलोकादवरुह्य पृथिव्यामागमः तत्सम्बन्धिसुजयः सर्वोत्कर्षः स्वागतमिति यावत् चतुर्मुखरूपेण भगवदावेशावतारस्तत्सम्बन्धी सुजयो वा यस्य सदयः दयायुक्तोऽवलोको यस्य सः तं प्रियव्रतमिति वक्ष्यमाणं वाक्यमुवाच ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दारादिषु सक्तस्य प्रियव्रतस्य कृष्णविषयाच्युतमत्या सिद्धिः कथमभूदिति प्रश्नपरिहारः कथमागत इति तद्वक्तुमुपक्रमते यर्हीति । प्रियव्रतोऽप्येष्वेक इति कृत्वा तच्चरितं वक्तुमुपक्रमते इत्यतोवाह । यर्हीति । यर्हि यदा स राजपुत्रः प्रियव्रतो भुवनरक्षणाय स्वपित्रा स्वायम्भुवेनोपामन्त्रितो नियोजितोऽपि राज्यरक्षणलक्षणं पितृवचनं नैवाभ्यनन्दन्नाङ्गीकृतवान् वाव किल अथ तदात्मयोनिर्ब्रह्मा स्वभवनादवततार हेत्यन्वयः अनभिनन्दने किङ्कारणमित्यत उक्तं ब्रह्मेति ब्रह्मसत्रेण सन्यासेन दीक्षिष्यमाणः सन्यासदीक्षां प्राप्नुयामिति मन्वानः ननुः अज्ञाततत्त्वस्य संन्यासाधिकारः कथमस्य सम्भवतीत्यत उक्तमवगतेति अवगतं परमार्थसत्तत्त्वं येन सोऽवगतपरमार्थसत्तत्त्वः कालत्रयेप्यबाधितब्रह्माख्यतत्त्वज्ञानीत्यर्थः अलौकिकस्य वस्तुनो विशेषज्ञानं गुरुकटाक्षं विना न घटत इत्यत उक्तं चरणेति गुरोरिति शेषः एवं विधस्य समग्रानुग्रहकर्ता गुरुः कः येन तत्त्वज्ञानं स्यादित्यत उक्तं नारदस्येति नन्वयोग्यश्चेत्तत्त्वज्ञानग्रहणं कथं सम्भाव्यत इत्यत उक्तं परमभागवत इति इदं चानभिनन्दने कारणमित्याह । भगवतीति । अव्यधानो ऽव्यवधानरहितोऽ प्रतिबद्धो यः समाधियोगश्चित्तैकाग्रतालक्षणस्तेन वासुदेवे भगवत्येव सम्यगावेशितः समर्पितः सकलानां कारकाणां चक्षुरादीन्द्रियाणां क्रियाकलापो व्यापारसमूहो येन स तथा जीवस्य ब्रह्माधीनत्वनिरीक्षणलक्षणसमाधियोगेन संन्यस्ताहंकर्तृत्वादिसमुदायो वा नन्वज्ञवत् पित्रादेशमुल्लङ्घयत्कथमयमिति तत्राह । यद्यपीति । राज्यं कुर्विति यत्पित्रोक्तं तद्वचनमप्रत्याम्नातव्यं न करोमीति निराकर्तुमयुक्तं यदपि यद्यपीति जानाति तथापि तदधिकरणे राज्यरक्षणाधिकारे असतो ऽप्रशस्तादन्यस्माच्छब्दादेर्विषयादात्मनो मनआदेः पराभवं पुनः पुनः संसारप्राप्तिलक्षणं पराजयमन्वीक्षमाणः सम्यक् पश्यन् गुरुवचनं चात्मस्नेहे निमित्तमिति संपश्यमानः अनेन गुर्वादेशोल्लङ्घनदोषोऽपि पर्यहारीति (१) द्रष्टव्यम् नन्वेवं विधश्चेत्किमिति पित्रोपामन्त्रित इति तत्राह आम्नातेति । आम्नाता नीतिशास्त्रेण परिपठिताः प्रवराः उत्तमा राज्ञां गुणा अभिगम्यादयो ये तेषामेकान्तभाजनतया नियतपात्रत्वात् ॥ ६ ॥

नन्वतर्किताभ्यागमने किंकारणमिति तत्राह । एतस्येति । सत्त्वादिगुणैर्विविधः सर्गो यस्य तत्तथा तस्यैतस्य जगतः परिबृंहणं वृद्धिस्तस्यानुध्यानं सदा सञ्चिन्तनं तेन व्यवसितो निश्चितो ऽखिलजगदभिप्रायो येन स तथा परिबृंहणं सृष्टिः

---

(१) गुरूणां वचनमपि मोक्षपरिपन्थीचेत्तदग्राह्यमिति ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तदनन्तरकालीनानुध्यानेनापराचीकृत इष्टानिष्टप्राप्तिपरिहारोपायलक्षणो जगदभिप्रायो येनेति वा अखिलैर्मूर्तिमद्भिर्निगमैर्वेदादिशास्त्रैर्मरीच्यादिनिजगणैश्च परिवृत इत्यनेन श्रुतशास्त्रस्य प्रियव्रतस्यात्मयोनिवचनेऽतिविश्वासजननायोक्तमिति दर्शितम् ॥ ७ ॥

तद्वचनस्यग्राह्यत्वे तन्माहात्म्यमाह । तत्र तत्रेति। उडुपनिश्चन्द्र इवेति दृष्टान्तः सौम्यत्वे अमरपरिवृढैर्देवश्रेष्ठैरनुपथमिति वीप्सायां गन्धमानदस्य पर्वतस्य द्रोणीं निम्नं नितम्बप्रदेशं प्रियव्रततपःस्थानं प्रकाशयन्नुपससर्प प्राप बाढमित्याद्येकं वाक्यं वा महान् संशयो म इति यदुक्तं तद्बाढं सत्यमित्यङ्गीकारः कथं मन्दानां सन्देहावकाशो न विदुषां तथा हि प्रियव्रतस्य प्रथमशरीरग्रहणमारभ्य हरिचरणारविन्दमकरन्दरसास्वादनैकचित्तत्वात् कुटुम्बासक्तिर्मुक्तिपरिपन्थिनी न स्यात् त्रिजगद्गुरुवरचतुर्मुखाज्ञाकारित्वेन गुणकरी च एतत्कुत इति तत्राह । भगवतेति । शेषं पूर्ववत् ॥ ८ ॥

ह्वा इत्येतौ निपातौ गद्यवाक्यालङ्कारार्थौ इतिहासश्रद्धातिशयजननार्थौ वा तत्र तस्यामवस्थायां हंसयानेन लक्षणेन स्वपितरं चतुर्मुखमुपलभमानः पश्यन्नारदः शिष्यशिक्षणाय पूर्वमुपविष्टः सहसैव झटित्येव पितापुत्राभ्यां नाम्ना स्वयंभुवप्रियव्रताभ्यां सह बद्धाञ्जलिरुपतस्थे उत्थानसेवामकरोत् ॥ ९ ॥

तेन प्रियव्रतेन मनुना चोपनीतमर्पितमर्हणमर्घ्यपाद्यादिपूजनं यस्मै स तथा "हिरण्यगर्भः समवर्त्तताग्र" इत्यादिसूक्तवचनेन स्वागतमुपविशासनमित्यादिप्रियवाक्येन वा नितरामतिशयेनोदितौ प्रकाशितौ गुणावतारो गुणविस्तारश्च शोभनो विजयश्च यस्य स तथा दयया सहितो हासः तादृशेन युक्तोऽवलोको यस्य स तथा एवंविध आदिपुरुषश्चतुर्मुखस्तं प्रियव्रतमिति वक्ष्यमाणप्रकारेणोवाच ह किल प्रत्यारम्भे प्रसिद्धौ च "वार्त्तासम्भाव्ययोः किल" इतियादवः सूक्तवाक्येन हितोपदेशसहितवाक्येन वा ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

राजपुत्र इति नववयस्त्वं ज्ञापितं तत्र स्वभावत एव परमभागवतः ततो नारदस्येत्यादि । ततो भगवति वासुदेव इत्यादि ततो ब्रह्मसत्रेणेत्यादि ततोऽवनितलपरिपालनायेत्यादि । ततोनैवाभ्यनन्ददिति योज्यम् । तत्र परमार्थसतत्त्वं भगवत्तत्त्वं कारणानि स्वाभाविकेन्द्रियचेष्टाः क्रियाकलापाश्च शास्त्रोक्ताः तेषां समर्पणञ्च यत् करोषि यदश्नासीत्यादि । ब्रह्मार्पणं ब्रह्म हविरित्यादि श्रीगीतोक्तप्रकारेण ज्ञेयम् । ब्रह्मसत्रेण इतः परं भगवत्तत्त्वमात्रं परस्परं विचारयितव्यम् नान्यत् किमपि कर्त्तव्यमिति सङ्कल्पेन दीक्षिष्यमाणो नियमं कर्त्तुमुद्यत इत्यर्थः ॥ ६—२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रियव्रतस्यात्मारामत्वमौत्पत्तिकमेव श्रीनारदकृपया परमभागवतत्वं श्रीब्रह्माज्ञया गार्हस्थ्यञ्चाह । यर्हीत्यादिना । यावेत्येवार्थे यर्ह्येव प्रियव्रतः स्वपित्रा अवनितलप्रतिपालनाय उपामन्त्रितो नियुक्तोऽपि तत् नैवाभ्यनन्दत् तदा ब्रह्मा स्वभवनादवततारेत्यन्वयः । अञ्जसा शीघ्रं सतत्त्वं तत्त्वं ब्रह्मसत्रेण आत्मध्यानेन दीक्षिष्यमाणः दीक्षां प्राप्स्यन् अतः परं सच्चिदानन्दमात्रं यद्वस्तु तदेवानुभवनीयं नतु प्राकृतं किमपीति सङ्कल्पेन नियमं कर्त्तुमुद्यत इत्यर्थः । तत्क्षण एव पित्रा मनुना आम्नाता राज्ञां शास्त्रेणोक्ता ये प्रवरा गुणास्तेषां गणस्य एकान्तभाजनतया नियताश्रयत्वेन हेतुना हे प्रियव्रत ! सम्प्रति त्वमवनिं पालय इत्युपामन्त्रितस्तन्नाभ्यनन्दत् स्वस्याभद्रममन्यतेति नैच्छदित्यर्थः । कुतः भगवति अव्यवधानसमाधियोगेन निरन्तरैचित्तैकाग्र्येण सम्यक् निवेशितः सकलानां कारकाणामिन्द्रियाणां व्यापारसमूहो येन सः यद्यपि तत् पित्रोक्तमप्रत्याम्नातव्यमप्रत्याख्येयम् । तदपि नाहं राज्यं करोमीति प्रत्याख्यातवानेवेत्यर्थः कुतः तदधिकरणे राज्याधिकारे आत्मनः स्वस्य अंशतः असाधुभूतादपि कामक्रोधादेः सकाशात् पराभवं पर्य्यालोचयन् ॥ ६ ॥

अथ ह ततश्चादिदेवो ब्रह्मा गुणविसर्गस्य जगत्सृष्टेः परिवृंहणं समृद्धिस्तदनुचिन्तया व्यवसितः सकलजगतामभिप्रायो येन सः । यथा राज्ञा चारैः मण्डलेश्वराणामभिप्रायो निश्चीयते तद्वत् अखिलैः निगमैः मूर्त्तिमद्भिर्वेदैः निजगणैश्च मरीच्यादिभिश्च परिवृतः इति प्रियव्रतं प्रत्युपदेष्टव्ये धर्मे प्रमाणीकरणार्थं सत्यलोकादवतीर्णः भूतलमिति शेषः ॥ तत्र प्रियव्रतं बाल्यमारभ्यैव विरक्तं गृहान्निर्विद्य वन एव कृतवासं ज्ञात्वा तदाज्ञया कनिष्ठोऽप्युत्तानपादो राज्यं चकार तद्वंश्याश्च प्रचेतःपर्य्यन्तं यथा समयं राज्यं चक्रुरेवञ्च स्वायम्भुवमन्वन्तरस्यार्द्धादप्यधिकः कालो गच्छतिस्म । प्राचेतसो दक्षस्तु स्वायम्भुवे मन्वन्तर एव लब्धजन्मा पौत्रैभविकैश्वर्य्यकामनया तपसे जगाम ततश्चाराजकं वीक्ष्य मनुरुपायान्तरमनालोच्य विरक्तमपि प्रियव्रतं वनादानिनीषन्नप्यानेतुं यदा न शशाक तदा ब्रह्मैवागत्य प्रियव्रतं राज्ये प्रवर्त्तयामास । ततश्च पञ्चममन्वन्तरपर्य्यन्तं क्रमेण प्रियव्रतस्य तद्वंश्यानां राज्ञाञ्चाधिकारः तृतीयचतुर्थपञ्चममनूनामुत्तमतामसरैवतानां प्रियव्रतपुत्रत्वात् द्वितीयमनोः स्वारोचिषस्यापि तदन्तःपातात् तत्तन्मनुपुत्रपौत्राद्यास्तु प्रैयव्रता एव राज्ये खण्डमण्डलेश्वररूपा राजानो बभूवुः ततश्च षष्ठस्य चाक्षुषमन्वन्तरस्याप्यारम्भे तपसो निवृत्तेन दक्षेण प्रजासृष्टिस्तत्रैव तस्य साम्राज्यञ्च यदुक्तं "चाक्षुषे त्वन्तरे प्राप्ते प्राक्सर्गे काल विप्लुते । यः ससर्ज प्रजा इष्टाः स दक्षो दैवचोदित" इति । चाक्षुषस्य मनोरुत्तानपादवंश्यत्वात्तन्मन्वन्तरपर्य्यन्तमेव स्वायम्भुवमनोरधिकार इति ज्ञेयम् ॥ ७ ॥

भूतलं प्रति तस्यावतरणे शोभामाह । स ब्रह्मा परिवृढैर्नुन्नैः कीदृशैः विमानानामावलिर्येषां तैः ॥ ८ ॥

हंसयानोपलक्षणेन पितापुत्राभ्यां मनुप्रियव्रताभ्याम् ॥ ९ ॥

तदा नारदस्तत्र प्रियव्रतमुपदिशति । मनुस्तं नेतुमागतोऽस्तीति ज्ञेयम् । भगवान् ब्रह्मापि प्रियव्रतमुवाच तैर्नारदमनुप्रियव्रतैरुपनीतमर्हणं यस्मै सः उदितो वर्णितो गुणगणः स्वप्रजासु वात्सल्यादिस्तत एव हेतोरवतारः सत्यलोकादवतरणं तत एव सुजयः अत्युत्कर्षो यस्य सः । सदयेति अस्याभिवाञ्छितभक्ति-

॥ श्रीभगवानुवाच ॥

निबोध तातेदमृतं ब्रवीमि मासूयितुं देवमर्हस्यप्रमेयम् ।
वयं भवस्ते तत एष महर्षिर्वहाम सर्वे विवशा यस्य दिष्टम् ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ज्ञानवैराग्ययोरहमेव प्रतिबन्धकोऽभूवं तद्गार्हस्थ्येऽप्यस्य भक्तिवर्द्धनामेवेत्याशीर्व्यञ्जकः सदयावलोकः अहं राज्यं न करोमीति तव प्रौढिः त्वामहं राज्यं कारयामीति मम प्रौढिस्तत्र पश्यामः कस्याद्य प्रौढिस्तिष्ठतीति नम्रत्रि प्रियव्रते सहासावलोकश्च यस्य सः ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

प्रियव्रतस्तु ब्रह्मणैव गार्हस्थ्ये किंचित्कालं नियोजितस्तदाज्ञां पालयित्वा पुनर्निवृत्त इत्याह । यर्हीत्यादिना । नारदस्य पदवीं पुनरेवानुससारेत्यन्वेन वावह इति निपातसमुदायो वाक्यालंकारार्थः यर्हि यदा सः प्रियव्रतः नारदस्य चरणोपसेवया अञ्जसा सुगमेनैव यत्नेन अवगतपरमार्थसतत्त्वः अवगतमुपलब्धं परमार्थसतत्त्वं परमात्मस्वरूपगुणादियाथात्म्यं येन सः अत एव परमभागवतः अत एव ब्रह्मसत्रेण बृहत्स्वरूपगुणादिभगवद्विषयकज्ञानयज्ञेन भगवत्स्वरूपादिश्रवणमनननिदिध्यासनव्यापारेण दीक्षिष्यमाणः पित्रा मनुना आज्ञातो राजनीतौ प्रोक्ता ये प्रवराः गुणास्तेषां गणस्यैकान्तभाजनतया अवनितलपरिपालनाय उपामन्त्रितः अनुज्ञातः यद्यपि यत्पितुर्वचनमप्रत्याम्नातव्यमप्रत्याख्येयं तथापि नाभ्यनन्दत् न प्रशशंस नाङ्गीचकारेत्यर्थः तत्र हेतुमाह । तदधिकरणे इत्यादिना तदधिकरणे अवनिपालनाधिकारे आत्मनः जीवस्वरूपतः अन्यस्मात् अनसः असतः असाधुतः बन्धकारणात् पराभवमन्वीक्षमाणः वासुदेवे एव निरन्तरसमाधियोगेन समावेशितः सम्यगर्पितः सकलकारकाणामिन्द्रियाणां याः क्रियास्तासां कलापो येन सः अथानन्तरमेव एतस्य विश्वस्य गुणविसर्गस्य गुणाविस्रुष्टेः परिबृंहणानुध्यानेन व्यवसितः सकलजगदभिप्रायो येन सः अखिलैर्निगमादिभिः परिवेष्टितः स्वभवनादवततार ॥ ६ ॥ ७ ॥

स ब्रह्मा अनुपथं पथि पथि विमानावलिभिरुपलक्षितैः देवश्रेष्ठैः अभिपूज्यमानः पथि पथि च वरूथशः पुञ्जभूतैः सिद्धादिगणैरुपगीयमानः उडुपतिरिव गन्धमादनस्य द्रोणीं दरीमवभासयन्नुपससार समीपं गतः ॥ ८ ॥

देवर्षिः एतं पितरं हंसयानेनोपलक्षणेन पितैवायमित्युपलभमानः पुत्राभ्यां पितापुत्राभ्यां मनुप्रियव्रताभ्यां सह कृताञ्जलिः अर्हणेन पूजया सहोपतस्थे तुष्टाव ॥ ९ ॥

तेन देवर्षिणा उपनीतं संपादितमर्हणं पूजनं यस्य सूक्तवाक्येन सूक्तानि सुष्ठु उक्तानि वाक्यानि यस्मिंस्तेन स्तोत्रेण अतितरामुदिताः प्रकाशिता गुणगणाः अवताराः शोभना जयाः सर्वोत्कर्षाश्च यस्य सः प्रियव्रतं ह स्फुटमुवाच ॥ १० ॥

भाषाटीका ।

हे राजन् ! जब वे राजपुत्र प्रियव्रत परम भागवत श्रीनारदजी के चरणसेवा से अनायाससे परमार्थतत्त्व ज्ञान को प्राप्त करके ब्रह्मसत्रयागसे दीक्षाग्रहणकरने को उद्यतभये तब भगवान् वासुदेव के विषय निरन्तर चित्तकी एकाग्रता से सब क्रिया सब इन्द्रियों के व्यापार को भगवान् मे समर्पण करदिया फिर राजों के कहे जो शास्त्रोक्त श्रेष्ठगुण तिनका पात्र होनेसे उन के पिताने जब पृथवी के पालन करने की आज्ञा दी तब उस बात को अच्छा नहीं समुझा यद्यपि पिता की आज्ञा त्यागने योग्य नहीं है तथापि राज्य का अधिकार होने से असत्प्रपंच में पडनेसे सत् आत्म स्वरूप का तिरस्कार होना जानकर राज्यपालन न किया ॥ ६ ॥

इसके अनन्तर इस सब जगत् के गुणत्रयकी सृष्टि की वृद्धिकी चिन्ता के होने से सब प्राणियों के अभिप्राय को जानने वाले भगवान् आदि देव आत्मयोनि ब्रह्माजी देह धारी वेदगण तथा मरीच्यादि ऋषि गण इनोंसे वेष्टित हो कर अपने स्थान सत्य लोग से उतरे ॥ ७ ॥

मार्ग में आकाश के मध्य में बडे देव गणोंके विमानों की पङ्क्तियों से वेष्टित होकर पूजित होते हुये रस्ते रस्ते में समूहके समूह सिद्ध गन्धर्व साध्य चारण मुनि गणोंसे गाये जातेथे इसी प्रकार से गन्धमादन पर्वत की कन्दरा को प्रकाशकरते हुये प्रियव्रत के समीप आगये ॥ ८ ॥

उहांपर हंसविमानपर बैठे हुये भगवान् हिरण्यगर्भ ब्रह्माजी को देखकर अपने पिता होने से पिता पुत्र जो स्वायम्भुव मनु प्रियव्रत तिनके सहित आप भी नारदजी हाथ जोडकर ब्रह्माजी की अस्तुति करने लगे ॥ ९ ॥

हे परीक्षितजी ! नारदादिकों ने जब ब्रह्माजी की पूजा की और सुन्दर वचनों से अत्यन्त उनके अवतारों के सुन्दर गुणगणों का गान किया तब बैठकर आदि पुरुष ब्रह्माजी दया से हासयुक्त कृपा दृष्टि से देखकर प्रियव्रत से बोलने लगे ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रवृत्तिनिष्ठं मद्वाक्यं प्रतिकूलं मत्वा मय्यसूयां करिष्यतीति शङ्कमानो नाहमेवं वदामि किन्तु मन्मुखेन हरिरेव त्वामाज्ञापयतीति वदन्प्रवृत्तिनिवृत्तिरहस्यमाह । निबोधेति नवभिः । अतं सत्यमप्रमेयं देवमसूयितुं दोषारोपेण द्रष्टुं नार्हसि ते तव ततस्तात एष त्वद्गुरुश्च महर्षिः दिष्टमादिष्टमाज्ञां विवशा अस्वतन्त्राः सन्तो वहामः ॥ ११ ॥

न तस्य कश्चित्तपसा विद्यया वा न योगवीर्येण मनीषया वा ।
नैवार्थधर्मैः परतः स्वतो वा कृतं विहन्तुं तनुभृद्विभूयात् ॥ १२ ॥
भवाय नाशाय च कर्म कर्तुं शोकाय मोहाय सदाभयाय ।
सुखाय दुःखाय च देहयोगमव्यक्तदिष्टं जनताङ्ग ! धत्ते ॥ १३ ॥
यद्वाचि तन्त्यां गुणकर्मदामभिः सुदुस्तरैर्वत्स ! वयं सुयोजिताः ।
सर्वे वहामो बलिमीश्वराय प्रोता नसीव द्विपदे चतुष्पदः ॥ १४ ॥
ईशाभिसृष्टं ह्यवरुन्ध्महेऽङ्ग ! दुःखं सुखं वा गुणकर्मसङ्गात् ।
आस्थाय तत्तद्यदयुङ्क्त नाथश्चक्षुष्मतान्धा इव नीयमानाः ॥ १५ ॥
मुक्तोऽपि तावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः ।
यथानुभूतं प्रतियातनिद्रः किन्त्वन्यदेहाय गुणान्न वृङ्क्ते ॥ १६ ॥
भयं प्रमत्तस्य वनेष्वपि स्याद्यतः स आस्ते सह षट्सपत्नः ।
जितेन्द्रियस्यात्मरतेर्बुधस्य गृहाश्रमः किन्नु करोत्यवद्यम् ॥ १७ ॥
यः षट्सपत्नान्विजिगीषमाणो गृहेषु निर्विश्य यतेत पूर्वम् ।
अत्येति दुर्गाश्रित ऊर्जितारीन् क्षीणेषु कामं विचरेद्विपश्चित् ॥ १८ ॥
त्वं त्वब्जनाभाङ्घ्रिसरोजकोशदुर्गाश्रितो निर्जितषट्सपत्नः ।
भुङ्क्ष्वेह भोगान्पुरुषातिदिष्टान्विमुक्तसङ्गः प्रकृतिं भजस्व ॥ १९ ॥

॥ श्रीशुक उवाच ॥

इति समभिहितो महाभागवतो भगवतस्त्रिभुवनगुरोरनुशासनमात्मनो लघुतयावनतशिरोधरो बाढमिति सबहुमानमुवाह ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विधातृवशमेवाह । चतुर्भिः नेति । तस्य कृतं तेन निर्मितं तनुभृज्जीवस्तपआदिभिर्विहन्तुमन्यथाकर्तुं न विभूयात्प्रभुर्न भवेत् मनीषया सामादिबुद्धिबलेन परतो बलवदाश्रयात् ॥ १२ ॥

तत्र देहयोगे तावत्पारतन्त्र्यं प्रसिद्धमित्याह । भवायेति । भवो जन्म भवाद्यर्थमव्यक्तेनेश्वरेण दिष्टं दत्तं देहयोगं जनता जीवसमूहः सदा धत्ते नत्वन्यथा कर्तुं शक्नोति अङ्ग ! हे प्रियव्रत ॥ १३ ॥

कर्मकरणेऽपि पारतन्त्र्यमाह । यद्वाचीति । यस्य वाचि वेदलक्षणायां तन्त्यां दामन्यां गुणाः सत्त्वादयस्तत्पूर्वकाणि च यानि कर्माणि तन्निबन्धनैर्दामभिर्ब्राह्मणादिशब्दैः सुदुस्तरैः सुदृढैर्हे वत्स ! वयं सर्वे सुयोजिता निबद्धाः सन्तस्तस्मै ईश्वराय बलिं वहामस्तदिच्छया कर्म कुर्मः नसि नासिकायां प्रोता बद्धाः सन्तश्चतुष्पदो बलीवर्दा यथा द्विपदे पुरुषाय ॥ १४ ॥

भोगेषु पारतन्त्र्यमाह । ईशा ईश्वरेणाभिसृष्टं दत्तमेवाङ्ग हे प्रियव्रतावरुन्ध्महे स्वीकुर्मः यथा स्वामिना दत्तमेव कणाशादि बलीवर्दा भक्षयन्ति न स्वेच्छया तद्वत् नचैवं वैषम्यमीश्वरस्य यतो गुणकर्मसङ्गाद्यो यद्देवतिर्यगादि लक्षणं देहमयुङ्क्त योजितवांस्तत्तदास्थाय स्वीकृत्य यथान्धाश्चक्षुष्मता छायामातपं वा नीयमानाः सन्तस्तत्रैव गच्छन्ति तद्वत् ॥ १५ ॥

नन्वेतत्सर्वमविदुष एव नत्वात्मविद इत्याशङ्क्याह । मुक्तोऽपीति । यावत्प्रारब्धं कर्म तावत् यथा स्वप्नेऽनुभूतं प्रतियातनिद्रो गतनिद्रोऽभिमानशून्य एवानुस्मरति तर्हि भोगवासनया पुनर्जन्म भवेत्तत्राह । किन्तु देहान्तरारम्भकान्गुणान्कर्माणि वासनाश्च न वृङ्क्ते न सम्भजते ॥ १६ ॥

ननु गृहे वर्तमानस्य भोगान्भुञ्जानस्य कुतोऽभिमानाभावो मोक्षो वा अतस्तत्त्यागेन वनवास एव युक्तस्तत्राह । भयं संसारः स्यादेव प्रमत्तस्याजितेन्द्रियस्य वनेष्विति सङ्गभिया वनाद्वनान्तरं गच्छतोऽपीत्यर्थः सहैव षट् सपत्नाः शत्रवो मनोबुद्धीन्द्रियाणि च यस्य स तथाभूत एव वनेष्वपि यत आस्ते बुधत्वेन जितेन्द्रियत्वादात्मरतेरात्मारामस्यावद्यं रागादिदोषं किन्नु करोति न करोत्येव ॥ १७ ॥

ननु गृहे वसतः पुरुषस्य रागादयः संभवन्ति नतु वन इत्याशङ्क्याह । य इति । यः षट् वैरिणः षडिन्द्रियाणि विजिगीषमाणः स पूर्वं गृहेषु स्थित्वा तेषामत्यन्तं निरोधमकुर्वन् जेतुं यतेत क्षीणेष्वरिषु कामं गृहेऽन्यत्र वा विचरेत् यतो लोके

श्रीधरस्वामिकृतभावार्थदीपिका

ऊर्जितारीन्दुर्गाश्रित एवात्येति जयति पश्चाद्दुर्गे वान्यत्र वा वर्तेत युध्येतेति पाठे प्रहरेदित्यर्थः ॥ १८ ॥

इदं च गृहदुर्गाश्रयणं प्राकृतानां त्वं त्वब्जनाभस्याङ्घ्रिसरोजकोश एव दुर्गं तदाश्रितोऽत एव निर्जितषट्सपत्नश्च तथापि पुरुषेणेश्वरेणातिदिष्टान्दत्तान्भोगांस्तावद्भुङ्क्ष्व पश्चाद्विमुक्तसंगः सन्प्रकार्तिं स्वरूपं भजस्व आत्मनिष्ठो भवेत्यर्थः ॥ १९ ॥

आत्मनस्ततो लघुतयाल्पतया तच्छासनमङ्गीचकार यद्वा आत्मनो यदनुशासनं तदलघुतया गौरवेण बाढं तथा करिष्यामीत्यवनतकन्धरः सन् जग्राह ॥ २० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उक्तमेवाह । निबोधेति नवभिः । भगवच्छासनमेवाहमुपदेक्ष्याम्यतो मदुपदेशरूपं भगवच्छासनमुल्लङ्घ्य त्वया भगवान्नासूयितव्य इत्याह । निबोधेति । हेतात ! प्रियव्रत ! इदमृतं तथ्यं वचः कथयामि तन्निबोधावधानेन शृणु अप्रमेयं प्राकृतकरणजन्यप्रमित्याविषयमतीन्द्रियमित्यर्थः अपरिच्छिन्नमिति वा देवं दीव्यमानं निरस्तसमस्तदोषं भगवन्तमसूयितुं दोषबुद्ध्याग्रहीतुं नार्हसि कोऽसावप्रमेयस्तत्राह । यस्य भगवतो दिष्टमादिष्टं शासनं विवशास्तदधीनाः सन्तो भगवान् ते तव ततस्तातः पिता मनुरेष महर्षिर्नारदः वयं मत्प्रभृतयो मरीच्यादय इत्येते सर्वे वहामः कुर्म इत्यर्थः वाङ्मनसापरिच्छेद्यस्वरूपस्वभावः निरस्तनिखिलदोषो भगवान्सर्वस्य वशी सर्वस्येशानः त्वयास्माभिश्च सर्वैरनुल्लङ्घ्यः ॥ ११ ॥

तथाच श्रूयते "एतस्य वा अक्षरस्य प्रशासने गार्गि ! सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" इत्यादिकेति भावः एतदेव उपपादयति । नेति । कश्चित्तनुभृद्देहभृत्तनुशब्दः करणानामप्युपलक्षणं यद्वत्तकरणकलेवरभृज्जीवः तस्य भगवतः कृतं भावेक्तः कृतिं प्रशासनात्मिकां कर्माणि वा कः तस्येति कर्त्तरि षष्ठी कृतं शासनमित्यर्थः तपआदिभिरुपायैर्विहन्तुमन्यथा कर्तुं न विभूयान्न समर्थो भवेत् तपसाऽनशनादिना विद्यया शास्त्रीयज्ञानेन योगवीर्येणाणिमादियोगबलेन मनीषया विचारक्षमया बुद्ध्यार्थैर्धनैर्धर्मैर्यज्ञादिभिः परतः बलवदाश्रयणेन स्वतः तपआदिव्यतिरिक्तेन केन चित्संभावनीयेन स्वीयेनोपायेन वा ॥ १२ ॥

तनुभृदित्यनेन जीवस्य भगवत्संकल्पायत्तं देहभृत्त्वमुक्तं तदेव विवृण्वंस्तदत्तैस्तल्लीलोपकरणैस्तन्वादिभिस्तच्छासनानुवर्तित्वमेव स्वरूपानुगुणमन्यथादण्ड एव स्यादिति सदृष्टान्तमाह । भवायेति द्वाभ्याम् । अङ्ग हे प्रियव्रत ! जनता जनसमूहः अव्यक्तदिष्टं प्राकृतैश्चक्षुरादिभिर्न व्यज्यते इत्यव्यक्तो भगवान् तेन दिष्टमादिष्टं तत्संकल्पायत्तमित्यर्थः देहसंबन्धं धत्ते किमर्थमसावीश्वरो देहयोगमादिशति तत्राह । भवायेति । भवाद्यर्थं कर्मकर्तुमुत्तरोत्तरं जन्मनाशादेर्निमित्तं कर्म कर्तुं प्राक्तनकर्मानुसारेण देहयोगमादिशतीत्यर्थः यद्वा भवाद्यर्थं कर्म च कर्तुमव्यक्तदिष्टं देहयोगं धत्ते तत्र भवो जन्म नाशो मरणं शोकः प्रियार्थविच्छित्तिनिमित्तं दुःखं मोहो देहात्मभ्रमस्वतन्त्रात्मभ्रमादिरूपः भयमागामिदुःखदर्शनजं ज्ञानं सुखदुःखे इष्टानिष्टविषयके अनुकूलप्रतिकूलात्मके प्राचीनकर्मानुसारेण भवाद्यर्थमुत्तरभवादेर्निमित्तं कर्म च कर्त्तुमव्यक्तादिष्टमित्यर्थः सदा अभयायेति च छेदः मुक्तये इत्यर्थः स्वशासनानुवर्त्तिनामनुग्रहार्थं तदतिवर्त्तिनां निग्रहार्थं च सत्त्वादिप्रचुरदेहयोगमादिशतीति भावः ॥ १३ ॥

हे वत्स ! यस्य भगवतो वाचि वेदादिकायां तन्त्यां दामन्यां रज्ज्वां गुणकर्मदामभिः गुणाः सत्त्वादयः कर्माणि सात्त्विकादिभेदेन भिन्नानि स्वस्ववर्णाश्रमोचितानि कर्माणि तान्येव दामानि नामभिरिति पाठे वर्णाश्रमनामानि एव निगडबन्धनग्रन्थियुतरज्जवः तैर्दृढतरैः सर्वे वयं सुयोजिता निबद्धाः सन्तः तस्मै ईश्वराय भगवते बलिं पूजां वहामः कुर्मः यथा नसि नासिकायां छिन्नायां प्रोता बद्धरज्जवश्चतुष्पदो बलीवर्दा द्विपदे मनुष्याय कुर्वन्ति तद्वत् ॥ १४ ॥

किंच न वयमिष्टानिष्टप्राप्तिपरिहारसाधकावबोधनतदुपसंहारसमर्था इत्याह । ईशावसृष्टमिति । अङ्ग ! हे प्रियव्रत नाथ ईश्वरो यद्यदयुङ्क्त योजितवान् तत्तद्वर्णाश्रमादिकं जात्यादिकं चास्थाय स्थिता वयं तत्तदीश्वरादिष्टं देवतिर्यगादिशरीरमास्थाय स्थिता वयमिति वा गुणकर्मणां सात्त्विकादिभिन्नानां कर्मणां संगात्संबन्धान्निमित्तात्तत्तत्कर्मानुरूपमित्यर्थः अनेनेश्वरस्य वैषम्याभाव उक्तः ईशेन भगवताभिसृष्टं दत्तं सुखं दुःखं चाऽऽरब्धमहे प्राप्नुमः ईश्वरस्य हिताहितज्ञत्वे अन्येषामनभिज्ञत्वे चक्षुष्मतेति च दृष्टान्तमाह । यथा चक्षुष्मताऽविप्लुतचक्षुरिन्द्रियेण पुरुषेण छायामातपं वा नीयमानाः प्राप्यमाणाः अन्धाः प्राप्नुवन्ति तद्वत् अतोऽस्माभिरीश्वरादिष्टः प्रवृत्तिधर्म एवानुरोद्धव्य इति भावः ॥ १५ ॥

ननु देहात्माभिमानिनः संसारिणो जीवस्य प्रवृत्तिधर्मानुवृत्तिर्युक्ता अहं त्वधिकृतात्मविद्यो मुमुक्षुः कथं प्रवृत्तिधर्ममनुरुणध्मि बन्धकत्वादित्याशङ्कायां तावन्मुमुक्षोरप्यामुक्तेर्देहधारणमवश्यकं तदनुबन्धितया प्राप्तेषु कषु चित्प्रवृत्तोऽपि न बध्यत इत्याह । मुक्तोऽपीति । प्रतियातनिद्रः निवृत्ताज्ञानः पुमान् यथानुभूतमनुभूतवज्ज्ञानोदयात् पूर्वमनुभूतकर्मवदज्ञानदशायां कर्मानुभवादिति यावत् ज्ञानोदयानन्तरमप्यारब्धं सुखदुःखादिफलप्रदानाय प्रवृत्तं पुण्यापुण्यरूपं कर्मांशमनुभवन्नपि तत्राभिमानशून्यः सुखदुःखाद्यनुभवप्रयुक्तदेहगतस्थूलकार्श्याद्यभिमानमात्मन्यकुर्वाणः यावन्मुक्तो भवेत्तावत्स्वदेहं बिभृयादेव देहात्माभिमानरहितः आरब्धमश्नन्नपि यावन्मुक्तस्तावत्स्वदेहं बिभृयादिति वान्वयः प्रारब्धस्य कर्मणोऽभिगतात्मविद्येनाप्यनुभाव्यत्वात्प्रारब्धायत्तत्वाच्छरीरस्य तद्धारणं वर्जनीयमित्यर्थः तर्ह्यज्ञाज्ज्ञानिनः को विशेषस्तत्राह । किंत्विति । अयं प्रतियातनिद्रः अन्यदेहाय देहान्तरारम्भाय निमित्तभूतानि सत्त्वादिगुणप्रयुक्तकर्माणि न वृङ्क्ते न भजति प्रारब्धानुभवो देहधारणं चेत्युभयं तुल्यं पुनर्देहान्तरनिमित्तबन्धककर्माकरणं तु ज्ञानिनो विशेष इति भावः ॥ १६ ॥

अस्तु मुमुक्षोरपि देहधारणं प्रारब्धानुभवश्चेति वन्यैरपि देहधारणसम्भवाद्वन एवाहं वत्स्यामि गृहाश्रमस्य संसृतिहेतुत्वात्तत्राह । भयमिति । प्रमादाप्रमादा वेवहि भयाभयहेतू अतः प्रमत्तस्य स्वपरयाथात्म्यविस्मरणेन देहेन्द्रियपारवश्यस्य वनेष्वपि अपिशब्दाद्गृहेषु च वसतो भयं संसारः स्यादेव ननु वने वसतो

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

देहानुबन्धिनां कलत्रादीनां प्रसह्य प्रवर्त्तयतां ज्ञाननिष्ठाविरोधिनामभावात्सा प्रतिष्ठिता स्याद्गृहे तु विपरीतेत्यत्राह । यतः यस्मात्सः वनवासी सह षट्सपत्नः सहैव षट्सपत्नाः शत्रवो मनःसहितानि ज्ञानेन्द्रियाणि यस्य तथाभूत एव वने आस्ते "वोपसर्ज" स्येतिन धाग्रहणात्सहस्य सभावाभावः "इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते" इति समनस्केन्द्रियवर्गस्य विषयप्रवणस्य ज्ञाननिष्ठाविरोधित्वाद्वनाश्रमिणोऽपीन्द्रियवर्गस्य सहैव विद्यमानत्वाद्भयं स्यादेव अत इन्द्रियवर्ग एव नियन्तव्यः यद्येवं तर्हि किमपराद्धं गृहाश्रमेणेत्याह । जितेन्द्रियस्यात्मरतेः प्रकृतिविविक्तात्मानुभवशीलस्य बुधस्य ब्रह्मनिष्ठस्य पुंसः गृहाश्रमः किन्ववद्यं दोषं करोति न कमपि दोषं करोतीत्यर्थः ॥ १७ ॥

ननु यदीन्द्रियपारवश्यरूपप्रमाद एव भयहेतुस्तर्हि इन्द्रियाणि ज्ञाननिष्ठाविरोधीनि वन एव वसन् जेष्यामीत्यत्राह । य इति । सपत्नान् ज्ञाननिष्ठाविरोधित्वेन शत्रुतुल्यानि षडिन्द्रियाणि यो विजिगीषमाणः विजेतुमिच्छन्सः पूर्वं प्रथमं गृहेषु निविश्य गृहाश्रम एव स्थित्वा यतेत इन्द्रियजयार्थं यतेत तथा हि लोके यः कश्चन शत्रून्विजिगीषमाणः विजेतुमिच्छन्प्रथमं दुर्गमाश्रित ऊर्जितान् बलिष्ठान् शत्रूनत्येति जयति ततः क्षीणेषु शत्रुषु बलहीनेषु सत्सु कामं यथेष्टं दुर्गेऽन्यत्र वा विचरेदेवं विपाश्चिदपीत्यर्थः ॥ १८ ॥

सत्यं प्रथमं दुर्गाश्रित एवारीनत्येति अहमपि भगवच्चरणारविन्दरूपं दुर्गमाश्रितः शत्रून् जेष्यामि नत्वातिहेयान् गृहानित्यत्राह । त्वं त्विति । यद्यपि त्वमब्जनाभस्य भगवतश्चरणकमलकोशदुर्गाश्रितः यथा कमलकोशान्तर्गतभ्रमरं बाह्यातपवर्षादयो न बाधन्ते तद्वद्भगवच्चरणारविन्दसमावेशितमनस्कमिन्द्रियाणि न बाधन्त इति ज्ञापनाय कोशशब्दः प्रयुक्तः निर्जितः ज्ञानयोगविरोधिवहिरिन्द्रियवर्गो येन तथापि पुरुषेण परमपुरुषेणादिष्टान् भोगान् इह लोके भुक्त्वा ततो विमुक्तसङ्गः भगवद्भक्त्या प्रकृतिं स्वभावमाविर्भूतापहतपाप्मत्वादिगुणाष्टकस्वभावं भजस्वेति यावत् ॥ १९ ॥

इतीत्थं ब्रह्मणा सम्यगभिहितः उक्तः महाभागवतः त्रिभुवनाहितोपदेष्टुर्भगवतश्चतुर्मुखस्यानुशासनमात्मनः स्वस्य लघुतया हेतुना भोगाननुभवत एव पुनर्मुक्त्युपायप्रदर्शनात्मकत्वात्तच्छासनस्य सुकरत्वं यद्वा आत्मनो यदनुशासनं तदलघुतया गौरवेण वाढं करिष्यामीत्यवनतकन्धरः सन् सः प्रियव्रतः बहुमानं यथा भवति तथा उवाह जग्राहानुष्ठितवानिति यावत् ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ऋतं शास्त्रविहितं किंतत्तदाह । मासूयितुमिति । देवेन श्रीहरिणा स्वधर्मो दुष्टदमनं धर्मज्ञानानुपालनमित्यादि स्वोक्तलक्षणा आराज्ञा विहिता तदाज्ञामुल्लङ्घ्य निवृत्तिमार्गाङ्गीकारे तद्वक्तरि हरौ दोषाविष्कारलक्षणासूयारोपेण नव महादोषित्वेनाधःपातो दुष्परिहरः स्यादिति देवमसूयितुं मार्हसीत्यन्वयः स्वामेयत्ववत्तद्वाक्याभिप्रायस्याप्यमेयत्वं सूचितुममेयमिति तेन तद्वाक्याभिप्रायापरिज्ञानेन भ्रान्तवद्वर्तसे इत्यर्थोऽपि लभ्यते इयमपि क्रीडेव नतु प्राप्तव्यप्रयोजनार्थितयेति सूचनाय देवमिति ते तव ततस्तानो मनुः वेर्विष्णोर्वशाः "विः पक्षिपरमात्मनोः" इति यादवः दिष्टमाज्ञाम् ॥ ११ ॥

ननु तपआदिसामर्थ्योपेतैस्तदाज्ञोल्लङ्घनं सुशकं स्यादत्राह । न तस्येति । तस्य हरेराज्ञालक्षणं कृतं शास्त्रात्मना विहितं स्वधर्मं विहन्तुं उल्लङ्घ्य स्वावहितं कर्तुं न विभूयात् समर्थो न भवेदित्यन्वयः परतः सहायैः स्वतः सहायमन्तरेण ॥ १२ ॥

विवशा इत्युक्तं स्पष्टमाह । भवायेति । अङ्गेयं जनता भवाद्यर्थमव्यक्तेन हरिणा हरिप्रेरितजडप्रकृत्या वा दिष्टं दत्तं स्वकर्मफलभोगाय कल्पितं निर्मितं वा देहयोगं भक्ते पुण्यादिकर्मभिरिति शेषः "भवो भद्रे हरे प्राप्तौ सत्तासंसारजन्मसु" इति यादवः ॥ १३ ॥

हरेराज्ञालङ्घने विध्यतिक्रमदोषेण प्रत्यवायोऽपि स्यादित्याशयेनाह । यद्वाचीति । यस्य हरेर्वाचि वेदाख्यायां तन्त्यां गोवृषबन्धनदीर्घरज्ज्वां तत्तद्योग्यगुणैर्ब्राह्मणादियोग्यकर्मभिर्ब्राह्मणक्षत्रियादिनामभिश्च गुणकर्मनिमित्तनामभिर्वा स्वदामभिर्हस्वपाशैः सुष्ठु योजिता बद्धाः वयमीश्वराय बलिं वहामः ब्रह्मापर्णत्वेन तत्तद्वेदवाक्यविहितं कर्म कुर्म इत्यर्थः कथमिव नसि नासिकायां प्रोताश्चतुष्पदो गावो द्विपदे मनुष्याख्यस्वामिने गोण्यादिकं वहन्ति यथा तथेति पारन्त्र्यमात्रे दृष्टान्तोऽयं न तु बुद्धिपूर्वकर्तृत्वे ॥ १४ ॥

यथा कारणमीश्वराधीनं तथा फलं च तदधीनमित्याह । ईशेति । ईशावसृष्टं श्रीहरिणा दत्तं यच्छरीरमयुङ्क्त अचीक्लृपत् तत्तच्छरीरमास्थायावरुन्धमहे अङ्गीकृत्य भुंक्ष्महे कथमिव चक्षुष्मता नीयमाना अन्धा इव चक्षुष्मद्दर्शितमार्गमभ्युपेत्य तद्दत्तमेव भुञ्जते यथा तथेति ॥ १५ ॥

उत्पन्नज्ञानस्यापि चरमदेहिनो देहपातपर्यन्तं स्वविहितकर्मकर्तव्यमित्याह । मुक्तोऽपीति । यथोपयातं दैवतः प्राप्तं तदपि प्रारब्धं फलदानायोपक्रान्तं कर्मफलमश्नन्नभिमानशून्यो देहाभिमानरहितः प्रतियातनिद्रः निवृत्ताज्ञ नान्यथाज्ञानी जीवन्मुक्तोऽपि यावत्प्रारब्धकर्मनाशः तावत्स्वदेहं बिभृयात् तत्र विहितं राज्यादिपालनकर्म च कर्तव्यमित्यर्थः तर्हि विद्वदविदुषोः को विशेष इति तत्राह । किन्त्विति । ज्ञानरक्षानिवदन्यदेहाय शरीरान्तरारम्भकान् रागादिलक्षणाश्च वृङ्क्ते न स्वीकरोति । तादृशकर्माणि न करोतीत्यर्थः ॥ १६ ॥

ननु कर्दमाक्रान्तस्य कर्दमलेपवत् गृहाश्रमरतस्य तन्निमित्तभवभयमापद्यत एवातो वनाश्रम एव श्रेयानिति तत्राह । भयमिति । प्रमत्तस्य विस्मृतस्वकार्यस्य वनेषु निर्जनप्रदेशेषु स्थितस्यापि पापाद्भयं स्यात् कुत इति तत्राह । यत इति । षट्सपत्नाः षडिन्द्रियाख्याः शत्रवः सह वसन्त इति यतोऽत इति शेषः तर्हि कथंकारं भवभयाभावः स्यादिति तत्राह । जितेन्द्रियस्येति । अवद्यं दोषं बुधस्य कर्तव्यं जानतः वशीकृतेन्द्रियग्रामस्येन्द्रियजयः कथं ज्ञायत इति तत्राह । आत्मेति । आत्मनि हरौ रतिरुपासनालक्षणा यस्य स तथा तस्य ॥ १७ ॥

तर्हीन्द्रियजयोपायः कथमत्राह । य इति । इन्द्रियाख्यषट्शत्रून् जेतुकामो यः सः पूर्वं गृहस्थाश्रमेषु स्थित्वा तदुपभोगेन निर्विद्यालम्बुद्धिं प्राप्य यतेत श्रेयस इति शेषः यतनप्रकारं वक्ति । दुर्ध्येतेति । भगवन्निष्ठालक्षणदुर्गाश्रितः ऊर्जितारीन्विषय-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भोगेषु सन्नद्धेन्द्रियाख्यशत्रून् युध्येत विषयगमने निरुध्यात्माधीनान्कुर्यात् पुनः क्षीणेषूपरतविषयप्रचारेष्विन्द्रियेषु सत्सु विपश्चित्कामं निर्भयो विचरेदित्यन्वयः विपश्चिदित्यनेन ।

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते म०

इत्येतन्निरस्तम् ॥ १८ ॥

बह्वालापैरलं किमधुना कर्त्तव्यमत्राह । त्वमिति । तुना प्रियव्रतस्यान्यस्माद्विशेषं सूचयति तमेवाह । अब्जनाभेति । पुरुषानिसृष्टान् श्रीनारायणप्रसादोपनतान् विमुक्तसङ्गः पुत्रादिस्नेहलक्षणसङ्गरहितः सत्त्वं प्रकृतिं सच्चिदानन्दलक्षणस्वभावं संन्यासाश्रमेण मोक्षो नान्याश्रमेणेत्ययं बुद्धिव्यामोह एव "विहितो यस्य यो धर्मो विष्णुना प्रभविष्णुना । तेन मुक्तिर्भवेत्तस्य तं गुरुर्वेद सर्ववित्" इति स्मृतेस्तव विहितेन प्रजापालनलक्षणधर्मेण स्वयोग्यमुक्तिरिति विविच्य (१) तत्र विमुखं त्वामुद्बोध्य तत्करणायायासिषमित्यतस्तत्कुर्वित्येतद्वा (२) तुनाह ॥ १९ ॥

अथ प्रियव्रतस्य शिष्टजनशिक्षणाय विरिञ्चस्याज्ञाग्रहणप्रकारमाह । इतीति । विरिञ्चादात्मनः स्वस्य लघुतयामितमहिमत्वादवनतशिरोधरः प्रणतकण्ठः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रवृत्तिनिष्ठं मद्वाक्यं स्वासह्यं मत्वा मय्यसूयां माकृथाः भोः प्रियव्रत ! अहन्तु त्वत्प्रभोरेवाधीनस्तस्यैवाभिप्रेतं वच्मीत्याह । निबोध स्वबुद्ध्यैवेदं परामृशेत्यर्थः । हे तातेति नाहं तव शत्रुः त्वां दुःखयामीति भावः । ऋतं सत्यमेव न तु त्वामहं प्रतारयामीति भावः ब्रवीमीत्यहं ब्रह्मा न तु स्वापितेवाहमप्यप्रमाणी कर्त्तव्य इति भावः । किं सत्यं तत्राह । वयमिति । भवो रुद्रोऽपि ते तव ततस्तातो मनुर्महर्षिर्नारदोऽयं तव गुरुरित्येते वयं यस्य दिष्टमाज्ञामेव वहामः स खलु यस्मै यस्मै हृदा यद्यदादिशति तथैव चेष्टते इति तदाज्ञयैव त्वामहं राज्ये प्रवर्त्तयामीति भावः । यमहं सर्वात्मना भजे स प्रभुरेव मां संसारसिन्धौ निमज्जयतीति स्वेष्टदेवेऽपि दोषदर्शी मा भूरित्याह । मासूयितुमिति । अप्रमेयं प्रमातुमशक्यं कमपि संसारेऽपि प्रवर्त्य शीघ्रमुद्धरति कमपि वर्त्तेऽपि प्रस्थाप्य नोद्धरतीति कस्तस्य चरितं वेदेति भावः ॥ ११ ॥

नचात्र स्वहठं रक्षितुमात्मनस्तपोविद्यायोगबलं प्रदर्शयितव्यमित्याह । नेति । तस्य कृतं तेन निर्मितं तपआदिभिर्विहन्तुमन्यथा कर्त्तुं तनुभृज्जीवो न विभूयात् न प्रभवेत् ननु त्वद्द्वारा मां राज्ये प्रभुः प्रवर्त्तयति यथा तथा महर्षिद्वारा मां राज्यात् प्रव्राजयति स्वेति किमत्र निश्चिनोमीति चेत् बुद्धिबलेन मां परमेश्वरं विजिगीषस्वेत्याह । मनीषया वेति । तेनोभयमपि भगवदादिष्टं मत्वा राज्यं कुर्वन्नेव तत्रानासक्त्या प्रव्रज्यामपि कुर्विति भावः । न च यथेष्टद्रव्यदानतः स्वमतिमूर्त्तिकल्पनेन राज्यं चिकीर्षस्व नापीमां विपदं बहुधर्मैर्बलवदाश्रयेण वा स्वबाहुबलेन वोत्तितीर्षेत्याह । नैवात्मेत्यादि ॥ १२ ॥

नात्र किमपि शोचनीयं यतो देहधारिण ईश्वराधीना भद्रमभद्रं वा स्वेच्छया परेच्छया वा सर्व्वे सहन्त एवेत्याह । भवायेति । भवनाशौ पुनःपुनर्जन्ममृत्यू तदर्थं जनता जीवसमूहः । अव्यक्तेनेश्वरेण दिष्टं दत्तं देहयोगं सदा धत्ते स्वकर्मोपार्जितमपि देहमीश्वराज्ञां विना न प्राप्नोति यथा साध्वसाधुक्रियानुपार्जितमपि शालिक्षेत्रकारागारादिकं नृपाज्ञां विना प्रजा न प्राप्नोति नृपः खल्वन्यथापि कुर्य्यादित्यतो हेतोः ॥ १३ ॥

देहधारणे पारतन्त्र्यमिव कर्मकरणेऽपि पारतन्त्र्यमाह । यस्य वाचि वेदलक्षणायां तन्त्र्यां दामन्यां गुणाः सत्त्वादयस्तत्कृचितानि कर्माणि तन्निबन्धनैर्नामभिर्ब्राह्मणादिशब्दैः सुदुस्तरैः सुदृढैः हे वत्स ! वयं सर्व्वे सुयोजिताः निबद्धाः तस्मै ईश्वराय बलिं वहामः तदादिष्टं कर्म कुर्मः अत्र दृष्टान्तः । नसि नासिकायां प्रोता बद्धाः सन्तः चतुष्पदो बलीवर्दा द्विपदे मनुष्याय । ते यथा मनुष्यदत्तस्य भारस्यावहने गमनागमनक्रियादिषु स्वातन्त्र्ये च दण्डं प्राप्नुवन्ति तथा वयमपीति भावः ॥ १४ ॥

कर्मफलभोगेऽपि पारतन्त्र्यमाह । ईशा ईश्वरेण अभिसृष्टं दत्तमेव अङ्ग प्रियव्रत ! अवरुन्ध्महे प्राप्नुमः दुःखं सुखं वेति नचात्र वैषम्यमीश्वरस्येत्याह । गुणेति । तमआदिगुणनिबन्धनानि यानि कर्माणि तेषु सङ्गादासक्तत्वात् यथा स्वीयत्वात् समेष्वपि बलीवर्द्देषु मध्ये साध्वसाधुकर्मकरणतारतम्यानुरूपमेव केभ्यश्चिदुत्तमगृहाभ्यन्तरे स्थापितेभ्यः सघृतदुग्धौदनादिकं तत्स्वामी दत्ते केभ्यश्चन रूक्षबलिधचणकमाषादिकं केभ्यश्चन कणशघासादिकं केभ्यश्चन नीहारातपपङ्कादिमति बहिःस्थले स्थापितेभ्यः साक्रोशदण्डप्रहारं विरसं दलपलालादिकमिति किं कृत्वा अवरुन्ध्महे नाथः स्वामी यद्यद्युङ्क्ते अभद्रं भद्रं वा फलं ददौ तत्तदास्थाय अस्मद्वैगुण्यसाद्गुण्यानुरूपमेव ददाति स्वामिनः कोदोष इति मनसि विश्वस्येत्यर्थः । प्रत्युत परमेश्वरस्यात्र गुण एव द्रष्टव्य इति दृष्टान्तेनाह । चक्षुष्मतेति । शीतलमातपतप्तं वा वर्त्म नीयमानास्तत्र कदाचित् शीतले वर्त्मनि कण्टककूपादिकं दृष्ट्वा यदा तत्र वर्त्म नीयन्ते तेन किमन्धैश्चक्षुष्मानुपालभ्यते अपि तु हितकृदयमिति विश्वस्य प्रशस्यत एवेति भावः ॥ १५ ॥

नन्वेतत् सर्व्वमविदुषः कर्म्मिण एव ननु कर्मग्रन्थित उत्तीर्णस्यात्मज्ञानिन इत्याशङ्क्याह । मुक्तोऽपीति । यावत्प्रारब्धं कर्म तावत् यथा स्वप्नेऽनुभूतं प्रतियातनिद्रो गतनिद्रोऽभिमानशून्य एवानुस्मरति तर्हि भोगवासनया पुनर्जन्म स्यात्तत्राह । किन्तु अन्य देहाय देहान्तरं प्राप्तुं गुणान् कर्माणि वासनाश्च न वृङ्क्ते न संभजते ॥ १६ ॥

ननु तदपीश्वराधीनत्वेऽपि मम सांप्रतिकाद्वनवासात् भाविनी गृहे स्थितिरपकारं करिष्यत्येवेत्याशङ्क्याह । भयं संसारः सह षट्सपत्नैः षडिन्द्रियशत्रुसहितैः जितेन्द्रियस्य तत्राप्यात्मरतेरात्मारामस्य तत्रापि बुधस्य वनगृहयोस्तारतम्याभावं बुध्यमानस्य किमवद्यं रागादिदोषम् ॥ १७ ॥

अजितेन्द्रियो जितेन्द्रियः इन्द्रियजयेच्छुरित्यत्र लोके त्रिविधो जनस्तत्राद्ययोर्गृहाश्रमो न दोष इत्युक्तम् । अन्त्यस्य तु प्रत्युत गुण एवेत्याह । यो विजिगीषमाणः । विजेतुमिच्छति स पूर्वं गृहेषु स्थित्वा तेषामत्यन्तनिरोधमकुर्वन् जेतुं यतेत ।

---

(१) प्रजापालनकर्मणि ।
(२) प्रजापालनं ।

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ॥

यतो लोक ऊर्जितान् बलिष्ठानरीन् दुर्गाश्रित एवात्येति जयति ततश्च क्षीणेष्वरिषु कामं गृहेष्वन्यत्र वा विचरेत् युध्येतेति पाठे प्रहरेदित्यर्थः ॥ १८ ॥

त्वन्तु तेषु त्रिषु मध्ये न कोऽपीत्याह । स्वमिति । तुर्भिन्नोपक्रमे अञ्जनाभेति नत्वन्यप्राकृतवद्गृहदुर्गाश्रितः नचान्यवज्जितेन्द्रियश्च यतो निर्जितेति जितषट्सपत्नेभ्यो निर्गतः तव षडिन्द्रियाणि भगवत्सौन्दर्य्यादिष्वासक्तानि परममित्राण्येव नतु शत्रवः अतः पुरुषेण स्वप्रभुणैवातिशयेन दिष्टान् दत्तान् भोगान् इति कर्म्म जन्यानामेव भोगानां बन्धकत्वं नत्वीश्वरदत्तानामिति भावः । प्रकृतिं भजस्वेति पश्चाद्राज्यभारं स्वपुत्रे विन्यस्य वनेऽपि गत्वा तिष्ठ ॥ १९ ॥

आत्मनः स्वस्य लघुतया तत्पात्रत्वादित्यर्थः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हेतात ! पौत्र ! ते ततः तातः मनुः एष देवर्षिः ते गुरुः भवः वयमिति मरीच्याद्यभिप्रायेण बहुवचनमेते सर्वे विवशाः यस्य दिष्टमाज्ञां वहाम अयमर्थः ज्ञानेन वयसा च त्वत्तोऽधिका वयं यत्र नियोजितास्तत्पराः सन्तः तस्य दुर्ज्ञेयत्वदुर्लभत्वादिकमनादृत्य तमद्यैव द्रक्ष्यामः अद्यैव प्राप्स्याम इत्येवं नासूयाम इति अतोऽविपक्वकषायस्त्वम् अप्रमेयं निखिलैः प्रमाणैः साकल्येन प्रमातुमशक्यमसूयितुम् अविपक्वकषायाधिकारिसाध्यत्वदोषारोपेण द्रष्टुं नार्हसीत्यर्थः ॥ ११ ॥

यत्र यस्तेन नियोजितस्तत्स्वीकुर्वन् आत्मपरयोर्नियस्यनियन्तृभावमवधार्य शनैः शनैर्मुक्तो भवेदित्याह । न तस्येति पञ्चभिः । तस्य तेन परमेश्वरेण कृतं विहन्तुमन्यथाकर्तुं न विभूयात न प्रभुर्भवेत् ॥ १२ ॥

अभवाय मोक्षाय च अव्यक्तदिष्टं दुर्लक्ष्यपरमेश्वरदत्तं देहयोगं जनता मुमुक्षुबुभुक्षुजनसमूहः धत्ते अव्यक्त एव भोगं मोक्षं च यथाधिकारं यथाकालं जनतायै ददाति तदर्थमातुरो न भवेदिति भावः ॥ १३ ॥

आतुरत्वं तु न पुरुषार्थसाधकमित्याशयेनाह । यदिति द्वाभ्याम् । यस्य भगवतः वाचि तन्त्यां वेदरूपायां दामनि गुणकर्मनामभिः सत्वादिगुणैः पुण्यादिकर्मभिः देवादिनामभिः सुदुस्तरैर्दुर्निवार्यैः सुयोजिताः वयं तस्मै बलिं वहामः तत्र दृष्टान्तः नसि नासायां प्रोताश्चतुष्पदो बलीवर्दा यथा द्विपदे कर्षकाय बलिं वहन्ति तद्वत् ॥ १४ ॥

गुणकर्मयोगात् अस्माभिः सत्वादिगुणवशात्कृतानि यानि कर्माणि तद्योगात् नाथः यद्यद्देहादिकमयुङ्क्त योजितवान् तत्तदाख्यायाङ्गीकृत्य ईश ईशितुः तेनेशा नियन्त्रा, दुःखं सुखं वा अभिसृष्टं दत्तम् भवरुन्धमहे स्वीकुर्मः तथा च मन्त्रः "ईशा वास्यमिदं सर्वं यत्किञ्चिज्जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मागृधः कस्य स्विद्धनम्" इति ॥ १५ ॥

एवं सामान्यतः सर्वैरेवेश्वरदत्तमिष्टमनिष्टं वा पारवश्यात्स्वीकार्य्यमेव अथ मुमुक्षुणापि पारवश्यात्प्रारब्धकर्मफलं स्वीकर्तव्यमेवेत्याह । प्रतियातनिद्रः प्रतिबुद्धः मुमुक्षुः यथानुभूतं शरीरं ताहशाय अन्यदेहाय गुणान् "ऊर्ध्वं गच्छन्ति सत्त्वस्था" इत्यादिनोक्तान् स्वर्गादिप्रदान् सत्त्वादीन् न वृङ्क्ते न भजति किन्तु यावन्मोक्षः तावत्प्रारब्धमश्नन् देहं बिभृयादेव ॥ १६ ॥

ननु गृहे वसतः पुनः रागाद्युत्पत्त्या संसारभयं स्यादत्राह । भयमित्यादिना । सहैव षट् एकं मनः पञ्चज्ञानेन्द्रियाणि च सपत्नाः शत्रवो यस्य सः ॥ १७ ॥

अत्येति जयति ॥ १८ ॥

पूर्वं भोगान् भुङ्क्ष्व पुनर्जितषट्सपत्नः विमुक्तसङ्गः त्यक्तकलत्रादिः सन्प्रकृतिं विश्वहेतुं "कारणं तु ध्येयम्" इति श्रुतेः अनेनाजितेन्द्रियत्वात्तत्राधुना न वैराग्याधिकार इति सूचितम् ॥ १९ ॥ २० ॥

भाषाटीका ।

श्रीभगवान् ब्रह्माजी बोले हे तात ! हम तुम से सत्य वचन कहते हैं अप्रमेय परमात्मा की असूया नहीं करना जिसपरमात्मा के वश हो कर हम महादेव जी तुमारे पिता यह मनुजी महर्षि नारद सबही जिनकी आज्ञा को ग्रहण करते हैं ॥ ११ ॥

कोई भी देह धारी उस परमात्मा की आज्ञा को तपस्या से या विद्यासे या योग प्रभाव से या बुद्धिसे धर्म अर्थ से दूसरे से या अपने से टाल नहीं सका है ॥ १२ ॥

हे प्रियव्रतजी ! जितना जनसमूह है सो जन्म के लिये मरने के लिये कर्म करने के लिये शोचने को मोहित होने को भ्रान्त होने को भीत होने को सुखी दुःखी होने को ईश्वर के दिये देह को प्राप्त होताहै ॥ १३ ॥

हे वत्स ! जिस परमात्मा के वचन रूप (वेद) लंबी रस्सी मे हम लोग गुण कर्मरूप छोटी डोरों मे बधे हुये सब ईश्वर को भेट देते हैं जैसे नाक मे नथे हुये पशु मनुष्यके आधीन होकर काम करते हैं ॥ १४ ॥

सत्वादि गुणों के अनुसार जो जो देह ईश्वर की आज्ञा से प्राप्त होता है तिसदेह को धारण करके हम लोग उसी ईश्वर के दिये हुए सुख दुःख को भोगते हैं जैसे कि अंधों को आंख वाला जहां चाहे तहां लेजाता है तैसे हमारे भोग ईश्वर के आधीन हैं ॥ १५ ॥

जिस को जगत् का अहंकार ममकार छूटगया है वहभी अभिमान रहित होकरभी तवतक प्रारब्ध को भोगता हुआ देह को अवश्य धारण करेगा जैसे कि निद्रा छूटने परभी स्वप्न की स्मृति बनी रहती है केवल दूसरे देह के हेतु उस के कर्म नहीं होते हैं ॥ १६ ॥

जोपुरुष अपने कर्तव्यमे कुशल नहीं है तिसको वनमे रहने से भी भयहोगा क्योंकि काम क्रोधादिक छैः शत्रु तो उसके साथही है जो मुमुक्षु है जितेन्द्रिय है विवेकी है तिस का तो गृहाश्रमभी क्या बिगाड कर सकता है ॥ १७ ॥

जो पुरुष छैः शत्रुओं को जीतना चाहे वह घर मे रह कर उनके जीतने का यत्न करे पहिले जैसे कि किले मे रहनेवाला राजा प्रबल शत्रुओं को जीतता है इसीप्रकार घर मे रहने से कामादिशत्रु यदि क्षीण होजावैं तब ज्ञानी होकर यथेष्ट विचरता रहै ॥ १८ ॥

भगवानपि मनुना यथावदुपकल्पितापचितिः प्रियव्रतनारदयोरविषममभिसमीक्षमाणयोरात्मसमवस्थानमवाङ्मनसं क्षयमव्यवहृतं प्रवर्तयन्नगमत् ॥ २१ ॥

मनुरपि परेणैवं प्रतिसन्धितमनोरथः सुरर्षिवरानुमतेनात्मजमखिलधरामण्डलस्थितिगुप्तय आस्थाप्य स्वयमतिविषमविषयविषजलाशयाशाया उपरराम ॥ २२ ॥

इति हवाव स जगतीपतिरीश्वरेच्छयाऽधिनिवेशितकर्माधिकारोऽखिलजगद्बन्धध्वंसनपरानुभावस्य भगवत आदिपुरुषस्याङ्घ्रियुगलानवरतध्यानानुभावेन परिरन्धितकषायाशयोऽवदातोऽपि मानवर्धनो महतां महीतलमनुशशास ॥ २३ ॥

अथ च दुहितरं प्रजापतेर्विश्वकर्मण उपयेमे बर्हिष्मतीं नाम तस्यामुह वाव आत्मजानात्मसमानशीलगुणकर्मरूपवीर्योदारान् दश भावयाम्बभूव कन्यां च यवीयसीमूर्जस्वतीं नाम ॥ २४ ॥

आग्नीध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्यरेतोघृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति सर्व एवाग्निनामानः ॥ २५ ॥

एतेषां कविर्महावीरः सवन इति त्रय आसन्नूर्ध्वरेतसस्त आत्मविद्यायामर्भभावादारभ्य कृतपरिचयाः पारमहंस्यमेवाश्रममभजन् ॥ २६ ॥

तस्मिन्नु ह वा उपशमशीलाः परमर्षयः सकलजीवनिकायावासस्य भगवतो वासुदेवस्य भीतानां शरणभूतस्य श्रीमच्चरणारविन्दाविरतस्मरणाविगलितपरमभक्तियोगानुभावेन परिभावितान्तर्हृदयाधिगते भगवति सर्वेषां भूतानामात्मभूते प्रत्यगात्मन्येवात्मनस्तादात्म्यमविशेषेण समीयुः ॥ २७ ॥

अन्यस्यामपि जायायां त्रयः पुत्रा आसन्नुत्तमस्तामसो रैवत इति मन्वन्तराधिपतयः ॥ २८ ॥

एवमुपशमायनेषु स्वतनयेष्वथ जगतीपतिर्जगतीमर्बुदान्येकादशपरिवत्सराणामव्याहताखिलपुरुषकारसारसंभृतदोर्दण्डयुगलापीडितमौर्वीगुणस्तनितविरमितधर्मप्रतिपक्षो बर्हिष्मत्याश्चानुदिनमेधमानप्रमोदप्रसरणयौषिण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादिभिः पराभूयमानविवेक इवानवबुध्यमान इव महामना बुभुजे ॥ २९ ॥

यावदवभासयति सुरगिरिमनुपरिक्रामन् भगवानादित्यो वसुधातलमर्धेनैव प्रतपत्यर्धेनावच्छादयति तदा हि भगवदुपासनोपचितातिपुरुषप्रभावस्तदनभिनन्दन् समजवेन रथेन ज्योतिर्मयेन रजनीमपि दिनं करिष्यामीति सप्तकृत्वस्तरणिमनुपर्यक्रामद्द्वितीय इव पतङ्गः ॥ ३० ॥

भाषाटीका ।

तुमतो पद्म नाभ भगवान् के चरण कमलरूप किले को आश्रय करके देहस्थित शत्रुओं को जीतगये हो तौभी भगवान् के दिये अधिकार भोगों को भोगो पीछे आसक्ति छोड़ कर आत्मनिष्ठ होकर विचरना ॥ १९ ॥

श्रीशुकदेव जी बोले इस प्रकार त्रिभुवन नाथ भगवान् ब्रह्मा जी के वचन को महाभागवत प्रियव्रत जीने अपने को छोटा मान कर मस्तक नवाकर बहुमानपूर्वक स्वीकार किया ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मनुना सन्तुष्टेनोपकल्पिता पूजा यस्य । प्रियव्रतस्य योगभ्रंशात् नारदस्य च शिष्यनाशात्कुटिलमीक्षणं मा भवति तत्तु नास्तीत्याह । अविषमं यथा तथा तयोरभिसमीक्षमाणयोः सतोरात्मनः सम्यगवस्थानमवाङ्मनसं वाङ्मनसयोरविषयं क्षयं निवासं जगाम । पाठान्तरे अवाग्वाचामगोचरं कथञ्चिन्मनसः क्षयं विषयमतोऽव्यवहृतं व्यवहारशून्यं ब्रह्म निवृत्तं प्रवर्तयन् । व्यवहाराद्विषयाः सन् व्यवहारातीतं स्वरूपं चिन्तयन्नन्तर्हित इत्यर्थः ॥ २१ ॥

पुत्रं राज्येऽभिषिच्य वनं यास्यामीत्येवं यो मनोरथः स

श्रीधरस्वामिकृतभावार्थदीपिका ।

परेण ब्रह्मणैव प्रतिसन्धितः सम्पादितो यस्य सः नारदस्यानुमतेन राज्यं स्थापयित्वातिविषमो दुस्तरो यो विषयविषजलाशयो गृहं तस्याशा दिक् प्रवृत्तिवासना भोगेच्छा वा तस्या उपरतोऽभूत् ॥ २२ ॥

यत्पृष्टं गृहे कथमरमत तत्रोक्तमुत्तरमुपसंहरति । इति हवाव । इत्थमेवाहि अभिनिवेशितः प्रापितः कर्माधिकारो यस्य अखिलस्य जगतो बन्धध्वंसनः परोऽनुभावो यस्य तस्य यदङ्घ्रियुगलं तस्यानवरतं ध्यानं तदनुभावेन परिरन्धितकषायो दग्धरागादिमल आशयो यस्य अतोऽवदातः शुद्धोऽपि महतां ब्रह्मादीनामाज्ञापालनेन मानवर्द्धनः ॥ २३ ॥

उ इति विस्मये ह इति प्रसिद्धौ वावेति निश्चये आत्मनः समानैः शीलादिभिरुदारान्महतो दशपुत्रान् जनयामास ॥ २४ ॥

तानाह । आग्नीध्र इध्मजिह्वो यज्ञबाहुर्महावीरो हिरण्यरेता घृतपृष्ठः सवनो मेधातिथिर्वीतिहोत्रः कविश्चेत्यग्नीनां नामानि येषां ते ॥ २५ ॥

अर्भभावाद्बाल्याद्दारभ्य ॥ २६ ॥

तस्मिन्पारमहंस्याश्रमे श्रीमच्चरणारविन्दयोरविरतस्मरणेनाविगलितोऽखण्डितो यः परमो भक्तियोगस्तस्यानुभावेन विशोधितान्तःकरणा प्रतीतो यो भगवांस्तस्मिन्नात्मनस्त्वंपदार्थस्य तादात्म्यमविशेषेण विशेषो देहाद्युपाधिस्तदपोहेन प्रापुः ।
॥ २७ ॥ २८ ॥

उपशमाश्रयेषु सत्सु दशकोटिभिरेकमर्बुदम् एतादृशानि वर्षाणामेकादशार्बुदानि जगतीं बुभुज इत्यन्वयः राज्ञो धर्मपालनविषयभोगप्रभावेष्वाश्चर्यम् तत्रानायासेनैव धर्मपालनमाह । अव्याहता अखिलाः पुरुषकाराः पौरुषाणि यस्मात्तेन सारेण बलेन सम्भृतौ पूर्णौ दोर्दण्डौ तयोर्युगलं तेनापीडित आकृष्टो मौर्वीगुणस्तस्य स्तनितं टङ्कारस्तेनैव युद्धं विना विरमिता निरस्ता धर्मप्रतिपक्षा येन भोगातिशयमाह । बार्हिष्मत्याः स्वभार्याया अनुदिनमेधमानैः प्रमोदादिभिः पराभूयमानविवेक इवात एव विषयासक्त्यात्मानमनवबुध्यमान इव बुभुजे तत्र प्रमोदमायान्तं पतिं दृष्ट्वा हर्षस्ततः प्रसरणमभ्युत्थानादिलीला ततो यौषिण्यं योषित्स्वभावकृतशृङ्गारानुभावप्रकाशनं ततो व्रीडया प्रमुषिताः सङ्कुचिता हासावलोकास्ततो रुचिरक्ष्वेल्यादयः परिहासवाक्यादीनि तैः ॥ २९ ॥

प्रभावातिशयमाह । यावद्वसुधातलं लोकालोकपर्यन्तमवभासयति मेरुं प्रदक्षिणीकुर्वन्नादित्यस्तस्मिन्नर्केणैवोपलक्षितं प्रतपति प्रकाशयत्यर्केण चावच्छादयति तमसा वृणोति तदा द्वितीयः पतङ्गः सूर्य इव पर्यक्रामत् न चेदमसम्भावितम् यतो भगवदुपासनेनोपचितोऽतिपुरुषः पुरुषानतिक्रान्तः प्रभावो यस्य ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो भगवान् ब्रह्मापि मनुना स्वायम्भुवेन यथाविधि कृतपूजः प्रियव्रतस्य योगभ्रंशान्नारदस्य शिष्याभावात् कुटिलमीक्षणं सम्भवेत्तन्नास्तीत्याह । अविषममकुटिलं यथा भवति तथा प्रियव्रतनारदयोरपि समीक्षमाणयोः सतोरवाङ्मनसक्षयं वाक् च मनश्च वाङ्मनसे "अचतुरविचतुर" इत्यादिना निपातनात् समासान्तोऽच्प्रत्ययः तयोः क्षय वेद्यं "क्षि निवासगत्योः" इति गत्यर्थत्वाद्गत्यर्थस्य ज्ञानार्थत्वाद्वाङ्मनसविषयं न वाङ्मनसक्षयमनेनार्वाचीनलोकापेक्षया वैचित्र्यं विवक्षितं विचित्रान्तरमाह इदमवाङ्मनसगोचरमिति लोके प्रयोगो दृश्यते युक्तं चैतत्परब्रह्मस्वरूपगुणानामेवापरिच्छिन्नत्वेन वाङ्मनसयोरविषयत्वात्कार्यवर्गस्य वाङ्मनसविषयत्वात्सत्यलोकस्यापि कार्यत्वादव्यवहितं द्विपरार्द्धावसानपर्यन्तं तत्रत्यानां जन्मजरामरणाद्यभावेन नष्टं जीर्णमित्यादिव्यवहाराविषयं तथाचोक्तं द्वितीये "यद्वै परार्ध्यं तदुपारमेष्ठ्यं न यत्र शोको न जरा न मृत्युर्नार्तिर्न चोद्वेग" इत्येवं विधमात्मनः सम्यवस्थानं निवासस्थानं सत्यलोकमगमत् ॥ २१ ॥

मनुः स्वायंभुवोऽपि परेण ब्रह्मणैव प्रतिसन्धितः सम्पादितः मनोरथः राज्ये पुत्रमभिषिच्य वनं यास्यामीत्येवंरूपो मनोरथो यस्य तथाभूतः सन् सुरर्षिवरो नारदस्तस्यानुमतेनानुमत्या भावे क्तः आत्मजं पुत्रं प्रियव्रतं निखिलभूमण्डलमर्यादारक्षणाय स्थापयित्वातिविषमा दुस्तरा ये विषयाः शब्दादयस्त एव विषजलाशयाः विषोदकाशयास्तद्रूपं यद्गृहं तस्मिन्नाशा भोगेच्छा तत उपरतोऽभूत् ॥ २२ ॥

इति हवावेत्थं हि स जगतीपतिः प्रियव्रतः प्रथममात्मनः स्वस्येच्छाया अभिनिवेशितः प्रापितः कर्माधिकारः भगवदाराधनरूपकर्माधिकारः यस्य सः अखिलस्य जगतः बन्धनध्वंसनः बन्धननिवर्त्तकः अत एव उत्कृष्टः अनुभावः प्रभावो यस्य तस्य भगवतः कृत्स्नजगदुदयविभवलीलस्य यदङ्घ्रियुगं तस्य यदविच्छिन्नं ध्यानं तस्य प्रभावेण परिरन्धितकषायः दग्धरागादिमलः आशयोऽन्तःकरणं यस्यात एवावदातः निर्मलोऽपि महतां ब्रह्मादीनामाज्ञापालनेन मानवर्द्धनः भूमण्डलमनुशिष्टवान् ॥ २३ ॥

अनुशासनप्रकारमेव विवक्षुस्तावद्दारपरिग्रहमपत्यानि चाह । अथेति । अथ चतुर्मुखादेशानन्तरं निवृत्तिनिष्ठोऽपि प्रवृत्तोऽभूदिति विस्मयते । हेति । विश्वकर्मणः विश्वकर्मनाम्नः प्रजापतेर्ब्रह्मणो बर्हिष्मतीं नाम दुहितरमुपयेमे उदवोढ उ इति विस्मये हवावेति प्रसिद्धौ तस्यां बर्हिष्मत्यामात्मसमानैः स्वतुल्यैः शीलादिभिर्गुणैरुदारान्महतः औदार्यानिति पाठे आत्मसमाः शीलादयो येषामिति बहुव्रीहिः तत्र शीलं स्वभावः सद्वृत्तिश्च गुणाः शौर्यादयः कर्मव्यापारः रूपं सौन्दर्यं वीर्यं पराभिभवसामर्थ्यं शौर्यं रणमध्ये स्वगृह इव प्रवेशसामर्थ्यमौदार्यं वदान्यता एवं विधान् दशात्मजान् भावयाम्बभूव उत्पादयामास तथा यवीयसीं दशानामात्मजानामनुजामूर्जस्वतीं नाम कन्यां भावयाम्बभूवेति पूर्वेणान्वयः ॥ २४ ॥

पुत्रान्निर्दिशति । आग्नीध्रेति । आग्नीध्रादीनामितरेतरयोगे द्वन्द्वः सर्वेऽग्नीनां नामानि येषां तथाभूता ये तेषां दशानां पुत्राणां मध्ये कविर्महावीरः सवन इति त्रय ऊर्ध्वरेतसः जितेन्द्रिया आसन् ते कव्यादयः त्रयः बाल्यादारभ्यात्मविद्यायां कृतः परिचयो यैस्ते पारमहंस्यं परमहंसाः शुद्धान्तःकरणाः तेषां सम्बन्धिनमाश्रममभजन् केवलं निवृत्तिधर्मपरायणा अभवन्नित्यर्थः ॥ २५ ॥ २६ ॥

तस्मिन्नुह वा पारमहंस्याश्रमे हि वर्तमानाः उपशम इन्द्रियनिग्रह एव शीलं येषां ते अत एव परमर्षयः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सकलजीवानां निकायः समूहः स आवासः शरीरं यस्य निकायस्याधारस्तस्येति वा मृत्युभयं संसृतिभयं तेन भीतानां शरणभूतस्य रक्षणोपायभूतस्य रक्षितश्च भगवतो वासुदेवस्य श्रीमतेऽश्रणारविन्दयोर्यदविच्छिन्नं स्मरणं तेनाविगलितः आविच्छिन्नः अत्युत्कर्षरूपो यः परमभक्तियोगः तस्य प्रभावेण उपचयेन वा परिभाविते निरस्तरागादिके निर्वासितनामिति यावत् यदन्तर्हृदयं मनस्तस्मिन्नधिगते साक्षात्कृते सर्वेषां भूतानामात्मभूते अन्तः प्रविश्य शासनेन धारके प्रत्यगात्मनि प्रत्यग् जीवः आत्मा शरीरं यस्य तस्मिन् प्रतीचः आत्मनीति वा प्रत्यगात्मशरीरक इति वा भूतानामात्मभूते इत्यचेतन्यशरीरकत्वमुक्तं । प्रत्यगात्मनीति जीवशरीरकत्वमेवंभूते भगवत्येव वर्तमानस्य भगवदपृथक्सिद्धविशेषणतया साक्षात्कृतस्यात्मनः स्वस्य तादात्म्यं तत्स्वभावतां साधर्म्यमित्यर्थः अविशेषेण जगद्व्यापारवर्जं कार्त्स्न्येन समीयुः मुक्ता बभूवुरित्यर्थः अविशिष्टाः सप्तपुत्राः पित्रधीनाः स्थिताः इतिभावः ॥ २७ ॥

तथा अन्यस्यामपि भार्यायां त्रयः पुत्राः जातास्तान् तदधिकारं च निर्दिशति । उत्तम इति ॥ २८ ॥

एवमुपशमायनेषु उपशमो गुणान्तराणामप्युपलक्षणमात्मसमानशीलेति पूर्वमुक्तत्वात् सद्गुणाश्रयेषु सत्स्वित्यर्थः अथ जगतीपतिः प्रियव्रतः अर्बुदः कोटिः अन्ये तु दशकोटिमर्बुदमित्याहुः वत्सराणामेकादशार्बुदानि जगतीं बुभुज इत्यन्वयः राज्ञां धर्मपरिपालनविषयभोगप्रभावैर्भाव्यं तत्रानायासेनैव धर्मपरिपालनमाह । अव्याहता अखिलाः पुरुषकाराः पौरुषाणि यस्य तेन सारेण बलेन संभृतौ पूर्णौ यौ दोर्दण्डौ तयोः युगलं तेनापीडित आकृष्टो यो मौर्वीगुणस्तस्य स्तनितं टङ्कारस्तेनैव युद्धं विना विरमिता निरस्ता धर्मविरोधिनो येन भोगातिशयमाह । बार्हिष्मत्यां स्वभार्यायामनुदिनमेधमानैः प्रमोदादिभिः पराभूयमानविवेक इवात एव विषयरुच्यानवबुद्ध्यमानः स बुभुजे तत्र प्रमोदः पतिं दृष्ट्वा हर्षः ततः प्रसरणमभ्युत्थानादिलीलाः ततो योषित्वं योषित्स्वरूपकृतशृङ्गारादिभावप्रकाशनं ततो व्रीडया मुषिताः सङ्कुचिताः हासावलोकाः ततो रुचिरक्ष्वेल्यादयः मृदुतरपरिहासवाक्यादीनि तैः ॥ २९ ॥

प्रभावातिशयमाह । यावदिति । भगवानादित्यः सूर्यः सुरगिरिं मेरुमनुभ्राम्यन्परिक्रमन्प्रदक्षिणीकुर्वन् वसुधातलं भूमण्डलं यावदवभासयति अर्द्धेनैव प्रतपत्यर्द्धमेव प्रकाशयत्यर्धमाच्छादयतिमेरोश्छायातस्तमसाच्छादयति मेरोः पार्श्वान्तरमवभासयन्नपि पार्श्वान्तरं न प्रकाशयतीत्यालोच्य तद्वसुधातलार्द्धावसानमनभिनन्दन्नसमीचीनं मन्वानः रजनीमपि दिवसं करिष्यामीति यत्सूर्येणानवभातं वसुधातलार्द्धं तदप्यवभासयामीति कृतसङ्कल्पः भगवदुपासनेनोपचितोऽतिपुरुषप्रभावः अमानुषप्रभावः यस्य समजवेन सूर्यसमानवेगेन तद्वत्प्रकाशबहुलेन च रथेन द्वितीयः पतङ्गः अपरः सूर्य इवातस्तरणिं सूर्यमनुसृत्य यथा तरणिर्गच्छति तथा मेरोः परितः आक्रामति यदा मेरोर्दक्षिणस्यां दिशि सूर्योऽवभासते तदा स्वयमुत्तरस्यां यदा स उत्तरस्यां तदा स्वयं दक्षिणस्यामित्येव सप्तकृत्वश्चकासदित्यर्थः अयमप्यन्यः प्रभावविशेषः सूर्योऽन्तरिक्षे चरन्नवभासयति अयं तु भूम्यां चरन्नपर्यग्भ्राजीचकासदिति ॥ ॥३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

स्वाज्ञाग्रहणात्प्रियव्रताय तुष्यन्विरिञ्चः सत्यलोकमापेत्याह । भगवानपीति । मनुना यथावदुपकल्पिता अपचितिः पूजा यस्मै सः अनिमिषमिति क्रियाविशेषणं पक्ष्मनिवृत्त्य आत्मसमवस्थानं स्वस्थानं सत्यलोकं वाङ्मनसयोः वाचो मनसश्च द्वयं विषयीकर्तुमशक्यमव्यवहितं सतामिति शेषः रागादिदोषराहित्यात् ।२१।

स्वायम्भुवमनोरपि संसारत्यागप्रकारमाह । मनुरपीति । परेण विरिञ्चेन सुरर्षिवरानुमतेन देवर्षीणां मध्ये वरः श्रेष्ठः नारदः तस्यानुमतेन गुप्ती रक्षा अतिविषमविषय एव विषं तदेव जलाशयो ह्रदस्तस्मात् ॥ २२ ॥

प्रियव्रतस्य यथा विरिञ्चोपदेशं क्षितिरक्षणप्रकारं ब्रवीति । इति हेति । इतिशब्दो हेत्वर्थः यस्माद्गुरूणामनुशासनमनुल्लङ्घनीयमत इति बन्धध्वंसनपरोऽनुभावः प्रभावः-सामर्थ्यं यस्य स तथा तस्य ध्यानानुभावेन ध्यानसामर्थ्येन ध्यानादुत्पन्नज्ञानेन वा कषायः पापं रन्धिदाहे रन्धितं दग्धमपि सम्भावितमिति ॥ २३ ॥

वानप्रस्थाश्रमस्थ एवायं राज्यमपालयद्विरक्तत्वान्न तु गृहाश्रमस्थ इतिशङ्कां परिहर्तुमाह । अथेति । साप्युभयकुलशुद्धिकरीत्याशयेनाह । तस्यामिति । उहवा इति निपाताः प्राक्पुत्रानुत्पत्तौ सन्तापं पश्चात्सन्तोषं तत्र प्रसिद्धिं सूचयन्ति भावयाम्बभूवोत्पादयामास ॥ २४ ॥

तेषां नामान्यमाह । आग्नीध्रेति । यज्ञबाहोरनुजो महावीरः घृतपृष्ठानुजः सवनः वीतिहोत्रानुजः कविः ॥ २५ ॥

ऊर्ध्वरेतसो ब्रह्मचर्याख्यव्रतधारिणः अर्भकभावाद्बाल्यात्प्रभृति आत्मविद्यायां परविद्यायां कृतपरिचयाः पूर्णोऽभ्यासाः एवशब्देन मानसपरमहंसाश्रमं व्यावर्तयति ॥ २६ ॥

तस्मिन्नाश्रमे वर्तमानाः स्वयोग्यगुणोपसंहारेण मुक्तिः स्यादिति दर्शयितुं सकलजीवेत्यादिगुणविशिष्टत्वं हरेरुक्तं नतु गुणानामियत्तया अविरतस्मृत्या विगलितस्य तैलधारायितस्य परमभक्तियोगस्यानुभावेन परिभाविते वशीकृतेऽन्तर्हृदयेऽधिगते ज्ञाते आत्मभूते अतिप्रिये प्रत्यगात्मनि स्वबिम्बेऽन्तर्यामिणि अविशेषेण पार्थिवदेहत्यागेन तादात्म्यं तद्रूपसाम्यमेवापुः सर्वे चतुर्बाहव इत्यादेः भगवतीति सप्तमीनिर्देशात्सैक्यमत्रोच्यते तदधीनत्वं तत्स्वामित्वं वा तदेकचित्तत्वं वा तत्कामितकामित्वं वा विशेषेण स्वातन्त्र्यमन्तरेणेति च ॥ २७ ॥

न केवलमस्यैकैव पत्नी किन्तु द्वितीयाप्यस्ति सापि प्रयोजकपुत्रप्रसूरित्याह । अन्यस्यामपीति । तत्कृत्यमुक्तं मन्वन्तराधिपतय इति ॥ २८ ॥

स प्रियव्रतो राजा कियन्तं कालं राज्यमभुङ्क्तेति तत्कालावधिमाह । एवमिति । उपशमायनेषु संन्यस्तेषु भगवतोऽधिकनिष्ठैवायनमाश्रयो येषां ते तथा तेष्विति वा परिवत्सराणामेकादशार्बुदानि मौर्वीगुणो ज्याख्यरज्जुस्तस्य स्तनितेन विस्फूर्जितेन प्रमोदप्रसरणमानन्दप्रवाहस्तस्य पोषणं प्रवर्धनं तेन च व्रीडया च विशिष्टचेष्टालक्षणया च प्रमुषितहास ईषत्तिरस्कृतहासनं तेन युक्तोऽवलोको यस्तेन रुचिरा क्ष्वेलना नर्मवागेवं पूर्वैः पराभूयमानविवेकोऽनाविर्भूतविवेकज्ञानत्वादनवबुध्यमान इवाज्ञतुल्यः न त्वज्ञ इत्यर्थः महामना इत्युक्तेः ॥ २९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नन्वत्रास्य विषमविषयभोगविशेष एवोक्तो न तु माहात्म्यविशेष इत्यतस्तमाह । यावदिति । अयमादित्यो भगवान्सुरगिरिमनुक्रामन्यावदवभासयतीत्युक्तमेव विवृणोति । वसुधातलमिति । प्रतपति प्रकाशयति पुरुषमानमतिक्रम्य वर्तमानः प्रभावो यस्य स तथा तदादित्यप्रवर्तनमात्मराज्यान्धकारकरणं समजवेन सूर्यरथसदृशवेगेन रजनीं रात्रिमपि दिनं प्रकाशवत् व्यवहारयोग्यं करिष्यामीति मत्वा तरणिमन्वादित्यस्य पृष्ठतः सप्तवारं पर्याक्रामत् मेरोः परिसरभूमिमिति शेषः पतङ्गः सूर्यः।३०।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अवाङ्मनसं त्वयमिति पाठे त्वयं निवासं ब्रह्मलोकमगमदित्यन्वयः । अवाङ्मनस इत्यादिकं त्वात्मसमवस्थानमित्यस्यैव विशेषणम् । तच्च भगवत्स्वरूपस्फूर्त्तिः तत्प्रियव्रतनारदयोः प्रवर्त्तयन् अगमत् स्वं निवासम् ॥ २१ ॥

मनुरपीत्यादिवाक्येन प्रियव्रतस्य राज्यं पूर्व्वमिति गम्यते तथैव श्रीविष्णुपुराणेऽपि दृश्यते तथैवच तत्पुत्राणां तृतीयचतुर्थपञ्चममनुत्वमुत्तानपादवंशजस्य तु चाक्षुषस्य षष्ठमनुत्वं तद्वंशान्तिमस्य प्राचेतसस्य दक्षस्य च षष्ठमन्वन्तरे राज्यं घटते अन्यथा परिवेत्तृत्वादिकमापद्येत । न च तयोर्ज्येष्ठानुक्रमेणैव राज्यं किन्तु वंशेषु कदाचित् कस्य चित् साम्राज्यमिति वेणमृत्यौ प्रचेतसां तपस्यायां चाराजकत्वासम्भवात् किन्तूत्तानपादस्य चिरकालेनैव सुतोत्पत्तिरिति गम्यते यत्तु चतुर्थे । "प्रियव्रतोत्तानपदौ मनुपुत्रौ महौजसौ । तत्पुत्रपौत्रनप्तॄणामनुवृत्तं तदन्तरम्"इति तदपि तद्वंश्यस्य मनूनामपि तद्ग्रहणेन गृहीतत्वात् स्वारोचिषस्यापि तदन्तःपातात् यच्च श्रीपृथुं प्रति ब्रह्मवचनम् । "न वध्यो भवतामिन्द्रो यद्यज्ञो भगवत्तनुः"इति यज्ञस्येन्द्रत्वेन तद्राज्यस्य स्वायम्भुवसमकालत्वं बोधयति । अत्रापि तदादरार्थैव तदभेदनिर्द्देशो ज्ञेयः तदंशावेशेनैवान्येषामिन्द्रत्वात् शब्दार्थस्तु तत्रैव दर्शितः तत्र प्रायः प्रियव्रतादिराज्यं तृतीयमन्वन्तरावसानमुत्तानपादादिराज्यन्तु षष्ठावसानम् प्रियव्रतवंश्ययोस्तामसरैवतयोस्तु मनुत्वं राजत्वमतीत्य चरमावस्थायां ज्ञेयं चाक्षुषवत् तस्मात् सर्व्वमेव समञ्जसमतः कथन एव विपर्य्ययो नतु कथनीये । यथा दशमे कुरुक्षेत्रयात्रादौ ॥ २२ ॥

रागादिदोषराहित्येन शुद्धोऽपि महीतलमनुशशास । महतां मानवर्द्धनः सन् तत्रापि तदर्थमेवेत्यर्थः ॥ २३ ॥

अथ अतो हेतोः राज्याद्धेतोरेव ॥ २४—२६ ॥

तादात्म्यं तत्साम्यम् ॥ २७ ॥ २८ ॥

अर्व्वुदं कोटिपर्य्यायं न्यर्बुदमेवतु दशकोटिः । तथैव षष्ठस्कन्धे बलेः स्वर्गविजये तैर्व्याख्यातम् । तथाचामरकोषे क्षीरस्वामिधृतं प्रमाणवचनम् । "एकं दशशतसहस्रायययुतं प्रयुताख्यं लक्षमथ नियुतञ्च । अर्व्बुदकोटिन्यर्बुदपद्मे खर्व्वं निखर्व्वमिति दशाभिः । गुणानाम महाशङ्कुसमुद्रमध्यान्तमथ परार्द्धञ्च । स्वहतं परार्द्धमिति तत् स्वहतं भूयर्ततोऽसङ्ख्यमिति । प्रयुताख्यलक्षमिति तयोरेकपर्य्यायत्वमित्यर्थः एवमर्व्वुदकोट्योरपि अर्व्वुदाख्यकोटिरिति मध्यपदलोपी समासः । तथा च माध्यन्दिनशाखायाम् इमा मेऽग्नय इष्टका धेनवः सन्त्येकादशच शतञ्च सहस्रञ्च सहस्रायुतं चायुतञ्चार्व्बुदञ्च न्यर्व्बुदञ्च समुद्रमध्यं वान्तश्च परार्द्धञ्चेत्यादि ॥ २९ ॥

यावदिति प्रजाभ्यः सुखदानेच्छयैव न तु स्पर्द्धयेति ज्ञेयम् । गद्यान्ते एवं कुर्व्वाणं प्रियव्रतमागत्य चतुराननस्तवाधिकारो नास्तीति निवारयामासेत्यधिकं क्वचित् ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यथावदिति तत्कालदेशोचितसपर्य्यया इत्यर्थः । अत्र प्रियव्रतस्य योगभ्रंशात नारदस्य च शिष्यगतमनोरथध्वंसात् कुटिलमीक्षणं सम्भवति तत्तु नास्तीत्याह । अविषमं यथा स्यात्तथा तयोरभिसमीक्षमाणयोः सतोः आत्मनः परमात्मनः सम्यगवस्थानं स्वरूपं स्वहृदि प्रवर्त्तयन् स्मरन् कीदृशं वाङ्मनसयोः प्राकृतयोरविषयं त्वयं सर्व्वनिवासस्थानत्वादाश्रयतत्त्वमित्यर्थः । पाठान्तरे अवाक् न विद्यन्ते वाचस्त्रैगुण्यविषया विधिनिषेधात्मिकाः श्रुतयो यत्र तथाभूतं यन्मनस्तस्य त्वयं निस्त्रैगुण्यमनोविषयमित्यर्थः अव्यवहृतं व्यवहारशून्यं यद्वा अव्यवहृतं प्रियव्रतं व्यवहारे प्रवर्त्तयन् त्वयं सत्यलोकमगमत् कीदृशम् आत्मनः स्वस्य सम्यगवस्थानं यत्र तत् प्रियव्रतं कीदृशमवाङ्मनसम् आत्मारामममहाभागवतत्वात् प्राकृतवाङ्मनसशून्यमित्यर्थः ॥ २१ ॥

परेण ब्रह्मणैव प्रतिसन्धितः संपादितो मनोरथो यस्य सः स्थितिगुप्तये मार्य्यादापालनाय विषमविषय एव विषजलाशयः विषसमुद्रस्तत्र या आशा प्रवृत्तिवासना तस्याः सकाशात् ॥ २२ ॥

गृहे कथमरमतेत्यस्योत्तरमाह । इति हवाव इत्थमेवेत्यर्थः । बन्धध्वंसन एव परानुभावः प्रकटप्रभावो यस्य तस्य परिरन्धितकषायो दग्धरागादिमलः आशयो यस्य सः अत एवावदातः परमशुद्धोऽपि महतां ब्रह्मादीनामाज्ञापालनेन मानमादरं वर्द्धयतीति सः ॥ २३ ॥

शीलादिभिरुदारान् भावयाम्बभूव उत्पादयामास ॥ २४ ॥ ॥ २५ ॥ २६ ॥

तस्मिन्नुहवै पारमहंस्याश्रम एव अविगलितो निश्चलो यः परमभक्तियोगः तस्यानुभावेन प्रभावेण परिशोधितं यदन्तर्हृदयं तत्राधिगतः प्रतीतो यो भगवान् तस्मिन् आत्मनस्त्वंपदार्थस्य तादात्म्यं लयमाविशेषेण विशेषो देहाद्युपाधिकृतपृथग्भावस्तदपोहेन ॥ २७ ॥ २८ ॥

उपशमाश्रयेषु सत्सु दशकोटिभिरेकमर्व्वुदमिति श्रीस्वामिचरणाः अर्व्वुदं कोटिपर्य्यायमिति सन्दर्भः एकादशार्व्वुदानि परिवत्सरान् जगतीं बुभुजे इत्यन्वयः राज्ञां खलु परियशःसु प्रतापविषयभोगप्रभावेष्वावश्यकेषु मध्ये प्रथमं तस्य प्रतापातिशयं वर्णयति । अव्याहताः अखिलाः पुरुषकाराः पौरुषाणि यस्मात्तेन सारेण बलेन संभृतं पूर्णं यद्दोर्दण्डयुगलं तेन आपीडितः आकृष्टो मौर्व्वीगुणास्तस्य स्तनितं टङ्कारः तेनैव युद्धं विनैव विरमिता निरस्ता धर्मप्रतिपक्षाः शत्रवो येन सः भोगातिशयं वर्णयति । वर्हिष्मत्याः स्वभार्य्याया अनुदिनमेधमानैः प्रमोदादिभिःपराभूयमानविवेक इव तत्र प्रमोद आयास्त पति दृष्ट्वा हर्षः ततः प्रसरणमभ्युत्थानस्वाङ्कवरणाविवर्त्तनस्थानान्तरगमनादि

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ततो यौवरायं योषित्स्वाभाविकधर्म्मोऽपाङ्गचालननासामुकोन्नमनकर्णकण्डूयनादिस्तयं दूत्यम । ततः पत्युरौत्सुक्य मालक्ष्य व्रीडया प्रमुषिताः सङ्कोचिता हासावलोकास्ततोरुचिराः क्ष्वेल्यादयः परिहासवाक्यादीनि तैः अत एव विषयासक्त्या आत्मानमनवबुद्ध्यमान इव अत्र इवद्वयेन तस्य विवेकज्ञानयोः संपूर्णयोरक्षुण्णयोरपि वैषयिकलोकैर्दुर्गमत्वं व्यञ्जितं तत्र हेतुर्महामनाः विषयासक्तितदभावयोर्यौगपद्येन सद्भावादुस्तर्कमनस्तत्त्व इत्यर्थः॥२९॥

प्रभावातिशयं वर्णयति । यावद्वसुधातलं लोकालोकपर्यन्तमादित्योऽवभासयति मेरुं प्रदक्षिणी कुर्व्वन् तत्र अर्द्धेन अर्द्धावर्त्तेन प्रतपति प्रकाशयतीति दिवा भवति अर्द्धेन अपरार्द्धावर्त्तेन आच्छादयतीति तमसा रात्रिर्भवति तदाहि प्रियव्रतराज्याधिकारसमय इत्यर्थः । भगवदुपासनेन उपचितः अतिपुरुषः पूरुषानतिक्रान्तः प्रभावो यस्य सः तदनभिनन्दन् अर्द्धेनाच्छादनमप्रशंसन् तरणिमनुलक्ष्यीकृत्य तरणेरस्ताचलात्परोहसमये स्वयमुदयाचलमारोहान्नित्यर्थः । पतङ्गः सूर्यः पर्यक्रामत् परिक्रान्तवान् प्रजाभ्यः सुखदानेच्छयैव न तु सूर्यस्पर्द्धया तेन ज्येष्ठादिमासेषु प्रियव्रताख्यसूर्यस्य चन्द्रादप्यतिशीतलत्वं मार्गशीर्षादिमासेषु तु सूर्यादपि प्रातःसायङ्कालयोरौष्ण्यमधिकमिति ज्ञेयम् । एवञ्च प्रियव्रतस्य सौभर्यादेरिव योगबलेनैव राजत्वसूर्यत्वे कायद्वैतेनैव ज्ञेये ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अभिसमीक्षमाणयोः सतोर्मनुना उपकल्पिता अपचितिः पूजा यस्य स अविषमं सर्वदैकरसमवाङ्मनसं वाङ्मनसयोः कार्त्स्न्येनाविषयमव्यवहृतं लौकिकव्यवहारातीतम् आत्मसमवस्थानमात्मनि उपासके सम्यगवस्थानं यस्य तमन्तर्यामिणं प्रवर्त्तयन् चिन्तयन् क्षयं स्वस्थानमगमत् ॥ २१ ॥

अतिविषमः मुमुक्षवननुरूपो यो विषयजलाशयः गृहं तस्य आशा दिक् तस्याः अपि सकाशात् सुरर्षिवरस्य योगाधीशस्य अनुमतेन उपरराम ॥ २२ ॥

अधिनिवेशितः प्रवर्तितः कर्माधिकारो यस्य सः परिरन्ध्रितकषायः दग्धरागादिमलः आशयोऽन्तः करणं यस्य सः महतां ब्रह्ममन्वादीनां मानवर्द्धनः तदाज्ञापालनात् ॥ २३ ॥ २४ ॥

अग्नीनां नामानि येषां ते तथा ॥ २५ ॥ २६ ॥

श्रीमच्चरणारविन्दयोरविरतस्मरणेन निरन्तरध्यानेन अविगलितः अस्खलितो यः परो ध्रुवानुस्मृतिरूपो भक्तियोगस्तस्यानुभावेन परिभाविते योग्यतां नीते अन्तर्हृदयेऽधिगते आविर्भूते भगवति सर्वेषां भूतानामचेतनानामात्मभूते आश्रयरूपे प्रत्यगात्मनि प्रतीचां चेतनानां चात्मनि आश्रये चिदचिच्छक्तिमतीत्यर्थः आत्मनस्तादात्म्यम् अंशत्वेन भिन्नस्वरूपस्यापि जीवात्मनः अंशिभिन्नावस्थानाभावादभिन्नत्वं सर्वे अविशेषेण समीयुः ॥ २७ ॥ २८ ॥

उपशमायनेषु सत्सु एकदशशाहस्रायुतं लक्षप्रयुतकोटीः क्रमशः अर्बुदमब्जं खर्वनिखर्वमहापद्मशङ्कवस्तस्मात् । जलधिश्चान्त्यं मध्यपरार्द्धमिति दशगुणोत्तरासंज्ञाः संख्याया व्यवहारार्थं यथाकृताः पूर्वैरिति संख्यावचनात् दशकोटिरर्बुदं भवति एवं विंशानि परिवत्सराणामेकादशार्बुदानि जगतीपतिः बर्हिष्मत्याः अनुदिनमेधमानमनुदिन , प्रसरणमभ्युत्थानादिव्यापारेण यौषण्येन योषित्स्वभावानुरूपगुणप्रकाशनेन व्रीडाप्रमुषितैः लज्जासङ्कोचितैः हासावलोकैः रुचिरैः क्ष्वेल्यादिभिश्च पराभूयमानविवेक इव अनवबुध्यमान इव च जगतीं बुभुजे कथम्भूतः अव्याहताः अखण्डिताः अखिलपुरुषकाराः समग्रपौरुषाणि यस्मात्तेन सारेण बलेन सम्भृतयोः प्रांशयोर्दोर्दण्डयोर्युगलेन आपीडितस्य मौर्वीगुणस्य स्तनितेन टङ्कारेणैव विरमिताः त्यक्ताः धर्मव्यापाराः धर्मप्रतिपन्ना अधार्मिका ये न सः ॥ २९ ॥

आदित्यः सुरगिरिमनुपरिक्रमन् यावत् वसुधातलमवभासयति प्रकाशयति तत्र अर्द्धेन उपलक्षितं यदा प्रतपात अवशिष्टेनार्द्धेनोपलक्षितं तु अवच्छादयति दूरीभूतस्वतेजोऽभावेन तमसा पूरयतीत्यर्थः तदाहि तद्वसुधातलस्य अर्द्धभागं तमोव्याप्तमनभिनन्दन् रजनीमपि दिनं करिष्यामीति बुद्ध्या द्वितीयः पतङ्गः आदित्य इव सप्तकृत्वः सप्तवारान् तरणिमनुपर्यक्रामत् यतो भगवदुपासनेनोपचितः सुसमृद्धः अतिपुरुषः पुरुषानतिक्रान्तः अतिपुरुषः । तथाभूतः प्रभावो यस्य सः ॥ ३० ॥ ३१

भाषाटीका ।

प्रियव्रतजी का इस प्रकार सद्व्यवहार को देखने से मनुजी को वडा सन्तोष हुआ तव तिनने आनन्द से ब्रह्माजीका पूजनकिया ब्रह्माजी भी मनु के पूजन को ग्रहणकरके प्रियव्रत तथा नारदजी के सामने ही मन वचन के अगोचर जो अपना धाम सत्यलोक तहां चले गये ॥ २१ ॥

मनुजी भी अपने मनोरथ के सिद्ध होजाने से नारदजीकी अनुमति से सम्पूर्ण पृथिवी मण्डल की स्थिति तथा पालन के निमित्त अपने पुत्र प्रियव्रत के हस्त मे राज्य को देकर दुस्तर विषय वासना रूप जलाशय से निवृत्त हो गये ॥ २२ ॥

यद्यपि भगवान् आदिपुरुष के चिन्तन से सव संसार का बन्धन नाश होजाता है तव प्रियव्रत भी उन भगवान् के चरणयुगल के आश्रय करने से रागादिक मलों के नष्ट होजाने से शुद्ध चित्तवाले होगये तथापि ब्रह्माजी की आज्ञा का पालन करने के निमित्त राजा होकर पृथिवी का पालन करते थे फिर विश्वकर्मा नामक प्रजापति की पुत्री बर्हिष्मती केसाथ उनने विवाह किया ॥ २३ ॥

उसी भार्या मे उनने अपने तुल्य शीलगुण वाले रूपवाले वीरतावाले उदार गुणवाले दश पुत्रों को एक ऊर्जस्वती नामक कन्या को उत्पन्न किया ॥ २४ ॥

हे राजन् ! प्रियव्रत के दशपुत्रों के नाम सुनो अग्नीध्र इध्मजिह्व यज्ञवाहु महावीर हिरण्यरेता घृतपृष्ठ सवन मेधातिथि वीतिहोत्र कवि अग्नि के नाम के समान के नाम हैं तिन के मध्य मे कवि महावीर सवन तीनो जन ऊर्ध्वरेता हुये २५

वे सव वाल्य अवस्था से आत्मविद्या मे अभ्यास करके परमहंस आश्रम को धारण करके रहे ॥ २६ ॥

उस आश्रम मे वे तीनो शान्त परम ऋषी होकर जो भगवान् सव जीवों के निवासभूत हैं संसार मे डरने वाले के रक्षक हैं उन भगवान् वासुदेव के चरणारविन्दको निरन्तर स्मरण करने से निश्चल परमभक्तियोग को प्राप्त

ये वा उह तद्रथचरणनेमिकृतपरिखातास्ते सप्तसिन्धव आसन् यत एव कृताः सप्त भुवो द्वीपाः ३१
जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करसंज्ञास्तेषां परिमाणं पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो यथासङ्ख्यं द्विगुणमानेन बहिः समन्तत उपक्लृप्ताः ॥ ३२ ॥

क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमण्डोदशुद्धोदाः सप्त जलधयः सप्त द्वीपपरिखा इवाभ्यन्तरद्वीपसमाना एकैकश्येन यथानुपूर्वं सप्तस्वपि बहिर्द्वीपेषु पृथक्परित उपकल्पितास्तेषु जम्ब्वादिषु बर्हिष्मतीपतिरनुव्रतानात्मजानाग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान्यथासंख्येनैकैकस्मिन्नेकमेवाधिपतिं विदधे ॥ ३३ ॥

दुहितरं चोर्जस्वतीं नामोशनसे प्रायच्छद्यस्यामासीद्देवयानी नाम काव्यसुता ॥ ३४ ॥

नैवंविधः पुरुषकार उरुक्रमस्य पुंसां तदङ्घ्रिरजसा जितषड्गुणानाम्।
चित्रं विदूरविगतः सकृदाददीत यन्नामधेयमधुना स जहाति बन्धम् ॥ ३५ ॥

भाषाटीका ।

होकर अपने अन्तःकरण को शुद्ध करते भये तिस से तिनके अन्तःकरणों मे सर्वभूतात्मा भगवान् का प्रकाश होने से प्रत्यगात्मा मे देहादि उपाधियों के नाश होने से दिव्य भगवत्साम्य को प्राप्त भये ॥ २७ ॥

प्रियव्रतजी की दूसरी एकभार्या मे उत्तम तामस रैवत नाम के तीन पुत्र भये वे तीनो मन्वतर के अधिपति भये ॥ २८ ॥

वे तीनों पुत्र शांति के आश्रय करने वाले भये तब बडे उत्साह वाले प्रियव्रत जीने पृथिवी के पति ग्यारा अर्बुद वर्ष पर्यन्त पृथिवी का भोग किया उनके भुजा दोनो अतिशय बलसे परिपूर्ण हैं तिस से धनुष के गुणको आकर्षण करके ध्वनि करते थे तब युद्ध के विना भी उस शब्दको सुन कर अधर्मी लोग दूर होजाते थे उनका विषय भोग भी बहुत था अपनी प्रिया बर्हिष्मती के साथ प्रतिदिन बढने वाले आनन्द क्रीडा को करते थे हास्यपरिहासादिकों से विज्ञान विवेक सब छिपगयेथे तिस से आत्म तत्त्वको भूलगये ॥ २९ ॥

सुमेरु की परिक्रमा करते हुये भगवान् सूर्य्यनारायण जहां चलते थे तहां अंधेरा से उजाला होता था आधे मे अंधेरा रहता था तिससे असन्तुष्ट होकर प्रियव्रतजीने प्रतिज्ञा किया कि हम अपने प्रभाव से रातको भी दिन कर देंगे इस विचार से सूर्य्य सरीके तेजवाले रथको लेकर दूसरे सूर्य सरीके सात वखत सूर्य के पीछे घूमे जैसा दूसरा सूर्य हो तिस प्रकार से ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ये वै उह अतिप्रसिद्धास्तस्य रथचक्राग्रकृताः परिखाता गर्ताः । यतो यैरेव कृताः ॥ ३१ ॥

तानाह । जम्ब्विति । तेषां परिमाणं शृणुविति शेषः पूर्वस्य यद्विस्तारमानमुत्तरस्ततो द्विगुणेन विस्तारमानेनेत्येवं सिन्धुभ्यो बहिः समन्तत उपक्लृप्ता रचिताः ॥ ३२ ॥

यथा सिन्धुभ्यो बहिरेकैकशो द्वीपा एवं द्वीपानामपि बहिः सिन्धव इत्याह । क्षारोदेति । दधिमण्डो मथितं दधि एते सप्त जलधयः सप्तद्वीपानां परिखा इवाभ्यन्तरे तैः सम्वेष्टिता ये द्वीपास्तैः समाना विस्तारतः बहिर्नान्तः पृथगसङ्कीर्णतया ॥ ३३ ॥ ३४ ॥

अहो आश्चर्यं राज्ञः सामर्थ्यमिति परीक्षिदभिप्रायज्ञो भगवान्बादरायणिराह । नैवमिति । जिताः षड्गुणाः इन्द्रियाणि षडूर्मयो वा यैस्तेषामेवंविधः पुरुषकार इति न चित्रं नासम्भावितम् यतो विदूरविगतोऽन्त्यजोऽपि यस्योरुक्रमस्य नाम सकृदुच्चारयेद्यः सोऽधुना तत्क्षणमेव बन्धं संसारं त्यजमिति पाठेऽप्ययमेवार्थः पाठान्तरे तत्त्वं चाण्डालत्वम् जहाति शुद्धो भवतीत्यर्थः॥३५॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रभावान्तरमप्याह । य इति । ये हि सप्त तस्य प्रियव्रतस्य यद्रथचक्रं तस्य नेमिना कृताः परितो गर्ताः त एव सप्त सिन्धवः सप्तसमुद्रा आसन् यतः यैरेव सिन्धुभिः कृताः सप्तसंख्यकाः भुवो द्वीपाः केऽमी द्वीपा के वा सप्त सिन्धव इति विवित्सायां तावत् द्वीपान्निर्दिशति । जम्ब्विति । तेषां द्वीपानां परिमाणं शृणुवति कथयामीति वा शेषः पूर्वस्मात् लक्षयोजनादिपरिमाणविशिष्टाज्जम्ब्वादिपूर्वपूर्वोक्तद्वीपादुत्तरोत्तरः प्लक्षद्वीपः यथासंख्येन द्विगुणेन द्विलक्षेण परिमाणेनेत्येवं बहिः पूर्वपूर्वद्वीपाद्बहिः परित उपक्लृप्ताः कल्पिताः ॥ ३१ ॥ ३२ ॥

अथ सिन्धून्निर्दिशंस्तेषां परिमाणं चाह । क्षारोदेति । दधिमण्डो मथितं दधि एते सप्त सिन्धवः सप्तद्वीपानां परिखा इव दृश्यन्ते अभ्यन्तरद्वीपसमानाश्चाभ्यन्तरद्वीपास्तत्समुद्रवेष्टिता द्वीपास्तैस्तत्परिखात्ववर्तमानाः समानपरिमाणाः सप्तद्वीपेषु यथापूर्वमेकैकशः बहिर्नान्तःपृथगसङ्कीर्णमुपकल्पिता इत्यर्थः अयमर्थः प्रथमं जम्बूद्वीपो लक्षयोजनविस्तारस्तत्परिखाभूतः क्षारोदोऽपि लक्षयोजनविस्तारः (१) ततः प्लक्षद्वीपो हि लक्षयोजनविस्तारः तत्परिखाभूतेक्षुरसोदश्च द्विलक्षयोजनविस्तारः ततः शाल्मलिश्चतुर्लक्षयोजनः सुरोदोऽपि चतुर्लक्ष इत्यादिना नन्वल्पपरिमाणो ह्यधिकपरिमाणेन वेष्टितेन समपरिमाणेन कथमेतदुच्यते विस्तारसाम्येऽपि दैर्घ्याधिक्यादुपपत्तिः तेषु जम्ब्वादिषु द्वीपेषु बर्हिष्मतीपतिः प्रियव्रतः अनुवर्तिन आग्नीध्रादिसंज्ञकान् सप्तात्मजानेकस्मिन्नेकस्मिन् द्वीपे जम्ब्वादौ यथासंख्येन ज्येष्ठादिक्रमेण एकमेकमेवाधिपतिं विदधे चकार ऊर्जस्वतीं नाम

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दुहितरमुसनसे शुक्राय प्रादात् यस्यामूर्जस्वत्यां काव्यस्योशनसः सुता देवयानी नाम कन्यका आसीदुत्पन्नाभूत् ॥ ३३ ॥३४॥

एवमतिमानुषप्रियव्रतप्रभावं श्रुतवतो राज्ञस्तत्प्रभावविषयासम्भावनामाशङ्क्य न केवलमुक्त एव तस्य प्रभावः किन्त्वन्येऽपि सन्तीति यदनन्तविविधविचित्रशक्तिं भगवन्तं सर्वात्मनोपासीनानां विचित्रभक्तानां प्रभावो नासम्भावनीय इत्याह । नैवमिति । उरुक्रमस्य पुंसां तदङ्घ्रिरजसा जितषड्गुणानां पुरुषकारः पुरुषव्यापार एवंविध उक्तविधः चित्रमसम्भावनीय इति न किन्तूक्तविधा अन्येऽपि प्रभावाः सम्भाव्यन्ते एवेति भावः तत्र हेतुः । उरुक्रमस्य त्रिलोकीं पदत्रयेणाक्रान्तवतो विचित्रशक्तेर्भगवतः पुंसां भक्तानां तस्योरुक्रमस्याङ्घ्रिरजसा जिताः षड्गुणाः अशनायापिपासाशोकमोहजमरामृत्यवो यैस्तेषामिति त्रिलोक्याक्रमणादिरूपानितरसाधारणप्रभावशीलं भगवच्चरणारविन्दमुपासीनानामनितरसाधारणप्रभावसम्भावना न कार्येति द्योतनायोरुक्रमस्य तदङ्घ्रिरजसेत्युक्तं किं वक्तव्यं तच्चरणप्रभावोऽनितरसाधारण इति यतस्तन्नामप्रभावो न वाङ्मनसगोचर इत्याह । विदूरविगतः सत्पथादपेतः अन्ये तु विदूरविगतः दूरतः परित्याज्योऽन्त्यज इति व्याचक्षते यस्य भगवतो नामधेयं सकृदप्यादधीताभिदध्यात् स विदूरविगतः अधुना तत्क्षणमेव बन्धं संसारं विजहाति मुक्तो भवतीत्यर्थः एवं सामान्येन नामस्मरणस्य मुक्तिसाधनत्वप्रतिपादकमेवंविधं वचनजातमन्तिमस्मरणस्य मुक्तिसाधनत्वपरं द्रष्टव्यं "जन्मलाभः परं पुंसामन्ते नारायणस्मृतिः नामानि येऽसुविगमे विवशा गृणन्ति तेनेकजन्मशमलं सहसैव हित्वा संयान्ति" इतिवचनान्तरानुरोधात् अन्यथा "तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यत" इति वेदनातिरिक्तोपायान्तरनिषेधश्रुतिविरोधापत्तेः अन्तिमस्मरणं तु वेदनरूपतामापन्नं तत्साधनं भवतीति न विरोधः ननु वेदनं हि नाम ज्ञानकर्मयोगानुगृहीतात् दृढदृढाभ्यासाधेयातिशयमाप्रयाणादनुवर्तमानमसकृदावृत्तिकं विजातीयप्रत्ययान्तराव्यवहितं प्रत्यक्षतापन्नं प्रीतिरूपात्मकं ज्ञानं तत्कथमन्तिमनामस्मरणमात्रमुक्तविधवेदनात्मतामापन्नं भवतीति उच्यते नोक्ताकारा अपि वेदनशब्दवाच्याः किन्तु परमात्मविषयं स्मरणात्मकं ज्ञानमेवान्तिमप्रत्ययरूपं तत्र प्रबलप्रतिबन्धानभ्यासविच्छेदव्यासङ्गान्तरद्वेषोऽपेक्षादिभिरन्तकाले कदाचिन्नाभूदित्यसम्भवपरिहारोपायतया ज्ञानकर्मयोगानुग्रहादय आकारा उपासनप्रकरणेषु कीर्तिताः तत्र भगवत्प्रसादवशाज्जायमानस्वविषयस्मरणात्मकज्ञानस्य नोक्ताकारा अपेक्षिता अत एव हि रागद्वेषभयाद्यात्मकमपि भगवद्विषयमन्तिमं ज्ञानं मुक्तिसाधनमिति वक्ष्यति गोप्यः कामाद्भयात्कंस इति ॥ ३५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अधवक्ष्यमाणं तल्लक्षणं किन्तदिति तत्राह । यो वा इहेति । अत्र वा इत्यादिनिपाताः अस्य ग्रन्थस्य वेदतुल्यत्वद्योतनाय अत एव संहितायामिति प्रत्यध्यायमुक्तिरिति इह भूतले तस्य प्रियव्रतस्य रथचरणस्य रथचक्रस्य नेमयः प्रान्तधारास्ताभिः कृताः परिखा दीर्घिकास्ताः सप्तपरिखाः सप्तसिन्धव आसन्नित्यन्वयः वा इत्यनेन समुद्राणां पूर्वसद्भावप्रसिद्धिं ध्वनयति अयं तु तेषां स्थौल्यं कृतवानिति तदुक्तम् ।

पूर्वसृष्टान् रथावृत्त्या स्थूलांश्चक्रे प्रियव्रतः ।
समुद्रांस्तेन तत्कर्तेत्याहुरेनं प्रियव्रतम् ।

इति यतो येभ्यः समुद्रेभ्यः सीमाभूतेभ्य एव भुवः सप्तद्वीपाः कृताः यद्वा एवशब्दः प्रधानभूताः सप्तवान्येऽवान्तरद्वीपा बहवः सन्तीति विशेषद्योतनार्थः ते सिन्धवः सप्तेति शेषः ॥ ३१ ॥

तेषां नामान्याह । जम्ब्वित्यादिना । तेषां द्वीपानां परिमाणं शृण्विति शेषः किमित्यत उक्तं पूर्वस्मादिति पूर्वस्मात्पूर्वस्मादुत्तरोत्तर इत्यान्तरादान्तरात् बाह्याद्बाह्य इत्यन्तर्बहिर्भावेन वर्तमानाः द्वीपा यथासंख्यं द्विगुणेन बहिः समन्तत उपक्लृप्ताः ॥ ३२ ॥

सिन्धुनामान्याह । लवणेति । अभ्यन्तरद्वीपसमाना इतिजम्बूद्वीपसमानो लवणोदधिः प्लक्षद्वीपसमान इक्षुरसोदधिरित्येव संख्येयं तत्राराजकत्वे तत्रत्यानां जनानां मिथो विवादेन विनाशः स्यादिति कृत्वाग्नीध्रादि सप्त पुत्रांस्तत्पतींश्चक्र इत्याह । तेष्विति ॥ ३३ ॥

पारिबर्हदाने सुतानां मिथो विवादः स्यादिति कृत्वा कन्यादानमपि स्वयमेव चक्र इत्याह । दुहितरमिति । "उशना शुक्रः काव्य" इति हलायुधः तत्पुत्र्यपि राजकुलवृद्धिकरीति भावेन तत्सुतामाह । यस्यामिति ॥ ३४ ॥

एवं विक्रमस्योरुक्रमविक्रमसम्बन्धित्वान्मुमुक्षुणा श्रवणादिनावश्यमभ्यसनीय इति भावेनाभिष्टौति । नैवंविध इति । हरेः पुंसां भक्तानामेवंविधः पुरुषकारो माहात्म्यविशेषश्चित्रं न भवतीति कुत इति तत्राह । तदङ्घ्रिरजसेति । जितैरिति शेषः षड्गुणाः कामादयो आरामादयो वा अशनादयो वा मनसा सह शब्दादयो वा यैरेते जितास्ते तथोक्ताः इतोऽपि चित्रं नेत्याह । विदूरेति । विप्रविवक्षया विदूरः शूद्रस्तस्मादपि विगतश्चण्डालः यस्य हरेर्नारायणादि नामधेयं सकृदाददीत सोऽधुना सद्य एव संसारलक्षणं बन्धं जहाति त्यजतीत्यन्वयः । तस्योरुक्रमस्येति । यद्वा विदूरविगतः दूराद्दूरङ्गतो दोषनिमित्ताद्बहिष्कृतोऽपि बन्धं दोषलक्षणमिति ॥ ३५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ये वै इति । रथोऽयमेकचक्रत्वादिच्छा परिमाणश्च ज्ञेयः ॥३१॥

अतो बहिर्बहिर्मण्डलस्याधिक्याचादृशतादिच्छया समुद्राणामुत्तरोत्तराधिक्यम् ॥ ३२ ॥

बहिर्बहिर्गमनं चान्तचान्तरावकाशनाशाशङ्कया ज्ञेयम् ॥ ३३ ॥ ३४—३८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ये वै उह अति प्रसिद्धास्तस्य रथचक्राग्रकृताः परिखाता गर्त्ता अत्र समुद्राणां सप्तसङ्ख्यत्वाद्रथा अपि सप्तैव स्वयोगबलकल्पिता एकचक्राः सूर्यरथादप्युच्चतराः मण्डलावृत्तिरीत्या भ्राम्यमाणा ज्ञेयाः तत्र च बहिर्बहिर्मण्डलानामधिकप्रमाणत्वाद्रथा अपि क्रमेणाधिकप्रमाणा अवगम्यन्ते इति सन्दर्भः मदीयो दूरस्थोऽपि रथ आर्यावर्त्तगतमदीयराजधानीस्थप्रजानां दृष्टिगोचरी भवत्विति इच्छया पूर्वपूर्वरथाद्द्विगुणोच्चताविशालताक उत्तरोत्तरो रथः कृत इत्यन्ये प्राहुः । अत-

स एव मपरिमितबलपराक्रम एकदा तु देवर्षिचरणानुशयनानुपतितगुणविसर्गसंसर्गेणानिर्वृतमिवात्मानं मन्यमान आत्मनिर्वेद इदमाह ॥ ३६ ॥

अहो असाध्वनुष्ठितं यदभिनिवेशितोऽहमिन्द्रियैरविद्यारचितविषमविषयान्धकूपे तदलमलममुष्या वनिताया विनोदमृगं मां धिग्धिगिति गर्हयाञ्चकार ॥ ३७ ॥

परदेवताप्रसादाधिगतात्मप्रत्यवमर्शेनानुप्रवृत्तेभ्यः पुत्रेभ्य इमां यथादायं विभज्य भुक्तभोगां च महिषीं मृतकमिव सह महाविभूतिमपहाय स्वयं निहितनिर्वेदो हृदि गृहीतहरिविहारानुभावो भगवतो नारदस्य पदवीं पुनरेवानुससार ॥ ३८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एव रथचक्राग्राणामीधकाधिकप्रमाणत्वात्तत्तत्परिखाताः समुद्रा अप्यधिकप्रमाणा दृश्यन्ते तेषु चोत्तरोत्तराधिकप्रमाणेषु सप्तसु रथेषु मध्ये पञ्चविंशत्या दिनैः सार्द्धपञ्चचत्वारिंशद्घटिकाधिकैकरथस्यारोहणमेवं सूर्य्यस्येव दक्षिणायनस्योपक्रममारभ्य प्रियव्रतस्योत्तरदेशतो दक्षिणदेशगमनं पौषपर्य्यन्तं पुनरुत्तरायणस्योपक्रममारभ्य परिसमाप्तिपर्य्यन्तं तावत्सङ्ख्यकदिनैर्व्युत्क्रमेण पुनरपि तत्तद्रथारोहणम् । एवं दक्षिणदेशात उत्तरदेशगमनमाषाढपर्य्यन्तं किन्तु स्वगत्या मेरुं वामावर्त्तेनैव परिक्राम्यतोऽपि सूर्य्यस्य ज्योतिश्चक्राधीनैरेव प्रदक्षिणीकृत्य क्रमेण शीघ्रगमनैर्दक्षिणायने दिनानि मासि मासि ह्रसन्ति उत्तरायणे तु क्रमेण मन्दगमनैर्दिनानि वर्द्धन्ते प्रियव्रतस्य तु सूर्य्यकृत रात्रिलोपार्थं स्वेच्छयैव मेरुं प्रदक्षिणीकृत्य परिक्रामतः स्वेच्छयैव मन्दीकृतैर्गमनैरुत्तरायणे दिनानि वर्द्धन्ते दक्षिणायने तु स्वेच्छाधीनया शीघ्र गत्या दिनानि ह्रसन्तीति ज्ञेयं रथानां योगप्रभावत्वाद्यथा समयं प्राकट्याप्राकट्ये च ज्ञेये तेषां सप्तसङ्ख्यत्वेनैव सप्तकृत्व इति पूर्व्वमुक्तं ज्ञेयं व्याख्येयं सप्तदिनानन्तरं प्रियव्रतस्य स्वयं निवृत्स्यनौचित्यादन्येन केनाप्यनिवर्त्तनश्रवणाच्च नासमञ्जसा यतो येभ्यः सिन्धुभ्य एव हेतुभ्यः ॥ ३१ ॥

परिमाणं शृणिवति शेषः । द्विगुणविस्तारमानेन एकैकस्मात् सिन्धोर्बहिः समन्ततः चतसृष्वेव दिक्षु ॥ ३२ ॥

यथैवैकैकशः सिन्धोर्बहिरेकैको द्वीपस्तथैकैकस्माद्द्वीपाद्बहिरेकैकः सिन्धुरित्याह । क्षारोदेति । दधिमण्डोमथितं दधि अभ्यन्तरे वर्त्तमाना ये द्वीपास्तैः समाना विस्तारेन एव एकैकश्येनेति एकस्मादेकस्माद्बहिरेकैकः सिन्धुरित्येवं सप्तस्वपि द्वीपेषु यथानुपूर्व्वमानुपूर्व्वेण पृथगसङ्कीर्णतया बहिर्बहिरेव नान्तः ॥ ३३—३४ ॥

एवं विधः पुरुषकारः पौरुषः प्रभावो न चित्रं तदङ्घ्रिरजसेति । रजसापि यैर्दुर्जयानि षडिन्द्रियाणि जीयन्ते इति विरोधः यतो विदूरविगतोऽन्त्यजोऽपि अधुना नामोच्चारणक्षण एव बन्धं तन्वं तरत्वमिति त्रय एव स्वामिसम्मताः पाठास्तत्र बन्धं कर्म्मबन्धं तन्वं तनुं तत्क्षण एव तनुत्यागादर्शनात् तन्वारम्भकं कर्म्मेति प्रारब्धकर्म्मत्वय उक्तः तत्त्वं महदादिपृथिव्यन्तं स्थूलसूक्ष्मदेहावित्यर्थः तत्रापि तद्देहस्थितिर्नाम्न एवाचिन्त्यप्रभावत्वादिति ज्ञेयं गत्यन्तराभावात् ॥ ३५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तेषां द्वीपानां परिमाणं वदामीति शेषः पूर्वस्मात् पूर्वस्माल्लक्षयोजनपरिमाणकजम्ब्वादेः उत्तरोत्तरः प्लक्षादिर्यथासङ्ख्यं द्विगुणमानेन बोध्यः इत्येवं समन्ततः जम्बूबहिर्भूतक्षारोदादिभ्यो बहिरुपक्लृप्ताः रचिताः ॥ ३२ ॥

एवं जम्ब्वादिभ्यो बहिः विस्तारतो जम्ब्वादिसमानाः क्षारोदादयः रचिता इत्याह । क्षारोदेति । अभ्यन्तरद्वीपसमानाः स्वस्वावृतद्वीपसमानाः सप्तस्वपि द्वीपेषु बहिः परितः पृथक् न रथहिकुण्डलानीवोपकल्पिता इत्यर्थः ॥ ३३ ॥ ३४ ॥

एवंविधः पुरुषकारः पौरुषं चित्रमद्भुतं न भवति एतदेव कैमुतिकन्यायेन दृढीकरोति विदूरं विगतः परित्याज्योऽन्त्यजोऽपि सकृदप्याददीत यः स बन्धं संसारमधुनैव शीघ्रमेव जहाति त्यजति मुक्तो भवति ॥ ३५ ॥

भाषाटीका।

प्रियव्रत के रथके चक्रों के चलने से जो सात गढेले भये वेई सात समुद्र होगये जिनसे सात द्वीप कल्पित भये ॥ ३१ ॥

जम्बू प्लक्ष शाल्मली कुश क्रौंच शाक पुष्कर इन द्वीपोंके नाम हैं उनका परिमाण एकसे एक वाहिर का द्विगुण वडा है चारों ओरसे ॥ ३२ ॥

खारा जल ईखका रस मदिरा घृत दूध दधि भात का मांड शुद्ध जल ऐसे सात समुद्र हैं सो सातों द्वीपों में बर्हिष्मती के पति प्रियव्रत जी ने अपने आज्ञा कारी सात पुत्रों को क्रमसे राजा किया उनके नाम आग्नीध्र इध्माजिह्व यज्ञबाहु हिरण्यरेता घृतपृष्ठ मेधातिथि वीतिहोत्र ॥ ३३ ॥

उर्जस्वती नामक पुत्री को शुक्राचार्य को दिया जिसमें शुक्राचार्य की पुत्री देवयानी हुई ॥ ३४ ॥

उत्पत्त्यादि लीला करने वाले उरुक्रम भगवान् के चरण के रजसे सब विषयों को जीतने वाले महापुरुषों को यह कुछ आश्चर्य नहीं है क्योंकि जिन भगवान् के नाम लेने से नीच योनि वाले भी एक वखत में भी संसार बन्ध को छोड देते हैं ॥ ३५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य पराक्रममुपसंहरन्निवृत्तिक्रममाह । स एवमिति । देवर्षिचरणयोरनुशयनमुपसत्तिस्तदनुपतितो यो गुणविसर्गो

तस्य ह वा एते श्लोकाः ।
प्रियव्रतकृतं कर्म को नु कुर्याद्विनेश्वरम् ।
यो नेमिनिम्नैरकरोच्छायां घ्नन्सप्त वारिधीन् ॥ ३९ ॥
भूसंस्थानं कृतं येन सरिद्गिरिवनादिभिः ।
सीमा च भूतनिर्वृत्यै द्वीपे द्वीपे विभागशः ॥ ४० ॥
भौमं दिव्यं मानुषं च महित्वं कर्मयोगजम् ।
यश्चक्रे निरयौपम्यं पुरुषानुजनप्रियः ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे प्रियव्रतविजये
पारमहंस्यां संहितायां वैयासिक्यां
प्रथमोऽध्यायः ॥ १ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

राज्यादिप्रपञ्चस्तत्संसर्गेण आत्मनि मनसि निर्वेदो यस्य ॥ ३६ ॥

तमाह । मयाऽसाध्वनिष्ठितम् यद्यतोऽभिनिवेशितः तत्ततः अलमलं विषयैः विनोदमृगं मर्कटम् ॥ ३७ ॥

परदेवताया हरेः प्रसादेनाधिगतः प्राप्तो य आत्मप्रत्यवमर्शो विवेकस्तेन नारदस्य पदवीं तदुपदिष्टमार्गमेव पुनरनुससारेत्यन्वयः । किं कृत्वा । अनुगतेभ्यः पुत्रेभ्य इमां पृथ्वीं विभज्य भुक्तो भोगो यस्यास्तां भार्यां महाविभूतिः साम्राज्यसम्पत्तत्सहितां महिषीं मृतशरीरमिव परित्यज्य तत्र हेतुः हृदि निहितो निर्वेदो येन हृदीत्यस्योत्तरत्राप्यन्वयः हृदि गृहीतो निश्चितो हरिविहारस्तेनानुभावस्त्यागसामर्थ्यं यस्य ॥ ३८ ॥

तस्य महिमोपनिबन्धनश्लोकाः पूर्वसिद्धाः कथ्यन्ते यथा वेदे तदप्येष श्लोको भवतीति को नु को नाम कुर्याच्छायां घ्नन् तमो निरस्यन् ॥ ३९ ॥

भूसंस्थानं द्वीपैः कृतम् । सरिद्गिरिवनादिभिः सीमा च येन कृता भूतानां निर्वृत्यै सुखायाविवादाय ॥ ४० ॥

भौमं पातालजं दिव्यं स्वर्गजं मानुषं मर्त्यलोकजं महित्वं वैभवं यो निरयतुल्यं मेने पुरुषानुजना विष्णुभक्तास्त एव प्रिया यस्येति ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम् ।
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदप्युक्तं कथंचिदन्तरायविहताः स्वां शिवतमां पदवीं न प्रायेण हिन्वन्तीति तत्प्रियव्रतदृष्टान्तेन स्पष्टयितुं तस्य तान्निर्वेदं वदति । स इति । एवमपारौ बलपराक्रमौ यस्य सः प्रियव्रतः देवर्षेर्नारदस्य चरणयोरनुशयः सेवा तदनुपश्चात्पतितः प्राप्तः गुणविसर्गसंसर्गः प्रकृतिमार्गसम्बन्धस्तेन स्वात्मानमनिर्वृतमसुखिनमिव मन्यमानः इवशब्देन तद्ग्रामभोगानां दुर्लभत्वं तेषु तस्य निरयौपम्यं च सूच्यते तथाचोक्तं "एते वै निरयास्तात स्थानस्य परमात्मन इति । वासुदेवे मनो यस्य जपहोमार्चनादिषु । तस्यान्तरायो मैत्रेय: देवेन्द्रत्वादिकं फलम्" इति अत एवात्मनि मनसि निर्वेदः परितापो यस्य स इदं वक्ष्यमाणमाह ॥ ३६ ॥

अहो इति निर्वेदद्योतको निपातः मयाऽसाध्वसमीचीनमनुष्ठितमाचरितं किन्तद्यदसाध्वनुष्ठितं तत्राह । अहं प्रथमं केवलं निवृत्तिधर्मपरोऽहमिन्द्रियैः प्रमाथिभिरविद्या रचिता प्रकृतिपरिणामरूपा अज्ञानमूलया भोग्यतमबुद्ध्या रचिताः सम्पादिताः विषयाः परिणामविषोपमाः हेया ये विषयाः शब्दादयस्त एवान्धकूपः तृणावृतकूपः तस्मिन्नभिनिवेशितः पातित इति यतस्ततः अलमलं विषयानुभवेन अमुष्या वनितायाः बर्हिष्मत्याः विनोदमृगं क्रीडामृगं मां धिग्धिगिति निन्दयामास आत्मानं निन्दितवान् ॥ ३७ ॥

ततः परदेवतायाः भगवतः प्रसादेन "नेहाभिक्रमनाशोऽस्ति प्रत्यवायोन । विद्यते स्वल्पमपि इत्याद्युक्तप्रकारेण महाप्रभावशीलोपक्रान्तिमात्रनिवृत्तिधर्माराधितभगवत्प्रसादेनाधिगतं प्राप्तमात्मनः स्वात्मनः परमात्मनश्च यत्प्रत्यवमर्शनं यथावस्थितस्वरूपचिन्तनं तेन परिनिर्वृतः निरस्ततापत्रयः नितरां सुखितः अनुगतेभ्यः स्वानुवर्तिभ्यः पुत्रेभ्यः इमां सप्तद्वीपात्मिकां भूमिं यथादायं यथा योग्यं भागं विभज्य यद्वा दायं पितृक्रमागतं यथावद्विभज्याग्नीध्रादिप्रतिपुत्रं जम्ब्वादिप्रतिद्वीपं विभज्येत्यर्थः भुक्तो भोगो यस्यास्तां पञ्चम्यर्थे बहुव्रीहिः महिषीं भार्यां बर्हिष्मतीं मृतकमिव शवमिव मन्यमान इतिशेषः महाविभूतिं महदैश्वर्यमपहाय महाविभूत्या सहितां महिषीं मृतकामिवापहायेति वा स्वयमुपदेशमन्तरेणैव विहितः कृतः निर्वेदः परितापो यस्य हृद्गृहीताः परिशीलिताः हरेर्भगवतः विहाराणां प्रभावाः यस्य सः भगवतो नारदस्य पदवीं पुनरप्यनुससार गन्धमादनद्रोण्यां श्रीनारदमेव सेवमानः सिद्धिं गत इत्यर्थः ॥ ३८ ॥

तस्य प्रियव्रतस्यैते श्लोकाः तन्महिमोपनिबन्धने पूर्वप्रसिद्धा

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं श्लोकाः कथ्यन्ते यथा वेदे तदप्येष श्लोको भवतीति के ते श्लोकाः तत्राह । प्रियव्रतेति। प्रियव्रतेन कृतं कर्म ईश्वरं विनान्यः को नाम कुर्यात् यः प्रियव्रतः छायां तमः प्रजिरस्यन् रथनेमिनिम्नैरेव सप्त वारिधीन् समुद्रानकरोत् ॥ ३९ ॥

येन प्रियव्रतेन भूसंस्थानं द्वीपैर्भुवः संस्थानमवयवविन्यासः कृतं तथा द्वीपे द्वीपे भूतनिर्वृत्त्यै भूतानां कृत्यै सुखाय वा सरिदादिभिः विभागशः असङ्करेण सीमा च कृता ॥ ४० ॥

यः भौमं पातालजं दिव्यं स्वर्गजं मानुषं मृत्युलोकजं सुखं योगरूपकर्मजमणिमादिसिद्धिरूपं महित्वं माहात्म्यं योगस्य मनोव्यापाररूपत्वेन कर्मत्वव्यपदेशः ।

वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ।
शारीरजैः कर्मदोषैर्यातिस्थावरतां नरः ।

इति मनुनापि मानसैः कर्मदोषैरिति मनोव्यापारे कर्मशब्दः प्रयुक्तः निरयौपम्यं नरकसदृशं चक्रे अनुसंहितवान् "एते वै निरयास्तात स्थानस्य परमात्मन"इत्यादिवचनार्थोऽत्रानुसन्धेयः निरयौपम्यकृतौ कारणमाह । पुरुषस्य परमपुरुषस्यानुजना अनुचरा भक्ता एव प्रिया यस्य सः तेषां हि प्रिय इति वा ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदानीं पूर्वोनुवादपूर्वकं वैराग्येण [१] तस्य संसारनिन्दाप्रकारं कथयति । स एवमिति । अनुपतितो यदृच्छया प्राप्तो गुणविसर्गः ।

संधिं च विग्रहं चैव यानमासनमेव च ।
द्वैधीभावं संश्रयं च षड्गुणान् कवयो विदुः ।

इत्यादि गुणप्रयोगो गुणकार्यविषयप्रपञ्चो वा तस्य संसर्गेण सम्बन्धेन आत्तनिर्वेदः प्राप्तवैराग्यः ॥ ३६ ॥

किमाहेत्यत्राह । अहो इति । विनोदमृगम् ॥ ३७ ॥

तस्य संसारविरक्त्या सन्न्यासप्रकारं वक्ति । परदेवतेति । परदेवता नारायणः तस्य प्रसादेनाधिगतम् प्राप्तमात्मप्रत्यवमर्शनं प्राप्तपरमात्मज्ञानं तेन परिनिर्वृतो नष्टलब्धचिन्तामणिरिव परमानन्दमाप्तः यथादायं यो योग्यः पितृधनस्य तस्य तथा मृतकं शवमिव महती विभूतिर्यस्याः सा तथा तां नारदस्य पदवीं निवृत्तिमार्गः सन्न्यासलक्षणः ताम् ॥ ३८ ॥

प्रियव्रतचरितश्रवणस्मरणादेरनायासेन मुक्तिसाधनत्वाच्चिरत्यजयाय श्लोकरूपेण संक्षिप्य तच्चरितं कीर्तयति । तस्येति । रथचक्रनेमिकृतनिम्नैः छायां रात्रिकृताम् ॥ ३९ ॥

भूसंस्थानं भुवोऽ (२) वयवविशेषनामभूतनिर्वृत्त्यै प्राणिनां सुखाय ॥ ४० ॥

महित्वं माहात्म्यं योगकर्मजं योगसामर्थ्यजातं निरयौपम्यं निरयसुखसमम् ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

रथस्याकाशमार्गेणैव तन्मण्डलगामित्वं ज्ञेयम् ॥ ३९—४१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
प्रथमोऽध्यायः समाप्तः ॥ १

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ॥

भोगप्रभावमुपसंहरंस्तस्य वैराग्यप्रभावमाह । स एवमिति । देवर्षिचरणयोरनुशयनानि गुरुत्वेन दण्डवत्प्रणामास्ताननुपतित एव गुणविसर्गो राज्यादिप्रपञ्चस्तत्संसर्गेण अनिर्वृतमिवेति यद्यपि राज्येऽप्यनासक्त्यैवान्तर्निर्वृतिरासीत्तदपीत्यर्थः ॥ ३६ ॥

विनोदमृगं मर्कटम् ॥ ३७ ॥

परदेवताया हरेः प्रसादेनाधिगतः प्राप्तो य आत्मप्रत्यवमर्शो विवेकस्तेन नारदस्य पदवीं तदुपदिष्टमार्गमेव पुनरनुससारेत्यन्वयः किं कृत्वा अनुप्रवृत्तेभ्यः अनुगतेभ्यः । इत्यादि हृदि गृहीतो यो हरेर्विहारो लीला विलासस्तेनानुभावा अश्रुपुलकादयो यस्य सः ॥ ३८ ॥

श्लोकाः पूर्वसिद्धा एव कथ्यन्ते छायां रात्रिम् ॥ ३९ ॥

भुवः संस्थानं द्वीपैः कृतं सरिदादिभिः सीमा च भूतानां जनपदग्रामाद्यधिपतीनां निर्वृत्त्यै निर्विवादसुखाय ॥ ४० ॥

भौमं पातालजं दिव्यं स्वर्गजं मानुषं मर्त्यलोकजं महित्वं वैभवम् ॥ ४१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमे प्रथमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं महदाज्ञया प्रवृत्तिमार्गे प्रविष्टस्य कर्माण्युक्त्वाथ स प्रवृत्तिमार्गान्निवृत्तोऽभूदिति वक्तुमाह । स इति । देवर्षिचरणयोरनुशयनमनुवर्त्तित्वं तदनुपतितो यो गुणविसर्गः गुणानां प्रारब्धकर्मफलानां विसर्गो विस्तारः साम्राज्याद्यैश्वर्य्यं तत्संसर्गेणात्मनि मनसि निर्वेदो यस्य सः अनिर्वृत्तमिव वनितादावसक्तमिव अनिर्मितमिति पाठेऽसुखि तमिव ॥ ३६ ॥

असाध्वनुष्ठितं मये तिरोषः यत् यस्मिन् अविद्यया अचेतनया भगवच्छक्त्या रचिते विषमा मुमुक्षुजनानर्हा विषया यस्मिन् तत्तथाभूतं गृहं तदेवान्धकूपस्तस्मिन् प्रवेशितः तत्तेन गृहेणु अलं पर्याप्तम् किञ्च वनितायाः विनोदमृगं क्रीडामर्कटं मां धिग् धिगित्यात्मानं गर्हयाञ्चकार ॥ ३७ ॥

परदेवताप्रसादात्प्राप्तेन आत्मविचारेण नारदस्य स्वगुरोः पदवीं निवृत्तिमार्गं पुनरनुससार कथम्भूतः हृदि गृहीतो यो हरिविहारस्तेनानुभावः सर्वपरित्यागपूर्वकहरिप्रावण्यं यस्य सः अत एव हृदि निहितनिर्वेदः ॥ ३८ ॥

---

[१] प्रियव्रतस्य ।

[२] सीमाभावे परस्परविवोदन दुःखमेव स्यादिति ।

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पूर्वैर्गीता इति शेषः छायां रात्रिरूपां घ्नन् निरस्यन् ॥ ३९ ॥

येन भूसंस्थानं द्वीपविभागरूपं सरिदादिभिः द्वीपे द्वीपे सीमा च भूतसुखाय कृता ॥ ४० ॥

यः पुरुषानुजनाः वैष्णवाः प्रिया यस्य स भौमं भूविवरस्थं तामसं मानुषं राजसं दिव्यं सात्त्विकम् योगजमणिमादिरूपं महित्वं वैभवं कर्म च तत्तत्साधनं काम्यलक्षणम् एतत्साध्यं साधनं च सर्वं निरयौपम्यं चक्रे तस्य माहात्म्यं किमन्यदवशिष्यते इति भावः ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
प्रथमाध्यायार्थप्रकाशः ॥ १ ॥

भाषाटीका ।

इस प्रकार के वडे पराक्रम वाले प्रियव्रत जी एक दिन श्री नारदजी के चरण कमल के शरणागति के होने से पीछे आया जो राज्यादि प्रपञ्च तिसके संसर्ग से अपने आत्मा को बहुत असन्तुष्ट मानकर विरक्त चित्त होकर इस वचन को वोलने लगे ॥ ३६ ॥

अहो यह वडा आश्चर्य हुआ जो कि विवेकी होकर मैंने अच्छा नहीं किया जोकि शरीर के अभिनिवेश से इन्द्रिय भोगों के हेतु अज्ञान रचित विषम विषय रूप अन्धे कुवा में गिरगया हूं सो अव नहीं करूंगा मेरे को धिक्कार है जो कि मैं इस स्त्री का क्रीडामृग होगया हूं इस प्रकार अपना निन्दा किया ॥ ३७ ॥

पर देवता परमात्मा के प्रसाद से आत्मज्ञान के प्राप्त होने से अपने अनुवर्तन करने वाले उन पुत्रों को यथायोग्य इस पृथिवी का भाग देकर भोगी हुई रानी को मरीसी छोडकर स्वयं महाविभूति को छोडकर हृदय में वैराग्य को धारण करके भगवान् के विहार के प्रभाव को स्मरण करके फिर भगवान् नारदजी के मार्ग को ग्रहण करलिया ॥ ३८ ॥

उन प्रियव्रतजी के ये श्लोक हैं प्रियव्रत के किये कर्म्मों को ईश्वर विना दूसरा कौन करेगा जिनने कि अँधेरे के नाशकरने के लिये रथचक्र के खातों से सात समुद्र वनादिये ॥ ३९ ॥

जिनने सव प्राणियों के सुखके लिये सव द्वीपों में विभाग से पर्वत नदी वनादिकों से पृथिवी का विभाग करदिया ॥ ४० ॥

जिनने भगवद्भक्तों के प्रिय होकर स्वर्ग मर्त्य पाताल के कर्म्मानुष्ठान से भये भोगोंको नरक के तुल्य करके छोडदिया ॥ ४१ ॥

इति श्रीमद्भागवतपञ्चमस्कन्ध प्रथमअध्याय का
भाषानुवाद लक्ष्मणाचार्यकृत
समाप्त ॥ १ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे प्रथमोऽध्यायः समाप्तः ॥ १ ॥

॥ द्वितीयोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

एवं पितरि संप्रवृत्ते तदनुशासने वर्तमान आग्नीध्रो जम्बूद्वीपौकसः प्रजा औरसवद्धर्मावेक्षमाणः पर्यगोपायत् ॥ १ ॥

स च कदाचित्पितृलोककामः सुरवरवनिताक्रीडाचलद्रोण्यां भगवन्तं विश्वसृजां पतिमाभृतपरिचर्योपकरण आत्मैकाग्र्येण तपस्व्याराधयाम्बभूव ॥ २ ॥

तदुपलभ्य भगवानादिपुरुषः सदसि गायन्तीं पूर्वचित्तिं नामाप्सरसमभियापयामास ॥ ३ ॥

सा च तदाश्रमोपवनमतिरमणीयं विविधनिबिडविटपिविटपनिकरसंश्लिष्टपुरटलतारूढस्थलविहङ्गममिथुनैः प्रोच्यमानश्रुतिभिः प्रतिबोध्यमानसलिलकुक्कुटकारण्डवकलहंसादिभिर्विचित्रमुपकूजितामलजलाशयकमलाकरमुपबभ्राम ॥ ४ ॥

तस्याः सुललितगमनपदविन्यासगतिविलासायाश्चानुपदं खणखणायमानरुचिरचरणाभरणस्वनमुपाकर्ण्य नरदेवकुमारः समाधियोगेनामीलितनयननलिनमुकुलयुगलमीषद्विकचय्य व्यचष्ट ॥ ५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वितीये प्रोक्तमाग्नीध्रचरितं स्त्रैणसम्मतम् ।
पत्न्यां हि पूर्वचित्त्यां यो नाभिमुख्यानजीजनत् ॥ १ ॥
अस्मिन्वंशे प्रसिद्धोऽयमाग्नीध्रः स्त्रैणपुङ्गवः ।
विहसन्निव तस्येदं चरितं मुनिरब्रवीत् ॥ २ ॥

जम्बूद्वीपमोको यासां ताः प्रजाः पुत्रवत्पालयामास धर्मावेक्षमाणः धर्ममवेक्षमाणो धर्मेणेत्यर्थः ॥ १ ॥

पितृलोककामः पुत्रकामः सुरवराणां वनितास्तासामाक्रीडाचलो मन्दरस्तस्य द्रोण्यामाभृतानि सम्पादितानि परिचर्योपकरणानि पुष्पादीनि येन ॥ २ ॥

तदुपलभ्य ज्ञात्वा ब्रह्माभियापयामास सम्भोगार्थं प्रस्थापयामास ॥ ३ ॥

सा च तदाश्रमोपवनमुपबभ्रामेत्यन्वयः रमणीयत्वमेवाह । विविधाश्च निबिडाश्च ये विटपिनस्तेषां विटपा शाखा स्तेषां निकरास्तैः संश्लिष्टाः पुरटलताः स्वर्णवल्ल्यस्तास्वारूढाः स्थलविहङ्गमा मयूरादयस्तेषां मिथुनैः प्रोच्यमानाभिः श्रुतिभिरुच्चार्यमाणैः षड्जादिस्वरैः प्रतिबोध्यमाना ये सलिलकुक्कुटादयस्तैर्विचित्रं यथा तथोपकूजिता नादिता अमला जलाशयास्तेषु कमलानि तेषामाकरमुपवनम् ॥ ४ ॥

सुललिते गमने ये पदविन्यासास्तैर्गतौ विलासो यस्याः चकारस्तस्याश्चेत्येकवाक्यत्वाय अनुपदं प्रतिपदम् खणखणेतिध्वनिं कुर्वतो रुचिरस्य चरणाभरणस्य स्वनमामीलिते नयने एव नलिनमुकुले तयोर्युगलमीषद्विकचय्य किञ्चिदुन्मील्य व्यचष्ट ददर्श ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं श्रावितप्रियव्रतचरित्रो मुनिस्तत्पुत्राणां चरित्रं विवक्षुस्तावदाग्नीध्रचरित्रमाह । एवमिति । एवमुक्तविधज्ञानपूर्वकं पितरि प्रियव्रते संवृत्ते मुक्ते सति तस्य प्रियव्रतस्यानुशासने अनुपूर्वशास्तिर्विविच्य ज्ञापने वर्तते तदुपदिष्टहिताहितविवेके वर्तमानः आग्नीध्रः धर्ममवेक्षमाणः धर्मसञ्चयमेव कर्तुमुद्यतः जम्बूद्वीपे ओकः स्थानं यासां ताः प्रजा औरसवत्स्वपुत्रवत् परितः सर्वतः सर्वेभ्य उपद्रवेभ्योऽगोपायदरक्षत् जम्बूद्वीपस्य स्वभागत्वाज्जम्बूद्वीपौकस इत्युक्तम् ॥ १ ॥

सः आग्नीध्रः कदाचित्पितृलोकनामः सन्तानार्थं पितृलोकस्य सन्तानवता प्राप्यत्वात्पितृलोककाम इत्युक्तम् पितृलोकप्रापकसन्तानार्थीत्यर्थः "पितरो हि प्रजया पितृभ्य इति श्रुत्युक्तरीत्या सन्तानाय कृतार्थाः प्राप्यन्ते सुराणां वनिताः तासामाक्रीडाचलो मन्दरः आक्रीडन्त्यस्मिन्नित्याक्रीडः ततो अचलपदेन कर्मधारयः तेन सुरवनितापदेन षष्ठीसमासस्तस्य द्रोण्यामाहृतानि सम्पादितानि परिचर्योपकरणानि पूजासाधनानि पुष्पादीनि येन कायिकव्यापारोऽनेनोक्तः चित्तैकाग्र्यरूपेण तपसा विश्वविसृजां पतिं ब्रह्माणमाराधयाम्बभूव ॥ २ ॥

तदाराधनमुपलभ्य ज्ञात्वा भगवानादिपुरुषो ब्रह्मा स्वसदने गायन्तीं गानं कुर्वन्तीं पूर्वचित्तिं नाम पूर्वचित्त्याख्यामप्सरसमभियापयामास भोगार्थं प्रस्थापितवान् सन्तानार्थमप्सरः प्रेषणं न तु तपोविघ्नार्थम् ॥ ३ ॥

सा च पूर्वचित्तिस्तस्याग्नीध्रस्याश्रमे यदुपवनं तदुपबभ्राम समीपे चचार आश्रमोपवनं विशिनष्टि । अतिरमणीयं तदेव प्रपञ्चयति । विविधाश्च निविडाः सान्द्राश्च ये विटपिनः

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

वृक्षास्तेषां विटपाः शाखास्तेषां निकराः समूहास्तैः संश्लिष्टाः पुरटलताः स्वर्णवर्णा वल्लयस्तास्वारूढाः स्थिता विहङ्गमाः मयूरादयस्तेषां मिथुनैः स्त्रीपुंसद्वन्द्वैः प्रोच्यमानाभिः उच्चार्य्यमाणाभिः श्रुतिभिः षड्जादिस्वरैः करणभूतैः प्रबोध्यमाना ये सलिलकुक्कुटादयस्तैर्विचित्रं यथा भवति तथोपकूजिता नादिता अमला जलाशयास्तेषु कमलानि पङ्कजानि तेषामाकरमुपवनम् ॥ ४ ॥

तस्या इति सुललिते गमने सुन्दरगतौ ये पदविन्यासास्तैर्गतिविलासा यस्यास्तस्याः पूर्वचित्त्याः खणखणेति ध्वनिं कुर्वतो रुचिरस्य चरणाभरणस्य स्वनं ध्वनिमुपाकर्ण्य श्रुत्वा नरदेवस्य प्रियव्रतस्य कुमारः आग्नीध्रः समाधियोगेन आमीलिते नयने एव नलिनमुकुले तयोर्युगलमीषद्विकचय्य किञ्चिदुन्मील्य व्यचष्ट ददर्श ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्त्रीसङ्गं परिहरतः पुंसः करतलस्थैव मुक्तिरित्यभिप्रेत्य तस्यापरिहारार्थत्वं प्रतिपाद्यतेऽस्मिन्नध्याये तत्रादावाग्नीध्रस्य राज्यलक्षणप्रकारमाह। एवमिति । औरसवदात्मपुत्रवत्पर्यगोपायदरक्षत् गुपू रक्षणे ॥ १ ॥

विश्वसृजां पतिं ब्रह्माणं पितृलोककाम इत्यनेन सन्तानार्थित्वं लक्षयति "सोऽयं मनुष्यलोकः पुत्रेण जेय" इतिश्रुतेः सुपुत्रेण पितुः पितृलोकप्राप्तिश्रवणात् आक्रीडः क्रीडास्थानमात्मनोऽन्तःकरणस्यैकाग्र्यं यस्मिंस्तत्तथा तेनात्मैकविषयेण वा॥ २ ॥

अभियापयामास प्रेषयामास ॥ ३ ॥

अतिरमणीया विविधाश्च निविडाश्च सङ्कटिताश्च विटपिनो वृक्षास्तेषां विटपाः शाखास्तेषां निकटपुटेषु समीपभागेषु या लतास्तासां कुटिलेषु वक्रभागेषु रूढा आरूढाश्च स्थलविहङ्गमाः मयूरकोकिलादयस्तेषां मिथुनैः श्लाघ्यमाना श्रुतिः धनुर्मण्डलमात्रप्रदेशव्यापिनी ध्वनिसन्ततिर्येषां तानि तथा तैः प्रबोध्यमानैः प्रतिनादोन्मुखीकरणायेति शेषः जलकुक्कुटादिभिर्विचित्रं यथा तथोपकूजितं निर्मलजलाशये रूढः कमलाकरो यस्मिन् तत्तथा ॥ ४ ॥

सुहितो ललितपदविन्यासः कोमलपदविक्षेपो यया सा ललितपदविन्यासा च गतिर्गमनं तस्या विलासेन शृङ्गारलक्षणशोभयानुपदं प्रतिचरणविक्षेपं खणखणायमाने सिञ्जितध्वनिविशेषं कुर्वाणे रुचिरे शोभने चरणाभरणे नूपुरे ये तयोर्ध्वनिमाकर्ण्य स राजकुमारः समाधियोगेन निमित्तेनामीलितौ नयननलिनमुकुलौ यौ तयोर्युगलमीषदल्पं विकचय्य विकासं कृत्वा आचष्ट अद्राक्षीत् ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पितृलोककाम इति तस्य स्त्रिया बन्ध्यात्वं गम्यते ॥ १—११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

द्वितीये तपसा प्राप्य पूर्वचित्तिमजिज्ञपत् ॥
आग्नीध्रो निजलाम्पट्यं पुत्रांश्चास्यामजीजनत् ।

धर्म्म एव अवेक्षणं यस्य सः ॥ १ ॥

पितृलोककामः पुत्रकामः विश्वसृजां पतिं ब्रह्माणमाभृतानि संपादितानि परिचर्य्योपकरणानि पुष्पादीनि येन सः ॥ २-३ ॥

सा च तदाश्रमोपवनमुपबभ्रामेत्यन्वयः विविधाश्च निविडाश्च ये विटपिनस्तेषु विटपाः स्कन्धाः यासां तासु निकटस्थपुरटलतासु आरूढाः स्थलविहङ्गाः कोकिलादयस्तेषां मिथुनैः प्रोच्यमानाभिः श्रुतिभिरुच्चार्य्यमाणैः पञ्चमादिस्वरैः प्रतिबुद्ध्यमाना ये सलिलकुक्कुटादयस्तैर्विचित्रं यथा स्यात्तथा उपकूजिता नादिता अमला जलाशया वाप्यादयः कमलाकराः कासाराश्च यस्मिंस्तत् ॥ ४ ॥

तस्यां सुललिते गमने ये पदयोर्विन्यासास्तैरेव गतिश्रेष्ठ विलासश्च सर्व्वाङ्गगतो यस्याः ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

द्वितीये प्रियव्रतपुत्रस्य आग्नीध्रस्य भार्य्यालाभोऽपत्योदयश्च वर्ण्यते । एवमिति । संप्रवृत्ते प्रजापालनाभिवृत्ते सति आग्नीध्रः धर्मावेक्षमाणः राज्ञां प्रजापालनमेव धर्म इत्येवं धर्ममवेक्षमाणः जम्बूद्वीपमोको वासस्थानं यासान्ताः प्रजाः औरसवत्पुत्रवत् परितः क्षुत्तृड्भ्यो तृप्तिदानेन शत्रुभ्यो रक्षणेन च अगोपायत् अरक्षत् ॥ १ ॥

स आग्नीध्रः पितृलोककामः पुत्रेण लोकान् जयतीति पितृलोकजयार्थं पुत्रमभिलषन्नित्यर्थः आभृतानि संगृहीतानि परिचर्य्योपकरणानि पूजासाधनानि येन सः ॥ २ ॥

आदिदेवः विश्वसृड्भ्यः पूर्वो ब्रह्मा तदाराधनमुपलभ्य ज्ञात्वा अभियापयामास पुत्रोत्पादनार्थं प्रस्थापयामास ॥ ३ ॥

सा च पूर्वचित्तिः तदाश्रमोपवनमुपबभ्राम कथम्भूतम् अतिरमणीयम् तद्रमणीयत्वं प्रपञ्चयति । विविधनिविडविटपिनां बहुजातिसघनद्रुमाणां विटपनिकरैः स्कन्धसमूहैः संश्लिष्टासु पुरटलतासु स्वर्णवल्लीषु आरूढानां स्थलविहङ्गानां मयूरादीनां मिथुनैः स्त्रीपुरुषद्वन्द्वैः प्रोच्यमानाभिः श्रुतिभिः षड्जर्षभादिस्वरैः प्रतिबोध्यमाना ये सलिलकुक्कुटादयस्तैर्विचित्रं यथा भवति तथोपकूजितेषु नादितेषु अमलजलाशयेषु यानि कमलानि तेषामाकरमालयम् ॥ ४ ॥

नरदेवस्य कुमारः अनेनाद्दढसमाधित्वे हेतुरुक्तः आमीलिते नयने एवमुकुले तद्युगलमीषत् किञ्चिद्विकचय्योन्मील्य तस्या अनुपदं प्रतिपदम् खणखणायमानस्य रुचिरचरणाभरणस्य स्वनमुपाकर्ण्य व्यचष्ट ददर्श तामिति शेषः कथम्भूतां सुललिते गमने ये पदविन्यासास्तैर्गतिर्विलासो यस्याः ॥ ५ ॥

भाषाटीका

श्रीशुकदेवजी बोले पिता प्रियव्रतके इस प्रकार भजनमे प्रवृत्त होने पर उनकी आज्ञा मे वर्तमान आग्नीध्र राजा

तामेवाविदूरे मधुकरीमिव सुमनस उपजिघ्रन्तीं दिविजमनुजमनोनयनाह्लाददुघैर्गतिविहारव्रीडा-विनयावलोकसुस्वराक्षरावयवैर्मनसि नृणां कुसुमायुधस्य विदधतीं विवरं निजमुखविगलितामृतासवसहासभाषणामोदमदान्धमधुकरनिकरोपरोधेन द्रुतपदविन्यासेन वल्गुस्पन्दनस्तनकलशकबरभाररशनां देवीं तदवलोकनेन विवृतावसरस्य भगवतो मकरध्वजस्य वशमुपनीतो जडवदिति होवाच॥६॥

का त्वं चिकीर्षसि च किं मुनिवर्य!शैले मायाऽसि कापि भगवत्परदेवतायाः ।
विज्ये बिभर्षि धनुषी सुहृदात्मनोऽर्थे किम्वा मृगान्मृगयसे विपिने प्रमत्तान् ॥७॥
बाणाविमौ भगवतः शतपत्रपत्रौ शान्तावपुङ्खरुचिरावतितिग्मदन्तौ ।
कस्मै युयुंक्षसि वने विचरन्न विद्मः क्षेमाय नो जडधियां तव विक्रमोऽस्तु ॥ ८ ॥
शिष्या इमे भगवतः परितः पठन्ति गायन्ति साम सरहस्यमजस्रमीशम् ।
युष्मच्छिखा विलुलिताः सुमनोऽभिवृष्टीः सर्वे भजन्त्यृषिगणा इव वेदशाखाः ॥ ९ ॥
वाचं परं चरणपञ्जरतित्तिरीणां ब्रह्मन्नरूपमुखरां शृणवाम तुभ्यम् ।
लब्धा कदम्बरुचिरङ्कविटङ्कबिम्बे यस्यामलातपरिधिः क्व च वल्कलं ते॥१०॥

भाषाटीका ।

धर्मकी अपेक्षा करते हुये सबप्रजोंकी रक्षापुत्र सरीकी करते थे ॥ १ ॥

सो आग्नीध्र किसी समय मे पितृलोक की कामना करके देवताओं की स्त्रियोंके क्रीडाकास्थान जो मन्दराचल पर्वत तिसकी कन्दरामे जाकर पुष्पादि पूजाकी सामग्री को जोडकर एकाग्र चित्तसे तपस्वी होकर प्रजापतियों के पति ब्रह्माजी का पूजन करने लगे ॥ २ ॥

उस बातको जानकर आदिपुरुष भगवान् ब्रह्माजीने अपनी सभामे गान करती हुई पूर्वचित्ती नामकी अप्सराको भेजदिया ॥ ३ ॥

सो अप्सरा उस आश्रमके उपवनमे जाकर अतिरमणीयस्थान देखा नाना प्रकार के सघन वृक्षों के मूल मे लगी हुई जो सुवर्ण की लताओं मे चढे जो स्थलके पक्षीयों के जोडे तिनके उच्चारण किये जो गान्धारादि शब्द तिससे चेतन होते हैं जलके मुरगा कारंडव कलहंसादि पक्षि तिनके नाना प्रकारके शब्दोंसे युक्त सरोवरवाला जो वन तिसमे वह अप्सरा विचरती रही ॥ ४ ॥

उसके सुन्दर ललित चालमे जो पगनकी धरण तथा गतिके विलास तिसके साथ खण खण शब्द करने वाला जो मनोहर चरण के आभरणका शब्द तिसको सुनकर राजपुत्र आग्नीध्रने समाधि योगमे जो किंचित बन्द दोनो नेत्रकमल तिनको कुछ थोडा खोलकर उसकी ओर देखा ॥ ५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तामेव देवीं मकरध्वजस्य वशमुपनीतः सन् जडवदिति ह वक्ष्यमाणान् दश श्लोकानुवाच जाड्यानुकरणं च वैदग्ध्येन तद्वशीकारार्थम् दिविजानां देवानां मनुजानां च यानि मनांसि नयनानि च तेषामाह्लाददुघैर्गत्यादिभिर्नृणां मनसि कामस्य विवरं प्रवेशद्वारं विदधतीं गतिश्च विहारश्च व्रीडाविनययुक्तोऽवलोकश्च सुस्वराण्यक्षराणि चावयवाश्च नेत्रादयस्तैः निजमुखाद्विगलितममृतमिव स्वादु आसव इव मादकं च यत्सहासं भाषणं तस्मिन्नामोदो निःश्वासगन्धस्तेन मदान्धा ये मधुकरनिकरास्तैरुपरोध आवरणं तेन भयाद्द्रुतः शीघ्रो यः पदविन्यासस्तेन वल्गु स्पन्दनं किञ्चिच्चलनं स्तनकलशयोः कबरभारे रशनायां यस्यास्तां तस्या अवलोकनेन विवृतावसरस्य दत्तावकाशस्य ॥ ६ ॥

का त्वं शैले गिरावस्मिन्किं चिकीर्षसि मुनिवर्येत्यादिपुंस्त्वेन सम्बोधनादि जाड्यानुकरणार्थम् । हे मुनिवर्य ! नूनं भगवतः परदेवताभूतस्य मायाऽसि भ्रुवावालक्ष्याह । हे सुहृत्सखे विज्ये निर्गुणे धनुषी बिभर्षि किमात्मनोऽर्थे तवैवाभ्यां किं कार्यमस्ति किं वा प्रमत्तानजितेन्द्रियान्मृगतुल्यानस्मदादीन्मृगयसे तान्वशीकर्तुं धनुषी धारयसीत्यर्थः ॥ ७ ॥

कटाक्षावालक्ष्याह । बाणाविमौ शतपत्रे नेत्रकमले ते एव पत्राणि पिच्छानि ययोः शान्तौ विभ्रमेण मन्थरौ पुङ्खाभ्यां विनापि रुचिरौ पत्रतया कल्पितनेत्राभ्यां परभागस्य पुङ्खस्थानीयस्याभावात् । अतितिग्मौ तीक्ष्णौ दन्तावग्रभागौ ययोस्तौ कस्मै प्रयोक्तुमिच्छसीति न विद्मः अतो भयादेतावत्प्रार्थयामहे तवायं विक्रमोऽस्माकं क्षेमायास्तु ॥ ८ ॥

तदङ्गपरिमललोभेनानुगच्छतो भ्रमरानालक्ष्याह । शिष्या इति । अजस्रं सन्ततं युष्मच्छिखातो विलुलिता विगलिताः सुमनसामभितो वृष्टीर्गलितानि कुसुमानि भजन्तीत्यर्थः शुक्लत्वेनोपमा वेदशाखा इवेति ॥ ९ ॥

नूपुरस्वनमाकर्ण्याह । वाचमिति । तुभ्यं तव चरणगतपञ्जरयोर्नूपुरयोस्तित्तिरीणामन्तर्गतरत्नानां परं केवलं वाचं शृणुमः कथम्भूतामरूपा अदृष्टवक्तृका मुखरा अति प्रकटा च तां च तां च पीतं परिधानवस्त्रं नितम्बकान्तित्वेन प्रकल्प्याह । कदम्बकुसु

श्रीधरस्वामिकृतभावार्थदीपिका।

मस्य रुचिर्दीप्तिरङ्कविटङ्कबिम्बे नितम्बस्य सुन्दरमण्डले क लब्धा पाठान्तरे अङ्गेति सम्बोधनम् मेखलामालक्ष्याह। यस्यामलातपरिधिर्वर्तते वस्त्रं नितम्बकान्तत्वेन प्रकल्प्य वस्त्रमदृष्ट्वैव पृच्छति। क च ते वल्कलमिति ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तामेव देवीमप्सरसं तदवलोकनेन विवृतावसरस्य प्रसक्तावकाशस्य भगवतो मकरध्वजस्य मन्मथस्य वशमुपनीतः प्राप्तः जडवत्स्त्रीणामनभिज्ञ इव इति वक्ष्यमाणश्लोकानुवाचेत्यन्वयः जाड्यानुकरणं वैदग्ध्येन तद्वशीकरणार्थं तदभिप्रायज्ञापनार्थं देवीं विशिनष्टि। अविदूरे समीपे मधुकरीं भ्रमरीमिव सुमनसं पुष्पमुपजिघ्रन्तीं गन्धमुपाददतीं दिविजानां मनुजानां च यानि मनांसि नयनानि च तेषामाह्लाददुघैः सुखकरैर्गत्यादिभिः नृणां मनसि कामस्य विवरं प्रवेशद्वारं विदधतीं गतिश्च क्रीडाविलासाभ्यां युक्तोऽवलोकश्च सुखरायणचरणानि चावयवाश्च नेत्रादयस्तैर्निजमुखाद्विगलितममृतमिव स्वादु आसवमिव मादकं यत्सुहासं सम्भाषणं तस्मिन्नामोदो निश्वासगन्धस्तेन मदान्धा ये मधुकराणां निकरास्तैरुपरोध आवरणं तेन भयाद्द्रुतं शीघ्रो यः पदविन्यासस्तेन वल्गु सुन्दरं किञ्चिच्चलनं स्तनयोः कवरभारे रशनायां यस्यास्ताम् ॥ ६ ॥

तद्वचनमेवाह। का त्वमिति। हे मुनिवर्य्य ! पुंस्त्वेन सम्बोधनं जात्यानुकरणं का त्वं कथञ्जातीया शैले गिरौ अस्मिन् किञ्चिकीर्षसि कर्तुमिच्छसि नूनं भगवतः परदेवतारूपस्य मायासीति कृत्स्नां व्यक्तिमालक्ष्य भगवन्मायात्वेन निरूपयति। अथ भ्र्वाद्यवयवान् प्रत्येकमालक्ष्य धनुरादित्वेन रूपयति तत्र भ्रुवावालक्ष्याह। विज्ये निर्गुणे धनुषी बिभर्षि किं सुहृदः मादृशस्य आत्मनो वा अर्थे प्रयोजनाय आभ्यां किं कार्यमस्ति किञ्चाप्रमत्तान जितेन्द्रियान् मृगान् मृगतुल्यानस्मदादीन् मृगयसे कान् विजेतुं किं धनुषी धारयसीत्यर्थः ॥ ७ ॥

कटाक्षावालक्ष्य तद्विवक्षया प्राह। बाणाविमौ। शतपत्रे नेत्रकमले ते एव पत्राणि पिच्छानि ययोः शान्तौ विभ्रमेण मन्थरावपुङ्खरुचिरौ पुङ्खाभ्यां विनापि रुचिरौ सुन्दरौ पत्रतया कल्पितनेत्राभ्यां परभागस्य पुङ्खस्थानीयस्याभावादपुङ्खरुचिरावित्युक्तमितिग्मौ तीक्ष्णौ दन्तावग्रभागौ ययोस्तौ यद्वा शतपत्रपत्री इति नेत्रविवक्षा अपुङ्खरुचिराविति कटाक्षविवक्षा वने चरन्कस्मै युयुङ्क्षसि प्रयोक्तुमिच्छसीति न विद्मः अतो भयादेतत्प्रार्थयामः तवायं विक्रमो जडधियामस्माकं क्षेमायास्तु ॥ ८ ॥

तदङ्गसौरभ्येनानुगच्छतो भ्रमरानालक्ष्य तद्विवक्षयाह। शिष्या इति। इमे परितः अनुगच्छन्तः इति शेषः भगवतस्तव शिष्या भ्रमरध्वनिमाश्रुत्य तद्विवक्षयाह। सरहस्यं सोपनिषत्सामाजस्रमविच्छेदेन पठन्ति ईशेति पुंस्त्वनिर्देशः पूर्ववत् शिखातो विलुलितपुष्पसंश्लिष्टभ्रमरानालक्ष्याह। युष्मच्छिखातो विलुलिताः गलिताः सुमनसामभिनो वृष्टीः सर्वे तव शिष्याः भजन्ति तत्र शुक्लत्वेनोपमा ऋषिगणा वेदशाखा इवेति ॥ ९ ॥

नूपुरादिचरणाभरणान्तर्गतमणिस्वनमाकर्ण्य तद्विवक्षयाह। वाचमिति। तुभ्यं तव विभक्तिव्यत्यय आर्षः पञ्जराकारस्थानीयचरणालङ्कारान्तर्गतानां तित्तिरीणामिति चरणाभरणरत्नविवक्षया तित्तिरीशब्दः पक्षिकृजात्यापन्नयजुर्वेदप्रवक्तृर्षिवचनः स चाभेदोपासमर्पणपरः तेषां वाच परं केवलं शृणुमः कथंभूतामरूपमुखरामदृश्यमानवक्तृकां मुखरीभूतां यद्वा चरणपञ्जरतित्तिरीणामिति नूपुरादिचरणाभरणविवक्षैव अस्मिन्पक्षे अरूपमुखरामित्यस्यानभिव्यक्तवर्णध्वन्यात्मनोद्भूतामित्यर्थः हे ब्रह्मन् ! नितम्बं परिधानवस्त्रं नितम्बकान्तित्वेन प्रकल्प्याह। कदम्बकुसुमस्य रुचिर्दीप्तिरङ्कविटङ्कबिम्बे अङ्कयोश्च विटङ्कबिम्बयोः सुन्दरतरनितम्बयोश्च तेषां समाहारः प्राण्यङ्गत्वादेकवद्भावः तस्मिन् क लब्धा पाठान्तरे अङ्गेति सम्बोधनं नितम्बमण्डले कदम्बरुचिः क लब्धेत्यर्थः मेखलामालक्ष्याह। यस्यां कदम्बरुच्यामलातपरिधिः वर्तते अलातः साङ्गारकाष्ठं तद्भ्रमणनिमित्तेन वलयाकाररेखाकृतिमापन्नोऽग्निपरिधिः वस्त्रं नितम्बकान्तत्वेन परिकल्प्य वस्त्रमदृष्ट्वैव पृच्छति। क च ते वल्कलमिति। जात्यानुकरणनिमित्त ऋषित्वव्यपदेशाभिप्रायेण वल्कलशब्दप्रयोगः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

ततः किं तत्राह। तामिति। एवशब्देनान्यदर्शनं निवारयति अन्यदर्शनाभावे निमित्तमाह। अविदूर इति। सुमनसः पुष्पाणि दिविजादीनां मनोनयनानामाह्लादं दुहन्तीति मनोनयनाह्लाददुघास्तैर्गतिश्च विहारश्चविनयश्च विलोकनं च सुखराचरणि चावयवाश्च ते तथा तैः कुसुमायुधस्य कामस्य विवरमनकशमद॥

निजमुखाद्विगलितः स्रुतः मदजनकासवः तस्यामोदाघ्रातेन मदेनान्धा मधुकरनिकारा ये तैरुत्पन्नेन उपरोधेन निवारणक्लेशेन द्रुतपदविन्यासेन वल्गु शोभनं स्पन्दनमीषच्चलनं येषां स्तनकलशादीनां ते तथा वल्गु स्पन्दनाः स्तनकलशादयो यस्याः सा तथा तां पूर्वाचित्तेरवलोकनेन बुद्धिभ्रंशविशेषोऽनेन प्राप्त इत्याह। तदिति। भगवतः योनिलक्षणप्रशस्तस्थानगतस्य सर्वजनसम्भाव्यस्य वा मकरध्वजस्य कामस्य जडवद्वस्तुविचारपरिज्ञानशून्य इव इति वक्ष्यमाणप्रकारेण इवशब्देन "प्रभवति मनसि विवेको विदुषामपि शास्त्रसम्भवस्तावत्। प्रपतन्ति दृष्टिविशिखा यावन्नेन्दीवराक्षीणाम्" इत्यादिप्रसिद्धिं दर्शयति जडत्वमेव दर्शयति। का त्वमिति। मुनिवर्येति पुल्लिङ्गेन सम्बोध्य का त्वमिति स्त्रीलिङ्गेन प्रश्न इत्यादिविवेकाभावे लिङ्गं शैले गिरौ किं कर्तुमिच्छसि परदेवतायाः मायासि किं तत्रापि का मायासि नारी दैवी गान्धर्वीत्यादिषु विज्य मौर्वीरहिते धनुषी भ्रूलक्षणे सुहृदात्मनोऽर्थे सुहृदात्मनो वशीकरणाय कस्यचित्सुहृद आत्मनो वा पालनप्रयोजनविषये वा बिभर्षि अर्थान्तरमाह। किञ्चेति। भ्रूयुगलधनुर्धृत्वा मृगान्मृगयसे किमेवेत्यन्वयः ॥ ७ ॥

बाणौ नयनलक्षणौ शतपत्रपत्री पद्मदलसदृशपक्ष्मयुतौ शान्तौ स्निग्धौ अपुङ्खरुचिरौ पुङ्खं विना शोभमानौ अतितिग्मदन्तौ अतितीक्ष्णकटाक्षलक्षणौ एवं विधौ कस्मै पुंसे युयुङ्क्षसि प्रयोक्तुमिच्छसि ॥ ८ ॥

हस्तवारणलक्षणशिक्षायोग्यत्वाच्छिष्या इति भृङ्गा युष्म-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

च्छिखाविलुलिता युष्माकं केशपाशच्युताः सुमनोऽभिवृष्टीः पुष्प वृष्टीः ॥ ९ ॥

हे ब्रह्मन् ! तुभ्यं तव चरणपङ्कजतित्तिरीणां चरणपञ्जनूपुरान्तर्गतरत्नाख्योपलानां वाचं शब्दमात्रं परं न तु व्यक्तार्थां कथंभूतां रूपं विनापि मुखरीं शब्दवादनशीलामित्यरूपमुखरीं "तित्तिरिर्नूपुरान्तस्थरत्नपक्षिविशेषयोः । वक्रमार्गे यजुर्वेदे सिलयामपि च कथ्यते" इत्यभिधानं कदम्बपुष्पवद्रुचिरस्य सुन्दरस्याङ्कस्य सामीप्यात् कटिप्रदेशस्य विटङ्कबिम्बे उन्नतमण्डले शृङ्गारविशेषयुक्तमण्डले वा वर्तमाना ते तव वल्कला पटः क लब्धा यस्यां वल्कलायां अलातपरिधिः अलातमेवालातः तद्वत्स्थिता परिधिः परिवेषः काञ्चीलक्षणा च "वल्कं वल्कलमस्त्रियाम्" इत्यभिधानाज्जडत्वाल्लिङ्गव्यत्यासः तथाच यस्य वल्कलस्योपर्यलातपरिधिरस्तीत्यन्वेतव्यम् ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तामेव देवीं मकरध्वजस्य वशमुपनीतः सन् जडवदिति वक्ष्यमाणां दशश्लोकीमुवाच जाड्यानुकरणञ्च वैदग्ध्यविशेषद्योतनार्थं विवरं मनोऽन्तःप्रवेशद्वारं बिद्भर्तीं निजमुखाद्विगलितममृतमिव स्वादु आसव इव मादकं यत् सहासं भाषणं तस्मिन् सति य आमोदो गन्धस्तेन मदान्धा मधुकरनिकरास्तैरुपरोधः आवरणं तेन भयात् द्रुतः शीघ्रो यः पदविन्यासस्तेन वल्गु स्पन्दनं किञ्चिच्चलनं स्तनकलशयोः कबरभारो रसनायाञ्च यस्यास्ताम् ॥ ६ ॥

का त्वमित्युक्त्वा ससम्भ्रममतिबाल्यमारभ्यैव तपस्यतो मम स्त्रीपुंविशेषज्ञानं नास्तीति द्योतयन्नाह । हे मुनिवर्य्येति । अहमिव त्वमपि तपोऽर्थमेवात्र तिष्ठसि किमिति भावः किञ्च त्वं मुनिवर्य्यो भूत्वा मुनिं मां यन्मोहयस्यत्र किं कारणमिति क्षणं विभाव्य ज्ञातमित्याह । मायासीति । भगवानेव परदेवता तस्याः मायैव त्वं मुनिवर्य्यरूपेणात्र वर्त्तसे इति भावः किञ्च भ्रुवावालक्ष्याह । विज्ये निर्गुणे धनुषी विभर्षि हे सुहृत् ! सखे ! किमात्मनोऽर्थे स्वस्य कृते तवैताभ्यां किं कार्य्यमस्ति किं वा मृगानस्मदादीनिति गूढोऽर्थः ॥ ७ ॥

कटाक्षावालक्ष्याह । बाणौ शतपत्रे नेत्रकमले एव पत्रे ययोस्तौ शान्तौ विभ्रमेण मन्थरौ पुङ्खाभ्यां विनापि रुचिरौ अतितिग्मी तीक्ष्णौ दन्ताग्रभागौ ययोस्तौ क्षेमायेति यद्यस्मान् प्रतियोक्ष्यसे तद्बाणयोर्ज्वालया नैव जीविष्याम इति भावः ॥ ८ ॥

तस्याः सौरभ्यलोभेनानुगच्छतो भ्रमरानालक्ष्याह । शिष्या भ्रमराः ॥ ९ ॥

नूपुरस्वनमाकर्णयन्नाह । वाचमिति । तुभ्यं त्वामानन्दयितुं तव चरणस्थयोः पञ्जरयोरन्तर्गतास्तित्तिरिपक्षिणो वर्त्तमाना अनुमीयन्ते यस्मादरूपामस्पष्टवक्तृकां मुखरां पारस्परिककलहमयीं वाचं शृणवाम हे ब्रह्मन्निति तव तपोयोगबलविलसितमेवैतदिति भावः परिधानीयातिसूक्ष्मपीतवस्त्रस्य नितम्बलग्नत्वेन लावण्यमास्वादयन्नाह । अङ्कविटङ्कबिम्बे नितम्बस्य सुन्दरमण्डले कदम्बरुचिः पीतकान्तिर्लब्धा श्यामस्यापि तव नितम्बः पीत इत्याश्चर्य्यमङ्गनितम्बबिम्बे इति पाठे अङ्गेति सम्बोधनं रत्नमेखलां निर्णयन्नाह । यस्यां पीतकान्तौ अलातपरिधिर्ज्वलदङ्गारमण्डलं महो ते तपस्तीव्रतेति भावः क च वल्कलं ते इति किं स्वाश्रम एव वल्कलं प्रमादेनापहाय मन्निकटं नग्न एवायातोऽसीति भावः भङ्ग्या सुरतप्रार्थना च द्योतिता ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तां नयनगोचरां देवीमविदूरे निकटे सुमनसः उपजिघ्रन्तीं मधुकरीमिव जडवदिति उवाच कथम्भूतः तदवलोकनेन तस्या अवलोकनेन विवृतावसरस्य दत्तक्षणस्य मकरध्वजस्य वशमुपनीतः कथम्भूताम् द्विविजादिमनोनयनाल्हादहुर्वर्गत्यादिभिर्नृणां मनसि कुसुमायुधस्य विवरं छिद्रं बिद्भर्तीं निजमुखाद्विगलितममृतवत् स्वादु आसववन्मादकं यत्सहासं मन्दहसितसहितं सम्भाषणं तस्मात् य आमोदः बहिर्निःसृतो गन्धस्तेन मदान्धमधुकरनिकरैरुपरोधः आवरणं तेन भयाद्द्रुतेन शीघ्रेण पदविन्यासेन वल्गु स्पन्दनं किञ्चिच्चलनं स्तनकलशयोः कबरभारे रसनायां च यस्याः ॥ ६ ॥

तद्वचनमेवाह । का त्वमिति दशभिः । मुनिवर्य्येत्यादि पुंस्त्वेन सम्बोधनं भ्र्वादीनां धनुष्ट्वादिकल्पनं च स्वात्मनस्तद्वश्यत्वद्योतकं तस्याः वशीकरणार्थं च भगवतां ब्रह्मादीनां परदेवता उपास्यभूता या देवता तस्याः कापि काचित् मायाऽसि किम् भ्रुवौ धनुष्ट्वेन कल्पयित्वाह । हे सुहृत् ! विज्ये ज्यारहिते बिभर्षि किमात्मनोऽर्थे स्वभोजनार्थं वा शब्देन वृथा मांसभक्षणस्य निन्दितत्वात् श्राद्धाद्यर्थमप्रमत्तान् अनवहितानस्मद्विधान् मृगयसे ॥ ७ ॥

कटाक्षौ बाणत्वेन कल्पयित्वाह । बाणाविति । शतपत्रे नेत्ररूपेण सस्थिते कमले ते एव पत्राणि पिच्छानि ययोः अपुङ्खरुचिरौ पुङ्खाभ्यां दीर्घशलाकारूपाभ्यां विनापि रुचिरौ अतितिग्मवन्तौ अतितीक्ष्णाग्रभागौ कस्मै युयुङ्क्षसि प्रयोक्तुमिच्छसीति न विद्मः स्वस्य तल्लुब्धत्वं ज्ञापयन् प्रार्थयते तव विक्रमः अत्र प्रचारः नोऽस्माकं क्षमायेष्टसिद्ध्यै अस्तु ॥ ८ ॥

तदङ्गसौरभलोभेन परितो भ्रममाणान् ध्वनिं कुर्वतः मधुकरान् तच्छिष्यत्वेन कल्पयित्वाह । शिष्या इति । सरहस्यं साङ्गं साम पठन्ति अजस्रं सन्ततमीश्वरं गायन्ति च मूर्खं मत्वा त्यक्ष्यतीति शङ्कया तथ्येन मधुकरानेवाह । ऋषिगणाः वेदशाखा इव सुमनोऽभिवृष्टीर्भजन्ति अर्थादेते पुष्पपरिमललुब्धा मधुकरा इत्यर्थः ॥ ९ ॥

नूपुरादीन् पञ्जरादित्वेन कल्पयित्वाह । वाचमिति । हे ब्रह्मन् ! तुभ्यं तव चरणस्थपञ्जरयोः नूपुरयोः तित्तिरीणामन्तर्गतरत्नानाम् अरूपमुखरामरूपा अदृष्टवक्तृका मुखरा प्रकटा तां च वाचं परं केवलं शृणवाम शृणुमः पीतं पटं तत्र कान्तित्वेन कल्पयित्वा पृच्छन्ति अङ्कविटङ्कबिम्बे नितम्बस्य सुन्दरे मण्डले कदम्बकुसुमस्य रुचिः कान्तिः क लब्धा कुत्र प्राप्ता काञ्चीं मेखलाम् अलातपरिधिं प्रकल्प्याह । यस्यां कदम्बरुच्यामलातपरिधिरस्ति नितम्बकान्तित्वेनोक्तां नग्नां प्रकल्प्य पृच्छति च पुनस्ते वल्कलं केति ॥ १० ॥

भाषाटीका ।

थोडे दूरमें जैसे भौंरी फूलों को सूंघती हो तैसे देव-मनुष्योंके मनको आनन्द देने वाले गति विहार विनय अव-

किं सम्भृतं रुचिरयोर्द्विज ! शृङ्गयोस्ते मध्ये कृशो वहसि यत्र दृशिः श्रिता मे ।
पङ्कोऽरुणः सुरभिरात्मविषाण ईदृग्येनाश्रमं सुभग ! मे सुरभीकरोषि ॥ ११ ॥
लोकं प्रदर्शय सुहृत्तम!तावकं मे यत्रत्य इत्थमुरसावयवावपूर्वौ ।
अस्मद्विधस्य मनउन्नयनौ बिभर्ति बह्वद्भुतं सरसराससुधादि वक्त्रे ॥ १२ ॥
का वात्मवृत्तिरदनाद्धविरङ्ग ! वाति विष्णोः कलास्यनिमिषोन्मकरौ च कर्णौ ।
उद्विग्नमीनयुगलं द्विजपङ्क्तिशोचिरासन्नभृङ्गनिकरं सर इन्मुखं ते ॥ १३ ॥
योऽसौ त्वया करसरोजहतः पतङ्गो दिक्षु भ्रमन् भ्रमत एजयतेऽक्षिणी मे ।
मुक्तं न ते स्मरसि वक्रजटावरूथं कष्टोऽनिलो हरति लम्पट एष नीवीम् ॥ १४ ॥
रूपं तपोधन!तपश्चरतां तपोघ्नं ह्येतत्तु केन तपसा भवतोपलब्धम् ।
चर्तुं तपोऽर्हसि मया सह मित्र!मह्यं किम्वा प्रसीदति स वै भवभावनो मे ॥ १५ ॥

भाषाटीका।

लोकन सुन्दर अक्षरोंके वचनोंसे मनुष्यों के हृदय में काम-के बाणों से वेधन कराती हुई निज मुखसे निकला जो अमृत-रूप आसव सहित सम्भाषण तिससे जो आमोद तिसके मदसे अन्धे भौंरोंके समूह से जो रुकावट तिससे चलनेमें जो शीघ्र पदन्यास तिससे मनोहर किंचित् चालसे चलाय मान स्तनोंका भार तथा कोंधनी जिसकी ऐसी प्रकाश मान जो अप्सरा तिसके देखनेसे अवसर पाने वाले भगवान् मकरध्वज कन्दर्पके वशीभूत होकर जड बुद्धी सा होकर राजा इस वचनको बोला ॥ ६ ॥

मोहित होकर स्त्रीलिङ्ग पुलिङ्गको न समझकर बोलने लगे कि हे मुनिवर्य ! तु कौनसी है क्या करने चाहती है इस पहाडपै क्यों आयी है परदेवता भगवान् की कोई माया है क्या हे सुहृत् विना प्रत्यंचाके दो धनुष (भौं) धारण किये हो वे धनुष क्या अपने वास्ते हैं किं वा कोइ हमसे, प्रमादी मृगोंको वनमे ढूंढती हो ॥ ७ ॥

भ्रुकुटी देखकर कहते हैं कि नेत्र कमल ही बाण के पक्ष्म पत्र हैं अतिशान्तहैं पुंख बाणके मूलके विना भि अति मनोहर है अति तीक्ष्ण दांत वाले हैं ऐसे दोनों बाणों को किसके ऊपर छोडोगे वनमे विचरते समय आपका पराक्रम हम जड बुद्धि वालों के कल्याणको होवै ॥ ८ ॥

भौंरोंको देखकर कहते हैं कि आपके शिष्यसे सब भग-वान् आप ईश्वरको चारों तरफसे रटते हैं और रहस्य सहित सामको गान करते हैं आपके बालोंके शिखों से गिरि फूलोंकी वृष्टि को ये सब ग्रहणकर तेहै जैसे कि ऋषिगण वेद शास्त्रोंको ग्रहण करैं ॥ ९ ॥

हे ब्रह्मन् ! आपके चरण पङ्कज जोतित्तिरि रूप तिनके जो विना रूपके और शब्द वाले वचन को केवल हम सु-नते मात्र हैं आपकी कटि मनोहर है तिसविश्वमें कदम्ब की कान्ति कहां से आई तुमारी कटि पर मेखला मे अग्नि का चक्र-घूमताहै आपकी वल्कल वस्त्र कहां गयाहै ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

स्तनावाशङ्क्याह । शृङ्गयोः स्तनयोः किं सम्भृतं किं पूर्ण-मस्ति । मनोहरं किञ्चिदस्तीत्येतावत्तु जानामि । यतो मध्यं कृशो-ऽपि त्वं कृच्छ्रेण वहसि धारयसि । यत्र च मे दृशिर्दृष्टिः श्रिता संलग्नास्ति । अन्यथेदं द्वयं न घटत इति भावः । स्तनगतं कुङ्कु-ममाशङ्क्याह । पङ्कोऽरुण आत्मनस्तव विषाणे शृङ्गे ईदृगत्यपूर्वः । कुत इत्यत आह । येन पङ्केनाश्रमं सुरभीकरोषि सुगन्धयुक्तं करोषीति ॥ ११ ॥

लोकं स्थानं यत्रत्यो जन उरसा इत्थमपूर्वावयवौ बिभर्ति । मनस उन्नयनौ । क्षोभकौ पाठान्तरे "इत्थम्भूतलक्षणे" तृतीया । वक्त्रे च बह्वद्भुतं बिभर्ति । किं तदाह । रसो मधुरालापो रासो विलासस्ताभ्यां सहिता सुधा अधरामृतमादिशब्दात्स्मित-नर्मादि ॥ १२ ॥

का वा तव लोके आत्मनो देहस्य वृत्तिराहारः । अङ्ग ! हे सखे ! अदनाच्चर्वणाद्धविरिति तत्सम्बन्धी गन्धो वात्यागच्छति इति ताम्बूलाभिप्रायम् । अदनाद्बहिरङ्ग भातीति पाठे मम तावद्भो-जनाद्बहिर्भूतैव वृत्तिर्भातीत्यर्थः । यतस्त्वं विष्णोः कलाऽसि विष्णुश्च नाश्नाति "अनश्नन्न्यो अभिचाकशीति" इति श्रुतेः।विष्णोः कलासीत्यत्र हेतुः । तव च कर्णौ विष्णोरिवानिमिषोन्मकरौ अनिमिषौ रत्ननेत्रत्वेन निमेषशून्याबुल्लसन्तौ मकरौ तदाकारे कुण्डले ययोस्तौ । किञ्च । तव मुखं सर इत् सर इव । तदेवाह । उद्विग्नं चञ्चलं मीनयुगलमिव नेत्रद्वयं यस्मिन् । द्विजा दन्तास्तेषां पङ्क्त्या शोचिः शोभा यस्मिन् । सरसि तु द्विजा राजहंसाः आसन्नो भृङ्गनिकर इव केशस्तोमः परिमललुब्धभृ-ङ्गस्तोमो वा यस्मिन् ॥ १३ ॥

पतङ्गः कन्दुको भ्रमतो भ्रमच्चित्तस्य मे अक्षिणी एजयते चञ्च-लतां नयति । वक्रकेशसमूहं मुक्तबन्धनं न स्मरसि न सम्भा-वयसि किम् । कष्टो धूर्तोऽनिलो नीवीं हरत्येतच्च स्मरसि किम् ॥ १४ ॥

उपलब्धं प्राप्तम् । मह्यं मम । हे मम मित्र ! मया सह तपश्चर्तुम-र्हसि । किञ्च स वै भवभावनः संसृतिविस्तारको ब्रह्मा मे प्रसीदति । त्वां भार्यां कल्पयतीत्यर्थः ॥ १५ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

स्तनावालक्ष्याह । हे द्विज ! सुन्दरयोः शृङ्गयोः किं सम्भृतं किम्पूर्णमस्ति मनोहरं किञ्चिदस्तीत्येतावत्तु जानामि यतो मध्ये मध्यकाये कृशोऽपि त्वं कृच्छ्रेण शृङ्गद्वयं वहसि अत्र शृङ्गयोर्मे दृशिराश्रिता संलग्नास्ति अन्यथेदं वहनं मम दृश्यासञ्जनं च न घटत इति भावः स्तनगतं कुङ्कुममालक्ष्याह । पङ्कोरुणः सुरभिरात्मनस्तव विषाणे स्तने ईदृगत्यपूर्वः लिप्त इति शेषः कुतः येन पङ्केन सुभग मम।श्रमं सुरभीकरोषि ॥ ११ ॥

हे सुहृत्तम ! तावकं त्वत्सम्बन्धिनं लोकं स्थानं मे मह्यं प्रदर्शय यत्रत्यः यः तावकलोकस्थः जनः अस्मद्विधस्य मादृशस्य मनउन्नयनौ मनःक्षोभकौ उल्लासकरौ वा रुत्वयत्वयलोपाः यलोपस्यासिद्धत्वान्न गुणः इत्थं ईदृशावपूर्वावयवौ शृङ्गरूपौ स्तनौ उरसा बिभर्त्ति वक्त्रे च वह्वद्भुतं बिभर्त्ति किं तत्सरससरासमुधादि सरसो मधुरालापः रासो विलासस्ताभ्यां सहिता सुधा अधरामृतमादिशब्देन स्मितादिसङ्ग्रहः ॥ १२ ॥

तव लोके आत्मनो देहस्य वृत्तिराहारः का वा अङ्ग ! हे सखे ! अदनाद्धविर्वाद्वहिः भक्षणव्यतिरेकेण भक्षणं विनैव तवात्मवृत्तिर्जीवनं संभवतीति भाति सा कीदृशी अदनाद्धविर्दीतीति पाठे हविः शब्दस्तद्गन्धे उपचाराद्वर्तते अदनाद्धविर्वाद्धविः सम्बन्धि गन्धो वात्यायातीति ताम्बूलाभिप्रायं पूर्वोक्तपाठ एव साधुः विष्णोः कलासीति हेतूक्तेः तथाहि तस्मिन्पाठे तव भोजनाद्बहिर्भूतैव वृत्तिरित्यवभातीत्यर्थः कुतः यतस्त्वं विष्णोः कलांशोऽसि विष्णुर्नाश्नाति "अनश्नन्नन्यो अभिचकाशीति" इति श्रुतेः विष्णोः कलासीत्यत्र हेतुः तव कर्णौ विष्णोरिवानिमिषोन्मकरावनिमेषौ रत्नश्रेष्ठत्वेन निमेषशून्यौ उल्लसन्तौ मकरौ तदाकारे कुण्डले ययोस्तौ किं च तव मुखं सरस्सर इव तदेवाह । उद्विग्नं चञ्चलमीनयुगलमिव नेत्रद्वयं यस्मिन् द्विजाः दन्तास्तेषां पङ्क्त्योः शोचिः शोभा यस्मिन् शोचिःशब्दः सान्तः सरसि तु द्विजाः हंसाः आसन्नो भृङ्गनिकर एव केशस्तोमः परिमललुब्धभृङ्गस्तोमो वा ॥ १३ ॥

त्वया करसरोजेन हतः योऽसौ पतङ्गः कन्दुकः दिक्षु भ्रमन् भ्रमतः भ्रमितचित्तस्य मेऽक्षिणी एजयते चञ्चलतां नयति वक्रकेशसमूहं मुक्तबन्धनं न स्मरसि न बध्नासि किं कष्टो धूर्त्तः लम्पटो लालसः एष अनिलो वायुः नीवीं हरत्यधराम्बरं हरति एतच्च न स्मरसि किम् ॥ १४ ॥

हे तपोधन!तपश्चरतां तपोविघ्नकरमेतद्रूपं भवता केन तपसोपलब्धं प्राप्तं हे मित्र ! मया सहितस्तपश्चर्तुमर्हसि भवभावनः विश्वस्रष्टा स वै अजो ब्रह्मा किं वा मह्यं प्रसीदति त्वां भार्यां कल्पयतीत्यर्थः ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मध्ये कृश इत्यलुक् कृशमध्यस्त्वं यौ वहसि ते तव तयोः रुचिरयोः शृङ्गयोः शृङ्गवदुन्नतयोः स्तनयोः संभृतं किं चूचुकलक्षणनीलरत्नमिति शेषः यत्र ययोः द्विजेति सम्बोधनं जडत्वात् कुङ्कुमाद्यङ्गरागाभिप्रायेणाह । पङ्क इति । आत्मविषाणे तव स्तनद्वयेऽरुणः पङ्कः कुङ्कुमाद्यङ्गरागः ईदृगीदृशगुणोपेतः कथमत्राह । येनेति ॥ ११ ॥

यत्रत्यः यस्मिन् देशे भूतस्त्वमुरसा अपूर्वौ नूतनौ अवयवौ स्तनलक्षणौ बिभर्षि किं विशिष्टावस्मद्विधस्य मनउन्नयनौ मनस उत्कर्षप्रदौ स त्वं तावकं लोकं प्रदर्शयेत्यन्वयः अन्यदपीत्याह । बह्विति । किं तदत्राह । सरसेति । वक्त्रे रसेन सह वर्तमानः सरसो हासः मन्दहासः तेन युक्तां सुधामधरामृतं च बिभर्षि पानेन सरसहासक्रीडाकरीं सुधामिति वा ॥ १२ ॥

अङ्ग ! तत्रात्मवृत्तिर्देहयात्रा का अन्नमिति चेत्तत्राह । अदनादिति । अदनाद्बहिर्भोजनं विनेति मे भाति अन्नभक्षणेनैव वलीपलितदौर्गन्ध्यादिकं स्यात्तत्तव नाप्नोतीति भावना कल्प्यत इति भावः किं च त्वं विष्णोः कलासीति मन्ये अशनाद्यभावात् लक्षणान्तरं चास्तीत्याह । अनिमिषन्मकराविति । अनिमिषन्तावुन्मीलन्तौ मकरौ मकरमत्स्यलक्षणौ कर्णौ कुण्डलाख्याकल्पौ विष्णुत्वे लक्षणमिति शेषः इदं चास्मन्मनोहरमित्याह । उद्विग्नमीनेति । ते तव मुखं सरः मुखाख्यं सरः उदुत्कृष्टमित्यन्वयः कथमुद्विग्नं संचलितं मीनयोर्नेत्रयोर्युगलं यस्मिंस्तत्तथा अनवस्थितिलक्षणाव्यभिचारान्नेत्रस्थाने मीनग्रहणं सरःपदोपादानाच्च द्विजानां दन्तवर्णविडतया स्थितानां पक्ष्मणां पङ्क्तिभिः शोभास्येति द्विजपङ्क्तिशोभि अन्यत्र पक्षिणां पङ्क्तिभिः शोभि आसन्नो भृङ्गाणां निकरो यस्मिन् तत्तथा उभयत्र समं द्विजपङ्क्तिशोचिरिति केचित्पठन्ति ॥ १३ ॥

त्वया करसरोजेन हतो योऽसौ पतङ्गः कन्दुकः दिक्षु भ्रमन् भ्रमतः तवाक्षिणी एजयते चालयतीत्यन्वयः लम्पटो रागी अत एव कृष्णः [1] एषः अनिलो वायुः वरो वरणीयश्च वक्रः कुटिलश्च जटानां वरूथः समूहस्ते तव तं हरति नीवीं वस्त्रबन्धं च हरतीत्येतन्न युक्तमित्यन्वयः ॥ १४ ॥

हे तपोधन ! तव यद्रूपं तपः कुर्वाणानां पुंसां तपोघ्नं तपोविघ्नकरमेतद्रूपमिह तपोराशौ केन तपसा त्वया लब्धमित्यन्वयः हे मित्र ! मया सह तपः कर्तुमर्हसीत्यन्वयः "तप ऐश्वर्ये" इति धातो ऐश्वर्यनिमित्तं विषयभोगलक्षणमानन्दं गमयितुमिति वा चरतेर्गत्यर्थत्वात् मह्यं मे त्वं प्रसीदसि किं वा तर्हीति शेषः कुत इति तत्राह । स इति । स भवान्मे भवभावनः सम्पत्करो वा इत्यन्वयः ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

लोकमिति । उन्नयनैरिति पाठे क्षोभणैरपूर्वत्वप्रकारं प्रापिताविव्यर्थः ॥ १२ ॥

ननु निराहार एवाऽहं तत्राह । अदनाद्धविर्वाद्धेतोः हविर्यज्ञियद्रव्यमिव परमपवित्रं किमपि वाति तत्सम्बन्धिगन्धः प्रसरतीत्यर्थः पूर्वपाठे विष्णोः कलासीति हेतुत्वं तु विष्णोर्यज्ञभोक्तृत्वादिति ज्ञेयम् इदित्यव्ययमेवार्थः एवार्थश्चात्र सादृश्य इति ज्ञेयम् उदिति तु कल्पितमेव ॥ १३—१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ॥

स्तनावालक्ष्याह । हे द्विज ! शृङ्गयोः किं संभृतं किमद्भुतं बहुमूल्यरत्नं वस्तु धृतं वर्त्तते यन्मद्दृष्टिपातसमय एव मुहुराच्छादयसीति भावः ब्राह्मणो भूत्वापि शृङ्गद्वयं धत्से तत्रापि वक्षसि तत्रापि मनोहरमेव वस्तु धत्से यतो मध्ये कृशोऽपि

[1] मलिनः

न त्वां त्यजामि दयितं द्विजदेवदत्तं यस्मिन्मनो दृगपि नो न वियाति लग्नम् ।
मां चारुशृङ्ग्यर्हसि नेतुमनुव्रतं ते चित्तं यतः प्रतिसरन्तु शिवाः सचिव्यः ॥ १६ ॥

॥ श्रीशुकउवाच ॥

इति ललनानुनयातिविशारदो ग्राम्यवैदग्ध्यया परिभाषया तां विबुधवधूं विबुधमतिरधिसभाजयामास ॥ १७ ॥

सा च ततस्तस्य वीरयूथपतेर्बुद्धिशीलरूपवयःश्रियौदार्येण पराक्षिप्तमनास्तेन सहायुतायुतपरिवत्सरोपलक्षणं कालं जम्बूद्वीपपतिना भौमस्वर्गभोगान् बुभुजे ॥ १८ ॥

तस्यामुह वा आत्मजान् स राजवर आग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नव पुत्रानजनयत् ॥ १९ ॥

सा सूत्वाथ सुतान्नवानुवत्सरं गृह एवापहाय पूर्वचित्तिर्भूय एवाजं देवमुपतस्थे ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्विजदेवेन ब्रह्मणा दत्तम् दृक् मनश्च लग्नं सन्नापयाति हे चारुशृङ्गि ! यतस्ते चित्तं तत्र मां त्वदधीनं नेतुमर्हसि सचिव्यस्तव सख्योऽपि शिवा अनुकूलाः सत्यो मां प्रतिसरन्त्वनुवर्तन्ताम् यद्वा एतावत्पर्यन्तं मे याः सचिव्यः सख्यः शिवाः फेरवस्ताः प्रतिसरन्तु निर्यान्तु यद्वा वनवासे सहचर्यो हरिण्यः शिवाः प्रतिसरन्तु प्रदक्षिणं गच्छन्तु ॥ १६ ॥

ग्राम्येषु वैदग्ध्यं यस्यास्तया परिभाषया वाचा सभाजयामास पूजयामास सम्मुखीचकारेत्यर्थः ॥ १७ ॥

बुद्ध्यादीनां द्वन्द्वैक्यम् ॥ १८ ॥ १९ ॥

सूत्वा प्रसूय उपतस्थेऽभजत् ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

हे द्विज ! देवेन ब्रह्मणा दत्तं त्वां न त्यजामि यस्मिंस्त्वयि नोऽस्माकं दृङ्मनश्च लग्नं सन्न वियाति न ततो गच्छति हे चारुशृङ्गि ! यतस्ते चित्तं ततो मां त्वदधीनं नेतुमर्हसि सचिव्यस्तव सख्योऽपि शिवा अनुकूलाः मां प्रतिसरन्त्वनुवर्त्तन्तां यद्वा एतावत्पर्यन्तं मे याः सचिव्यः शिवाः फेरवस्ताः प्रतिसरन्तु निर्यान्तु यद्वा वनवासेन सह वसन्त्यो हरिण्यः शिवाः प्रतिसरन्तु प्रदक्षिणं गच्छन्तु सरण्य इति पाठे सरन्तीति सरण्यो गत्यर्थाः शिवाः मङ्गलरूपाः सरन्तु गच्छन्तु ॥ १६ ॥

इतीत्थं ललनानुनये ताः स्वाधीनाः कर्तुमित्यर्थः अतिनिपुणो ग्राम्येषु वैदग्ध्यं कौशलं यस्यास्तया परिभाषया तां विबुधवधूमप्सरसं मोहितचित्तः अति सभाजयामास सबहुमानं तामनुकूलामकरोदित्यर्थः ॥ १७ ॥

सा च पूर्वचित्तिः तस्य वीरयूथपतेः वीराणां यूथाः तेषां पतेराग्नीध्रस्य बुद्ध्यादीनां द्वन्द्वैक्यं तेन पराक्षिप्तमासक्तं मनो यस्याः सा जम्बूद्वीपपतिना तेनाग्नीध्रेण सह बहुकालं भौमस्वर्गाः नवखण्डाः तेषु ये भोगास्तान् बुभुजे ॥ १८ ॥

ततः स राजश्रेष्ठः आग्नीध्रः तस्यां पूर्वचित्त्यां नाभिप्रभृतीनेवात्मजान् पुत्रानजनयत् पुमाख्यान्नरकात्त्रायत इति पुत्र इत्यवयवार्थावगमाय पुत्रशब्दः प्रयुक्तः अतो न पौनरुक्त्यम् ॥ १९ ॥

सा पूर्वचित्तिः प्रतिवत्सरमेकैकं पुत्रमिति नव सुतान् सूत्वा गृह एवापहाय विहाय पुनरजं देवं ब्रह्माणमुपतस्थेऽभजत् ॥२०॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे द्विज ! देवेन विधिना दत्तं यस्मिंस्त्वयि लग्नं मनो लग्ना दृगपि दृष्टिर्वा न वियात्यन्यत्र न गच्छति हे चारुशृङ्ग ! सुन्दरस्तन ! त्वं मां नेतुमर्हसि कुतः मम चित्तं ते तवानुव्रतमनुगतमिति यतः मुग्धो ग्राम्यकाम इवाह । प्रतिसरन्त्विति । इमाःशिवाः शुभाः सचिव्यो दासीवद्वर्तमाना मधुकर्यः प्रतिसरन्त्वपसरन्तु दूरं गच्छन्तु अधुनाहं त्वां संभोक्तुकाम इति शेषः यद्वा सचिवीवद्वर्तमानाः शिवाःशृगालस्त्रियः प्रतिसरन्तु प्रदक्षिणं गच्छन्त्विति स्वकार्यसिद्धये शकुनं प्रार्थयत इति नन्वत्र कथं विज्ये इत्यादावनर्था वाणी संगच्छत इतिचेदुच्यते परिहासादिषु दर्शनात्तदुक्तम् । परिहासप्रलापादिष्वनर्था वाग्भवेत्क्वचिदिति । तस्मादाग्नीध्रः कामार्तत्वादेवंविधानि वाक्यानि प्रालपदिति युक्तम् ॥ १६ ॥

विरागिणां श्रोतृणां कर्णदुःसहायाः इह शाब्दिकानामपहासहेतोरिव स्थितायां ग्राम्यकथाया अथापि समाप्तिर्नास्तीति मन्वान इवोत्तरकथाप्रसंगमाह । इतीति । इतिशब्द आदिवचनः समाप्तिवचनो वा ग्राम्ये विषयभोगकथायां वैदग्ध्यं पाटव्यं यस्याः सा तथा तया परिभाषया संभाजनया वाचया ॥ १७ ॥

यद्यनया परिभाषया वशीकृता स्यात्तर्हि अस्य तत्र वैदग्ध्यमस्तीति वक्तुं युक्तं तत्कथमत्राह । सा चेति । अनया विषयभोगात्सिद्धं वशीकरणम् ॥ १८ ॥

न केवलमियं भोगकर्त्री किं तु संतानकरीति भावेनाह । तस्यामिति । पुत्रोत्पत्त्यनन्तरं पूर्वचित्त्या किमकारीति तत्राह । सासूत्वेति । अजं देवं ब्रह्माणम् ॥ १९ ॥२०॥

आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पित्रा विभक्ता आत्मतुल्यनामानि यथाभागं जम्बूद्वीपवर्षाणि बुभुजुः ॥ २१ ॥

आग्नीध्रो राजाऽतृप्तः कामानामप्सरसमेवानुदिनमधिमन्यमानस्तस्याः सलोकतां श्रुतिभिरवारुन्ध यत्र पितरो मादयन्ते ॥ २२ ॥

सम्परेते पितरि नव भ्रातरो मेरुदुहितॄर्मेरुदेवीं प्रतिरूपामुग्रदंष्ट्रीं लतां रम्यां श्यामां नारीं भद्रां देववीतिमितिसंज्ञा नवोदवहन् ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां संहितायां वैयासिक्यामाग्नीध्रवर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

अयुतायुतं न्यर्बुदम्। तृपत्वे भौमभोगान् देवत्वे स्वर्गभोगांश्च ॥ १८—२० ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

ननु त्वया मम किं फलं तदितो यामीत्याशङ्क्याह। न त्वामिति। यतो द्विजदेवेन ब्रह्मणा यस्मिंस्त्वयि लग्नं न वियाति न विगतं भवति हे चारुश्रृङ्गि! उन्नतस्तनीति स्त्रीलिङ्गेन सम्बोधनमाति कामवैवश्येनावहित्थाया नाशं द्योतयति। यतः यत्र देशे तव चित्तं तत्रैव साचिव्यस्तव सख्योऽपि शिवाः अनुकूलाः सत्यः मां प्रति सरन्तु अनुवर्त्तन्ताम् ॥ १६ ॥

ग्राम्याणामिव वैदग्ध्यं यस्यां तया ॥ १७ ॥

बुद्धयादीनां द्वन्द्वैक्यं गालवमते यकारः अयुतायुतं न्यर्बुदम् ॥ १८—१९ ॥

गृहे राज्ञो भवनं एवापहाय अप्सरस्त्वात्तेषु वात्सल्यमपि पूर्वकृतं त्यक्त्वा ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

हे व्रज! हे चारुश्रृङ्गि! यतः यत्र ते चित्तं तत्र त्वं मां नेतुमर्हसि सचिव्यस्तव परिवारिकाः शिवाः कल्याण्यः अनुव्रतं भवदीयपरिचर्यायां समासक्तं प्रतिसरन्तु अनुसरन्तु ॥ १६ ॥

ग्राम्येषु वैदग्ध्यं वैशारद्यं यस्यास्तया सभाजयामास आदृतवान् ॥ १७ ॥ १८ ॥ १९ ॥

उपतस्थेऽभजत् ॥ २० ॥

भाषाटीका

ब्रह्माजी ने मेरे को आपसे मिलाया है अब मैं आपको नहीं छोडूंगा जिन आपमें मेरे मन तथा नेत्र लगगया है सो हटता नहीं है हे सुन्दर सींग वाली तु मेरे को जहां इच्छा हो तहां ले चल मैं तेरा अनुचर हूं इस मनोरथ सिद्धिके लिये मंगालिक हरिणि मेरे दक्षिण ओर से चलें ॥ १६ ॥ "

श्रीशुकदेवजी बोले इस प्रकार से देवतों की सी बुद्धिवाला स्त्रियों के वशीकरने मे वडा चतुर आग्नीध्र ने ग्राम्यविषयों मे वडी निपुण बोली से उस अप्सरा का वडा सत्कार किया ॥ १७ ॥

तदनन्तर वह अप्सरा पूर्वचित्ति भी उस आग्नीध्र के बुद्धिशील रूप शोभा उदारबुद्धि इनों से मोहित होकर अर्बुद अयुत परिवत्सर काल पर्यन्त उस जम्बूद्वीप के पति आग्नीध्र के साथ भूमि स्वर्ग के भोगों को भोगती रही ॥ १८ ॥

उस राजश्रेष्ठ आग्नीध्र ने उस अप्सरा मे अपने वीर्य से नाभि किम्पुरुष हरिवर्ष इलावृत रम्यक हिरण्मय कुरु भद्राश्व केतुमाल नाम के नौ पुत्रों को पैदा किया ॥ १९ ॥

वह पूर्वचित्ति एक एक वर्षमे एक ऐसे नौ वर्ष मे नौ पुत्रों को पैदा करके उन सबोंको घरही मे छोडकर फिर ब्रह्माजीकी सेवा करने चलीगई ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

औत्पत्तिकेनैव स्वभावेन संहननं दृढाङ्गत्वम् ॥ २१ ॥

कामानां भोगैः अध्यधिकं मन्यमानः श्रुतिभिर्वैदिकैः कर्मभिः अवारुन्ध प्राप मादयन्ते मोदन्ते ॥ २२ ॥

इत्येवम्भूताः संज्ञा यासां ताः परिणीतवन्तः ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम्। द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

नाभ्यादयः आग्नीध्रसुता मातुरनुग्रहादौत्पत्तिकेन स्वभावतः संहननं दृढाङ्गत्वं बलं च ताभ्यामुपेताः पित्रा आग्नीध्रेण विभक्ता विभागमनतिक्रम्य आत्मतुल्यनामान्यात्मभिः सह तुल्यनामानि जम्बूद्वीपवर्षाणि बुभुजुः भारतवर्षस्यापि भरतसम्बन्धात्पूर्वमजनाभमिति व्यवहारादात्मतुल्यनामानीत्यस्य न विरोधः ॥ २१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

आग्नीध्रो राजाऽतृप्तकामस्तामेवाप्सरसं पूर्वचित्तिमधिमन्यमानः तत्सङ्गनिमित्तानन्तरमधिकं कामयमानः श्रुतिभिः श्रुत्युक्तसाधनैः कर्मभिस्तस्याः सकोलतामवरुन्धे प्राप कोऽसौ लोकस्तत्राह। यत्र लोके प्राप्ताः पितरो मोदन्ते ॥ २२ ॥

पितर्याग्नीध्रे सम्परेते मृते सत्यनन्तरं नव भ्रातरः नाभिप्रभृतयः सुमेरोर्दुहितॄर्मेरुदेवीप्रभृतीः नव उदवहन् विवाहितवन्तः ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

संहननं देहपुष्टिः आत्मतुल्यनामानि आत्मनामाक्षरतुल्यनामाक्षराणि जम्बूद्वीपे विद्यमानानि वर्षाणि खण्डानि "खण्डोऽस्त्री खण्डिते त्रिषु" इति यादवः ॥ २१ ॥

आग्नीध्रेण पुनः किमकारीत्यत्राह। आग्नीध्र इति। तामभिमन्यमान इति तया सह सुरतोत्सवसुखं चिन्तयन्नित्यर्थः समानलोकतामवरुन्धन्नाप्तुकामः श्रुतिभिः श्रुतिविहितैः साधनैरीजे श्रीहरिमिति शेषः यद्वा एवं विधसाधनेनैव यजन्नप्सरः समानलोकतां श्रुतिभिराकर्णनैरवरुन्धन् लोकं विशिनष्टि। यत्रेति। मादयन्ते हृष्यन्ति अनेन पितृलोक एवाप्सरसो लोक इतिध्वनितम् ॥ २२ ॥

सम्परेते मृते मेरोर्दुहितॄः पुत्रीः ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

यत्र पितर इति तत्र पितृणामधिकारत्वं वर्त्तत इति ज्ञेयम् ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
प्रथमोऽध्यायः समाप्तः ॥ १

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

मातुरनुग्रहात्तदीयस्तनपानात् औत्पत्तिकेनैव स्वाभाविकेन संहननं दृढाङ्गत्वं बुभुजुः पालयामासुः ॥ २१ ॥

कामानां कामैः श्रुतिभिः श्रुत्युक्ततादृशकर्म्मभिः अवारुन्ध प्राप मादयन्ते मोदयन्ते मोदन्ते ॥ २२—२३॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
द्वितीयः पञ्चमेऽध्यायः सङ्गतः सङ्गतः सताम् ॥२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

औत्पत्तिकेन स्वाभाविकेनैव गुणेन ॥ २१ ॥

काम्यन्ते इति कामाः विषयास्तैरतृप्तस्तृतीयार्थे षष्ठी अनुदिने प्रतिदिनमधि अधिकं मन्यमानः श्रुतिभिर्वेदैरुपायबोधकैः अवारुन्ध प्राप यत्र प्राप्तं पुरुषं पितरो मादयन्ते ॥ २२ ॥

इति उदाहृताः संज्ञा यासां ताः उदवहन् परिणीतवन्तः ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
द्वितीयाध्यायार्थप्रकाशः ॥ २ ॥

भाषाटीका।

आग्नीध्र के वे पुत्र सब माता के अनुग्रह से उत्पत्ति के स्वभाव से उत्तम शरीर बलसे युक्त होकर रहे थे पिता के विभाग करके देने से अपने नाम के तुल्य नामवाले जम्बूद्वीप के नौ वर्षोंको भोगने लगे ॥ २१ ॥

आग्नीध्रराजा कामों से तृप्त न होकर उसी अप्सरा को सबदिन अधिक मानता रहा फिर श्रुतियों से उसी अप्सरा के लोकको प्राप्त हुआ जहां पितृलोग आनन्द करते हैं ॥ २२ ॥

पिता आग्नीध्र के परलोक जाने पर नौ भ्राताओं ने मेरुकी पुत्री मेरुदेवी प्रतिरूपा उग्रदंष्ट्री लता रम्या श्यामा नारि भद्रा देववीति इन संज्ञावाली नौ कन्यों के साथ विवाह किया ॥ २३ ॥

इति श्री भागवत पञ्चमस्कन्ध दूसरा अध्याय का
भाषानुवाद लक्ष्मणाचार्य कृत
समाप्त ॥ २ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे द्वितीयोऽध्यायः समाप्तः ॥ २ ॥

॥ तृतीयोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

नाभिरपत्यकामोऽप्रजया मेरुदेव्या भगवन्तं यज्ञपुरुषमवहितात्माऽयजत ॥ १ ॥

तस्य ह वाव श्रद्धया विशुद्धभावेन यजतः प्रवर्ग्येषु प्रचरत्सु द्रव्यदेशकालमन्त्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमोऽपि भगवान् भागवतवात्सल्यतया सुप्रतीक आत्मानमपराजितं निजजनाभिप्रेतार्थविधित्सया गृहीतहृदयो हृदयङ्गमं मनोनयनानन्दनावयवाभिराममाविश्चकार ॥ २ ॥

अथ ह तमाविष्कृतभुजयुगलद्वयं हिरण्मयं पुरुषविशेषं कपिशकौशेयाम्बरधरमुरसि विलसच्छ्रीवत्सललामं दरवरवनरुहवनमालाच्छूर्यमृतमणिगदादिभिरुपलक्षितं स्फुटकिरणप्रवरमुकुटकुण्डलकटककटिसूत्रहारकेयूरनूपुराद्यङ्गभूषणविभूषितमृत्विक्सदस्यगृहपतयोऽधना इवोत्तमधनमुपलभ्य सबहुमानमर्हणेनावनतशीर्षाण उपतस्थुः ॥ ३ ॥

॥ ऋत्विज ऊचुः ॥

अर्हसि मुहुरर्हत्तमार्हणमस्माकमनुपथानां नमो नम इत्येतावत्सदुपशिक्षितं कोऽर्हति पुमान्प्रकृतिगुणव्यतिकरमतिरनीश ईश्वरस्य परस्य प्रकृतिपुरुषयोरर्वाक्तनाभिर्नामरूपाकृतिभी रूपनिरूपणम् ॥ ४ ॥

सकलजननिकायवृजिननिरसनशिवतमप्रवरगुणगणैकदेशकथनादृते ॥ ५ ॥

परिजनानुरागविरचितशबलसंशब्दसलिलसितकिसलयतुलसिकादूर्वाङ्कुरैरपि सम्भृतया सपर्यया किल परम ! परितुष्यसि ॥ ६ ॥

अथानयापि न भवत इज्ययोरुभारभरया समुचितमर्थमिहोपलभामहे ॥ ७ ॥

आत्मन एवानुसवनमञ्जसाऽव्यतिरेकेण बोभूयमानाशेषपुरुषार्थस्वरूपस्य किन्तु नाथाशिष आशासानानामेतदभिसंराधनमात्रं भवितुमर्हति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तृतीये चरितं नाभेः परं मङ्गलमीर्यते ।
यस्य यज्ञे प्रतीतः सन्पुत्रोऽभूद्दृषभो हरिः ॥ १ ॥

नाभिराग्नीध्रसुतः अपुत्रया मेरुदेव्या भार्यया सह ॥ १ ॥

प्रवर्ग्यसंज्ञकेषु कर्मसु क्रियमाणेषु द्रव्यादयः सप्त ये योगा उपायास्तेषामुपपत्त्या सम्पत्त्या दुरधिगमो दुष्प्रापोऽपि भागवतेषु कृपालुतया सुप्रतीकः शोभनावयवः स्वात्मानमाविश्चकार अपराजितं स्वतन्त्रं निजभक्तानां येऽभिप्रेतार्थास्तेषां विधित्सया गृहीतमाकृष्टं हृदयं चित्तं यस्य हृदयङ्गमं सुखकरं यतो मनो नयनान्यानन्दयन्ति येऽवयवास्तैरभिरामं सुन्दरम् ॥ २ ॥

अथ हेत्यादिनिपातबाहुल्यं वाक्यालङ्काराय आविष्कृतम् भुजानां युगलद्वयं चतुष्टयं येन हिरण्मयं तेजोमयं पुरुषेषु विशिष्यत इति तथा पुरुषोत्तममित्यर्थः अर्हणेनार्घ्येण सहोपतस्थुरुपजग्मुरित्यन्वयः विलसन् श्रीवत्स एव ललामं चिह्नं यस्य दरवरः शङ्खश्रेष्ठः वनरुहं पद्मम् अच्छूरि चक्रम् अमृतमणिः कौस्तुभः एवमादिभिरुपलक्षितम् स्फुटाः किरणा ये प्रवरा मणयस्तन्मयानि यानि मुकुटादीन्यङ्गानां भूषणानि तैर्विभूषितं बहुमाने दृष्टान्तः अधना इवोत्तमधनं निधिम् ॥ ३ ॥

अर्हसीत्यादिना निगदेन स्तुवन्ति हे अर्हत्तम परिपूर्ण ! ऽपि त्वमनुपथानां भृत्यानामस्माकमर्हणं मुहुः स्वयमेव स्वीकर्तुमर्हसि न तु वयं स्तोतुं शक्ता इत्याहुः । नमो नम इत्येतावदेवास्माकं सद्भिरुपशिक्षितं तद्रूपस्य दुर्ज्ञेयत्वात् तदेवाहुः । कोऽर्हतीति । प्रकृतिगुणानां व्यतिकरः प्रपञ्चस्तस्मिन्नेव मतिर्यस्यात एवानीशः प्रकृतिपुरुषयोः परस्मात् एवेश्वरस्यार्वाक्तनाभिस्त्वामस्पृशन्तीभिः प्रपञ्चान्तर्गताभिर्नाम च रूपं चाकृतिश्चाकारस्ताभिस्तव रूपनिरूपणं कर्तुं को नाम पुमानर्हति ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स ह्येतन्मात्रमेवार्हति नाधिकमित्याहुः । सकलजननिकायस्य वृजिनं निरस्यन्तीति तथा शिवतमाः प्रवराश्च ये गुणगणास्तेषामेकदेशस्तस्य कथनाद्विनाधिकं नार्हति ॥ ५ ॥

वाङ्मनसागोचरोऽपि त्वं भक्तानां सुखाराध्य एवेत्याहुः । हे परम ! परिजनैरनुरागेण विरचिता ये शबलसशब्दा गद्गदाक्षरस्तुतयः सलिलं च सिताकिसलयाश्च शुद्धपल्लवाः शिलेति पाठे शिलं कुशादिमञ्जरी एवमादिभिः सम्भृतया सम्पादितया पूजया परितुष्यसि ॥ ६ ॥

अथेति प्रकारान्तरे अन्यथा त्वनयेज्यया यागेनाप्युरुभारभरयानेकाङ्गसमृद्धयापि भवतः समुचितमपेक्षितं प्रयोजनं नैव पश्यामः ॥ ७ ॥

अत्र हेतुः । आत्मनः स्वत एवानुसवनं सर्वदाञ्जसा साक्षादव्यतिरेकेण समन्वयेन बोभूयमाना अतिशयेन भवन्तो येऽशेषाः पुरुषार्थास्ते स्वरूपं यस्य परमानन्दस्य नचैवं सत्यपि यागानर्थक्यमित्याहुः । किन्त्विति । सकामानामस्माकमेवैतदुपपद्यते न तवेत्यर्थः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं प्रियव्रताग्नीध्रचरितमभिधायाग्नीध्रापत्यचरित्रमभिधित्सुस्तावन्नाभिचरितमाह । नाभिरिति तृतीयेन । अपत्यकामः सन्तानार्थी नाभिराग्नीध्रपुत्रः अप्रजयाविद्यमानसन्तानया मेरुदेव्या भार्यया सह समाहितचित्तः यज्ञपुरुषं यज्ञाराध्यं परमपुरुषमयजत् यज्ञैराराधितवानित्यर्थः ॥ १ ॥

श्रद्धया कर्तव्यविषयत्वरया विशुद्धान्तःकरणेन च तस्य नाभेर्यजतः सतः प्रवर्ग्यनामकेषु यागेषु प्रचरत्सु प्रवर्त्तमानेष्वनुष्ठीयमानेषु द्रव्यादयः सप्त योगाः उपायास्तेषामुपपत्त्या सम्पत्त्या दुरधिगमो दुष्प्रापोऽपि भगवान् द्रव्यं हविर्देशः स मेयजेतेति विहितः कालो वसन्तादिरूपः विधानं विधिरनुष्ठानप्रकारः भागवतेषु वात्सल्यं यस्य तस्य भावः तत्ता तया वत्सलतयेति पाठे भागवतेषु दयालुतया निजजनानां भक्तजनानामभिप्रेतार्थं विधित्सयाभिमतार्थनिष्पादनेच्छया हेत्वर्थे तृतीया अध्ययनेन वसतीति वत् गृहीतहृदयः कृतसङ्कल्पः शोभनाः प्रतीकावयवा यस्मिन् तदेव प्रपञ्चयति हृदयङ्गमं चित्तापहारिणं तत्र हेतुः मनसां नयनानां च आनन्दयन्तीत्यानन्दनाः नन्द्यादित्वात्कर्त्तरि ल्युः तैरवयवैरभिरामं सुन्दरमपराजितमकर्मवश्यमात्मानं दिव्यविग्रहमाविश्चकार प्रकटीचकार ॥ २ ॥

अथानन्तरं हेति विस्मये तमाविर्भूतं भगवन्तं कथम्भूतमाविष्कृतं भुजानां युगलद्वयं चतुष्टयं येन हिरण्मयं प्रकाशबहुलं पुरुषे विशिष्यते इति पुरुषविशेषस्तं पुरुषोत्तममित्यर्थः कपिशं पिशङ्गं कौशेयं कृमिकोशोत्थजन्तुजन्यमम्बरं बिभ्रतमुरसि विलसच्छ्रीवत्स एव ललाम चिह्नं यस्य सः दरवरः शङ्खः वनरुहं पद्मं क्षुरि चक्रममृतमणिः कौस्तुभः एवमादिभिरुपलक्षितं स्फुरत्किरणा ये प्रवरा मणयः तन्मयानि यानि मुकुटादीन्यङ्गानां भूषणानि तैर्भूषितमुपलभ्य दृष्ट्वा ऋत्विजः सदस्या गृहपतिर्यजमानस्तेषामितरेतरयोगे द्वन्द्वः ते निर्धना इवोमत्तं धनमुपलभ्य यथा बहुमानयन्ति तथा अर्हणेन पूजापुरःसरमवनतशीर्षाणः नम्रशिरसः कृतप्रणामा इत्यर्थः उपतस्थुः समीपमेत्य स्तुतवन्तः धातूनामनेकार्थत्वात्तिष्ठति धातुरत्र स्तुतौ वर्त्तते मन्त्रकरणकत्वाभावान्नोपान्मन्त्रकरण इत्यात्मनेपदम् ॥ ३ ॥

स्तुतिमेवाह । अर्हसीत्यादिना । परममङ्गलायनगुणकथनोऽसीत्यन्तेन निगदेन त्वदीयार्हणग्रहणोत्सुकमपरिपूर्णं मां कथं स्तुर्वीत शङ्कामपनुदन्त आहुः । हे अर्हत्तम ! परिपूर्णोऽप्यनुपथानां भृत्यानामस्माकमर्हणं मुहुः स्वयमेव स्वीकर्त्तुमर्हसि परिपूर्णस्य तव नास्मदर्हणग्रहणेन न्यूनतेति भावः न वयं कार्त्स्न्येन भवदीयगुणकथने प्रभवामः किन्त्वेकदेशकथन एवेति वदन्तः स्तुवन्ति नमोनम इत्यादिना ऋत इत्यन्तेन नमो नम इत्यादि तावदेवास्माकं सद्भिरुपशिक्षितं त्वत्स्वरूपस्वभावयोरानन्त्यात्कार्त्स्न्येन तत्कथनायोगात्केवलं नमो नम इत्येव कथनीयमिति सद्भिरुपशिक्षिता वयमित्यर्थः ॥ ४ ॥

एतदेवाहुः । कोऽर्हतीति । प्रकृतेर्गुणाः सत्त्वादयः तेषां व्यतिकरः परिणामः शब्दादिरूपः तद्विषया मतिर्यस्य अत एवानीशः कर्मपरवशः अर्वाक्तनाभिः स्वकार्यभूताभिर्नामादिभिरुपलक्षितः तत्र नाम देवमनुष्यादिनामधेयं रूपं संस्थानमाकृतिस्तद्द्रव्यजातिःप्रकृतिपुरुषयोः परस्य विलक्षणस्येश्वरस्य तव स्वरूपनिरूपणं स्वरूपशब्दः स्वभावादेरप्युलक्षणः कर्त्तुं को नाम पुमानर्हति सह्येतावन्मात्रमेवार्हति नाधिकमित्याह । सकलजनानां निकायः समूहस्तस्य वृजिनं पापं निरस्यन्तीति तथा शिवतमाः प्रवराश्च ते गुणास्तेषामेकदेशस्तस्य कथनाद्विना गुणलवकथनमेवार्हति नतु स्वरूपनिरूपणं स्वरूपस्वभावादीनामानन्त्यादिति भावः ॥ ५ ॥

यद्यपि समस्तपुरुषार्थस्वरूपस्य नित्यतुष्टस्य तव नानेन योगेनार्थस्तथापि "पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति" इति भक्तिपूर्वकाराधनस्य किञ्चिन्मात्रस्यापि त्वत्प्रीतिकरत्वं त्वयैव गीतमितीदं यजनं सूर्याय दीप इव किञ्चिदाराधनमात्रमित्याहुः । परिजनेत्यादिना अर्हतीत्यन्तेन परिजनैरनुरागेण विरचिताः शबलसंशब्दा गद्गदाक्षरास्तुतयः सलिलं विशुद्धं जलं शिलं व्रीह्यादिमञ्जरीखण्डः सितेति पाठे सिताकिसलयाः शुद्धपल्लवाः एवमादिभिः सम्भृतया सम्पादितया पूजया परितुष्यसि किल ॥ ६ ॥

तस्मादन्योऽर्थो नानयेत्याहुः । अनया इज्यया उरुभारभरयानेकाङ्गसम्भृतया भगवतस्तव समुचितं संमतमपेक्षितमर्थं प्रयोजनं नवै पश्यामः अत्र हेतुं वदन्तो विशिषन्ति आत्मनः स्वत एवानुसवनं सर्वदा अञ्जसा साक्षाद्बोभूयमाना अतिशयेन भवन्तो येऽशेषाः पुरुषार्थास्ते स्वरूपेण यस्य नानपेक्ष्यार्थोऽस्ति किन्त्विदमाराधनमात्रमित्याहुः । किन्त्विति । हे नाथ ! आशिषः पुरुषार्थानाशासानानामभीप्सतामस्माकमेतद्यजनं त्वदीयाराधनमात्रं भवितुमर्हति त्वत्सन्तोषजननद्वारास्मदुपयोग्येवेति भावः मात्रचा भगवतोऽननुरूपत्वं विवक्षितम् अननुरूपाराधनप्रकृत्या परमकारुणिकत्वं च व्यञ्जितम् ॥ ७ ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वभावतोऽव्यक्तोऽपि भगवान् भक्तवत्सलतया प्रत्यक्षोऽपि भवतीत्यतो हरौ भक्तिरेव कर्तव्येति विधीयतेऽस्मिन्नध्याये तत्र नाभिनाम्नो राज्ञोऽपत्यार्थं हरियजनप्रकारमाह । नाभिरिति । न प्रजा अपत्यं यस्याः सा तथा तया सह ॥ १ ॥

शुद्धभावेन शुद्धान्तःकरणेन शुद्धकर्मणा वा प्रवर्ग्येषु कर्मविशेषेषु प्रचरत्सु प्रवर्तमानेषु सत्सु दुरधिगमो दुर्ज्ञेयोऽपि द्रव्यदेशादीनामुपपत्त्या सम्पत्त्या भागवतेषु स्नेहातिशयेन च सुप्रीतो भगवान् गर्भवासादिदुःखैरपराजितं हृदयङ्गमं मनोहरं मनोनयनसुखकरं चारुतरकरचरणाद्यवयवोपेतमात्मानमाविश्चकार प्रत्यक्षीचकारेत्यन्वयः किङ्कार्यो भगवानित्यत उक्तम् । निजेति । योगी ध्यानम् ॥ २ ॥

निराकारं चेत्कथं ध्यानास्पदं स्यादित्यत आह । अथेति । आविष्कृतभुजयुगलद्वयं स्पष्टीकृतचतुर्भुजं हिरण्मयं "सुवर्णवर्णं कौशेयं कृमिकोशोत्थम्" इत्यभिधानम् विलसन् श्रीवत्स एव ललामं चिह्नं यस्य स तथा तं स्फूर्जामृतमणिगणप्रवराः स्फूर्जाः शाणोल्लीढा अमृतवद्धवलाश्च मणिगणश्रेष्ठाः एत एवादिर्येषां ते तथा तैः दरवरादिभिः शाणोत्तेजितधवलमणिगणश्रेष्ठादिभिश्चोपलक्षितं विशिष्टम् मुकुटं शिरस्त्राणं किरीटं मौलिः स्फुटकिरणानि फुल्लरश्मीनि प्रवराणि मणिमयानि मुकुटकिरीटादीनि स्फुटकिरणप्रवरमणिमयमुकुटकिरीटादीनि एतैरङ्गभूषणैर्भूषितमलङ्कृतमधना दरिद्रा उत्तमं धनं रत्नमुपलभ्य स बहुमानमर्हणेन पूजासाधनेन ॥ ३ ॥

अर्हसि मुहुरित्यारभ्येति निगदेनेत्यतः पूर्वतनो ग्रन्थ उपस्थानमन्त्रः हे अर्हत्तम ! अनुपथानां भृत्यानां नोऽर्हणां त्वमर्हसि ग्रहीतुमिति शेषः मुहुरित्यनेनार्हणस्य भूयस्त्वं सूचयति । किन्तदर्हणं तदाह । नम इति । तत्र दोषलेशो नास्तीत्याह । सदिति । सद्भ्यः पुरुषेभ्यः उपशिक्षितत्वात्सत्प्रशस्तं नमो नम इत्येतद्व्यतिरिक्तनामादिकीर्तनस्मरणाद्यर्हणं किञ्च क्रियत इति तत्राह । कोऽर्हतीति । नामरूपादिवेदनस्य श्रुत्यादिसिद्धत्वात्सत्कथमाक्षिप्यते इति तत्राह । प्रकृतीति । प्रकृतिगुणैः शब्दादिभिः व्यतिरेकः प्रभेदो यस्याः सा तथा तादृशी मतिर्यस्य स तथा अत एवार्वाकनमतिः बहिर्बुद्धिः तत्र कारणमनीश इति सर्वेश्वरस्य तव सन्निवृत्तौ सामर्थ्याभावात्त्वदीश्वरत्वमनुपहतमिति भावेनाह । प्रकृतीति ॥ ४ ॥

तर्हि किमपि नार्हतीत्यत उक्तम् । सकलेति । सकलजनानां निकायस्य वृजिनं दुःखं निरस्यन्तीति वृजिननिरसनाश्च शिवतमा मङ्गलतमाश्च प्रवराश्च ये गुणगणास्तेषामेकदेशकथनमन्तरेणान्यत्किमपि नार्हतीत्यर्थः ॥ ५ ॥

गुणगणकथनासक्तस्य हरिपरितोषः कया विधया स्यादत्राह । परिजनेति । हे परम ! परिजनैर्भृत्यजनैरनुरागेण विरचितः स्तवः स्तोत्रं तस्य लवः लेशस्तस्य संशब्दः कथनं सलिलं जलं किसलयः पल्लवस्तुलसी च दूर्वाङ्कुरश्च ते स्तवलवादयस्तैः सम्भृतया सम्पादितया पूजया परितोषं यास्यसि किलेत्यन्वयः ॥ ६ ॥

नित्यतुष्टस्य कदाचित्परितोषो भक्तानुकम्पोन्मुखत्वं नत्वप्राप्तप्राप्तिलक्षणा इत्याह । अथेति । उरुसम्भारलक्षणो भारो यस्याः सा तथा तया सम्भारः साधनं सरः समूहः ॥ ७ ॥

कुतोऽमुष्य नार्थ इति तत्राह । आत्मन इति । स्वत एवानुसवनं सर्वदाञ्जसामुख्यतो व्यतिरेकेणाभेदेनानुबोभूयमानोऽत्यन्तमनुभूयमानोऽशेषःपूर्णः पुरुषार्थः सुखमनुबोभूयमानपुरुषार्थः स एव स्वरूपं यस्य स तथा तस्य तर्हि किमर्थमाराधनं क्रियत इति तत्राह । किन्त्विति । किन्तु तवार्थो नास्त्येव तथापि हे नाथ ! आशिषः आशासानानां कामयमानानामेतत्कर्मलक्षणं यजनं तवाभिसंराधनमात्रं केवलमनुग्रहलक्षणसिद्धिसाधनं भवितुमर्हति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पितृलोक काम इति तस्य स्त्रिया बन्ध्यात्वं गम्यते ॥ १ ॥

वक्ष्यमाणमनोनयनानन्दनावयवाभिरामत्वेऽपि भागवतवत्सलतया सुप्रतीकः परमसुन्दरः ॥ २—३ ॥

अर्हसीत्यादि गद्यानामिति निगदेनाभिष्टूयमान इति त्रयोदशगद्येनान्वयः टीकायां निगदेन गद्यात्मकस्तोत्रेण स्तुवन्ति न तु वयं स्तोतुं शक्ता इति येन च स्तवेन तदङ्गीकुर्यास्तमपि कर्तुमित्यर्थः पन्थानं भक्तिमार्गमनुगतास्तत्सामीप्यमागताः ननु तमेव साक्षात् प्राप्ताः सकामत्वात् । तथा भूता ये तेऽनुपथास्तेषामपि पूजां मुहुरर्हसि स्वीकर्तुं योग्योऽसि तव कृपालुत्वादेव न तु वयं योग्या इति भावः तवोत्कर्षे विचार्यमाणे तु सर्व एवायोग्या इत्याहुः । नमोनम इति ॥ ४ ॥

तर्हि मदुत्कर्षोऽपि वर्ण्यतां तत्राहुः । कोऽर्हतीति । अर्वाक्नाभिः प्रपञ्चान्तर्गतसादृश्येन स्फुरन्तीभिरित्यर्थः नाम च रूपञ्च आकृतिश्च जातिः ताभिस्तव रूपनिरूपणं याथार्थ्येन प्रतिपादनं कर्तुं को नाम पुमान् अर्हति तत्र हेतुः । प्रकृतिगुणेति । प्रकृतिगुणानां व्यतिकर आसङ्गः तदीयनामादीनां तद्वर्तीतत्वे हेतुः । ईश्वरस्य परस्येति । ननु तादृशत्वमनुसन्धायैव निरूप्यताम् तत्राहुः । अनीश इति । रूपनिरूपणं याथार्थ्येन प्रतिपादनं तर्हि तादृशेन ज्ञानेन तन्निरूपणं कीदृशं किं माहात्म्यं वा तत्राहुः । एकदेशत्वं यत् किञ्चित्त्वं तदाभास इति यावत् तादृशत्वेऽपि सकलेत्यादिमाहात्म्योऽसावित्यर्थः । तस्मादत इति । तदेव निरूपयितुमर्हतीत्यर्थः । अथवा अर्वाक्नाभिः स्वल्पप्रमाणाभिः । अनन्तानां स्फुरणासंभवात् रूपनिरूपणं सम्यक् स्वरूपप्रतिपादनं किं तर्हि तत्राहुः । सकलेति । यद्वा अर्वाक्नाभिरिति कर्मोपासनादौ तत्तद्देवतासम्बन्धिनीभिरित्यर्थः । तर्हि केन निरूपणं स्यात् । तत्राहुः सकलेति ॥ ५ ॥ ६ ॥ ७ ॥

अव्यतिरेकेणाविच्छेद राहित्येन बोभूयमाना अतिशयेनाविर्भवन्त इत्यर्थः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तृतीये नाभिनेष्टोऽभूद्यज्ञे तुष्टोऽस्य नन्दनः ।
त्वत्समो मे सुतोऽस्त्वेतद्वरं श्रुत्वा हरिः स्वयम् ॥०॥

नाभिराग्नीध्रस्य प्रथमः पुत्रः ॥ १ ॥

प्रवर्ग्यसंज्ञकेषु कर्मसु प्रचरत्सु संपद्यमानेषु द्रव्यादिभिः सप्तभिः शुद्धैः सह योगः भक्तियोगस्तस्य उपपत्त्या निष्पत्त्या

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सुप्रतीकः सुन्दराङ्गः आत्मानं स्वदेहमाविश्चकार अपराजितं अन्यैर्वशीकर्त्तुमशक्यमपि गृहीतहृदय आकृष्टचित्तः मनो नयनानन्दनैरवयवैः श्रीमुखाब्जादिभिरभिराममतिरमणीयम् ॥ १ ॥

हिरण्मयं प्रकाशबहुलं पुरुषेषु विशिष्यत इति पुरुषोत्तम इत्यर्थः । कपिशेति तेन श्यामवर्णमिति बुद्ध्यते । पीतांशुकं वक्षसि लक्षितं श्रियेत्यत्र पीतांशुकपदेनात्र ध्वन्यते श्यामवर्णतेति भागवतामृतोक्तेः दरवरः शङ्खः वनरुहं पद्ममच्छूरि चक्रममृतमणिः कौस्तुभः ॥ २ ॥

अर्हसीत्यादिगद्यानामिति निगदेनाभिष्टूयमान इत्यनेनान्वयः । तं परिपूर्णोऽप्यस्माकमप्यर्हणमङ्गीकर्त्तुमर्हसि तत्र हेतुः अनुपथानां पन्था भक्तियोगस्तमनुवर्त्तमानानां नतु साक्षात्तं प्राप्तानां सकामत्वात् तदपि तव भक्तिसम्बन्धगन्धवत्यापि वात्सल्यादेवेति भावः ३ ॥

अस्माकमनुपथत्वेऽप्येतावदेव लक्षणमस्ति नाधिकमित्याहुः । नमो नम इति । सद्भ्यः सकाशात् शिक्षितं नतु पूजापरिचर्य्यास्तुत्यादिकं जानीम इति भावः ॥ ४ ॥

ननु विद्वांसो सद्भक्ताश्च यूयं सर्व्वं जानीथैव तत् किं स्तोतुं संकुचथेति तत्राहुः । कोऽर्हतीति । लोके हि मुखाद्यङ्गानां चन्द्राद्युपमाभिः स्तुतिर्भवति । तवतु अर्व्वाक्तनाभिः प्रपञ्चान्तर्गताभिः नाम इन्द्रनीलमणयादिरूपं तच्छ्यामनाकृतिस्तत्प्रतिमा ताभिः रूपस्य निरूपणमपि कर्तुं कोऽर्हति स्तुतेर्वार्ता तु दूरे वर्ततामित्यर्थः तव कीदृशस्य प्रकृतिपुरुषयोरपि परस्य नहि प्रकृतिपुरुषातीतं रूपं प्रकृतेन्द्रनीलमणयादिभिः सदृशी कर्तुमुचितमिति भावः । नन्वप्राकृतपदार्थैरेव मद्रूपमुपनयितां तत्राहुः । गुणानां यो व्यतिकरः प्रपञ्चः तस्मिन् एव मतिर्यस्य सः प्राकृतजीवलोकस्याप्राकृतपदार्थेषु बुद्धिप्रवेशासम्भवादिति भावः । अतस्तव भक्तवात्सल्यगुणानां केनाप्यंशेन कीर्तनमात्रं कर्तुमर्हतीत्याहुः ॥५॥ सकलेति । भक्तवात्सल्यमेवाहुः ॥ ५ ॥

परिजनैर्भक्तजनैरनुरागेण विरचिता शबलसंशब्दा गद्गदाक्षरस्तुतयश्च सलिलादयश्च तैरपि सम्पादितया शिलेति पाठे शिलं मञ्जरी हे परम ! ॥ ६ ॥

अस्माकन्तु भक्तिर्नास्तीत्यतः कथं ते परितोषो भविष्यतीत्याहुः । इज्यया यागेन उरुभारभरया अनेकाङ्गसमृद्ध्यापि भवतः समुचितमपेक्षितं प्रयोजनं नोपलभामहे ॥ ७ ॥

तत्र हेतुः आत्मनः स्वतएवानुषवणं प्रतिक्षणमेव अञ्जसा साक्षादेव अव्यतिरेकेण व्यतिरेकं विच्छेदं विनैव वोभूयमाना अतिशयेन भवन्तो येऽशेषाः फलभूता आनन्दास्ते स्वरूपं यस्यतवैवं सत्यपि यागानर्थकयमित्याहुः । किन्त्विति । सकामानामस्माकमेतदेव सराधनमात्रमिति अस्मत्कर्तृकमेव नतु वस्तुतोभवत्कर्म्मकमित्यर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आग्नीध्रपुत्रस्य नाभेः यज्ञपुरुषाराधनरूपं कर्म भगवद्रूपं पुरुषं च दर्शयति । तृतीयेन नाभिरिति ॥ १ ॥

तस्य नाभेः विशुद्धेन भक्तिभाविनेन भावेनान्तःकरणेन यजतः सतः प्रवर्ग्याख्येषु कर्मसु प्रचरत्सु क्रियमाणेषु द्रव्याद्युपपत्त्या दुरधिगमोऽपि दुष्प्रापोऽपि भगवान् भागवतवत्सलतयास्वानन्यजनहितकारित्वेन निजजनाभिमतार्थविधित्सया गृहीतहृदय आकृष्टचित्तः सुप्रतीकः शोभनावयवः सन् अपराजितमभक्तैर्बहुभिः साधनबलैर्द्रष्टुमनर्हमपि मनोनयनान्यानन्दयन्ति ये अवयवास्तैरभिरामं सुन्दरं हृदयङ्गममात्मानमाविश्चकार ॥ २ ॥

अथेति मङ्गलं हेतिहर्षे आविष्कृतं भुजानां युगलं येन हिरण्मयमप्राकृतज्योतिर्मयं पुरुषेषु विशिष्यते इति पुरुषविशेषस्तं पुरुषोत्तमं कपिशकौशेयाम्बरधरं कपिशं पीतं कौशेयाम्बरं बिभ्राणमुरसि विलसत् श्रीवत्स एव ललामं चिन्हं यस्य तं दरवरः शङ्खः वनरुहं पद्ममच्छूरि चक्रम् अमृतमणिः कौस्तुभः एवमादिभिरुपलक्षितम् स्फुटकिरणा ये प्रवराः श्रेष्ठाः मणयस्तन्मयानि यानि मुकुटादीन्यङ्गभूषणानि तैर्विभूषितमधना उत्तमधनं चिन्तामणिमिव उपलभ्य निकटं प्राप्य ऋत्विगादयः अर्हणेन अर्घ्येण सह बहुमानं यथा तथावनतशीर्षाणः कृतप्रणामाः उपतस्थुः तुष्टुवुः ॥ ३ ॥

हे अर्हत्तम ! अनुपथानामनुवर्त्तिनाम् अर्हणमर्घ्यं मुहुः अर्हसि स्वीकर्त्तुं योग्योऽसि तव स्वरूपगुणादीनां दुर्ज्ञेयत्वात्सद्भिर्नमो नम इत्येतावदेवोपाशिक्षितम् तदेवोपपादयन्ति । कोऽर्हतीति । प्रकृतिगुणानां व्यतिकरः संसारस्तस्मिन् मतिर्यस्य सः अर्वाक्तनाभिः प्रकृतिगुणकार्यभूताभिः नामरूपाकृतिभिरुपलक्षितः अत एव अनीशः प्रकृतिपुरुषयोः मायाजीवयोः परस्य तव स्वरूपनिरूपणं कर्त्तुं कोऽर्हति न कोऽपीत्यर्थः रूपस्येयत्ताशून्यत्वात् तर्हि गुणा एव वर्णनीया अत आहुः । सकलानां देवमनुष्यादीनां जनानां निकायस्य समुदायस्य वृजिनानि पापानि निरस्यन्तीति तथा ते शिवतमाः मङ्गलतमाः प्रवराः श्रेष्ठाश्च ये गुणगणास्तेषामेकदेशः लेशमात्रं तस्य कथनादृते तव स्वरूपनिरूपणं च कर्त्तुं कोऽपि नार्हतीति यावत् ॥ ४ ॥ ५ ॥

एवमनन्तस्वरूपगुणस्त्वं स्वरूपतो गुणतश्च ज्ञातुमशक्योऽपि परिजनैर्भक्तैः अनुरागेण विरचिताः शबलसंशब्दाः गद्गदाक्षराः सम्यक् शब्दाः त्वत्पराणि वाक्यानि सलिलानि च शिताः शुद्धाः किशलयाः पल्लवाश्च एवमादिभिः संभृतया संपादितया सपर्य्यया पूजया परितुष्यसि भक्तहितार्थं पूजां गृह्णासि स्वप्रयोजनार्थी तु तादृशपूजया कोऽथादिकं कुर्यादिति भावः ।

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ।

इति श्रीमुखवचनमत्रानुसन्धेयम् ॥ ६ ॥

अथेति प्रकारान्तरे उक्तप्रकारादन्यप्रकारे प्रयोजनार्थं पूजाग्रहणपक्षे तु भवतः आत्मनः स्वत एव अनुसवनं सर्वदा अञ्जसा साक्षादेव तत्रापि व्यतिरेकेण असाङ्कर्य्येण वोभूयमानाः अतिशयेन भवन्तो ये अशेषाः पुरुषार्थास्तेषां स्वरूपस्य कारणस्य अनया इज्यया उरुभारभरया अनेकाङ्गसमृद्ध्यापि समुचितमपेक्षितमर्थं प्रयोजनं नैव पश्यामः ॥ ७ ॥

किन्तु आशिषः पुरुषार्थान् आशासानानामभप्सिताम् एतत्कर्म अभिसंराधनमात्रमभितः सम्यक् त्वदाराधनमात्रं सर्वपुरुषार्थदातुस्तवानुग्रहे निमित्तमात्रं भवितुमर्हति न तव प्रयोजनार्थमित्यर्थः ॥ ८ ॥

तद्यथा बालिशानां स्वयमात्मनः श्रेयः परमविदुषां परमपरमपुरुषप्रकर्षकरुणया स्वमहिमानं चापवर्गाख्यमुपकल्पयिष्यन् स्वयं नापचित एवेतरवदिहोपलक्षितः ॥ ९ ॥

अथायमेव वरो ह्यर्हत्तम! यर्हि बर्हिषि राजर्षेर्वरदर्षभो भवान्निजपुरुषेक्षणविषय आसीत् ॥ १० ॥

असङ्गनिशितज्ञानानलविधूताशेषमलानां भवत्स्वभावानामात्मारामाणां मुनीनामनवरतपरिगुणितगुणगण परममङ्गलायनगुणगणकथनोऽसि ॥ ११ ॥

अथ कथञ्चित्स्खलनक्षुत्पतनजृम्भणदुरवस्थानादिषु विवशानां नः स्मरणाय ज्वरमरणदशायामपि सकलकश्मलनिरसनानि तव गुणकृतनामधेयानि वचनगोचराणि भवन्तु ॥ १२ ॥

किञ्चायं राजर्षिरपत्यकामः प्रजां भवादृशीमाशासान ईश्वरमाशिषां स्वर्गापवर्गयोरपि भवन्तमुपधावति प्रजायामर्थप्रत्ययो धनदमिवाधनः फलीकरणम् ॥ १३ ॥

को वा इह तेऽपराजितोऽपराजितया माययाऽनवसितपदव्यानावृतमतिर्विषयविषरयानावृतप्रकृतिरनुपासितमहच्चरणः ॥ १४ ॥

यदुहवाव तव पुनरदभ्रकर्तरिह समाहूतस्तत्रार्थधियां मन्दानां नस्तद्यद्देवहेलनं देवदेवार्हसि साम्येन सर्वान् प्रतिबोढुमविदुषाम् ॥ १५ ॥

भाषाटीका।

श्रीशुकदेवजी बोले नाभिराजाने पुत्रकी कामना से मेरुदेवी भार्या के सहित यज्ञपुरुष विष्णु भगवान् का यजन किया ॥ १ ॥

तिनके अत्यन्तश्रद्धासे निर्मलभाव से यज्ञकरने से प्रवर्ग्य कर्मों के प्रचार होने मे उत्तम द्रव्य देश का मन्त्र ऋत्विग् दक्षिणा विधि योग के संपत्ति से अपने भक्त जनों के मनोरथ सिद्ध करने मे चित्त के वश होजाने से यद्यपि भगवान् दुर्लभ हैं तथापि भागवतों में अतिकृपा होनेसे सुन्दर शरीरको धारण करके भक्तों के मन नयन के मोद करने वाले अवयवों से युक्त अपने शरीर को प्रगट करतेभये ॥ २ ॥

हे महाराज! भगवान् की जो मूर्त्ति नाभिराजा के आगे प्रघट भई उस मूर्त्ति में चार भुजा प्रकाश मान हैं वह मूर्ति तेजोमय है और पुरुषाकृति है ऐसे पिङ्गलवर्ण के रेशमी वस्त्र को धारण कीये हुये हैं वक्षस्थलमें श्रीवत्सका चिन्ह है और शङ्ख चक्र गदा पद्म वनमाला कौस्तुभादि मणि से शोभित हैं बडे तेज वाला मणिका मुकुट है कुण्डल कङ्कण कटिसूत्र हार केयूर नूपुर आदि सब अङ्गज भूषणों से मनोहर कान्ति हो रही है इसी से सब शरीर शोभित होरहा है तिसीसे ऋत्विक् सदस्य गृहपति ये सब मनोहर मूर्त्ति का दर्शन करके ऐसे होगये कि जैसे दरिद्रमनुष्य बहुतधन के मिलने से होवे बडा मान कर के मस्तकों को नम्र करके सब सामग्री से पूजन करते भये ॥ ३ ॥

ऋत्विक् कहने लगे हे पूज्यतम! हम लोग आपके भृत्य हैं आप परिपूर्ण हैं तौभी हम लोगों की पूजा को ग्रहण करने को वारम्वार योग्य हो हे प्रभो! हम लोगों का ऐसा सामर्थ्य नहीं है कि जो आप की स्तुति कर सकें आप का स्वरूप बडा दुर्ज्ञेय है तिससे महात्माओं से हम ने आपको नमस्कार करना मात्र शीखा है हे ईश्वर! जिन पुरुषों का चित्त संसार में आसक्त है वे क्या कभी आप के स्वरूप का निरूपण करसकते हैं प्रकृति पुरुष दोनों से पर आप ईश्वर हो तिन आप के स्वरूप का निरूपण नूतन नाम रूप आकृतियों से कौन पुरुष कर सक्ता है ॥ ४ ॥

सब मनुष्यों के समूह के पापों के नाश करने वाले कल्याणकारी आपके गुण गणों का एक देश के कथन से अधिक कोई नहीं जानता है ॥ ५ ॥

सेवकों के अनुराग से कीने प्रेम युक्त वचनों से समेत जल सफेद दूर्वा अङ्कुर तुलसी पल्लव इन्हो से करीहुई पूजा से भी हे परम! आप सन्तुष्ट होजाते हैं ॥ ६ ॥

और यह सिद्धि जो बडी भारी सामग्री सहित पूजा है तिस से भी आप का उचित मनोरथ को हम नहीं देखते हैं ॥ ७ ॥

अपने स्वरूप ही से आपको सब पुरुषार्थ अनायास से प्राप्त हो रहे हैं तब हे नाथ! जो लोग स्वयं मनोरथ को चाहते हैं वे क्या आपका आराधन कर सकेंगे ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

स्वोपयोगमेव प्रदर्शयन्ति। तद्यथेति। परमेभ्योऽपि हे परमपुरुष प्रकर्षयुक्तया करुणया। उपकल्पयिष्यन् सम्पादयिष्यन्। चकारात्कामितं च नापचितोऽनपचितोऽपूजित एव पूजानपेक्षत्वात्स्वयमेवोपलक्षितो दृष्टोऽसि इतरवत्सापेक्षवत् ॥ ९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यद्यपि त्वं वरान् दातुमाविर्भूतोऽसि तथापि हे अर्हत्तम ! राजर्षेर्बर्हिषि यज्ञे निजपुरुषाणां त्वद्भक्तानामस्माकमीक्षणविषयो भवान् यर्हि यदा आसत्तदा ह्ययमेव वरः सञ्जातः ॥ १० ॥

दर्शनस्य दुर्लभतामाहुः । असङ्गेन वैराग्येण निशितं यज्ज्ञानं स एवानलस्तेन विधूता अशेषा मला येषाम् अतो भवत इव स्वभावो येषाम् । तानेवाहुः । आत्मारामाणामेवम्भूतानां मुनीनामपि परममङ्गलायनं गुणगणकथनमेव नतु दर्शनं यस्य अतस्तैरनवरतं परिगणिता अभ्यस्ता गुणगणा यस्येति सम्बोधनम् ॥ ११ ॥

दर्शनेनैव कृतार्था अपि वरमेकं प्रार्थयन्ते । अथेति । स्मरणाय विवशानां त्वां स्मर्तुमशक्तानां नः ॥ १२ ॥

अन्यच्च प्रार्थनीयमस्तीत्याहुः । किञ्चेति । आशिषामैहिकानां स्वर्गापवर्गयोरपीश्वरं त्वामुपधावति प्रजायामेव पुरुषार्थ इति प्रत्ययो यस्य अधनो यथा फलीकरणं तुषकणादिकमाशासानो धनदमुपधावति ॥ १३ ॥

इदं च नातिचित्रमित्याहुः । इह संसारे तेऽपराजितया माययानवसितपदव्यालक्षितमार्गया पराजितः को वै न कोऽपि अतस्तयानावृतमतिः कः अत एव विषय एव विषं तस्य रया वेगास्तैरनावृता प्रकृतिर्यस्य स कः यद्यनुपासितमहच्चरणः अत स्त्वन्मायया मोहितस्यैवमाशंसा घटत इत्यर्थः ॥ ॥ १४ ॥

अदभ्रकर्तः ! हेबहुकार्यकारिन् ! अल्पीयसे कार्याय त्वं यद्यस्मादिह समाहूतोऽसि तत्र प्रजायामर्थे धीर्येषां मन्दानां तेषां नो यदेवहेलनमवज्ञानं तत्सर्वान्प्रति तव साम्येन हेतुना प्रतिबोद्धुं सोढुमर्हसि ॥ १५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेव स्पष्टयन्त आहुः । तदिति । हे परमपुरुष ! तत्तदा आराधनसमय एव नापचित एवानुरूपमनाराधित एव प्रकृष्टकरुणया स्वमहिमानं महत्त्वैश्वर्यादिरूपं मोक्षाख्यमाविर्भूतगुणाष्टकसम्पत्तिरेव हि मोक्षप्रकारादस्मत्समीहितं च फलमुपकल्पयिष्यन्निर्वर्त्तयिष्यन् त्वमितरवत्परिपूर्णोऽप्यपरिपूर्ण इव नोऽस्माभिरिह यागे यथा यथावदुपलक्षितः दृष्टोऽसि नः कथम्भूतानामात्मनः स्वस्य परमुत्कृष्टं श्रेयः पुरुषार्थमविदुषामत एव बालिशानाम् ॥ ९ ॥

परमकारुणिकात्समस्तपुरुषार्थस्वरूपाद्भगवतो राज्ञा प्रार्थनीयस्य पुत्रस्य क्षुद्रपुरुषार्थतामाविष्कर्तुमतिदुर्लभस्य भगवद्दर्शनस्यैव कैमुत्यनयेन निरतिशयपुरुषार्थतामाहुः । अथेति । अर्हत्तम राज्ञोऽभिमतान् दातुं यद्यप्याविर्भूतोऽस्यथाप्ययमेव वरःसञ्जातः कोऽसावित्यत्राहुः । यर्हि वाव । यदा हि राजर्षेर्बर्हिषि यज्ञे वरदश्रेष्ठो भवान्निजजनानां पुरुषाणां त्वद्भक्तानामस्माकमीक्षणविषयः आसीदिति यत् असङ्गेन वैराग्येण निशितं यज्ज्ञानं तदेवानिलस्तेन विधूता अशेषा मलाः येषामात्मारामाणां प्रकृतिविविक्तब्रह्मात्मकस्वात्मयाथात्म्यानुसन्धानपराणां भगवत्स्वभावानां भगवत्समानधर्माणां मुनीनां कर्त्तरि षष्ठी मुनिभिरनवरतं सर्वदा परिगुणिताः गुणगणाः यस्य तस्य सम्बोधनमीदृशस्य तव

गुणगणकथनमेव परममङ्गलायनं निरतिशयश्रेयःसाधनं किमुत्वद्दर्शनमित्यर्थः ॥ १० ॥ ११ ॥

यतः त्वद्गुणकथनं परममङ्गलायनमतस्तदेवायुक्तास्वपि दशासु नो भूयादिति प्रार्थयन्त आहुः । अथेति । अथ ननु भगवतः क्षुदादिवियुक्तदशासु तत्र तत्र स्खलनं चलनं पतनस्योक्तत्वात् दुरवस्थानं दुःखितेनावस्थानमादिशब्देनाशुचित्वाद्यवस्थान्तरसङ्ग्रहः तथा ज्वरदशायां मरणदशायां च परवशानामस्माकं श्रीमतस्तव चरणारविन्दस्मरणाय चरणारविन्दं स्मर्तुं सकलानां कश्मलानां निरसनानि निवर्त्तकानि गुणकृतनामानि नामधेयानि कल्याणगुणप्रवृत्तिनिमित्तकानि तव नामानि वचनगोचराणि उच्चारणविषयाणि भवन्तु ॥ १२ ॥

इदमिदानीं राज्ञा प्रार्थनीयमस्तीत्यावेदयन्त आहुः । किञ्चेति । अयं राजर्षिर्नाभिः पुत्रं कामयमानः तत्रापि भवादृशीं त्वत्सदृशीं प्रजामाशासानः आशिषामैहिकपुरुषार्थानां स्वर्गापवर्गयोश्चेश्वरं प्रदातारं भगवन्तं षाड्गुण्यपूर्णं त्वां प्रजायामेव पुरुषार्थ इति प्रत्ययो यस्य सः उपधावति अनुवर्तते भजतीत्यर्थः तत्र दृष्टान्तः यथाधनो दरिद्रः फलीकरणं तुषकणादिकमाशासानो धनदं कुवेरमुपधावति ॥ १३ ॥

इदं च नातिचित्रमित्याहुः । इह संसारेऽनुपासितमहच्चरणो यदि भवेत् उपासितमहच्चरणं जनं विनेत्यर्थः तया अपराजितया कर्मवश्यैरनभिभूतया अनवसितपदव्या अलक्षितमार्गया सत्पथतिरोधायिकया अलक्षितः को वै न कोऽप्यतस्तयानावृतमतिकः अत एव विषया एव विषं तस्य रयो वेगः तेनानावृता प्रकृतिर्यस्य सः अतस्त्वन्मायामोहित स्यैवमाशंसा घटत इत्यर्थः।१४।

अतिदुर्लभसमस्तपुरुषार्थभूतेस्तव स्वपुत्राशंसार्थमाह्वानं हेलनमिवातस्तत् क्षन्तुमर्हसीति विज्ञापयन्त आहुः । यदुहवावेति । हे अदभ्रकर्त्तः ! बहुकार्यनिष्पादक ! उदारव्यापारकारिन्नवितथकर्तः सत्यसङ्कल्प इतिवार्थः हे देवदेव देवानां ब्रह्मादीनामपि देव हे सर्वात्मन्नल्पीयसे प्रयोजनाय यद्यस्मादवाहूतोऽसि ततस्तदर्थधियां तत्र प्रजायामर्थधीः पुरुषार्थबुद्धिर्येषामत एव मन्दानां नोऽस्माकं देवहेहलनं देवस्य तव हेलनमाह्वानरूपमवज्ञानं तव साम्येन हेतुना प्रतिबोद्धुं सोढुमर्हसि ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्कथमत्राह । तदिति । हे परमपुरुष ! यत्तत्प्रमेयं यथा तथा प्रतिपादयामस्तथाहि परं परमं श्रेयोऽविदुषामज्ञानतामत एव बालिशानां शिशुवत्स्थितानां नः सम्बन्धिन्या प्रकृष्टया कृपया चशब्द एवार्थे अपवर्गाख्यं संसारमोक्षलक्षणं महिमानमुपकल्पयिष्यन् समर्थयमानः स्वयत्नोपचितः स्वानुग्रहलक्षणयत्नायत्त एव इतरवत्परप्रयत्नोपचितवदुपलक्षितः प्रकाशित इति यस्मात् ॥ ९ ॥

अथ तस्मात् हे अर्हत्तम ! परं फलप्राप्त्यनन्तरमपि त्वामर्हयामः त्वद्विषयामर्हणक्रियां प्रार्थयामहे कस्मादेतत्प्रार्थनमित्याशङ्क्य फलदर्शनादित्याहुः । यर्हीति । स्वभक्तानां दृष्टिविषयं आसीदिति यर्हि यस्मात्तस्मादिति शेषः बर्हिषि यज्ञे ॥ १० ॥

मुनीनामिति षष्ठी तृतीयार्थे मुनिभिर्नित्यं परिगणितानां

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गुणगणानां परममङ्गलायतनं स्वरूपसुखविषयं कथनं कीर्तनं यस्य स तथा असङ्गेन निशितं तेजितं यज्ज्ञानं तदेवानलोऽग्निस्तेन विधूतानि निर्मूलितानि समस्तरागादिमलानि येषां ते तथा तेषां भग [१] वत्स्वभावानां सात्त्विकानाम् ॥ ११ ॥

किमत इति तत्राह । अथेति । यत एवममितमाहात्म्यसमुद्रोऽथ तस्मादस्माकं तव गुणकृतनामधेयानि श्रीमच्चरणारविन्दस्मरणाय वचनगोचराणि भवन्त्वित्यन्वयः ज्ञानानन्दादिगुणाः कंसहननादिकृतानि नारायणादिनामानि च सदा प्रसम्भवेऽप्येषु सर्वथेति भावेनाहुः । स्खलनेति । न केवलं तात्कालिकफलदानि किन्तु पारत्रिकफलदानीत्याशयेनोक्तम् । ज्वरेति । दुरितसद्भावे कथं पारत्रिकफलदानि स्युरित्यत उक्तम् । स्वकलेति । दुःखस्थानं प्रवासादिकम् ॥ १२ ॥

अन्यच्च प्रयोजनमस्तीति विज्ञापयन्ति । किञ्चेति । ऐहिकीनामाशिषामीश्वरं न केवलमासामीश्वरं किन्तु स्वर्गापवर्गयोरपीति उपधावति । शरणमाप्नोति पुरुषार्थप्रदं त्वां प्राप्य प्रजालक्षणं तुच्छफलमाकाङ्क्षितं कथमिति तत्राह । प्रजायामिति । अर्थप्रत्ययः पुरुषार्थबुद्धिः अत्र दृष्टान्तमाह । धनदमिति । फलीकरणं क्षुद्रकणं पललं (२) वा न कोऽपि याचत इत्यर्थः ॥ १३ ॥

तर्हि कीदृश ईहत इति तत्राह । अपराजितेति । हे अपराजित ! हरेः प्रसादं विना त्वपराजितया मायया मोहकशक्त्यानवसितमनिश्चितं यत्पदं स्वरूपं तत्त्वलक्षणं तस्य ध्याने व्यावृत्ता मतिर्यस्य स तथा कुतस्तत्राह । अनुपासितेति । तत्रापि कारणमाह । विषमेति । प्रकृतिः स्वभावः एवं विध ईहत इत्यर्थः अधनो दरिद्रः धनमपेक्षिताशेषपुष्टिं ददातीति धनदः ॥ १४ ॥

तं मुनयः स्वोक्तमधिकमिति मन्वाना भगवत्त्वमां प्रार्थयन्ते । यदुहेति । हे अदभ्रकर्तरनल्पकर्तः दूर्वाङ्कुरा [३] र्चितस्य हरेरनाद्यनन्तकालीनानिर्दोषानन्दरूपमुक्तिदत्वाद्देवदत्तमेरुस्वर्णस्य विष्णुमित्रस्य काकिणिकाधनदत्वदर्शनाच्चेति राज्ञः पुत्रार्थमेवेह समाहूत इति यत्तदर्थधियां तत्प्रयोजनबुद्धीनां मन्दानां स्तुत्यादावपटूनां राज्ञोऽर्थे यत्तवाह्वानं विष्णवायाहीति तद्धेलनमवज्ञानं साम्येन तत्तद्वस्तुयोग्यतादर्शनेन प्रतिबोद्धुं क्षन्तुमर्हसीत्यन्वयः ज्ञानपूर्वाह्वानञ्चेत्कथं क्षान्तिवचनमित्यत उक्तमविदुषामिति ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

स्वस्य महिमानमैश्वर्य्यसम्पत्तिम् अपवर्गाख्यमिति तस्यैवापवर्ग इति संज्ञेत्यर्थः । उपकल्पयिष्यन् साक्षात्कारयिष्यन् नापचित एवेति । पूजासम्पादकभक्त्यभावादिति भावः ॥ ९ ॥

अथायेत्यत्र अथ हायेति क्वचित् निजपुरुषेक्षणविषयोऽपि भवानिह बर्हिषि यज्ञमात्रे यर्हि यदासीदयमेव वर इत्यर्थः ॥ १० ॥ ११ ॥

गुणकृतानि च लीलानामधेयानि च ॥ १२ ॥

यजमानस्य स्वापराधमपि निवेदयितुं सङ्कुचन्तः परमात्मीयत्वेनाभिप्रायेण च तन्निवेदनीयमेव निवेदयन्ति । किञ्चेति । प्रथमं तावत् प्रजामाशासानः आशिषामैहिकानां स्वर्गापवर्गयोरपीश्वरं त्वामुपधावति यथा फलीकरणमाशासानो धनदमुपधावति तद्वदिति परममौढ्यं न च तावतैव स्थितिः किन्तु भवादृशीमाशासान इति धार्ष्ट्यं चेत्यर्थः ॥ १३ ॥

अनुपासितमहच्चरण इति सम्प्रति तेनोपास्यमानं स्वमपि तुच्छी कुर्वन्ति ॥ १४-१९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ॥

ननु तर्हि कथं सन्तुष्टोऽहं युष्मत्प्रत्यक्षीभूतोऽस्मीति तत्राहुः तत्तस्मात् यथा बालिशानामज्ञानामपि समीपमनाहूतोऽप्यपूजितोऽपि विज्ञः कृपावशात्तानुद्धर्तुमायाति तथैव त्वं परमेश्वरोऽपि परमः पुरुषः प्रकर्षयुक्तया निरुपाधिकया करुणया स्वमहिमानं स्वमहैश्वर्य्यं तदनुभवमित्यर्थः अपवर्ग इत्याख्या यस्य तं चकारात् कामितं वस्तु च उपकल्पयिष्यन् दास्यन् स्वयं नापचित एवास्मद्भक्त्यभावादपूजित एव इतरवत् यज्ञकौतुकदर्शी इतरजन इव ॥ ९ ॥

यथा तथा भवतु यूयन्तु वरं वृणुथेति चेत तत्राहुः । अथ हायमिति । निजपुरुषाणां स्वभक्तानामीक्षणविषयोऽपि भवान् यर्हि यदा राजर्षेर्बर्हिषि यज्ञेऽप्यासीत् आविरभूदयमेव वर इत्यन्वयः ॥ १० ॥

सर्व्वैरति दुर्लभात् त्वद्दर्शनादप्यधिको वरो वरणीय इति मूढानामेव मतं न तु विज्ञानामित्याहुः । असङ्गेन वैराग्येण निशितं यज्ज्ञानं स एवानलस्तेन निर्धूताशेषसकामत्वमलानां अत एव स्वीयो भावो दास्यादिर्येषामत एवात्मनि त्वय्येव आसक्त्यैव रममाणानां मुनीनां परममङ्गलायनं गुणगणकथनमेव न तु दर्शनं यस्य अतस्तैरनवरतं परिगुणिता अभ्यस्ता गुणगणा यस्येति सम्बोधनम् ॥ ११ ॥

अस्माकं त्वस्थिरमनसां मन्दानामेतावत्तु भवत्वित्याहुः । अथेति । त्वद्दर्शनप्राप्त्यनन्तरमित्यर्थः स्मरणाय विवशानां त्वां स्मर्तुमसमर्थानाम् ॥ १२ ॥

किञ्चेति । निवेदयितुमयोग्यमप्यावश्यकत्वेनैकं निवेदयाम एवेत्यर्थः । अयमस्मद्यजमानो राजर्षिरपत्यकामः अपत्यं तु देवतान्तरयजनेनापि भवति तदपि त्वां भगवन्तमुपधावति ननु तत्रप्यहं स्वर्गापवर्गादिकमपि दास्यामीत्याशङ्कायामाहुः । आशिषामैहिकानां स्वर्गापवर्गयोरीश्वरमप्युपधावति अथ च प्रजायामेव अर्थः पुरुषार्थः इति प्रत्ययो नत्वपवर्गादिषु यस्य स इति मौढ्यम् अधनो यथा फलीकरणं तुषकणादिकमाशासानो धनदमुपधावतीति तत्रापि प्रजां भवादृशीमाशासान इति धार्ष्ट्यञ्च पश्येति भावः ॥ १३ ॥

नचास्य दोष इत्याहुः । को वा इति । इह संसारे अपराजितया केनापि पराजेतुमशक्यया अनवसितपदव्या केनाप्यलक्षितमार्गया मायया कोवा अनावृतमतिः न कोऽपीत्यर्थः तं तव कीदृशस्य पराजितः मायां पराजयत इति पराजित् कियन्तम तस्य अनुपासितेत्युपासितमहच्चरण एवैको मायां निस्तरति राजर्षिरयन्तु न तादृश इति भावः ॥ १४ ॥

(१) भगवति स्वयोग्यो भावो भक्तिर्येषान्ते तथा ।

[२] पललं तिलचूर्णे चेतिमेदिनी ।

[३] अनल्पकर्तृत्वमुपपादयति ।

॥ श्रीशुक उवाच ॥

इति निगदेनाभिष्टूयमानो भगवाननिमिषर्षभो वर्षधराभिवादिताभिवन्दितचरणः सदयमिदमाह ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यजनस्य सकामत्वलक्षणमपराधं क्षमयन्तः स्तोत्रमुपसंहरन्ति । यदि हेति । हे अदभ्रकर्तः ! अनल्पकारिन् ब्रह्मादिदुर्लभं त्वद्दर्शनमपि सकामेभ्योऽप्यस्मभ्यमदा इति भावः । यत् त्वमिह समाहूतस्तत्तेन अर्थधियां सकामानामस्माकं यद्देवस्य तव हेलनमवज्ञानं तत् प्रतिबोढं सोढुमर्हसि तत्र हेतुः हे देवदेव सर्व्वान् प्रति यत्तव साम्यं तेन ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अतोऽस्मदाराधनं निमित्तीकृत्य अस्मत्प्रयोजनार्थमाविर्भूतोऽसीत्याहुः । तद्यथेति । हे परम ! परमपुरुषः पुरुषोत्तमः भवान् परं मोक्षाख्यं श्रेयोऽविदुषामतो यथायथावत् बालिशानामसुखे सुखमानिनां बुभुक्षूणामप्यस्माकं तत्तस्मादाराधनमात्रेण आत्मनः प्रकृष्टया करुणया अपवर्गाख्यं स्वमहिमानं स्वज्ञानं स्वसाधर्म्यं चकारात्कामितं च स्वयमुपकल्पयिष्यन् सम्पादयिष्यन् नापचितः अस्माभिरनुपकृतः पवेतरवदुपकृतवदुपलक्षितो दृष्टोऽसि ॥ ९ ॥

तत्र मुख्यकामितं त्वद्दर्शनमित्याहुः । अथायमिति ॥ १० ॥

भगवद्दर्शनस्य दौर्लभ्यमाहुः । असङ्गेति । हे अनवरतपरिगुणितगुणगण ! अनवरतैर्नित्योत्सुकैः परिगुणिता अभ्यस्ता गुणगणा यस्य एवम्भूत ! असङ्गेन कुटुम्बादिसङ्गत्यागेन निशितं यज्ज्ञानं तदेवानलस्तेन विधूताशेषमलानां भवति भजनीये स्वभावोऽनन्यनाथत्वलक्षणो येषां तेषामत एव आत्मनि त्वयि भजनीये रमणशीलानामेवं विधानां मुनीनामपि परममङ्गलायनं गुणगणकथनमेव नतु दर्शनं यस्य सोऽसि ॥ ११ ॥

हरिनामकीर्तनादीनां भक्तिभेदानां दुर्लभत्वं सूचयन्तो हरिनामकीर्तनरूपां भक्तिं प्रार्थयन्ते । अथ कथमिति ॥ १२ ॥

प्रस्तुतं कामितं प्रार्थयन्ते । किञ्चेति । आशिषामैहिककामानां धनधान्यादीनां स्वर्गापवर्गयोश्चेश्वरं दातारं त्वामुपधावति प्रजायां पुत्रे अर्थः पुरुषार्थः इति प्रत्ययो यस्य सः फलीकरणं तुषकणादिकमाशासानोऽधनो यथा धनदमुपधावति तद्वत् ॥ १३ ॥

त्वन्मायया मोहितानां पुत्रादावर्थप्रत्ययो युक्त एवेत्याहुः । क इति । अनवसितपदव्या दुर्गममार्गया ते मायया गुणमय्या शक्त्या कः अनावृतमतिः अनावृतज्ञानः अत एव अपराजितश्च इति कारणेनावरणं दर्शितः कार्येणावरणं दर्शयति विषयः शब्दादिरेव विषं तस्य रयैर्वेगैरनावृता प्रकृतिर्यस्य स च कः । उपासितमहच्चरणं विना न कोऽपीत्यर्थः ॥ १४ ॥

अल्पीयसि प्रयोजने समाहूतानं तव हेलनं कृतं तत्क्षमस्वेत्याहुः । हे अदभ्रकर्त्तः ! अनल्पकारिन् ! अल्पीयसे प्रयोजनाय यद्यस्माभिरिह यज्ञे समाहूतोऽसि तत्र अर्थधियामर्थे पुत्रनाम्नि धीर्येषां तेषां नोऽस्माकं यद्देवहेलनं तत्सर्वान् प्रति तव साम्येन हेतुना हे देवदेव! प्रतिबोढुमर्हसि ॥ १५ ॥

भाषाटीका ।

हम लोग मूर्ख हैं अपने परम कल्याण को नहीं जानते हैं हे परम पुरुष परम करुणा से आपकी महिमा मोक्ष नामक फल देने के लिये आप पूजित न होकर भी और सकाम देवता से इहां देख पड़े हो ॥ ९ ॥

हे अर्हत्तम यही एक हमारा वर है जोकि आप राजर्षि नाभिके यज्ञ में वर दातों में श्रेष्ठ होकर निज पुरुषों के नेत्र गोचर भये हो ॥ १० ॥

संसार के वैराग्य से तीक्ष्ण ज्ञानरूपी अग्निसे जिनके सब मल नष्ट होगये हैं आपके सदृश जिनके स्वभाव हैं जो आत्माहींमे रतहैं ऐसे मुनिगणों के निरन्तर गान करने के योग्य परममङ्गल दायक गुणों से आपका गान होता है ॥ ११ ॥

हे प्रभो ! अब हम लोगोंको किसीप्रकार ठोकर लगकर गिरने में छींकनेमें जमुहाई में कोई दुर्दशा में परवस होजाने से भी ज्वरमें मरण के समय में भी सब पापों के नाश करने वाले आप के गुणों के नाम हमारे वचन के या स्मरण के गोचर होवैं यही प्रार्थना है ॥ १२

और भी यह नाभिमहाराज पुत्रकी कामनावाले होकर आपसरी के पुत्रको चाहते हैं आपका पूजन करते हैं आप सब संपत्तियों के तथा स्वर्ग मोक्ष के स्वामी हो जैसे कुबेर के पास कोई धान के छिलका मांगे तैसे इन की केवल भोगार्थ में बुद्धि है ॥ १३ ॥

संसार में ऐसा कौन है कि जो महापुरुषों के चरणों के विना उपासना किये विषयरूप विषसे जिसकी बुद्धि भ्रान्त नहोगई हो और जिस के मार्गको कोई नहीं जान सकता है वह सबको जीतने वाली है उस को कोई नहीं जीतसक्ता है उस माया के वस न हुआ ऐसा कौन होगा कोई नहीं है ॥ १४ ॥

हे प्रभो ! सकल कर्ता आपको जो हम लोगोंने इहाँ बुलाया है सो हम लोग प्रयोजन मात्र में बुद्धिरखने वाले हैं यह जो आपकी अवज्ञा है तिसको आप अपनी समदृष्टि से सहन कीजिये हम लोगोंका भार आपको उठाना होगा ॥ १५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इति निगदेन गद्यात्मकस्तोत्रेण वर्षधरो भारतवर्षपतिर्नाभिस्तेनाभिवादिता ये ऋत्विजस्तैरभिवन्दितौ चरणौ यस्य ॥ १६ ॥

॥ श्रीभगवानुवाच ॥

अहो बताहमृषयो भवद्भिरवितथगीर्भिर्वरमसुलभमभियाचितो यदमुष्यात्मजो मया सदृशो भूयादिति ममाहमेवाभिरूपः कैवल्यादथापि ब्रह्मवादो न मृषा भवितुमर्हति ममैव हि मुखं यद्द्विजदेवकुलम् ॥ १७ ॥

तत आग्नीध्रीयेऽशकलयाऽवतरिष्याम्यात्मतुल्यमनुपलभमानः ॥ १८ ॥

॥ श्रीशुक उवाच ॥

इति निशामयन्त्या मेरुदेव्याः पतिमभिधायान्तर्दधे भगवान् ॥ १९ ॥

बर्हिषि तस्मिन्नेव विष्णुदत्त ! भगवान् परमर्षिभिः प्रसादितो नाभेः प्रियचिकीर्षया तदवरोधायने मेरुदेव्यां धर्मान् दर्शयितुकामो वातरशनानां श्रमणानामृषीणामूर्ध्वमन्थिनां शुक्लया तनुवाऽवततार ॥२०॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे
पारमहंस्यां संहितायां वैयासिक्याम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

असुलभत्वे हेतुः ममाहमेवाभिरूपः सदृशः कैवल्यादद्वितीयत्वात् द्विजेषु देवा इव ये ब्राह्मणास्तेषां कुलम् ॥ १७ ॥

आग्नीध्रीये नाभौ ॥ १८ ॥

पतिं नाभिम् ॥ १९ ॥

हे विष्णुदत्त! तस्यावरोधायनेऽन्तःपुरे मेरुदेव्यां शुक्लया शुद्धसत्त्वरूपया मूर्त्याऽवततार केषां धर्मान् वातरशनानां दिग्वाससां पाषण्डव्यावृत्त्यर्थमाह । श्रमणानां तपस्विनामृषीणां ज्ञानिनां ऊर्ध्वमन्थिनां नैष्ठिकब्रह्मचारिणाम् ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

इत्येवं निगदेन गद्यात्मकसूक्तेनाभिष्टूयमानो भगवान् देवोत्तमः वर्षधरः भारतवर्षधारको नाभिस्तेनाभिवादितौ ऋत्विग्भिरभिवन्दितौ चरणौ यस्य सः सदयं दयासहितमिदं वक्ष्यमाणं वाक्यमाह ॥ १९ ॥

अहो ऋषयः! अवितथगीर्भिः सत्यवाग्भिर्भवद्भिरसुलभं दुर्लभं वरं प्रत्यहमभियाचितः प्रार्थितः वतेत्याश्चर्ये कोऽसौ दुर्लभो वरस्तत्राह । मया सदृशः आत्मजो भूयादिति कथं तस्य वरस्य दौर्लभ्यं तत्राह । ममाहमेवाभिरूपः सदृशः कुतः कैवल्यात्प्रकृतिपुरुषविलक्षणस्वभावात् "नतत्समश्चाभ्यधिकश्च दृश्यते नत्वत्समोस्त्यऽभ्यधिकः कुतोऽन्य" इत्युक्तरीत्या प्रकृतिपुरुषविलक्षणास्समाभ्यधिकरहितस्य सदृशान्तराभावान्मत्सदृशरूपो वरोऽति दुर्लभ इत्यर्थः यद्यप्ययं वरोऽतिदुर्लभस्तथापि हि यस्माद्द्विजदेवकुलं द्विजा एव देवास्तपोविद्यादिभिर्दीव्यमानास्तेषां कुलं ममैव हि मुखं "ब्राह्मणोऽस्य मुखमासीदिति,, उक्तरीत्या मुखं ततो ब्रह्मवादः ब्रह्मकुलस्य मन्मुखभूतस्य वादो वचः मृषा मिथ्या न भवितुमर्हतीत्यहमेव मत्सदृशमन्यमनुपलभमानः कलयांऽशेनाग्नीध्रीये नाभिसम्बन्धिनि क्षेत्रे मेरुदेव्यामवतरिष्यामीत्येवं मेरुदेव्याः निशामयन्त्याः शृण्वन्त्या सत्याः तत्पतिं नाभिं प्रत्यभिधायोक्त्वा भगवान् यज्ञपुरुषोऽन्तर्दधेऽन्तर्हितवानित्यर्थः ॥ १७—१८—१९ ॥

हे विष्णुरात ! राजन् तस्मिन् बर्हिषि यज्ञे एवं महर्षिभिः प्रसादितः आराधितो भगवान्नाभेः प्रियमिष्टं कर्तुं निर्वर्त्तितुमिच्छया तदवरोधायने नाभेर्भार्यायां मेरुदेव्यां शुक्लया सत्त्वप्रधानया तन्वावततार किं कर्तुंकामः वातरशनानां दिग्वाससां पाषण्डव्यावृत्त्यर्थमाह । श्रमणानां तपस्विनामृषीणां ज्ञानिनामूर्ध्वमन्थिनां नैष्ठिकब्रह्मचारिणां धर्मान् दर्शयितुकामः अयमंशावतारः कपिलः तावन्मात्रकृत ईश्वरत्वव्यपदेशः ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

निगदेन महिमाविष्कर्तॄणां स्तुतिवचनेन अनिमिषाणामृषभो देवानां श्रेष्ठः वर्षधराभिवन्दितचरणः [१] नाभिवान्दितश्रीपादः ॥ १९ ॥

किमाहेति । तत्राह । अहो इति । अहो विस्मयोऽयं वत तुष्टोऽहं "अहो हि विस्मय" "इतियादवः "वताभिमन्त्रणे भूते तोषे खेदे कृपायां चेति" च हे ऋषयो ! वितथगीर्भिः सत्यवचनैः भवद्भिर्मया सदृशः आत्मजो भूयादिति यं वरमभियाचित इतियदेतदसुलभं तत्कुतोऽत उक्तम् । ममेति । अभिरूपः प्रतिरूपः एतदपि कुत इत्यत उक्तम् कैवल्यादिति । अद्वितीयत्वात् नन्वेषामृषित्वं मुनित्वं च गतमेतदद्वितीयत्वज्ञानाभावादिति चेन्न भगवदुक्त्या

[१] भरतखण्डाधिपो नाभिः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

लोकज्ञापनपरत्वादर्थनायाः नत्वद्वितीयत्वाज्ञानात्तदुक्तम्। "नास्ति विष्णोः समम्" इति जानन्तोऽप्यृषयः सदा तज्ज्ञापनाय लोकानामन्ये च प्रार्थयन् सममिति अन्ये कश्यपादयोऽपि हरिणा समं पुत्रमर्थयन्त इत्यर्थः एवं चेद्भगवदुक्तमपि विद्वदङ्गीकृतमपहासकमिति तत्राह। अथापीति। कर्तव्यत्वे हेतुमाह। ममैवेति। द्विजदेवानां ब्राह्मणश्रेष्ठानाम् ॥ १७ ॥ १८ ॥

निशामयन्त्याः पश्यन्त्याः ॥ १९ ॥

बर्हिषि यज्ञे हे विष्णुरात! हे विष्णुदत्त! परीक्षित्तस्य नाभेरवरोधजने भार्याजने वातरशनानां वायुवस्त्राणां दिगम्बराणामित्यर्थः श्रमणानां परमहंसानां परमहंसाश्रमानुष्ठानवताम् ऊर्ध्वमन्थिनामूर्ध्वरेतसामृषीणां धर्मान् दर्शयितुकामो हरिः शुक्लया शुचं लापयति नाशयति शुकं ज्ञानं लाति रातीति वा "शुकगतौ" इति धातुः गतिर्ज्ञानमतिशयितसुखज्ञानत्वाद्वा शुक्ला तया तनुवा देहेन ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

वातवसनानां सन्न्यासिनां श्रमणानां वानप्रस्थानामृषीणां तत्तन्मन्त्रदर्शनमययाज्ञिकानां गृहस्थानामित्यर्थः ऊर्ध्वमन्थिनां ब्रह्मचारिणामपि तच्चरिते तस्य तस्य दर्शयिष्यमाणत्वात् ॥ २० ॥

इतिश्रीमद्भागवते महापुराणे तृतीयस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

निगदेन गद्यात्मकस्तोत्रेण वर्षधरो भारतवर्षपतिर्नाभिस्तेनाभिवादिता ये ऋत्विजस्तैरभिवन्दितौ चरणौ यस्य अवितथगीर्भिरमोघवाग्भिः ॥ १६ ॥

अभिरूपः सदृशः कैवल्यादिति अहं खलु जगदीश्वरः नहि जगदीश्वरोऽन्यः कश्चिदस्तीत्यर्थः द्विजेषु देवा इव ब्राह्मणास्तेषां कुलम् ॥ १७ ॥

आग्नीध्रीये अग्नीध्रपुत्रे ॥ १८ ॥ १९ ॥

हे विष्णुदत्त! तदवरोधायने तदन्तःपुरस्थले या मेरुदेवी तस्यां वातवसनानां दिग्वाससो दिग्वाससो बाला अपि भवन्तीत्यत आह। श्रमणानां तपस्विनां तथा भूताः पाषण्डिनोऽपि भवन्तीत्यत आह। ऋषीणां शास्त्रोक्तज्ञानवतां तेषां ब्रह्मचर्य्यादिधर्मानाह। ऊर्ध्वमन्थिनामूर्ध्वरेतसां शुक्लया शुद्धसत्त्वरूपया तनुवा तन्वा ॥ २० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
पञ्चमस्य तृतीयोऽयं सङ्गतः सङ्गतः सताम् ॥ ३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

इत्येवम्भूतेन निगदेन गद्यात्मकस्तवेन अभिष्टूयमानो वर्षधरेण भारतवर्षपतिना नाभिना अभिवादितैः ऋत्विग्भिरभिवन्दितौ चरणौ यस्य स भगवान् सदयमिदमाह ॥ १६ ॥

कैवल्यात् निःसमानातिशून्यत्वात् द्विजेषु त्रैवर्णिकेषु देवा इव द्विजदेवाः विप्रास्तेषां कुलम् ॥ १७ ॥

ततो हेतोः आग्नीध्रीये वंशे अवतरिष्यामि ॥ १८ ॥

इति भगवद्वचनं निशामयन्त्याः शृण्वन्त्याः पतिं नाभिम् अभिप्रायोक्त्वा ॥ १९ ॥

हे विष्णुदत्त! परीक्षित्! बर्हिषि यज्ञे परमर्षिभिर्भागवतैः ऋत्विग्भिः प्रसादितः तदवरोधायने नाभेरन्तःपुरे मेरुदेव्यां शुक्लया शुद्धया तनुवा तन्वा अवततार किं कर्तुकामः वातरशनानां दिग्वाससां पाषण्ड्याद्युत्थ्यर्थमाह। श्रमणानां वेदोक्ततपोनिष्ठानाम् ऋषीणां ज्ञानिनाम् ऊर्ध्वमन्थिनां नैष्ठिकब्रह्मचारिणां धर्मान्दर्शयितुकामः ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
तृतीयाध्यायार्थप्रकाशः ॥ ३ ॥

भाषा टीका॥

श्रीशुकदेवजी बोले इस प्रकार से स्तोत्रसे जब स्तुति किये गये तब देवतों में श्रेष्ठ भगवान् पृथिवीपति तथा विप्रों के चरण वन्दनाकरने पर दयायुक्त होकर यह वचन बोले ॥ १६ ॥

श्रीभगवान् बोले हे ऋषिगण! आपलोग सत्य वचन वाले हो आप लोगोंने मेरेसे अतिदुर्लभ वर माँगा है जोकि हमारे सदृश इस राजाका पुत्र होना चाहिये सोतो कैवल्यदाता होनेसे मेरे सदृशतो मेंहीं हूं तौभी ब्राह्मणों का वचन मिथ्या नहीं होना चाहिये जिससे कि ब्राह्मण देवता कुलतो हमाराही मुख है ॥ १७ ॥

तिस से अपने सदृश किसी को मै नहीं देखताहूं तो आग्नीध्रके वंश में अंशकलासे मेंहीं अवतार लेऊंगा ॥ १८ ॥

श्रीशुकदेवजी बोले इस प्रकार वचनको सुनती हुई मेरुदेवी के सन्मुख उसके पति को कह कर भगवान् अन्तर्ध्यान होगये ॥ १९ ॥

हे विष्णुदत्त! परीक्षित्जी उस यज्ञ में इस प्रकार प्रसन्न करने से भगवान् नाभिराजा के प्रीति करने की इच्छा से उस राजाके रनवास में मेरुदेवी के गर्भ में दिगम्बर सन्यासी ऊर्ध्वरेता ऋषि लोगों के धर्मोंको दिखाने के वास्ते शुद्ध सत्त्वमयरूप से अतीर्ण भये॥ २० ॥

इति श्रीमद्भागवत पञ्चमस्कन्ध तृतीयअध्यायका
भाषानुवाद लक्ष्मणाचार्यकृत
समाप्त ॥ ३ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे तृतीयोऽध्यायः समाप्तः ॥ ३ ॥

॥ चतुर्थोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

अथ ह तमुत्पत्त्यैवाभिव्यज्यमानभगवल्लक्षणं साम्योपशमवैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमानानुभावं प्रकृतयः प्रजा ब्राह्मणा देवताश्चावनितलसमवनायातितरां जगृधुः ॥ १ ॥

तस्य हवा इत्थं वर्ष्मणा वरीयसा बृहच्छ्लोकेन चौजसा बलेन श्रिया यशसा वीर्यशौर्याभ्यां च पिता ऋषभ इतीदं नाम चकार ॥ २ ॥

(१)तस्य हीन्द्रः स्पर्द्धमानो भगवान् वर्षे न ववर्ष तदवधार्य भगवानृषभदेवो योगेश्वरः प्रहस्यात्मयोगमायया स्ववर्षमजनाभं नामाभ्यवर्षत् ॥ ३ ॥

नाभिस्तु यथाभिलषितं सुप्रजस्त्वमवरुध्यातिप्रमोदभरविह्वलो गद्गदाक्षरया गिरा स्वैरं गृहीतनरलोकसधर्मं भगवन्तं पुराणपुरुषं मायाविलसितमतिर्वत्स तातेति सानुरागमुपलालयन् परां निर्वृत्तिमुपगतः॥४॥

विदितानुरागमापौरप्रकृति जनपदो राजा नाभिरात्मजं समयसेतुरक्षायामभिषिच्य ब्राह्मणेषूपनिधाय सह मेरुदेव्या विशालायां प्रसन्ननिपुणेन तपसा समाधियोगेन नरनारायणाख्यं भगवन्तं वासुदेवमुपासीनः कालेन तन्महिमानमवाप ॥ ५ ॥

यस्य ह पाण्डवेय ! (२) श्लोकावुदाहरन्ति ।
को नु तत्कर्म राजर्षेर्नाभेरन्वाचरेत्पुमान् ।
अपत्यतामगाद्यस्य हरिः शुद्धेन कर्मणा ॥ ६ ॥
ब्रह्मण्योऽन्यः कुतो नाभेर्विप्रा मङ्गलपूजिताः ।
यस्य बर्हिषि यज्ञेशं दर्शयामासुरोजसा ॥ ७ ॥

अथ ह भगवानृषभदेवः स्ववर्षं कर्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलवासो लब्धवरैर्गुरुभिरनुज्ञातो गृहमेधिनां धर्माननुशिक्षमाणो जयन्त्यामिन्द्रदत्तायामुभयलक्षणं कर्म समाम्नायाम्नातमभियुञ्जन्नात्मजानामात्मसमानानां शतं जनयामास ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्थादित्रिभिः प्रोक्तमृषभस्येहितं महत् ।
लोकार्थं येन सत्कर्म नैष्कर्म्यं च निदर्शितम् ॥ १ ॥
चतुर्थे शतपुत्रस्य राज्यं तस्योपवर्ण्यते ।
यस्य राज्ये जनः सर्वः सन्तोषामृतनिर्वृतः ॥ २ ॥

अभिव्यज्यमानानि भगवल्लक्षणानि पादतलादिषु वज्राङ्कुशादीनि यस्य । महाविभूतिः सर्वसम्पत्तिः साम्यादिभिः सह वर्द्धमानप्रभावम् । प्रकृतयोऽमात्यादयः । जगृधुरभिकाङ्क्षन्ति स्म ॥१॥

वर्ष्मणा देहेन । तस्य विशेषणद्वयम् । वरीयसा श्रेष्ठतमेन । बृहन्तः श्लोकाः पद्यानि कवीनां यस्मिंस्तेन च । ओजस्तेजः वीर्यं प्रभावः शौर्यमुत्साहः एतैर्गुणैरतिश्रेष्ठत्वादृषभः श्रेष्ठ इति नाम चकार ॥ २ ॥

तस्य वर्षे मण्डले ॥ ३ ॥

अवरुध्य प्राप्य । स्वैरमिच्छया गृहीतो नरलोकसमानधर्मो मनुष्याकारो येन तम् । अतएव मायया स्वपुत्र इति विलसिता मतिर्यस्य ॥ ४ ॥

आपौरप्रकृति पौरान्प्रकृतींश्चाभिव्याप्य विदितोऽनुरागो यस्मिन् । कथम्भूतो नाभिः । जनपदः जनाः पौरादयः पदं प्रमाणं यस्य सः आत्मजं धर्ममर्यादारक्षार्थमभिषिच्य ब्राह्मणानामुत्सङ्गे निधाय विशालायां बदरिकाश्रमे । प्रसन्नं परानुद्वेजकं निपुणं

---

(१) यस्य हीति श्रीवीरराघवपाठः ।

(२) श्लोका इति श्रीवीरराघवपाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

च तीव्रं तेन उपासीनः सेवमानः कालेन तन्महिमानं जीवन्मुक्तिमवाप ॥ ५ ॥

नाभेस्तत्प्रसिद्धं कर्म अनु तदनन्तरं को नु पुमानाचरेत् न कोऽपीत्यर्थः ॥ ६ ॥

मङ्गलैर्दक्षिणाभिः पूजिताः सन्तः ओजसा मन्त्रबलेन ॥ ७ ॥

अन्येषां ग्रहणाय प्रदर्शितो गुरुकुलवासो येन अनुशिक्षमाणोऽनुशिक्षयन् उभयविधं श्रुतिस्मृतिलक्षणं कर्म विधिमभियुञ्जन्ननुतिष्ठन् जयन्त्यां भार्यायामात्मजानां शतं जनयामास ॥ ८ ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं नाभेश्चरित्रमुपवर्णितमुपसंहरँस्त्रिभिरध्यायैर्नाभेः पुत्रस्य ऋषभस्य चरित्रमुपवर्णयति । अथेति । अथ ह्यवतारानन्तरमुत्पत्त्यैव जन्मनैवाभिव्यज्यमानानि भगवल्लक्षणानि पादतलादिषु वज्राङ्कुशादीनि यस्य साम्यं सर्वभूतेषु समत्वमुपशमः अन्तर्बाह्येन्द्रियनियमः वैराग्यं विषयेष्वनासक्तिः ऐश्वर्यं सर्वभूतनियन्तृत्वं महाविभूतिः सर्वसम्पत्तिः साम्यादिभिः सह वर्द्धमानः अनुभावः प्रभावो यस्य तं निशाम्य दृष्ट्वा प्रकृतयोऽमात्यादयः प्रजा जना ब्राह्मणा देवताश्च गोबलीवर्दन्यायेन ब्राह्मणदेवता इत्युक्तमवनितलसमवनाय भूमण्डलपरिपालनायातितरां भृशं जगृधुरैच्छन् ॥ १ ॥

तस्य जातस्य पुत्रस्य इत्थं सत्त्वप्रधानेन वरीयसा श्रेष्ठेन वर्ष्मणा देहेन बृहत्श्लोकेन विपुलगुणप्रथया ओजसा इन्द्रियबलेन बलेन देहबलेन श्रिया सम्पदा यशसा विपुलचरित्रप्रथया वीर्यं पराभिभवसामर्थ्यं शौर्यं रणमध्ये स्वगृह इव प्रवेशसामर्थ्यं ताभ्यां चातिशयितप्रभावत्वेन श्रेष्ठत्वादृषभ इति नामधेयं पिता नाभिश्चकार ॥ २ ॥

ऋषभशब्दप्रवृत्तिनिमित्तं प्रभावातिशयमेव संग्रहेणाह । यस्य हीति । यस्य ऋषभस्य वर्षे राज्ये भारतवर्षे स्पर्द्धमानः ऋषभेण विरोधमाचरन्निन्द्रः नववर्षं वृष्टिं निरुद्धवान् तदिन्द्रकर्तृकमवर्षणमवधार्य निश्चित्येन्द्रकृत्यः प्रहस्य भगवानृषभदेवो योगेश्वरः आत्मीयविचित्रशक्त्या स्वयमेवाजनाभवर्षं भारतवर्षस्य प्राक्तनं नामाजनाभमित्यवर्षत् ॥ ३ ॥

नाभिस्तु यथाभिलषितं स्वेच्छानुरूपं सुप्रजस्त्वं शोभना प्रजा यस्य सः सुप्रजाः "नित्यमसिच्प्रजामेधयोः" इत्यसिच् तस्य भावः सुप्रजस्त्वं सुपुत्रत्वमवरुध्य प्राप्य निरतिशयप्रमोदेन विह्वलः गद्गदया गिरा मायया भगवन्मायया स्वपुत्र इति विलसिता मतिर्यस्य सः हे वत्स ! तातेति सानुरागं पुत्रमुपलालयन् परां निर्वृतिमानन्दमुपगतः प्राप्तः कथंभूतं पुत्रं स्वैरं स्वेच्छया गृहीतः नरलोकसधर्मः मनुष्याकारो येन भगवन्तं षाड्गुण्यपूर्णं पुराणं पुरुषं पुरापि नवः पुराणः तं पुरुषं पुरुषशब्दवाच्यं ततो राजा नाभिरापौरप्रकृतिजनपदं पौरान्प्रकृतीर्देशवासिनश्चाभिव्याप्य विदितोऽनुरागो यस्मिन् जनपद इति पाठे आर्षत्वात्प्रयोगस्य "नाव्ययीभावादतोऽम्त्वपञ्चम्याः" इति लुगभावश्च नाभिरात्मजं समयसेतवः वर्णाश्रमधर्ममर्यादास्तेषां रक्षायामभिषिच्य राज्याभिषिक्तं कृत्वेत्यर्थः ब्राह्मणेनामुत्सङ्गेऽङ्के निधाय विशालायां बदरिकाश्रमे मेरुदेव्या स्वभार्यया सह प्रसन्नेन परानुद्वेजकेन निर्विण्णेन विघ्नानुपहतेन समाधिना साङ्गेन भक्तियोगेन भगवन्तं नारायणाख्यं वासुदेवमुपासीनः कालेन प्रारब्धावसानकालेन तस्य वासुदेवस्य महिमानमवाप प्राप्याविर्भूतगुणाष्टकोऽभूत् मुक्तोऽभवदिति यावत् ॥ ४—५ ॥

नाभेश्चरित्रं निगमयन् तत्प्रभावप्रतिपादकौ श्लोकावुदाहर्तुं तयोः सर्वपरिगृहीतत्वमाह । यस्येति । हे पाण्डवेय ! यस्य नाभेः श्लोकौ "लोपः शाकल्यस्य" इति यस्य लोपे तस्यासिद्धत्वात्स्वरसंध्यभावः उदाहरन्ति आर्या इतिशेषः तावाह । कोन्विति । राजर्षेर्नाभेस्तत्प्रसिद्धं कर्म को नु पुमानाचरेत्कुर्यान्नकोऽपीत्यर्थः यस्य नाभेः शुद्धेन कर्मणा भगवानपत्यतां पुत्रतामगात्प्राप्तः ॥ ६ ॥

नाभेरन्यः कुतो ब्रह्मण्यः को ब्रह्मण्य इत्यर्थः प्रथमार्थे तसिः यस्य नाभेर्बर्हिषि यज्ञे मङ्गलैर्निजार्जितधनादिभिः पूजिता विप्राः ओजसा मन्त्रबलेन यज्ञेशं दर्शयामासुः प्रदर्शितवन्तः ॥ ७ ॥

अथ राज्याभिषेकानन्तरं भगवानृषभदेवः स्ववर्षमजनाभं वर्षं कर्मक्षेत्रं स्वर्गापवर्गसाधनकर्मानुष्ठानयोग्यं स्थानं मन्यमानः अन्येषां ग्रहणाय प्रदर्शितो गुरुकुलवासो येन उपलब्धाः वरा यैस्तैर्गुरुभिरनुज्ञातः गृहमेधिनां गृहाश्रमिणां धर्माननुशिक्षमाणः अनुशिक्षयितुमित्यर्थः समाम्नातं विहितमुभयविधं प्रवृत्तिनिवृत्तिलक्षणं श्रौतस्मार्तरूपं वा कर्माभियुञ्जन्ननुतिष्ठन् इन्द्रेण दत्तायां जयन्त्यां भार्यायामात्मजानां शतं जनयामास येषामात्मजानां मध्ये भरतो नाम ज्येष्ठः पुत्रः श्रेष्ठगुण आसीत् येन भरतेन भरतसम्बन्धेन इदमजनाभं वर्षं भारतमिति व्यपदिशन्ति व्यवहरन्ति ॥ ८—९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

ऋषभनाम्नो हरेर्गार्हस्थ्यधर्मप्रदर्शनव्याजेन देवादीनामवन्यवतारे तत्प्रवर्तकप्रकारो दरीदृश्यतेऽस्मिन्नध्याये तत्रादौ तस्मिँल्लोकानुरागप्रकारं कथयति । अथेति ॥ १ ॥

अथ पिता तद्गुणानुविशिष्टं नाम चकारेत्याह । तस्येति । इत्थं विचिन्त्य कथम् "ऋष ज्ञाने भा दीप्तौ" इति धातुद्वयार्थत्वेन वरीयसा श्रेष्ठेन वर्ष्मणा देहेन ज्ञानप्रकाशदेहत्वादृषभ इति ऋटुरषाणां मूर्धेति स्थानसाम्यादृकारेण णकारो लक्ष्यते तेन णकारषकाराभ्यामोजो बले गृह्येते "णकारो बलं षकारः प्राण आत्मा" इति श्रुतेः बृहता श्लोकेन ग्रन्थनिबद्धेन यशसा किंवदन्तीति लक्षणेन सामान्यविशेषात्मना वा श्रौतस्मार्तकर्मानुष्ठाननिमित्तप्रसिद्धलक्षणादीप्त्या वा श्लोकेन यशसा श्रिया कान्त्या सर्वमेतद्भकारेण गृह्यते ऋषभ इति समस्तेन वीर्यशौर्ये गृह्येते "ऐश्वर्यस्य समग्रस्य" इति वचनात् शश्वत् षड्गुणवत्त्वाद्वा ऋषभ इति वाभिभ इति वन्मत्वर्थे भः ईदृक् नाम ईदृक् गुणविशिष्टं नाम ॥ २ ॥

अस्माद्धेतोश्चैवेदं नामास्येति भावेनाह । यस्येति । योगमायया स्वरूपसामर्थ्येन अभ्यवर्षीद्वृष्टियुक्तमकार्षीत् अत्र इन्द्रशब्देनेन्द्रपदे स्थितः यज्ञनामा हरिर्गृह्यते तदुक्तम् ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दुष्टानां (१) मोहनार्थाय यज्ञ इन्द्रपदे स्थितः ।
पस्पर्ध ऋषभेणैव स्वरूपेण हरिः स्वयम् !

इति ॥ ३ ॥

सुप्रजस्त्वं सत्पुत्रत्वं "सुप्रजस्त्वमङ्गिरसो वो ऽस्तु प्रतिगृभ्णातमानवं सुमेधस" इति श्रुतेः स्वैरं स्वेच्छया गृहीतो नरलोकधर्मो मेहनादिः काकपक्षादिर्वा चौलादिर्वा वक्ष्यमाणगुरुकुलवासादिर्वा येन स तथा मायया प्रकृत्या विलसिता वशीकृता मतिर्यस्य स तथा मायाविलासमेव वक्ति । वत्सेति । पौरादीनां पुत्रे योऽनुरागः स विदितो येन स तथा समयसेतुरक्षायां "समयस्तु क्रियाकारे सङ्केते चरिते सतां सिद्धान्ते शपथे काले" इत्यभिधानोक्तार्थरक्षणे विशालायां वदरिकाश्रमे नगरीग्रहणं नरनारायणाख्यमित्युक्ति विरुणद्धि कालेन ज्ञानादिसामग्रीलक्षितेन तस्य हरेर्महिमानं जरामरणादिराहित्यलक्षणं नतु स्रष्टृत्वादिलक्षणम् ॥ ४ ॥ ५ ॥

हे पाण्डवेय ! ओजसा तपोजनितेन ॥ ६ ॥ ७ ॥

उपलब्धदक्षिणाख्यवरैः उभयलक्षणं प्रवृत्तिनिवृत्तिलक्षणं समाम्नायाम्नातं समीचीनेषु निर्दोषेषु आम्नायेषु वेदेष्वाम्नातमभ्यस्तमभियुञ्जन्प्रयुञ्जानः कुर्वाण इत्यर्थः आत्मसमानानां लक्षणैरिति शेषः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

साम्यादिभिः पूर्वस्यैवान्वयः वर्ष्मादिभिः ऋषभः श्रेष्ठ इति हेतोरिदमृषभ इत्येतन्नाम चकार ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

समयसेतुरक्षायां न तु राजत्वे इति ज्ञेयं तदाहि तदुचितगार्हस्थ्याश्रमपरिग्रहाभावात् राज्याभिषेकस्तु पश्चात् ब्राह्मणैरेव कर्तव्य इति ज्ञेयम् ॥ ५ ॥ ६ ॥

मङ्गलमत्र सुस्पष्टः ॥ ७—१३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

चतुर्थे पुत्रशतकं भरतप्रवरं प्रभुः ।
जनयित्वा व्यधाद्राज्यं प्रजानां सार्वकामिकम् ॥ ० ॥

जगृधुरभिचकाङ्क्षुः ॥ १ ॥

वर्ष्मणा देहेनेत्यस्य विशेषणद्वयम् वरीयसा श्रेष्ठेन बृहन्तः श्लोकाः कवीनां यस्मिन् तेन वीर्यं प्रभावः शौर्यमुत्साहः । ऋषभ इति श्रेष्ठत्वादित्यर्थः ॥ २ ॥

अजः श्रीऋषभदेवः नाभिस्तत्पिता ताभ्यां रक्षितत्वादजनाभसंज्ञमित्यर्थः वृद्ध्यभाव आर्षः ॥ ३ ॥

अवरुद्ध्य प्राप्य मायया पुत्रज्ञानेन विलसिता मतिर्यस्य सः "स्यान्माया शाम्बरी बुद्ध्योः" इति त्रिकाण्डशेषः ॥ ४ ॥

[१] स्वायम्भुवमन्वन्तरे ऋषभावतारः तदेन्द्रोऽपि यज्ञनामा भगवानेव अतः कथं स्वेनैव स्वस्य स्पर्धेत्याशङ्क्य प्रमाणेनैव तदुक्तेरभिप्रायमाह ।

आपौरप्रकृति पौरान् प्रकृतींश्चाभिव्याप्य विदितोऽनुरागो यस्मिस्तं कथंभूतो नाभिः जनपदः जनाः पौरादय एव पदं आत्मजाभिषेके प्रमाणं यस्य सः समयानां सदाचाराणां या या मर्यादास्तद्रक्षणाय विशालायां वदरिकाश्रमे प्रसन्नेन सर्वत्र प्रसादवता सर्वसुखदेनेत्यर्थः निपुणेन फलसाधनसामर्थ्येन तस्यैव महिमा यत्र तं वैकुण्ठम् ॥ ५ ॥

शुद्धेन कर्म्मणा भक्तियोगेन ॥ ६ ॥

मङ्गलं यथास्यात्तथा दक्षिणादिभिः प्रसादिता भक्तत्वान्मङ्गलेनैव कर्त्रा पूजिता इति वा ओजसा भक्तिबलेन ॥ ७ ॥

अनुमन्यमानो जानन् प्रदर्शितत्यन्येषां ग्रहणायेत्यर्थः । लब्धवरैर्लब्धदक्षिणैः अनुशिक्षमाणः शिक्षयन् उभयविधं श्रुतिस्मृतिलक्षणमुभयलक्षणमिति पाठः सम्यगाम्नायेन ब्राह्मणोपदेशेनाम्नातमभ्यस्तमभियुञ्जन् अनुतिष्ठन् "आम्नायो निगमेऽपि च उपदेशेऽपि" इति मेदिनी ॥ ८ ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथेत्याद्यध्यायत्रयेण ऋषभचरित्रं वर्णयति । उत्पत्त्यैव जन्मनैव अभिव्यज्यमानानि भगवल्लक्षणानि यस्य तम् प्रकृतयः मन्त्रिप्रभृतयः अवनितलस्य सम्यगवनाय जगृधुः अभिकाङ्क्षन्ति स्म ॥ १ ॥

वरीयसा अतिशयतो वरेणोत्कृष्टेन बृहन्तः उपादेयत्वेन श्रेष्ठाः श्लोकाः कवीनां यस्मिन् तेन वर्ष्मणा देहेन ओज आदिभिश्चातिश्रेष्ठत्वादृषभः श्रेष्ठ इति नाम चकार ॥ २ ॥

तस्य वर्षे अजनाभाख्ये मण्डले ॥ ३ ॥

नाभिर्यथा अभिलषितं कामितं तथैव सुप्रजस्त्वं सुपुत्रत्वम् अवरुध्य प्राप्य अतिप्रमोदभरेण विह्वलः स्वैरं स्वेच्छया गृहीतो नरलोकसधर्मः नरलोकसमानो धर्मः वेदोक्तमार्गो येन तम् भगवन्तं वत्स ! तातेति गिरा उपलालयन् परां निर्वृत्तिमुपगतः प्राप्तः यतो मायया भगवत्कृपया विलसिता मतिर्यस्य सः ॥ ४ ॥

नाभिः जनपदः जनाः पौरादयः पदं प्रमाणं यस्य सः पौरादिलक्षणो तन्मतानुसारीत्यर्थः अतः समयसेतुरक्षायां वेदोक्तप्रजापालनादिधर्ममर्यादारक्षायाम् आपौरप्रकृति पौरान् मन्त्र्यादिरूपान् प्रकृतीश्चाभिव्याप्य विदितः अनुरागो यस्मिन् तम् अभिषिच्य ब्राह्मणेषु हेयोपादेयरूपसकलव्यवहारशास्त्रेषु उपनिधाय विशालायां नरनारायणाश्रमे प्रसन्ननिपुणेन प्रसन्नं सात्त्विकं निपुणं सुदृढं च तेन तपसा समाधियोगेन भगवत्समाधिरूपेण योगेनोपायेन वासुदेवमुपासीनः तन्महिमानं तत्साधर्म्यमवाप ॥ ५ ॥

तत्प्रसिद्धं कर्म ॥ ६ ॥

मङ्गलेन श्रद्धार्जवादिना पूजिताः ॥ ७ ॥

उपनयनादारभ्य तच्चरित्रं वर्ण्यते । अथेति । लोकसङ्ग्रहार्थं प्रदर्शितो गुरुकुलवासो येन अनुशिक्षमाणः अनुशिक्षयन् उभयलक्षणं जायापतियुग्मानुरूपं समाम्नायाम्नातं सहोभौ धर्ममाचरतामित्यादिवेदप्रोक्तम् अभियुञ्जन् जयन्त्यां पुत्रशतं जनयामास ॥ ८ ॥ ९ ॥

येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीद्येनेदं वर्षं भारतमिति व्यपदिशन्ति ॥ ९ ॥

तमनु कुशावर्त इलावर्तो ब्रह्मावर्तो मलयः केतुर्भद्रसेन इन्द्रस्पृग्विदर्भः कीकट इति नव नवतिप्रधानाः ॥ १० ॥

कविर्हविरन्तरिक्षः प्रबुद्धः पिप्पलायनः ।
आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः ॥ ११ ॥

इति भागवतधर्मदर्शना नव महाभागवतास्तेषां सुचरितं भगवन्महिमोपबृंहितं वसुदेवनारदसम्वादमुपशमायनमुपरिष्टाद्वर्णयिष्यामः ॥ १२ ॥

यवीयांस एकाशीतिर्जायन्तेयाः पितुरादेशकरा महाशालीना महाश्रोत्रिया यज्ञशीलाः कर्मविशुद्धा ब्राह्मणा बभूवुः ॥ १३ ॥

भगवानृषभसंज्ञ आत्मतन्त्रः स्वयं नित्यनिवृत्तानर्थपरम्परः केवलानन्दानुभव ईश्वर एव विपरीतवत्कर्माण्यारभमाणः कालेनानुगतं धर्ममाचरणेनोपशिक्षयन्नतद्विदां सम उपशान्तो मैत्रः कारुणिको धर्मार्थयशःप्रजानन्दामृतावरोधेन गृहेषु लोकं नियमयत् ॥ १४ ॥

यद्यच्छीर्षण्याचरितं तत्तदनुवर्तते लोकः ॥ १५ ॥

यद्यपि स्वविदितं सकलधर्मं ब्राह्मं गुह्यं ब्राह्मणैर्दर्शितमार्गेण सामादिभिरुपायैर्जनतामनुशशास ॥ १६ ॥

भाषाटीका ।

श्रीशुकदेवजी बोले तदनन्तर उत्पत्ति ही से जिन के भगवच्चिह्न विदित होते हैं समता ऐश्वर्य उपशम महा विभूति से जिनका प्रभाव प्रतिदिन बढता जाता है तिन को देखकर सब प्रजा ब्राह्मण देवता उन के पृथिवी पालन की इच्छा करने लगे ॥ १ ॥

उन के शरीर के बडेहोने से बडे यश के होने से बल से शोभा से वीर्य से शौर्य से पितानाभीने ऋषभ ऐसा नाम रक्खा ॥ २ ॥

किसी समय पर इन्द्र भगवान् ने ईर्षासे उन के वर्ष में वर्षा नहीं किया तिस बात को जानकर भगवान् ऋषभदेवजी ने योगेश्वर होने से हँसकर अपनी योगमाया से अपना अजनाभ वर्ष में वर्षा करदिया ॥ ३ ॥

नाभि राजा तो अपनी इच्छा के माफिक पुत्र को प्राप्त होकर अत्यन्त आनन्दित विह्वल होकर गद्गदवाणी से अपनी इच्छा से नरधर्म धारण करनेवाले पुराण पुरुष भगवान् से माया में बुद्धि के मोहित होजाने से हे वत्स ! हे तात, इस प्रकार से प्यार करते हुए बोले ॥ ४ ॥

नाभि राजाने जानलिया कि पुरवासीजन देश के जन सब ऋषभदेवपर अनुराग करते हैं तब राज्य धर्म के मर्यादा के पालन में पुत्र को अभिषिक्त कर के ब्राह्मणों को सौंप कर मेरु देवी के सहित बद्रीनारायण को जाकर अति प्रसन्न मनसे तपस्या कर के समाधि योग से नरनारायण वासुदेव भगवान्‌की उपासना करके काल आने पर भगवान् की महिमा को प्राप्त होगये ॥ ५ ॥

हे परीक्षित ! जिस नाभि राजा के दोश्लोक कहे गये हैं नाभि राजर्षीके कर्म की तुल्यता कौन पुरुष कर सकेगा जिन के शुद्ध कर्म से हरि भगवान् पुत्र होगये ॥ ६ ॥

ब्राह्मणों का मानने वाला नाभी से दूसरा कौन होगा जिनके मङ्गलाचार से पूजित ब्राह्मणों ने यज्ञमे अपने प्रभाव से भगवान् का दर्शन करादिया ॥ ७ ॥

इसके अनन्तर भगवान् श्रीऋषभदेव जी अपने अजनाभ वर्ष को कर्मक्षेत्र मानकर गुरुकुलवास की ब्रह्मचारी की शिक्षा लोकों को दिखाई फिर गुरुनकी आज्ञापाकर गृहस्थों के धर्मों को शिखाने के निमित्त इन्द्र की दीहुई जयन्ती भार्या में शास्त्र में कहे दोनों प्रकार के कर्म में युक्त होकर अपने तुल्य सौ पुत्रों को उत्पन्न किया ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तं भरतमनुकुशावर्तादयो नव पुत्रा नवतेः प्रधाना ज्येष्ठाः ॥ १० ॥ ११ ॥

तदनन्तरं कविप्रमुखा नव भागवतधर्मप्रदर्शकाः वसुदेवनारदयोः सम्वादो यस्मिन् उपरिष्टादेकादशस्कन्धे ॥ १२ ॥

महाशालिना अतिविनीताः ॥ १३ ॥

केवलः शुद्धः विपरीतवदनीश्वरवत्कर्माणि कुर्वन् नियमयत् नियमितवान् पाठान्तरे नितरामरमयत् कर्मकरणे हेतुः अनुग-

श्रीधरस्वामिकृतभावार्थदीपिका ।

तमुत्सन्नं धर्मं स्वयमाचरणेनातद्विदामुपशिक्षयन् कथं धर्माद्यीनामवरोधेन सङ्ग्रहेण आनन्दो भोगः अमृतं मोक्षः ॥ १४ ॥
शीर्षण्यः श्रेष्ठस्तेनाचरितम् तत्तदनुवर्तते यतः ॥ १५ ॥
सकलो धर्मो यस्मिंस्तद्ब्राह्मं गुह्यं वेदरहस्यं यद्यपि स्वेनैव विदितं तथापि ब्राह्मणान् पृष्ट्वैव करोतीत्यर्थः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तं भरतमनुपश्चात्कुशावर्त्तादयो नव सङ्ख्याकाः नवतिप्रधानाः प्रथमपुत्रदशके भरतः प्रधानः इतरेषु नवसु दशकेषु प्रत्येकं कुशावर्त्तादयः प्रधानाः स्वव्यतिरिक्तनवापेक्षया प्रधानाः ज्येष्ठाः कुशावर्त्तादयो नव भरतमनुजाताः तमेवानुसृत्य स्थिता इति वार्थः ॥ १०-११ ॥

तत्र नवतिपुत्राणां मध्ये कव्यादयो नव भागवतधर्मप्रकाशका महाभागवता भगवद्धर्मनिष्ठा अभूवन् तेषां कव्यादीनां सुचरितं भगवन्महिम्नोपबृंहितं वर्धितं भगवन्महिम्ना युक्तमित्यर्थः अत एवोपशमायनं चित्तशान्तिहेतुकमुपरिष्टादेकादशस्कन्धे वसुदेवनारदसम्वादे वक्ष्यामः कथयिष्याम इत्यर्थः॥ १२॥

यवीयांस एकाशीतिसङ्ख्याकाः जायन्तेया जयन्तीपुत्राः पित्राज्ञानुवर्त्तिनो महाशालीना गार्हस्थ्यसम्पत्समृद्धा महाश्रोत्रिया अधीतसाङ्गवेदाः यज्ञानुष्ठानशीलाः कर्मणा सदाचारेण विशुद्धा ब्राह्मणा बभूवुः ॥ १३ ॥

अथ ऋषभसंज्ञो भगवानात्मतन्त्रः स्वतन्त्रः अकर्मवश्यः अत एव नित्यं निवृत्तकर्मायत्ताः सुखदुःखाद्यनर्थपरम्परा यस्य सः केवलदुःखासम्भिन्नो य आनन्दः स्वरूपानन्दः तस्यानुभावो यस्य सः स्वयमीश्वर एव सन् इतरवत्प्राकृतवत्कर्माण्याचरन् माणः वर्णाश्रमधर्मरूपाणि कर्माणि कुर्वाणः किं कुर्वन्कालेनानुगतं प्रलीनं धर्ममाचारेणातद्विदां धर्मतदनुष्ठानादिकमजानताम् उपशिक्षयन् किमर्थं धर्माद्यविरोधेन धर्मादिप्राप्त्या हेत्वर्थे तृतीया फलं चात्र हेतुः धर्मादिप्राप्तिरूपफलायेत्यर्थः प्रजानन्दः प्रजार्थो भोगः अमृतमेवं पुरुषार्थचतुष्टयसंग्रहः सर्वभूतसमः उपशान्तः रागाद्यकलुषितचित्तः मैत्रः अपकृष्टेष्वपि भूतेषु स्वसाम्यबुद्धिः कारुणिकः परदुःखासहिष्णुः गृहेषु गृहाश्रमेषु लोकान्नियमयन् नियमयन्नभूदित्यर्थः नियमयदिति वा पाठः आर्षत्वादडभावो वा ॥ १४ ॥

आचारेणोपशिक्षयन्नियमदित्यत्र हेतुः । यद्यदिति । शीर्षण्यः श्रेष्ठः तेन यद्यदाचरितं तत्तदेव हि यस्माल्लोकोऽनुवर्त्ततेऽनुतिष्ठति तथाचोक्तम् ।

> यद्यदा चरति श्रेष्ठस्तत्तदेवेतरो जनः
> स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते

इति लोकसंग्रहार्थमाचारेणोपाशिक्षयदित्यर्थः तथा सकलो धर्मो यस्मिँस्तद्ब्राह्मं गुह्यं वेदरहस्यं यद्यपि स्वेनैव विदितं तथापि ब्राह्मणान् पृष्ट्वा तैर्दर्शितमार्गेण सामादिभिरुपायैर्जनतां जनसमूहमनुशशास द्रव्यादिभिरुपचितैः सर्वैर्यज्ञैर्यथाविधि शतक्रत्वः इयाज इष्टवान् तत्र द्रव्यं हविर्देवाः समियजेनेत्युक्तो देशः कालः वसन्तादि वयः जातपुत्रः कृष्णकेशोऽग्नीनादधीतेत्युक्तं वयः श्रद्धा कर्त्तव्यविषया त्वरा विविध उद्देशः इति कर्त्तव्यता ॥ १५-१६-१७॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

येन भरतेनाधिकृतत्वाद्भारतमिति नाम्ना कथयन्ति ॥ ९ ॥
तं भरतमन्वनन्तरं नवतिश्च्यः प्रधानाः ॥ १० ॥ ११ ॥
भागवतधर्मान् दर्शयन्तीति भगवतो महिम्नोपबृंहितं पूरितमुपरिष्टादेकादशस्कन्धे उपशमायनं भगवन्निष्ठाप्रकारदर्शकम् ॥ १२ ॥
जायन्तेया जयन्तीपुत्राः महाशालीनाः महाशालाः कलमान्नभोजिनो वा गार्हस्थ्यधर्मप्रदर्शका वा ब्राह्मणाः यजनयाजनाध्ययनादिविप्रकर्मनिष्ठितत्वेन तच्छब्दवाच्याः ॥ १३ ॥
विपरीतवत् प्राकृतजनवत् आचारेण स्वयमनुष्ठानेन अतद्विदांस ब्रह्मज्ञानिनं लोकमिति शेषः धर्मार्थादीनामविरोधेनानुकूल्येन शीर्षण्येन श्रेष्ठेन"यद्यदाचरति श्रेष्ठ"इति स्मृतेः ॥१४॥१५॥
यदपि यद्यपि स्वेन विदितं तथापि ब्राह्मणैर्दर्शितमार्गेण प्रकारेण सकलधर्मं जनतामनुशशासेत्यन्वयः ॥ १६ ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कालेन संहारकेण अनुगतमुत्सन्नमित्यर्थः ॥ १४-१९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ॥

तं भरतमनु भरतस्य कनिष्ठा इत्यर्थः । नवतिप्रधानाः नवते ज्येष्ठा इत्यर्थः । पुंस्त्वमार्षम् ॥ १० ॥ ११ ॥
उपरिष्टादेकादशस्कन्धे ॥ १२ ॥
महाशालीना अतिविनीताः ॥ १३ ॥
विपरीतवत् अनीश्वरो जीव इव अतद्विदां द्वितीयार्थे षष्ठी धर्ममविदुष इत्यर्थः धर्मादीनामवरोधेन प्राप्त्या हेतुना न्यय मयत् नियमितवान् । न्यरमयदिति च पाठः ॥ १४ ॥
शीर्षण्यः श्रेष्ठः ॥ १५ ॥
सकला धर्म्मा यस्मिन् तद्ब्राह्मं गुह्यं वेदोक्तं रहस्यं यद्यपि स्वेनैव विदितं तदपि ब्राह्मणैर्दर्शितेनैव ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नवतेः प्रधानाः श्रेष्ठाः ॥ १० ॥
अवशिष्टेषु नवतिसङ्ख्याकेषु नव कविप्रभृतयः भागवतधर्मप्रदर्शका इत्याह । कविरिति ॥ ११ ॥
तेषां वसुदेवनारदयोः सम्वादो यस्मिन् तच्छोभनं चरितमुपरिष्टादेकादशे वर्णयिष्यामः ॥ १२ ॥
महाशालीना विनीततमाः ॥ १३ ॥
नित्यनिवृत्ता रागद्वेषादिरूपा अनर्थपरम्परा यस्मात्सः केवलानन्दस्य साधनरहिताद्युपकरणापेक्षस्य स्वरूपानन्दस्यानुभवो यस्य स स्वयमीश्वरः इतरवत्प्राकृतवत् कर्माण्याचरमाणः कालेनानुगतमुत्सन्नं धर्ममाचरणेन अतद्विदां धर्माचरणतत्प्रयोजनानभिज्ञानामुपशिक्षयन् धर्माद्यवरोधेन सङ्ग्रहेण अध्ययनेन वसतीति वसतीया धर्मादिप्राप्त्यर्थमित्यर्थः गृहेषु सन्तं लोकं मुमुक्षुं बुभुक्षुं च न्ययमयत् नियमितवान् तत्र गृहस्थेन बुभुक्षुणा धर्मार्थयशः प्रजानन्दप्राप्त्यर्थं मुमुक्षुणामृतार्थं कर्म कर्तव्यमिति लोकं नियमितवानित्यर्थः ॥ १४ ॥

द्रव्यदेशकालवयःश्रद्धर्त्विग्विविधोद्देशोपचितैः सर्वैरपि क्रतुभिर्यथोपदेशं शतकृत्व इयाज ॥ १७ ॥
भगवतर्षभेण परिरक्ष्यमाण एतस्मिन्वर्षे न कश्चन पुरुषो वाञ्छत्यविद्यमानमिवात्मनोऽन्यस्मात्कथञ्चन किमपि कर्हिचिदवेक्षते भर्तर्यनुसवनं विजृम्भितस्नेहातिशयमन्तरेण ॥ १८ ॥
स कदाचिदटमानो भगवानृषभो ब्रह्मावर्तगतो ब्रह्मर्षिप्रवरसभायां प्रजानां निशामयन्तीनामात्मजानवहितात्मनः प्रश्रयप्रणयभरसुयन्त्रितानप्युपशिक्षयन्निति होवाच ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यामृषभदेवानुचरिते
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शिर्षयेन श्रेष्ठेनाचरितमनुष्ठितम् ॥ १५ ॥
किञ्च सकलो धर्मो यस्मिन् तद्ब्रह्म गुह्यं वेदरहस्यं यद्यपि स्वाविदितं स्वतोऽनुभूतं तथापि ब्राह्मणैर्दर्शितमार्गेणैव जनसमूहं सामादिभिरनुशशास ॥ १६ ॥

भाषाटीका

जिन के मध्य में महा योगी भरतजी वडे हैं श्रेष्ठ गुण वाले भये जिन से यह वर्ष भारत कहाता है ॥ ९ ॥
भरतजी के पीछे कुशावर्त इलावर्त ब्रह्मावर्त मलय केतु भद्रसेन इन्द्रस्पृक् विदर्भ कीकट इन नामों वाले नौ पुत्र भये वे नव्वे पुत्रों के वडे हुयेथे ॥ १० ॥
कविहरि अन्तरिक्ष प्रबुद्ध पिप्पलायन आविर्होत्र द्रुमिल चमस करभाजन एनओं के नाम हैं ॥ ११ ॥
यह सब भागवत धर्मके दर्शन वाले महा भागवत भये उनका चरित्र जो भगवान् के महिमासे युक्त है तिसको वसुदेव नारदजी के संवाद शान्ति का देनेवाले को आगे एकादशस्कन्ध मे वर्णन करेंगे ॥ १२ ॥
छोटे एकाशी जयन्ती के पुत्र भये पिता की आज्ञा करने वाले वडे गृहस्थ वडे वैदिक यज्ञों के करने वाले कर्म काण्ड में निरत ब्राह्मण होगये ॥ १३ ॥
ऋषभनामा भगवान् स्वयं स्वतन्त्र हैं नित्य अनर्थ की परम्परासे निवृत्त भी हैं केवल आनन्द अनुभव स्वरूप हैं ईश्वर हैं तौ भी विपरीत से कर्मों को आरंभ करते काल से प्राप्त धर्म को लोकों को शिखाते भये अज्ञानि जनों को उपदेश करते हुये रहे शान्त स्वरूप सवके मित्र करुणा वाले होकर धर्म अर्थ यश संतति आनंद मोक्ष इनके संग्रह के हेतु से मनुष्यों को गृहस्थ धर्म की शिक्षा देते भये ॥ १४ ॥
जिस जिस कर्म को श्रेष्ठ जन करते हैं तिसी कर्म को सब लोक करते हैं ॥ १५ ॥
यद्यपि ब्राह्मणों का सब धर्म गुप्तभी आप को विदित है तौ भी ब्राह्मणों के बताये सामादि उपायों से प्रजाओं को सिखाते भये ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्रव्यादिभिरुपचितैर्यज्ञैरिष्टवान् तत्र वयो यौवनम् युवैव धर्ममन्विच्छेदितिवचनात् विविधोद्देशा नानादेवतोद्देशाः यथोपदेशं यथाविधि ॥ १७ ॥
अन्यस्मात्सकाशादात्मनः कश्चिदपि किमपि कथञ्चनापि न वाञ्छति इच्छानुदये दृष्टान्तः अविद्यमानं खपुष्पादिकमिव तचान्यदीयमवेक्षतेऽपीत्यर्थः भर्तरि ऋषभदेवे प्रतिक्षणमुल्लसितस्नेहोद्रेकं विनान्यन्नवाञ्छति ॥ १८ ॥
अवहितात्मनः संयतचित्तानपि प्रजानुशासनार्थमुपशिक्षयन्निति ह वक्ष्यमाणमुवाच ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

भगवता ऋषभेणैतस्मिन् वर्षे भारते परिरक्ष्यमाणे सति कश्चन पुरुषो भर्त्तरि ऋषभे अनुसवनं शश्वद्विजृम्भितो यः स्नेहोऽनुरागः तस्यातिशयमन्तरेण विनान्यं पुरुषार्थमात्मनः स्वस्याविद्यमानमन्यस्मात्पुरुषान्तरात्कदाचिदपि किञ्चिदपि केनापि निमित्तेन नापेक्षते ॥ १८ ॥
स भगवानृषभदेवः कदाचित्सञ्चरन् ब्रह्मावर्त्तगतः ब्रह्मर्षिश्रेष्ठानां सभायां प्रजानां निशामयन्तीनां शृण्वन्तीनां सतीनामात्मजान् अवहितात्मनः समाहितचित्तान् प्रश्रयो विनयः प्रणयः स्नेहस्ताभ्यां यत्सुखं तेन यन्त्रितान् वशीकृतानुपशिक्षयन्निति वक्ष्यमाणप्रकारेणोवाच ह ॥१९॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीवीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अविद्यमानमिव न वाञ्छति आत्मनोऽन्यस्मात् पुंसः किमपि

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नापेक्षत इत्यन्वयः तर्ह्यपेक्ष्यमाणं किन्तत्राह । भर्तरीति ॥ १८ ॥

अटमान इति शानच् ताच्छीलिकार्थः अटितुकामः प्रव्रजिष्यन्नित्यर्थः निशामयन्तीनां शृण्वन्तीनामवहितात्मनः उक्तग्रहणनिरतमनसः प्रश्रयादिगुणैः सुयन्त्रितान् सुष्ठुबद्धान् इतिवक्ष्यमाणप्रकारेण ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य चतुर्थोऽध्यायःसमाप्तः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

द्रव्यादिभिरुपचितैः वयो यौवनं युवैव धर्म्ममन्विच्छेदिति वचनात् विविधोद्देशा नानादेवतोद्देशाः ॥ १७ ॥

कश्चन कश्चिदपि पुरुषोऽविद्यमानं खपुष्पमिव कमपि आत्मनः स्वस्य अन्यस्मात् सकाशात् नवाञ्छति भर्त्तरि ऋषभदेवे स्नेहातिशयं केवलमवेक्षते अन्तरेणान्तरात्मना "अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च" इत्यमरः ॥ १८ ॥ १९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
पञ्चमस्य चतुर्थोऽयं सङ्गतः सङ्गतः सताम् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

किञ्च द्रव्यादिभिरुपचितैः सर्वैर्यज्ञैर्यथोपदेशं यथाविधि शतकृत्व इयाज इष्टवान् तत्र द्रव्यं पुरोडाशादि देशः पुण्यतीर्थादिः कालो वसन्तादिः वयो यौवनम् श्रद्धाभिरुचिः ऋत्विजः बहुशः कृतानुष्ठानाः विविधोद्देशाः भगवतः सर्वयज्ञभोक्तुः सर्वश्रेष्ठस्य सर्वात्मनः अंशभूताः नाना या देवताः वेदे प्रोक्तास्तत्तद्द्वारेण कृताः "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" इति श्रीमुखोक्तेः॥ १७ ॥

अविद्यमानं खपुष्पादिकमिव कश्चिदपि अन्यस्मात् किमपि न वाञ्छति न चान्यदीयमवेक्षते ॥ १८ ॥

इति वक्ष्यमाणमुवाच ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे चतुर्थाध्यायार्थप्रकाशः ॥ ४ ॥

उत्तम द्रव्य उत्तम देश उत्तम काल अवस्था श्रद्धा ऋत्विज विविध विधानों से सब यज्ञों से उपदेश के अनुसार सौ वार भगवान् ने यज्ञ किया ॥ १७ ॥

भगवान् ऋषभजी के रक्षा करने से इस वर्ष के मध्य में कोई भी पुरुष कोई चीज अपने पास न रही सरीकी दूसरे किसी से नहीं मांगता था कभी भी किसी प्रकार नहीं चाहता था केवल अपने स्वामी राजा का स्नेह मात्र सब चाहतेथे ॥ १८ ॥

सो भगवान् ऋषभजी कभी ब्रह्मावर्त में प्राप्त होकर ब्रह्मर्षियों के सभा में प्रजाओं के सुनते ही अपने अनुकूल अपने पुत्र जोकि प्रेम नम्रता से युक्त हैं तिनको शिक्षा करते हुये यह वचन बोले ॥ १९ ॥

इति श्रीभागवत पञ्चमस्कन्ध चौथा अध्यायका भाषानुवाद लक्ष्मणाचार्य कृत समाप्त ॥ ४ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे चतुर्थोऽध्यायः समाप्तः ॥ ४ ॥

——(:०:)——

पञ्चमोऽध्यायः ।

॥ ऋषभ उवाच ॥

नायं देहो देहभाजां नृलोके कष्टान् कामानर्हते विड्भुजां ये ।
तपो दिव्यं पुत्रका ! येन सत्त्वं शुद्ध्येद्यस्माद्ब्रह्मसौख्यं त्वनन्तम् ॥ १ ॥
महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां सङ्गिसङ्गम् ।
महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये ॥ २ ॥
ये वा मयीशे कृतसौहृदार्था जनेषु देहंभरवार्तिकेषु ।
गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता यावदर्थाश्च लोके ॥ ३ ॥
नूनं प्रमत्तः कुरुते विकर्म यदिन्द्रियप्रीतय आपृणोति ।
न साधु मन्ये यत आत्मनोऽयमसन्नपि क्लेशद आस देहः ॥ ४ ॥
पराभवस्तावदबोधजातो यावन्न जिज्ञासत आत्मतत्त्वम् ।
यावत्क्रियास्तावदिदं मनो वै कर्मात्मकं येन शरीरबन्धः ॥ ५ ॥
एवं मनः कर्मवशं प्रयुङ्क्ते अविद्ययाऽऽत्मन्युपधीयमाने ।
प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत् ॥ ६ ॥
यदा न पश्यत्ययथा गुणेहां स्वार्थे प्रमत्तः सहसा विपश्चित् ।
गतस्मृतिर्विन्दति तत्र तापानासाद्य मैथुन्यमगारमज्ञः ॥ ७ ॥
पुंसः स्त्रिया मिथुनीभावमेतं तयोर्मिथो हृदयग्रन्थिमाहुः ।
अतो गृहक्षेत्रसुताप्तवित्तैर्जनस्य मोहोऽयमहंममेति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पञ्चमे मोक्षधर्मोपदेशैः पुत्रानुशासनम् ।
उक्तं पारमहंस्यं च तस्य ब्रह्मातितिक्षया ॥ १ ॥

विड्भुजामपि ये सन्ति तान्कष्टान्दुःखदान्कामान् विषयानर्हति तद्योग्योऽयं मनुष्यदेहो न भवति किन्तु दिव्यमुत्कृष्टम् येन तपसा यस्माच्छुद्धात्सत्त्वादनन्तं ब्रह्मसुखं भवति ॥ १ ॥

मोक्षबन्धयोर्निदानमाह । महत्सेवामिति । तमसः संसारस्य द्वारं योषितां ये सङ्गिनस्तेषां सङ्गम् महतां लक्षणमाह सार्धेन । महान्त इति । साधवः सदाचाराः ॥ २ ॥

मयि ईशे कृतं सौहृदमेवार्थः पुरुषार्थो येषाम् वाशब्देनान्यनिरपेक्षस्यैवास्य लक्षणत्वं दर्शयति । देहं बिभ्रतीति देहंभरा विषयवार्तैव न धर्मविषया येषु तेषु जनेषु जायादियुक्तेषु गृहेषु च रातिर्मित्रं धनं वा पाठान्तरे जायादिप्रदेषु यावदर्थाश्च यावदर्थमेवार्थो येषामिति मध्यमपदलोपी समासः देहनिर्वाहाधिकस्पृहाशून्या इत्यर्थः ॥ ३ ॥

कामान्नार्हतीति यदुक्तं तदुपपादयति । नूनमिति । यद्यदा इन्द्रियप्रीतये आपृणोति व्याप्रियते तदा प्रमत्तः सन् विकर्म पापं नूनं कुरुते यतो विकर्मणः प्राचीनादयं क्लेशदो देहो जातस्तस्यैव पुनःकरणं साधु न मन्ये ॥ ४ ॥

देहादेर्नश्वरत्वात्क्रियानयमनर्थ इत्याशङ्क्याह । पराभवो देहादिना स्वरूपाभिभवो ज्ञानकृतस्तावद्भवति तत्र हेतुः यावत्क्रियाः स्युस्तावदिदं मनो हि कर्मस्वभावमेव स्यात् येन कर्मात्मकेन मनसा ॥ ५ ॥

उक्तमुपसंहरति । एवं पूर्वकृत कर्म कर्तृभूतं मनः कर्मभूतं वशं प्रयुङ्क्ते पुनः कर्मनिष्ठं करोतीति जीवन्मुक्तकर्मव्यावृत्त्यर्थमाह । अविद्ययेति । अविद्यया आत्मनि उपधीयमाने आच्छाद्यमाने सति एवं मनः कर्तृ पुरुषं कर्म वशं प्रयुङ्क्त इति वा ॥ ६ ॥

न केवलं देहयोगमात्रमनर्थान्तरं चेत्याह । यदा गुणानामिन्द्रियाणामीहां चेष्टामयथा मिथ्या आत्मीया न भवतीति विपश्चिद्विवेकी सन्न पश्यति न पश्यतीति पाठे अयथा आत्मी-

श्रीधरस्वामिकृतभावार्थदीपिका ।

यत्वेनेत्यर्थः तत्र तदा सहसा गतस्मृतिः स्वरूपस्मृतिशून्यः सन्नज्ञो मूढो मैथुनसुखप्रधानं गृहं प्राप्य तापान् विन्दति ॥ ७ ॥

ननु यथोपयोगं स्त्रिया मिथुनीभूय सुखमात्रमनुभवतः कुतस्तापाः स्युस्तत्राह । पुंस इति । प्रत्येकं तयोरेकैको हृदयग्रन्थिरस्त्येव एवं मिथः परस्परं स्थूलमन्यं हृदययोर्ग्रन्थिं बुधैर्वदन्ति कुत इत्यत आह । अतोऽस्मान्मिथुनीभावात् प्रत्येकं हृदयग्रन्थिना तु देहेन्द्रियमात्रेऽहं ममेति मोहोऽस्मात्तु गृहादिभिर्विषयभूतैर्महान्मोहो भवेदित्यर्थः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उक्तमेवाह । ऋषभ इति । तद्वन्मुक्त्युपायत्वेन भगवदुपासनमुपदेक्ष्यमाणो वैराग्यं विना उपदिष्टोऽपि भक्तियोगो न सम्यक् प्रतितिष्ठतीति तदुत्पत्तये कामान्निन्दति । नायमित्यर्द्धेन । देहभृतां मध्ये यो नृलोकः मनुष्यस्तस्मिन्सत्ययं मनुष्यदेहः कष्टान्कृच्छ्रसम्पाद्यानन्ततो दुःखरूपान् कामान् यज्ञादीन् प्रति नार्हति कामाननुभवितुं नार्हतीत्यर्थः कामोपभोगार्थो नायं नृदेह इत्यर्थः । कुतः ये कामा विड्भुजामपि सूकरादीनामपि सन्ति किन्तु हे पुत्रकाः ! दिव्यं देवस्य विष्णोराराधनरूपं तपश्चर्तुमर्हति किं तत्तपः यदर्हति तत्राह । यस्मात्तपसः शुध्येन्निरस्तसंसारो भवेत् येन च ब्रह्मसुखमपारं भवेत् कामोपभोगेन संसृतिः एवं कामोपभोगः संसृतिहेतुः भगवदुपासनं मोक्षहेतुरित्युक्तम् ॥ १ ॥

एवं भोगोपासनयोर्बन्धमोक्षहेतुत्वमभिधाय तयोर्निदानमाह । महतां सेवां विमुक्तेर्द्वारं मूलं कारणमाहुः तथा योषितां स्त्रीणां ये सङ्गिनः तेषां सङ्गं तमसः संसारस्य द्वारमाहुरित्यनुषङ्गः के ते महान्तः यत्सेवा विमुक्तेर्द्वारं तत्राह । सार्द्धेन । ये समचित्तत्वादिगुणयुक्तास्ते महान्त इत्यन्वयः समचित्ताः सुखदुःखादिष्वविक्रियमाणचित्ताः सर्वस्य ब्रह्मात्मकत्वज्ञानात् प्रशान्ताः जितबाह्यान्तःकरणाः विमन्यवः तितिक्षवः सुहृदः सर्वभूतहितैषिणः साधवः परोपकारनिरताः ॥ २ ॥

मयीशेऽस्मच्छरीरकेऽस्मदन्तरात्मनि सर्वेश्वरे शास्त्रदृष्ट्या स्वात्मनो भगवदात्मकत्वादेव मुक्तिः यथाह "प्रह्लादः सर्वगत्वादनन्तस्य स एवाहमवस्थित" इति । यद्वा चेत्रज्ञशक्त्यभिभवाद्भगवदंशोद्भवादेव मुक्तिः कृतं सौहृदं प्रीतिरेवार्थः प्रयोजनं येषां ते देहंभरवार्त्तिकेषु देहधारणा वार्त्तैव न धर्मविषया वार्त्ता येषु जनेषु गृहेषु च कथंभूते जाया कलत्रमात्मजाः पुत्राः रातिर्मित्रं धनं वा तद्वत्सु प्रीतियुक्ता न भवन्ति ये च लोके यावदर्थाः देहधारणापेक्षामात्रग्राहिणः देहनिर्वाहकाधिकयार्थस्पृहाशून्या इत्यर्थः ॥ ३ ॥

कामान्नार्हतीति यदुक्तं तदुपपादयति । नूनमिति । प्रमत्तः आत्मभ्रान्त्या देहपरवशः अत एव दीनः यदिन्द्रियप्रीतये कर्म आपृणोति व्याप्रियते करोतीति यावत् तत् कर्म साधु समीचीनं न मन्यते कुतः यतः यस्मादिन्द्रियप्रीत्यर्थात्कर्मणः असन्नश्वरः अस्थिरोऽप्ययं क्लेशदो देहः आस बभूव प्राप्त इति तस्यैव पुनः करणं साधु न मन्य इत्यर्थः ॥ ४ ॥

ननु देहस्यास्थिरत्वात्क्रियानयमनर्थं इत्याशङ्क्याह । पराभव इति । यावदात्मनः प्रकृतिविलक्षणस्यात्मनः तत्त्वं याथात्म्यम् यावन्न जिज्ञासते ज्ञातुं नेच्छति न जानातीत्यर्थः तावदबोधजातः आत्मस्वरूपतिरोभावः आत्मयाथात्म्याज्ञाननिमित्तपराभवः यावच्च पराभवस्तावदिन्द्रियप्रीतये क्रियाः प्रवर्तन्ते यावच्च क्रियास्तावदिदं मनः कर्मात्मकं कर्मप्रवणं न तु ज्ञानप्रवणं येन कर्मात्मकेन मनसा भूयोऽपि शरीरबन्धः शरीराणां नश्वरत्वेऽपि पुनःपुनस्तत्सम्बन्धोऽविच्छिन्न इति तन्निमित्तानर्थपरम्पराप्यविच्छिन्नेति भावः ॥ ५ ॥

एतदेवाह । एवमिति । अविद्यया देवमनुष्याद्यौपाधिकदेहविशिष्टत्वेनाहङ्कारममकाररूपयोपधीयमाने कर्मवासनामूलया संसृज्यमाने सत्यात्मनि मनः कर्मवशं प्रयुङ्क्ते व्यापारयति पुरुषमिति शेषः अतो यावद्वासुदेवे मयि प्रीतिः प्रीतिरूपा भक्तिर्न स्यात्तावद्देहयोगेन न मुच्यते ॥ ६ ॥

न केवलं देहयोगमात्रमपि त्वनर्थान्तरसत्त्वंचेत्याह । यदेति स्वार्थे स्वस्य पुरुषार्थभूते स्वात्मपरमात्मयाथात्म्यानुसंधानेऽप्रमत्तः सन् गुणेहां शब्दादिगुणविषयामिन्द्रियाणां प्रवृत्तिम् यथा आत्मनः स्वाभाविकी न भवति किं तु देहसंबन्धप्रयुक्तेति विपश्चिद्विवेकी सन् यदा सहसा न पश्यति तदासौ पुमान् गतस्मृतिः स्वात्मपरमात्मस्मृतिरहितः अत एवाज्ञः मैथुन्यं मैथुनसुखप्रधानं गृहं प्राप्य तत्र तापान् विन्दति प्राप्नोति एतदुक्तं भवति अनादिकर्मवासनयाहङ्कारममकाररूपाविद्याविद्यया च देहसंबन्धः देहसंबन्धेन पुनः पुनः कर्म कर्मणस्तापः तापानुभवेन कर्मणो विनाशेऽपि तद्वासनाया अनिवृत्तौ पुनरविद्याविद्यया च देहसंबन्धद्वारा तापानुभव इत्येवं चक्रवत्परिवृत्तिरिति ॥ ७ ॥

एवं रूपसंसारस्य निदानं वासनैव तन्निवृत्तिरेव मुक्तेर्निदानमिति प्रतिपादयितुं तावद्वासनापि मिथुनीभावमूलेत्याह । पुंस इति । पुंसः स्त्रिया सह योऽयं मिथुनीभावस्तं प्रत्येकं तयोर्हृदयग्रन्थिमाहुः । हृन्मनः तद्गता कर्मवासना दुर्भेद्यत्वाद्ग्रन्थिरित्युच्यते मिथुनीभावं हृदयग्रन्थिकारणमाहुरित्यर्थः कोऽसौ हृदयग्रन्थिर्यं मिथुनीभावमाहुस्तत्राह । यतः हृदयग्रन्थिहेतोः गृहादिभिर्विषयभूतैरहं ममेत्यविद्यारूपो मोहो जनस्य भवेत् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

पुत्राणां तत्त्वोपदेशव्याजेन लोकहिताय सकलशास्त्रसारभूतं तत्त्वं निरूपयत्यस्मिन्नध्याये तत्रादौ विषयसेवामुमुक्षुणा अवश्यंवर्जनीयेति भावेनाह । नायमिति । नृलोके देहभाजां शरीरिणामयं देहः स्रक्चन्दनादिभोगाय न भवति किन्तु तपश्चरणायेति शेषः सोऽपि पुरुषार्थैकत्वेन विहितत्वात्कर्तव्य इति, तत्राह । क इति । ये कामा विड्भुजां च सूकरादीनामपि सन्ति को विवेकी तत्कामान् कामयन्त इति कामाः विषयास्तान्विषयानर्हति न कोऽपीति शेषः तर्हि अनेन किम्विधेयमत्राह । तप इति । तपोऽर्हथ कर्तुमिमि शेषः इदमेव प्रयोजनं नान्यत् पूर्वतनैः साधितत्वादितीममर्थं हिशब्देन वक्ति येन तपसा सत्त्वमन्तः करणं ततः किन्तत्राह । यस्मादिति । यस्माच्छुद्धान्तःकरणादनन्तमन्तत्रयविधुरं सुखं सुष्ठु निर्दोषं खं ज्ञानात्मकं

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

मिन्द्रियं यस्य तत्तथा तद्ब्रह्म सिध्यतीति शेषः हि यस्मात्तस्मात्तपश्चरणमेव देहधृतिप्रयोजनमित्यर्थः हिना मय्यनन्तगुणा इति वाक्यं स्मारयतीति वा ॥ १ ॥

अन्वयव्यतिरेकमुखेनेममर्थं द्रढयति। महत्सेवामिति। योषितां सङ्गिभिः सह सङ्गमित्यनेन कैमुत्यन्यायो दर्शित इति ज्ञातव्यम् निषिद्धत्युपपदं योऽयमन्यथा योषिन्मात्रस्यापि हेयत्वं प्रसज्येत तच्चानुपपन्नं "न काञ्चन स्त्रियं परिहरेत्" इति श्रुतेरिति भावः द्वे नित्यमुक्तौ तत्रानन्तसुखलक्षणैका नित्यदुःखलक्षणान्येति बोद्धव्यं महल्लक्षणे ज्ञाते तत्सेवायां श्रद्धातिशयः स्यादिति तल्लक्षणमाह। महान्त इति। ये समचित्तत्वादिगुणवन्तस्ते महान्त इत्यन्वयः "मन ज्ञान" इति धातुविशेषेण ज्ञानशीलाः मनव्यवहारपरोचेति धातोर्विशिष्टव्यवहारशीला इति वा समे ब्रह्मणि चित्तं येषां ते तथा समं तत्तद्योग्यतानुसृतं चित्तं येषां ते तथेति वा साधवः रागादिदोषविधुराः ॥ २ ॥

वार्थे वाशब्दः ये च ईशे मयि कृतं सौहृदमेवार्थः प्रयोजनं येस्ते तथा देहंभराणां देहपोषण एव रतानामुक्तानुकदुरुक्तचिन्तालक्षणा वार्तिकं वार्तासमुदायो वा येषां ते तथा तेषु जायात्मजाश्च रातिर्मित्रं रा अर्थश्च येषां ते तथा तेषु न प्रीतियुक्तास्ते महान्तः किञ्च लोके जने यावाञ्छरीरयात्रादिलक्षणोऽर्थो येषां ते तथा ॥ ३ ॥

इदानीं देहम्भरवृत्तिं कथयति। नूनमिति। जन इन्द्रियाणां शब्दाद्यनुभवलक्षणप्रीतये यत्कर्म कुरुते नूनं निश्चयेन दीनः क्षीणः प्रमत्तोऽज्ञः तत्कर्मावृणोति स्वीकरोति कुत इत्यत उक्तम् यत इति। असन्नश्वरत्वादमङ्गलोऽपि विण्मूत्रादिपात्रत्वेन जुगुप्सितोऽयं देहो यतः कर्मणा आत्मनः कर्तुः क्लेशदः संसारास्यक्लेशद आसेति यतस्तस्मात्कर्म साधु श्रेयः साधनमिति न मन्ये नूनमिदानीं प्रमत्तः कर्तव्यतामूढोऽत एव दीनोऽयं जनः इन्द्रियप्रीतये तत्कर्म कुरुते यत्कर्मात्मानमेवावृणोत्याच्छादयति कथमावृणोतीति तत्राह। यत इति। यतो यस्मात्कर्मणा उत्पन्नोऽसन्नपि असाधुरेवायं देहः आत्मनः क्लेशद आस तस्मादेतत्कर्म करणं साधु न मन्य इति वा नूनं प्रायः कर्म कुरुते अत एव दीनः कथमिन्द्रियप्रीतये आवृणोतीति यत्तदपि कुत इत्यत्राह। यत इति। आत्मनः क्लेशद आसेति यतस्तस्मान्न साधु मन्य इति वा ॥ ४ ॥

तस्माज्ज्ञानमेव संसारनिवृत्तिसाधनमित्यभिप्रेत्य तन्निवृत्त्यवधिमाह। पराभव इति। यावदात्मतत्त्वं न जिज्ञासते तावत्पराभवः क्लेशः किम्बिासहेऽबोधजातः आत्मानात्मतत्त्वाज्ञानोत्पन्नः क्रियाः क्रियाफलं च तावद्येन कर्मात्मकेन मनसा शरीरबन्धः स्यात्तत्कर्मवशं बाह्यान्तःकरणलक्षणं मनश्च तावदित्यन्वयः ॥ ५ ॥

शरीरबन्धात्मकं करोतीत्यत्राह। एवमिति। अत्रात्मपदेन जीवपरावुभावपि गृह्येते एवमात्मानात्मतत्त्वाज्ञानिनः अविद्यया जीवपरयोः स्वरूपाच्छादिकया मायया आत्मनि जीवपरयोः स्वरूपे ऽवधीयमाने आच्छाद्यमाने सति कर्मवशं मनोजीवं विषयेषु प्रायुङ्क्त इत्यन्वयः एवं संसरणं कियन्तं कालमत्राह। प्रीतिरिति। प्रीतिः स्नेहलक्षणा भक्तिः ॥ ६ ॥

कालतो वा प्रारब्धकर्मनाशतो वा देहवियोगेनानन्दानुभवलक्षणा मुक्तिः स्यात्किम्भक्त्येत्याशङ्क्य बन्धध्वंसि भगवत्प्रसादान्तरङ्गभक्तिं विना न कदाप्यभिमतमुक्तिः स्यात्प्रत्युताज्ञादिकर्मपरम्परया विषयानुध्यानहेतुभूतया तृणजलूकवत्प्रवर्तमानस्य सन्ताप एव स्यादित्याह। यदेति। स्वतो विपश्चिज्ज्ञानात्मा यदा यथा गुणेहां स्वाभिमतविपरीतेन्द्रियप्रवृत्तिमनुकूलां पश्यति ममेदं हितमित्यङ्गीकरोति तदा सहसा गतस्मृतिर्नष्टशास्त्रानुसन्धानः स्मरणरहितो वा अतएव स्वार्थे प्रमत्तोऽत एवाज्ञः पुरुषो मैथुन्यं स्त्रीपुंसबन्धयोग्यमगारं गृहमासाद्य तत्र गृहे तापान्विन्दतीत्यन्वयः ॥ ७ ॥

केचिदेवंविधसंसारो मिथ्येति सङ्गिरन्ते तत्राह। पुंस इति। पुंसः स्त्रिया सहैषः मिथुनीभावः तयोः स्त्रीपुंसयोर्हृदयग्रन्थिं मनोबन्धपाशमाहुरित्यर्थः अर्थक्रियारूपत्वान्न मिथ्येति शेषः सकलतापानामेतदेव मूलमित्यतो वाह। पुंस इति। सुखसाधनान्वेषणायासेन तापा एव स्युरित्यर्थः हृदयग्रन्थिविकारप्रकारमाह। यत इति। अत एव दुःखं स्यादित्यर्थः। मिथुनीभावस्य तापहेतुत्वे कुटुम्बी शुचौ देश इत्याद्युक्त्या "न च पुनरावर्तते" इति कुटुम्बिनोऽपुनरावृत्तिलक्षणमुक्तिवचनात् कथं स निन्दामर्हतीति चेन्न प्रायिकत्वात्तस्य "ब्रह्माद्या याज्ञवल्क्याद्या मुच्यन्ते स्त्रीसहायिनः। बध्यन्ते केचनैतेषां विशेषं च विदो विदुः" इति वचनात् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

महदिति युग्मकम्। तत्र ब्रह्मसौख्यस्य निर्विशेषसविशेषताभेदेन द्वैविध्यप्रतिपादकं महतां द्वैविध्यमाह। समचित्ताः अभेददर्शिनः। तेषां साधनान्याह। प्रशान्ता इत्यादिना। उत्तरेषामपि साधनान्याह। जनेष्वित्यादिना। यावानर्थो मत्सौहृदमयभक्तिस्तावान् तदनुरूप एव नत्वधिकन्यूनः अर्थो धनं येषां ते ॥ १ ॥ २ ॥ ३ ॥

विकर्मात्र काम्यं कर्म। देहोऽपि मनुष्यदेह एव ॥ ४ ॥ ५ ॥

उपधीयमाने युज्यमाने यद्यप्येवमात्मतत्त्वबोधान्त एव बाधस्तथापि मत्प्रीतिं विना सोऽपि न सिद्ध्यतीत्याह। प्रीतिरिति ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

स्वभक्तिं स्वानुपादिश्य विधाय भरतं नृपम्।
प्रव्रज्य पञ्चमे देवो जडचर्य्यामदीदृशत् ॥

उपशिक्षयन्नुवाचेत्युक्तं तत्र भक्तियोगे प्रवर्त्तयितुं प्रथमं मनुष्यदेहस्य पुरुषार्थसाधनत्वं विषयभोगानौचित्यञ्चाह। नायमिति। कष्टान् कष्टप्रदान् कामान् योषिद्दर्शनस्पर्शनादीन् नार्हते नैवार्हति इति कुतः ये विड्भुजामपि सन्ति कामार्हत्वे मनुष्यदेहशूकरदेहयोस्तुल्यत्वापत्तेरिति भावः। तेन शूकरदेहादिभिर्यन्न लभ्यते तदेव मनुष्यदेहेन लब्धुं यतनीयं तदेव मनुष्यत्वचिह्नं किं तत्राह। तप इति। तच्चानाहारवर्षातपसहनादिकं वृक्षादीनामपि वर्त्तेत इति तद्व्यावृत्त्यर्थमाह। दिव्यमप्राकृतं भगवत्सम्बन्धीत्यर्थः हे पुत्रकाः। अनुकम्पायां कन्। सत्त्वमन्तःकरणम् ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

मनुष्यदेहादेवोद्धारोऽधःपातश्च भवतीति तयोः कारणमपि मनुष्यदेहेऽस्तीत्याह । महदिति । विमुक्तेर्विविधमुक्तेः ब्रह्मसौख्यं ह्यनन्तमिति पूर्वोक्तब्रह्मसौख्यस्य च निर्विशेषसविशेषब्रह्मसम्बन्धित्वेन द्विविध्यान्मुक्तिरपि सायुज्यं भक्तिमत्पार्षदत्वञ्चेति द्विविधा विशब्दाद्व्याख्येया महान्तोऽपि द्विविधा ब्रह्मोपासका भगवदुपासकाश्च तेषां लक्षणं तन्त्रेणैवाह । समचित्ताः अभेददर्शिनः अकुटिलचित्ताश्च प्रशान्ताः प्रशमादियुक्ताः भगवन्निष्ठबुद्धयश्च शमो मन्निष्ठता बुद्धेरिति भगवदुक्तेः विमन्यव इत्यादि विशेषणत्रयमुभयत्र तुल्यार्थं साधवः परदोषाग्राहिणः ॥ २ ॥

उत्तरेषामसाधारणं लक्षणं पुनराह । मयि ईशे कृतं सौहृदं प्रीतिरेव अर्थः पुरुषार्थो येषां मत्प्रीतेरन्यद्वस्तु ये पुरुषार्थं न मन्यन्त इत्यर्थः वाशब्देनान्यानिरपेक्षस्यास्यैव लक्षणत्वं दर्शयतीति श्रीस्वामिचरणाः देहम्भराणां भोजनपानाद्यासक्तानां या वार्त्ता जीविकाः कथा वा ताभिरेव ये दीव्यन्ति तेषु जनेषु जायादियुक्तेषु गृहेषु च विद्यमानेष्वपि न प्रीतियुक्ताः रातिर्धनं ननु तर्हि किमर्थं तेषु गृहेषु तिष्ठन्तीति तत्राह । यावद्भिरेव धनादिभिरर्थो मत्पादसेवनाद्यात्मिका भक्तिर्भवेत्तावन्त एवोपादेया येषां ते तावदादि पदानां वृत्तावन्तर्भावः ॥ ३ ॥

तमो द्वारात् योषित्सङ्गिसङ्गात् देहिन एवमधःपातः स्यादिति तं दर्शयति शोचति च । नूनमिति । विकर्म्म परदारादिग्रहणपापम् आपृणोति विकर्म्मण्येव व्यापृतो भवति यतो विकर्म्मणः प्राचीनादयं क्लेशदो देहो जातः तस्यैव पुनः करणं न साधु मन्ये देहः कीदृशः आत्मनो जीवस्य असन्नपि वस्तुतो न वर्त्तमानोऽपि ।"असङ्गो ह्ययं पुरुष" इति श्रुतेः ॥ ४ ॥

तर्हि पुण्यं कर्त्तव्यमितिचेन्न तस्यापि संसारहेतुत्वेन क्लेशहेतुत्वात् तस्मात् पुण्यपापयोर्निरासकं ज्ञानमेवाभ्यसनीयमेवेत्याह । पराभवः कर्म्मपारतन्त्र्यं तदेव जीवस्य बन्धः सचाज्ञानकृतस्तावदेव भवति यावन्न जिज्ञासत इति "ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुतेऽर्ज्जुन" इत्युक्तेः । यावज्ज्ञानं नोद्भवेत् तावत् कर्म्माणि न नश्यन्ति यावत् क्रियाः पुण्यपापकर्म्माणि स्युस्तावदिदं मनो हि कर्म्मात्मकं कर्म्म स्वभावमेव स्यात् येन कर्म्मात्मकेन मनसा ॥ ५ ॥

केन प्रकारेण मनः कर्मात्मकं स्यात्तमाह । एवमिति । कर्म्म प्राचीनमर्वाचीनं वा कर्त्तृ मनः कर्म्मभूनं वशं प्रयुङ्क्ते पुनः कर्म्मनिष्ठं करोति एवमनेन प्रकारेण मनः कर्म्मात्मकं स्यात् यद्वस्तु यदधीनं स्यात् तच्च तदात्मकमेव भवेदित्यर्थः । जीवन्मुक्तकर्म्मण्याावृत्त्यर्थमाह । अविद्ययेति । आत्मनि जीवे उपधीयमाने युज्यमाने सति उपाधिरूपाधिर्लिङ्गं तदध्यासात्तद्रूपीक्रियमाण इत्यर्थः किञ्च सर्व्वकर्म्मनिर्मूलीकरणी भक्तिरेवेत्याह । प्रीतिरिति ॥ ६ ॥

एवञ्च भक्तिमिश्रस्य ज्ञानस्य परिपाकदशायामेव नैष्कर्म्यं नत्वपरिपाकदशायामित्याह । यदा गुणेषु शब्दादिष्वर्थेषु ईहां वाञ्छाम् अथवा अनर्थरूपां विपश्चित् ज्ञानवानपि न पश्येत् यदानुपश्यतीति पाठे गुणानामिन्द्रियाणामीहां चेष्टाम् अथवा ममात्मन एवेयं चेष्टेत्यर्थः तत्र तदा सहसा गतस्मृतिः सन् तापान् विन्दति मैथुनार्हमगारं प्राप्य त्विततापानित्यर्थः ॥ ७ ॥

इन्द्रियचेष्टानामात्मीयत्वाभिमननसद्भावेऽपि स्वकुटुम्बसङ्गस्ततो यथा मोहस्तथा तद्रहितस्य नेत्याह । पुंस इति । मिथो हृदयग्रन्थिं ममेयं स्त्रीत्येकोऽयं ग्रन्थिस्तदुपरि ममायं पतिरिति द्वितीयो ग्रन्थिस्तेन पुंसा वैराग्येण त्यक्तुमिष्टापि स्त्रीनं तं जहातीति बन्धस्य गाढत्वमुपलक्षणमेवं पिता पुत्रयोरपि ज्ञेयम् । कुटुम्बराहित्ये तु वस्त्रासनपात्रादिष्वात्मीयत्वेनाभिमानसद्भावेऽपि मिथो ग्रन्थ्यभावान्न तादृशो बन्ध इति भावः अतो मिथो हृदयग्रन्थितो हेतोः गृहादिभिरहं गृही मम गृहमित्येवम् मोहो भवति ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पञ्चमे पुत्रादीन् प्रति मोक्षधर्मान्निरूप्य गृहादिभ्यो विरक्तोऽभूदृषभ इति वर्ण्यते तत्र तावद्विषयासक्तिर्बन्धहेतुः भगवत्सम्बन्धितप आसक्तिर्मोक्षहेतुरित्याह । नायमिति । कष्टान् दुःखोदर्कान् कामान् विषयान् दिव्यं परदेवसम्बन्धि तत्प्रावण्यरूपम् येन तपसा सत्त्वं शुद्ध्येत् ध्रुवास्मृत्यर्हं भवेत् यस्मात् ध्रुवास्मृत्यर्हात् सत्त्वात् ब्रह्मसौख्यं ब्रह्मसाम्यं भवेत् ॥ १ ॥

तपोरुच्युत्पादनद्वारा महत्सेवां विमुक्तेर्द्वारम् विषयरुच्युत्पादनद्वारा योषितां सङ्गिसङ्गं तमसः संसारस्य द्वारम् आहुर्बन्धमोक्षविद इति शेषः महल्लक्षणमाह । महान्त इति सार्द्धेन । कृतं सौहृदमेवार्थः प्रयोजनं येषां ते देहं बिभ्रतीति देहंभराः कलत्रापत्यादयस्तत्परा वार्त्ता येषां तेषु जनेषु जाया आत्मजाः रातिर्मित्रं धनं वा तद्वत्सु गृहेषु च न प्रीतियुक्ताः यावदर्थाः यावदर्थमेवार्थो येषामिति "शाकपार्थिवादीनामुत्तरपदलोपश्च" इत्यनेन समासः देहनिर्वाहो यावता भवेत्तावन्मात्रग्राहिण इत्यर्थः ॥ २ ॥ ३ ॥

महत्सेवां मुक्तेर्द्वारं योषितां सङ्गिसङ्गं संसारद्वारं चाहुरित्युक्तम् । अथात्र पञ्चभिः संसारप्रकारं तदनन्तरं षड्भिर्मुक्तिप्रकारं च प्रपञ्चयति । यद्यदा असत्सङ्गादिना नूनं निश्चितं प्रमत्तः इन्द्रियप्रीतये आपृणोति व्याप्रियते तदा विकर्म पापं कुरुते यतो विकर्मणः पूर्वकृतात् अयं असत् हरिसेवानर्हः अत एव क्लेशदो देहो जातः तस्यैव विकर्मणः पुनःकरणं न साधु मन्ये ॥ ४ ॥

पराभवो जन्ममरणप्रवाहलक्षणं संसारप्राप्तिः अबोधः आत्मानात्मपरमात्मविवेकस्तस्माज्जातः आत्मनः यद्विज्ञानेन सर्वं विज्ञातं स्यात्तस्य भगवतस्तत्त्वं यावन्न जिज्ञासते तत्र हेतुः यावत्क्रियाः विकर्मव्यापाराः तावत्कर्मात्मकं कर्मस्वभावमेव मनः स्यात् येन कर्मात्मकेन मनसा शरीरैः पुनः पुनर्जायमानैर्बन्धो यद्वा शरीरादिबन्धाः बन्धनानि यस्मिन् सः संसारः स्यात् जन्ममरणप्रवाहलक्षणः संसार एव स्यात् ॥ ५ ॥

एवमविद्यया आत्मानात्मपरमात्माविवेकेन आत्मनि जीवे उपधीयमाने आच्छाद्यमाने सति मनः उपधीयमानमात्मानं कर्मवशं प्रयुङ्क्ते पुनःपुनरात्मानं कर्मनिष्ठं करोति एवं विधस्य वासुदेवे यावत्प्रीतिर्न तावन्न देहयोगेन मुच्यते संसारान्मुक्तो न भवति ॥ ६ ॥

आविपश्चिदविवेकी स्वार्थे मोक्षमार्गे अप्रमत्तः गुणेहां मायागुणकारितामीहामयथामनिष्टां संसारप्रापिकाम् ॥ ७ ॥

यदा मनोहृदयग्रन्थिरस्य कर्मानुबद्धो दृढ आश्लथेत ।
तदा जनः सम्परिवर्ततेऽस्मान्मुक्तः परं यात्यतिहाय हेतुम् ॥ ९ ॥
हंसे गुरौ मयि भक्त्यानुवृत्त्या वितृष्णया द्वन्द्वतितिक्षया च ।
सर्वत्र जन्तोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या ॥ १० ॥
मत्कर्मभिर्मत्कथया च नित्यं मद्देवसङ्गाद्गुणकीर्तनान्मे ।
निर्वैरसाम्योपशमेन पुत्रा ! जिहासया देहगेहात्मबुद्धेः ॥ ११ ॥
अध्यात्मयोगेन विविक्तसेवया प्राणेन्द्रियात्माभिजयेन सध्र्यक् ।
सच्छ्रद्धया ब्रह्मचर्येण शश्वदसम्प्रमादेन यमेन वाचाम् ॥ १२ ॥
सर्वत्र मद्भावविचक्षणेन ज्ञानेन विज्ञानविराजितेन ।
योगेन धृत्युद्यमसत्त्वयुक्तो लिङ्गं व्यपोहेत्कुशलोऽहमाख्यम् ॥ १३ ॥
कर्माशयं हृदयग्रन्थिबन्धमविद्ययासादितमप्रमत्तः ।
अनेन योगेन यथोपदेशं सम्यग्व्यपोह्योपरमेत योगात् ॥ १४ ॥
पुत्रांश्च शिष्यांश्च नृपो गुरुर्वा मल्लोककामो मदनुग्रहार्थः ।
इत्थं विमन्युरनुशिष्यादतज्ज्ञान्न योजयेत् कर्मसु कर्ममूढान् ।
कं योजयन्मनुजोऽर्थं लभेत निपातयन्नष्टदृशं हि गर्ते ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पुंसः स्त्रिया सह मिथुनीभावं तयोः स्त्रीपुंसयोः हृदयग्रन्थिं हृदयग्रन्थिमूलमाहुः अतो हृदयग्रन्थितः अहं भोगीत्यादिमोहो गृहादिभिश्च बाह्यैर्गृहादयो ममेत्यादिमोहश्च भवति ॥ ८ ॥

भाषाटीका

भगवान् श्रीऋषभदेवजी बोले हे पुत्रो ! इस मनुष्यलोक में देहधारियों का जो देह है सो कष्टदायक कर्मों के करने को नहीं है जो कि कुत्सितकर्म सूकरादिक भी करते हैं यह मनुष्य देह तो तप करने के योग्य है जिस तप से अन्तःकरण शुद्ध होता है फिर अन्त में सुखकी प्राप्ती होती है ॥ १ ॥

महत्पुरुषों का सङ्ग मुक्ति का द्वार है स्त्रियों के सङ्गियों का सङ्ग नरक का द्वार है ऐसा शिष्ट जनों का कथन है महत्पुरुष वेही हैं जोकि समान चित्त वाले क्रोध रहित सब के कार्य के साधने वाले हैं ॥ २ ॥

अथवा जो ईश्वर मेरे मे प्रेमरूप प्रयोजन को जानने वाले हैं केवल देह के भरण पोषण वृत्ति वाले स्त्री पुत्र धन घर इनोंमें जिनकी प्रीति नहीं है संसार मे देह निर्वाह मात्र प्रयोजन रखते हैं ॥ ३ ॥

निश्चित है कि मनुष्य प्रमादी होकर इन्द्रियों की प्रीति के वास्ते पाप कर्मों में लगा रहता है तिस बात को मै ठीक नहीं मानता हूं जोकि देहादि असत्पदार्थ होकर भी क्लेशदाता है ॥ ४॥

जब पर्यन्त यह पुरुष आत्मतत्त्व को नहीं जानता है तब पर्यन्त आत्मा का अज्ञान रहता है तब ही तक संसार की क्रिया रहती है जबतक क्रिया है तबतक इस पुरुष का शरीर बन्धनरहता है ॥ ५ ॥

इस प्रकार अज्ञान से आत्मस्वरूप के आच्छादित हो जाने से मन इस पुरुष को अपने आधीन करलेता है जबतक हम वासुदेव में प्रीति नहीं होती है तबतक इसका देहयोग नहीं छूटता है ॥ ६ ॥

विवेकी भी होकर जबतक गुणों की प्रवृत्ति के दोषों को नहीं देखता है तबतक स्वार्थ में प्रमादी होते से शीघ्र ही अपने स्वरूप के भूलजाने पर अज्ञानी होकर मैथुन सुख के हेतु घर मे रहकर तहां दुःखों को भोगता रहता है ॥ ७ ॥

स्त्री पुरुष का परस्परमें जो प्रेम है सो हृदय की ग्रन्थि है ऐसा शिष्टजन कहते हैं इसी से गृहक्षेत्र सुत पुत्र धन इनोंसे पुरुष को अहन्ता ममता रूप मोह होता है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कदा तर्हि तस्य निवृत्तिरत आह । यदास्य जनस्य कर्मभिरनुबद्धो दृढो मनोरूपो हृदयग्रन्थिः शिथिलो भवेत्तदास्मान्मिथुनीभावान्निवर्तते ततश्च हेतुमहङ्कारं त्यक्त्वा मुक्तः सन्परं पदं याति ॥ ९ ॥

हेतुमतिहायेत्युक्तं तत्र पञ्चविंशतिसाधनान्याह चतुर्भिः । हंसे मयि गुरौ भक्तिः सेवा अनुवृत्तिस्तत्परता विगततृष्णया

लोकः स्वयं श्रेयसि नष्टदृष्टिर्योऽर्थान् समीहेत निकामकामः ।
अन्योऽन्यवैरः सुखलेशहेतोरनन्तदुःखं च न वेद मूढः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सर्वत्र लोकान्तरेऽपि व्यसनावगत्या दुःखानुसन्धानेन ईहानिवृत्त्या काम्यकर्मत्यागेन ॥ १० ॥

मदर्थैः कर्मभिः अहमेव देवो येषां तैः सङ्गात् हे पुत्राः ! देहगेहयोरात्मबुद्धेरहंममेति बुद्धेः ॥ ११ ॥

अध्यात्मयोगेनाध्यात्मशास्त्राभ्यासेन सम्यक् सम्यगिति सर्वत्र सम्बन्धः असंप्रमादेन कर्तव्यस्यापरित्यागेन ॥ १२ ॥

सर्वत्र मद्भावो मद्भावना तत्र विचक्षणेन निपुणेन विज्ञानविराजितेनानुभवपर्यन्तेन ज्ञानेन योगेन समाधिना धृत्युद्यमसत्त्वयुक्तो धैर्यप्रयत्नविवेकैर्युक्तः सन्नहङ्काराख्यमुपाधिं व्यपोहेन्निरस्येत् ॥ १३ ॥

ततः साधनादुपरमेदित्याह । कर्माशयमाशेरते यस्मिन् योगेनोपायेन यद्यपि फले सिद्धे साधनोपरमः सिद्ध एव तथापि यावद्देहपातं तदभ्यासशङ्कावारणायोक्तम् ॥ १४ ॥

किञ्च पुत्रान्पिता शिष्यान्वा गुरुर्नृपश्च प्रजा एवमनुशिक्षयेत् मम लोकं यः कामयते यद्वा मदनुग्रह एवार्थो यस्य विमन्युः शिक्षितस्याकरणेऽपि कोपशून्यः अतज्ज्ञांस्तत्त्वमविदुषः श्रेयोबुद्ध्या कर्मसु मूढान् अन्यथोपदेशे प्रत्यवायमाह । मनुजः काम्यकर्मसु पुरुषं योजयन् गर्ते संसारकूपे तं पातयति स मनुजः कमर्थं पुरुषार्थं लभेत न कमपीत्यर्थः ॥ १५ ॥

न योजयेदित्येतदुपपादयति । लोक इति त्रिभिः । नष्टदृष्टित्वे हेतुः । य इति । निकाममतिशयेन कामो यस्य ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हृदयग्रन्थिशैथिल्यमेव मुक्तिहेतुरित्याह । यदेति । अस्य पुरुषस्य दृढिमो दार्ढ्ययुक्तः कर्मानुबन्धः कर्म अनुसृत्य बध्यते सम्बन्ध्यते इति कर्मानुबन्धः कर्मणि क्रियमाणे तत्पृष्ठभागेन प्राप्तमित्यर्थः यद्वा कर्मानुबध्यते प्राप्यते येन स कर्मानुबन्धः यस्मिन् सति नान्तरीयकं कर्म सकर्मानुबन्ध इत्यर्थः एवं भूतो मनोहृदयग्रन्थिः मनोरूपं यदन्तःकरणं हृदयशब्दस्य हृदयस्थानपरत्वशङ्कानिवृत्तये मन इत्युक्तं तद्गतो ग्रन्थिर्वासनारूपः यद्वा हृदयग्रन्थिशब्दो वासनायां रूढः मनसो यो हृदयग्रन्थिर्यदा श्लथेत शिथिलो भवेत्तदा जनः अस्मात्सम्परिवर्त्ततः संसारान्मुक्तः हेतुं कर्मरूपहेतुमतिहाय पुण्यपापे विधूयेत्यर्थः परं परमपुरुषं याति ॥ ९ ॥

इदानीं हृदयग्रन्थिशैथिल्ये साधनान्याह चतुर्भिः । हंसेऽविद्यादोषसंस्परहिते गुरौ हितोपदेष्टरि मयि यद्वा मद्रूपे गुरौ भक्त्या गुरुभक्तेः प्रथमकारणत्वात् अनुवृत्त्या सेवया तत्परतया शब्दादिषु वितततृष्णया द्वन्द्वानां शीतोष्णादीनां तितिक्षया सर्वत्रेहामुत्र च जन्तोर्व्यसनावगत्या दुःखानुसन्धानेन जिज्ञासया हेयोपादेययोर्ज्ञानेच्छया तपसा नाशकेन तपसा ईहानिवृत्त्या तृष्णाकाङ्क्षानिवृत्त्या ॥ १० ॥

मत्कर्मभिर्मदाराधनरूपैर्वर्णाश्रमोचितकर्मभिः भगवत्कथया चाहमेव देवो येषां ते भागवतास्तेषां सङ्गात् मद्गुणकीर्त्तनात् निर्वैरादीनां समाहारद्वन्द्वः निर्वैरादिभिः हे पुत्राः ! देहगेहयोरात्मीयबुद्धेर्जिहासया त्यागेच्छया ॥ ११ ॥

अध्यात्मयोगेन प्रकृतिविलक्षणात्मयाथात्म्यानुभवयोगेन विविक्तसेवया । विशुद्धाहारेण सम्यक् प्राणेन्द्रियमनसां जयेन सच्छ्रद्धया सदुपायविषयश्रद्धया ब्रह्मचर्येण स्त्रीसङ्गादिराहित्येन शश्वत् सर्वदासम्प्रमादेन कर्तव्यस्यापरित्यागेन वाचांयमेन नियमेन ॥ १२ ॥

सर्वत्र भूतेषु मद्भावविचक्षणेन ब्रह्मात्मकत्वप्रदर्शनेन विज्ञानं शास्त्रं तेन विराजितेन उद्दीपितेन ज्ञानेन ध्यानात्मकेन योगेन समाधियोगेन नच धृत्युद्यमसत्त्वयुक्तो धैर्यप्रयत्नव्यवसायैर्युक्तः सत्त्वशब्दो व्यवसायपरः उक्तसाधनकलापे तत्साध्ये च व्यवसायस्ततः प्रयत्नस्तत्र धैर्यमेवमुक्तेन साधनज्ञानेन कुशलः सन्नहमाख्यं देहाहङ्काराख्यं लिङ्गं बन्धहेतुं यद्वाहङ्कारगोचर देहेऽहंशब्दो लक्षणया वर्तनेऽहंबुद्धिविषयं लिङ्गं देहं व्यपोहेदपनुद्यात् उक्तसाधनकलापोपचितया भगवद्भक्त्या हृदग्रन्थिशैथिल्यापादनद्वारा देहसम्बन्धं व्यपोहेदिति भावः ॥ १३ ॥

तदेवाह । कर्माशयं कर्मवासनारूपं हृदयग्रन्थिबन्धं कथम्भूतमविद्ययाहङ्कारादिरूपाविद्यया कर्मद्वारा आसादितं प्रमादरहितः यथोपदेशमुपदेशप्रकारमनतिक्रम्यानुष्ठितेन योगेन सम्यग्व्यपोह्य योगादुपरमेत् यावत्कर्माशयव्यपोहं योगोऽनुष्ठेय इत्यर्थः ॥ १४ ॥

एवं संसारैकभेषजं योगमुपदिश्य हितोपदेशस्तस्मिन्नेव योगे लोको नियोज्य इत्याह । पुत्रांश्चेति । मल्लोकं मत्सारूप्यं कामयमानः मदनुग्रहो यस्यार्थः प्रयोजनतयाभिमतः स मदनुग्रहार्थः पिता पुत्रान् गुरुः शिष्यान्नृपः प्रजाः विमन्युः शिक्षितस्याकरणे कोपशून्यः अतज्ज्ञानुक्तयोगमज्ञानान् इत्थमनुशिक्षयेत् नतु कर्ममूढाननादिपुण्यापुण्यरूपकर्मणा मूढानज्ञान् पुनः कर्मसु योजयेत् ॥ १५ ॥

एतदेवोपपादयति । लोक इति त्रिभिः । लोकः स्वयं श्रेयसि नष्टदृष्टिस्तत्साधनज्ञानशून्यः तत्र हेतुः यो लोकः निकाममतिशयेन कामो यस्य तथाभूतः सन्नर्थान् शब्दादिविषयानेव समीहतेऽनर्थावहार्थसाधनकर्माण्येव कुरुते अतः श्रेयसि नष्टदृष्टिरिति भावः अर्थानामनर्थगर्भत्वेन तत्प्रसाधनं श्रेयोऽनभिज्ञतामूलमित्याह । अन्योऽन्येति । सुखलेशानां शब्दादीनामर्थहेतोः कर्मणः अन्योऽन्यवैरं ततः अनन्तदुःखं च न वेदातो मूढः श्रेयसि लोक इत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सर्वदुःखनिवृत्तौ किं कारणमित्यतो हृदयग्रन्थिविनाश एवेत्याह । यदेति । कर्मणामनुबन्धः परम्परा यस्य स कर्मानुबन्धः संसारहेतुं हृदयग्रन्थिमतिहाय परं ब्रह्म यातीत्यन्वयः ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

(१) भक्त्यादिसाधनसम्पत्त्या सत्यस्यापि बन्धस्य निवृत्तिः सुघटा गरुडध्यानेन विषनिवृत्तिवदित्यभिप्रेत्य तत्साधनमाह । हराविति । हरौ मयि गुरौ स्थिते हरौ मयीति वा अनुवृत्त्या-निरन्तरसेवया सर्वत्र योनिषु व्यसनावगत्या त्रिविधक्लेशोऽस्तीति ज्ञानपूर्वकविचारेण जिज्ञासया वेदान्तवाक्यविचारेण पञ्चाग्नि-मध्यस्थित्यादितपसा ईहा निवृत्त्या आत्मविहितकर्मव्यतिरिक्त-कर्मपरित्यागेन तदुक्तम् ।

आत्मनोऽविहितं कर्म वर्जयित्वान्यकर्मणः ।
कामस्य वा परित्यागो निरीहेत्यभुरुत्तमाः ॥

इति मत्कर्मभिर्मदाराधनलक्षणैः मम पादः स्वरूपं येषु ते मत्पादास्तेषां महतां सङ्गात् मम प्रतिमासेवालक्षणसङ्गाद्वा देवकीनन्दननन्दकुमारेत्यादिगुणनामसङ्कीर्तनात् ॥ १० ॥

भूतेषु निर्वैरेण साम्येनोपशमेन च देहात्मगेहात्मबुद्धेर्जिहा-सया हानेच्छया अध्यात्मयोगेन नाडीशोधनादिलक्षणेन प्राणा-स्येन्द्रियाणामात्मनो मनसश्चाभिजयेन वशीकरणेन ॥ ११ ॥

सत्या प्रशस्तया श्रद्धया असंप्रमादेन इतिकर्तव्यतायाः अविस्मृत्या वाचामिति पुनर्वागिन्द्रियग्रहणं दुःशास्त्राभ्यासनिवृत्त्यर्थं सर्वदा मौनकरणार्थं वा मद्भावविचक्षणेन सर्वत्र मम सत्तालक्षणव्याप्ति दर्शनेन येन मुक्तिः स्यात्तद्विज्ञानं तेन विराजितेन तेजितेन प्रतिजीवं विष्णुः सर्वस्मादुत्तम इति यत्तेन ज्ञानेन तदुक्तम् ।

सर्वस्मादुत्तमो विष्णुरिति ज्ञानमुदाहृतम् ।
प्रतिजीवं येन मुक्तिस्तद्विज्ञानं विदां मतम् ।

इति यद्वा यद्विष्णोरुत्तमत्वज्ञानं तदेव प्रतिपुरुषं विशेषविषयं तद्विज्ञानं तेन विराजितेन विशेषितेन ज्ञानेन अनयोर्विशेषं च सर्वज्ञो गुरुर्जानाति तदुक्तम् ।

ज्ञानं विष्णोरुत्तमत्वे तदेव प्रतिपुरुषम् ।
विशेषेण तु विज्ञानं तच्च जानाति सर्ववित् ।

इति च स्वस्वयोग्यतानुसारेण सर्वेषामपि सर्वज्ञत्वेन तज्ज्ञा-नमपि विज्ञानं स्यादित्यतो व्यावृत्तलक्षणं वक्तव्यं तत्किमिति चेदुच्यते द्वात्रिंशल्लक्षणाद्युपेत एव सर्वज्ञ इत्युच्यते न तु स्वयो-ग्यतानुसारेण विद्वांस्तदुक्तम् ।

द्वात्रिंशल्लक्षणैर्युक्तस्तीक्ष्णदंष्ट्रश्च सौम्यदृक् ।
घोरदृक् चेति पुरुषः सर्वज्ञः स उदाहृतः ।

इति सर्वज्ञस्य गुरोः प्रत्यक्षलक्षणान्यपि शास्त्रैर्निरूप्यन्ते

षण्णवत्यङ्गुलो यस्तु न्यग्रोधपरिमण्डलः ।
सप्तपादश्चतुर्हस्तः स देवैरपि पूज्यते ।

इत्यादौ न्यग्रोधपरिमण्डलो बाहुद्वयमण्डलमण्डितः "न्यग्रोधमण्डलो व्यामो बाहुन्यग्रोध उच्यते" इतिवचनात् ॥ १२ ॥

योगेन ध्यानेन जिह्वोपस्थेन्द्रियजयो धृतिः वैष्णवसिद्धा-न्तादचलनं वा उद्धवसत्त्वं स्पष्टीकृतसत्त्वगुणः ताभ्यां युक्तः भूत्वा उद्भवेन उत्कृष्टजन्मना सत्त्वेन ब्रह्मकल्पावध्यनशनेऽव्य-म्लानेन युक्त इति वा अहमाख्यमहङ्कारशब्दवाच्यं लिङ्गं शरीरं व्यपोहेत् त्यजेत् किंविशिष्टं लिङ्गं कर्माशयाशेरतेऽस्मिन्निति कर्माशयं हृदयग्रन्थिं मिथुनीभावलक्षणं बध्नातीति हृदयग्रन्थिबन्धमविद्ययाज्ञानेन प्राप्तम् ॥ १३ ॥

अनेनोक्तेन योगेन व्यपोह्य निरस्य पश्चाद्योगादुपरमेत प्रासादात् प्रेक्षत इतिवत्पश्चाद्योगमुपगम्य क्रीडत इत्यर्थः उक्तमतिदिशति । पुत्रानिति । शिक्षाफलमाह । मदनुग्रहार्थ इति । ममानुग्रह एवार्थः प्रयोजनं यस्य स तथा मत्प्रसादलभ्यो मोक्षो यस्येति वा ॥ १४ ॥

विमन्युर्ज्ञानशीलः विगतपापो वा निरस्तक्रोधो वा अतज्ज्ञा-नब्रह्मज्ञान् ननु कर्मकरणप्रेरणायां गुरुत्वेन पूजादिलाभात् किमिति न योजयेदित्युच्यते इति तत्राह । कं योजयन्निति । प्रवृत्ति-कर्मणि प्रेरयन् कमर्थं लभते न कमपि प्रत्युतज्ञानचक्षुरहित-स्याधःपातहेतुत्वेन स्वस्यापि नरकपातः स्यादित्यभिप्रेत्याह । निपा-तयन्निति ॥ १५ ॥

माभूत्परोपदेशस्तथापि स्वयमेव प्रवर्तमानो जनोऽर्थान् लभ-तामत्राह । लोक इति । नितराङ्कामकामो विषयभोगेच्छा यस्य स तथा अत एव श्रेयसि नष्टशास्त्रदृष्टिः स्वयमुपदेशं विना यो लोको जनोऽर्थानापादयितुं समीहेत इच्छेत्स जनस्तेषामर्थानां मध्ये कं पुरुषार्थं लभते न कमपीति पूर्वेणान्वयः न केवलं पुरुषार्थानवाप्तिरपि तु बहुदुःखावाप्तिश्च स्यादित्याह । अन्योऽन्येति । सुखलेशहेतोरन्योऽन्यवैरमनन्तदुःखं च मूढो न वेद ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

हेतुमतिहायेत्युक्तम् । तत्र च प्रीतिरेव कारणमुक्तं सा च तत्र द्विधा प्रवर्त्तते स्वमात्रपुरुषार्थानां स्वद्वारा मुमुक्षूणान्तु ज्ञान-द्वारेति किन्त्वन्येच्छुत्वात् प्रीत्याभास एवैषां ज्ञेयः तत्रोभय-त्रापि गुरुभक्तिरपेक्षत इत्याह । हंस इति चतुष्केण । तत्र पूर्वेषां साधनान्याह । वितृष्णयेति पञ्च पद्या ॥ १० ॥

अपरेषामाह । निर्वैरेतिद्वाभ्याम् । अतो लिङ्गं व्यपोहेदिति पूर्वैरुत्तरैश्च पृथग् योज्यम् योगेन धृत्युद्यमसत्त्वयुक्त इति तूभय-त्रैव वितृष्णया तृष्णाविगमेनेत्यर्थः । जिज्ञासया शास्त्राद्भगवत्त-त्त्वविचारेण तपसा भगवत्प्रीणनस्वधर्मेण ईहा निवृत्त्या ऐहिकपारलौकिककामनान्तरनिवर्त्तनेन ततश्च नित्यं मत्कर्म-भिर्मद्दर्शनपादसेवनलक्षणैरित्यादिब्रह्मचर्य्येण कायमनोवाग्गतेन ॥ ११-१२ ॥

अत्र प्रीति बीजं विन्यस्यति । सर्वत्र मद्भावेति । योगेन उपायेन धृत्यादियुक्तः सन् ॥ १३ ॥

अभिनिवेशार्थं तदेव संक्षिप्य पुनराह । कर्मेति । अनेन पूर्वो-क्तेन योगेन उपायैकतरेण तेन च न पुस्तकदर्शनमात्रस्यो-त्प्रेक्षितेन अपितु यथोपदेशं श्रीगुरुशिक्षितप्रकारेणैवेत्यर्थः । उपरमेतेति । प्रीतिपुरुषार्थिना अनुसङ्गमात्रेण तद्व्यपोहिकायाः प्रीतेरेव स्वयं सिद्धेः मुमुक्षूणां तद्व्यपोहातिरिक्तसाध्याभा-वात् ॥ १४—१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कदा तर्हि मुक्तिरत आह । यदा मनोरूपो हृदयग्रन्थिरस्य

(१) अत्र त्रिभिश्चरणैः श्लोकस्तत्र पञ्चदशपर्यन्तं मूलटीकयोः क्रियानास्तिभेदस्ततस्तौल्यम् ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी॥

जनस्य कर्म्मभिरनुबद्धोऽपि ज्ञानवैराग्याभ्यासेन शिथिलो भवेत्तदा अस्मान्मिथुनीभावान्निवर्तते ततश्च हेतुमहङ्काराख्यमुपाधिं त्यक्त्वा मुक्तः सन् परम्पदं याति॥९॥

भक्तिमिश्रज्ञानेन लिङ्गभङ्गमुक्त्वा ज्ञानमिश्रया च भक्त्या पञ्चविंशत्यङ्ग्या लिङ्गभङ्गमाह। चतुर्भिः। तत्रापि शुद्धभक्तानां केवलयैव भक्त्या पञ्चदशाङ्गया लिङ्ग भङ्गमाह। प्रथमद्वाभ्याम्। हंसे परमहंसस्वरूपे मयि गुरौ भक्त्येत्यादिभिः अहमाख्यं लिङ्गं लिङ्ग-देहं व्यपोहेदित्यन्वयः। वितृष्णया निष्कामतया जिज्ञासया भक्ते-र्भजनीयेश्वरस्य चेति शेषः। तपसा एकादशीकार्त्ति-कादिव्रतलक्षणेन विष्णुवैष्णवसेवानिबन्धनस्वीयभोजनशय-नादिसङ्कोचलक्षणेन च। ईहानिवृत्त्या व्यापारान्तरराहि-त्येन अहमेव देवः प्रभुर्येषां तैः सङ्गात् निर्वैरमद्वेष्टृत्वम् साम्यमन्यस्य सुखदुःखयोः स्वसुखदुःखसाम्यभावना उप-शमः क्रोधशोकादेस्तेषां द्वन्द्वैक्यं तेन देहगेहादिस्वात्मी-यत्वबुद्धेस्त्यागासामर्थ्येऽपि त्यागेच्छया असंभ्रमादेन कर्त्तव्य-स्यापरित्यागेन मद्भावविचक्षणेन मदीयसत्तादर्शनेन विज्ञान-विराजितेन विज्ञानजनकेनेत्यर्थः। अनुभवजनकत्वमेव ज्ञानस्य विराजनमिति भावः योगेनाष्टाङ्गेन सत्त्वमुत्साहः व्यपोहेत् निरस्येत्॥१०—१३॥

ततश्च लिङ्गभङ्गार्थकसाधनादुपरमेदित्याह। कर्मेति। यथोपदेशं योगेन गुरूपदेशमनतिक्रम्य यो योग उपायस्तेन ननु पाण्डित्यबलात् पुस्तकदर्शनमात्रादेव स्वोत्प्रेक्षितेन कर्म्माशयाशेरते यस्मिंस्तं बन्धं व्यपोह्य निरस्य योगादुपायात् विरमेदिति लिङ्गव्यपोहनार्थमेव विरमेत् ननु तत्पदार्थज्ञानार्थ-मित्यर्थः। तदर्थस्तु भक्तिं कुर्व्वीतैव यदुक्तम्।

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।
समः सर्व्वेषु भूतेषु मद्भक्तिं लभते पराम्।
भक्त्या मामभिजानाति यावान् यश्चास्मितत्त्वतः।

इति तत्पदार्थानुभवसिद्धेऽपि भक्तेः सर्व्वथैवात्याग आत्मारा-माश्च मुनय इत्यादिप्रमाणाद्व्याख्येय एवेत्यतो भक्तिभिन्नादुपा-यान्निरमेदिति केचिदाहुः॥१४॥

एवं भक्तेर्गुणीभावमन्तर्भूतकैवल्यश्चोक्त्वा भक्तेरुपदेष्टापि कृतार्थः स्यादित्याह। पुत्रानिति। विमन्युः शिक्षितस्याकरणेऽपि कोपशून्यः कर्मसु न योजयेत् कर्म्मैव कुरुतेति नोपदिशेत्। 'जोषयेत् सर्व्वकर्म्माणि विद्वान् युक्तः समाचरन्'' इतितज्ज्ञानोपदेष्टृ-विषयं ननु भक्त्युपदेष्टृविषयमिति ज्ञेयम्॥१५॥

एतदेवोपपादयति। लोक इति त्रिभिः। अर्थान् भोग्यपदार्थान् स्त्रीपुत्रादींश्च निकाममतिशयेन काम एव यस्य सः॥१६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मुक्तिप्रकारं प्रपञ्चयति। यदेत्यादिना। यदा मनोहृदयग्रन्थिः आश्लेषेत शिथिलो भवेत् तदा अस्मात् संसारात् अबोधजात् हेतु-मबोधं पूर्वोक्तमतिहाय संपरिवर्तते मुक्तो भवति मुक्तश्च परंपर-मात्मसाधर्म्यं याति च॥९॥

तत्र साधनान्याह। हंसेत्यादिना। हंसे परमहंसे गुरौ मयि च॥१०॥

अहं देवो येषां तेषां सङ्गात्॥११॥

सध्र्यक् सम्यक्॥१२॥

सर्वत्र मद्भावे विचक्षणेन सुदृढेन योगेन ध्यानाभ्यासेन धृत्युद्यमसत्त्वयुक्तः धैर्यसाधितेनोद्यमेन साधनावृत्त्यात्मानात्मपर-मात्मबोधयुक्तः अहमाख्यं लिङ्गं तदुपलक्षितं संसारं व्यपो-हेत् त्यजेत्॥१३॥

एतदेवाह। कर्माशयमिति। कर्माणि संसारप्रदान्याशेरते यस्मिन् तत् अनेन योगेन साधनयोगेन सम्यग्व्यपोह्य निरस्य योगात् युज्यते इति योगः जन्ममरणप्रवाहलक्षणः संसारस्तस्मात्॥१४॥

अतिदिशति। इत्थं यथा मया पुत्रादयः शिक्षिताः तथा अन्योऽपि पिता पुत्रान् गुरुः शिष्यान् नृपः नॄन् अनुशिष्यात् अनुशिक्षयेत् कर्ममूढान्कर्मसु न योजयेत् ननु कर्मसु यस्तान् योजयेत्स स्वर्गं गच्छेत्स्वरप्राप्तिमार्गोपदेशतः किं स्यादत्राह। मल्लोक-कामः मदनुग्रह एवार्थः प्रयोजनं यस्य सः॥१५॥

कर्मसु न योजयेदिति यदुक्तं तदेव द्रढयति। द्वयेन। निकामकामः अत्यन्तः कामो यस्य सः॥१६—१७॥

भाषा टीका।

जब कर्मो से बंधे हुये इस पुरुष के मन की हृदय-ग्रन्थि छूट जाती है तब इस मिथुन भावसे छूटकर अनर्थ का कारण अहङ्कार को छोडकर मुक्तिमार्ग को प्राप्त होता है॥९॥

छूट ने के साधन ये हैं विवेककारक हंसरूपी के गुरू मे भगवान् मे भक्ति के होने से अनुवर्तनकरने से विषय तृष्णा छोडने से सुख दुःखों के सहने से सब कार्यों मे जीव के दुःख देख ने से तत्त्व विचार से काम्य कर्म के त्याग से॥१०॥

प्रतिदिन हमारे पूजादिकर्मों से हमारी कथा से हम को देवता मानने वाले भक्तों के सङ्ग से हमारे गुणों के कीर्तन से निर्वैरता से समता से चित्तकी शान्ति से देहगृहादि-क मे जो आत्मबुद्धि तिस के छोडने से॥११॥

अध्यात्मयोग से एकान्त सेवासे प्राण इन्द्रिय मन इनों के अच्छीतरह से जीतने से शास्त्र में अच्छी श्रद्धासे निरन्तर ब्रह्मचर्यसे सावधानतासे वचनों के नियमन से॥१२॥

सर्वत्र हमारे भाव के देखने से अनुभव सहित ज्ञान के होनेसे समाधिसे धैर्यसहित यत्न के करने से कुशलपुरुष का अहङ्कारनामक लिङ्ग देह छूटजाता है॥१३॥

अविद्या से प्राप्त हुआ जो कर्मोंका स्थान हृदयका ग्रन्थि अज्ञान तिसको उपदेश के अनुसार इस उपाय से अच्छी-तरह दूरकरके सब उपायों से निवृत्त होजावे॥१४॥

मेरे अनुग्रह को चाहने वाला मेरे लोकको चाहने वाला पुरुष राजा अथवा गुरु अपने पुत्रों को तथा शिष्यों को क्रोधरहित होकर जो कि अज्ञानी हैं तिनको इस प्रकार शिखावे जो कर्ममे मोहित हैं तिनको कर्म मे संयुक्त नहीं करै काम्यकर्मों में उन को लगाने से मनुष्य को क्या अर्थ लाभ होगा॥१५॥

कस्तं स्वयं तदभिज्ञो विपश्चिदविद्यायामन्तरे वर्तमानम् ।
दृष्ट्वा पुनस्तं सघृणः कुबुद्धिं प्रयोजयेदुत्पथगं यथान्धम् ॥ १७ ॥
गुरुर्न स स्यात् स्वजनो न स स्यात्पिता न स स्याज्जननी न सा स्यात् ।
दैवं न तत्स्यान्न पतिश्च स स्यान्न मोचयेद्यः समुपेत मृत्युम् ॥ १८ ॥
इदं शरीरं मम दुर्विभाव्यं सत्त्वं हि मे हृदयं यत्र धर्मः ।
पृष्ठे कृतो मे यदधर्म आराद‌तो हि मामृषभं प्राहुरार्याः ॥ १९ ॥
तस्माद्भवन्तो हृदयेन जाताः सर्वे महीयांसममुं सनाभम् ।
अक्लिष्टबुद्ध्या भरत भजध्वं शुश्रूषणं तद्भरणं प्रजानाम् ॥ २० ॥

भाषाटीका ।

सब लोक स्वयं अपने कल्याण में नष्टज्ञान होगया है जोकि अत्यन्त कामी होकर विषयों को चाँहता है थोडेसुख के लिये परस्पर मे वैर करता है मूढ होने से अनन्त दुःख को नहीं जानता है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तमीदृशं कुबुद्धिं दृष्ट्वा तत्रैव कस्तं प्रवर्तयेन्न कोऽपि उत्पथेन गच्छन्तमन्धं यथा तेनैव गच्छेति को ब्रूयात् ॥ १७ ॥

समुपेतः सम्प्राप्तो मृत्युः संसारो येन तं ततो भक्तिमार्गोपदेशेन यो न मोचयेत्सगुर्वादिर्न भवतीत्यर्थः यद्वा यस्तं मोचयितुं न शक्नुयात्स तस्य गुर्वादिर्न स्यादिति निषेधः ततश्च पिता न स्यादिति पुत्रोत्पत्तौ यत्नो न कार्य इत्यर्थः दैवं देवता न स्यादिति पूजा न ग्राह्येत्यर्थः एवमन्यदपि द्रष्टव्यम् ॥ १८ ॥

एवं मोक्षधर्मानुपादिश्य भ्रातृशुश्रूषणलक्षणं धर्मं स्पर्द्धादिनिवृत्तये तेषां जन्मकथनपूर्वकमाह । द्वाभ्याम् । इदं मनुष्याकारं शरीरं मम दुर्विभाव्यमवितर्क्यं मदिच्छाविलसितम् नत्वहं प्राकृतो मनुष्य इत्यर्थः मे हृदयं तु सत्त्वं किं तद्धृदयं यत्र धर्मस्तत् शुद्धं सत्त्वमित्यर्थः कुतः यद्यस्मान्मयाधर्मो दूरादेव पृष्ठे कृत उत्सारितः अत एवमामृषभं श्रेष्ठं प्राहुः ॥ १९ ॥

भवन्तश्च हृदयेन शुद्धसत्त्वमयेन जातास्तस्मान्मत्सरं हित्वा महत्तमं सनाभं सोदरं भजध्वम् ननु त्वत्पुत्रत्वात्त्वां वयं भजेम राजपुत्रत्वात्प्रजाश्च पालयामेति चेदत आह । तदेव मे शुश्रूषणं प्रजानां च पालनं भरतानुवृत्त्यैव सर्वं कृतं स्यादिति भावः ॥ २० ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका

एवमविद्यायामन्तरे वर्तमानमज्ञानान्तरे वर्तमानं कर्ममार्ग एव वर्तमानमिति वा तं श्रेयसि नष्टदृष्टिःपुरुषं दृष्ट्वा स्वयं तदभिज्ञः श्रेयस्तत्साधनाभिज्ञः अत एवविपश्चिद्धेयोपादेयविभागज्ञः सुहृत्तमः पुमान् कुबुद्धिं तत्र कर्मणि पुनः प्रयोजयेत् शत्रुश्चेत्कर्मणि प्रयोजयेदित्यर्थः तत्र दृष्टान्तः यथानुत्पथेन गच्छन्तमन्धं तेनैव गच्छेति यो ब्रूयात्तद्वदिति ॥ १७ ॥

यस्तूक्तभक्तियोगोपदेशेन संसारान्न मोचयेत्तस्य गुरुत्वादिकमेव नास्तीत्याह । गुरुरिति । यः गुर्वादिर्हिताद्युपदेष्टापि समुपेतः संप्राप्तो मृत्युः संसारो येन तं पुमांसं योगोपदेशेन संसारान्न मोचयेत्स गुर्वादिरेव न भवतीत्यर्थः ॥ १८ ॥

एवं तावन्मोक्षधर्मानुपदिश्य भ्रातृ शुश्रूषालक्षणं धर्मं स्पर्द्धादिनिवृत्तये तेषां जन्मकथनपूर्वकमाह द्वाभ्याम् । ममेदं शरीरं दुर्विभाव्यमितरसजातीयत्वेन विभावयितुमशक्यमित्यर्थः कुतः हि यस्मात् सत्त्वं मे हृदयं हृद्यं सत्त्वप्रचुरं ममेदं शरीरं रजस्तमःप्रचुरमिति सजातीयत्वेन दुर्विभाव्यमित्यर्थः किन्तत्सत्त्वं यद्धृदयं म इत्यत्कं तत्राह । यत्र सत्त्वे धर्मः अग्रे कृतः यत्र चाधर्मआरात् दूरात् पृष्ठे कृतः भागवतधर्मरोचकं प्रवृत्तिधर्मरोचकं यत्तत्सत्त्वमित्यर्थः यतः सत्त्वप्रचुरं मच्छरीरमतो मामार्या ऋषभं श्रेष्ठं प्राहुः ॥ १९ ॥

हृदयेन सत्त्वप्रधानहृदयेनोपलक्षिताः तस्मात् मच्छरीराज्जाताः भवन्तः सर्वे सत्त्वप्रचुराः अतः सनाभं सोदरं महीयांसं भवतां पूज्यममुं भरतमक्लिष्टबुद्ध्या निष्कपटभावेन भजध्वं ननु त्वत्पुत्रत्वात्त्वां वयं भजेम राजपुत्रत्वाच्च प्रजाश्च पालयाम इति तत्राह । तदेव मे शुश्रूषणं प्रजानां च पालनं भरतभजनेनैव तदुभयं कृतं स्यादिति भावः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तर्ह्यमूढो वेत्तीत्यायातं तदस्तु ततः किं तत्राह । कस्तमिति । स्वयं तदभिज्ञः प्रवृत्तिधर्मादनन्तदुःखावाप्तिमभिजानन् । को विपश्चित् ज्ञानी पुरुषः अविद्यायामन्तरे अज्ञाननिमित्तसंसारबिले वर्तमानं कुबुद्धिं तं दृष्ट्वा सघृणो दयालुः पुनरपि तं पुरुषं प्रवृत्तिधर्मे प्रयोजयेत् न प्रयोजयतीत्यर्थः कथमिव उत्पथगं मार्गं विहाय गच्छन्तमन्धं यथा कुमार्गे न योजयति तथेत्यर्थः ॥ १७ ॥

इतोऽपि प्रवृत्तिधर्मस्योपदेष्टॄणां गुरुत्वादिकमपि न स्यादित्याह । गुरुरिति । समुपेतमृत्युमज्ञानादवाप्तसंसारं प्रवृत्तिधर्मस्योपदेष्टरि शिष्येण गुर्वादिबुद्धिरपि न कर्तव्येत्यतोवाह । गुरुरिति । गुरुरिति पूज्यो न स्यादित्याद्युक्तम् ॥ १८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अतो गुर्वादिना हरेः स्वरूपमुपदेष्टव्यमित्याशयवानाह । इदं शरीरमिति । दुर्विभाव्यं दुर्निरूप्यम् अपरिच्छिन्नत्वादभौतिकत्वात् ज्ञानात्मकत्वाच्च कुत इत्यत्राह । सत्त्वमिति । मे सत्त्वं बलं ज्ञान-समाहारलक्षणं वस्तुहृदयं हि यस्मात्तस्मात् ज्ञानपूर्वमनुष्ठित एव धर्मः न त्वन्य इत्यभिप्रेत्याह । यत्रेति । यत्र यस्मिन् ज्ञानात्मके हृदये धर्मः स्थितः अनेन ज्ञानपूर्वानुष्ठितो धर्मः नित्यफलप्रद इत्युक्तं भवति प्रसङ्गादधर्मस्थानमाह । पृष्ठ इति । मे पृष्ठे भूत्वा अधर्मं आरात्कृतो दूरीकृत इति यद्यस्मात्तस्माज्ज्ञानरूपत्वाद्धर्मादिस्थितिहेतुत्वाच्च ऋषभमाहुः ज्ञानपूर्वकमनुष्ठितं धर्मं हृदये बिभर्तीति के आर्याः शब्दतत्त्वार्थवेदिन इति ॥ १९ ॥

उक्तार्थमुपसंहरन्नेषां योग्यगुणविशिष्टं हरिमुपदिशति । तस्मादिति । भवन्तः सर्वे मम हृदयेन जाता इति यस्मात्तस्माद्यूयं महीयांसं महतोऽपि महान्तं भरतं प्रजाभरणरतं सुनाभं सर्वाधारं हरिमक्लिष्टबुद्ध्या भजध्वं "नाभिरित्यथ नाम स्याद्धरेः सर्वाश्रयो यत,, इति वचनाद्धरेरिदं यौगिकं नाम अनेन भरतो येषां पूज्य इति ध्वनयति भवच्छुश्रूषणेन भवत्प्रीत्या मुक्तिः करतलगता स्यात् ज्येष्ठानुवर्तनेनशुश्रूषणलक्षणेन किमित्याशङ्क्य भवद्भिरनुवर्तितेन भरतेन यत्प्रजानां भरणं तत्रस्थस्य मम शुश्रूषणं भवतीत्याह । शुश्रूषणमिति । ज्येष्ठानुवृत्त्या राष्ट्रभेदाभावेन भवद्भिरपि प्रजाभरणमनुष्ठितमिति । अतो भरतं शुश्रूषद्भिर्भवद्भिरपि मम शुश्रूषणं कृतमिति ज्ञातव्यम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

व्यावहारिकगुर्वादिपरित्यागेऽपि परमार्थपथिकानां न दोष इत्याह । गुरुर्न स स्यादिति टीकायां पुत्रोत्पत्तौ यत्नो न कार्य्य इत्यत्र तेनेति शेषः यत्नं न कुर्यादित्यादिकं तु वक्तव्यं कर्तृप्रधानेनैव विवक्षितत्वात् ॥ १८ ॥

आवेशावतारतया प्रतीतस्य श्रीऋषभदेवस्यापि विग्रह एवं युज्यते । इदं शरीरमिति । इदं मनुष्याकारं मम शरीरं हि निश्चितं दुर्विभाव्यं दुर्वितर्क्यं यत्तत्त्वं तदेव यत्रैव धर्म्मो भागवतलक्षणः तत्रैव मे हृदयं मनः यद्यस्मात्तद्विपरीतादिलक्षणो धर्म्मो मया पृष्ठे कृतः ततः पराङ्मुखोऽहमित्यर्थः अत एव वक्तुरस्य श्रीऋषभदेवस्य सर्व्वान्तिमलीलापि व्याजेनान्तर्धापनमेव प्राकृतलोकप्रतीत्यनुसारेणैव तु तथा वर्णितम् आत्मारामतारीतिदर्शनार्था तदुक्तम् । योगिनां साम्परायविधिमनुशिक्षयन्निति । अतः स्वकलेवरं जिहासुरित्यत्र कलेवरशब्दस्य प्रपञ्च एवार्थः उपासनाशास्त्रे तस्य तथा प्रसिद्धेः ॥ १९ ॥

ननु जायात्मजरातिमत्सु न प्रीतियुक्ता इत्यनेन स्वसम्बन्धिभक्तिः परित्याजितैव पुनः कथमुपदिश्यते तत्राह । महीयांसमिति । महत्सङ्गं द्वारमाहुरित्यादिना तेषां महतां सङ्ग उपदिष्टः तेषामपि मध्ये श्रेष्ठमित्यर्थः अत एवाक्लिष्टबुद्ध्या सुखमेव मत्वेत्यर्थः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तमेतादृशं कुबुद्धिं दृष्ट्वा तत्रैव कस्तं प्रवर्तयेत् न कोऽपि उत्पथेन गच्छन्तमन्धं कः खलु तेनैव गच्छेति वदेत् ॥ १७ ॥

एवं भक्त्युपदेष्टारमभिनन्द्य तदनुपदेष्टॄणां गुरुत्वबन्धुत्वाद्य-भावं तद्धेतुकं तेषां त्यागं चाभिव्यञ्जयति । समुपेतः सम्प्राप्तो मृत्युः संसारो येन तं जनं भक्तिमार्गोपदेशेन यो न मोचयेत् स गुर्वादिर्न भवेत् न भवति बालिः शुक्रमिव तं गुरुं त्यजेदेव तस्य प्रत्युत्थानुवृत्त्याद्यभावेऽपि न प्रत्यवायीस्यादिति भावः एवं विशेषणं रावणमिव तं स्वजनं प्रह्लादो हिरण्यकशिपुमिव तं पितरं श्रीभरतः कैकेयीमिव तां जननीं खट्वाङ्ग इन्द्रादिमिव तद्दैवं याज्ञिकब्राह्मणी याज्ञिकविप्रमिव तं पतिं त्यजेदेवेत्यर्थः यद्वा स्यादिति विधिलिङ् यस्तं मोचयितुं न शक्नुयात् स तस्य गुर्वादिर्न स्यात् प्रत्युत्थानुवृत्त्यादिकं न गृह्णीयादित्यर्थः गृह्णीयाच्चेत्तर्हि प्रत्यवायी स्यादिति तेन च यदि मोचयितुं न शक्नुयात् तर्हि गुरुर्भवितुमन्यं न शिष्यं कुर्यात् स्वजनो भवितुं बन्धुतां न दध्यात् पिता भवितुं पुत्रोत्पत्तौ न यतेत जननी भवितुमन्यं गर्भं न दध्यात् दैवं भवितुं पूजां न गृह्णीयात् । पतिर्भवितुं पाणिं न गृह्णीयादिति द्योतितम् ॥ १८ ॥

यस्य भक्तिः कर्त्तव्या स क भगवांस्तथा भक्तिप्राप्त्यर्थं भागवतसेवाचापेक्षणीयेति क वा स भागवत इति युष्माकमल्पोऽपि प्रयासो नास्ति यतो गृह एव भगवानहं वः पिता तथैव गृह एव भागवतोऽयं वो भ्राता वर्त्तत इत्याह । इदमिति द्वाभ्याम् । इदं शरीरमिति इदं मनुष्याकारं शरीरं हि निश्चितं दुर्विभाव्यं दुर्वितर्क्यं यत्तत्त्वं चिदानन्दरूपं तदेव नत्वहं प्राकृतो मनुष्य इत्यर्थः चिद्वस्तुनस्तत्त्वस्य यन्मूर्त्तत्वम् एतदेव दुर्विभाव्यत्वम् अन्येषां पृथिव्यादीनां तत्त्वानां दुर्विभाव्यत्वाभावादिति भावः हि निश्चितं यत्र मे धर्मः मत्प्रापको भक्तियोगस्तत्रैव मे हृदयं मनः "साधवो हृदयं मह्यम्" इति मदुक्तेः मे अधर्मः मद्धर्मभिन्नोऽर्थः । आराद्दूरत एव पृष्ठे कृतः ततः पराङ्मुखोऽहं तत्र मे न मन इत्यर्थः अतो हेतोर्मामृषभं सर्वश्रेष्ठम् ॥ १९ ॥

हृदयेन उरसा जाताः अत एव पुत्रा औरसा उच्यन्ते इत्यर्थः सनाभं सोदरं भरतं भजध्वं ननु गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता इत्यनेन कलत्रपुत्रभ्रात्रादिष्वासक्तिं निषिध्यापि पुनस्तां किमित्युपदिशसीत्यत आह । महीयांसं महत्स्वपि श्रेष्ठं महत्सेवां द्वारमाहुर्विमुक्तेरित्यादिना भक्तिहेतुत्वेन महत्सेवाया मयैवोक्तत्वात् अक्लिष्टबुद्ध्येति भ्रातृत्वेन तुल्यैरस्माभिः कथमयं भजनीय इति व्यवहार दृष्टिर्न कार्येति भावः ननु तव परमेश्वरत्वात् पितृत्वाच्च त्वां वयं भजामः भक्तिहेतुत्वेन नारदादीन् महतः सेवेमहि महाराजपुत्रत्वात् प्रजाश्च पालयाम इति चेत्तत्राह । तदेव मे शुश्रूषणं प्रजानां च पालनं भरतानुवृत्त्यैव सर्वं कृतं स्यादिति मन्मतमिति भावः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अथ यः यं जीवं भगवत्प्राप्तिमार्गोपदेशादिना संसारान्मोचयितुं न शक्नुयात् स तं जीवं शिष्यादिकं न कुर्यादित्याह । यः समुपेतमृत्युं समुपेतः संप्राप्तः मृत्युः संसारो यं यद्वि संसा-

भूतेषु वीरुद्भ्य उदुत्तमा ये सरीसृपास्तेषु सबोधनिष्ठाः ।
ततो मनुष्याः प्रमथास्ततोऽपि गन्धर्वसिद्धा विबुधानुगा ये ॥ २१ ॥
देवासुरेभ्यो मघवत्प्रधाना दक्षादयो ब्रह्मसुतास्तु तेषाम् ।
भवः परः सोऽथ विरिञ्चिवीर्यः स मत्परोऽहं द्विजदेवदेवः ॥ २२ ॥
न ब्राह्मणैस्तुलये भूतमन्यत्पश्यामि विप्राः ! किमतः परं तु ।
यस्मिन्नृभिः प्रहुतं श्रद्धयाहमश्नामि कामं न तथाग्निहोत्रे ॥ २३ ॥
धृता तनूरुशती मे पुराणी येनेह सत्त्वं परमं पवित्रम् ।
शमो दमः सत्यमनुग्रहश्च तपस्तितिक्षानुभवश्च यत्र ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

राम मोचयेत् स गुरुर्न स्यात् शिष्यं न कुर्यात् पत्रमन्त्रेऽपि बोध्यम् ॥ १८ ॥

अथ भरतानुवृत्तिर्ब्राह्मणभक्तिः सर्वभूतेषु वासुदेवदृष्टिश्च भवद्भिः कर्त्तव्या दुर्लङ्घ्यशासनस्येश्वरस्य ममाज्ञयेति पुत्रशिक्षार्थं स्वस्येश्वरस्येश्वरत्वमाह । न तु स्वमाहात्म्यसूचनार्थमिदमिति इदं मम शरीरं तावद्दुर्विभाव्यं दुर्ज्ञेयं मम स्वरूपस्य तु का कथा मे हृदयमन्तःकरणञ्च तत्त्वं शुद्धं यथार्थव्यवहारनिष्ठमित्यर्थः यत्र धर्मो वसतीति शेषः यद्येन मे मम हृदयेन अधर्मः दूरात्पृष्ठे कृतः अतो मामृषभं श्रेष्ठं प्राहुः ॥ १९ ॥

हृदयेनोक्तलक्षणेन तस्मादुक्तलक्षणाच्छरीराज्जाताः ॥ २० ॥ २१ ॥

भाषाटीका ।

पण्डित होकर स्वयं उस बात को जानने वाला ऐसा कौन होगा जो कि उसको अविद्या में वर्त्तमान देख करके भी दयालु होकर उस कुबुद्धिपुरुष उत्पथगामी को अन्धे की तरह उसी मार्ग मे चलावेगा ॥ १७ ॥

इस संसार में जन्म मरण रूप मृत्यु को जो नहीं छुटासके सो न किसी का गुरू होवै न स्वजन होवै न पिता होवै न माता होवै न देव होवै न पति होवै उसको कोई जोग्यता नहीं है ॥ १८ ॥

यह हमारा मनुष्याकार शरीर तर्कना करने के योग्य नहीं है जिससे शुद्ध सत्त्वमय हमारा हृदय है जिस हृदय में धर्म है मैने अधर्म को दूरही से पीठ के तरफ करदिया है इसी से श्रेष्ठपुरुष मेरे को ऋषभ कहते हैं ॥ १९ ॥

हे पुत्रो ! तिस हेतु से आप लोग मेरे हृदय से सब भये हौ तो सब मिलकर तुमारे सहोदर तुम से वडे इन भरत को शुद्ध बुद्धि होकर भजो तिसी से तुमारा प्रजापलनरूप धर्म भी होजायगा ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इदानीं ब्राह्मणाश्च सेव्या इत्याशयेन तेषां सर्वेभ्यः श्रैष्ठ्यमाह पञ्चभिः । भूतेषु चेतनाचेतनेषु विरोहन्तीति वीरुधः स्थावरा उदुच्चैरतिशयेनोत्तमाः तेभ्योऽपि ये सरीसृपाः सर्पन्तीति जङ्गमास्ते उदुत्तमा इति सर्वत्रानुषङ्गः तेष्वपि सबोधा निष्ठा स्थितिर्येषां पश्वादीनां ते कीटकादिभ्यः ततस्तेष्वपि मनुष्याः ततोऽपि प्रमथा भूतप्रेतादयः ततोऽपि गन्धर्वाः ततः सिद्धाः ततोऽन्ये विबुधानुगाः किन्नरादयः ॥ २१ ॥

तेभ्योऽसुराः देवा असुरेभ्यः संधिरार्षः देवाश्च मघवत्प्रधानाः देवेभ्य इन्द्रः श्रेष्ठ इत्यर्थः ततोऽपि ब्रह्मसुता दक्षादयः तेषां मध्ये भवः परः श्रेष्ठः स भवो विरिञ्चिवीर्यो विरिञ्चो वीर्यं शक्तिः कारणं यस्य स विरिञ्चिवीर्यः अतस्तज्जनकत्वाद्विरिञ्चस्ततः पर इत्यर्थः स विरिञ्चो मत्परः अहं परो यस्य द्विजदेवा ब्राह्मणा एव देवाः पूज्या यस्य सोऽहम् ॥ २२ ॥

ब्राह्मणैरन्यद्भूतं न तुलये समं न पश्यामि अतो ब्राह्मणात्परं तु भूतं किं पश्यामि न किञ्चित् विप्रा इति तत्रत्यानां ब्राह्मणानां सम्बोधनम् समस्यैवाभावादधिकं कुतस्त्यमित्यर्थः तत्र हेतुमाह सार्द्धेनाम् । यस्मिन् ब्राह्मणे श्रद्धया प्रकर्षेण हुतमन्नादिं कामं यथेच्छमहमश्नामि ॥ २३ ॥

मे तनूर्मूर्त्तिर्वेदाख्या येन ब्राह्मणेनेह लोके धृता यत्र च ब्राह्मणे सत्त्वादयोऽष्टौ गुणाः सन्ति ततः परं किं पश्यामीत्यन्वयः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इदानीं भागवताश्च सेव्या इति वक्तुं तेषां सर्वेभ्यः श्रैष्ठ्यमाह पञ्चभिः । भूतेषु चेतनाचेतनेषु विरोहन्तीति वीरुधः वीरुद्भ्यः ये उत्तमाः सरीसृपा जङ्गमास्तेषु सबोधनिष्ठाः बोधेन सहिता स्थितिर्येषां पश्वादीनां ते कीटादिभ्यः उत्तमाः तेभ्यो मनुष्यास्तेभ्योऽपि प्रथमास्ततो गन्धर्वाः किन्नरादयः ॥ २१ ॥

तेभ्यः असुरास्तेभ्योऽपि मघवत्प्रधाना इन्द्रप्रभृतयो देवाः देवासुरेभ्य इत्यत्र सन्धिरार्षः तेभ्योऽपि दक्षादयो ब्रह्मसुताः तेभ्योऽपि भवो रुद्रः परः श्रेष्ठः स भवः विरिञ्चिवर्यः विरिञ्चिः ब्रह्मा वर्यः श्रेष्ठो यस्मात्तथा भवस्य जनको विरिञ्चो भवाच्छ्रेष्ठ इत्यर्थः विरिञ्चिवीर्य इति पाठे विरिञ्चस्य वीर्यं शक्तिः कारणं यद्विरिञ्चिवीर्यः तज्जनकत्वाद्विरिञ्चस्ततः पर इत्येवार्थः स विरिञ्चः मत्परः अहं परो यस्य तथाभूतः अहं द्विजदेवा ब्राह्मणश्रेष्ठा एव देवा यस्य तथाभूतः उत्कर्षकाष्ठाभूता द्विजदेवा इति भावः ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह। नेति। हे विप्रा! इति तत्रत्यब्राह्मणानां सम्बोधनं ब्राह्मणैरन्यद्भूतं न तुलये सममेव न पश्यामि अतो ब्राह्मणेभ्यः परमुत्कृष्टं भूतं किं पश्यामि न किञ्चित्समस्यैवाभावादधिकं कुत इत्यर्थः तत्र हेतुमाह। सार्द्धेन यस्मिन् ब्राह्मणाग्नौ श्रद्धया प्रकर्षेण हुतमन्नादिकं कामं यथेच्छमहमश्नामि यथा ब्राह्मणान्तर्यामित्वेनाश्नामि तथाग्निहोत्रे नाश्नामि अग्निहोत्रशब्दः कर्मनामधेयवैदिककर्मोपलक्षकः तत्राग्निहोत्रे नाश्नामीत्यर्थः ॥ २३ ॥

किं च तनूशब्दः शमादिगुणपरः वेदपरो वा पुराणी चिरन्तना मे तनूर्मूर्तिर्वेदाख्या येन ब्राह्मणेनेह लोके धृता शमादिगुणपरत्वे तु शमोदम इत्यादिस्तत्प्रपञ्चः यत्र ब्राह्मणे निरतिशयपवित्रं सत्वं प्रतिष्ठितमिति शेषः तथा यत्र ब्राह्मणे शमादयः प्रतिष्ठितास्तत्र शमोऽन्तःकरणनिग्रहः बाह्येन्द्रियनिग्रहो दमः अनृतराहित्यं भूतहितं च सत्यम् अनुग्रहः भूतानुग्रहः तप अनशनादिस्तितिक्षा द्वन्द्वसहिष्णुता अनुभवः स्वात्मपरमात्मयाथात्म्यानुभवः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

तारतम्यज्ञानमेव मुक्तिसाधनं नान्यदिति भावेन तदाह। भूतेष्विति। भूतेषूत्पन्नेषु प्राणिषु मध्ये वीरुद्भ्यः स्तम्बेभ्यो ये सरीसृपा जङ्गमास्त उ वुत्तमा उत्कृष्टतमा इति ज्ञेयाः तेषु सरीसृपेषु ये सुबोधनिष्ठाः ज्ञानयुक्तास्ते पश्वादय उत्तमा इति सर्वत्र योज्यम् ॥ २१ ॥

ये दक्षादयो ब्रह्मसुताः सनकादयश्च तेषां सकाशादिन्द्रः प्रधान इत्यर्थः अथ इन्द्रानन्तरं विरिञ्चवीर्यो विरिञ्चपुत्रो यो भवः स रुद्र उत्तमः स विरिञ्चस्तस्माद्रुद्रात्परः तस्मादहमेव परो नान्य इत्यत उक्तम् मत्पर इति अहमेव परो यस्य स तथा अनेन मुख्यप्राणस्य विरिञ्चसमत्वं सूचयति राजभिर्ब्राह्मणभक्तिर्विशेषतोऽनुष्ठेयेति वेदयितुमाह । अहं द्विजेति । द्विजदेवानां देवः ॥ २२ ॥

क्षत्रादीनामैश्वर्यमदेन ब्राह्मणतिरस्कारसम्भवेन कुलनाशः स्यात्सचानुपपन्न इति तेषु श्रद्धातिशयजननार्थमाह। न ब्राह्मणैरिति । ज्ञानपात्रत्वादतः विप्रात्परमुत्तमं मम सन्निधानपात्रं किन्तु न किमपीत्यर्थः कुत एतदत्राह। यस्मिन्निति। मम तृप्तिहेतुत्वादित्यर्थः नन्वग्न्यादेः सम्भवात्किमिविशिष्योच्यत इति तत्राह। न तथेति ॥ २३ ॥

अग्न्यादेर्गुणवैशिष्ट्यादित्याह। धृतास्तनूरिति। पवित्रं सत्वं शमादिगुणा अनुभावो ज्ञानं च यत्र येषु ब्राह्मणेषु सन्ति ते ब्राह्मणा मे पुराणीरुशतीः शुद्धास्तनूर्मत्स्यादिलक्षणा वेदाख्या वा धृता धारयन्तीति येन तस्मात् ब्राह्मणेभ्यः परं न किमपीति भावः यद्वा येन ब्राह्मणकुलेनापौरुषेयत्वेन निर्मलाः पुराणीः अनादिनिधनाः मे तनूस्तनवो वेदलक्षणा धृता यत्र ब्रह्मकुले सत्वादिगुणाः सन्ति तस्मात्परमुत्तमं न किमपीति ॥ २४॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

भूतेष्वित्यादिकमुत्तरोत्तरशक्ति श्रेष्ठ्यात् द्विजदेवतामान्तु स्वादरणीयत्वाच्छ्रैष्ठ्यं विवक्षितं तच्च स्वोपकारित्वमननेन तथैवाह। यस्मिन्निति। तद्द्वारैव मम तृप्तिः स्यादित्यर्थः ॥ २१—२३ ॥

सा च कुतस्तत्राह। धृतेति। तद्द्वारैव कारणम् सत्त्वमिति। सत्त्वमन्तःकरणं पवित्रं विशुद्धमनुग्रहो भूतदया तपः स्वधर्मः अनुभवः श्रीभगवतः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

इदानीं ब्राह्मणाश्च सेव्या इत्याशयेन तेषां सर्वेभ्यः श्रैष्ठ्यमाह चतुर्भिः। भूतेषु मध्ये विरोहन्तीति विरुधः स्थावरा उत्तमा उच्चैरतिशयेनोत्तमाः तेभ्योऽपि सर्पन्तीति सरीसृपा जङ्गमाः तेष्वपि सबोधनिष्ठा स्थितिर्येषां ते पश्वादयः विबुधानुगाः किन्नरादयः तेभ्योऽसुरा देवाः असुरेभ्यः सन्धिरार्षः देवाश्च मघवत्प्रधानाः देवेभ्य इन्द्रः श्रेष्ठ इत्यर्थः । तत इन्द्रादपि ब्रह्मसुता दक्षादयः तेषां मध्ये भवः परः श्रेष्ठः स च विरिञ्चवीर्यः ब्रह्मपुत्रः पुंस्त्वमार्षं तज्जनकत्वात्ततो ब्रह्मा श्रेष्ठ इत्यर्थः । अत्र ब्राह्मणभक्तेः प्रक्रान्तत्वात् ब्राह्मण्येनैवांशेन भवाद्विरिञ्चस्य श्रैष्ठ्यं वैष्णवतया ऐश्वर्येण च भवस्यैव तस्मात् श्रैष्ठ्यमिति ज्ञेयम्। स ब्रह्मा मत्परः अहं परो यस्येति ब्रह्मतोऽप्यहं श्रेष्ठ इत्यर्थः द्विजेषु दीव्यन्तीति द्विजदेवा विप्रा एव देवा यस्य सः मत्तोऽपि पूज्या ब्राह्मणा इत्यर्थः ॥ २१ ॥ २२ ॥

ब्राह्मणैरन्यद्भूतं न तुलये हे विप्राः! अतो ब्राह्मणेभ्यः परं किं पश्यामि नैव पश्यामीत्यर्थः । तत्र हेतुमाह। यस्मिन्निति सार्द्धेन ॥ २३ ॥

मम तनूर्वेदाख्या येन इह लोके धृता यत्र च ब्राह्मणे सत्वादयोऽष्टौ गुणाः सन्ति ततः परं किं पश्यामीत्यन्वयः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

द्विजदेवा देवा यस्य सः तथा ॥ २२ ॥

ब्राह्मणैरन्यद्भूतं न तुलये समं न गणयामि अतो ब्राह्मणात् परं श्रेष्ठं तु अन्यद्भूतं किं पश्यामि न किञ्चित् हे विप्रा इति तत्रत्यानां मुनीनां सम्बोधनं यस्मिन् ब्राह्मणे ॥ २३ ॥

येन ब्राह्मणेन मे तनूर्मूर्तिः वेदरूपा इह लोके धृता यत्र ब्राह्मणे सत्वादयो गुणाः सन्ति ततः परं किं पश्यामीत्यनुषङ्गः ॥ २४ ॥

भाषाटीका

सब प्राणिमात्र में वृक्ष उत्तम हैं तिनसे चलने वाले उत्तम हैं उनसे भी ज्ञानवाले पशु आदि उत्तम हैं तिनसे मनुष्य उत्तम हैं तिनसे भूत प्रेतादि उत्तम हैं तिनसे गन्धर्व उत्तम हैं तिनसे सिद्ध उत्तम हैं तिनसे किन्नर उत्तम हैं ॥ २१ ॥

तिन से असुर उत्तम हैं तिनसे देवता उत्तम हैं देवतोंसे इन्द्र उत्तम है तिससे ब्रह्माजी के पुत्र दक्षादिक उत्तम हैं उनमें भी महादेवजी उत्तम हैं उन से भी ब्रह्माजी उत्तम हैं ब्रह्मा से मैं बडा हूं मेरे भी पूजनीय ब्राह्मण हैं ॥ २२ ॥

मत्तोऽप्यनन्तात्परतः परस्मात्स्वर्गापवर्गाधिपतेर्न किञ्चित् ।
येषां किमु स्यादितरेण तेषामकिञ्चनानां मयि भक्तिभाजाम् ॥ २५ ॥
सर्वाणि मद्धिष्ण्यतया भवद्भिश्चराणि भूतानि सुता ! ध्रुवाणि ।
सम्भावितव्यानि पदेपदे वो विविक्तदृग्भिस्तदुहार्हणं मे ॥ २६ ॥
मनोवचोदृक्करणेहितस्य साक्षात्कृतं मे परिबर्हणं हि ।
विना पुमान् येन महाविमोहात्कृतान्तपाशान्न विमोक्तुमीशेत् ॥ २७ ॥

॥ श्रीशुक उवाच ॥

एवमनुशास्यात्मजान्स्वयमनुशिष्टानपि लोकानुशासनार्थं महानुभावः परमसुहृद्भगवानृषभापदेश उपशमशीलानामुपरतकर्मणां महामुनीनां भक्तिज्ञानवैराग्यलक्षणं पारमहंस्यधर्ममुपशिक्षमाणः स्वतनयशतज्येष्ठं परमभागवतं भगवज्जनपरायणं भरतं धरणिपालनायाभिषिच्य स्वयं भवन एवोर्वरितशरीरमात्रपरिग्रह उन्मत्त इव गगनपरिधानः प्रकीर्णकेश आत्मन्यारोपिताहवनीयो ब्रह्मावर्तात्प्रवव्राज ॥ २८ ॥

जडान्धमूकबधिरपिशाचोन्मादकवदवधूतवेषोऽभिभाष्यमाणोऽपि जनानां गृहीतमौनव्रतस्तूष्णीं बभूव ॥ २९ ॥

तत्र तत्र पुरग्रामाकरखेटवाटखर्वटशिबिरव्रजघोषसार्थगिरिवनाश्रमादिष्वनुपथमवनिचरापसदैः परिभूयमानो मक्षिकाभिरिव वनगजस्तर्जनताडनावमेहनष्ठीवनग्रावशकृद्रजःप्रक्षेपपूतिवातदुरुक्तैस्तदविगणयन्नेवासत्संस्थान एतस्मिन्देहोपलक्षणे सदपदेश उभयानुभवस्वरूपेण स्वमहिमावस्थानेनासमारोपिताहंममाभिमानत्वादविखण्डितमनाः पृथिवीमेकचरः परिबभ्राम ॥ ३० ॥

भाषाटीका।

हे विप्रो ! मै ब्राह्मणके साथ दूसरे प्राणिको तुलना नहीं करता हूं इनसे ज्यादे कोई को भी नही देखता हूं जिन ब्राह्मणों के मुखमे श्रद्धा पूर्वक मनुष्यों का दिया जो अन्नादिक तिसको मै यथेष्ठ भोजन करता हूं तैसा अग्निहोत्र मे नहीं ग्रहण करता हूं ॥ २३ ॥

जिस ब्राह्मणने हमारी प्राचीन वेदरूपी मूर्तिको धारण की है तथा परम पवित्र सत्व धारण किया है शम दम सत्यदया तप तितिक्षा ज्ञान जिसमे स्थित हैं ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

निःस्पृहत्वमाह । मत्तोऽपि येषां न किञ्चित्प्रार्थनीयमस्ति तेषामितरेण राज्यादिना किमु स्यान्न किमपि ॥ २५ ॥

तदेवं ब्राह्मणसम्मानं विधायेदानीं सर्वभूतसम्मानं विधत्ते हे सुताः ! सर्वाणि जङ्गमानि स्थावराणि च भूतानि मदधिष्ठानतया वो युष्माभिः सम्माननीयानि पदे पदे क्षणेक्षणे विविक्ता पूता मत्सरादिरहिता दृष्टिर्येषां तैः तदेव ममार्हणम् ॥ २६ ॥

सर्वकर्मणामीश्वरार्पणं विधत्ते । मनोवचोदृशामन्येषां च करणानामीहितस्य व्यापारस्य मे परिबर्हणमाराधनमेव साक्षात्कृतं फलम् । येन परिबर्हणेन विना कालपाशाद्विमोक्तुं न ईशेत समर्थो भवेत् ॥ २७ ॥

स्वत एव सुशिक्षितानपि लोकानुशासनार्थमनुशास्य मुनीनां पारमहंस्यधर्ममुपशिक्षयिष्यन्भरतमभिषिच्य ऋषभ इत्यपदेशो नाम यस्य स भगवान् ब्रह्मावर्तात्स्वदेशात्प्रवव्राजेत्यन्वयः उर्वरितोऽवशिष्टः शरीरमात्रपरिग्रहो यस्य ॥ २८ ॥

अभिभाष्यमाणोऽपि जनानां मध्ये जडादिवद्वर्तमानस्तूष्णीं बभूव अवधूतस्येव वेषो यस्य ॥ २९ ॥

तत्र तत्र पुरादिष्वनुपथं मार्गे मार्गेऽवनिचरापसदैर्दुर्जनैस्तर्जनादिभिः परिभूयमानोऽपि तदविगणयन्नेवैकचर एकाकी पृथिवीं परिबभ्रामेत्यन्वयः तत्र पुरं पत्तनं ग्रामा हट्टहीनाः आकरः खनिः खेटः कृषीवलग्रामः वाटः पुष्पादिवाटिका खर्वटः पर्वतप्रान्तग्रामः शिबिरं सेनाया वासस्थानम् व्रजो गवां स्थानं घोषो गोपानां स्थानं सार्थो यात्रिकजनसङ्घातः आश्रमा ऋषीणां तर्जनं भयजननं ताडनं प्रहारः अवमेहनमुपरिमूत्रणं ष्ठीवनं फूत्कृत्य श्लेष्मप्रक्षेपः ग्राव्णां शकृतो रजसश्च प्रक्षेपः पूतिवातोऽधोवायुः दुरुक्तं शापः एतैः अगणने दृष्टान्तः मक्षिकाभिरिवेति तत्र हेतुः असति मिथ्याभूते संस्थाने सन्निवेशे देह इत्युपलक्षणमाकारो यस्य सदित्यपदेशमात्रं यस्य तस्मिन्निरभिमानत्वात् केन

श्रीधरस्वामिकृतभावार्थदीपिका ।

हेतुना उभयोः सदसतोर्योऽनुभवस्तत्स्वरूपेण यत्स्वमहिम्न्यवस्थानं तेन अत एवाखण्डितं मनो यस्य स परिबभ्राम ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथाच निःस्पृहा च यत्रास्तीत्याह । मत्त इति । परस्माद्ब्रह्मादेरपि परतः परस्मात्स्वर्गापवर्गयोरधिपतेर्मत्तोऽपि प्रार्थनीयं येषां ब्राह्मणानां न किञ्चिदस्ति एषामकिञ्चनानां नास्ति किञ्चन प्रार्थनीयं येषां तेऽकिञ्चनाः तेषामपि भक्तिं कुर्वताम् इतरैरैहिकपुरुषार्थैन किमु स्यान्न किमपीत्यर्थः ॥ २५ ॥

एवं भागवतभक्तिं विधायेदानीं सर्वभूतानां ब्रह्मात्मकत्वभावं विधत्ते । सर्वाणीति । हे सुताः ! चराणि ध्रुवाणि स्थावराणि च सर्वाणि भूतानि मद्धिष्ण्यतया मच्छरीरतया प्रकृतिपुरुषेश्वराणां परस्परवैलक्षण्यबुद्धिमद्भिः भवद्भिः पदे पदे क्षणे क्षणे संमाननीयानि तद्भूतसम्भावनमेव ममार्हणं मदाराधनम् ॥ २६ ॥

मदाराधनमेव निरतिशयफलसाधनमित्याह । मन इति । मनो वचोदृशामन्येषां च करणानाम् ईहितस्य व्यापारस्य साक्षात्कृतं दृष्टं फलं मत्परिबर्हणं मदाराधनमेव येन मत्परिबर्हणेन विना पुमान् कालपाशरूपान् महाविमोहान् विमोक्तुं नेशेत न शक्नुयात् मदाराधनमेव मुक्तिसाधनं मदाराधनं च सर्वभूतानां ब्रह्मात्मकतया सम्भावनमेवेति भावः ॥ २७ ॥

एवमिति । स्वयमनुशिष्टान् हेयोपादेयविभागज्ञानप्यात्मजान् लोकानुशासनार्थं लोकस्य विविच्य ज्ञापनार्थमेवमनुशास्य स महाप्रभावः सर्वभूतसुहृद्भगवान् ऋषभ इत्यपदेशो व्यवहारो यस्य सः परमहंसाः ब्रह्मविदस्तेषां धर्मं भक्त्यादिरूपमुपशिक्षयिष्यन् भरतं भूमण्डलपालनायाभिषिच्य ब्रह्मावर्तात् स्वदेशात्प्रवव्राजेत्यन्वयः केषामुपशिक्षयिष्यन्मुनीनां शुभाश्रयमननशीलानां कथम्भूतानामुपरतकर्मणां निवृत्तप्रवृत्तिधर्माणामुपशमशीलानां बाह्यान्तःकरणनियमनशीलानां कथंभूतं भरतं स्वस्य तनयानां पुत्राणां शतज्येष्ठं भगवज्जना भागवतास्त एव परायणा भजनीया यस्य तमत एव परमभागवतं भागवतश्रेष्ठं भगवद्भक्तैः भागवतपर्यन्तत्व एव पूर्तैः स्वयं कथंभूतः प्रवव्राज गृह एव उर्वरितः अवशिष्टः शरीरमात्रपरिग्रहो यस्य सः परित्यक्तवस्त्रभूषणादिदेहानुबन्ध इत्यर्थः उन्मत्त इवोपलक्षितः गगनमाकाश एव परिधानं यस्य सः दिगम्बर इत्यर्थः प्रकीर्णाः विक्षिप्ताः केशा येन सः आत्मन्यारोपितः आहवनीयो वैदिकोऽग्निर्येन सः उन्मत्त इवेत्यादिना न शास्त्रातिलङ्घित्वमुच्यते किन्तु "जनेनावमतो योगी सिद्धिं च विन्दति"इति न्यायेन योगचर्यकावमानादिफलकव्रतविशेषा उच्यन्ते ॥ २८ ॥

अभिभाष्यमाणोऽपि जनानां मध्ये जडादिवद्वर्तमानः अवधूतवेषः सर्वैः परिभाव्यो वेषो यस्य सः गृहीतं मौनं व्रतं येन सः तूष्णीं बभूव जडाद्यारभ्य नाभाषतेत्यर्थः ॥ २९ ॥

तत्र तत्र पुरादिष्वनुपदं मार्गे मार्गे अवनिचरापसदैः दुर्जनैस्तर्जनादिभिः परिभूयमानः मक्षिकाभिर्वनगज इव तदविगणयन्नेव एकचरः एकाकी सम्पृथिवीं परिबभ्रामेत्यन्वयः तत्र पुरं पत्तनं ग्रामो हट्टरहितः आकरः खनिः खेटः कृषीवलग्रामः खर्वटः निषादादिग्रामः वाटी पुष्पादिवाटिका शिबिरं सेनाया आवासस्थानं व्रजो गोनिवासस्थानं घोषो गोपानामावासस्थानं सार्थो यात्रिकजनसङ्घातः आश्रमः ऋषीणामाश्रमस्थानं तर्जनं भयजनकव्यापारः ताडनं प्रहारः मेहनमुपरिमूत्रणं निष्ठीवनं खात्कृत्य श्लेष्मप्रक्षेपणं ग्राव्णां पाषाणानां शकृतो मलस्य रजसश्च क्षेपः पूतिवातोऽपानवायुः दुरुक्तं शापः एतैः अविगणने दृष्टान्तः । मक्षिकाभिरिव वनगज इति । तत्रैव हेतुः असत्संस्थाने सततपरिणामिनोऽचिद्द्रव्यस्य परिणामरूपे सन्निवेशे देहोपलक्षणे देहाकारे सदपदेशे देहात्मभ्रान्तिमतामात्मत्वव्यपदेशविषये शरीर इत्यर्थं उभयानुभवः स्वात्मपरमात्मयाथात्म्यानुभवः स्वरूपेण स्वमहिम्नः अवस्थानेन स्वस्य स्वात्मनो महिमा स्वभावः तस्मिन्नवस्थानेन उभयानुभवरूप एव ह्यात्मनः स्वस्वभावत्वेनावस्थितिरित्येवमुक्तं स्वमहिमावस्थानेन हेतुना देहे तदनुबन्धिनि चानारोपित अहंममाभिमानो येन तस्य भावस्तत्त्वं तस्माद्देहविलक्षणस्वात्मयाथात्म्यानुभवरूपभावावस्थित्या निरस्तदेहात्माभिमानत्वादित्यर्थः अत एवाखण्डितमनाः सर्वात्मब्रह्मसाक्षात्कारैकरूपा मतिर्यस्य ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ब्राह्मणेष्वपि विशेषोऽस्तीत्याह । मत्त इति । येषां मत्तोऽपि न किञ्चित्प्रयोजनमस्ति तेषामितरेण स्वर्गाद्याशीर्लक्षणेन पुरुषार्थेन किमु स्यान्न किमपीत्यन्वयः स्ववचोविश्वासार्थमनन्तादित्यादिविशेषणं भक्तिमन्तरेणान्यन्न किमप्यपेक्षणीयमिति प्रकटनायाकिञ्चनानां भक्तिभाजामिति विशेषणद्वयम् ॥ २५ ॥

इदानीं चराचरभूतानि स्वनिवासहेतुत्वेन सम्भाव्यानीत्याह । सर्वाणीति । हे सुताः ! भवद्भिः सर्वाणि भूतानि मद्धिष्ण्यतया मम निवासस्थानत्वेन ध्रुवाणि निश्चितानि सम्भावितव्यानीत्यन्वयः ननु मम धिष्ण्यतया मम विग्रहत्वेन स्वरूपत्वेन सम्भावितव्यानीत्यर्थः किं न स्यादित्याशङ्क्य तस्य तदपूजनत्वादित्याह । पदे पदे इति । या पदे पदे अनुक्षणं विविक्तदृष्टिः जीवानां धिष्ण्यतया परमेश्वरस्य भेददृष्टिः भेददर्शनं तदुत तदेव मे अर्हणं भवति प्रीतिजनकं नान्यदित्यर्थं इति यद्वा भेददर्शनमेव नार्हणमपि तु भेदप्रतिपादनमप्युतार्थं इति तदुक्तम् ।

> उपपादयेत्परात्मानं जीवेभ्यो यः पदे पदे ।
> भेदेनैव न चैतस्मात्प्रियो विष्णोस्तु कश्चन इति ।

"यो हरेश्चैव जीवानां भेदवक्ता हरेः प्रिय" इति च अनेन भेददर्शनात्तत्प्रतिपादनस्य फलाधिक्यं भवतीति ध्वनितमिति ॥ २६ ॥

भेददर्शनस्य मोक्षसाधनत्वाच्चायमर्थ इति तत्राह । मनोवच इति । करणैः कर्मभिः यन्मन आदिना जीवपरयोर्भेददर्शनादिकं यस्य तस्य साक्षात्कृतं मुख्यतः पूर्णं तस्य तद्धि तदेव मे परिबर्हणं पूजनं भवति भवदर्हणेन किं फलमित्यतोवाह । मनोवच इति । मन आदिसाधनैर्यन्मदर्हणं तत्साक्षात्कृतं साक्षात्कारफलं भवति येनार्हणेन विना पुमान्महाविमोहकृतात्पाशादज्ञानलक्षणसंसाराद्विमोक्तुमीशः समर्थो न स्यादित्यन्वयः ॥ २७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यावत्प्रयोजनमनुशासनं चेत्समाप्तमतः परं हरिणा किमकार्यंथापि हरिकथया श्रुनयालम्बुद्धिर्न जायतेऽतः सा वक्तव्येत्यस्य शारीरलक्षणाञ्जो मुनिस्तच्चरितशेषमुक्तमाहत्य वक्ति । स एवमनुशास्येति । ऋषभापदेश ऋषभनामा भवन एव सर्वं परित्यज्येति शेषः उर्वरितशरीरमात्रपरिग्रहः अवशिष्टशरीरमात्रपरिकरः गगनमेव परिधानं वस्त्रं यस्य स तथादिगम्बर इत्यर्थः ॥ २८ ॥ २९ ॥

गृहात्संन्यस्तस्य उत्तरस्थितिप्रकारं कथयति । तत्र तत्रेति । खर्पटं वस्त्रोत्पादनस्थलं कुविन्दाश्रयः व्रजो गोकुलं घोष आभीरपल्ली सार्थः परिषज्जनः अवनिचरापसदैः भूमिचरेषु दुर्वृत्तैर्नीचैरित्यर्थः निष्ठीवनं थूत्कारः पूतिवातोऽधोवायुः तत्तर्जनादिकर्मविगणयंस्तृणप्रतिप्राप्तिमपि अकुर्वन्नेव स्थितः कुत इति तत्राह । असदिति । अनतामङ्गलानां क्लेशानां संस्थानं यस्मिस्तस्मिन्नेतस्मिन् देहोपलक्षणे असन्नस्वतन्त्र इत्यपदेशः शब्दो यस्य स तथा तस्मिन् जडशब्दवाच्ये देहे अभयानुभवस्वरूपेण सर्वभयशून्यज्ञानस्वरूपेण स्वमहिमावस्थानं यस्मिस्तेनासमवरोपिताहंममाभिमानत्वात्त्यक्ताहंममाभिमानत्वादखण्डितः अपरिच्छिन्न इति यस्मादिति शेषः यद्वा असतो ब्रह्मणः संस्थानं यस्मिस्तथा तस्मिन् तर्हि देहदेहिनोर्भेदापत्त्या "नेह नानास्ति किञ्चन" इति श्रुतिव्याकोपः स्यादत्राह । असदिति । असद्ब्रह्मेत्यपदेशो यस्य देहस्य स तथा देहोऽपि ब्रह्म एवेत्यर्थः "विज्ञानमानन्दं ब्रह्म" इति श्रुतिः अस्मिन् अत्रैव तदभेदः सूच्यत इत्याह । समवरोपितेति । समवरोपितः सम्यक् ज्ञातः अहंममाभिमानस्तस्य भावःसमवरोपिताहंममाभिमानत्वं तस्मात् "तद्ब्रह्मवेदाहं ब्रह्मास्मि" इति श्रुतिश्च तर्हि स्वपरिच्छेद्यत्वेन खण्डितत्वमत्राह । अखण्डित इति । अखण्डितस्य खण्डितत्वेन ज्ञानाच्च तत्र तर्कोऽवसर इत्यर्थः एकचर इत्यनेनादावन्ते चाप्येक एव चरतीत्यर्थोऽपि गृह्यते इत्यभिप्रायेणोक्तमिति ज्ञायते ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

द्विजदेवत्वे कारणविशेषमाह । मत्त इति । मत्तोऽपि सकाशात् ॥ २५ ॥

तदुह तदपीत्यर्थः ॥ २६ ॥

साक्षात् कृतं पुरतः करणं समर्पणमित्यर्थः ॥ २७ ॥

एवमिति । भक्तिशिक्षात्र भरतद्वारा ज्ञेया ॥ २८ ॥ २९ ॥

असत् संस्थानमित्यादिकं लोकशिक्षणाय व्यञ्जनमात्रमिदं शरीरं मम दुर्विभाव्यं तत्त्वमित्याद्युक्तेः ॥ ३० ॥ ३४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ततो मद्भक्ताः श्रेष्ठास्ते सर्वत एवाधिक्येनाराधनीया इत्याह । मत्तः सकाशाद्येषां न किञ्चित् प्रयोजनं प्रार्थनीयमस्ति अनन्ताद्रिस्यत एवानन्तैश्वर्यमाधुर्यगुणोऽहमेव प्रभुर्येषां प्रयोजनत्वेन वर्त्ते इति भावः । इतरेण ब्रह्मादिना अकिञ्चनानामहन्तास्पदममतास्पदयोर्महामेव दत्तत्वाच्च विद्यते किञ्चनापि येषामित्यर्थः । मयि भक्तिः प्रेमा तामेव भजतां प्रतिक्षणं प्राप्नुवतामित्यर्थः । अत एव तथा बुभूषुभिस्ते नित्यमाराधनीया इति भावः । तृतीयोऽपि ब्राह्मणेभ्योऽपि सकाशाद्भक्ताः श्रेष्ठा उक्ताः श्रीकपिलदेवेन यथा "तस्मान्मय्यर्पिताशेषक्रियार्थात्मा निरन्तरः । मय्यर्पितात्मनः पुंसो मयि संन्यस्त कर्मणः । न पश्यामि परं भूतमकर्तुः समदर्शनात्" इति ॥ २५ ॥

स्पर्द्धावज्ञादिदोषशान्त्यर्थं सर्वभूतसम्माननं विधत्ते । सर्वाणि भूतानि मद्धिष्ण्यतया मदधिष्ठानतया हे सुताः ! ध्रुवाणि स्थावराणि च भवद्भिः सम्मानितव्यानि ध्येयानि विविक्ता मत्सरादिदोषरहिता दृग्दृष्टिर्येषां तैः तदेव हित्वा युष्माभिर्ममार्हणमिति पृथग्वाक्यमतो य इत्यस्य न पौनरुक्त्यम् ॥ २६ ॥

समासेन भक्तेर्लक्षणं तां च विना निस्ताराभावं च वदन्नुपसंहरति । मनो वचोदृशामन्येषाञ्च करणानां यथावदीहितस्य देहव्यापारस्य च मे साक्षात् कृतं सात्तन्मतसम्बन्धित्वेन यत् करणं प्रवृत्तिस्तदेव मे परिबर्हणमाराधनमित्यर्थः । येन परिबर्हणेन विना ॥ २७ ॥

उपशिक्षमाणः उपशिक्षयिष्यन् उर्वरितोऽशिष्टः शरीरमात्रपरिग्रहो यस्य सः ॥ २८ ॥ २९ ॥

तत्र पुरं पत्तनं ग्रामा हट्टहीनाः आकरः खनिः खेटः कृषीवलग्रामः खर्वटः गिरितटग्रामः वाटः पुष्पादिवाटिका शिबिरं सेनाया वासस्थानं व्रजो गवां घोषो गोपानां सार्थो यात्रिकजनसङ्घातः आश्रमा ऋषीणामवनिचरापसदैः मनुष्याधमैः । तर्जनं भयजननं ताडनं प्रहारः मेहनमुपरिमूत्रणं ष्ठीवनं फूत्कृत्य श्लेष्मप्रक्षेपः ग्रावशकृद्रजसां शिलाविड्धूलीनां प्रक्षेपः पूतिवातोऽधोवायुः दुरुक्तं शापस्तैः परिभूयमानस्तत् परिभवनमगणयन् असति अनित्ये संस्थाने संनिवेशे देह इत्युपलक्षणमाकारो यस्य सदित्यपदेशमात्रं यस्य तस्मिन्निरभिमानत्वात् इति स्वामिचरणाः असत् संस्थानमित्यादिकं लोकशिक्षणाय व्यञ्जनामात्रमिदं शरीरं मम दुर्विभाव्यं तत्त्वमित्याद्युक्तेरिति सन्दर्भः किञ्च श्रीऋषभदेवदेहस्य वक्तृपरोक्षत्वादेतच्छब्दवाच्यत्वं न घटते तस्मादेवं व्याख्येयमेतस्मिन् जगति नश्वरत्वादसत्संस्थाने समष्टित्वेन देहमुपलक्षयतीति जगदपि प्राकृतः स्वदेहस्तस्मिन्निरभिमानत्वादिति तर्जनादिकृज्जनसमुदायवतो जगतः स्वदेहत्वेनाभिमाने हन्त हन्त एतादृशमहदपराधदोषदुष्टो जगदात्मको मद्देह इति खेदेन मनः खण्डितं स्यात् अतः स्वमहिम्नि चिन्मयानन्दे यदवस्थानं तेन हेतुना तत्र देहे निरभिमानत्वात् कीदृशेन उभयोश्चिच्छक्तिमायाशक्त्योः स्वीयस्वरूपास्वरूपत्वाभ्यां योऽनुभवस्तेन यत् स्वमहिमावस्थानं तेन ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

येषां मत्तोऽपि किञ्चित् स्वर्गादिरूपमपि प्रार्थनीयं नास्ति इतरेण दात्रा तद्दत्तेन वा राज्यादिना किमु स्यात् ॥ २५ ॥

मद्धिष्ण्यतया मदाश्रिततया मदुपादानतया ध्रुवाणि कारणान्यानि "सदेवसौम्येदमग्र आसीत् सन्मूलाः सौम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" इत्यादिश्रुतेर्वो युष्माभिः पदे पदे प्रतिक्षणम् सम्भावितव्यानि सम्माननीयानि तदेव सर्वभूतसम्माननमेव मम अर्हणं पूजनम् ॥ २६ ॥

आत्रादिशिष्टजनभक्तिं ब्राह्मणभक्तिं सर्वभूतसन्मानं च साधनमुक्त्वाथ सर्वसाधनफलं मन आदिव्यापारफलं च मदाराधन-

अतिसुकुमारकरचरणोरःस्थलविपुलबाहंसगलवदनाद्यवयवविन्यासः प्रकृतिसुन्दरस्वभावहाससुमुखो नवनलिनदलायमानशिशिरतारारुणायतनयनरुचिरः सदृशसुभगकपोलकर्णकण्ठनासो विगूढस्मितवदनमहोत्सवेन पुरवनितानां मनसि कुसुमशरासनमुपदधानः परागवलम्बमानकुटिलजटिलकपिशकेशभूरिभारोऽवधूतमलिननिजशरीरेण ग्रहगृहीत इवादृश्यत ॥ ३१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मित्युपदिशति। मन इति। मनोवचोदृक्सहितानां करणानां श्रोत्रादीनामीहितस्य व्यापारस्य मे परिवर्हणं ममाराधनं साक्षात्कृतं फलं येन परिवर्हणेन कालपाशात् जनो विमोक्तुमात्मानं विमोचयितुं नैशेव समर्थो भवेत् ॥ २७ ॥

अथ गार्हस्थ्यं त्यक्त्वा जनसङ्गहार्थं विरक्तोऽभूदित्याह। स एवमित्यादिना। स्वयमनुशिष्टानपि लोकानुशासनार्थमेवमनुशास्य मुनीनां मननशीलानां मुमुक्षूणां भक्तिज्ञानवैराग्यलक्षणं पारमहंस्यं देहगेहादिविस्मृतिपूर्वकभगवत्प्रावण्ययुक्तः परमहंसस्तस्यानुष्ठेयं पारमहंस्यमुपशिक्षयिष्यन् भरतमभिषिच्य ऋषभ इत्यपदेशो नाम यस्य स भगवान् ब्रह्मावर्तात्प्रवव्राज उर्वरितोऽवशिष्टः शरीरमात्रं परिग्रहो यस्य स ननु दण्डादि आश्रमचिन्हापरिग्रहे कोऽभिप्राय इति चेच्छृणु द्विविधा हि आश्रमिणः लोकप्राप्तिकामाः भगवज्ज्ञानभक्तिसम्पन्ना भगवत्प्राप्तिकामाश्च तत्राद्याः।

अन्तस्त्रिलोक्यां त्वपरो गृहमेधोऽवृहद्व्रतः।
लोकास्त्रयो बहिश्चासन्प्रजानां य आश्रमाः।

इति द्वितीये स्कन्धे सूचिताः तेषां लोकप्राप्तिकामानां स्वलोकसिद्धये आश्रमचिन्हधारणमावश्यकमेव ज्ञानभक्तिसम्पन्नानां तुच्छीकृतब्रह्मलोकपर्यन्तफलानां भगवदनुरागिणां भृतोर्ध्वपुण्ड्रमुद्रादिवैष्णवचिन्हानां परमभागवतानां निरभिमानिनां दण्डाद्याश्रमचिन्हधरत्वमनावश्यकम्।

ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः।
सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः।

इति वक्ष्यमाणादिति दिक् ॥ २८ ॥

अभिभाष्यमाणोऽपि जनानां मध्ये गृहीतमौनव्रतः जडादिवत्तूष्णीं बभूव ॥ २९ ॥

पुरादिषु अनुपथं प्रतिमार्गम् अवनिचरैरपसदैरधमैः मक्षिकाभिर्वनगज इव परिभूयमानोऽपि तदविगणयन् एकचर एकाकी पृथिवीं परिबभ्रामेत्यन्वयः तत्र पुरं पत्तनं ग्रामो हट्टहीनः आकरो मण्याद्युत्पत्तिस्थानम् खेटः कर्षकग्रामः वाटः पुष्पादिवाटिका शिविरं सेनास्थानम् व्रजो गवां घोषो गोपानां सार्थो यात्रिकसमूहः आश्रम ऋषीणाम् कथं भूतः एतस्मिन् संसारे असतां बाह्याभ्यन्तरचारिणां विरोधानां सम्यक् स्थानं यस्मिन् सत्कार्यमपदेशो नाम यस्य तस्मिन् देहोपलक्षणो देह अनित्य उपलक्षणमनित्यतादिदोषद्योतको यस्य तस्मिन् उभययोः हेयोपादेययोः अनुभवो यस्मिन् तेन स्वरूपेण स्वमहिम्नि अवस्थानेन असमारोपितः अहं सम्राट् सर्वममेति अहं ममाभिमानो येन स तस्य भावस्तत्त्वं तस्मात् अखण्डितमनाः ॥ ३० ॥

भाषाटीका

सब देवतों से परमश्रेष्ठ अनन्त मैं हूं स्वर्ग मोक्ष का अधिपति हूं तौ भी मेरे में भक्ति करने वाले पुरुषों को मेरे से भी कुछ प्रयोजन की चाहना नहीं है तो उन अकिञ्चनों को और ऐश्वर्यों से क्या प्रयोजन है ॥ २५ ॥

हे पुत्रो! स्थावर जङ्गम जितने भूतमात्र हैं तिनको आपलोग क्षणक्षणमें निर्मल ज्ञानदृष्टि होकर हमारे निवास स्थान रूप समझो यही हमारा पूजन है ॥ २६ ॥

मन वचन कर्म की चेष्टा साक्षात् फल हमारा पूजन ही है कैसा वह पूजन है कि जिसके विना जीवमात्र महामोह रूप यमपाश से छूटने को समर्थ नहीं होसका है ॥२७॥

श्रीशुकदेवजी बोले महानुभाव परमसुहृद ऋषभनामक भगवान् सब पुत्र स्वयं शिक्षित हैं तौ भी लोकों के शिखाने के लिये इस प्रकार से उनको शिखाकर शान्ति स्वभाव वाले सब कर्मों से निवृत्त जो महामुनिजन तिन के भक्ति ज्ञान वैराग्य रूप परमहंस धर्मको शिखाने की इच्छा से अपने सौ पुत्रों में बडे जो भरतजी जो परमभागवत हैं भगवज्जनों में प्रेमी हैं तिनको पृथिवी के पालन में राज्याभिषिक्त करके आप घरही में शरीर मात्र से अन्य सब पदार्थों को छोडकर पागल से होकर दिगम्बर होकर केशों को खोलकर गार्हस्थ्य अग्नि को शास्त्रविधि से आत्मामे आरोपण करके सर्व संन्यास लेकर ब्रह्मावर्त से निकल गये ॥ २८ ॥

जड अन्ध मूक बधिर सरी के पिशाचसरीके अवधूत वेष धारण किये रहे सब मनुष्यों के तिरस्कार करनेपर भी मौन व्रत धारण करके उदासीन होकर रहगये ॥ २९ ॥

तहाँ तहाँ पुरग्राम खान खेतीके ग्राम पुष्पवाटिका सेनास्थान गउओं के स्थान गोपों के स्थान यात्रावालों का समूह पर्वत आश्रम वन इन सब स्थानों में पुरुषों में अधमलोगोंके तिरस्कार करनेपर भी जैसे वनकी माखीयों से हस्ति को होवे तैसे मनुष्यों के तर्जनता उनके ऊपर मूतना थूकना पत्थरविष्ठा धूलका फेंकना अधोवायू का छोडना इत्यादि को कुछ न गिनकर असत् स्थितिवाले इस देह मे सत् मात्र व्यवहार होनेका है जिसमें स्थूल सूक्ष्म अनुभव से जो अपने स्वरूपमें स्थिति है तिस से अहं ममाभिमानको छोडनेसे चित्त के क्षोभसे रहित होकर इकेलेही पृथिवीमें घूमने लगे ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

स च तदा ग्रहगृहीत इवादृश्यत तत्र हेतुः पराक् पुरतोऽवलम्बमानाश्च ते कुटिलाश्च ते जटिलाश्च कपिशाश्च केशास्तेषां भूरि भारो यस्य सः अवधूतमनादृतमत एव मलिनं निजशरीरं तेन कथ

यर्हि वाव स भगवाँल्लोकमिमं योगस्याद्धा प्रतीपमिवाचक्षाणस्तत्प्रतिक्रियाकर्मबीभत्सितमिति व्रतमाजगरमास्थितः शयान एवाश्नाति पिबति खादत्यवमेहति हदति स्म चेष्टमान उच्चरित आदिग्धोद्देशः ॥ ३२ ॥

तस्य ह यः पुरीषसुरभिसौगन्ध्यवायुस्तं देशं दशयोजनं समन्तात्सुरभिं चकार ॥ ३३ ॥

एवं गोमृगकाकचर्यया व्रजंस्तिष्ठन्नासीनः शयानः काकमृगगोचरितः पिबति खादत्यवमेहति स्म ॥ ३४ ॥

इति नानायोगचर्याचरणो भगवान्कैवल्यपतिर्ऋषभोऽविरतपरममहानन्दानुभव आत्मनि सर्वेषां भूतानामात्मभूते भगवति वासुदेव आत्मनोऽव्यवधानानन्तरोदरभावेन सिद्धसमस्तार्थपरिपूर्णो योगैश्वर्याणि वैहायसमनोजवान्तर्धानपरकायप्रवेशदूरग्रहणादीनि यदृच्छयोपगतानि नाञ्जसा नृप ! हृदयेनाभ्यनन्दत् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्याम्
संहितायां वैयासिक्यामृषभदेवानुचरिते
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भूतोऽप्येवमदृश्यत । अतिसुकुमाराणि करचरणोरःस्थलानि तथा विपुला बाह्वादयस्त एवावयवास्तेषां विशिष्टो न्यासः सन्निवेशो यस्य सः तथा प्रकृत्यैव सुन्दरः स्वभावसिद्धो हासस्तेन शोभनं मुखं यस्य तथा नवनलिनदलवद्धावरती ये शिशिरतारे तापहारिकनीनिके अरुणे आयते नयने ताभ्यां रुचिरः तथा सदृशा अन्यूनाधिकाः सुभगाश्च कपोलकर्णकण्ठनासिका यस्य तथा विगूढस्मितं यद्वदनं तस्य महोत्सवेन विभ्रमेण पुराङ्गनानां मनसि काममुद्दीपयन् एवंभूतोऽपि तथा दृश्यतेत्यन्वयः ॥ ३१ ॥

यर्हि यदा लोकं जनं योगस्य प्रतिपक्षमाचक्षाणः पश्यन्बभूव तस्य प्रतिक्रियाकरणं कर्म च निन्दितमित्याचक्षाणस्तदाजगरं व्रतमास्थितः सन् शयान एवाश्नातिस्मेत्यन्वयः आजगरं व्रतं नामैकत्रैव स्थित्वा प्रारब्धकर्मोपभोगः अवमेहति मूत्रयति हदति पुरीषमुत्सृजति उच्चरिते पुरीषे चेष्टमानो विलुठन् तेनैव दिग्धा आलिप्ता उद्देशा देहप्रदेशा यस्य सः ॥ ३२ ॥

बीभत्समित्याशङ्क्याह । तस्येति । पुरीषस्य सुरभिणा गन्धेन सौगन्ध्यं यस्य सः वायुः ॥ ३३ ॥

एवं गवादिचर्यया पानादि करोति स्म तदेवाह । अजाभिरपि विना । काकमृगगवामिवान्यदपि चरितं वृत्तिर्यस्य ॥ ३४ ॥

नानायोगचर्या आचरतीति तथा लोकयात्रापरिहाराय योगिभिरेवं वर्तितव्यमिति प्रदर्शनाय तथा कृतवान् वस्तुतस्तु भगवान्यतोऽविरतः परममहानुत्तरोत्तरशतगुणत्वेनोक्तो य आनन्दस्तदनुभवस्वरूपः किञ्च वासुदेवे आत्मनोऽव्यवधानेनाभेदेन न विद्यतेऽन्येषामिवान्तरा मध्ये उदरस्य देहोपाधेर्भावस्तेन नित्यनिवृत्तोपाधित्वेनेत्यर्थः स्वत एव सिद्धैः समस्तैरर्थैः फलैः परिपूर्णस्ता-योगैश्वर्याणि नाभ्यनन्दत वैहायसं खेचरत्वम् मनोजवं मनस इव देहस्य वेगं दूरग्रहणं दूरदर्शनम् हे नृप ! हृदयेन मनसा ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अतिसुकुमाराणां करचरणाद्यवयवानां विशिष्टो न्यासः सन्निवेशो यस्य सः तथा प्रकृत्यैव सुन्दरः स्वभावसिद्धो हासः तेन सुन्दरं मुखं यस्य नवनलिनदलवदाचरती शिशिरतारे तापहारिकनीनिके ययोस्ते अरुणे आयते नयने ताभ्यां रुचिरस्तथा सदृशा अन्यूनाधिकाः शोभनाश्च कपोलादयो यस्य तथाविगूढं स्मितं यद्वदनं तस्य महोत्सवेन विभ्रमेण पुराङ्गनानां मनसि कुसुमशरासनं काममुपदधानः उद्दीपयन्नेवम्भूतोऽपि पराक् परित अवलम्बमानाश्च ते कुटिलाश्च कपिशाश्च केशास्तेषां भूरिभारो यस्य अवमतं दुर्जनैरिति शेषः अत एव मलिनं च यन्निजशरीरं तेन ग्रहगृहीत इव पिशाचग्रस्त इवादृश्यतालक्ष्यत जनैरिति शेषः ॥ ३१ ॥

यर्हि यदा स भगवानृषभः लोकं जनं योगस्याद्धा साक्षात्प्रतीपं विरोधमाचरन्तमाचक्षाणः पश्यन् बभूव तस्य प्रतिकूलं प्रतिक्रियाकरणं च बीभत्सितं निन्दितमित्याचक्षाणः प्रतिक्रियाकरणस्य लोकानर्थावहत्वादिति भावः तदा आजगरं व्रतमेकत्र स्थित्वा प्रारब्धोपभोगरूपं व्रतमाश्रितः सन् शयान एवाश्नाति खादति अशनं भोजनं पानादि चर्वणं खादनं मेहति मूत्रयति स्म हदति पुरीषमुत्सृजति स्म उच्चरितमूत्रमलमुच्चरिते पुरीषे चेष्टमानो विलुठन् तेनैवादिग्धा आलिप्ताः तदेशा देहप्रदेशा

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका

यस्य सः बीभत्सितमिदमित्याशङ्क्याह । तस्येति । तस्य ऋषभस्य पुरीषस्य सुरभिणा गन्धेन सौगन्ध्यं यस्य स वायुः समन्ताद्दशयोजनं देशं सुरभीचकार पुरीषस्य सौगन्ध्योक्तिः योगप्रभावातिशयज्ञापनार्था ॥ ३२ ॥ ३३ ॥

एवं गवादिचर्यया यानादि करोति स्म तदेवाह । व्रजन्नित्यादिना । काकमृगगवामिवान्यदपि चरितं वृत्तिर्यस्य इतीत्थं नानायोगचर्याचरणः योगिभिरेवं कर्तव्यमिति प्रदर्शनाय नानाविधयोगवृत्तानि कुर्वाणः कैवल्याधिपतिः मोक्षाधिपतिः परमात्मदृष्टयेदं विशेषणं भगवानृषभः आत्मनि स्वात्मशरीरके तथा सर्वेषामात्मभूते च भगवति वासुदेवे परमात्मदृष्टयेदं वासुदेवे आत्मनि स्वस्मिन्नित्यव्यवधानानन्तरोदरभावेन व्यवधीयतेऽनेनेति व्यवधानं तिरोधायकं कर्म अव्यवधानेन तिरोधायकाभावेन निमित्तेनायमनन्तरोदरभावः तेनान्तरं भेदः उच्छब्दोऽप्यर्थः अरशब्दोऽल्पे वर्त्तते ईषदपि भेद इत्यर्थः ततो नञ्समासः स्वरूपतिरोधायकाभावादभ्यन्तरभूतगणाद्भेदविरहेण तस्याब्रह्मात्मकस्वतन्त्रवस्तुभेदज्ञानस्य किञ्चिन्मात्रस्याप्यभावेनेति यावत् आत्मनः स्वस्य सिद्धाः समस्तार्थाः तैः परिपूर्णः अत एव यदृच्छयानिच्छयापि योगप्रभावादेवानुषङ्गिकतया प्राप्तान्यपि वैहायसादीनि खेचरत्वादीनि योगैश्वर्याणि हे नृप ! हृदयेन मनसा नाभ्यनन्दत् मनोजवो मनस इव देहस्य वेगो दूरदर्शनं दूरस्थवस्तुग्रहणं वैहायसादीनां संसृतिनिमित्तत्वेन मुक्तिविरोधित्वात्तानि न परिगृहीतवानित्यर्थः ॥ ३४ ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अतिसुकुमारस्येतद्विशेषणं सर्वत्रानुगमयितव्यं सदृशेत्येतत् न नयनयोः सादृश्यं कपोलादीनामुक्तं किन्तु कपोलकर्णयोस्तथा चान्योऽन्यसदृशौ कपोलौ कर्णौ चेत्यर्थः सम्पद्येत सुभगत्वं कर्णादीनामपि ग्राह्यं विगूढमीषत्स्पष्टं स्मितं यस्य तत्तथा कुसुमशरं कामं परागधः ॥ ३१ ॥

यर्हि वाव स भगवान् ऋषभदेव इति मत्वा अजगरस्य विद्यमानं व्रतमास्थितस्तदा शयान एवाश्नात्यशनादिकं करोतीत्यन्वयः इमं लोकं योग्यस्य ध्यानापरपर्यायस्योपासनस्याप्रतीपमप्रतिकूलमिवाचक्षाणः पश्यन्निवशब्दात्प्रतिकूलाप्रतिकूललक्षणस्योभयस्य साधनं पश्यन्नित्यर्थः तस्यावमेहनादेः प्रतिक्रियां प्रक्षालनादिकं कर्म बीभत्सितं योगशास्त्रनिषिद्धमिति उच्चरितेन पुरीषेणादिग्धः उपलिप्तः उद्देशः देहप्रदेशो यस्य सः पुरीषसुरभिगन्धेन सौगन्ध्यं यस्य स तथा ॥ ३२—३४ ॥

लोकशिक्षार्थं योगचर्यान्तरमाह । एवमिति । आत्मभूते आधारभूते आत्मनि स्वामिनि अव्यवधानेनानन्तरोदरभावेन निर्भेदब्रह्मभावेन नित्यसिद्धैः समस्तैरर्थैः पुरुषार्थैः परिपूर्णः वैहायसमनोजवादीनि योगैश्वर्याण्यञ्जसा दर्शयितुं नैवाभ्यनन्ददित्यन्वयः वैहायसमाकाशगमनं दूरग्रहणं दूरस्थितग्रहणं ज्ञानं यदृच्छया स्वेच्छया सहसा वा ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

आत्मनि निजांशिनि ॥ ३५ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सदृशा अन्यूनातिरिक्ताः अत एव सुभगा मनोहराः कपोलादयो यस्य सः ॥ ३१ ॥

प्रतीपं क्षुत्पिपासालोकोपद्रवाद्यैर्विक्षेपकारणैः प्रतिकूलम् । इवेत्यारूढयोगानां प्रायः प्रातिकूल्याभावात् आजगरं व्रतं नामैकत्रैव स्थित्वा प्रारब्धकर्मोपभोगः एकत्रावस्थाने सति परिचितत्वाद्लोकोपद्रवाद्याधिक्यं न स्यादिति भावः । अवमेहति मूत्रयति हदति पुरीषमुत्सृजति उच्चरिते पुरीषे चेष्टमानो निलुठन् तेनैव दिग्धा आलिप्ता उद्देशा देह प्रदेशा यस्य सः ॥ ३२ ॥

तस्य चिन्मयशरीरस्यैतद्बीभत्सितमित्याशङ्क्याह । तस्येति । पुरीषस्य सुरभिणा गन्धेन सौगन्ध्यं यस्य सः वायुः ॥ ३३ ॥

काकमृगाणां पशुतुल्यलोकानां गोचरितः तादृशस्वभावत्वेन दृष्टिविषयीभूत इत्यर्थः ॥ ३४ ॥

कैवल्यपतिरित्यन्येभ्योऽपि कृपया यः कैवल्यं ददाति तस्येयं योगिजनशिक्षणार्था लीला ध्येयैव नतु अनुचिकीर्षणीयेति भावः भगवानपि भगवति वासुदेवे वसुदेवनन्दने तस्यैव सर्वावताराणामप्याराधनीयत्वात् यदुक्तं भीष्मेण "अस्यानुभावं भगवान् वेदगुह्यतमं शिवः । देवर्षिनारदः साक्षाद्भगवान् कपिलोमनुः" इति । ईश्वरबाहुल्यं वारयति आत्मनि स्वस्यांशित्वात् स्वस्मिन्नेवेत्यर्थः आत्मनः स्वस्याव्यवधानः साक्षाद्भूतः अनन्तः अपारः रोदं रोदनमश्रु राति आददातीति रोदरो भावः प्रेमा तेनैव सिद्धैः समस्तैरर्थैः परिपूर्णः वैहायसं खेचरत्वं मनोजवं मनस इव देहस्य वेगं दूरग्रहणं दूरदर्शनं हे नृप ! हृदयेन ॥ ३५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

पञ्चमे पञ्चमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अतिसुकुमारा ये करादयोऽवयवास्तेषां विशिष्टो न्यासः सन्निवेशो यस्य सः प्रकृत्या सुस्वभावेनैव सुन्दरः स्वभावसिद्धेन हासेन शोभनं सुखं यस्य सः नवनलिनदलवदाचरतो ये शिशिरतापहारिकनीनिके ययोस्ते अरुणे आयते नयने ताभ्यां रुचिरः सदृशाः समानाः सुभगाश्च कपोलकर्णकण्ठनासिकाः यस्य सः विगूढस्मितवदनस्य महोत्सवेन विलासेन पुरवनि-

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तानां मनसि कुसुमशरासनमुपदधानः एवंभूतोऽपि पराक् परितः अवलम्बमानाश्च ते कुटिलाश्च जटिलाश्च कपिशाश्च केशास्तेषां भूरिभारो यस्य सः अवधूतं तपोयुक्तम् यथेष्टभोजनवस्त्राभरणशय्यासनोन्मर्द्दनापि सकलसुखवर्जितमित्यर्थः अत एव मलिनमसंस्कृतमाणिवत् गूढप्रकाशं निजशरीरं तेन ग्रहगृहीत इवादृश्यत ॥ ३१ ॥

स ऋषभो भगवान् यर्हि लोकं जनं योगस्य अद्धा साक्षात्प्रतीपमिवाचक्षाणः पश्यन् बभूव तत्तस्य लोकस्य प्रतिक्रियाकरणं च बीभत्सितं गर्हितमित्याचक्षाणः तदा आजगरं व्रतमास्थितः सन् शयान एवाश्नाति भोजनं करोति पिबति च खादति चणकादीनां चर्वणं करोति अवमेहति मूत्रयति हदति पुरीषमुत्सृजति उच्चरिते पुरीषे चेष्टमानो विलुण्ठन् तेनैवादिग्धा उद्देशाः शरीरावयवा यस्य सः ॥ ३२ ॥

तस्य भगवतः पुरीषस्य सुरभिणा गन्धेन सौगन्ध्यं यस्य स वायुः समन्तात् दशयोजनं तं देशं सुरभीचकार ॥ ३३ ॥

किञ्च गवादिचर्य्यया पिबति खादत्यवमेहति स्म काकमिव मृगगवामिवान्यदपि चरितं यस्य सः ॥ ३४ ॥

इति एवं नानायोगचर्य्या आचरतीति तथा अविरतः अखण्डः परममहानन्दानुभवो यस्य सः आत्मनि परमात्मनि वासुदेवे सर्वावतारमूले आत्मनः अवतारभूतस्य अव्यवधानः अव्युच्छिन्नः न विद्यते अन्तरे मध्ये उदरः फलाभिसन्धिलक्षणं छिद्रं यस्य स चासौ सच तेन भावेन ध्यानेन सिद्धैः समस्तैरर्थैः फलैः परिपूर्णैः योगैश्वर्य्याणि हे नृप ! हृदयेन मनसा नाभ्यनन्दत् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
पञ्चमाध्यायार्थप्रकाशः ॥ ५ ॥

भाषाटीका

भगवान् ! ऋषभदेवजी का वर्णन है अत्यन्त सुकुमार उनके करचरण वक्षस्थल भ्रू अतिसुकुमार हैं भुजास्कन्ध गला वदन अतिपुष्ट हैं सुन्दर उनका विन्यास है मुखारविन्द मे सुन्दर हास स्वभावहीसे सिद्ध है नूतन कमल दल सरीके शीतलता वाले लालवर्ण के नयनों से अत्यन्त मनोहर हैं सुन्दर वरोवर कपोल कर्ण नासिका वाले हैं मन्दहासके गुप्त होनेसे मुखमे जो विलक्षण शोभा तिससे पुरस्त्रियों के मनमे कन्दर्प को पैदा करते हैं आगे की तरफ लटकते टेढे जटा बन्धे पिङ्गल वर्ण के केशों का भार धारण किये हैं अवधूत का सा मलिन अपने शरीर से ग्रहों के पकडे से लोगों को दीखपडे ॥ ३१ ॥

जव ऋषभ भगवान् ने देखा कि यह संसारी लोग योग का विरोधी है और उसके हटाने का उपाय भी वडा खराव है तव अजगर व्रतको धारण किया तिसमे एक ठिकाने सोतेहि हुये खाते पीते थे और मलमूत्र करते थे उसीसे शरीर भी उनका सव लिप्त होगया था ॥ ३२ ॥

उनके शरीर के विष्ठाके सुगन्ध से युक्त जो वायु तिसने चारों तरफ दश योजन मात्र देशको सुगन्धित कर दिया ॥ ३३ ॥

इस प्रकार गउ मृग काक की चेष्टासे चलते वैठते खडे होते सोते काकगो मृग के तुल्य ही खाते पीते मलमूत्र करते थे ॥ ३४ ॥

निरन्तर परम महा आनन्द अनुभव करने वाले कैवल्यके पति भगवान् ऋषभदेवजी ने सव भूतों के आत्मभूत सव के आत्मा वासुदेव भगवान् मे निरन्तर आत्मा के भाव होने से सिद्ध सव अर्थों से परिपूर्ण होजाने से अपने आपही प्राप्त जो आकाश गमन मनोवेग गमन छिपजाना परकाय प्रवेश दूरदृष्टि इत्यादि योग के ऐश्वर्यों को साक्षात् देखकर भी मन से अच्छा नहीं माना ग्रहण नहीं किया ॥ ३५ ॥

इति श्रीभागवत पञ्चमस्कन्ध पांचवां अध्याय का
भाषानुवाद लक्ष्मणाचार्यकृत
समाप्त ॥ ५ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पञ्चमोऽध्यायः समाप्तः ॥ ५ ॥

——(:०:)——

षष्ठोऽध्यायः ।

॥ राजोवाच ॥

न नूनं भगवः! आत्मारामाणां योगसमीरितज्ञानावभर्जितकर्मबीजानामैश्वर्याणि पुनः क्लेशदानि भवितुमर्हन्ति यदृच्छयोपगतानि ॥ १ ॥

॥ ऋषिरुवाच ॥

सत्यमुक्तं किन्त्विह वा एके न मनसोऽद्धा विश्रम्भमनवस्थानस्य शठकिरात इव सङ्गच्छन्ते ॥ २ ॥

॥ तथाचोक्तम् ॥

न कुर्यात्कर्हिचित्सख्यं मनसि ह्यनवस्थिते ।
यद्विश्रम्भाच्चिराच्चीर्णं चस्कन्द तप ऐश्वरम् ॥ ३ ॥
नित्यं ददाति कामस्य च्छिद्रं तमनु येऽरयः ।
योगिनः कृतमैत्रस्य पत्युर्जायेव पुंश्चली ॥ ४ ॥
कामो मन्युर्मदो लोभः शोकमोहभयादयः ।
कर्मबन्धश्च यन्मूलः स्वीकुर्यात्कोऽनु तद्बुधः ॥ ५ ॥

अथैवमखिललोकपालललामोऽपि विलक्षणैर्जडवदवधूतवेषभाषाचरितैरविलक्षितभगवत्प्रभावो योगिनां सांपरायविधिमनुशिक्षयन् स्वकलेवरं जिहासुरात्मन्यात्मानमसंव्यवहितमनर्थान्तरभावेनान्वीक्षमाण उपरतानुवृत्तिरुपरराम ॥ ६ ॥

तस्य ह वा एवं मुक्तलिङ्गस्य भगवत ऋषभस्य योगमायावासनया देह इमां जगतीमभिमानाभासेन संक्रममाणः कोङ्कवेङ्ककुटकान्दक्षिणकर्णाटकान्देशान्यदृच्छयोपगतः कुटकाचलोपवन आस्य कृताश्मकवल उन्माद इव मुक्तमूर्धजोऽसंवीत एव विचचार ॥ ७ ॥

अथ समीरवेगविधूतवेणुविकर्षणजातोग्रदावानलस्तद्वनमालेलिहानः सह तेन ददाह ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षष्ठे लीनाभिमानस्य देहत्यागक्रमाभिधा ।
प्रदहन्तं दवाग्निं यः पश्यन्नपि न पश्यति ॥ १ ॥

योगैश्वर्याणि नाभ्यनन्ददित्युक्तं तत्र पृच्छति । नेति । भगवः ! हे भगवन् ! योगेन समीरितमुद्दीपितं यज्ज्ञानं तेनावभर्जितानि दग्धानि कर्मबीजानि रागादीनि यैस्तेषां यदृच्छया प्राप्तानि योगैश्वर्याणि पुनः क्लेशदानि भवितुं नार्हन्ति अतः किमिति नाभ्यनन्ददित्यर्थः ॥ १ ॥

अङ्गीकृत्य परिहरति । सत्यमिति । एके बुद्धिमन्तोऽनवस्थानस्य चञ्चलस्य मनसो विश्वासं न सङ्गच्छन्ते न सम्यक् प्राप्नुवन्ति शठः किरातो यथा धृतेष्वपि मृगेषु शठे किराते यथा मृगा इति सप्तम्यन्तं वा पाठान्तरे शठो वञ्चकः किरातो वणिग्व्यवहर्तरि यथा तस्मिन्वा व्यवहर्ता विश्वासं न यातीत्यर्थः पाक्षिकोऽपि दोषो वर्जनीय इत्युपदेष्टुं नाभ्यनन्ददितिभावः ॥ २ ॥

तत्र हेतुः यद्विश्रम्भाद्यस्य मनसो विश्वासाच्चिराच्चीर्णं बहुकालसञ्चितं तपश्चस्कन्द सुस्राव ऐश्वरं विष्णोर्मोहिनीरूपदर्शनेन यद्वा ईश्वराणां समर्थानामपि सौभरिप्रभृतीनां तपः ॥ ३ ॥

नित्यमिति । कृतविश्वासो यो योगी तदीयं मनः कामस्य तमनु येऽरयस्तेषां च छिद्रमवकाशं ददाति यथा कृतविश्वासस्य पत्युः पुंश्चली जाया जाराणामवकाशं दत्त्वा पतिं घातयति तथा मनोऽपि कामादिभिर्योगिनं भ्रंशयतीत्यर्थः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अरीन् कथयन्नुपसंहरति । काम इति । यन्मूलो यन्निमित्तो भवति तन्मनः को नु बुधः स्वीकुर्यात् स्वाधीनमिति मन्येत ॥५॥

प्रासङ्गिकं समाप्य प्रस्तुतमाह । अथेति । अखिलानां लोकपालानां ललामो मण्डनभूतोऽप्युपरता बाधितानुवृत्तिर्यस्मात्स उपरराम देहाभिमानं जहौ विलक्षणैरनेकप्रकारैरवधूतवेषादिभिर्न विलक्षितो भगवत्प्रभावो यस्मिन् सांपरायविधिं देहत्यागप्रकारम् आधाराधेयभावव्यावृत्त्यर्थमाह । अनर्थान्तरभावेनाभेदेन उपासनाव्यावृत्त्यर्थमाह । असंव्यवहितम् ॥ ६ ॥

मनसा स्वयं त्यक्तेऽप्यभिमाने केनापि संस्कारेण देहः प्रचलति यथा कुलालचक्रं सोऽयमभिमानाभासस्तेन स च जीवन्मुक्तानामविद्यावासनया भवतीति ततो विशेषमाह । योगमायावासनयेति । कोङ्कादीन् देशान् गतः सन्कयापि वासनयाऽऽस्ये कृतोऽश्मकवलो येन असंवीतो नग्नः ॥ ७ ॥

समीरवेगेन विधूतानां कम्पितानां वेणूनां संघर्षणेन जात उग्रो दावानलः आलेलिहानः सर्वतो ग्रसन् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदुक्तं युक्तिविरोधित्वाद्वैहायसादीनि योगैश्वर्याणि नाभ्यनन्ददिति तत्र पृच्छति राजा । नेति । हे भगवन्नात्मारामाणां योगेन समीरितमुद्दीपितं ज्ञानं तेन योगरूपवायुसहकृतब्रह्मसाक्षात्काररूपज्ञानाग्निना भर्जितानि दग्धानि कर्मणां बीजानि वासनारूपाणि येषां हेतुगर्भमिदम् ज्ञानयोगाभ्यां निर्दग्धशेषकर्मबीजत्वादित्यर्थः यदृच्छयोपगतानि ऐश्वर्याणि वैहायसादीनि पुनः क्लेशदानि संसृतिनिमित्तानि भवितुं नार्हन्तीति किमिति नाभ्यनन्ददिति प्रश्नार्थः ॥ १ ॥

उत्तरयति शुकः । सत्यमुक्तमिति । योगैश्वर्यासक्तिनिमित्तज्ञानयोगक्षरणासम्भावनयानभिनन्दनेऽङ्गीकारः पुनः संसृतिनिमित्तानि न भवन्त्यत्रानङ्गीकारः सौभर्यादीनामैश्वर्यस्य संसृतिनिमित्तत्वदर्शनात् यदुक्तं पुनः क्लेशदानि न भवन्तीति तत्रापि तु योगक्षरणद्वारा भवन्त्येवेत्याह । किं त्विति । इह वा एके महामुनयः वशीकृतमनसः पुरुषाः किलानवस्थानस्यातिचञ्चलस्य मनसः अद्धा साक्षाद्विस्रम्भं विश्वासं न सङ्गच्छन्ते न प्राप्नुवन्ति न कुर्वन्तीत्यर्थः मनो न विश्वसन्तीति यावत् जितमनस्कानामपि भोगासक्त्या मनःपारवश्ये सत्यव्यवस्थितं मनस्तान् वञ्चयित्वात्माधीनं सत्संसारयेदिति भावः तत्र दृष्टान्तः । शठकिरात इवेति । शठकिरातो वागुरिकः स्वस्मिन् विश्वासपर्यन्तं मृगाधीन इव स्थित्वा वञ्चयन् तान्हन्ति तद्वत् ॥ २ ॥

अत्राभियुक्तोक्तिमुदाहरति । तथाचोक्तमिति । मनस्यनवस्थिते सति कदाचिदपि कस्मिंश्चिदपि जितमनस्कोऽपि मम स्वाधीनमनः किमनर्थमापादयेदिति बुद्ध्या सङ्गं न कुर्यात् यस्य मनसो विस्रम्भाद्विश्वासाच्चिरकालसम्भृतमपि ऐश्वरमीश्वरस्य विष्णोः सम्बधि तपः ज्ञानमयम् उपासनात्मकं तपश्चस्कन्देत् स्कन्द्रे न क्षरेत् ॥ ३ ॥

सङ्गात्कामावसरसम्प्रदाये"सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायत"इत्युक्तरीत्या कामस्पृहा भावेन क्रोधादयः प्रादुःष्युरित्याह । मित्यमिति । यो मनःकृतविश्वासो योगी कामस्य च्छिद्रं योगरूपमैश्वर्यं ददाति काममनुसृत्य जायमाना येऽरयः शत्रुवदनर्थकारिणः क्रोधादयस्ते मनसि कृतमैत्रस्य योगिनो मनश्छिद्रं ददाति यथा कृतविश्वासस्य पत्युः पुंश्चली जाया जाराणामवकाशं दत्वा पतिं घातयति तथेति ॥ ४ ॥

अरीन्कथयन्नुपसंहरति । काम इति । कर्मरूपो बन्धश्च यन्मूलः भोगैश्वर्यभोगासक्तिमूलः अतः को नु पुमान् बुधः सन् तत्कामादिमूलं स्वीकुर्यात् अज्ञश्चेत् स्वीकुर्यादित्यर्थः ॥ ५ ॥

प्रासङ्गिकं परिसमाप्य प्रकृतमाह । अथेति । अखिलानां लोकपालानां ललामो मण्डनभूतोऽपि विलक्षणैरनेकप्रकारैर्जडवदज्ञवदलक्षितः अवधूतवेषादिभिरविलक्षितो भगवत्प्रभावो यस्मिन् योगिनां साम्परायविधिं देहत्यागप्रकारमनुशिक्षयन् स्वशरीरं त्यक्तुमिच्छुरव्यवधानमज्ञानातिरोहितमात्मानं प्रत्यगात्मानमात्मनि परमात्मन्यनर्थान्तरभावेन अर्थान्तरं स्वतन्त्रं वस्तु तस्य भावस्तत्त्वानञ्समासः परमात्मा पृथक्सिद्धत्वेनान्वीक्षमाणः साक्षात्कुर्वाणः अत एव उपरतानुवृत्तिर्निवृत्तप्रारब्धकर्मानुवृत्तिः उपरराम देहादिति शेषः देहं त्यक्तवानित्यर्थः ॥ ६ ॥

त्यागप्रकारमेवाह गद्यद्वयेन । तस्येति । एवं मुक्तलिङ्गस्य मनसा त्यक्तशरीराभिमानस्य तस्य भगवतो ऋषभस्य देहो विचचारेत्यन्वयः देहो विचचारेत्युक्तिर्देहधारणानादरद्योतनार्था अन्यथा सुषुप्तमूर्च्छितदेहस्येव संचारानुपपत्तेः कथंभूतो विचचार योगमायाया भगवन्मायाया वासनाया मायायास्तीर्णत्वेऽपि तद्वासनामात्रानुवृत्त्यायःअभिमानाभासः देहे आत्मीयत्वाभिमानाभासस्तेन देहात्माभिमानाभासमात्रमेवास्य ननु तत्त्वतो देहात्माभिमानोऽस्तीति ज्ञापनायाभासपदं प्रयुक्तम् इमां जगतीं चङ्क्रममाणः सञ्चरन्नेकदा कर्हिचित्कोङ्कणादिदेशान् यदृच्छयागतः कुटकाचलस्थसमीपवने आस्ये वक्त्रे कृतः निक्षिप्तः अश्मैव कवलो येन उन्माद इव लक्ष्यमाणः मुक्ता विक्षिप्ताः मूर्द्धजाः शिरोरुहा यस्य असम्वीतः नग्न एव ॥ ७ ॥

अथानन्तरं समीरवेगेन विधूतानां कम्पितानां वेणूनां विघर्षणेन संघर्षणेन जातो य उग्रो दवाग्निस्तद्वनं कुटकाचलो पवनमालेलिहानो दहनः तेन ऋषभस्य देहेन सह ददाह दाह्यासाहित्यमत्र विवक्षितम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

शुभयोगिजनशिक्षार्थमशुभयोगिजनमोहनार्थं तत्प्रभृतिभेदाभेदशास्त्रप्रवृत्तिप्रकाश इत्येतदृषभदेवचरितापदेशेन निरूप्यतेऽस्मिन्नध्याये । तत्रादौ यद्यपि देवादीनामैश्वर्यभोगेन मनःसक्त्यामुक्तिसङ्गानन्दह्रासो नास्ति तथाप्यल्पाधिकारिणां स स्यादित्यादितात्पर्यं ज्ञाप्यते अत्रानन्तरातीताध्यायान्ते योगैश्वर्याणि नाभ्यनन्ददित्युक्तं तत्र राजा शङ्कते । न ननूनमिति । योगेन हरेरुपास्तिलक्षणेन समीरितमुत्पन्नं यत् ज्ञानं तेनावभर्जितं दग्धं कर्मबीजं रागादिलक्षणं येषां ते तथा तेषां परमात्मनिरतानां यदृच्छयानिच्छयोपगतानि योगैश्वर्याणि पुनः पश्चात्क्लेशदानि भवितुं नार्हन्ति नूनं कथं तानि नाभ्यनन्ददित्यन्वयः ॥ १

अर्द्धाङ्गीकारेण परिहरति । सत्यमिति । अनङ्गीकारपक्षमाह ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किन्त्विति । एके महात्मानः घटकिराटे नूतनघटे स्थितस्य जलस्येवानवस्थानस्य विस्रम्भं विश्वासं वा इत्यनेन ।

महैश्वर्यस्वरूपोऽपि भगवानृषभो विराट् ।
नैश्वर्याणि स्वकीयानि ख्यापयामास सर्ववित् ।
उत्तमानां ज्ञापनार्थं धर्मतत्त्वस्य केशवः
तेषामैश्वर्यभोगे हि मनः सक्तिं व्रजेद्यदि ॥
आनन्दो मुक्तिगो ह्रासं विकर्मकरणाद्व्रजेत् ।
धर्माधर्मविहीनोऽपि भगवानृषभस्ततः ॥
तेषां धर्मज्ञापनार्थं नाविश्चक्रे परां स्थितिम् ।
देवानां नाशुभाद्ध्रासः शुभात्किञ्चित्सुखोन्नतिः ।
आधिकारिकजीवानामेवमन्येषु तद्द्वयम् ॥
अल्पाधिकारिणां तत्र ह्रासोऽपि भवति ध्रुवम् ।
अशुभाभावजोन्नाहो महाधिकारिणामपि ॥
अशुभे कृते न भवति तारतम्या च सस्मृतः ।
प्रजायाश्च तथा देवा महाधीकारिणः स्मृताः ॥
ऋष्यशीतिस्तथा सप्त पितरोऽप्सरसां शतम् ।
गन्धर्वाणां तथा राज्ञां विंशदन्यासु जातिषु ॥
अल्पाधीकारिणः प्रोक्ता अनधिकारिणः परे इति ।

शास्त्रान्तरप्रसिद्धं तात्पर्यं ज्ञापयति । मठकिराट इति पठित्वा वागुरेति केचिद्व्याचक्षते ते प्रेक्षकाणां परिषद्यसम्प्रदायज्ञा इति परिहसनीया इति ॥ २ ॥

त्रैलोक्यशिक्षार्थं श्लोकसंग्रहेणमुक्तमित्याह । तथाचोक्तमिति । यथा मनोविश्वासे तपआदेर्विस्रंसनं भवति तथा चोक्तमित्यर्थः ऐश्वरमीश्वरविषयम् अनेन सौभर्यादीश्वराणामपि यथा तपः स्कन्दितं तथेति ध्वनयति ॥ ३ ॥

छिद्रमवकाशं तमनु कामानन्तरम् अरयः क्रोधादयः तेषां चच्छिद्रं ददातीत्यर्थः कृतमैत्रस्य मनसा सहेति शेषः पुंश्चली पुरुषमात्राभिगामिनी जाया पत्युररीणामुपपतीनां प्रवेशमिव ॥ ४ ॥

पात्रे प्राप्ते द्रव्यात्यागेच्छा लोभः अतीतदुःखस्मरणनिमित्तचित्तविक्षेपः शोकः वैचित्र्यं विपरीतज्ञानं मोहः पूर्वस्थितात्स्खलनं भयं कर्मणा संसारबन्धो यन्मनोमूलं यस्य स तथा को नु बुधस्तन्मनो ममेष्टमिति स्वीकुर्यादित्यर्थः ॥ ५ ॥

अधुना प्रासङ्गिकं मोहं परिहृत्य प्रकृतमनुसरति । अथेति ।

विष्णोः कलेवरत्यागो भूत्यागोऽन्यो न विद्यते ।
कलेवरत्यागोऽन्येषां पञ्चत्वं समुदीरितम् ।

इति वचनात्स भगवान् स्वकलेवरं स्वाधीनां पृथिवीं जिहासुः त्यक्तुमिच्छन्नुपरराम विरतव्यापारो बभूवेत्यन्वयः कलेवरशब्दस्य प्रतीत एवार्थः किं न स्यादित्याशङ्क्य वक्ष्यमाणानां विशेषणानां प्राकृतपुरुषेऽसम्भवादुक्त एवार्थ उचित इति भावेनाह । अखिलेति अखिललोकपालानां ललामश्चुडामणिः अनेनाप्राकृतत्वं कथमवगतमित्यत उक्तं विलक्षण इति । लोकविपरीतलक्षणः अस्थूलमनण्वह्रस्वमित्यादेः कथं तर्हि तस्य प्रभावो न लक्ष्यत इत्यत उक्तं जडवदवधूतेति । किमतः प्रयोजनमत उक्तं योगिनामिति । साम्परायविधिं मोक्षसाधनप्रकारम् उपाहितव्यास्य शिक्षा कथं मोक्षोपयोगिनी स्यादित्यत उक्तमात्मनीति । आत्मानं स्वस्वरूपमात्मनि ब्रह्मणि अनर्थान्तरभावेन भिन्नो नास्मीति मनसा असंव्यवाहितं व्यवधानरहितमन्वीक्षमाणोऽनुभवन्नुपरतानुवृत्तिः निवृत्तविषयानुवृत्तिः निवृत्तमुक्त्यन्यवस्थो वा नित्यमुक्त्यवस्थत्वादिति ॥ ६ ॥

इदानीं हरेर्देहः सच्चिदानन्दत्वेन तदभिन्न इतिदर्शयितुं तस्य सञ्चरणप्रकारं वक्ति । तस्य ह्वेति । एकदर्षभस्य देह इमां जगतीं विचचारेत्यन्वयः मुक्तलिङ्गस्य वर्णाश्रमादिलक्षणरहितस्य भौतिकशरीररहितस्य वा योगमाया योगसामर्थ्यं तस्यावसानं काष्ठोत्कर्षौ यस्य स तथा देहस्य जडस्य सञ्चरणं कथं घटत इत्यत उक्तमभिमानाभासेनेति । अभितो ज्ञानप्रकाशेन चङ्क्रममाणः पुनः पुनः पादक्षेपं कुर्वाणः ज्ञानात्मकत्वात् गमनादिक्रियां कुर्वाण इत्यर्थः अनेन देहदेहिनोरभेदोऽपि सूचित इति कस्मात् कान् देशानुद्दिश्य गमनमित्यत उक्तम् । काङ्कटकर्णाटकादीति । काङ्कटकर्णाटकाञ्चीमरथ्युपपदनदीमातृकदेशाद्दक्षिणकर्णाटकान् सौराष्ट्रादिदेशान् स्वेच्छयोपगतः तत्र नागपुरग्रामात्पूर्वत उत्तरनदीनामास्ति तस्य निकटे कुटचाचलस्य कुटचपर्वतस्य प्राचीनसानौ विद्यमाने उपवने स्थित आस्यकृताश्मकबलः मुखान्तर्गतपाषाणग्रासः असम्वीतो वस्त्राद्यावरणरहितः उन्मादे सति पुमान्यथा चेष्टते तथेत्यर्थः ॥ ७ ॥

इदानीं तस्य देहत्यागव्याजेन दावाग्निनिविष्टस्य जगत्संहारप्रकारमाह । अथेति । समीरवेगेन विधुता अन्योऽन्यमाकम्पिता ये वेणवः वंशास्तेषां निकर्षान्निष्पेषणाज्जातो यो दवानलोज्वलज्जिह्वया दिवमालेलिहानस्तेनाग्निना साधनेन सह भगवांस्तदुपवनं ददाहेत्यन्वयः वनमित्युपलक्षणं जगदपीति शेषः अत्र प्रतीतमनङ्गीकृत्यान्यार्थाङ्गीकारे किं प्रमाणमत्रोच्यते ।

ज्ञानानन्दात्मको देह ऋषभस्य महात्मनः ।
तादृशेनैव मनसा क्रमंश्च कुटचाचले ।
दावाग्निमनुविश्याथ तत्रस्थः प्रादहज्जगदिति ।

कालान्तभाविनो विश्वसंहारस्येदानीमयं कर्तेति कथं युज्यत इति चेन्न तद्देहित्वेनाग्नेरभिव्यंज्य तत्र स्थितस्य तस्य योगात् तदुक्तम् ।

एवमग्नेरभिव्यक्तस्तस्थौ विष्णुः सनातन इति

न केवलं विश्वक्षयपर्यन्तमेव स्थितं किंतु पश्चादपि मतं तर्हि स्वमाहात्म्यं किं न प्रकटितमिति चेन्न भूमाववतारस्य देवशिक्षणार्थत्वेन धर्माणामप्राकट्यस्य स्वधर्मत्वात् ऋषभत्वेन सङ्घार्थधर्मानद्यापि तत्रगः आस्ते सवासुदेवात्मा वासुदेवोऽहमित्यजः सदास्थित इत्यनेन स्वरूपज्ञानस्य कदापि तिरोभावो नास्तीति सूचितं निर्लेपेन सर्वज्ञेन सर्वोत्तमेन हरिणा किंप्रयोजनमकारीति चेन्न असुरजनमोहनार्थत्वात् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

टीकायां पाक्षिक इति दोषो भवति नवेति सन्दिह्यमानदोषोऽपीत्यर्थः वस्तुतस्तु उत्तरपदस्य साधकमात्रविषयत्वात् तानपि शिक्षयितुमिति भावः अनुशिक्षयन्निति तत्तत् सर्वं मायानुकरणमात्रमिति ज्ञेयम् । अत एवानुकरणेन शिक्षयन्निति पदार्थश्च वास्तवार्थोऽयं स्वकलेवरं स्वाधिष्ठानं प्रपञ्चमात्मनि निजांशिनि श्रीवासुदेवे आत्मानं तदंशं श्रीऋषभदेवाख्यमनुप्राप्तिः प्रपञ्चानुवर्त्तनम् उपरराम तदभिमानं जहौ ॥ १—६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

लिङ्गमपि तदेव योगमायावासनया लीलेच्छासंस्कारेण आस्ये कृताश्मकवलत्वमन्यत् किञ्चिदपि न भोक्तव्यं न वक्तव्य मित्यभिप्रायाभासेन ॥ ७ ॥

अथ समीरेति । वास्तवार्थश्चायं तेन सहेति कर्तृसाहाय्ये तृतीया गौणमुख्यन्यायेन कर्त्तर्य्येव प्राथमिकप्रवृत्तेः ततश्च दावानलस्तद्वनवर्त्तितवादिजीवानां स्थूलं देहं ददाह ऋषभदेवस्तु सूक्ष्मं देहमिति तस्य सर्वमोक्षदत्वादनुसन्धेयम् "स वैः स्पृष्टोऽभिदृष्टो वा । संविष्टोऽनुगतोऽपि वा । कोशलास्ते ययुः स्थानं यत्र गच्छन्ति योगिनः । इतिवत् ततोऽनलसाधर्म्यं वर्णयित्वा तद्वद्न्तर्द्धानमेव तस्येति व्यञ्जितम् ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

मनसश्चाति दौरात्म्यं देहान्तर्द्धापनं हरेः ।
पाषण्डोत्पत्तिरित्येवं षष्ठेऽध्याये निरूप्यते ॥

योगैश्वर्याणि नाऽभ्यनन्ददिति श्रुत्वा पृच्छति । नेति । हे भगवः ! हे भगवन् ! योगेश्वरेण समीरितमुद्दीपितं यज्ज्ञानं तेनावभर्जितानि कर्मबीजानि यैस्तेषां यदृच्छयोपगतानीति नह्यकस्मात् प्राप्तेषु भोगेष्वनपकुर्वत्सु विरज्यत इति भावः ॥ १ ॥

सत्यमुक्तमिति । क्लेशदानि न भवन्त्येव तदपि एके सुधियः मनसो विश्वासं न संगच्छन्ते न सम्यक् प्राप्नुवन्ति । कुतः अनवस्थानस्य प्रतिक्षणमेव प्राप्तनानादशाकस्येत्यर्थः । तेन शुद्धं भूत्वाप्यशुद्धं भवितुं न तस्य विलम्ब इति भावः । शठे धूर्त्ते किराते नीचजातौ च धूर्तो यथा सौहार्दं प्रदर्श्य लुण्ठितमेव विश्वासितारं हन्ति तथैव मनः खलु कामक्रोधाद्यनभिभवरूपां स्वशुद्धिं प्रदर्श्य स्वनिरोधे शिथिलप्रयत्नं साधकमेकस्मिन् दिने कामाद्यैरेधाकस्मिकैस्तमधः पातयति यथा च नीचजातिर्मुहुरपि धर्ममध्यापितोऽपि साधुतां दधानोऽपि गृहकोषादिषु विश्वस्तः सन् समये दुस्त्यजस्वीयस्वभावप्राप्तं चौर्यमेव करोति तथैव मनः शमदमादिभिः शोधितमपि श्रवणमननादिषु स्थैर्यं दधानमपि विश्वस्तं सदनिरुध्यमानं कस्मिंश्च लक्षणे दुर्विषयेष्वपि निमज्ज द्विवेकज्ञानादिकमपहरति ॥ २ ॥

यस्य विस्रम्भात् विश्वासात् चिरार्ज्जितं बहुकालसञ्चितं तपश्चस्कन्द सुस्राव । ऐश्वरं शाम्भवं विष्णोर्मोहिनीरूपदर्शनेन यद्वा ईश्वराणां समर्थानामपि सौभरिप्रभृतीनां तपः ॥ ३ ॥

तत्र हेतुः । नित्यमिति । कृतविश्वासस्य योगिनो मनः कामस्य छिद्रमवकाशं ददाति तं काममनु ये अरयः क्रोधलोभादयस्तेषाञ्च । यथा कृतविश्वासस्य पत्युः पुंश्चली जाया जाराणामवकाशं दत्त्वा पतिं घातयति तथा मनोऽपि कामादिभिर्योगिनं भ्रंशयतीत्यर्थः ॥ ४ ॥

अरीन् कथयन्नुपसंहरति । काम इति । यन्मन एव मूलं यस्य सः ॥ ५ ॥

प्रासङ्गिकं समाप्य प्रस्तुतमाह । अथेति । सम्परायविधिं देहत्यागप्रकारमिति देहत्यागानुकरणेनैव शिक्षयन्नित्यर्थः तद्देहस्य चिन्मयत्वात् वस्तुतस्तु आत्मनि परमात्मनि स्वस्मिन् आत्मानं श्रीऋषभदेवाख्यशरीरमव्यवहितं मायाव्यवधानरहितम् । अत एवानर्थान्तरभावेन अभेदेन अन्वीक्षमाणः प्रतिक्षणं पश्यन् उपरता अनुवृत्तिरवधूतत्वानुकरणं यस्य सः उपरराम स्वावतारलीलातो विरराम अत एव स्वकलेवरं जिहासुः स्वकलेवरप्राकट्यं त्यक्तुमिच्छुरिति वास्तवोऽर्थः अत्राग्रेऽपि प्रकटोऽर्थः स्पष्ट एव ॥ ६ ॥

तस्य देहान्तर्धानप्रकारमाह । तस्येति । भगवतोऽपि मुक्तलिङ्गस्य त्यक्तभगवच्चिह्नस्य मुक्तानामिव लिङ्गं यस्येति वा यथा योगिनां केनापि संस्कारेण देहः प्रचलति निष्पन्नघटमपि कुलालचक्रमिव सोऽयमभिमानाभासः स च जीवन्मुक्तानामविद्याभासवासनया भवतीति ततो विशेषमाह । योगमायावासनया आवधूत्य लीलेच्छासंस्कारेण यथातिबालको यद्यत् प्राप्नोति तदपि स्वमुखे निःक्षिपति तथैव कृताश्मकवलः असंवीतो नग्नः ॥ ७ ॥

उपररामेत्युक्तं तत्र किं कुर्वन्नुपररामेत्यत आह । अथेति । तेन सह श्रीऋषभदेवसहित एव दावानलस्तद्वनं ददाह । तद्वनवर्त्तितरुमृगादीनां स्थूलं देहं दावानलो ददाह सूक्ष्मं देहन्तु श्रीऋषभ इति तद्वनवर्त्तिनः सर्वे तत्प्रसादान्मुक्ता बभूवुरित्यर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीप ।

षष्ठे ऋषभचरितमुपसंहरति पूर्वाध्यायान्ते योगैश्वर्याणि नाऽभ्यनन्ददित्युक्तम् तत्र तदभिनन्दने आत्मारामाणां काहानिरित्याशयेन पृच्छति । न नूनमिति । हे भगवः ! हे भगवन् ! योगेन ध्यानयोगेन समीरितमुद्बोधितं यज्ज्ञानं तेनावभर्जितानि देहगेहादौ अहम्ममात्मकानि कर्मबीजानि यैस्तेषां योगैश्वर्याणि क्लेशदानि दुःखदानि न भवितुमर्हन्ति अतः किमिति नाऽभ्यनन्ददिति भावः ॥१॥

अनवस्थानस्य दुरवग्रहस्य शठकिराते मृगा इवेति शेषः इह पूर्वस्वभावपरित्यागे मनसो विस्रम्भं न सङ्गच्छन्ते शठकिराते यथा यथा पूर्वस्वभावपरित्यागे विस्रम्भं न सङ्गच्छन्ते इत्यन्वयः ॥ २ ॥

यस्य मनसो विस्रम्भाद्विश्वासात् चीर्णं सञ्चितम् ऐश्वरं माहेश्वरम् मोहिनीदर्शने चस्कन्द सुस्राव ॥ ३ ॥

कृतं मैत्रं मनसो विश्वासो येन तस्य मन इति शेषः कामस्य छिद्रं ददाति तं काममनु ये अरयः मन्युमदादयस्तेषां च यथा कृतविश्वासस्य पत्युः पुंश्चली जाया जारस्य तदनुवर्तिनां च छिद्रं ददाति ॥ ४ ॥

यन्मूलो यन्निमित्तस्तन्मनः कः स्वीकुर्यात्स्वायत्तं मन्येत ॥ ५ ॥

अथोक्तलोकसङ्ग्रहार्थस्वचेष्टितप्रदर्शनानन्तरम् अखिललोकपालानां ललामोऽलङ्कारभूतः योगिनां साम्परायविधिं देहविन्यासविधिमनुशिक्षयन् उपरतानुवृत्तिः उपरता निवृत्ता देहाभिमानरूपा अनुवृत्तिर्यस्मादन्येषां तच्चरितचिन्तकानां सः उपरराम लोकसङ्ग्रहार्थचेष्टितान्निवृत्तोऽभूत् किं कुर्वाणः आत्मानमवतारभूतमात्मन्यवतारिणि विष्णौ अर्थान्तरभावः नृदेवभावः तद्वैपरीत्येन असंव्यवहितं निर्व्यवधानमन्वीक्षमाणः साक्षात्कुर्वाणः ॥ ६ ॥

एवं मुक्तलिङ्गस्य त्यक्तनृपलीलस्य तस्य ऋषभस्य देहो युज्यते इति योगः सङ्कल्पस्तेन गृहीता या नृपलीला तस्यास्त्यक्तत्वेऽपि तद्वासनया अभिमानस्य गन्तृत्वाभिमानस्य आभासेन इमां जगतीं चङ्क्रममाणः कोङ्कादीन्देशान् गतः सन् कयापि वासनयास्ये कृतः अश्मकवलो येन सः असम्वीतो नग्नो विचचार॥ ७ ॥ ८ ॥

यस्य किलानुचरितमुपाकर्ण्य कोङ्कवेङ्ककुटकानां राजाऽर्हन्नामोपशिक्ष्य कलावधर्म उत्कृष्यमाणे भवितव्येन विमोहितः स्वधर्मपथमकुतोभयमपहाय कुपथपाषण्डमसमञ्जसं निजमनीषया मन्दः सम्प्रवर्त्तयिष्यते ॥ ६ ॥

येन ह वाव कलौ मनुजापसदा देवमायामोहिताः स्वविधिनियोगशौचचारित्रविहीना देवहेलनान्यपव्रतानि निजनिजेच्छया गृह्णाना अस्नानानाचमनाशौचकेशोल्लुञ्चनादीनि कलिनाऽधर्मबहुलेनोपहतधियो ब्रह्मब्राह्मणयज्ञपुरुषलोकविदूषकाः प्रायेण भविष्यन्ति ॥ १० ॥

ते च ह्यर्वाक्तनया निजलोकयात्रयाऽन्धपरम्परयाऽऽश्वस्तास्तमस्यन्धे स्वयमेव प्रपतिष्यन्ति ॥११॥

अयमवतारो रजसोपप्लुतकैवल्योपशिक्षणार्थः तस्यानुगुणान् श्लोकान् गायन्ति ॥ १२ ॥

अहो भुवः सप्तसमुद्रवत्या द्वीपेषु वर्षेष्वधिपुण्यमेतत् ।
गायन्ति यत्रत्यजना मुरारेः कर्माणि भद्राण्यवतारवन्ति ॥ १३ ॥
अहो नु वंशो यशसावदातः प्रैयव्रतो यत्र पुमान् पुराणः ।
कृतावतारः पुरुषः स आद्यश्चचार धर्मं यदकर्महेतुम् ॥ १४ ॥
को न्वस्य काष्ठामपरोऽनुगच्छेन्मनोरथेनाप्यभवस्य योगी ।
यो योगमायाः स्पृहयत्युदस्ता ह्यसत्तया येन कृतप्रयत्नाः ॥ १५ ॥

इति ह स्म सकलवेदलोकदेवब्राह्मणगवां परमगुरोर्भगवत ऋषभाख्यस्य विशुद्धाचरितमीरितं पुंसां समस्तदुश्चरिताभिहरणं परममहामङ्गलायनमिदमनुश्रद्धयोपचितयाऽनुशृणोत्याश्रावयति वाऽवहितो भगवति तस्मिन् वासुदेव एकान्ततो भक्तिरनयोरपि समनुवर्त्तते ॥ १६ ॥

भाषाटीका

राजा परीक्षित् जी बोले हे भगवन् ! निश्चित है कि योगसे उद्दीपित किये ज्ञान रूप अग्नि से जिन के कर्म बीज नष्ट होगये हैं ऐसे आत्माराम योगिजनों को दैवयोग से प्राप्त जो ऐश्वर्य हैं सो तो क्लेशदायक नहीं होते हैं तब ऋषभदेवजीने क्यों उनका त्यागकिया ॥ १ ॥

ऋषि श्रीशुकदेवजी बोले कि आपका सत्यकथन है तथापि यह मन धूर्त किरात सरीखा है उत्तम महात्मा लोग इस का विश्वास नहीं करते हैं ॥ २ ॥

तैसा कहा है चञ्चल मनका कभी विश्वास नहीं करना चाहिये जिस के विश्वास करने से चिरकाल से सञ्चित जो तपस्या सो श्रीमहादेवादिकों का नष्ट होगया है ॥ ३ ॥

जैसे कि दुष्ट स्त्री के विश्वास करने वाले पुरुष के मारने को खोटी स्त्री जार पुरुषों को अवकाश बताती है तैसे मन के साथ विश्वास करने वाले योगी को भ्रष्टकरने को मन भी विषय भोग रूप शत्रुओं को अवकाश देतारहता है ॥ ४ ॥

जिसमन के हेतु से काम क्रोध मद लोभ शोक मोह भयादिक कर्म बन्ध इस मनुष्य को होते हैं तिस को कौन पण्डित विश्वास से ग्रहण करेगा ॥ ५ ॥

इसप्रकार से सब लोकपालों के भूषण रूपभी भगवान् जड अवधूत सरी के विलक्षण वेष भाषा चरितों से भगवत्प्रभाव को छिपाकर योगियों का देहत्याग विधि को दिखाने के वास्ते शरीर के छोडने की इच्छा से सदा निरन्तर अभेद भावसे परमात्मा में भावना को लगाते हुये देहादि अभिमान वृत्ति से निवृत्त होगये ॥ ६ ॥

इस प्रकार से मुक्तदेहाभिमान भगवान् ऋषभदेवजी का शरीर, योगमाया की वासनासे अभिमान के आभास से इस पृथिवी में घूमता हुआ कोंक वेंकट कुटक आदि दक्षिण कर्णाटक देशों में दैवयोग से जाकर कुटकाचल पर्वत के जङ्गल में प्रमत्त के सरीखा केशों को खोलकर नग्नहुआ मुख में पाषाण को रखकर घूमता रहा ॥ ७ ॥

इस के अनन्तर वायु के वेगसे कम्पायमानवांसों के घिसने से उत्पन्नहुआ जो उग्र दावानल उस बन को जलाता हुआ उन के सहित दहन कर गया ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अवधूतवेषेण ऋषभदेवस्तत्र गत इत्येतस्य सूचकमाह । यस्य किलाश्रमातीतमनुचरितं तद्देशवासिभ्य उपाकर्ण्य अर्हन्निति नाम यस्य स राजा स्वयं तदुपशिक्ष्य शिक्षित्वा कुपथ

श्रीधरस्वामिकृतभावार्थदीपिका ।

आसौ पाषण्डश्च ते निजमनीषया सम्प्रवर्त्तयिष्यत इत्यन्वयः तत्र हेतुः कलावित्यादि भवितव्येन प्राणिपूर्वसञ्चितपापफलेन ॥ ९ ॥

येन प्रवर्तकेन मनुजेष्वपसदा निकृष्टाः स्वविधिना नियोगो यस्मिन् शौचचारित्रे तद्विहीना देवावज्ञारूपाण्यस्नानादीनि कुव्रतानि गृह्णाना वेदादीनां विदूषका भविष्यन्ति ॥ १० ॥

तत्फलं चान्धन्तमः प्राप्स्यन्तीत्याह । ते चेति । अर्वाकनया अवेदमूलया निजलोकयात्रया स्वेच्छाकृतप्रवृत्त्या आश्वस्ताः कृतविश्वासाः ॥ ११ ॥

ननु तह्यनर्थकारी किमर्थोऽयमृषभावतारस्तत्राह । अयमिति । रजोव्याप्तानां जनानां मोक्षमार्गोपशिक्षणार्थः तस्य कैवल्योपशिक्षणस्यानुरूपान् ॥ १२ ॥

अधि अधिकं पुण्यं यस्मिन् एतद्भारतं वर्षम् ऋषभाद्यवतारयुक्तानि कर्माणि ॥ १३ ॥

प्रियव्रतस्य वंशः अवदातः शुद्धः यत्र वंशे यद्यस्मात् अकर्मैमोक्षस्तस्य हेतुं धर्मं चचार ॥ १४ ॥

अपरः को नु योगी अस्य काष्ठां दिशमप्यनुगच्छेत् यो योगी येन ऋषभेणासत्तयाऽवस्तुत्वेनोदस्ता निरस्ता योगमायाः सिद्धीर्वाञ्छति कथम्भूताः कृतः प्रयत्नो यासु तदर्थं प्रयत्नं च करोतीत्यर्थः । यद्वा कथम्भूता उदस्ताः कृतप्रयत्नाः सेवितुमुद्यता अपीत्यर्थः ॥ १५ ॥

विशुद्धाचारितं यदीरितं कथितं तत्समस्तं दुश्चरितमभितो हरतीति तथा परममहामङ्गलानामयनं च अवहितः सन् अनयोरपि श्रोतृश्रावयित्रोरविशेषेण भक्तिः सम्यगनुवृत्ता भवतीत्यर्थः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्य ऋषभस्याश्रमातीतं चतुराश्रमधर्मानतीत्यं वर्त्तमानमनुचरितं कुटकाचलोपदेशवासिकस्य आकर्ण्यार्हन्निति नाम यस्य स राजा विमोहितः ऋषभस्य गोमृगाजगरादिव्रताचरणस्य शास्त्रीयत्वमजानन् वैदिकधर्मातिलङ्घित्वे बुद्धिं कृत्वाऽकुतोभयं नास्तिकुतोऽपि भयं यस्मात्तत्स्वधर्ममप्यपहाय स्वयमार्षभं व्रतमुपशिक्षमाणा उपशिक्षित्वा कुपथश्चासौ पाषण्डश्च तमसमञ्जसमुपधर्मं प्रति मनुजान्निजमनीषया मन्दोऽज्ञः स आर्हताख्यग्रन्थबन्धनेन सम्प्रवर्त्तयिष्यति कथमेतस्य प्रसारणे मनुजाः प्रवर्तन्त इत्यत्रोक्तं कलावधर्मे उत्कृष्यमाणे भवितव्येनेत्युक्तभवितव्येन प्राणिनां पूर्वसञ्चितपापमूलकेनाशनेन कलौ युगे अधर्मे उत्कृष्यमाणे उत्कर्षं प्राप्ते सतीत्यर्थः भवितव्येन युगानुसारेण मनुजानामधर्मबुद्धिभूयस्त्वादार्हन्ते प्रवर्तन्ते इत्यर्थः ॥ ९ ॥

मनुजेष्वपसदाः निकृष्टाः पूर्वमेव देवमायया विमोहिताः येनार्हन्तेनोपदेशेन नित्यं मोहिताः सन्तः स्वाविधिना स्वस्य वर्णाश्रमानुरूपधर्मविधिना प्राप्तो यो नियोगो नियमः यस्मिन् शौचचारित्रे तेन शौचचारित्रेति समाहारद्वन्द्वः इतरेतरयोगे तु नियोगोपयोगस्ताभ्यां विहीनाः तत्र शौचं स्नानादिजाता देहशुद्धिः चारित्रं संध्योपासनादि देवावज्ञारूपाण्यस्नानादीनि कुव्रतानि निजेच्छया गृह्णानाः कुर्वाणाः अधर्मप्रचुरेण कलिनापहृता अभिभूता धियो विवेका येषां ते ब्रह्मादिविदूषकाः प्रायशो भविष्यन्ति अस्नानं स्नाभावः आचमनाभावः अत एवाशौचं केशलुञ्चनं केशोत्पाटनं ब्रह्म वेदः यज्ञपुरुषो भगवान् लोका लोका भागवताः ॥ १० ॥

तत्फलं चान्धन्तमः प्राप्स्यन्तीत्याह । ते चेति । अर्वाक्तनयाऽवेदमूलयाऽत एवान्धपरम्परया निर्मूलया स्मृत्या चाराणामपि वेदमूलत्वेनैव प्रामाण्यादिति भावः ते निजयात्रया स्वेच्छाकृतप्रवृत्त्या निजलोकयात्रयेति पाठेऽप्ययमेवार्थः लोकशब्दो देहपरः तयैवार्हतस्मृत्यैवाश्वस्ताः तदुक्तेषूपधर्मेषु कृतविश्वासाः अन्धे तमसि नरकविशेषे स्वयमेव स्वात्मनैव रिपुणा प्रपतिष्यन्ति पतन्तीत्यर्थः ॥ ११ ॥

ननु तर्हि भगवतर्षभेण किमर्थमेव मनुष्ठितं तत्राह । अयमिति । रजसा उपप्लुतानां व्याप्तानां रजःप्रचुराणां कैवल्यस्य मोक्षमार्गस्य योगचार्यभेदस्य शिक्षणार्थोऽयमवतारस्तदर्थमेव कृतमितिभावः ॥ १२ ॥

आर्षभप्रभावप्रतिपादकान् श्लोकानुदाहरन्ति पठन्ति आर्या इति शेषः के त इत्यत्राह । अहो इति । सप्त समुद्राः अस्यां सन्तीति सप्तसमुद्रवती तस्या भुवः द्वीपेषु मध्ये य उत्कृष्टो जम्बूद्वीपः तस्यापि वर्षेषु नवसु मध्ये एतद्भारतं वर्षमधि आधिकं पुण्यं यथाभूतम अहो इत्याश्चर्ये कुतः यत्रत्याः भारतवर्षस्था जनाः मुरारेर्भगवतः ऋषभावतारयुक्तानि कर्माणि भद्राणि श्रेयः साधनानि गायन्ति ॥ १३ ॥

अहो प्रैयव्रतः प्रियव्रतसम्बन्धी वंशः यशसा विशुद्धः विशुद्धविपुलकीर्तिसम्पन्नः यत्र वंशे प्रैयव्रते वंशे पुराणः पुरुषो भगवानृषभरूपेण कृतावतारः बभूव सचावतीर्ण आद्यः पुरुषः यतोऽकर्महेतुकं न विद्यते कर्म साधनं तपो यस्य तदकर्म मोक्षः तस्य हेतुं धर्मं चचार ॥ १४ ॥

अस्य ऋषभस्य काष्ठां निष्ठां दिशं वाऽपरो योगी मनोरथेनापि तत्त्वानुष्ठानेन कोन्वनुगच्छेदनुवर्त्तेत न कोऽपीत्यर्थः कुतो यो योगी येन ऋषभेण योगमाया मनोजवादयः कृतप्रयत्नः सेवितुमुद्यता अप्यसत्तया हेयतयानादृतास्ताः स्पृहयति हि ॥ १५ ॥

ऋषभचरितश्रवणादिफलमाह । इतीत्थं भूतं हस्मेति प्रसिद्धाश्चर्यद्योतकौ निपातौ, सकललोकादीनां परमगुरोर्लोकदेवब्राह्मणानां हितोपदेष्टृत्वाद्गुरुः वेदवैदिकमार्गप्रवर्तकत्वाद्वेदस्य गुरुः गवामपि पूज्यत्वोपदेष्टृत्वाद्गुरुः ऋषभाख्यभगवतः विशुद्धाचरितं यदीरितं कथितं समस्तदुश्चरितमभितो हरतीति तथा परममङ्गलानामयनमाश्रयमिदमनयाक्रमादुपचितया प्रवृद्धयानया श्रद्धयाऽनुसवनं सर्वदा यः पुमाननुश्रृणोत्याश्रावयत्यनुस्मरति अनयोः श्रोतृश्रावयित्रोः भगवति वासुदेव एकान्ततः एकान्ता अव्यभिचरिता भक्तिः समनुवर्तते भवतीत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किमनेन तद्भूदिति तत्राह । यस्येति । जनानुपशिक्ष्य उत्कृष्यमाणे वर्धमाने भवितव्येन विधिना निजमनीषयेत्यनेनार्हस्या-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

सुरत्वमसूचि मन्दो निर्भाग्य इत्यनेन आनन्दात्मपुरुषार्थशून्य इति ध्वनयति भगवन्मततात्पर्यं न जानातीति वा उपाकर्ण्येत्यनेन तस्य तत्र स्थितिं तां तु शुश्रावार्हो दुरात्मवानिति वाक्यं स्मारयति पाखण्डमद्वैतमसमञ्जसं जैनमतमित्यनेन शास्त्रद्वयमनेनाकारीति सूचितम्। तदुक्तम्।

> पूर्वं तु पौण्ड्रको नामा वासुदेवः सुदुर्मतिः।
> जातिस्मरो द्विधा शास्त्रं पाखण्डं निर्ममे नृपः॥
> एकं तु वासुदेवाख्यं वासुदेवोऽहमित्यपि।
> कुत्सितं वासुदेवत्वप्रतिपादकमात्मनः।

लोकार्थं चापरमिति चकारार्हतनामकमिति।

अनेनार्हस्य पूर्वजन्मनि पौण्ड्रकाख्यासुरत्वं स्पष्टीकृतं वासुदेवोऽहमित्यात्मनो जीवस्य वासुदेवत्वप्रतिपादकवासुदेवाख्यं कुत्सितमेकं शास्त्रं परमार्हतनामकं लोकार्थमार्हिसाधर्मप्रतिपादकमपरं चकारेत्यन्वयः॥ ९॥

शास्त्रस्य प्रचयगमनमाह। येनेति। येन शास्त्रद्वयेन ह वा इति निपातद्वयेन तत्प्रशिष्येण ऋमुणा विरचितेन शास्त्रेणेति स्मारितं तदुक्तम्।

> तत्प्रशिष्यः ऋमुर्नाम न जानंस्तन्मतं परम्।
> वासुदेवात्मतां सर्वजीवानामवदत्कुधीः॥
> ऋणवाख्यं शास्त्रमकरोदभेदप्रतिपादकम्।
> कुशास्त्रं सर्ववेदानां विरुद्धं तामसालयम्॥
> तद्दृष्ट्वाद्यापि वर्तन्ते वर्तिष्यन्ति तथा कलौ।
> अशौचा अव्रताचारा वासुदेवोऽहमित्यपि इति॥

एवंशभिप्रायेणास्नानेत्याद्युक्तं मनुजापसदा मनुष्याभासाः स्वविधिः स्वकीयो वेदः तस्य नियोगं लिङाद्यर्थो मलवद्वाससा न संवदेतेत्यादिकः तेन विहितः शौचाद्याचारः विष्ण्वादिदेवानां हेलनादीन्यभेददर्शनावज्ञानादीन्यपव्रतानि वेदविरुद्धव्रतानि स्वेच्छया प्रमाणं विना किञ्चास्नानादीनि गृह्णन्तः निमित्तमाह। कलिनेति। देवहेलनादि विशिनष्टि। अब्रह्मेति॥ १०॥

तत्फलमाह। तैरपीति। तैर्हेलनादिभिः क्रियमाणयाऽर्वाक्तनया नीचयान्धपरम्परया निजलोकयात्रया स्वप्रमनोरथकल्पितव्यवहारेण। स्वशरीरजीवनेन वा त एवानास्थाः एकदापि व्यापारमन्तरेण न स्थिताः हि शब्देन" अन्धेनैव नीयमाना यथान्धा" इति श्रुतिं प्रमाणयति॥ ११॥

न केवलमसुरमोहनार्थः किन्तु स्वपादमूलशरणजनस्य मुक्तिसाधनार्थोऽपीत्याह। अयमिति। रजसा गुणेनोपप्लुतस्य उपद्रुतस्य साधुजनस्य कैवल्यशिक्षणार्थो मुक्तिसाधनशिक्षणाभिप्राय इत्यन्वयः कुत इति तत्राह। तस्येति। तस्य कैवल्यसाधनोपदेशस्यानुगुणाननुरूपानित्यर्थः॥ १२॥

सप्तद्वीपेषु नवसु वर्षेषु एतद्भारताख्यं खण्डमधिपुण्यमधिकपुण्यसाधनमुपलक्षणमेतत् पापसाधनं चेति तदुक्तम्।

> विशेषाद्भारते पुण्यं चरेयुः पापमन्यथा।
> तथैव भगवद्भक्तिः पृथिव्यां नान्यवर्षगा इति।

अनेनादृष्टसाधनमेतदन्यानि भोगसाधनानीति विशेष उक्त इति ज्ञायते अवतारवन्ति प्रकाशवन्ति॥ १३॥

प्रैयव्रतः प्रियव्रतसम्बन्धी पुराणपुरुषेणावतीर्णेन किं प्रयोजनमभूदत्राह। पुरुष इति। अकर्महेतुं मोक्षहेतुं मोक्षकारणं धर्मं लोकशिक्षार्थं चचारेति यद्यस्मात्तस्मादिति शेषः पूर्णं पुरुतत्सनोति ददातीति पूर्णफलं मोक्षं ददातीत्यर्थः इति कर्तरि डः डप्रत्ययेन टिलोपः॥ १४॥

ऋषभो नाम कश्चिद्योगी न हरिरिति तत्राह। को न्विति। अभवाय मुक्तये लोकशिक्षणार्थमेव धर्माचरणं न तु तत्फलापेक्षयेत्याह। यद्योगमायामिति। श्रीहरिप्रेरणया कृतप्रयत्नाः महापुरुषाः येनोदस्तां नित्यनिरस्तां योगमायामणिमादिवाह्ययोगफलं स्पृहयन्तीति यद्यस्मात्तस्माल्लोकशिक्षणार्थं धर्ममाचरतोऽस्य काष्ठां स्वरूपभूतां योगशक्तिं हरिमन्तरेणापरः को नु योगी गच्छेन्न कोऽपीत्यन्वयः।

> नित्योदस्ता योगशक्तिरनपेक्ष्यं फलं यतः।
> नित्यस्वरूपभूतापि बहिः फलविवर्जनात्॥
> अकर्मेत्युच्यते यद्वन्मोक्षः फलविवर्जनात् इति।

वचनात् उदस्तामिति विशेषणाद्योगमायामिन्द्रजालमुच्यत इत्येतन्निरस्तं तस्मादणिमादियोगशक्तिर्नित्योदस्ताः कुतःफलमनपेक्ष्यमिति यतस्तर्हि हरेः स्वरूपभूताणिमादिशक्तिर्नास्ति कामित्यत उक्तं नित्येति यद्यपि स्वरूपभूताणिमादिशक्तिरस्ति तथाप्यन्येच्छाविषयाणिमादियोगमाया बहिर्नित्यस्वरूपशक्तेः पृथक् फलनिवर्जनात्क्रियासाध्यफलानिच्छत्वात्तत्र दृष्टान्तः। अकर्मेति। यथा मोक्षस्त्वकर्मेति वदन्ति तत्फलानिच्छत्वात् तथेति॥ १५॥

ननु कृष्णादिचरितवदस्य चरितमपि यदि संसारनाशनं स्यात्तदायमपि श्रीनारायणांश इति निश्चयेन निरुपचरितभक्तिः स्यात्तत्कथमिति शङ्कां परिहरन्नुपसंहरति। इतीति। इति शब्दः प्रभृतिवचनः ह स्मेति निपातौ अत्यातिशयजननार्थौ न केवलं रामाद्यवतारवद्दुष्टभञ्जनः किन्तु व्यासाद्यवतारवत् ज्ञानस्योपदेष्टेति ज्ञापनाय परमगुरोरिति विशुद्धाचरितं कथितमिति शेषः इदमाचरितं विशेषतः शुद्धमेव न तु दुष्टमर्हादयस्तु तात्पर्यापरिज्ञानादन्यथा गृहीतवन्त इति न तेनाशुद्धश्रद्धाकर्तव्येति विज्ञापयितुं विशुद्धेति कुत एतदिति तत्राह। पुंसामिति। दुश्चरिताभिहरणं पापकर्मनाशनं न केवलमेतदेव फलमन्यच्चास्तीत्याह। परमेति। ननु फलोपयोगित्वे युक्तमुक्तमखिलं तत्कथमत्राह। इदमिति। उपचितयानुदिनमेधमानया इदमेव श्रेय इत्यन्तःकरणधर्मविशेषः श्रद्धा अनयोः श्रोतृप्रवक्त्रोः अपि शब्दात्पठतः वासुदेवे निर्द्वन्द्वा भक्तिः समनुवर्तत इत्यन्वयः॥१६॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

अत एव ऋषभदेवाविर्भाववर्णनीयोऽध्याय इत्येवोक्तं ननु जन्मेति तदेवं सर्वहितमपि तच्चरितं वैदिकवेदाद्यपराधसंस्कारवतां त्वन्यथैव भानमित्याह। यस्येत्यादिना। अन्येषां तु रजसोपरक्तानामपि तद्द्वयश्रवणेनान्वयव्यतिरेकाभ्यां हितायैव जायते तदित्याह॥ ९—११॥

अयमिति॥ १२—१३॥

अहो इति। स्वतः पुराणः पुमानेव यत्र कृतावतारेऽपि नान्यथात्वं प्राप्तः किन्तु स आद्यः पुरुष एव सन् यत्राकर्महेतुं कर्माभ्य-

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कारणं धर्मं चचारेत्यर्थः । यद्यप्येवं ज्ञानपर्यवसानं तच्चरितं तथापि तत् परायां भक्तय एव पर्यवस्यति । तथा स्वभावत्वादित्याह ॥ १४ ॥ १५ ॥

इति हस्मेति । निवृत्तया तत् स्वरूपया स्वतः पुरुषार्थत्वात् ॥१६॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अस्यावतारस्य लीलाश्रवणकीर्त्तनादिभिरेव कलिकालवर्त्तिनः परान्दर्शिनो जीवाः कृतार्था भवन्ति नत्वाचरितस्यानुष्ठानेन । कलौ प्रायः प्रत्यग्दर्शनासम्भवात् श्रद्धयापि तदीयकेवलबाह्याचरणमात्रनिष्ठा भ्रष्टा एव भवन्तीत्याह । यस्येति । अर्हन्नामा कलौ जनिष्यमाणो लोकशास्त्रद्वारा ऋषभदेवोत्कर्षं श्रुत्वा तादृशाचरणेन वयमपि तथा भवामेति मत्वा तदीयचेष्टामुपशिक्ष्य आधिक्येन शिक्षित्वा भवितव्येन तादृशदुरदृष्टेन यदवश्यंभवितव्यं तेन हेतुना ॥ ९ ॥

स्वविधिना —नियोगो यत्र तादृशेन शौचचारित्र्येण विहीनाः ॥ १०—११ ॥

तेन श्रीऋषभदेवो यदैवाविर्बभूव तात्कालिकैर्जनैरेव तच्चरितमनुवर्त्तितव्यमित्याह । अयमिति । रजसा रजोगुणेन उपप्लुतं कालेन विनष्टीभूतं यत् कैवल्यं ज्ञानयोगस्तस्योपशिक्षणार्थः यद्वा रजो व्याप्तानामपि जनानां मोक्षमार्गोपशिक्षणार्थः । तेन सत्यादियुगत्रये तद्वर्त्तितव्यं कलौ तत्कथा श्रोतव्येति व्यवस्थितिः ॥ १२ ॥

वर्षेषु मध्ये एतद्भारतं वर्षमभिपुण्यमधिकपुण्यप्रदम् । कुतः गायन्तीत्यादि ॥ १३ ॥

वंशेष्वपि मध्ये प्रियव्रतवंशो धन्य इत्याह । अहो इति ॥ १४ ॥

योगिष्वपि मध्ये ऋषभदेवो धन्य इत्याह । को नु अपरो योगी अस्य काष्ठां दिशमप्यनुगच्छेत् मनोरथेनापि किमुत कर्मणा अस्य कीदृशस्य अभवस्य नास्ति भवो यस्मात्तस्य यो योगी येन ऋषभेण असत्तया अभद्रत्वेन उदस्तास्त्यक्ताः योगमाया योगाज्जाता मायाः सिद्धीर्वाञ्छति । कीदृशीः कृतः प्रयत्नो यासु तदर्थं प्रयत्नांश्च करोतीत्यर्थः । यद्वा । ऋषभदेवोऽस्मान् स्वीकरोत्विति कृतः प्रयत्नो याभिस्ताः ॥ १५ ॥

किञ्च सत्यादियुगवर्त्तिभ्यो योगिभ्यस्तच्छिक्षितयोगानुष्ठातृभ्योऽपि सकाशात् कलियुगवर्त्तिनो जनास्तल्लीलाश्रवणकीर्त्तनवन्तोऽधिकफलभाजो भवन्तीत्याह । इति ह स्मेति । परमगुरोर्हितकारिणः विशुद्धमाचरितं च ईरितं नायं देहो देहभाजामित्याद्युपदेशवाक्यञ्च । आश्रावयति कीर्त्तयति च अनयोः श्रोतृवक्त्रोरपिकारात् स्मर्त्तुरनुमोदयितुश्च ॥ १६ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यस्य ऋषभस्य चरितमर्हन्निति नाम यस्य स राजा कुटकावलोपनवासिभ्य उपाकर्ण्य स्वयं तदुपशिक्षित्वा कलावधर्मे उत्कृष्यमाणे भवितव्येन जीवकर्मफलेन विमोहितः उचितादपनीयानुचिते योजितः विमोहमाह । स्वधर्मेत्यादि । कुपथश्चासौ पाषण्डश्च तं निजमनीषया संप्रवर्तयिष्यते स्वग्रथकृप्रबन्धेन स्वेच्छया कृतेन लोके स्थापयिष्यति ॥ ९ ॥

येन कुपथपाषण्डप्रवर्तितेन मनुजाधमाः स्वविधिना नियोगो यस्मिन् शौचचारित्रे तेन विहीनाः देवहेलनानि देवावज्ञारूपाणि अस्नानादीनि अपव्रतानि गृह्णन्तः वेदादीनां विदूषका भविष्यन्ति ॥ १० ॥

ते मनुजापसदाः चकारात्स अर्हन्नामको राजा च अर्वाक्तनया अवेदमूलया तयैव निजलोकः मनुजापसदानुरूपो लोकः नरकलोकस्तदर्थो यात्रा प्रवृत्तिः उपधर्मविषयकार्हन्निर्मितनिबन्धाध्ययनाध्यापनतदुक्तोपधर्मानुष्ठानादिक्रिया तथा अन्धानां ज्ञानचक्षुर्हीनानां मूर्खाणामुपदेष्टॄणां परम्परया वंशावल्या आश्वस्ताः कृतविश्वासाः अन्धे तमसि नरके प्रपातिष्यन्ति ॥ ११ ॥ १२ ॥

अवतारवन्ति ऋषभाद्यवतारवन्ति यत्रत्या जनाः गायन्तीत्युपलक्षणं श्रवणादेः तदेतद्भारतं वर्षमधिकं पुण्यं यस्मिन् तदभिपुण्यं भवति ॥ १३ ॥

अवदातः शुद्धः यत्र य आद्यः पुमान् स कृतावतारः पुरुषः ऋषभमूर्तिः सन् "नास्त्यकृतः कृतेन इति श्रुत्या अकर्म कर्मालभ्यं ब्रह्म तद्धेतुं तत्प्रपकं पारमहंस्यलक्षणं धर्मं चचार ॥ १४ ॥

कृतप्रायत्नाः स्वतः सेवितुं प्रवृत्ताः अपि योगमायाः योगजा विभूतयः येन असत्तया असाधुतया उदस्ताः उपेक्षिताः यः अपरः योगी स्पृहयति स कोनु अस्य ऋषभस्य काष्ठां दिशमप्यनुगच्छेत् ॥१५॥

विशुद्धाचरितैर्गांसादिभिरीरितम् ॥ १६ ॥

———

भाषाटीका ।

जिनके चरित्र को श्रवण करके कोंक, वेंक कुटक देशों का राजा अर्हन् नामा उन धर्मों को सिखाकर कलियुग में अधर्म के बढनेसे भाविसभय से मोहित होकर निर्भय अपने धर्म मार्ग को छोडकर खोटे अयुक्त पाखण्ड मार्ग को अपनी दुर्बुद्धि से चलावैगा वह बडा मन्द है ॥ ९ ॥

जिस पाखण्ड मतसे कलियुग में मनुष्याधम लोग देवकी माया से मोहित होकर अपने विधि विहित शौच चरित से रहित होकर देवतों के अपमान कारक खोटे व्रतों को अपनी इच्छा से धारण करते हुये स्नान आचमन शौच का न करना केशोल्लुंचन आदि कर्म करेंगे बहुत अधर्म वाले कलि से मति के भ्रष्ट होने से प्राय करके वेद ब्राह्मण यज्ञ पुरुष परमात्मा के दोष लगाने वाले होजायंगे ॥ १० ॥

वे सब मनुष्य अंधपरम्परा सरी के विना वेद मूल के अपने इच्छा की प्रवृत्तिसे विश्वास करके अपने आपही नरकमें पडते हैं ॥ ११ ॥

भगवान् का यह अवतार रजोगुणी लोगों के शिक्षाके वास्ते है उनके गुणोंके श्लोकों को महाजन गाते हैं ॥ १२ ॥

अहो आश्चर्य है कि सात समुद्रों वाली पृथिवी के सब द्वीपों में यह भारतवर्ष ही अधिक पुण्यवाला है जिसमें रहनेवाले मनुष्य विष्णुभगवान् के अवतारों के चरित्रों को गाते हैं ॥ १३ ॥

यस्यामेव कवय आत्मानमविरतं विविधवृजिनसंसारपरितापोपतप्यमानमनुसवनं स्नापयन्त-स्तयैव परया निर्वृत्या ह्यपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियन्ते भगवदीयत्वेनैव परिसमाप्तसर्वार्थाः ॥ १७ ॥

राजन् ! पतिर्गुरुरलं भवतां यदूनां दैवं प्रियः कुलपतिः क्व च किङ्करो वः ।
अस्त्वेवमङ्ग ! भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम् ॥ १८ ॥

नित्यानुभूतनिजलाभनिवृत्ततृष्णः श्रेयस्यतद्रचनया चिरसुप्तबुद्धेः ।
लोकस्य यः करुणयाभय मात्मलोकमाख्यान्नमो भगवते ऋषभाय तस्मै ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यामृषभदेवानुचरिते
षष्ठोऽध्यायः ॥ ६ ॥

भाषाटीका ।

अहो प्रियव्रत का वंश यशसे बडा पवित्र है जिस में आद्य पुराण पुरुष भगवान् ने अवतार लेकर कर्मों के निवृत्त करने वाले धर्म को किया ॥ १४ ॥

जगत् मे दूसरा ऐसा कौन योगी है जोकि मनोरथ से भी ऋषभजी की पदवी को पहुंचे वह योगी बड़े यत्नो को करके उन माया ओं को चाहता है कि जिनको ऋषभजी ने असत् मानकर छोडदी हैं ॥ १५ ॥

इस प्रकार से सकल वेद लोक देव ब्राह्मण गऊ इन के रक्षक भगवान् ऋषभदेव का निर्मल चरित हमने कहा यह चरित पुरुषों के सब पापों के नाश करने वाला है अति मंगल दायक है इसको अतिश्रद्धा से जो सुने या सुनावे सावधान तासे तो सुनने सुनाने वाले दोनों की भगवान् वासुदेव मे अतिशय भक्ति प्रवृत्त होती है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भक्तेः परमपुरुषार्थत्वमाह । यस्यां भक्तावेव नतु योगादिषु अनुसवनमविरतमात्मानं स्नापयन्तः स्वयमासादितमप्रार्थितं भगवता स्वयमेव दीयमानमपि । अनादरे हेतुः । भगवदीयत्वेनैव परितः समाप्ताः सम्यक् प्राप्ताः सर्वे पुरुषार्था यैस्ते ॥ १७ ॥

ननु भगवतोऽतिसुलभत्वदर्शनान्मोक्षस्य चातिदुर्लभत्वाद्विस्मयतिस्तुतिरेवेत्याशङ्क्याह । हे राजन् ! भवतां पाण्डवानां यदूनां च पतिः पालकः गुरुरुपदेष्टा दैवमुपास्यः प्रियः सुहृत् कुलस्य पतिर्नियन्ता किं बहुना क्व च कदाचिद्दौत्यादिषु वः पाण्डवानां किङ्करोऽप्याज्ञानुवर्ती अस्तु नामैवं तथाप्यन्येषाम् नित्यं भजतामपि मुक्तिं ददाति नतु कदाचिदपि सप्रेमभक्तियोगम् ॥ १८ ॥

वर्णितमृषभावतारं नमस्करोति । नित्यमनुभूतं यन्निजं रूपम् स एव लाभस्तेन निवृत्ता तृष्णा यस्य, सः । अतद्रचनया देहाद्यर्थमनोरथेन श्रेयसि विषये चिरं सुप्ता बुद्धिर्यस्य तस्य जनस्य करुणया निर्भयमात्मस्वरूपं य आख्यातवांस्तस्मै नमः ॥१९॥

इति श्रीभागवते महापुराणे पञ्चमस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किं भक्त्या साध्यमित्यत्र भगवदनुभवरूपाया भक्तेरतिशयपुरुषार्थतामाह । यस्यामिति । यस्यां भगवदनुभवसुधारसरूपायां भक्तौ कवयो विवेकिनः विविधानि वृजिनानि पापानि यस्मिंस्तस्मिन् संसारे ये परितापाः क्लेशास्तैरुपतप्यमानं क्लिश्यमानमात्मानमनुसवनं स्नापयन्तः भगवदनुभवेन वृजिनमूलानि दुःखान्यपनुदन्त इत्यर्थः तयैव भगवदनुभवजनितया निर्वृत्या आनन्देन परमपुरुषार्थलक्षणमपि स्वयं प्राप्तमप्यापवर्गिकमपवर्गरूपं फलमात्यन्तिकमत्यन्तं नैवाद्रियन्ते अनादरे हेतुः भगवदीयत्वेनैव परितः समाप्ताः सर्वपुरुषार्था यैस्ते ॥ १७ ॥

भक्तेर्दौर्लभ्यं सनिदर्शनमाह । राजन्निति । हेराजन् ! भगवान् पाण्डवानां यदूनां च मुकुन्दो भगवान् पतिः पालकः गुरुर्हितोपदेष्टा दैवमुपास्यः प्रियः सुहृत् कुलस्य पतिर्नियन्ता किं बहुना क्व च कदाचिद्दूत्यादिषु वः पाण्डवानां किङ्करोऽप्याज्ञानुवर्ती अस्तु नामैवं तथाप्यङ्ग ! हेराजन्नन्येषां नित्यम्भजतामपि मुक्तिं ददाति इति नतु भक्तियोगमिति भक्तेर्दुर्लभत्वोक्तिः ॥ १८ ॥

ऋषभचरितमुपसंहरन् नमस्करोति नित्येति नित्यमनुभूतं यन्निजं ब्रह्मात्मकं स्वरूपं स एव लाभस्तेन निवृत्ता तृष्णा पुरुषार्थान्तरेषु यस्य एवंभूतो यः अतद्रचनया अश्रेयसां पापकर्मणां रचनया श्रेयसि विषये चिरं सुप्ता बुद्धिर्यस्य तस्य लोकस्य करुणयाऽभयमात्मस्वरूपमाख्यादाख्यातवान् तस्मै ऋषभरूपाय परमपुरुषाय नमः ॥ १९ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

जन्मित्वेऽपि सामान्येन तु सति स्वयमेव किं विशिष्योच्यत इत्याशङ्क्य सामान्यमुक्तेस्तस्याः परमानन्दहेतुत्वादित्याह। यस्यामिति। कतयो यस्यां भक्त्यां स्वात्मानं मनः स्नापयन्तस्तयैव भक्त्या जातया परयोत्कृष्टया निर्वृत्यात्यतिक्रमापवर्गिकमपवर्गसम्बन्धिनं पुरुषार्थं स्वयं स्वत एव प्राप्तिमपि नैवाद्रियन्ते कुतो नाद्रियन्ते तत्राह। भागवतत्वेनेति। भक्त्या भागवता भगवतो हरेर्विशेषप्रिया इति भावेनैव परिसमाप्ताः पूर्णाः सर्वार्थाः येषां ते तथा स्नापने निमित्तमाह। अविरतेति। अविरतानि निरन्तराणि विविधानि वृजिनानि दुःखानि यानि तैर्युक्तो यः संसारः जननमरणलक्षणः तन्निमित्तसन्तापेनोपतप्यमानं दंदह्यमानमनुसवनं सर्वदा मुक्तेः पूर्वं तस्यामनादरं कुर्वतां पश्चादानन्दोत्कर्षः स्यादित्येतमर्थं हिशब्देनाह।

ब्रह्मणोऽन्यस्य नो पूर्णां दद्याद्भक्तिं जनार्दनः।
मुक्तिं ददाति सर्वेषामुत्तमानां को ह्यधीशितः॥

इत्यनेन

नाद्रियन्ते तु ये मोक्षं पूर्वं तेषां परं सुखम्।
स्वयोग्यं व्यज्यते मुक्तौ तच्चोक्तं तारतम्ययुक्॥

इत्यनेन चात्र तात्पर्यमवगन्तव्यम्॥ १७॥

भगवति क्रियमाणाया भक्तेर्निर्वृत्तिजनकत्वेन पुरुषार्थत्वं यतोऽतस्तस्या मुक्तेरप्यतिदौर्लभ्यमाह। राजन्निति। एवं गुरुत्वादिकमस्तु तथाप्यविगानेन मुक्तिं प्रयच्छति कर्हिचित् स्म कदापि ब्रह्माणं विना न कस्मैचित्पूर्णां भक्तियोगं प्रयच्छतीत्यन्वयः "ब्रह्मणोऽन्यस्य नापूर्णां दद्याद्भक्तिं जनार्दन" इत्यादेः अर्जुनादीनाम् ज्ञानोपदेष्टृत्वेन गुरुत्वम्॥ १८॥

सिंहावलोकन्यायेनावतारप्रयोजनमाह। नित्येति। अतद्वचनया श्रेयोविरुद्धकर्मणा श्रेयसि चिरसुप्तबुद्धेः नष्टज्ञानस्य लोकस्य ज्ञानग्रहणयोग्यजनस्य यो भगवानात्मा लोक्यते दृश्यते इत्यात्मज्ञानं मुक्तिसाधनमाख्यादाचख्यौ तस्मा ऋषभाय नम इत्यन्वयः ऋषभोक्तार्थे विस्रम्भाय ऋषभं विशिनष्टि नित्येति। नित्यमनुभूतोपरोक्षीकृतो निजलाभः स्वरूपानन्दो यस्तेन, निवृत्ता तृष्णा यस्य सः तथोक्तः अनेन नित्यानन्दज्ञानपूर्णत्वेन नित्यसिद्धाखिलपदार्थविशेषत्वात्तदुक्तावाप्तिः सुतरां संभवतीति ज्ञायते॥ १९॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
षष्ठोऽध्यायः॥ ६॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तच्छ्रुत्वा तस्यै स्पृहयन्तं राजानं भवतां तु सा परमश्लाघ्येत्याह। राजन्निति। भक्तियोगं प्रेमाणं कर्हिचिदिति तदेतत् फलेच्छुत्वाभावे वासनान्तराभावे च सतीत्यर्थः॥ १८॥ १९॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
षष्ठोऽध्यायः॥ ६॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

भक्तेः परमपुरुषार्थशिरोमणित्वमाह। यस्यां भक्तावेव सुधाह्रदिनि आत्मानं स्नापयन्तः स्वयमासादितमप्रार्थितमपि भगवता स्वयमेव दीयमानमपि अनादरे हेतुः भगवदीयत्वेनैव परितः सम्यक् प्राप्ताः सर्वेऽर्था यैस्तेन तु भगवत्त्वेनेत्यर्थः॥ १७॥

धन्योऽयं प्रियव्रतवंशो यत्र भगवानृषभदेवोऽवतीर्णः उत्तानपादवंशोऽपि धन्यः यत्र पृथुः रघुवंशोऽपि धन्यः यत्र रामः यदुवंशपुरुवंशयोरेककालिकयोरपि मध्ये यदुवंश एव सुभगः यत्र कृष्णः अस्मदीयः पुरुवंशस्तु सर्वतोऽतिदुर्भगो यत्र भगवान्नावततार इति मनोऽनुतापेन विषीदन्तं राजानं सर्वज्ञतयैव ज्ञात्वा मोचाद्भक्तेरुत्कर्षेण प्रतिपादितेनैव तमानन्दयति हे राजन्! भवतां पाण्डवानां यदूनाञ्च पतिः पालकः गुरुरुपदेष्टा दैवमुपास्यः प्रियः प्रीतिकृत् कुलपतिर्नियन्तेति यदुष्ववतरतोऽपि कृष्णस्य तेषु भवत्सु च तुल्य एव व्यवहारो दृष्टः किञ्च क्व च कदाचित् वः पाण्डवानां दूत्यादिषु किङ्करः न च तथा यदूनामिति यदुभ्योऽपि प्रेमवत्त्वेन भवतामाधिक्यमेवेति भावः। भवद्भ्यो ह्यभजद्भ्योऽपि परमप्रेमाधिक्यदानस्य वार्त्ता कियती वक्तव्या सा सर्वोपरि विराजिता अन्येभ्यो भजद्भ्योऽपि भक्तियोगं भावभक्तिमपि प्रायो न ददाति किन्तु ततोऽप्यतिनिकृष्टां मुक्तिमेवेत्याह। अस्त्वेवेति भजतां भजद्भ्यः अत्र कर्हिचिदपीत्यनुक्तेर्मुक्तिमनिच्छद्भ्यः शुद्धभक्तेभ्यस्तु भक्तिमेव ददातीत्यर्थो लभ्यते॥ १८॥

उपाख्यानं समाप्य प्रणमति। नित्यमेव अनुभूतो यो निजः स्वरूपानन्दस्तल्लाभेनैव विगततृष्णः अतद्वचनया देहाद्यर्थचेष्टया श्रेयसि विषये चिरं सुप्ता बुद्धिर्यस्य तस्य जनस्य अभयं निर्भयकारणम् आत्मलोकं श्रीवैकुण्ठं प्राप्यं करुणयोपदिष्टेन भक्तियोगेन य आख्यातवांस्तस्मै नमः॥ १९॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
षष्ठोऽध्यायः पञ्चमस्य सङ्गतः सङ्गतः सताम्॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

भक्तिरनुवर्तते इत्युक्ताया भक्तेः परमपुरुषार्थत्वमाह। यस्यामिति॥ १७॥

भक्तावात्मानं स्नापयन्तः परमपुरुषार्थं मोक्षमपि तत्रापि स्वयमासादितं नो एवाद्रियन्ते इति मदुक्तसिद्धान्ते असम्भावना न कार्येत्याशयेनाह। राजन्निति। हे अङ्ग! भजतां भक्तानां कर्हिचित् वरप्रदानकाले मुकुन्दो मुक्तिं ददाति न पुनरिह लोके भक्तिं हे राजन्! एवं मदुक्तं भक्तेर्मुक्तितः श्रैष्ठ्यमस्तु यतः भवतां यदूनां च तदुपलक्षितानां गोपादीनां च वो युष्माकं सर्वेषां भजतां भक्तिमतां पतिः पालकः गुरुस्तत्त्वोपदेष्टा दैवमुपास्यः प्रियः सुहृत् कुलस्य पतिर्नियन्ता च किं बहुना क्व च कस्मिंश्चित्कार्ये कस्यचित् भक्तस्य किङ्करो भवति यथा श्रीयशोदानन्दयोः श्रीदेवकीवसुदेवयोः उग्रसेनादीनां युधिष्ठिरादीनां च किङ्करोऽग्रे प्रसिद्धः सर्वान् भक्तान् प्रति श्रीभगवद्वचनम् "अहम्भक्तपराधीन" इतिश्रुतिश्च भक्तिवशः पुरुष इति नहि मुक्तौ किङ्करत्वं भगवतोऽतो मुक्तेर्भक्तिर्गरीयसीतिसंक्षेपः॥ १८॥

भगवन्तमृषभं प्रणमति। नित्येत्यादिना। अतद्वचनया अनात्मभूतदेहाद्यर्थकव्यापारेण श्रेयसि कल्याणे भगवदाराधने चिरं सुप्ता बुद्धिर्यस्य तस्य लोकस्य जनस्य आत्मनः स्वरूपस्य

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

लोकं स्थितिंप्रवृत्तिस्थानममयं वासुदेवे य आख्यात् उक्तवान् तस्मै नमः ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
षष्ठाध्यायार्थप्रकाशः ॥ ६ ॥

भाषाटीका

वह भक्ति कैसी है कि जिसमें ज्ञानी पुरुष निरन्तर नाना प्रकार के दुःख रूप संसार के तापों से तपाय मान आत्माको सब काल में स्नान करायते हुये अत्यन्त सुख से अत्यन्त परम पुरुषार्थ मोक्षनामा सुख को भी स्वयं प्राप्त होने पर भी आदर नहीं करते हैं क्योंकि वे भगवत्सम्बन्धि होने से सब अर्थों से पूर्ण रहते हैं ॥ १७ ॥

हे राजन्! भगवान् श्रीकृष्ण यदुन के आप पाण्डवों के रक्षक हैं गुरु हैं देवता हैं प्रिय हैं कुलपति हैं कहीं पर आप पाण्डवों के किङ्कर भी होगये हैं यद्यपि ऐसा है तथापि मुकुन्द भगवान् भजने वालों को मुक्ति तो देदेते हैं परन्तु प्रेम लक्षणाभक्ति योग कभी नहीं देते हैं ॥ १८ ॥

नित्यही अपने स्वरूपानुभव के लाभ से तृष्णा से निवृत्त जो ऋषभ भगवान् तिनके अर्थ नमस्कार है उन भगवान् ने संसार की रचना के भोग से चिरकाल तक सोई हुई बुद्धि वाले लोक के ऊपर करुणा करके अपने स्वरूप का उपदेश किया है ॥ १९ ॥

इति श्रीभागवत पञ्चमस्कन्ध छठवांअध्याय का
भाषानुवादलक्ष्मणाचार्यकृत
समाप्त ॥ ६ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे षष्ठोऽध्यायः समाप्तः ॥ ६ ॥

सप्तमोऽध्यायः ।

श्रीशुक उवाच ।

भरतस्तु महाभागवतो यदा भगवताऽवनितलपरिपालनाय संचिन्तितस्तदनुशासनपरः पञ्चजनीं विश्वरूपदुहितरमुपयेमे ॥ १ ॥

तस्यामुह वा आत्मजान्कात्स्न्येनानुरूपानात्मनः पञ्च जनयामास भूतादिरिव भूतसूक्ष्माणि ॥ २ ॥

सुमतिं राष्ट्रभृतं सुदर्शनमावरणं धूम्रकेतुमिति अजनाभं नामैतद्वर्षं भारतमिति यत आरभ्य व्यपदिशन्ति ॥ ३ ॥

स बहुविन्महीपतिः पितृपितामहवदुरुवत्सलतया स्वे स्वे कर्मणि वर्तमानाः प्रजाः स्वधर्ममनुवर्तमानः पर्यपालयत् ॥ ४ ॥

ईजे च भगवन्तं यज्ञक्रतुरूपं क्रतुभिरुच्चावचैः श्रद्धयाहृताग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुसोमानां प्रकृतिविकृतिभिरनुसवनं चातुर्होत्रविधिना ॥ ५ ॥

संप्रचरत्सु नानायागेषु विरचिताङ्गक्रियेष्वपूर्वं यत्तत्क्रियाफलं धर्माख्यं परे ब्रह्मणि यज्ञपुरुषे सर्वदेवतालिङ्गानां मन्त्राणामर्थनियामकतया साक्षात्कर्तरि परदेवतायां भगवति वासुदेव एव भावयमान आत्मनैपुण्यमृदितकषायो हविःष्वध्वर्युभिर्गृह्यमाणेषु स यजमानो यज्ञभाजो देवांस्तान्पुरुषावयवेष्वभ्यध्यायत् ॥ ६ ॥

एवं कर्मविशुद्ध्या विशुद्धसत्त्वस्यान्तर्हृदयाकाशशरीरे ब्रह्मणि भगवति वासुदेवे महापुरुषरूपोपलक्षणे श्रीवत्सकौस्तुभवनमालाऽरिदरगदादिभिरुपलक्षिते निजपुरुषहृल्लिखितेनात्मनि पुरुषरूपेण विरोचमान उच्चैस्तरां भक्तिरनुदिनमेधमानरयाऽजायत ॥ ७ ॥

एवं वर्षायुतसहस्रपर्यन्तावसितकर्मनिर्वाणावसरोऽधिभुज्यमानं स्वतनयेभ्यो रिक्थं पितृपैतामहं यथादायं विभज्य स्वयं सकलसंपन्निकेतात्स्वनिकेतात्पुलहाश्रमं प्रवव्राज ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अध्यायानां त्रयेणैवमृषभाख्यानमीरितम् ।
अष्टाभिर्भरताख्यानमतः प्रस्तूयतेऽमृतम् ॥ १ ॥
सप्तमे भरतो राज्ये चिरं यज्ञैर्हरिं यजन् ।
आरब्धकर्मनिर्वाणो हरिक्षेत्रेऽभजद्धरिम् ॥ २ ॥

संचिन्तितः सङ्कल्पेनैव राज्यादौ नियुक्तः ॥ १ ॥

आत्मनोऽनुरूपान् । भूतादिरहङ्कार इव भूतसूक्ष्माणीति सन्ततिवृद्धौ दृष्टान्तः ॥ २ ॥

भारतमिति । स्वनाम्ना व्यापकत्वेन धर्माद्यतिशयः सूचितः ॥ ३ ॥

बहुवित्सर्वज्ञः ॥ ४ ॥

यज्ञा अयूपाः क्रतवः सयूपास्तद्रूपम् उच्चावचैर्महद्भिरल्पैश्च क्रतुभिः कर्मभिः श्रद्धया ईजे च । तानेवाह । आहृताः स्वाधिकारेणात्मसात्कृताः येऽग्निहोत्रादयस्तेषां प्रकृतिविकृतिभिः अग्निहोत्रादयो द्विविधाः सकलाङ्गयुक्ताः प्रकृतयः विकलाङ्गा विकृतय इति । तैर्द्विविधैरपीष्टवानित्यर्थः । अनुसवनमित्यन्तं वा चातुर्होत्रविधिनेत्यन्तं वा गद्यम् ॥ ५ ॥

किञ्च संप्रचरत्सु प्रवर्तमानेषु नानायागेषु विरचितानुष्ठिताङ्गक्रिया येषां तेषु यदपूर्वं तद्वासुदेव एव भावयमानश्चिन्तयन्स यजमानो यज्ञभाजो ये देवाः सूर्यादयस्तान्पुरुषस्य वासुदेवस्यावयवेषु चक्षुरादिष्वभ्यध्यायत्तु पृथक्त्वेनेत्यन्वयः । अपूर्वं पत्तद्वयम् मीमांसकानाम् तदानीमेव सूक्ष्मत्वेनोत्पन्नं फलमथापूर्वं कालान्तरफलोत्पादिका कर्मशक्तिर्वेति । तदुक्तम् ।

यागादेव फलं तद्धि शक्तिद्वारेण सिद्ध्यति ।
सूक्ष्मशक्त्यात्मकं वापि फलमेवोपजायत इति ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवाह । क्रियाफलं धर्माख्यमिति च ननु यदुक्तं देवताः कर्मप्रधानमिति मतं तर्हि कर्तृनिष्ठमपूर्वं स्यात् । तदुक्तम् ।

कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा ।
योग्यता शास्त्रगम्या या परा सा पूर्वमिष्यत इति ।

अथ देवताप्रधानं कर्म तु देवताराधनार्थं तदा देवताप्रसादरूपत्वादपूर्वस्य देवताश्रयत्वमेव युक्तम् । प्रोक्षणाद्यपूर्वस्येव व्रीह्याद्याश्रयत्वम् । कुतो वा वासुदेवाश्रयमपूर्वं भावयेति । उच्यते यदि कर्तृनिष्ठमपूर्वं तर्हि वासुदेवस्यान्तर्यामिणः प्रवर्तकत्वेन मुख्यकर्तृत्वात्तदाश्रयमेवापूर्वं नतु तत्प्रयोज्ययजमानाश्रयम् । "शास्त्रफलं प्रयोक्तरि" इतिन्यायात् अन्यथा ऋत्विजामप्यपूर्वाश्रयत्वप्रसङ्गात् । तदेवाह । साक्षात्कर्तरीति । देवताश्रयत्वेऽपि वासुदेवाश्रयत्वमेवेत्याह । परदेवतायामिति । परदेवतात्वे हेतुः । सर्वदेवतालिङ्गानां तत्तद्देवताप्रकाशकानां मन्त्राणां येऽर्था इन्द्रादिदेवतास्तेषां नियामकतया तस्यैव प्रसादनीयत्वात्फलदातृत्वाच्च युक्तमेवापूर्वाश्रयत्वमित्यर्थः एवं भावनमेवात्मनो नैपुण्यं कौशलं तेन मृदिताः क्षीणाः कषाया रागादयो यस्य अध्वर्युभिरिति बहुवचनं नानाकर्माभिप्रायेण ॥ ६ ॥

एवम्भूतया कर्मविशुद्ध्या विशुद्धसत्त्वस्य भक्तिरजायतेत्यन्वयः । क अन्तर्हृदये य आकाशः स एव शरीरमभिव्यक्तिस्थानं यस्य तस्मिन् ब्रह्मणि कीदृशे महापुरुषरूपस्योपलक्षणमाकारो यस्य तस्मिन् । किञ्च । श्रीवत्सादिभिरुपलक्षिते निजपुरुषाणां नारदादीनां हृदि लिखितवन्निश्चलतया स्थितेनोक्तेन पुरुषरूपेणात्मनि स्वमनसि विरोचमाने कीदृशी भक्तिः अत्यन्तातिशयेनैधमानो रयो वेगः प्रकर्षो यस्याः ॥ ७ ॥

एवमनुवृत्त्या वर्षाणामयुतानि तेषां सहस्रं तत्पर्यन्तकालेऽवसितो निश्चितः कर्मनिर्वाणावसरो राज्यभोगादृष्टसमाप्तिसमयो येन सः अधिकृत्य भुज्यमानं रिक्थं धनं यथाविभागं विभज्य सकलसम्पदां निकेतादाश्रयात् स्वगृहात् पुलहाश्रमं हरिक्षेत्रं प्रवव्राज ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमृषभचरितमुपवर्ण्य इदानीं तत्फलस्यास्य भरतस्य चरित्रमुपवर्णयति षड्भिरध्यायैः । भरत इति । महाभागवतो भरतो यदा भगवता ऋषभेणावनितलपरिपालनाय सञ्चिन्तितः संनियुक्तः तदा तदनुशासनपरः भूतलानुशासनपरः विश्वरूपस्य दुहितरं पञ्चजनीं नामोपयेमे विवाहितवान् ॥ १ ॥

तस्यामुवाच पञ्चजन्यां ह्यात्मनः स्वस्य कात्स्न्येनानुरूपान् पञ्चात्मजान् सुमत्यादीनुत्पादयामास यथा भूतादिस्तामसोऽहङ्कारो भूतसूक्ष्माणि शब्दस्पर्शादीनीति सारूप्ये सन्ततित्वञ्च दृष्टान्तः ॥ २ ॥

पूर्वमजनाभाख्यमेतद्वर्षं यतो यद्भरताभिप्रायादारभ्य भारतं समुदाहरन्ति स भरतो बहुज्ञः महीपतिः पित्रादिवदतितरां वात्सल्येन स्वस्ववर्णाश्रमोचिते कर्मणि वर्तमानाः प्रजाः स्वयमपि स्वधर्ममनुवर्तमानः पर्यपालयत ॥ ३ ॥

ईजे चेत्यादिप्रकृतिविकृतिभिरित्यन्तमेकं वाक्यं उच्चावचैर्नानारूपैर्यज्ञक्रतुभिः यज्ञो यजनं देवतां प्रति द्रव्यत्यागात्मकैः क्रतुभिर्यज्ञपुरुषं भगवन्तमीजे इष्टवान् क्रतूनेव प्रपञ्चयति । अग्निहोत्रादीनां प्रकृतिविकृतिभिरिति यत्र पूर्णामङ्गजातमुपदिष्टं सेष्टिः प्रकृतिः यथा आग्नेयीष्टिः यथान्यत्रोक्तमङ्गजातमुपजीव्यते सा विकृतिः यथा सौर्येष्टिः ॥ ४ ॥

यजनप्रकारमेवाह । अनुसवनं प्रातरादिसवनत्रये चातुर्होत्रविधिना चातुर्होत्रं चतुर्भि ऋत्विग्भिः क्रियमाणं यज्ञादि कर्म तद्विध्यनुगुणमित्यर्थः विरचिता अङ्गक्रिया येषु तेषु नानायागेषु सम्प्रचरत्सु प्रवर्तमानेषु सत्सु तत्र यागेषु धर्माख्यं योगसाध्यं धर्म इति व्यपदिश्यमानमपूर्वापरपर्यायं क्रियाफलं तद्भगवति वासुदेवे भावयमानः भगवदनुग्रहरूपमिति मन्वानः क्षणविध्वंसिनो यागादेः कालान्तरभाविस्वर्गादिफलसाधनत्वानुपपत्त्या तान्त्रिकैर्यदभ्युपेतं यागसत्त्वात्मकमपूर्वं यागजन्यं फलसाधनमिति तदपोह्य ।

इष्टापूर्तं बहुधा जातं जायमानं विश्वम् ।
बिभर्ति भुवनस्य नाभिः तदेवाग्निस्तद्वायुः इति

श्रुत्युक्तरीत्या इन्द्रादिदेवतान्तर्यामितयावस्थितस्य भगवतोऽनुग्रह एवापूर्वस्थानीय इति भावयमान इत्यर्थः तदेव विशदयन् भगवन्तं विशिनष्टि । सर्वदेवतालिङ्गानाम् । उद्देश्यत्वेन स्मृतानां देवतालिङ्गानि स्मारकाणि चिह्नानि येषु तेषां मन्त्राणामर्थनियामकतया अर्थोऽभिधेय इन्द्रादिस्तस्य नियामकतयान्तः प्रविश्य धारकत्वेन नियन्तृतया प्रयोजननिर्वाहकतया वा साक्षादेव कर्तरि द्रष्टरि मन्त्रकृतो गृणीतेतिवदयं निर्देशः यद्वा कर्तरि फलोत्पादयितरि कर्मणः फलसाधनत्वानुपपत्त्यापि नापूर्वं कल्प्यं किन्तु रात्रिसत्रप्रतिष्ठाफलवत् त्रिसरावेनामिन्द्रः प्रजया पशुभिस्तर्पयतीति वायुर्वैक्षेपिष्ठा देवतेत्याद्यर्थवादैः फलप्रदतयावगताग्नीन्द्रादिदेवतायास्तदेवाग्निस्तद्वायुरित्युक्तरीत्यान्तर्यामितयावगतब्रह्मण एव फलप्रदत्वमित्यास्थेयं तदेवाह । यज्ञपुरुषे यज्ञोद्देश्येन्द्रादिपुरुषरूपे परब्रह्मणि परदेवतायामिति एवं भावनमेवात्मनोनैपुण्यं कौशलं तेन मृदिता निरस्ताः कषायाः कर्मवासना रागादयो वा यस्य अध्वर्युभिरिति बहुवचनं नानाकर्माभिप्रायेण हविःषु चरुपुरोडाशाज्यादिषु गृह्यमाणेषु होमार्थमिति शेषः यजमानः स्वयं यज्ञभोजयन्त आराधयन्त इतियज्ञभाजो देवा इन्द्रादयस्तान् पुरुषस्य परमपुरुषस्यावयवेष्वभ्यध्यायत् "यस्याग्निरास्यं द्यौर्मूर्द्धा खं नाभिश्चरणौ क्षितिः । सूर्यश्चक्षुर्दिशः श्रोत्रं लोकपाला भुजेष्वासन्" इत्यादिश्रुतिरूप्यप्रतिपादकशास्त्रानुसारेणानुसंहितवानित्यर्थः ॥ ५ ॥

एवं भगवदाराधनरूपकर्मयोगाद्यनुगृहीतो भक्तियोगोऽभ्यजायतेत्याह । एवमुक्तविधकर्मविशुद्ध्याशुद्धान्तःकरणस्य तस्य भगवत्युद्वेलतरामतितरां प्रतिदिनमेधमानो वर्द्धमानो रय उत्कर्षो यस्याः सा भक्तिरजायतेत्यन्वयः भगवन्तं विशिनष्टि । अन्तः शरीरान्तःस्थितं यद्धृदयं पुण्डरीकाकारं तस्मिन् य आकाशः दहरः सशरीरं रूपं यस्य हृदयपुण्डरीकान्तर्वर्तिदहराकाशरूपे दहराकाशस्य परमात्मत्वात् यद्वा हृदयकोशस्य शरीरे शिलापुत्रकस्य शरीरमितिवदयं निर्देशः यद्वात्र हृदयाकाशशब्दो हृदयान्तर्वर्तिभूताकाशपरः स शरीरं यस्य तस्मिन्निति हृदये आकाशते प्रकाशत इति हृदयाकाशो जीवः स शरीरं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यस्येति वा ब्रह्मणि स्वरूपेण गुणैश्च निरतिशयबृहति भगवति षाड्गुण्यपूर्णे वासुदेवे सर्वान्तरात्मतया दीप्यमाने महापुरुषरूपमुपलक्षणमाकारो यस्य तस्मिन् श्रीवत्सादिभिरुपलक्षिते अरिश्चक्रं दरः शङ्खः असिः खड्गः निजपुरुषाणां भक्तानां हृदि लिखिते लिखितवन्निश्चलतयेत्यर्थः स्थिते तेनोक्तपुरुषरूपेण स्वात्मनि स्वमनसि विरोचमाने ॥ ७ ॥

एवमुक्तया वृत्त्या वर्षाणामयुतानि तेषां सहस्राणि तेषामन्ते तत्पर्यन्ते कालेऽवसितो निश्चितः कर्मनिर्वाणावसरः राज्यभोगादृष्टसमाप्तिसमयो येन सः अधिकृत्य भुज्यमानं पित्रादिपरम्परया आगतमृक्थं धनं स्वतनयेभ्यो यथा विभागं विभज्य दत्त्वा स्वयं सकलानां सम्पदां निकेतादाश्रयात् स्वनिकेतात्स्वगृहात्पुलहाश्रमं शालिग्रामक्षेत्रं प्रति प्रवव्राज जगाम ॥८॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रीनारायणप्रसादजनकज्ञानसाधनकर्मकरणप्रकारो निरूप्यतेऽस्मिन्नध्याये । तत्रादावृषभे साक्षान्नारायणावतारे राज्यरक्षणकर्मणि निवृत्ते तत्पुत्रो भरतः किमकार्षीदित्याशङ्क्य भगवद्भक्तकथाया अपि श्रीहरिकथान्तर्भूतत्वात्तत्कथाप्रसङ्गः क्रियते । भरतस्त्विति । तुशब्द इतरराजकथाया अस्य कथाया विशेषं वक्ति संचिन्तितः संमन्त्र्याभिषिक्तः "संमन्त्रणे तु संचिन्तावचोयाऽभिषेचन" इत्युत्पलमालायां तस्य ऋषभस्यानुशासनमास्था ॥ १ ॥

पञ्चसंख्यामात्रत्वे दृष्टान्तमाह । भूतादिरिवेति । भूतादिस्तामसाहङ्कारः भूतसूक्ष्माणि शब्दादीनि चेतनस्य चेतनदृष्टान्तापेक्षायां भूतादिः परमात्मा भूतसूक्ष्मशब्दवाच्यान् शब्दाद्यभिमानिदेवानिव यतो मत्तात् ॥ २ ॥ ३ ॥ ४ ॥

आहितः प्रतिष्ठितोऽग्निर्येन स आहिताग्निः अग्निहोत्रादयः प्रकृतयः पशुसोमादयो विकृतयः समग्राङ्गयुक्तानि कर्माणि प्रकृतयः एकदेशाङ्गयुक्तानि विकृतयः पशुभिरेव क्रियमाणा अश्वमेधादयः सोमरसैरेव क्रियमाणाः सोमयागाश्चत्वारो होतारो यत्र तच्चातुर्होत्रं तल्लक्षणविधानेन ॥ ५ ॥

प्रचरत्सु कुर्वाणेषु अध्वर्युषु मत एव नानायोगेषु देवताध्यानलक्षणेषु यजनाद्युपायेषु वा क्रियमाणेषु सत्सु यदपूर्वं क्रियाफलं धर्मसंज्ञं तद्वासुदेवे भावयानः हर्यधीनत्वेन समर्पयन् स यजमानो ये हरेश्चक्षुराद्यवयवेभ्य उत्पन्नास्तान् यज्ञभाजो यज्ञभागाधिकारिणो देवान् सूर्यादीन् पुरुषस्य पूर्णज्ञानस्य हरेश्चक्षुराद्यवयवेषु तदुत्पन्नास्तदाश्रिता इत्यप्यभावयदचिन्तयदित्यन्वयः कदा अध्वर्युभिर्हविःषु गृह्यमाणेषु सत्सु कर्माङ्गत्वेन वासुदेवे समर्पणं नत्विष्टत्वेनेत्यत उक्तम् । परेति । सर्वदेवतानां लिङ्गभूताः प्रकाशका ये मन्त्रास्तेषां वज्रधरत्वादीनां तदात्मनां वा अर्थनियामकतया ऐश्वर्याद्यर्थप्रेरकत्वेन मुख्यकर्तरि अभ्यर्हितत्वाच्चेत्युक्तम् । यज्ञपुरुष इति । न चेदं सगुणफलमाप्तय इत्याह । परेति । कषायः पापम् ॥ ६ ॥

अधुना कर्मणा साध्यफलमाह । एवमिति । भगवदर्पणेन कर्मणः शुद्धिस्तया शुद्धं सत्त्वमन्तःकरणं यस्य स तथा तस्यान्तर्हृदये आकाशशरीरे सूक्ष्मरूपे ब्रह्मण्यपरिच्छिन्ने महापुरुषस्य हरेरुपलक्षणैः चिह्नैर्महापुरुषं श्रीनारायणोऽयमिति उपलक्षयन्ति ज्ञापयन्ति महापुरुषोपलक्षणैर्वा स्वभक्तानां हृल्लिखितेन स्फुरितेनात्माकारेण कीदृशः स इत्यत आह । पुरुषरूपेणेति । आत्मनि स्वस्मिन्नेधमानरया वर्द्धमानवेगा ॥ ७ ॥

भरतस्य वैराग्योपजृम्भणप्रकारमाह । एवमिति । वर्षायुतसहस्रावसानेऽवसितस्य प्रारब्धकर्मणो निर्वाणावसरः नाशलक्षणो यस्य स तथा रिक्थं राज्याख्यवित्तं सकलसम्पन्निकेतात्सर्वसमृद्ध्याश्रयान्निकेतनात् गृहात् पुलहाश्रमं शालग्रामक्षेत्रं न तत्रान्याधीनत्वेन सन्निधानमित्यभिप्रायेणोक्तमिच्छेति ॥ ८-९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नाभेरेवाजनाभ इति संज्ञा भारतमित्यजनाभाख्यमपीदं वर्षं लोकैस्तस्मिन्ननुरागवैशिष्ट्येन ख्यापितमिति ज्ञेयम् ॥ १—६ ॥

एवं कर्मविशुद्ध्या विशुद्धसत्त्वेति । एवं पूर्वोक्तप्रकारेण कर्मविशुद्ध्या विशुद्धसत्त्वस्य भक्तिः सश्रद्धाश्रवणकीर्त्तना विलक्षणाजायतेत्यन्वयः क्व भगवति वासुदेवे पूर्णस्वरूपभगाभ्यां सर्वनिवासेन च तत्तन्नाम्ना प्रसिद्धेः अन्तर्हृदये यथाकाशः स एव शरीरं स्वस्यैवाविर्भावविशेषाधिष्ठानं यस्य तस्मिन्नन्तर्यामिणि परमात्माख्ये ब्रह्मणि निर्विशेषतयाविर्भावात् तदाख्ये च भगवतो निराकारत्वं वारयति महापुरुषस्य यद्रूपं शास्त्रे श्रूयते तदुपलक्ष्यते दृश्यते यत्र तस्मिन् किञ्च श्रीवत्सादिभिरपि चिह्निते एधमानरया वर्द्धमानप्रकर्षा सन्निधाप्यते चक्षुषि प्रकटीक्रियते ॥ ७—९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सप्तमे भवने यज्ञैः पत्रपुष्पादिभिर्वने ।
भरतो भक्तिभरतो हरिमीजे दृढव्रतः ॥

ऋषभदेवो भगवान् भरतस्तु भागवत इति तुशब्दार्थः । भूतादिरहङ्कारः ॥ १—२ ॥

अजनाभमिति । नाभेरृषभदेवस्याजस्य चैतद्वर्षं स्वामित्वादित्यर्थः नाभिश्चाजश्चेत्यजनाभी अभ्यर्हितत्वादज इति पदस्य पूर्वनिपातः तयोरिदमजनाभं संज्ञापूर्वकविधित्वाद्वृद्ध्यभावः भारतमिति भरतस्वामिकत्वात् ॥ ३—४ ॥

यज्ञाः अयूपाः क्रतवः सयूपास्तद्रूपं उच्चावचैर्महद्भिरल्पैश्च क्रतुभिः कीदृशैः कर्मिजनानां श्रद्धया आहृताः स्वाभिकरेणात्मसात्कृता येऽग्निहोत्रादयो द्विविधास्तेषां प्रकृतिविकृतिभिः अग्निहोत्रादयः सकलाङ्गयुक्ताः प्रकृतयः विकलाङ्गा विकृतय इति तौद्विविधैरपीष्टवानित्यर्थः ॥ ५ ॥

ननु "तावत् कर्माणि कुर्वीत न निर्विद्येत यावता । मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते" । इति भगवदुक्तेर्भगवत्कथादिषु प्रौढश्रद्धस्य निष्कामस्य शुद्धभक्त्यधिकारिणो भरतस्य कर्मकर्तृत्वं कर्मफलभोक्तृत्वं च कथं सङ्गच्छतामित्यत आह । संप्र-

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

चरत्सु प्रवर्त्तमानेषु विरचिता अनुष्ठिता अङ्गक्रिया येषां तेषु यदपूर्वं तत् परे ब्रह्मणि वासुदेवे स्वेष्टदेवे एव भावयमानः अस्य कर्मणो यत् फलं भावि तत्र न मे लिप्सा किन्तु तद्वासुदेवप्रीत्यर्थं वासुदेवायैव समर्पितमिति तत्र न मे स्वत्वमिति चिन्तयन्नित्यर्थः ननु कर्म कर्तृप्रधानं देवताप्रधानं वेति मीमांसकानां पक्षद्वयं तत्राद्ये पक्षे कर्तृनिष्ठमपूर्वं द्वितीये कर्मणो देवताराधनार्थत्वा-द्देवतानिष्ठं तत्र भरतस्य निष्कामत्वादपूर्वस्य देवतानिष्ठत्वे एव युक्ते देवतानां चन्द्रसूर्यादीनां बाहुल्यात् कथमेकस्मिन् वासुदेव एव कर्मफलभावनेत्यत आह । सर्वदेवतालिङ्गानां तत्तद्देवताप्रका-शकानां मन्त्राणां येऽर्था इन्द्रादिदेवतास्तेषां नियामकतया यज्ञपुरुषे यज्ञफलभोक्तरीत्यर्थः । नन्वेवं भरतस्य मास्तु भोक्तृत्वं कर्मकर्तृत्वं तु तस्य दुर्वारमित्यत आह । साक्षात् कर्त्तरि वासु-देवस्यैवान्तर्यामिणः प्रवर्त्तकत्वेन स्वतन्त्रकर्तृत्वात् साक्षात् कर्त्तृत्वं नतु तत्प्रयोज्यस्य यजमानस्यास्वतन्त्रस्य अन्यथा ऋत्विजामपि साक्षात् कर्तृत्वप्रसङ्गात् "यज्ञभुग् यज्ञकृद्यज्ञ" इति तन्नामस्मृतेश्च तस्य स्वतन्त्रकर्तृत्वेऽप्यज्ञानादहङ्करोमीति स्वस्य स्वतन्त्रकर्त्तृत्वमननमेव कर्त्तृत्वगमकं बन्धकारणञ्च ज्ञेयम् । आत्मनो नैपुण्यमेवं भावनमेव तेन मृदिताः क्षीणाः कषायाः कर्म-करणवासनात्मका येन सः अध्वर्युभिरित्यनेन तथाविधानां भक्तानां कर्त्तृत्वाद्यभिमानशून्यानां कर्मफलत्यागिनां स्वप्रति-मूर्त्तिद्वारा कर्मकरणमपि कर्मणि श्रद्धाराहित्यात् कर्माकरण-मेव ज्ञेयमिति इति द्योतितम् ।

> अश्रद्धया हुतं दत्तं तपस्तप्तं कृतञ्च यत् ।
>
> असदित्युच्यते पार्थ ! न च तत् प्रेत्य नो इह इति ।

भगवद्गीतोक्तेः अत एवाम्बरीषादीनां शुद्धया भगवद्भक्त्यैव यापि-ताह्यमानामपि पितृपैतामहसदाचारपरंपराप्राप्तयज्ञादिकर्माचरणं प्रतिनिधिद्वारैव श्रूयते अर्वाचीनानामपि प्राच्यादिदेशवर्तिनां सुप्रतिष्ठानां गृहस्थमहाभागवतानां विवाहोपनयनादावपि सर्वथैव वर्णधर्माभावे लौकिकादपि साङ्कर्यदोषाद्बिभ्यतां प्रतिनिधिद्वारैव कर्मकरणं दृश्यते च तत एव तावत् कर्माणि कुर्वीतेत्यात्मनेपद-प्रयोगादप्यन्तनिर्देशाद्यानात्मगामिकफलत्वे सति प्रतिनिधि-द्वारा कर्मकरणमपि शुद्धसत्त्वभक्तानां न दूषणं तथैव शुद्धभक्तिलक्षणेऽप्यन्याभिलाषिताशून्यमितिवज्ज्ञानकर्मादिशून्य-मित्यनुक्त्वा ज्ञानकर्माद्यनावृतमित्यनावृतपदोपन्यासात् प्रतिनिधि-द्वारा कर्मकरणेऽपि स्वीयेन्द्रियैः प्रतिक्षणश्रवणादिभक्त्यवकाश-प्राप्त्या भक्तेःकर्मानावृतत्वात् शुद्धत्वमेवेति केचिद्व्याचक्षते । नन्वे-वम्भूतत्वेन भरतस्य मास्तु कर्मकरणदोषः यज्ञानां नानादेव-ताराधनात्मकत्वात् कथमनन्यता तस्योपपाद्यतामित्यत आह । स यजमानो भरतः यज्ञभाजो देवानिन्द्रादीन् पुरुषस्य भगवतोऽवय-वेषु बाह्वादिषु अभ्यध्यायत् इन्द्राय स्वाहेत्युक्ते मत्प्रभोर्बाहुपूजेयं सूर्याय स्वाहेत्युक्ते लोचनपूजेयमिति भावयामास । पृथक् पृथग्-देवतात्वेन पूजा ह्यनन्यता विघातिनी नतु तदङ्गत्वेनेति ॥ ६ ॥

एवं कर्मकर्त्तुरन्तःकरणं विशेषतः शुद्ध्यतीत्याह । एवमिति । "भक्तिरुद्धुद्धा भरतं भजध्वम्" इति भगवद्वाक्यादेव उत्पत्तित एव शुद्धान्तःकरणस्य तस्य पिष्टपेषणन्यायेन एवं कर्मविशुद्ध्यापि शुद्धान्तःकरणस्य यद्वा एवमनेन प्रकारेण कर्मणो विशुद्धि-र्यस्मिन् स चासौ विशुद्धसत्त्वश्चेति तस्य भक्तिरौत्पत्तिक्यैव प्रतिदिनमुच्चैस्तरां वर्द्धमानवेगा भक्तेव भुवनपावस्यजायतेत्य-न्वयः । क वासुदेवे वसुदेवनन्दने कृष्णे य एव परमात्मब्रह्म-भगवच्छब्दैरुपासनाभेदेनोच्यते इत्याह । अन्तर्हृदयाकाशे शरीरं योगिभिर्ध्येयं यस्य तस्मिन् परमात्मनीत्यर्थः "केचित्स्वदेहा-न्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तं चतुर्भुजम्" इत्यादिना पर-मात्मनोऽपि साकारत्वश्रवणात् तथा ब्रह्मणि ज्ञानिभिरुपास्ये भग-वति भक्तैरुपास्ये वसुदेवपुत्रत्वेऽपि महापुरुषस्य वैकुण्ठनाथस्य यद्रूपं शास्त्रेषु प्रसिद्धं तदुप आधिक्येन लक्ष्यते दृश्यते यत्र तस्मिन् श्रीवत्सादिभिरपि चिह्निते निजपुरुषाणां नारदादीनां हृदि चित्रपट इव लिखितवन्निश्चलतया स्थितेन पुरुषरूपेण निराकारस्वरूपेण विरोचमाने क आत्मनि स्वमनसि ॥ ७ ॥

एवं वर्षाणामयुतानि तेषां सहस्रं तत्पर्यन्तकालेऽपि न वसितो[1] नावसितो न निश्चितः कर्मनिर्वाणावसरः राज्यभोगादृष्टसमाप्ति-समयो येन सः तद्राज्यभोगस्य भक्त्यानुषङ्गिकफलत्वात् कर्मफलत्वाभावेऽपि कर्मफलत्वमननं दैन्यादेवेति ज्ञेयम् । ततश्च विरज्यैव हठादेव प्रवव्राज रिक्थं धनम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथाष्टभिर्भरताख्यानमाह । तत्र तावद्भरतस्य पित्राज्ञानुसा-रेण प्रजापालनदेवयजनादिकं कर्म सप्तमेन वर्णयति । भरत-स्त्विति । सञ्चिन्तितो ब्रह्मावर्त्तोद्गमनवेलायामयमवनितलपालनं करिष्यतीति मनसैवावनितलपरिपालनाय सङ्कल्पितः ॥ १ ॥

भूतादिरहङ्कारः ॥ २—३—४ ॥

किञ्च स बहुवित् यज्ञक्रतुरूपं यज्ञाः अयूपाः क्रतवः सयूपाः तद्रूपमग्न्यादिसर्वदेवादिसंयुक्तसर्वयज्ञरूपमित्यर्थः "यज्ञो वै विष्णुः तदेवाग्निस्तद्वायुः" इत्यादिश्रुतेः उच्चावचैर्वृहद्भिः स्वल्पैश्च क्रतुभिर्यागैः श्रद्धया ईजे इष्टवान् क्रतूनेवाह । आहृताः स्वाधिकारतः स्वीकृताः येऽग्निहोत्रादयस्तेषां प्रकृतिविकृतिभिः स्वप्रकरणोक्तस-कलाङ्गयुक्ताभिः प्रकृतिभिः प्रकरणान्तरोक्तैरङ्गैः पूर्यमाणाभिर्वि-कृतिभिश्च तैर्द्विविधैरीजे अनुसवनं प्रातरादिषु त्रिषु कालेषु चातु-र्होत्रविधिना चतुर्णां होतृणामृत्विजां कर्म चातुर्होत्रं तद्विधिना ॥ ५ ॥

अथ मीमांसकानां सर्वात्मसर्वकारणभूतभगवदनुग्रह एव कर्मफलमिति सिद्धान्तमजानतां मतं निराचिकीर्षुः भरतस्य बहु-वित्त्वं प्रपञ्चयन् "तृप्त एवैनमिन्द्रः प्रजया पशुभिश्च तर्पयति" इत्याह । श्रुतिप्रोक्तान् फलदानिन्द्रादीन् देवानतिहाय कथमेकं भगवन्त-मेवेष्टवानित्याशङ्कां निवारयति । सम्प्रचरत्स्विति । सम्प्रचरत्सु अनु-ष्ठीयमानेषु विरचिता निष्पादिताः अङ्गक्रिया येषां तेषु यद-पूर्वं साध्यं तद्वासुदेवे भावयमानः वासुदेवप्रसाद एव सर्वैः कर्मभिः साध्य इति मन्वान इत्यर्थःस यजमानो भरतो यज्ञभाजो ये देवास्तान् पुरुषस्य वासुदेवस्यावयवेषु अभ्यध्यायत् "अग्निर्मूर्द्धा चक्षुषी चन्द्र सूर्यौ" इत्यादिश्रुतिभ्यः ।

> यस्याग्निरास्यं द्यौर्मूर्द्धा खं नाभिश्चरणौ क्षितिः ।
>
> सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै भगवते नमः ॥
>
> द्यां मूर्द्धानं यस्य विप्रा वदन्ति
>
> खं वै नाभिश्चन्द्रसूर्यौ च नेत्रे ॥
>
> दिशःश्रोत्रे विद्धि पादौ महीं च
>
> सोऽचिन्त्यात्मा सर्वभूतप्रणेता ॥

इत्यादिस्मृतिभ्यश्च प्रसङ्गान्मीमांसकानामपूर्वपक्षद्वयं दर्शयति । क्रियाफलं धर्माख्यं चेति । तदानीमेव सूक्ष्मत्वेनोत्पन्नक्रियाफलमथवा कालान्तरफलोत्पादिका क्रियायाः धर्मभूता शक्तिरिति एतन्मी-

---

[1] पर्यन्तनवसित इति मूलपाठेऽयमर्थः ।

यत्र ह्वाव भगवान् हरिरद्यापि तत्रत्यानां निजजनानां वात्सल्येन सन्निधाप्यत इच्छारूपेण ॥ ९॥

यत्राश्रमपदान्युभयतो नाभिभिर्दृषच्चक्रैश्चक्रनदी नाम सरित्प्रवरा सर्वतः पवित्रीकरोति ॥१०॥

तस्मिन् वाव किल स एकलः पुलहाश्रमोपवने विविधकुसुमकिसलयतुलसिकाम्बुभिः कन्दमूलफलोपहारैश्च समीहमानो भगवत आराधनं विविक्त उपरतविषयाभिलाष उपभृतोपशमः परां निर्वृतिमवाप ॥ ११ ॥

तयेत्थमविरतपुरुषपरिचर्यया भगवति प्रवर्द्धमानानुरागभरद्रुतहृदयशैथिल्यः प्रहर्षवेगेनात्मन्युद्भिद्यमानरोमपुलककुलक औत्कण्ठ्यप्रवृत्तप्रणयबाष्पनिरुद्धावलोकनयन एवं निजरमणारुणचरणारविन्दानुध्यानपरिचितभक्तियोगेन परिप्लुतपरमाह्लादगम्भीरहृदयह्रदावगाढधिषणस्तामपि क्रियमाणां भगवत्सपर्यां न सस्मार ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मांसकानां प्रागल्भ्यमात्रं वक्तव्यं तु ईश्वरानुवर्तिनां सत्कर्मभिः प्रसादित ईश्वरः सर्वपुरुषार्थप्रदो भवतीति भावः ननु यदि देवताङ्गमात्रं प्रधानं तु कर्म अकर्त्तारं प्रति देवतायाः अकिञ्चित्करत्वात् तदा कर्त्तृनिष्ठमपूर्वं स्यात् यदि जडस्य कर्मणः कर्मनिरपेक्षस्य जनस्य च इष्टसाधकत्वासम्भवात् देवतैव प्रधानं तर्हि देवताधीनमपूर्वमेवं सति वासुदेव एव कर्मभिः प्रसादनीय इति दुराग्रहो न युक्त इत्यत्राह । साक्षात्कर्त्तरीति । परदेवतायामिति च । सर्वचेतनप्रेरकत्वेन नियोजककर्त्तरि सर्वदेवतांशिनि स कारयति पुण्यमथापि पापमेव सर्वेश्वरः "सर्वस्य वशी सर्वस्येशानः तं देवतानां परमं च दैवतम्" इत्यादिवाक्यकदम्बात् परदेवतात्वे हेतुः सर्वदेवतानां लिङ्गभूताः प्रकाशका ये मन्त्रास्तेषामर्थाः इन्द्रादिदेवतास्तेषां नियामकतया नियन्तृतया वासुदेवे एवापूर्वभावयमान इति सम्बन्धः एवं भावनमेवात्मनो नैपुण्यं तेन मृदिताः कषायाः रागादयो यस्य सः हविःषु चरुपुरोडाशादिषु अध्वर्युभिरिति बहुवचनं बहुकर्माभिप्रायम् ॥६॥

अन्तर्हृदये हृदयमध्ये य आकाशः स एव शरीरं वासस्थानं यस्य तस्मिन् महापुरुषरूपमुपलक्षणमाकरो यस्य तस्मिन् श्रीवत्सादिभिरुपलक्षिते निजपुरुषाणां हृदि लिखितेन सुस्थिरेणोकपुरुषरूपेणात्मनि मनसि विरोचमाने वासुदेव अनुदिनं प्रतिदिनमुच्चैस्तरामेधमानो रय उत्कर्षो यस्याः सा भक्तिरजायत ॥ ७ ॥

एवमनया वृत्त्या वर्षायुतानां सहस्रस्यान्ते अवसितो निश्चितः कर्मनिर्वाणावसरः राज्यभोगादृष्टसमाप्तिसमयो येन स रिक्थं धनम् यथादायं यथाविभागं पुलहाश्रमं हरिक्षेत्रं प्रवव्राज जगाम ॥ ८ ॥

भाषाटीका ।

महाभागवत भरतजी को जब भगवान् ने सङ्कल्प से आज्ञा दी तब भगवान् के आज्ञामे तत्पर होकर विश्वरूपकी पुत्री पंचजनी के साथ विवाह किया ॥ १ ॥

तिस भार्यामे सर्व प्रकारसे अपने सदृश पांच पुत्रोंको पैदा किये जैसे तामसाहङ्कार पांच भूतोंको पैदाकरताहै ॥ २ ॥

सुमति राष्ट्रभृत सुदर्शन आवरण धूम्रकेतु ये पुत्रोंके नाम हैं इस वर्षका नाम अजनाभ था भरतजीके पीछे भारतवर्ष इसका नाम होगया ॥ ३ ॥

वे सर्वज्ञ राजा पिता पितामह सरीके कृपा वाले होनेसे अपने अपने कर्ममे वर्तमान सब प्रजोंको आपभी अपने धर्ममे वर्तमान होकर रक्षा करने लगे ॥ ४ ॥

यज्ञक्रतुरूप यज्ञपुरुष भगवान् को छोटे बडे यज्ञों से यजन करते भये तिसमे श्रद्धा से किया जो अग्नि होत्र दर्श पौर्णमास चातुर्मास्य पशुसोम आदि यागों के प्रकृतिविकृत भेदोंसे चातुर्होत्र विधि तिस से सब काल मे यजन करते रहे ॥ ५ ॥

नाना प्रकारके एसे यागोंके होते सन्ते नानाप्रकार की अङ्गक्रिया का जो फल है तिसको यज्ञपुरुष परं ब्रह्म परदेवता भगवान् वासुदेव जो कि सब देवतों के नाम से विहित मन्त्रों के नियामक होने से साक्षात्कार करने वाले हैं तिनमें अर्पण करते भये आत्मज्ञानकी निपुणता से अन्तःकरण के मल निवृत्त होजाने से यजमान राजा ने ब्राह्मणों के हवि अर्पण करते समय यज्ञ भोक्ता सब देवों को परमात्मा के अङ्गोंमें ध्यान किया ॥ ६ ॥

इस प्रकार विशुद्ध कर्मोंसे अन्तःकरण के शुद्ध होजाने से भरतजीके हृदय मे आकाश शरीर वाले दहराकाश परब्रह्म भगवान् महापुरुषरूपसे उपलक्षित श्रीवत्स कौस्तुभ वनमाला चक्र शङ्ख गदादिकों से शोभित अपने पुरुष नारदादिकों के हृदयमे लिखित सरीके रहने के पुरुषरूप से वासुदेव भगवान् जब प्रकाशमान भये तब नित्यप्रति अतिशय वृद्धिको प्राप्त होने वाली भक्ति भगवान् मे उत्पन्न भई ॥ ७ ॥

इस प्रकार राज्य में अयुत हजारों वर्ष जब बीत गये तब भरतजी ने कर्म की समाप्तिका अवसर जान लिया तब अपना भोग राज्य को पुत्रोंको देकर पितृपितामहों का धन यथाभाग उनको देकर सम्पूर्ण सम्पत्ति वाले अपने घर में से स्वयं निकलकर शालग्राम क्षेत्र को गमन किया ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यत्र क्षेत्रे विद्याधरकुण्डे वात्सल्यं कर्तुं तेन सन्निहितः क्रियते । भक्तानामपेक्षितेन रूपेण सन्निहितो भवतीत्यर्थः ॥ ९ ॥

इत्थं धृतभगवद्व्रत ऐणेयाजिनवाससाऽनुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापेन च विरोचमानः सूर्यर्चा भगवन्तं हिरण्मयं पुरुषमुज्जिहाने सूर्यमण्डलेऽभ्युपतिष्ठन्नेतदुहोवाच ॥ १३ ॥

परोरजः सवितुर्जातवेदो देवस्य भर्गो मनसेदं जजान सुरेतसाऽदः पुनराविश्य चष्टे हंसं गृध्राणं नृषद्रिङ्गिरामिमः ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्याम्
संहितायां वैयासिक्यामृषभदेवानुचरिते
सप्तमोऽध्यायः ॥ ७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आश्रमस्थानान्युभयत उपर्यधश्च नाभिर्येषां तैर्दृषच्चक्रैः शिलामध्यगतैश्चक्रैश्चक्रनदी गण्डकी सरितां श्रेष्ठा पवित्रीकरोति ॥ १० ॥

एकल एकः आराधनं समीहमानः कुर्वाणः विविक्तः शुद्धः अतएवोपरतो विषयाभिलाषो यस्य । उपभृतः संवृद्ध उपशमो यस्य ॥ ११ ॥

प्रवर्धमानानुरागस्य भरेण यद्द्रुतं द्रवीभूतं हृदयं तस्मिन् शैथिल्यमनुद्यमो यस्य । आत्मनि देहे उद्भिद्यमानं रोमपुलककुलं रोमाञ्चवृन्दं यस्य । ककारः समासान्तः । औत्कण्ठ्यात्प्रवृत्तेन प्रणयवाष्पेण निरुद्धोऽवलोको ययोस्ते नयने यस्य सः एवं वर्तमानस्तामपि भगवत्सपर्यां न सस्मारेत्यन्वयः । तत्र हेतुः । निजरमणस्य स्वप्रीतिदातुर्ये अरुणे चरणारविन्दे तयोरनुध्यानेन परिचितः समृद्धो भक्तियोगस्तेन परिप्लुतः सर्वतो व्याप्तः परम आह्लादः परमानन्दो यस्मिन्गम्भीरहृदयह्रदे तस्मिन्नवगाढा निमग्ना धिषणा यस्य ॥ १२ ॥

धृतानि भगवद्व्रतानि येन स भगवन्तं सूर्यमण्डलेऽभ्युपतिष्ठन्नेतदुहोवाचेत्यन्वयः । कीदृशः । एण्या हरिण्या अजिनमैणेयं तदेव वासस्तेनानुसवनाभिषेकेणार्द्राः कपिशाश्च याः कुटिला जटास्तासां कलापेन च विरोचमानः सूर्यप्रकाशिकया ऋचा हिरण्मयं "ध्येयः सदा सवितृमण्डलमध्यवर्ती" इत्यादिनोक्तम् उज्जिहाने उद्गच्छति सति । सकारान्तपाठे सप्तम्यन्तात्पचाद्यच् । अर्थस्तु स एव ॥ १३ ॥

परोरजः रजसः प्रकृतेः परं शुद्धसत्त्वात्मकं सवितुर्देवस्य सूर्यस्य भर्गः स्वरूपभूतं तेजः जातं वेदो धनं कर्मफलं यस्मात्तत्कर्मफलदमित्यर्थः । अत्र हेतुः । यन्मनसैवेदं विश्वं जजान ससर्ज पुनश्च अदः सृष्टं विश्वमन्तर्यामिरूपेण प्रविश्य गृध्राणं काङ्क्षन्तं हंसं जीवं सुरेतसा चिच्छक्त्या विचष्टे पश्यति पालयतीत्यर्थः । नृषु सीदत्युपाधितया तिष्ठतीति नृषत्बुद्धिस्तस्यां रिङ्गिं रिङ्गणं गतिं राति ददातीति नृषद्रिङ्गिराम् । "वा छन्दसि ॥ ६ । १ ॥ १०६ ॥ इत्यामिपूर्वरूपत्वाभावः तद्भर्गः इमः शरणं व्रजामः ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कोऽसौ पुलहाश्रमः यं प्रवव्राजेत्यत्राह । गद्यद्वयेन यत्र ह पुलहाश्रमे भगवान् हरिरधुनापि निजजनानां वात्सल्येन निजजनविषयकवात्सल्येन स्वेच्छापरिगृहीतरूपेण सन्निधाप्यते सन्निहितो भवतीत्यर्थः ॥ ९ ॥

यत्राश्रमस्थानान्युभयतः उपर्यधश्च नाभिर्येषां तैर्दृषच्चक्रैः शिलामध्यगैश्चक्रैर्निमित्तभूतैश्चक्रनद्याख्या सरितां प्रवरा श्रेष्ठा सर्वतः पवित्रीकरोति ॥ १० ॥

तस्मिन् पुलहाश्रमोपवने एकलः असहायः नानाविधैः कुसुमादिभिः कन्दादिरूपैरुपहारैर्नैवेद्यैश्च भगवत आराधनं समीहमानः कुर्वाणः विविक्तः विशुद्धाहारः उपरतो निवृत्तो विषयेष्वभिलाषो यस्य अत एवोपभृतः समृद्धः उपशमः बाह्यान्तःकरणनिग्रहो यस्य सः निर्वृतिं प्रीतिरूपां परां भक्तिमवाप ॥ ११ ॥

एतदेव प्रपञ्चयति गद्यद्वयेन । एवं तयोक्तविधया अविच्छिन्नपरमपुरुषपरिचर्यया सर्वान्तरात्मनि भगवति निरतिशयकीर्त्तौ प्रवर्द्धमानो यः अनुरागः प्रेमा तस्य बलेन उत्कर्षेण यत् द्रुतं द्रवीभूतं हृदयं तेन शैथिल्यमनुद्यमो यस्य प्रहर्षवेगेनानन्दातिशयेनात्मनि देहे उद्भिद्यमाने रोमपुलककुलं रोमाञ्चवृन्दं यस्य समासान्तः ककारः औत्कण्ठ्येनातिवृत्तेन प्रणयानन्दवाष्पेण निरुद्धोऽवलोको ययोस्ते नयने यस्य सः (१) अभिरेमे उपररामेत्यर्थः एवं वर्त्तमानः तामपि क्रियां भगवत्सपर्यां न सस्मार तत्र हेतुं वदन् विशिनष्टि । निजरमणस्य निरतिशयप्रीतिविषयस्य भगवतोऽरुणे चरणारविन्दे तयोरनुध्यानेनोपचितः समृद्धः यो भक्तियोगः कृत्स्नः शुभाश्रयविषयः तेन परिप्लुतः सर्वतो व्याप्तः परमाह्लादः परमानन्दो यस्मिन् सः गम्भीरो हृदयह्रदस्तस्मिन्नेव गाढा निमग्ना धिषणा बुद्धिर्यस्य सः ॥ १२ ॥

एवं धृतानि भगवद्व्रतानि येन सः एण्या हरिण्याश्चमैणेयं तदेव वासस्तेनानुसवनं कालत्रये अभिषेकेण स्नानेन आर्द्रा कपिशाश्च कुटिलाश्च या जटास्तासां समूहेन विरोचमानः सूर्यमण्डले उद्गच्छति सति स्वयमुपतिष्ठन् सूर्यमण्डलस्थं हिरण्मयम् "एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी" इत्यन्तरादित्यविद्योक्तं भगवन्तं सूर्यं वा सूर्यान्तवर्तिभगवत्प्रकाशिकया ऋचा वक्ष्यमाणया

(१) अभिरेमेइति मूलेदृश्यम् ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यजन् भजन् ऋगुक्तप्रकारं ध्यायन्नित्यर्थः एतदृगात्मकं वाक्यमुवाच ह ॥ १३ ॥

ऋचमुदाहरति । परोरज इति । सवितुः सर्वलोकस्य प्रसवनादुत्पादनात् सविता "सर्वलोकप्रसवनात् सविता स तु कीर्तितः" इतिस्मृतेः यद्वा षू प्रेरणे प्रचोदयिता सविता चात्र विष्णुरेव "विष्णोर्नामसहस्रं मे"इत्युपक्रम्य "सविता रविलोचन" इति सवितृशब्दस्य भगवन्नामतयापठितत्वात् तस्य सवितुर्देवस्य विष्णोर्भर्गस्तेजोमयं रूपम् इमः "इण् गतौ"इत्यस्माल्लट् उत्तमबहुवचने रूपमेतत् शरणं गच्छेम इत्यर्थः भर्गो विशिनष्टि परोरजः रजसः परं लोकं विलक्षणं लोकपरोऽत्र रजःशब्दः "लोका रजांस्युच्यन्ते" इति यास्कोक्तेः यद्वा रजः प्रकृतिमण्डलतः परं "क्षयन्तमस्य रजसः पराके आदित्यवर्णं तमसः परस्तात्"इति श्रुतेः रजसः प्रकृतिमण्डलात्पराके परस्तात् क्षयन्तं निवसन्तमित्यर्थः जातवेदः जातं सततमाविर्भूतं वेदः ज्ञानं यस्य तत् नित्यासङ्कुचितज्ञानमित्यर्थः अत्र सवितृदेवभर्गपदैर्गायत्री प्रत्यभिज्ञाता भवति तत्रापि यथोक्त एवार्थः देवस्य भर्गम् इम इति निर्देशः शिलापुत्रकस्य शरीरमितिवद्द्रष्टव्यः कीदृशोऽसौ देवः यस्य भर्ग इमस्तत्राह । मनसा संकल्परूपज्ञानेनैवाचिच्चिदात्मकमिदं जगज्जजान ससर्ज यश्चादः स्वसृष्टजगत् स्वरेतसा स्वस्य रेतः स्वशक्तिः स्वशरीरभूतेन जीवेनाविश्यानुप्रविश्य यद्वा इदं चिदचिदात्मकं जगत् स्वतेजसात्मीयसंकल्परूपेण ज्ञानेन प्रविश्य पूर्वं जीवान्तःप्रविष्टोऽपि पुनः करणकलेवरप्रेरणानुकूलव्यापाराय स्वसंकल्परूपेण ज्ञानेनानुप्रविश्येत्यर्थः हंसं जीवं चष्टे पश्यति हंसं विशिनष्टि । गृध्राणां शब्दादिविषयान् काङ्क्षमाणं नृषद्रिङ्गिरं नृषीदति अवसादयति क्लेशयति संसारयति इति नृषद्बुद्धिस्तस्या रिङ्गिः रिङ्गणं वृत्तिः "रिगि गतौ" इति धातुः बुद्धिवृत्तिरित्यर्थः तया रात्याददाति कर्मफलानि भुङ्क्ते नृषद्रिङ्गिरस्तं नृषद्रिङ्गिरं छान्दसत्वात् । वा छन्दसि । इति पूर्वरूपत्वाभावे सवर्णदीर्घ इति नृषद्रिङ्गिरं हंसमाचष्टे इतिपदैः "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्यो अभिचाकशीति" इति श्रुतिः प्रत्यभिज्ञाता भवति तत्रापि यथोक्त एवार्थः ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

सप्तमोऽध्यायः ॥७॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कीदृशमिच्छारूपमित्यतस्तद्विवृणोति । यत्रेति । यत्र चक्रनदीनाम सरित्प्रवरा उभयतो नाभिभिरूर्ध्वाधश्चक्राङ्कितैर्दृषच्चक्रैः शिलासमूहैः सर्वतः पवित्रीकरोतीत्यन्वयः ॥ १० ॥

स एकस्तस्मिन्पुलहाश्रमोपवने परां निर्वृतिमवापेत्यन्वयः उपहृता संहृतः पूर्णः उपशमो भगवन्निष्ठा यस्य स तथा ॥११॥ प्रवर्धमानानुरागभारेण द्रुतं गलं हृदयशैथिल्यं संशयलक्षणं यस्य स तथा आत्मनि देहे रोमपुलककुलकः रोमाङ्कुरसमूहः औत्कण्ठ्यमन्तःकरणधर्मविशेषः तेन प्रवृत्तमुत्पन्नं प्रणयवाष्पमानन्दाश्रुतेन निरुद्धावलोकनयनं यस्य स तथा निजरमणारुणाचरणारविन्दयोरनुध्यानेनोपचितेन प्रवृद्धेन भक्तियोगेन परिप्लुतपरमाल्हादश्चायं गभीरहृदयावगाढधिषणश्चेति स तथोक्तः गम्भीरहृदये विष्णावगाढा मग्ना धिषणा बुद्धिर्यस्य स तथा यद्वा परिप्लुतं परमाल्हादं गभीरहृदयं यस्य स तथा अत एव हरावगाढा धिषणा यस्य स तथा ॥ १२ ॥

ऐणाजिनवाससा कृष्णाजिनाख्यवस्त्रेणानुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापेन च सूर्य इव विरोचमानः ॥ १३ ॥

एतन्मन्त्रार्थवाचकं पद्यमाह । परो इति । अथोशब्दवत्परोशब्दोऽव्ययं नाम रजसः प्रकृते परो परः उत्तमः निरस्तरजोगुणो वा सवितः जगतः कर्तः जातं सर्वं वेत्तीति जातवेदाः वेदः तस्य सम्बुद्धिर्जातवेदः वेदप्रतिपाद्यत्वाद्वेदस्य गर्भः वेदस्य तनय इत्यर्थः भगवानिदं जगज्जजान जनयामास किमुपकरणमत्राह । मनसेति । अनेन सवितृशब्दार्थो लक्षितः नियन्तृत्वमप्यस्यैवेत्याह । स्वरेतसेति । स्वरेतसा वीर्येणादः ब्रह्मादि जगत्प्रविश्य स्थितः दुःखिजगत्सम्बन्धेन दुःखलेशोऽपि नास्तीत्याह । हंसमिति । सर्वस्य दुःखहन्तृत्वाद्धंसः तं त्वं स्वतन्त्रं गृध्राणां जीवानामृषभं स्वामिनं गृधु अभिकाङ्क्षायाम् इतिधातुः जीवानां सर्वाकाङ्क्षा हि एवंविधं त्वां सङ्गृणीमः स्तुम इत्यन्वयः

परोरजा रजस्कत्वात्त्रयीड्यत्वात्त्रयीसुतः ।

गुणात्ययात्तुरीयश्च जातवेदाश्च सर्ववित् ॥

हंसो दुःखादिहानेन जीवेशत्वाच्च गृध्रराट् ।

कालःसर्वनियन्तृत्वात्परमात्मा प्रकीर्तितः इति ।

वचनात् उक्त एवार्थः परोरजा इत्यनेन ज्ञातास्वरणार्थत्वेनप्रतिपाद्यो नारायणो ममेष्टदेवतेत्युक्तं परोरजा रजस्कत्वादित्यत्रारजस्कत्वादिति पदच्छेदश्छान्दसत्वादुक्त इतिसन्तोष्टव्यम् ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

सप्तमोऽध्यायः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नाभिश्चक्रं दृषच्चक्रैः शालग्रामैः ॥ १०—१२ ॥

तं प्रेमविकारमपि भगवतोऽर्चायां विघ्नमेव मत्वा तदुपहतियोग्यं बुद्धिवृत्तिप्रेरकतया तदुपासनान्तरं कृतमित्याह । इत्थमिति ॥ १३ ॥

तत्र गायत्रीसहोदरं मन्त्रमाह । परोरज इति ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वात्सल्येन कर्णो हरिः सन्निधाप्यते सन्निहितः क्रियते केन रूपेण तत्रस्थानां निजभक्तानामिच्छाविषयीभूतेन श्रीकृष्णरामाद्यन्यतमेन रूपेणेत्यर्थः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आश्रमस्थानानि पवित्रीकरोतीत्यन्वयः । उभयत उपर्यधश्च नाभिर्येषां तैर्दृशचक्रैः शिलामध्यगतैश्चक्रैरेव चक्रनदी गण्डकी ॥ १० ॥

उपभृतः संवृद्धः उपशमो यस्य सः ॥ ११ ॥

द्रुतं द्रवीभूतं यत् हृदयं तेनैव हेतुना शैथिल्यं नित्यकृत्येऽप्यनुद्यमो यस्य सः आत्मनि देहे उद्भिद्यमानै रोमभिः पुलककुलं यस्य सः कप् समासान्तः । परिप्लुतेन सर्वतो व्याप्तेन परमाह्लादामृतेन गम्भीरो यो हृदयह्रदस्तत्रावगाढा निमग्ना धिषणा बुद्धिर्यस्य सः ॥ १२ ॥

तमपि प्रेमविकारं पूजायां विघ्नमिव मत्वा प्रेमविकारेणापि मे बुद्धिर्नखल्वाव्रियतामिति विमृश्य बुद्धिप्रकाशकेन केन च भगवन्मन्त्रेण भगवन्तमुपासितुं प्रववृते इत्याह । इत्थमिति । सूर्यगां सूर्यमण्डलस्थभगवत्प्रकाशिकया ऋचा हिरण्मयं "ध्येयः सदा सवितृमण्डलमध्यवर्त्ती" इत्यादिनोक्तम् उज्जिहाने उदयति सति उज्जिहास इति पाठे सन्नन्तात् पचाद्यच् उदेतुमिच्छति सतीत्यर्थः ॥ १३ ॥

सवितुर्देवस्य भर्गः तन्मण्डलमध्यस्थितम् ।
ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ॥

इत्यादि मन्त्रवाच्यं तेज इमः शरणं प्रजामः कीदृशं परोरजः रजसः प्रकृतेः परं विशुद्धसत्त्वात्मकं जातं वेदो धनं भक्तानामभीष्टं यतस्तत् यद्भर्गः कर्तृ मनसा सङ्कल्पमात्रेणैव इदं जगत् जजान जनयामास स्वरेतसा स्वीयचिच्छक्तितेजसा पुनरपि अदो जगत् आविश्य अन्तर्यामिरूपेण प्रविश्य गृध्नाणां दुर्विषयसुखमभिकाङ्क्षन्तं मद्विधं हंसं जीवं चष्टे पश्यति कृपया पालयतीत्यर्थः केन प्रकारेणेत्यपेक्षायां स्वस्मिन् बुद्धिवृत्तिप्रेरणयैवेत्याह । नृषु सीदति उपाधितया तिष्ठतीति नृषत् बुद्धिस्तस्या रिङ्गि स्वस्मिन्नेव गतिं राति ददातीति तत् अतस्तद्विषयिणी मे बुद्धिः केनाप्यावृता माऽस्त्विति भावः । वा छन्दसि । इत्यमिपूर्वरूपत्वाभावः ॥ १४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमे सप्तमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यत्र पुलहाश्रमे वात्सल्यकर्तृत्वेन सन्निधाप्यते सन्निहितः क्रियते स्वेच्छारूपेण स्वभक्तेच्छानुसारिरूपेण ॥ ९ ॥

उभयतो नाभिर्येषां तैः दृषच्चक्रैः शिलामध्यगैश्चक्रैश्चक्रनदी गण्डकी यत्र क्षेत्रे आश्रमपदानि आश्रमस्थानानि सर्वतः पवित्रीकरोति ॥ १० ॥

समीह्यमानः सम्यक् कुर्वाणः ॥ ११ ॥

तया इत्थमविरतपुरुषपरिचर्यया निरन्तरभगवत्सेवया आत्मनि विश्वात्मनि भगवति प्रवृद्धमानानुरागभरेण द्रुते द्रवीभूते हृदये शैथिल्यं यस्य सः प्रहर्षवेगेन उद्भिद्यमानं रोमपुलककुलकं रोमाञ्चवृन्दं यस्य समासान्तः ककारः औत्कण्ठ्यप्रवृत्तेन प्रणयवाष्पेण निरुद्धावलोके नयने यस्य सः एवम्वर्तमानस्तामपि भगवत्परिचर्यां न सस्मारेत्यन्वयः यतो निजरमणारुणचरणारविन्दयोरनुध्यानेन परिचितः समृद्धो यो भक्तियोगस्तेन परिप्लुतः सर्वतो व्याप्तः परमाह्लादी यस्मिन् गम्भीरहृदयह्रदे तस्मिन्नवगाढा निमग्ना धिषणा यस्य सः ॥ १२ ॥

इत्थं धृतानि भगवद्व्रतानि येन सः एणया हरिण्या अजिनमैणेयं तदेव वासस्तेन अनुसवनाभिषेकेण त्रिकालस्नानेन आर्द्राः कपिशाश्च याः कुटिला जटास्तासां कलापेन च विरोचमानः उज्जिहाने उद्गच्छति सूर्यमण्डले सूर्यान्तर्गतभगवत्प्रकाशिकया ऋचा वर्णितं "ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायण" इत्यादिनोक्तं हिरण्मयं "एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः" इत्यादिश्रुतिप्रसिद्धं पुरुषं पूर्णं भगवन्तं सर्वधीप्रेरकं गायत्रीप्रतिपाद्यं श्रीवासुदेवमुपतिष्ठन् एतद्वक्ष्यमाणमुवाच ॥ १३ ॥

विश्वस्य प्रसवनात्सविता भगवान् वासुदेवस्तस्य भर्गो हिरण्मयं रूपमिमः शरणं प्रजामः कीदृशं परोरजः रजसः प्रकृतेः परम् "आदित्यवर्णं तमसः परस्तात्" इति श्रुतेः अप्राकृतं हिरण्मयं रूपमित्यर्थः जातं वेदो धनं कर्मफलं यस्मात्तं कीदृशस्य सवितुर्यः इदं विश्वं मनसा सङ्कल्पेनैव जजान ससर्ज यश्च अदः स्वसृष्टं विश्वं स्वरेतसा स्वप्रभावेण प्रविश्य गृध्नाणां काङ्क्षन्तं हंसं जीवं चिचष्टे पश्यति पालयति तस्य कथम्भूतं भर्गः नृषद्रिङ्गिरं नृषु सीदति करणत्वेन तिष्ठतीति नृषद्बुद्धिस्तस्याः रिङ्गिं रिङ्गणं गतिं राति ददातीति नृषद्रिङ्गिरम् "वाछन्दसि । ६।१।१०६। इत्यमिपूर्वरूपत्वाभावः अयं श्लोकः गायत्र्यर्थप्रकाशकः ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
सप्तमाध्यायार्थप्रकाशः ॥ ७ ॥

भाषाटीका

जिस क्षेत्र में अभीतक हरि भगवान् उहांवाले अपने भक्तोंके वात्सल्य से इच्छा रूपसे शालिग्राम मूर्ति से रहते हैं ॥ ९ ॥

जहां पर चक्र नदी नामक पुण्य नदी दोनों किनारोंके चक्राङ्कित शिला रूपों से सब देशको आश्रमों को पवित्र करती है ॥ १० ॥

उस पुलहाश्रम के उपवन में नानाप्रकारके पुष्प कोमल पत्र-तुलसी दल शीतल जलोंसे कंदमूल फलों की सामग्रीसे भगवान् का आराधन करते रहे तिससे विषयाभिलाषसे निवृत्त होजाने से दिव्य शान्ति प्राप्त होनेसे परम सन्तोषको प्राप्त होगये ॥ ११ ॥

उस भक्ति से इस प्रकार निरन्तर भगवत्सेवा के करने से भगवान् के विषय बढा हुआ जो अनुरागका भार तिससे द्रवीभूत हृदय होनेसे हृदय उनका शिथिल होगया है आनन्द के वेग से देह में पुलकावली का समूह होगया है उत्कण्ठासे प्रवृत्त जो प्रेम के आंसु तिनों से दृष्टि नेत्रों की रुकगई है जिनकी इस प्रकार से अपने पति परमेश्वरके लाल कमल से चरणों के ध्यान से बढा जो भक्तियोग तिससे व्याप्त जो परम आल्हाद

भाषाटीका

तिसमें गम्भीर हृदयरूपी हौद में जिनकी बुद्धि डूब गई है, तब जिस पूजा को करते थे तिसको भी भूलगये ॥ १२ ॥

इस प्रकार से भगवान् के व्रत धारण करनेवाले भरतजी मृगचर्म के वस्त्र से सब काल में स्नान करने से गीले तथा पिङ्गल वर्णवाले टेढ़े जटों के समूह से शोभायमान होकर सूर्य-मण्डल के उदय के समय हिरण्मय पुरुष भगवान् को सूर्यकी ऋचा (गायत्री) से स्तुति करते हुये इस श्लोकको बोले ॥ १३ ॥

प्रकृति से परे वर्तमान वेदोक्त कर्म फलके उपत्न करने वाले जिनने संकल्पसे इस जगत्को पैदा किया है जोकि सृजे हुये इस संसार को अन्तर्यामी रूपसे प्रविष्ट होकर सुखकी काङ्क्षा करने वाले इस जीवको देखते हैं तथा मनुष्यों में वर्तमान बुद्धि इन्द्रिय प्राणादिकों की गतिको प्रेरणा करते हैं तिन भगवान् सूर्यनारायण के तेजको हम ध्यान करते हैं ॥ १४ ॥

इति श्रीभागवत पञ्चमस्कन्ध सातमे अध्यायका भाषानुवाद लक्ष्मणाचार्यकृत समाप्त ॥ ७ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे सप्तमोऽध्यायः समाप्तः ॥ ७ ॥

अष्टमोऽध्यायः ।

श्रीशुक उवाच ।

एकदा तु महानद्यां कृताभिषेकनैयमिकावश्यको ब्रह्माक्षरमभिगृणानो मुहूर्तत्रयमुदकान्त उपविवेश ॥ १ ॥

तत्र तदा राजन् ! हरिणी पिपासया जलाशयाभ्याशमेकैवोपजगाम ॥ २ ॥

तया पेपीयमान उदके तावदेवाविदूरेण नदतो मृगपतेरुन्नादो लोकभयङ्कर उदपतत् ॥ ३ ॥

तमुपश्रुत्य सा मृगवधूः प्रकृतिविक्लवा चकितनिरीक्षणा सुतरामपि हरिभयाभिनिवेशव्यग्रहृदया पारिप्लवदृष्टिरगततृषा भयात् सहसैवोच्चक्राम ॥ ४ ॥

तस्या उत्पतन्त्या अन्तर्वत्न्या उरुभयावगलितो योनिनिर्गतो गर्भः स्रोतसि निपपात ॥ ५ ॥

तत्प्रसवोत्सर्पणभयखेदातुरा स्वगणेन वियुज्यमाना कस्यांचिद्दर्यां कृष्णसारसती निपपाताथ च ममार ॥ ६ ॥

तं त्वेणकुणकं कृपणं स्रोतसाऽनूह्यमानमभिवीक्ष्यापविद्धं बन्धुरिवानुकम्पया राजर्षिर्भरत आदाय मृतमातरमित्याश्रमपदमनयत् ॥ ७ ॥

तस्य ह वा एणकुणक उच्चैरेतस्मिन्कृतनिजाभिमानस्याहरहस्तत्पोषणपालनलालनप्रीणनानुध्यानेनात्मनियमाः सह यमाः पुरुषपरिचर्यादय एकैकशः कतिपयेनाहर्गणेन वियुज्यमानाः किल सर्व एवोदवसन् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टमे भजतो विष्णुं तस्य कर्मान्तरायतः ।
एणरत्त्वाप्रसक्तस्य जातमेणत्वमीर्यते ॥ १ ॥
कृपयापि कृतः सङ्गः पतनायैव योगिनः ।
इति प्रदर्शयन्नाह भरतस्यैणपोषणम् ॥ २ ॥

नैयमिकं नित्यनैमित्तिकविधिप्राप्तमावश्यकमर्थप्राप्तं मूत्रोत्सर्गादि कृतमभिषेकादिकं येन । ब्रह्माक्षरं प्रणवं जपन् उदकान्ते नद्यास्तीरे ॥ १ ॥

जलाशयाभ्याशं नद्याः समीपे ॥ २ ॥

पेपीयमाने अत्यासक्त्या पीयमाने सति । तावदेव तत्क्षणमेव अविदूरेण सन्निधौ मृगपतेः सिंहस्य उन्नादो महानाद उद्गतः ॥ ३ ॥

प्रकृत्या स्वभावत एव विक्लवा व्याकुला सुतरां तु हरिभयस्याभिनिवेशेन व्यग्रं व्याकुलं हृदयं यस्याः पारिप्लवदृष्टिः परिभ्रान्तनेत्रा न गता तृषा तृट् यस्याः उच्चक्राम नदीमुल्लङ्घितवती ॥ ४ ॥

अन्तर्वत्न्या गर्भिण्याः , उरुभयेन स्थानाद्विचलितो योनेर्निर्गतः सन् स्रोतसि प्रवाहे निपतितः ॥ ५ ॥

तत्प्रसवो गर्भपातः उत्सर्पणमुल्लङ्घनं भयं च एतैः खेदेनातुरा पीडिता दर्यां गिरिगुहायां हरिणवधूर्निपपात अथानन्तरं मृता च ॥ ६ ॥

एणकुणकं हरिणबालकमपविद्धं बन्धुभिस्त्यक्तमित्येतैः कृपणत्वादिहेतुभिर्यानुकम्पा तया अनयत् ॥ ७ ॥

कृतो निजः स्वीय इत्यभिमानो येन पोषणं तृणादिना पालनं वृकादिभ्यो रक्षणं लालनं चुम्बनादिना प्रीणनं कण्डूयनादिना एतैर्यदनुध्यानमासक्तिस्तेनात्मनो नियमाः स्नानादयो यमा अहिंसादयस्तत्सहिता ईश्वरपरिचर्यादयश्च प्रत्यहमेकैकशो वियुज्यमानाः सन्तः कतिपयेनाहर्गणेन सर्वे उत्सन्ना बभूवुः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स भरत एकदा कर्हिचिन्महानद्यां चक्रनद्यां कृताभिषेकः कृतः अभिषेकः स्नानं नैयमिकं नियतमावश्यकं नित्यनैमित्तिकं च येन स ब्रह्माक्षरं प्रणवं जपन्नुदकान्ते नद्यास्तीरे मुहूर्तत्रयमुपविष्टवान् ॥ १ ॥

हे राजन् ! तत्र तीरे तदा भरतावस्थानसमये हरिणी एणी पिपासया जलाभ्याशं जलसमीपं प्रत्येकैवासहायैव जगाम

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तया हरिण्या उदके नितरां पेपीयमाने सति अविदूरे समीप एव नदतो ध्वनिं कुर्वतो मृगपतेः सिंहस्य लोकभयङ्कर उन्नादो ध्वनिरुदपद्यत हरिण्या श्रुतोऽभवदित्यर्थः ॥ २ ॥ ३ ॥

तमुन्नादमुपश्रुत्याकर्ण्य सा मृगस्य वधूर्हरिणी प्रकृत्या स्वभावेनैव विक्लवा व्याकुला सुतरां हरिभयस्य सिंहभयस्याभिनिवेशेन व्यग्रं व्याकुलं हृदयं यस्याः सा अत एव पारिप्लवदृष्टिश्चञ्चलदृष्टिरत एव चकितनिरीक्षणा प्रतिहतनिरीक्षणा अगतानपगता तृषा पिपासा यस्याः साः तथा भूतैव सहसा आशु उच्चक्राम नदीमुल्लङ्घितवती ॥ ४ ॥

उत्पतन्त्या अन्तर्वत्न्याः पूर्णगर्भिण्याः तस्या हरिण्या गर्भ उरुभयेन सिंहभयेनावगलितः स्वस्थानात्प्रच्युतो योनेर्निर्गतः स्रोतसि प्रवाहे निपपात पतितोऽभूदित्यर्थः ॥ ५ ॥

तत्प्रसवो गर्भपातः उत्सर्पणमुल्लङ्घनं भयं चेत्येतैः यः खेदस्तेनातुरा पीडिता स्वयूथेन वियुक्ता कृष्णसारसती कृष्णमृगवधूः कस्यांचिद्दर्यां गिरिगुहायां निपपात अथ पतनानन्तरं ममार मृतवती च ॥ ६ ॥

तत्स्रोतसा प्रवाहेणोह्यमानमेणकुणकमेणस्यापत्यमभिवीक्ष्य राजर्षिर्भरतः मृता माता यस्य तं मृतमातरं बन्धुभिः स्वपित्रादिभिरपविद्धं परित्यक्तमित्यनुकम्पया आदाय हस्ते गृहीत्वा स्वाश्रमस्थानमनयत्प्रापितवान् ॥ ७ ॥

एतस्मिन्नेणशिशौ कृतः निजाभिमानः आत्मीयत्वाभिमानो येन तस्य भरतस्याहरहस्तस्यैणशिशोः पोषणाद्यनुध्यानेन ध्यानेन तत्र पोषणमाहारेण पालनं व्याघ्रादिभ्यो रक्षणं प्रीणनं कण्डूयनादि लालनं करस्पर्शनं चुम्बनादि एतैर्यदनुध्यानमासक्तिस्तेनान्तरायेण भगवत्परिचर्यादयः आत्मनियमाः शौचाचारादयः सह यमाः अहिंसादिभिः सहिताः सर्वे एव धर्माः प्रत्यहमेकैकशो वियुज्यमानाः सन्तः कतिपयेनाहर्गणेनोदवसन्नुत्सन्ना बभूवुः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सत्सङ्गतिमन्तरेणेतरसङ्गतिः संसारहेतुरिति एतन्निरूप्यतेऽस्मिन्नध्याये तत्र भरतस्यैणशावसङ्गत्यानर्थप्रकारं कथयितुमुपक्रमते एकदेति । अभिषेकः स्नानमावश्यकं मूत्रपुरीषोत्सर्जनादि नैयमिकं नित्यकर्म अत्र क्रमस्त्वविवक्षितः एतावत्करोतीति क्रियमाणमनुष्ठानं नैयमिकं सन्ध्यानुष्ठानमावश्यकमिति वा अक्षरं प्रणवः गायत्री वा अघमर्षणसूक्तं वा जलाशयाभ्याशं नदीसमीपं तावत्तदानीं मृगपतिः व्याघ्रः ॥ १—३ ॥

प्रकृत्या स्वभावेन विक्लवा पारवश्योपेता अत एव चलितनिरीक्षणा चञ्चलावलोकना हरेर्व्याघ्राद्भयाभिनिवेशः भयोद्वेगः तेन व्यग्रं भ्रान्तं हृदयं यस्याः सा तथा "हरिर्व्याघ्रे पञ्चमुखे भेके सूर्यसमीरयोः" इति अत एव पारिप्लवदृष्टिः चञ्चलदृष्टिः तृषेतिद्रावन्तः उच्चक्रामोत्पपात ॥ ४ ॥

अन्तर्वत्न्या गर्भिण्याः उरुणा भयेनावगलितो निर्गतः स्रोतसि प्रवाहे प्रस्रवणं प्रसार उत्सर्पणमुत्पतनं हरिभयं च खेदश्च एतैरातुरा दर्यां महागर्ते कृष्णसारसती कृष्णमृगप्रिया ॥ ५ ॥ ६ ॥

एणकुणकं मृगबालकमपविद्धबन्धुं त्यक्तबन्धुजनं मृता माता यस्य स तथा तम् ॥ ७ ॥

पोषणं तृणादिदानेन लालनमुत्सङ्गारोपणादिना अनुध्यानं क्षेमचिन्तनं पोषणाद्यनुचिन्तनं वा यमा अहिंसादयः पुरुषपरिचर्यादयो विष्णुपूजादयः उदवसन् उत्सन्ना बभूवुः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

योगारम्भणतो यमनियमादितः स्वारब्धकर्मणा अपराधरूपेण योगमिभ्रस्तापसो भगवदुपासकः ॥ १—३१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अष्टमे भरतश्चक्रे मृगपालनलालने ।
तद्वियोगेन तच्चेताः प्राप तद्देहतामपि ॥
दयामपि त्यजेद्भक्तिबाधिनीमिति दर्शयन् ।
तं मृगं पोषयामास कृष्णश्चतुरिमाम्बुधिः ॥
अनुतापाम्बुधौ क्षिप्त्वा स्वप्रेमाब्धौ निमज्जयन् ।
तमेनं पोषयन् भक्तवात्सल्यं चाप्यदीदृशत् ।

नैयमिकं नित्यनियमप्राप्तमावश्यकं मूत्रोत्सर्गादिकमभिषेकस्नानं च कृतं येन सः अग्न्याजादित्वादल्पाच्‌ त्वाच्चाभिषेकशब्दस्य पूर्वनिपातः । अक्षरमक्षरात्मकं ब्रह्म कृष्णमन्त्रम् । अभिगृणानो जपन् ॥ १ ॥ २ ॥

पेपीयमाने अत्यासक्त्या पीयमाने मृगपतेः सिंहस्य ॥ ३ ॥

सहसा नादसमकालमेव भयात् त्रासात् । उच्चक्राम नद्या धारामुल्ललङ्घ ॥ ४ ॥

अन्तर्वत्न्या गर्भवत्याः ॥ ५ ॥

तत्प्रसव उच्चाकाशादेव गर्भपातः ॥ ६ ॥

एणकुणकं हरिणबालकम् । अपविद्धं बन्धुभिस्त्यक्तम् इति एतैः कृपणत्वादिहेतुभिर्या अनुकम्पा तया ॥ ७ ॥

पोषणं तृणादिना पालनं वृकादिभ्यः प्रीणनं कण्डूयनादिना लालनं चुम्बनादिना एतैर्यदनुध्यानमासक्तिस्तेन । उदवसन् उत्सन्ना बभूवुः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अष्टमे दैवादेणरक्षाप्रसक्त्या भरतस्यैणभावो वर्ण्यते । एकदेति । महानद्यां गण्डक्यां कृतमभिषेकादिकं येन सः तत्र अभिषेकः स्नानं नैयमिकं नित्यनैमित्तिकविधिप्राप्तमावश्यकं मूत्रोत्सर्गादि अक्षराक्षरं प्रणवं जपन् उपविवेश उपविष्टवान् ॥ १ ॥ २ ॥ ३ ॥

पारिप्लवदृष्टिः परिभ्रान्तदृष्टिः उच्चक्राम नदीमुल्लङ्घितवती ॥ ४ ॥

महद्भयेन अवगलितः अत एव योनितो निर्गतः ॥ ५ ॥

तत्तदा प्रसवोत्सर्पणभयैः गर्भपतनमुल्लङ्घनं सिंहभयैश्च खेदस्तेनातुरा व्याकुला पपात ममार च ॥ ६ ॥

अहो बतायं हरिणकुणकः कृपण ईश्वररथचरणपरिभ्रमणरयेण स्वगणसुहृद्बन्धुभ्यः परिवर्जितः शरणं च मोपसादितो मामेव मातापितरौ भ्रातृज्ञातीन् यौथिकांश्चैवोपेयाय [१] नान्यं कञ्चन वेद मय्यतिविस्रब्धश्चात एव मया मत्परायणस्य पोषणपालनप्रीणनलालनमनसूयुनाऽनुष्ठेयं शरण्योपेक्षादोषविदुषा ॥ ९ ॥

नूनं ह्यार्याः साधव उपशमशीलाः कृपणसुहृद एवंविधार्थे स्वार्थानपि गुरुतरानुपेक्षन्ते ॥ १० ॥

इति कृतानुषङ्ग आसनशयनाटनस्थानाशनादिषु सह मृगजहुना स्नेहानुबद्धहृदय आसीत् ॥ ११ ॥

कुशकुसुमसमित्पलाशफलमूलोदकान्याहरिष्यमाणो वृकसालावृकादिभ्यो भयमाशंसमानो यदा सह हरिणकुणकेन वनं समाविशति ॥ १२ ॥

पथिषु च मुग्धभावेन तत्र तत्र विषक्तमतिप्रणयभरहृदयः कार्पण्यात्स्कन्धेनोद्वहति एवमुत्सङ्ग उरसि चाधायोपलालयन् मुदं परमामवाप ॥ १३ ॥

क्रियायां निर्वर्त्यमानायामन्तरालेऽप्युत्थायोत्थाय यदैनमभिचक्षीत तर्हि वाव स वर्षपतिः प्रकृतिस्थेन मनसा तस्मा आशिष आशास्ते स्वस्ति स्ताद्वत्स ! ते सर्वत इति ॥ १४ ॥

अन्यदा भृशमुद्विग्नमना नष्टद्रविण इव कृपणः सकरुणमतितर्षेण हरिणकुणकविरहविह्वलहृदयसन्तापस्तमेवानुशोचन् किल कश्मलं महदभिरम्भित इति होवाच ॥ १५ ॥

अपि बत स वै कृपण एणबालको मृतहरिणीसुतोऽहो ममानार्यस्य शठकिरातमतेरकृतसुकृतस्य कृतविस्रम्भ आत्मप्रत्ययेन तदविगणयन् सुजन इवागमिष्यति ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तं तु एणकुणकं मृगदारकमितिशब्दो हेतौ यतः मृतमातरमत्यक्तं बन्धुः पित्रादिर्यथासवति तद्वत् आदाय आश्रमस्थानमनयत् ॥ ७ ॥

एतस्मिन् एणकुणके कृतनिजाभिमानस्य तस्य भरतस्य अत्तस्य मृगदारकस्य तृणादिना पोषणेन व्याघ्रादिभ्यः पालनेन कण्डूयनादिना प्रीणनेन चुम्बनादिना लालनेन यदनुध्यानं पुनःपुनश्चिन्तनं तेन पुरुषपरिचर्यादयः आत्मनो नियमाः स्नानादयः सह यमाः अहिंसादियमसहिताः अहरहः प्रतिदिनमेकैकशो वियुज्यमानाः कतिपयेनाहर्गणेन सर्वे उदवसन् त्यक्ता बभूवुः ॥ ८ ॥

———

भाषाटीका।

श्रीशुकदेवजी बोले श्रीभरतजी एक दिन महानदी गण्डकी मे स्नानादि नित्यकर्म को करके ओङ्कार का जप करते तीन मुहूर्त तक जलके भीतर बैठे रह गये ॥ १ ॥

हे राजन् ! तहांपर तिसीसमय एक हरिणी प्यासी इकेली नदीके पास जलपीने को आई ॥ २ ॥

उसके जल पीने समय थोडे दूरमे गर्जन करते हुये सिंहका महा शब्द सुन पडा ॥ ३ ॥

उस शब्दको सुनते मात्र स्वभावसे डरने वाली वह मृगी चकित होकर देखने लगी अत्यन्त करके सिंहके भयसे जिसका हृदय कांप उठाहै उसकी दृष्टि चंचल होगई है तो जलभी नहीं पीसकी शीघ्रही कूदगई ॥ ४ ॥

वह मृगी गर्भवती थी उसके कूदते समय बडे भयके मारे योनिके स्स्ले निकला गर्भ नदी के प्रवाह मे गिरगया ॥ ५ ॥

उस गर्भके गिरने तथा कूदने के भयसे दुःखित हुई अपने यूथसे छूटी वह मृगी किसी कन्दरा मे गिरपडी और मरगई ॥ ६ ॥

अतिदुःखित पडे हुये जलके प्रवाह मे बहते उस मृगके बच्चे को देखकर गिरा हुआ जानकर राजर्षि भरतजी बन्धु सरीके होकर कृपा करके उसकी माता मरी जानकर उस बच्चेको आश्रममे ले आये ॥ ७ ॥

उस मृगके बच्चे से निज सरीका अभिमान करने से नित्यप्रति उस के पालन पोषण लालन प्रीणन ध्यानके करने से यम नियम भगवत्पूजा आदिकभी एक एक छूटते छूटते कुछ दिन में सबही छूटगये ॥ ८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका।

आसक्तिं प्रपञ्चयति। अहो इत्यादिना इति कृतानुषङ्ग इत्येतत्पर्यन्तेन ईश्वररथचरणः कालचक्रं तस्य परिभ्रमणवेगेन स्वगणादिभ्यो विभ्रंशितः मा इति मां च शरणं प्रापितः। मामेव

(१) गोपायनंनान्यमिति श्रीवीरराघव श्रीविजयध्वजतीर्थयोः पाठः

श्रीधरस्वामिकृतभावार्थदीपिका ।

मातापित्रादिबुद्ध्योपेयाय प्राप्तः यौथिकान् यूथसङ्घातिनः । अनसूयुना एतन्निमित्तं मम स्वार्थो भ्रश्यतीति दोषदृष्टिमकुर्वता ॥९॥

तदेवाह । नूनं होति ॥ १० ॥

इत्येवं कृतोऽनुषङ्ग आसक्तिर्येन । मृगजहुना मृगापत्येन सह स्नेहेनानुबद्धं हृदयं येन ॥ ११ ॥

स्नेहानुबन्धमेव प्रपञ्चयति । कुशकुसुमेत्यादिना स्वधयतीत्यन्तेन । सालावृकाः श्वानः यदा भयं शङ्कमानो भवति तदा तेन सह वनं समाविशति ॥ १२ ॥

अतिशयितः प्रणयभरो यस्य तद्धृदयं यस्य सः ॥ १३ ॥

क्रियायां देवपूजादिलक्षणायां वर्षपतिर्भरतः प्रकृतिस्थेन स्वस्थेन स्तात् भूयात् ॥ १४ ॥

अन्यदादर्शने सकरुणं यथा भवत्येवमनुशोचन्निति होवाचेत्यन्वयः । अतितर्षेणात्यौत्सुक्येन हरिणकुणकविरहेण विह्वले हृदये सन्तापो यस्य कश्मलं मोहं प्रापितः सन् ॥ १५ ॥

अपीति सम्भावनायां बतेत्यनुकम्पायाम् अहो इति खेदे शठकिरातयोरिव वञ्चनपरा क्रूरा च मतिर्यस्याकृतसुकृतस्य निर्भाग्यस्य मम तच्छाठ्यादिकमगणयन्नचिन्तयन्नागमिष्यति किम् अपराधाचिन्तने हेतुः आत्मप्रत्ययेन स्वचित्तशुद्ध्या कृतविश्वासः सन् सुजनो न यथा गणयति तद्वत् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदासक्तिं प्रपञ्चयति । अहो इत्यादिना इति कृतानुषङ्ग इत्यन्तेन । अयं हरिणकुणकः ईश्वररथचरणं कालचक्रं तस्य परिभ्रमणवेगेन स्वगणादिभ्यो विवर्जित अत एव कृपणो दीनोऽयं मां शरणमासादितः प्राप्तश्च मामेव मातापित्रादिबुद्ध्या उपेयाय प्राप्तः यूथिकाः सङ्घातिनः सोपेयाय मामेव गोपायनं गोप्तारमधिकं मन्वानः मत्तोऽन्यं कञ्चन गोप्तारं न वेद मय्येवातिविस्रब्धाऽतितरां विश्वासयुक्ता मतिर्यस्य सः अतः कारणादेवं मत्परायणस्य मदेकशरणस्य हरिणकुणकस्य पोषणादिकम् एतस्मान्निमित्तं मम स्वार्थो नश्यतीत्यसूयारहितेन मयावश्यमनुष्ठेयं हि यस्माच्छरणयोपेक्षा शरणागतानादरः विदुषां दोषः प्रत्यवायकरः यद्वा शरणं गन्तव्या शरणया रक्षकत्वेन विश्वसनीयास्तेषामुपेक्षा शरणागतविषयेष्वनादरः विदुषां दोष इति ॥ ९ ॥

अत एवार्याः साधवः परोपकारशीलाः उपशमस्वभावाः कृपणेषु सुहृदः सौहार्दवन्त एवंविधार्थे शरणागतरक्षणार्थे स्वार्थान् स्वप्रयोजनानि गुरुतरानपि उपेक्षन्ते गुरुतरानपि प्रयोजनमनादृत्यैवंविधशरणागतरक्षणं कुर्वन्ति नूनमित्येवं कृतानुषङ्गः कृत अनुषङ्गः आसक्तिर्येन भरतः आसनाद्यवस्थासु तत्रासनमुपवेशनमटनं सञ्चरणमशनं भोजनं कन्दमूलादीनां मृगापत्येन सह स्नेहस्तेनानुविद्धं हृदयं येन तथाभूत आसीत् ॥ १० ॥

स्नेहानुबन्धमेवाह । कुशकुसुमेत्यादिना । स्वदयन्तीत्यन्तेन कुशादीन्याहरिष्यमाणः यदि मृगेण विना गच्छामि चेत्तर्ह्येनं वृकादयो भक्षयेयुरिति बुद्ध्या शालावृकादिभ्यो भयमाशङ्कमानः सालावृका अरण्यश्वानः हरिणकुणकेन सहैव वने प्रविशति पथि पथि च मुग्धभावेन सौकुमार्येण मौक्तगठ्येन वा विषक्तमतिरासक्तमतिर्वा गन्तुमसमर्थो भवति नेच्छति वा मृगस्तदा तं प्रणयस्य स्नेहस्योत्कर्षो यस्मिंस्तद्धृदयं यस्य तथाभूतो भरतः कार्पण्यान्मृगविश्लेषजडः स्वासहिष्णुत्वरूपाद्दैन्यात् स्कन्धनाद्वहति स्कन्धयोरारोप्य गच्छति एवमासनसमये उत्सङ्गे शयनसमये उरसि चाधाय परमां मुदमवाप प्राप्तवान् ॥ ११ ॥ १२ ॥ १३ ॥

क्रियायां नित्यनैमित्तिकादिक्रियायां निर्वर्त्यमानायां क्रियमाणायां सत्यामन्तराले मध्ये क्षणे क्षणे उत्थायोत्थाय यदैनं मृगमभिचक्षीत पश्यति तर्हि वा तदा हि स वर्षपतिः भरतः प्रकृतिस्थेन मनसा तस्मै मृगाय आशिष आशास्ते आशीराशासनमेवाह । स्वस्तीति । हे वत्स ! ते तुभ्यं सर्वतः सर्वत्र देशे काले च स्वस्ति स्यादिति आशास्ते स्तादिति पाठे ऽप्ययमेवार्थः ॥ १४ ॥

अन्यथा मृगस्यादर्शने तु सकरुणं यथा भवति तथा एवमनुशोचन्निति वक्ष्यमाणप्रकारेण प्रोवाचेत्यन्वयः कथम्भूत अनुशोचन्नष्टधन इव नितरां भीतमना अतितर्षेणौत्सुक्येन हरिणकुणकसेवाविरहेण विह्वले हृदये सन्तापो यस्य महत्कश्मलं मोहमभिलम्भितः प्रापितः ॥ १५ ॥

किमुवाच तदाह । अपीति । मम तदनार्यत्वादिकमविगणयन् कृतः विश्रम्भो येन तथाभूत एवात्मप्रत्ययेन स्वबुद्ध्या एव सुजन इवागमिष्यत्यपि आगच्छेत् किं क्षेमेण वृकादिभिरनुपहतं तत्र हेतुः दैवेन भगवता गुप्तं रक्षितं मदाश्रमसमीपवने शष्पाणि कोमलतृणानि चरन्तं भक्षयन्तमपि द्रक्ष्यामि ॥ १६ ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ईश्वररथचरणस्य कालचक्रस्य परिभ्रमणरयेण गमनागमनवेगेन मा मां गोपायनं गोप्तारं रक्षितारं शरणं प्राप्तस्योपेक्षया महान् दोषो भवतीति दोषविदुषा ॥ ९ ॥

मृगपोषणादिना भगवदुपासनाभङ्ग इति तत्राह । नूनमिति ॥ १० ॥

इत्युक्तप्रकारेण कृतानुषङ्गः कृतस्नेहाभिनिवेशः मृगजहुना मृगबालकेन ॥ ११ ॥

आहरिष्यमाण आनयिष्यन् ॥ १२ ॥ १३ ॥

वर्षपतिः भरतखण्डनाथः प्रकृतिस्थेन स्वस्थेन ॥ १४ ॥

अन्यदा अदर्शने अतितर्षेण अत्युत्कण्ठया कश्मलं विषादम् अभिरम्भित आश्रितः ॥ १५ ॥

आत्मप्रत्ययेन स्वमनःशुद्ध्या तन्ममौदासीन्यमविगणयन्नविचिन्तयन् स्वजनः पुत्र इव ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आसक्तिं प्रपञ्चयति । अहो इत्यादिना इति कृतानुषङ्ग इत्येतत् पर्यन्तेन । ईश्वरस्य रथचरणः कालचक्रं तस्य परिभ्रमणवेगेन परिवर्जितः वियोजितः मा माम् अनसूयुना एतन्निमित्तं मम स्वार्थो

अपि क्षेमेणास्मिन्नाश्रमोपवने शष्पाणि चरन्तं देवगुप्तं द्रक्ष्यामि ॥ १७ ॥
अपि च न वृकः शालावृकोऽन्यतमो वा नैकचर एकचरो वा भक्षयति ॥ १८ ॥
निम्लोचति ह भगवान् सकलजगत्क्षेमोदयस्त्रय्यात्माऽद्यापि मम न मृगवधून्यास आगच्छति॥१९॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अश्रयतीति दोषदृष्टिमकुर्वता शरण्यकर्तृकोपेक्षायां दोषं जानता ॥९॥

यत एष एव मे वस्तुतः स्वार्थ इत्याह । नूनमिति ॥ १० ॥

अनुषङ्ग आसक्तिः मृगजहुना मृगापत्येन ॥ ११ ॥

स्नेहानुबन्धमेव प्रपञ्चयति । कुशकुसुमेति । शाला वृकाः कपिक्रोष्टुश्वानः तदादिभ्यः ॥ १२ ॥

तत्र तत्र महाकर्दमोपरितले कोमलतृणादौ मुग्धभावेन कर्दममध्ये निमङ्क्ष्यामीति ज्ञानराहित्येन विषक्तमासक्तम् ॥ १३ ॥

क्रियायां भगवत्परिचर्यायामपि अन्तराले मध्येऽपि अभिचक्षीत न जाने क्व गतो मे हरिणबालक इति उत्थाय पश्येत् प्रकृतिस्थेन तद्दर्शनानन्दप्राप्त्यर्थम् ॥ १४ ॥

अन्यदा दैवाददर्शने सतीत्यर्थः । अतितर्षेण तद्दर्शनातितृष्णया कश्मलं मोहमभिरम्भितः प्रापितः ॥ १५ ॥

अपीति सम्भावनायां वतेत्यनुकम्पायाम् अहो इति खेदोऽर्थे आश्चर्ये । अनार्यस्य तत्पालनपोषणादावसावधानत्वान्निर्दयस्यात एव शठकिरातयोरिव क्रूरा मति र्यस्य तत्र हेतुरकृतसुकृतस्य भाग्यहीनस्य मम तन्निर्दयत्वादिकमपराधमगणयन् आगमिष्यति किमपराधागणने हेतुः आत्मप्रत्ययेन आत्मवन्मन्यते जगदिति न्यायेन स्वस्य शुद्धचित्तत्वान्मामपि शुद्धचित्तं प्रतियन्नित्यर्थः । अत एव कृतविस्रम्भः अविश्वास्येऽपि मयि विश्वस्तः सन् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ईश्वरस्य रथचरणः कालचक्रं तस्य भ्रमणवेगेन मोपसादितः ॥ ९ ॥ १० ॥

कृतोऽनुषङ्गोऽनुरागो येन सः ॥ ११ ॥

शालावृकः श्वा ॥ १२ ॥

अति अतिशयितः प्रणयभरो यस्य तद्धृदयं यस्य सः ॥ १३ ॥

प्रकृतिस्थेन स्वभावस्थेन स्वतात् स्यात् ॥ १४ ॥

अन्यदा तददर्शने सकरुणं यथा स्यात्तथा तमेवानुशोचन् महत्कश्मलं कष्टमभिरम्भितः प्राप्तः सन् इति वक्ष्यमाणमुवाच॥१५॥

शठकिरातयोरिव मन्दा निर्दया च मतिर्यस्य मम तदनार्यत्वमगणयन्नागमिष्यति किम ॥ १६ ॥

भाषाटीका ।

भरतजी कहनेलगे अहो आश्चर्य है यह हरिणका बच्चा बडा दुखी है भगवान् के कालचक्र के भ्रमण के वेगसे अपने अपने समूह सुहृत बन्धुओं से रहित होगया है तब मेरे को प्राप्त हुआ है मेरेही को माता पिता मानता है भ्राता ज्ञाति यूथ वाले समझकर आया है और कोई को नहीं जानता है मेरे में बडा विश्वास करता है इसी से मेरे में तत्पर इसका पालन पोषण प्रीणन लालन इस के अवगुणों को न देखकर मेरे को करना चाहिये क्योंकि मैं शरणागत के उपेक्षा दोषको जानने वाला हूं ॥ ९ ॥

यह बात निश्चित है कि उत्तम साधु शान्तिशील दीनोंके दयालु पुरुष इस प्रकार के कार्य मे अपने भारी कार्योंको छोडदेते हैं ॥ १० ॥

इस प्रकार से भरतजी आसक्ति करके आसन शयन चलन बैठन समयोंपर मृगबालक के साथ स्नेह से बंधगये ॥ ११ ॥

जिसवखत कुशा पुष्प लकडी पत्ता फल मूल जल लाने को जाते थे तिस वखत भेडिया गीदड व्याघ्रादिकों से भयमानकर जब जाते तब हरिण के बच्चेको साथ मे लेजाते थे ॥१२॥

रस्तामें भोलेपने से जहां तहां मृगका बच्चा तृणादिकों में आसक्त होता तब भरतजी बडे प्रेमसे कृपाके मारे उसको कांधे में उठालेते थे तैसेही गोदमे छातीमें रखकर बडे सन्तुष्ट होते थे ॥ १३ ॥

पूजादि क्रियाके समाप्तहोनेपर या मध्यमें ही उठकर जब उसको देखते थे तब वे वर्षपति भरतजी निश्चल मनसे उस के वास्ते आशीर्वाद करते कहते कि हे वत्स ! तेरा सर्वत्र कल्याण होवै ॥ १४ ॥

जब किसी दिन मृग स्वभाव से वह चलागया तब अति दुःखित होगये धन के बरोबर मति अधैर्य से होगये बडी उत्कण्ठा होनेसे मृग के बच्चे के विरह से हृदय मे विह्वल होगये सन्ताप करने लगे महा मोह को प्राप्त होकर बोलने लगे ॥ १५ ॥

बोले वह दुखित मृगबालक मरी हुई हरिणी का बच्चा मेरेपर विश्वास करता था मै क्षुद्र हूं शठ किरातकी बुद्धिवाला हूं मैंने पुण्य नहीं किये हैं तौभी वह मृगबालक हमारे अवगुणों को न गिनकर सुजन के माफिक आजायगा क्या ॥१६॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शष्पाणि कोमलतृणानि ॥ १७ ॥

नैकचरो यूथचरः सूकरादिः । यद्वा । एक एव चरति यः क्रूरस्वभावो व्याघ्रादिर्न भक्षयति किम् ॥ १८ ॥

सकललोकस्य क्षेमो यस्मात्स उदयो यस्य वेदत्रयी आत्मा स्वरूपं यस्य सः सूर्यो निम्लोचत्यस्तं याति मृगवध्वा न्यासो निक्षेपभूतः ॥ १९ ॥

हरिण एव राजकुमार आगत्य मामपि खिन्नमुल्लासयिष्यतीत्य-

अपिस्विदकृतसुकृतमागत्य मां सुखयिष्यति हरिणराजकुमारो विविधरुचिरदर्शनीयनिजमृगदारकविनोदैरसन्तोषं स्वानामपनुदन् ॥ २० ॥

क्ष्वेलिकायां मां मृषासमाधिनाऽऽमीलितदृशं प्रेमसंरम्भेण चकितचकित आगत्य पृषदपरुषविषाणाग्रेण लुठति ॥ २१ ॥

आसादितहविषि बर्हिषि दूषिते मयोपालब्धो भीतभीतः सपद्युपरतरास [1] ऋषिकुमारवदवहितकरणकलाप आस्ते ॥ २२ ॥

किंवा अरे आचरितं तपस्तपस्विन्याऽनया यदियमवनिः सविनयकृष्णसारतनयतनुतरसुभगशिवतमाखरखुर [2] पदपङ्क्तिभिर्द्रविणविधुरातुरस्य कृपणस्य मम द्रविणपदवीं सूचयन्त्यात्मानं च सर्वतः कृतकौतुकं द्विजानां स्वर्गापवर्गकामानां देवयजनं करोति ॥ २३ ॥

अपिस्विदसौ [3] भगवानुडुपतिरेनं मृगपतिभयान्मृतमातरं मृगबालकं स्वाश्रमपरिभ्रष्टमनुकम्पया कृपणजनवत्सलः परिपाति ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

न्वयः किं कुर्वन् विविधै रुचिरैर्दर्शनीयैर्निजैर्मृगदारकविनोदैः स्वीयानां खेदमपनुदन् ॥ २० ॥

सम्भवति चैतदित्याह । क्ष्वेलिकायां क्रीडायां मृषा यः समाधिस्तेनामीलिते दृशौ येन तं मां प्रेमसंरम्भेण प्रणयकोपेन पृषज्जलबिन्दुस्तद्वदपरुषेण मृदुना विषाणाग्रेण लुठति सङ्घट्टयति॥२१॥

आसादितं हविर्यस्मिन्बर्हिषि दर्भे दन्ताकर्षणादिना चापलेन दूषिते सति । दूषित्वेति पाठे बर्हिषि विषये दूषणं कृत्वेत्यर्थः मयाऽधिक्षिप्तः संस्तत्क्षणमेवोपरतक्रीडो निश्चल आस्ते ॥ २२ ॥

इति बहुधा प्रलप्योत्थाय बहिर्निर्गत्य तत्खुरखातभूभागोपलम्भसंभ्रान्तहृदय आह । किंवेति । अरे अहो अनया क्षित्या किंवा तप आचरितं तपस्विन्या सभाग्यया । यद्यस्मादियं सविनयस्य कृष्णसारतनयस्य तनुतराः सुभगाश्च शिवतमाश्चाखराश्च खुरा येषु तेषां पदानां तत्रतत्राङ्कितानां पङ्क्तिभिर्द्रविणं मृगस्तेन रहितस्यात एवातुरस्य दुःखितस्य मम द्रविणमार्गं सूचयन्ती सती स्वात्मानं च ताभिः कृतमण्डनं द्विजानां देवयजनं यज्ञभूमिं करोति । "यस्मिन्देशे मृगः कृष्णस्तस्मिन् धर्मान्निबोधत" इति स्मृतेः ॥ २३ ॥

तावदुदिते चन्द्रे मृगं दृष्ट्वा स्वमृगत्वं संभावयन्नाह । अपिस्विदिति ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वृकः शालावृको वा नैकचरो यूथचरो वराहादिरसहायचरो व्याघ्रादिर्वा अपि न भक्षयति सकललोकानां क्षेमो यस्मात्स उदयो यस्य त्रयी वेद आत्मा स्वरूपं यस्य सः सूर्यो भगवान् निम्लोचत्यस्तं गच्छति किलाद्यापि मम मृगवधून्यासः निक्षेपभूतः मृगो नागच्छति हरिण एव राजकुमारः हरिणसंबन्धिकुमारो वा आगत्य मामपि सुखयिष्यतीत्यन्वयः किं कुर्वन् विविधैः रुचिरैर्दर्शनीयैर्मृगदारकविनोदैः स्वीयानां नः असन्तोषं खेदमपनुदन् ॥ १८—२० ॥

सम्भवति चैतदित्याह । क्ष्वेलिकायां स्वेन सह क्रीडायां मृषा यः समाधिस्तेनामीलिते दृशौ येन तं प्रेमसंरम्भेण प्रणयकोपेन पृषज्जलबिन्दुः तद्वदपरुषेण मृदुना विषाणाग्रेण चकितं चकितं पुनः पुनः प्रतिहतं यथा तथा आवृत्य परितो व्यावृत्य लुठति सङ्घट्टयति ॥ २१ ॥

आसादितं हविर्यस्मिन् बर्हिषि दर्भे दूषिते दन्ताकर्षणादिना चापलत्वेन दूषिते सति मयाधिक्षिप्तः सन् भीतः तत्क्षणमेव उपरतरासः निवृत्तक्रीडः अवहितः निश्चलीकृतः करणानामिन्द्रियाणां कलापो येन एवंभूतः ऋषेः कुमारवदास्ते ॥२२॥

इति बहुधा प्रलप्योत्थाय बहिर्निर्गतः सन् खुराघातभूभागोपलम्भसंभ्रान्तहृदय आह । किंवेति । अरे अहो तपस्विन्या सम्भाव्यमानयाऽनया क्षित्या किं तप आचरितं यद्यस्मादियं क्षितिः सविनयस्य कृष्णसारतनयस्य तनुतराः सुभगाश्च शिवतमाश्च खराश्च कठिनाश्च खुराः येषु तेषां पातानां तत्राङ्कितानां पङ्क्तिभिर्द्रविणं मृगस्तेन रहितस्यात एवातुरस्य दुःखितस्य मम द्रविणमार्गं सूचयन्ती सती स्वात्मानं च ताभिः पङ्क्तिभिः कृतमण्डनं स्वर्गापवर्गकामानां द्विजानां यज्ञभूमिं करोति "यस्मिन् देशे मृगः कृष्णस्तस्मिन् धर्मान्निबोधत" इतिस्मृतेः ॥ २३ ॥

उदिते चन्द्रे तस्मिन् मृगं दृष्ट्वा स्वमृगत्वं सम्भावयन्नाह । अपिस्विदिति । सिंहभयान्मृता माता यस्य तं मदाश्रमात्परिभ्रष्टं मृगबालकं कृपणजनवत्सलोऽसौ भगवानुडुपतिश्चन्द्रः कृपयाऽपिस्वित्परिपाति ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

क्षेमेण सुखेन ॥ १७ ॥

नैकचरः अष्टपान्मृगविशेषः ॥ १८ ॥

(१) उपरतरभस इति श्रीविजयध्वजतीर्थपाठः । (२) पातपङ्क्तिभिरिति श्रीवीरराघवाचार्यपाठः । (३) भगवानुडुपइति श्रीविजयध्वजतीर्थपाठः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

निम्लोचत्यस्तं गच्छति मृगवधून्यासः मृगीनिक्षेपलक्षणोऽर्थः ॥ १९ ॥

विविधाश्च रुचिराश्च दर्शनीयाश्च निजाः स्वजातिप्रयुक्ताश्च मृगदारकाणां मृगबालकानां ये विनोदा लीलाविशेषास्तैः ॥२०॥

क्ष्वेलिकया मृगजातिक्रियया नादविशेषक्रियया वा प्रेमसंरम्भेण स्नेहोद्रेकेण प्रणयकोपेन वा सचकितं सभयं पृषतः कृष्णमृगः अपरुषविषाणाग्रेण कोमलशृङ्गमुखेन लुठति परिवर्तयति अभिमुखीकरोतीत्यर्थः उपहन्तीति वा "लुठ उपघात,, इति धातुः लुण्ठतीति पाठे अनुष्ठानालस्यं करोति लुठि आलस्ये ॥ २१ ॥

आसादितं अवरोपितं हविर्यस्मिंस्तत्तथा तस्मिन्वर्हिषि भक्षणादिना दूषिते सति उपालब्धो भर्त्सित उपरतरभसः शान्ताभिनिवेशः अत एवावहितकरणकलापः संवृतसर्वेन्द्रियव्यापारसमूहः ॥ २२ ॥

अनया भूम्या तप आचरितं तत् किमिति शेषः सविनयस्य कृष्णसारतनयस्य तनुतरा अतिशयेनाणवश्च सुभगाः सुन्दराश्च शिवतमाः सुखतमाश्च खराः परुषाश्च खुरा ये तेषां पदानां निक्षेपचिह्नानां पङ्क्तिभिर्द्रविणविधुरवद्दरिद्रवदातुरस्य न केवलं ममोपकरोति किन्तु द्विजानामपीत्याह । आत्मानमिति । कृष्णसारतनयस्य पदपङ्क्तिभिः कृतकौतुकं कृतमङ्गलमात्मानं द्विजानां देवयजनं च करोति इदं प्रलप्योत्थाय बहिर्गत्यापश्यतो हि वचनं "यस्मिन् देशे मृगः कृष्णस्तस्मिन् धर्मान्निबोधत,, इति स्मृतिः ॥ २३ ॥

अधुनेन्दूदयेऽप्यनागतं दृष्ट्वा तत्प्रलापप्रकारमाह । अपिस्विदिति । उडुपश्चन्द्र एनं मृगबालकं परिपालयत्यपि स्विदित्यन्वयः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

देवेन कृपालुना मदिष्टदेवेनैव रक्षितम् ॥ १७ ॥

नैकचरो यूथचरः सूकरादिः एक एव चरति यः क्रूरो व्याघ्रादिर्न भक्षयति किम् ॥ १८ ॥

निम्लोचति सम्प्रत्यस्तं याति सकलजगतामपि क्षेममुदयादेव यस्य सः केवलं ममैव दुर्भगस्याक्षेममिति भावः । अय्यात्मा वेदस्वरूपो वेदप्रवर्त्तको वा केवलमहमेव वेदोक्तदयाधर्मविमुख इति भावः । मृगवध्वा न्यासो निक्षेपभूतः ॥ १९ ॥

प्रेम्णैव तद्गुणामृतकीर्त्तयन् विलपति । अपिस्विदित्यादिना । सुखयति सुखयिष्यति ॥ २० ॥

क्ष्वेलिकायां क्रीडायां मृषासमाधिनेति रे मूढ ! त्वां पुष्यतो मे स्मरणकीर्त्तनादि नित्यकृत्यं न निर्वहति तत्त्वं मया त्यक्तो यथेष्टमितो याहीति मृषैवाकुश्य मृषासमाधिनेति तच्चेष्टितदिदृक्षायाः प्राबल्यात् प्रेमसंरम्भेण प्रणयकोपेन पृषत् जलबिन्दुस्तद्वदपरुषेण मृदुना विषाणाग्रेण लुठति सङ्घट्टयति ॥ २१ ॥

आसादितं हविर्यस्मिन् तस्मिन् बर्हिषि दर्भे दन्तस्पर्शेन दूषिते सति दूषित्वेति पाठे बर्हिषि विषये दूषणं कृत्वा स्थितवतीत्यर्थः मयोपालब्धः आः किमरे करोषीत्यधिक्षिप्तः उपरतक्रीडः अवहितकरणकलापः निश्चलीकृतसर्वेन्द्रियः ॥ २२ ॥

इति बहुधा प्रलप्योत्थाय बहिर्निर्गत्य तत् खुरक्षतभूभागोपलब्ध्या प्रेम्णैवारोपितेन तत्र माहात्म्येन स्वं साधिक्षेपं सम्बोध्य विलपति अरे मन्दभाग्य ! भरत ! वृथा तपस्विन् ! अनया अवन्या किं तप आचरितं तत्तपस्त्वया न तप्तमिति भावः । यद्वा विशेषानुक्त्या अरे चतुर्दशलोका ब्रूत रे ब्रूत युष्मासु मध्ये अनयेति युष्माकमीदृशं तपो नास्तीति भावः । तनुतरे--त्यादिविशेषणैस्तन्माधुर्यास्वादः स्वस्य व्यञ्जितः । द्रविणपदवीं सूचयन्तीति भो दुःखिन् ! भरत ! किं रोदिषि अनयैव खुरक्षुण्णया पदव्या वनं प्रविशन्तं मृगबालकं स्वप्राणधनं प्राप्स्यसीति कृपया मा माश्वासयतीत्यर्थः । आत्मानं स्वं च ताभिः पदपङ्क्तिभिर्मण्डितत्वात् कृतकौतुकं देवयजनं यज्ञस्थलं करोति "यस्मिन्देशे मृगः कृष्णस्तस्मिन् धर्मान्निबोधत,, इति स्मृतेः ॥ २३ ॥

ऊर्ध्वमवलोक्य तत्रोपलब्धे चन्द्रे स्वमृगं सम्भावयन्नाह । अपिस्विदिति । स्वाश्रमात् परिभ्रष्टमिति ममैव पापिष्ठस्यानवधानादिति भावः भगवानिति भगवत्त्वं विना ईदृशं भाग्यं न सम्भवेदिति भावः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शष्पाणि बालतृणानि ॥ १७ ॥

नैकचरः यूथचरः वराहादिः एकचरः व्याघ्रादिः ॥ १८ ॥

सकलजगतः क्षेमो यस्मात्स उदयो यस्य त्रय्यामृषिभिः स्तुत्यर्थं प्रोच्यमानायामात्मा मनो यस्य सः वेदत्रयी आत्मा मूर्तिर्वा यस्य स भगवान् सूर्यः निम्लोचति अस्तं याति मम मृगवधून्यासः मृगभार्ययोपन्यस्तः ॥ १९ ॥

हरिणराजस्य कुमारः विविधरुचिरदर्शनीयैर्निजैर्मृगदारकविनोदैः स्वानामसन्तोषमपनुदन् आगत्य माम् अपिस्वित् सुखयति सुखयिष्यति ॥ २० ॥

क्ष्वेलिकायां बाललीलायां प्रेमसंरम्भेण प्रणयकोपेन चकितचकितः अतिक्षुभितः माम् आवृत्य पृषद्वत् जलबिन्दुवत् अपरुषेण मृदुना विषाणाग्रेण लुठति सङ्घट्टयति ॥ २१ ॥

आसादितं निहितं हविर्यस्मिन् तस्मिन् बर्हिषि दर्भे कथंचिद्दूषिते सति मयोपालब्धः सन् सपद्येव उपरतरासः त्यक्तक्रीडः ॥ २२ ॥

तदन्वेषणे प्रवृत्तस्तत्खुराङ्कितां भूमिं दृष्ट्वाह । किन्त्वेति । यत् यतः सविनयस्य कृष्णसारतनयस्य तनुतराः सुभगाश्च शिवतमाश्च अखराश्च खुरा येषां पदानां तत्र तत्राङ्कितानां पङ्क्तिभिः द्रविणेन धनभूतेन मृगेन रहितस्य अत एवातुरस्य मम द्रविणपदवीं सूचयन्ती स्वात्मानं च ताभिः कृतमङ्गलं द्विजानां यज्ञभूमिं करोति तथाच स्मृतिः "यस्मिन्देशे मृगः कृष्णः तस्मिन् धर्मान्निबोधत" इति ॥ २३ ॥

चन्द्रे मृगं दृष्ट्वाह । अपीति ॥ २४ ॥

किं वाऽऽत्मजविश्लेषज्वरदवदहनशिखाभिरुपतप्यमानहृदयस्थलनलिनीकं मामुपसृतमृगीतनयं शिशिरशान्तानुरागगुणितनिजवदनसलिलामृतमयगभस्तिभिः स्वधयतीति च ॥ २५ ॥

एवमघटमानमनोरथाकुलहृदयो मृगदारकाभासेन स्वारब्धकर्मणा योगारम्भणतो विभ्रंशितः स (१)योगतापसो भगवदाराधनलक्षणाच्च कथमितरथा जात्यन्तर एणकुणक आसङ्गः साक्षान्निःश्रेयसप्रतिपक्षतया प्राक्परित्यक्तदुस्त्यजहृदयाभिजातस्य तस्यैवमन्तरायविहतयोगारम्भणस्य राजर्षेर्भरतस्य तावन्मृगार्भकपोषणपालनप्रीणनलालनानुषङ्गेणाविगणयत आत्मानमहिरिवाखुबिलं दुरतिक्रमः कालः करालरभस आपद्यत ॥ २६ ॥

तदानीमपि पार्श्ववर्तिनमात्मजमिवानुशोचन्तमभिवीक्षमाणो मृग एवाभिनिवेशितमना विसृज्य लोकमिमं सह मृगेण कलेवरं मृतमनु न मृतजन्मानुस्मृतिरितरवन्मृगशरीरमवाप ॥ २७ ॥

तत्रापि ह वा आत्मनो मृगत्वकारणं भगवदाराधनसमीहानुभावेनानुस्मृत्य भृशमनुतप्यमान आह ॥ २८ ॥

भाषाटीका

क्या कल्याण से इहां आवेगा देवतोंने उसकी रक्षा की होगी मैं अपने आश्रमके वनके पास घास चरते हुये उस को देखूंगा ॥ १७ ॥

क्या उसको भेडिया गिदड अथवा दूसरा कोई जनावर इकेला या सब के साथ मिलकर उस बच्चे को खाते न लेगा ॥ १८ ॥

सब संसार के कल्याण करने को उदय होनेवाले भगवान् सूर्यनारायण अस्त होते हैं अब तक भी मृगी का धरोहर सा बच्चा नहीं आया है ॥ १९ ॥

अथवा मैने जो बडे सुकृत किये होंगे तो हरिणराजा-का कुमार अपने जनों के दुःखको दूर करने को नाना प्रकार के मनोहर दर्शनीय अपने मृगबच्चा के मनोहर चेष्टाओंसे मेरेको सुखित करेगा ॥ २० ॥

जब कभी हम खेल करनेको झूंठी समाधि लगाकर नेत्र बन्दकरलेते थे तब वह बडे प्रेमके विश्वास से चकित-सा होकर आता था फिर जलविन्दु सरी के शीतल शींगों के अग्रभाग से मेरेको धीरे कुरेदता था ॥ २१ ॥

जब जिन कुशोंपर हम हविको रखतेथे तिन कुशों को वह जूंठे करदेता था तब हम धमकाते थे तो डरतासराका होकर शीघ्रही खेलको छोडकर सब इन्द्रियों की चेष्टा को छोडकर ऋषिपुत्र सरीका हो रहता था ॥ २२ ॥

अहो इस तपस्विनी पृथिवी ने क्या तपस्या की है जो कि बडे विनय वाले मृगबालक के अतिसूक्ष्म सुन्दर माङ्गलिक कोमल खुरों के चिन्ह की पंक्तियों से मृगरूपी धन-रहित आतुर कृपण मेरे धन मृगकी रक्षा को जनाती हुई पृथिवी चारोंतरफ मृगके कौतुक खुरासे अपने को कौतुकी करके ब्राह्मणों के यज्ञकरनेलायक पवित्र करती है ॥ २३

किं वा यह भगवान् तारापति चन्द्रमा माता जिसकी मरगई है अपने आश्रम से छूटगया है ऐसे मृगबालको देख कर दुःखितों के दयाल होने से सिंहके भयसे इसबच्चे की रक्षा करेंगे क्या ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चन्द्ररश्मिस्पर्शसुखं प्राप्याह । किंवेति । सम्भावनायामात्मजविश्लेषेण ज्वरस्तापः स एव दवदहनस्तस्य ज्वालाभिरुपतप्यमाना हृदयरूपा स्थलनलिनी यस्य जलस्थं पद्मं तापं सोढुं क्षममिति स्थलग्रहणमुपसृतोऽनुगतो मृगीतनयो येन तं मां चन्द्रः स्वधयति शान्तिं गमयति । कैः । शिशिरं च तच्छान्तं च मय्यनुरागेण गुणितं चावर्तितं पुनःपुनः स्रवद्वदनसलिलं तदेवामृतमया गभस्तयस्तैः लोके हि मन्त्रवादिनो वदनसलिलैस्तापं शमयन्तीति प्रसिद्धम् । उपसृत्य मृगीतनय इति पाठे मनोरथान्तरमेतत् उपसृत्य मृगीतनयः किंवा मां स्वधयिष्यतीति । शेषं समानम् ॥ २५ ॥

मृगदारकवदाभासमानेन भगवदाराधनलक्षणात्कर्मणश्च विभ्रंशितः प्रारब्धकर्मत्वे हेतुः । कथमितरथेति । साक्षात्स्व-पुत्रवत्कथमासङ्गः स्यात् पूर्वं परित्यक्ता दुस्त्यजा औरसा येन । अन्तरायेण विहतं योगारम्भणं यस्य । आत्मानमविगणयत आत्मचिन्तामकुर्वतः तावदेव तीव्रवेगः कालो मृत्युसमयश्चापद्यत ॥ २६ ॥

लोकं देहं मृगेण सहितं विसृज्य प्राकृत इव मृगशरीरमवाप । कथम्भूतः । कलेवरं मृतमनु न मृता न विनष्टा पूर्वजन्मानुस्मृतिर्यस्य ॥ २७ ॥

आह स्वचित्ते ॥ २८ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

चन्द्ररश्मिस्पर्शसुखं प्राप्याह । किम्वेति । सम्भावनायामात्मजविश्लेषेण मृगवियोगेन योज्वरस्तापः स एव दहनः तस्य ज्वालाभिरुपतप्यमाना हृदयरूपा स्थलनलिनी यस्य जलस्थं पद्मं तापं सोढुमक्षममिति स्थलग्रहणं उपसृतोऽनुगतः मृगीतनयो

(१)स्वयोगतपस इति श्रीवीरराघवाचार्यपाठः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

येन मां योऽयं चन्द्रः स्वभयति विश्रान्तिं विगमयति कैः शिशिरवच्छान्तं च मय्यनुरागेण गुणितं चावर्तितं च पुनः पुनः स्रवत् यत्सलिलं त एवामृतमया गभस्तयः किरणास्तैः लोके हि मान्त्रिका मुखसलिलैस्तापं शमयन्तीति प्रसिद्धम् उपसृतमृगीतनय इति पाठे मनोरथान्तरमेतत् उपसृतः प्राप्तो मृगीतनयः किं वा स्वभयतीति शेषं सर्वं समानम् ॥ २५ ॥

इत्युक्तरीत्या एवं शब्दोऽनुक्तमनोरथान्तरद्योतकः उक्ता अनुक्ताश्चाघटमानाः ये मनोरथास्तैराकृष्टं हृदयं यस्य स भरतः मृगदारकाभासेन मृगपुत्रव्याजेन प्रारब्धकर्मणामन्तरायभूतेन योगारम्भणतः ध्यानयोगारम्भात्स्वयोगतपसः स्ववर्णाश्रमोचितकर्मयोगरूपात्तपसः भगवदाराधनलक्षणाद्भगवद्भक्तिरूपाश्च तपसः विभ्रंशितो विभ्रष्टोऽभूत् प्रारब्धकर्मत्वे हेतुः कथमितरथेति इतरथा प्रारब्धकर्ममूलत्वाभावे मृगदारकासक्तिः जात्यन्तरेण कुणके साक्षात् स्वपुत्र इव कथमासङ्गः स्यात् श्रेयसः प्रतिपन्नतया मुक्तिविरोधितया पूर्वं परित्यक्ताः दुस्त्यजाः हृदयाभिजाताः औरसा येन तस्यैव पुनरेवंविधेनान्तरायेण विहितो योगारम्भो यस्य तस्य राजर्षेर्भरतस्य मृगार्भकस्य पोषणादिनिमित्तेनानुषङ्गेणात्मानमविगणयतः प्रमत्तस्य तावदेव करालरभसः तीव्रवेगः कालः मृत्युकालः दुरतिक्रमः अवर्जनीयः मूषकबिलं प्रलाहिः सर्प इवापद्यत प्राप्तः ॥ २६ ॥

स भरतस्तदानीमपि मरणसमयेऽपि स्वपार्श्ववर्तिनं मृगमात्मजमिवानुशोचन्तमभिवीक्षमाण आत्मीयाभिमानेन पश्यन् मृगमिवासक्तमना इमं देहं मृगेण सह विसृज्य कलेवरमन्वनुसृत्य अमृता अविनष्टा पूर्वजन्मानुस्मृतिर्यस्य तथाभूतः इतरवत्प्राकृतवन्मृगशरीरमवाप ।

यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय ! सदा तद्भावभावितः ॥

इत्युक्तरीत्या मृगमनुस्मरन्मृगत्वमेवावापेत्यर्थः ॥ २७ ॥

तत्र मृगजन्मन्यात्मनः मृगत्वनिमित्तं पौर्वभवभगवदाराधनानुष्ठानप्रभावेण मृगासङ्ग एवेत्यनुस्मृत्य नितरामनुतप्यमानः आह ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किञ्च रक्षित्वा चाटुकुर्वन्मह्यं प्रयच्छत्यपि क्विदित्याह । एष इति । उपसृतश्चासौ मृगीतनयः उपसृत्य गभस्तिभिर्मां स्वभयति लेढ्यपि क्विदित्यन्वयः शिशिराणि शीतलानि च तानि अनुरागेण गुणितानि बहुलीकृतानि च तानि निजवदननिर्गतसलिलानि तान्येवामृतगभस्तयश्चन्द्ररश्मयस्तैः किं विशिष्टं मामात्मज इवात्मजो मृगीतनयस्तस्य विश्लेषनिमित्तो यो ज्वरः सन्तापः स एव दवदहनः वनाग्निस्तस्य शिखाभिरुपतप्यमानं दह्यमानं हृदयस्थलनलिनं यस्य स तथा तम् ॥ २५ ॥

सङ्कल्पमाह । इतीति इत्यादिप्रलपन् । सः योगतापसो भरतो योगारम्भणतो भगवदाराधनलक्षणात्कर्मणश्च विभ्रंशितः परिमोचित इत्यन्वयः केन मृगदारकरूपेणासमन्ताद्भासत इति तेन स्वारब्धकर्मणा मनुष्यस्यैवमघटमानो मृगे मनोरथः स्नेहविशेषस्तेनाकुलं हृदयं यस्य स तथा इतरथा प्रारब्धकर्माभावे जात्यन्तरेऽसमजातिविलक्षणमृगजातावासङ्गः स्नेहः कथं स्यात् योगो ध्यानं तस्य भरतस्य कथम्भूतस्य साक्षाच्छ्रेयसस्य प्रतिपन्नतया विघ्नत्वेन हेतुना पूर्वपरित्यक्ताद्दुस्त्यकुमशक्या हृदयाभिजाता औरसाः पुत्राः येन स तथा तस्य एवं मृगपोतलालनाद्याकुलचेतसो भरतस्य मरणसमयासत्तिमाह । तस्येति । अन्तरायेण विघ्नेन विहतं योगारम्भणं ध्यानोपक्रमो यस्य स तथा तस्य पोषणादिषु सतानुषङ्गेण निरन्तरस्नेहाभिनिवेशेनात्मानं श्रीहरिं स्वं वा विगणयतो चिन्तयतः करालो रभसो वेगो यस्य स तथा ॥ २६ ॥

इमं लोकं भरतोपाध्युपलक्षितशरीरं मृगेण सह वर्तमानं विसृज्य इतरमृगवन्मृगशरीरमवाप पूर्वकलेवरमनु तस्यानुकूलत्वेन स्मृता जन्मानुस्मृतिर्जातिस्मृतिर्येन स तथा पूर्वदेहतत्कृतकर्मस्मृतिरित्यर्थः ॥ २७ ॥

भगवदाराधनस्य समीहानुष्ठानं तस्य सामर्थ्येन ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

चन्द्रकिरणानां दाहकत्वमनुभूयाहो मदात्मजाविरहे शीतकिरणोऽप्ययमुष्णकिरणो भवति हन्त हन्त स किं मे समयो भविष्यति यत्र स मृगीतनयो भूयोऽपि मामुपैष्यति चन्द्रोऽप्ययं मां शिशिरयिष्यतीत्यभिलषन्नाह । किञ्चेति । उपसृतो मृगीतनयो यं तथाविधं मां चन्द्रोऽयं सुखयति विरहसन्तप्तस्याङ्गस्य सुधाप्लुतीकरणात् सुधावन्तं किं नु करिष्यतीति । "विन्मतोर्लुक्" इति मतुपो लुका रूपं कैः शिशिरश्च तत् शान्तमनुग्रं च मय्यनुरागेण गुणितश्च यद्वदनसलिलं पुनः पुनः स्रवत् तदेवामृतमया गभस्तयस्तैः । लोके हि मान्त्रिका यथा वदनसलिलैस्तापं शमयन्ति तथैवायमपीत्यर्थः उपसृतो मृगीतनय इति पाठे स एव मद्गात्रेषु प्रेम्णा निजमुखस्पर्शेनेत्यर्थः ॥ २५ ॥

मृगदारकमाभासयति प्रकाशयति यत्तेन स्वारब्धकर्मणेति प्रारब्धं हि द्विविधं शोभनमशोभनञ्च तत्राद्यं भक्तप्रियेणापि नयनतीव्राश्रमदानन्यायेन स्वभक्त्युत्कण्ठावर्धनविदग्धेन भगवतैव स्वेच्छयैव प्रारब्धतुल्यत्वात् प्रारब्धमुपपाद्यते यदुदर्को भक्त्युद्रेक एव स्यात्तत् स्वल्पपञ्चरतीनामपि सम्भवेदेव । द्वितीयन्तु प्राचीनप्राकृतकर्ममयमेव । यदुदर्को विषयाभिनिवेश एव स्यात् अत्र तु शोभनेनारब्धेनेति साक्षात् सुशब्द एवोपन्यस्तः योगेन भक्तियोगेनैव हेतुना तापसः सर्वविषयत्यागरूपं तपः कुर्वाणः । अप्यर्थे चकारः । यद्यपि भक्तियोगो बहुविघ्नाकुलो न भवति तदपि भगवदिच्छया भगवदाराधनाद्विभ्रंशित इत्यर्थः ॥ २६ ॥

इतरथेति । भगवदिच्छामयं प्रारब्धं यदि न स्यादित्यर्थः । हृदयाभिजाताः स्वपुत्राः । यद्वा । मृगदारक एवाभासो यस्य तथाभूतेन स्वस्यारब्धकर्मणेति प्रारब्धकर्माभासेनेत्यर्थः । यथा जीवन्मुक्तानामभिमानाभावेऽप्यभिमानाभासस्तथैव जातरतिभक्तानां प्रारब्धाभावेऽपि प्रारब्धाभासः । अथवा मृगदारकाभासेन निकृष्टमृगदारकेण विभ्रंशितः कीदृशेन शोभनमारब्धं कर्म यस्य तेन तस्य मृगदारकस्य सुखप्रारब्धवशादेव भरतस्तं पालयामास ।

अहो कष्टं भ्रष्टोऽहमात्मवतामनुपथाद्यद्विमुक्तसमस्तसङ्गस्य विविक्तपुण्यारण्यशरणस्यात्मवत आत्मनि सर्वेषामात्मनां भगवति वासुदेवे तदनुश्रवणमनननसंकीर्तनाराधनानुस्मरणाभियोगेनाशून्यसकलयामेन कालेन समावेशितं समाहितं कार्त्स्न्येन मनस्तत्तु पुनर्ममाबुधस्यारान्मृगसुतमनु परिसुस्राव ॥२९॥

इत्येवं निगूढनिर्वेदो विसृज्य मृगीं मातरं पुनर्भगवत्क्षेत्रमुपशमशीलमुनिगणदयितं शालग्रामं पुलस्त्यपुलहाश्रमं कालञ्जरात्प्रत्याजगाम ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

इतरथा यदि मृगस्य सुखप्रारब्धं न स्यात्तदा तस्यापि तत् पिपालयिषा न स्यादित्यर्थः । भरतस्य विभ्रंशस्तु "यथाधनो लब्धधने विनष्टे तच्चिन्तयान्यन्निभृतो न वेद" इति भगवदुक्त्यन्यायेन मृगजन्मनि ब्राह्मणजन्मनि च भक्त्युत्कण्ठा वर्द्धनार्थो भगवतैव निर्मितः । आत्मानमविगणयतः । आत्मचिन्तामकुर्वतः आखुबिलमहिरिव न भरतं कालो मृत्युः अनुशोचन्तं मृगं लोकं देहं मृगेण सहितं विसृज्य मृगशरीरमवाप । कलेवरं मृतमनु न मृता न विनष्टा पूर्वजन्मानुस्मृतिर्यस्य सः इतरवदितरः प्राकृतः कर्मी तद्वदिति । भरतस्तु कर्मातीत इत्यत एव तस्य प्रारब्धाभावः प्राक् समर्थितः ॥ २७ ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किम्वा उडुपतिः आत्मजः मम पुत्रो मृगस्तद्विश्लेषेण वियोगेन यो ज्वरस्तापः स एव दवदहनो दवाग्निस्तस्य ज्वालाभिरुपतप्यमाना हृदयात्मिका स्थलनलिनी यस्य तमुपसृतः अनिवृतः मृगीसुतो येन तं शिशिरं शीतलं च तच्छान्तमुखेनहरं च मदनुरागेण गुम्फितं निरन्तरं प्रवर्तितं यद्वदनसलिलं तदेवामृतमयाः गभस्तयः किरणास्तैः मां स्वधयति शान्तिं गमयति ॥ २५ ॥

स भरतः एवम्भूतैरघटमानैर्मनोरथैराकुलं हृदयं यस्य सः योगतापसः योगी ज्ञानयोगभक्तियोगौ तल्लाभार्थं यत्तपः तीर्थवासभूशयनफलाहारदेहशोषणादिरूपं तद्विशिष्टः मृगदारकाभासेन मृगबालकवदाभासमानेन प्रारब्धकर्मणा योगारम्भणातः योगयोः ज्ञानयोगभक्तियोगयोः आरम्भणातस्तदुपक्रमणाभूतात्तपसः भगवदाराधनलक्षणात् तदर्चनवन्दनरूपात्साधनभक्तियोगाच्च विभ्रंशितः इतरथा मृगदारकव्याजेन प्रारब्धकर्मणा स्वधर्मनिष्ठाभ्रंशानङ्गीकारे प्राक्परित्यक्ता दुस्त्यजा हृदयाभिजाताः येन तस्य राजर्षेः साक्षात् पुत्रवत् जात्यन्तरे एणकुणके श्रेयसो मोक्षस्य प्रतिपक्षतया विरोधित्वेन आसङ्गः आसक्तिः कथं घटेतेति शेषः एवमुक्तप्रकारेणान्तरायेण विहतं योगारम्भणं यस्य तस्य राजर्षेः मृगार्भकपोषणाद्यनुषङ्गेण आत्मानमविगणयतः आत्मनः कृतार्थताचिन्तामकुर्वतः तावदेव दुरतिक्रमो दुर्लङ्घ्यः करालरभसस्तीव्रवेगः कालः मृत्युसमयश्चापद्यत ॥ २६ ॥

इदानीं मृत्युकालेऽपि अनुशोचन्तमात्मजमिव पार्श्ववर्तिनं मृगमभिवीक्षमाणाः इमं लोकं लोक्यन्ते कर्मफलान्यनेनेति देहं मृगेन सहितं विसृज्य मृगे एवाभिनिवेशितमना मृगशरीरमवाप ।

यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय ! सदा तद्भावभावितः इति

श्रीमुखवचनात् किन्तु भगवदाराधनप्रभावात् कलेवरं मृतमनु न मृता न विलुप्ता पूर्वजन्मानुस्मृतिर्यस्य सः ॥ २७ ॥

आह स्वचित्ते एव ॥ २८ ॥

भाषाटीका ।

अथवा पुत्रके वियोगसे जो ज्वर उसके अग्नी सरीका तिसकी शिखाओं से तपायमान है हृदयरूपस्थल कमल जिसका तथा आश्रय किया है मृगीके तनयको जिसने तिस मेरेको शीतल शान्त अनुराग युक्त निज मुखके अमृत रूप किरणों से मेरे को अमृत से चन्द्रमा तृप्त करेगा क्या ॥ २५ ॥

इस प्रकार से मनके सन्तुष्ट न होने से हृदय आकुल होगया फिर मृगपुत्रके स्वरूप वाले प्रारब्ध कर्मसे योगारम्भसे भ्रष्ट होगये योगयुक्त तापस वे भरतजी भगवान् के आराधनसे भ्रष्ट होगये यदि प्रारब्धसे न होता तो मोक्षके विरोधि जानकर जिनने पहिले निज पुत्रों को छोड दिये थे तिनको दूसरे जातके मृगबालक में क्यों आसक्ति होती तब इस प्रकारसे उन राजर्षि भरतजी के विघ्नसे योगारम्भ भ्रष्ट होने से मृगके बालक के पोषण पालन प्रीणन लालन की आसक्ति से आत्माको न गिननेसे जैसे मूंसेके बिलमे सर्प आजावे तैसे वडे विकराल वेगवाला काल जिसको कि कोइ अति क्रमण नहि कर सकता है सो आगया ॥ २६ ॥

तिस समयपर भी पास में बैठकर शोचते हुये पुत्रसरीके उस मृगबालक को देखते हुये भरतजी मृगही में मन को प्रवेश करने से मृग के साथ इस शरीर को छोडकर शरीर के छूटने से भी स्मृति के न छूटने से भगवद्विमुख सरीके मृगशरीर को प्राप्त होगये ॥ २७ ॥

तिस मृगजन्म में भी पहिले भगवान् की आराधना के प्रभाव से अपने मृगजन्म के कारण को स्मरण करके वडा अनुताप करते हुये यह वचन बोले ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अहो कष्टं धीराणां मार्गाद्भ्रष्टोऽहम् तदेवाह । यद्यतो विमुक्ताः समस्ताः सङ्गा येन विविक्तं पुण्यारण्यं शरणं यस्य आत्मवतो धीरस्य मम मनः सर्वेषां भूतानामात्मनि वासुदेवे समावेशितं समाहितं च निश्चलं तदाराद्दूरादेव सुस्राव गलितं निःसृतम् । केन समावेशितम् । तस्यानुश्रवणादिष्वभियोगेनाभिनिवेशेनाशून्याः सकला यामा यस्मिंस्तेन कालेन ॥२९॥

निगूढोऽनाविष्कृतो निर्वेदो येन शालवृक्षोपलक्षितं ग्रामम् कालञ्जराद्यत्र हरिणो जातस्तस्मात्पर्वतात् ॥ ३० ॥

तस्मिन्नपि कालं प्रतीक्षमाणः सङ्गाच्च भृशमुद्विग्न आत्मसहचरः शुष्कपर्णतृणवीरुधा वर्तमानो मृगत्वनिमित्तावसानमेव गणयन्मृगशरीरं तीर्थोदकक्लिन्नमुत्ससर्ज ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
पारमहंस्यां संहितायां वैयासिक्याम्
भरतचरिते अष्टमोऽध्यायः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मैव सहचरो यस्य एकाकी प्रतीक्षणस्यैव प्रपञ्चः मृगत्वनिमित्तेति । तीर्थोदकेन क्लिन्नमार्द्रमर्धोदकस्थमित्यर्थः ॥३१॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह । अहो इति । आत्मविदां ज्ञानिनामनुपथान्मार्गानुसरणादहं भ्रष्टः अहो कष्टमिति खेदं प्राप्तस्तमेवाह । यद्यस्मात्त्यक्ताः समस्ता देहतदनुबन्धिसङ्गा येन विविक्तं निर्जनं पुण्यारण्यं तदेव शरणं गृहं यस्य आत्मवतः जितेन्द्रियस्य मम सर्वेषां भूतानामन्तरात्मभूते भगवति वासुदेवे तस्य भगवतः अनुश्रवणाद्यभिनिवेशेनाशून्याः सफला यामा यस्मिंस्तेन कालेन सम्यगावेशितं कार्त्स्न्येन सर्वविषयेभ्यः समाहितं प्रत्याहृतं यन्मनस्तदेव पुनरधुना रागान्मृगसङ्गादबुधस्य मम मृगसुतमनुसृत्य परितः कार्त्स्न्येन योगात् सुस्राव भ्रंशितम् ॥ २९ ॥

इत्येवं निगूढः अनाविष्कृतो निर्वेदो येन सः मातरं मृगीं हरिणीं विसृज्य उपशमशीलानां दयितं प्रियं भगवदभिव्यक्तिस्थानं शालग्रामाख्यं पुलहाश्रमं प्रतिकालंजराख्यात्स्वोत्पत्तिस्थानात्पर्वतादाजगाम ॥ ३० ॥

तस्मिन्पुलहाश्रमे आत्मैव सहचरः सहायो यस्य एकाकी सन्नल्पं कालं मृगदेहावसानकालं प्रतीक्षमाणः सङ्गात्कस्यचिदपि सङ्गादितरां भीतः शुष्कपर्णादिना आहारेण वर्तमानः कालं नयन्नात्मनो मृगत्वनिमित्तस्य प्रारब्धस्यावसानमेव गणयन् तीर्थोदके क्लिन्नमार्द्रम् अर्धोदकस्थितं मृगशरीरमुत्ससर्ज तत्याज ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किमाह । अहो इति । किं कष्टं तदाह । भ्रष्ट इति । आत्मवत्तानुपथात् आत्मा स्वामी ममास्तीति भाववन्त आत्मवन्तः परमात्मज्ञानिन इत्यर्थः तेषां समूहः आत्मवत्ता जनताशब्दवत्तस्यानुपथादनुगमनलक्षणमार्गात् आत्मास्यास्तीत्यात्मवान् तस्य भावः आत्मवत्ता तस्यानुपथादनुसरणात् "पथगतौ" इति धातोः भ्रष्टः आलम्बं मुक्त्वाधः पतितः कुत एतादिति तत्राह । यदिति । सर्वेषामात्मनां चेतनानामात्मनि अन्तर्यामिणि वासुदेवे भगवति कार्त्स्न्येन कालेन समावेशितं समाहितं सन्निधाय स्थिरीकृतं यन्मम मनः पुनस्तदेव मम मनः रागान्मृगसुतमनुसुस्रावानुसृतमभूदित्यन्वयः तस्मादिति शेषः विविक्तं च तत्पुण्यसाधनं च तत् अरण्यं विविक्तपुण्यारण्यं तदेव शरणं यस्य सः तथा तस्यात्मवतो बुद्धिमतः कथं कार्त्स्न्येनेति विशेषणं सङ्गच्छते क्षणार्धमन्यप्रसङ्गसम्भवादिति तत्राह । तदिति । तस्य वासुदेवस्यानुश्रवणादिषु योऽभियोग आग्रहलक्षणः प्रयत्नस्तेनाशून्या अविनाभूताः सफलाः सकला यामाः यस्मिन्सः तथा तेन ॥ २९ ॥

निगूढनिर्वेदोऽन्तर्गतवैराग्यः दयितं प्रियं कालंजराद्रिरेः ॥३०॥

आत्मसहचर एकाकी मृगत्वनिमित्तस्य दुष्कर्मणः प्रारब्धस्यावसानं नाशमेव गणयंश्चिन्तयन्संख्यां कुर्वन्निति वा क्लिन्नमार्द्रमिति ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।
इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आत्मवतो धीरस्य आत्मनां जीवानामात्मनि परमात्मनि तदनुश्रवणादीनामभियोगोऽभिग्रहणं तेन समाहितं निश्चलं यन्मनस्तत् सुस्राव अधः पपात ॥ २९ ॥

कालञ्जरात् स्वजन्मभूमिपर्वतात् शालग्रामं शालग्रामाख्यं क्षेत्रम् ॥ ३०--३१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमस्याष्टमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अनुपथात् योगमार्गात् अहो कष्टमहं भ्रष्टः तत्प्रपञ्चयति । यदिति । यद्यतः विमुक्ताः समस्ताः सङ्गा येन तस्य विविक्तं ग्राम्यजनशून्यं पुण्यारण्यं तदेव शरणं गृहं यस्य आत्मा परमात्मोपास्यत्वेन विद्यते यस्य तस्य मम मनः सर्वेषां चित्पदार्थानामात्मनि सर्वात्मनि वासुदेवे समावेशितं समाहितं निश्चलं च सत् आराद्दूरादेव सुस्राव पद्मपत्राद्यथा जलबिन्दुः

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दूरान्निःसृतं भवति केन समावेशितं तस्य वासुदेवस्य अनुश्रवणादिष्वभियोगोऽभिनिवेशस्तेन अशून्याः सकला यामा यस्मिन् तेन कालेन ॥ २९ ॥

इत्येवं नितरां गूढो गुप्तो निर्वेदो यस्य सः कालंजरात् स्वोत्पत्तिस्थानात् गिरेः शालग्रामाख्यं भगवत्क्षेत्रं पुनराजगाम ॥ ३० ॥

तस्मिन् भगवत्क्षेत्रे आत्मैव सहचरो यस्य सः कालं मृगदेहभोगकालं प्रतीक्षमाणः तदेव विवृणोति । मृगत्वनिमित्तावसानं गणयन्निति तदवसाने तीर्थोदकेन क्लिन्नमार्द्रं तीर्थोदके स्नानं कृत्वेत्यर्थः मृगशरीरमुत्ससर्ज ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
अष्टमाध्यायार्थप्रकाशः ॥ ८ ॥

भाषाटीका ।

अहो बडी खेदकी वात है जो कि मै आत्मज्ञानियों के मार्गसे भ्रष्ट होगया मैंनें सबकी आसक्ति छोडिदी थी एकान्त पुण्यवनमे वास करता था आत्मज्ञानी था सब आत्माओं के आत्मा भगवान् वासुदेव मे उनके श्रवण मनन कीर्तन आराधन अनुस्मरण के अभि निवेश से किसी वखत खाली न रखने से सवप्रकार से समर्पित जो मेरे मूर्खका मन फिर भी शीघ्रही मृगसुतके पीछे नष्ट होगया ॥ २९ ॥

इस प्रकार से अत्यन्त वैराग्य होने से माता मृगीको छोडकर शान्त शीलवाले मुनिगणों का प्रिय भगवत् क्षेत्र पुलह पुलस्त्याश्रम शालग्राम क्षेत्रेको कालंजर पर्वत से मृग भरतजी चले गये ॥ ३० ॥

तिस क्षेत्रमें भी सङ्गसे अति उद्वेग को प्राप्त होकर केवल आत्माके साथी होकर कालकी प्रतीक्षा करके सूखे पत्ते घास लता इनों से तृप्ति करके मृग पने के समाप्ति को गिनते हुये तीर्थों के जलमे भीजे हुये मृगशरीर को त्याग दिया ॥ ३१ ॥

इति श्रीभागवत पञ्चमस्कन्ध अष्टमाध्यायका
भाषानुवाद लक्ष्मणाचार्यकृत
समाप्त ॥ ८ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे अष्टमोऽध्यायः समाप्तः ॥ ८ ॥

नवमोऽध्यायः ।

श्रीशुक उवाच ।

अथ कस्यचिद्द्विजवरस्याङ्गिरःप्रवरस्य शमदमतपःस्वाध्यायाध्ययनत्यागसन्तोषतितिक्षाप्रश्रयविद्याऽनसूयात्मज्ञानानन्दयुक्तस्यात्मसदृशश्रुतशीलाचाररूपौदार्यगुणा नव सोदर्या अङ्गजा बभूवुर्मिथुनं च यवीयस्यां भार्यायाम् ॥ १ ॥

यस्तु तत्र पुमांस्तं परमभागवतं राजर्षिप्रवरं भरतमुत्सृष्टमृगशरीरं चरमशरीरेण विप्रत्वं गतमाहुः ॥ २ ॥

तत्रापि स्वजनसङ्गाच्च भृशमुद्विजमानो भगवतः कर्मबन्धविध्वंसनश्रवणस्मरणगुणविवरणचरणारविन्दयुगलं मनसा विदधदात्मनः प्रतिघातमाशङ्कमानो भगवदनुग्रहेणानुस्मृतस्वपूर्वजन्मावलिरात्मानमुन्मत्तजडान्धबधिरस्वरूपेण दर्शयामास लोकस्य ॥ ३ ॥

तस्यापि ह वा आत्मजस्य विप्रः पुत्रस्नेहानुबद्धमना आसमावर्तनात्संस्कारान् यथोपदेशं विदधान उपनीतस्य च पुनः शौचाचमनादीन्कर्मनियमाननभिप्रेतानपि समशिक्षयत् अनुशिष्टेन हि भाव्यं पितुः पुत्रेणेति ॥ ४ ॥

स चापि तदु ह पितृसन्निधावेवासध्रीचीनमिव स्म करोति छन्दांस्यध्यापयिष्यन् सह व्याहृतिभिः सप्रणवशिरस्त्रिपदीं सावित्रीं ग्रैष्मवासन्तिकान् मासानधीयानमप्यसमवेतरूपं ग्राहयामास ॥ ५ ॥

एवं स्वतनुज आत्मन्यनुरागावेशितचित्तः शौचाध्ययनव्रतनियमगुर्वनलशुश्रूषणाद्यौपकुर्वाणककर्माण्यनभियुक्तान्यपि समनुशिष्टेन भाव्यमित्यसदाग्रहः पुत्रमनुशास्य स्वयं तावदनधिगतमनोरथः कालेनाप्रमत्तेन स्वयं गृह एव प्रमत्त उपसंहृतः ॥ ६ ॥

अथ यवीयसी द्विजसती स्वगर्भजातं मिथुनं सपत्न्या उपन्यस्य स्वयमनुसंस्थया पतिलोकमगात् ॥७॥

पितर्युपरते भ्रातर एनमतत्प्रभावविदस्त्रय्यां विद्यायामेव पर्यवसितमतयो न परविद्यायाम् जडमतिरिति भ्रातुरनुशासननिर्बन्धान्न्यवृत्सन्त ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नवमे जडविप्रत्वे तस्य रागाद्यभावतः ।
भद्रकालीपशुत्वेऽपि निर्विकारत्वमीर्यते ॥ १ ॥
पितुः प्राप्तात्मविज्ञानो भरतो मृगतां गतः ।
प्रारब्धकर्मवेगेन तदन्ते जडविप्रताम् ॥ २ ॥

आङ्गिरसगोत्रजानां प्रवरस्य श्रेष्ठस्य शमादियुक्तस्य । त्यागोऽ आतिथ्यादिषु धोऽन्नदानादि विद्या कर्मविद्या आत्मज्ञानं देहादिव्यतिरिक्तमात्मज्ञानमानन्दो धर्मसंपत्तिजः आत्मना सदृशाः श्रुताद्यो गुणा येषां ते समानोदरा नव पुत्रा बभूवुः यवीयस्यां कनिष्ठायां च मिथुनं स्त्रीपुरुषयुग्मम् ॥ १ ॥

उत्सृष्टं मृगशरीरं येन तं "शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायत„इति स्मृतेः ॥ २ ॥

तत्रापि चान्यसङ्गादात्मनो भ्रंशमाशङ्कमानश्चात्मानमुन्मत्तादिरूपेण दर्शयामासेत्यन्वयः किं कुर्वन् कर्मबन्धविध्वंसनं श्रवणं स्मरणं गुणानां विवरणं कथनञ्च यस्य तत् भगवतश्चरणारविन्दयुगलं मनसा विशेषेण धारयन् प्रतिघातशङ्कायां हेतुः अनुस्मृता स्वीयपूर्वजन्मनामावलिः परम्परा येन सः ॥ ३ ॥

पुत्रस्नेहेऽनुबद्धं मनो यस्य जडस्य गार्हस्थ्यानधिकारात्समावर्तनान्तान् संस्कान् विदधानस्तमुपनीयोपनीतस्य पुनः शौचा-

श्रीधरस्वामिकृतभावार्थदीपिका ।

दींस्तस्यानभिप्रेतानपि शिक्षितवान् । तत्र हेतुः । अनुशिष्टेन हि भाव्यं पितुः सकाशात्पुत्रेणेति ॥ ४ ॥

सोऽपि च पितुः शिक्षानिर्बन्धनिवृत्तये असध्रीचीनमसमीचीनमिव करोति स्म उपाकरणवेदव्रताद्यनन्तरं श्रावणादिमासेषु वेदानध्यापयिष्यन्नादौ तावद्व्याहृतिभिः सह प्रणवशिरःसहितां त्रिपदीं चैत्रादिचतुरो मासानधीयानमप्यसमवेतरूपं यथा भवत्येवं ग्राहयामास तावतापि कालेन स्वरानुपूर्व्या वियुक्तं व्याहृत्यादि तस्य नागतमित्यर्थः ॥ ५ ॥

आत्मभूते स्वतनुजेऽनुरागेणावेशितं चित्तं येन शौचादीनि यान्यौपकुर्वाणकस्य सावधिब्रह्मचर्यवतः कर्माणि तेनानभियुक्तान्यनादृतान्यपि तं पुत्रं प्रत्यनुशास्याप्यप्राप्तपुत्रपाण्डित्यमनोरथः स्वयं कालेनोपसंहृतो मृत इत्यर्थः । अनुशासननिर्बन्धं पुनस्तमेव हेतुमाह । अनुशिष्टेन भाव्यमित्यसत्प्रयोग्य आग्रहो यस्य ॥६॥

सपत्न्यै समर्प्य । अनुसंस्थयाऽनुमरणेन । सप्तम्यन्तपाठोऽप्ययमेवार्थः ॥ ७ ॥

न्यवृत्सन्त निवर्तितुमैच्छन् । निवृत्ता इत्यर्थः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमारब्धभगवद्भक्तियोगस्यापि भरतस्य प्रारब्धकर्मात्तमृगासक्त्या मृगत्वापत्तिं प्रारब्धकर्मावसाने मृगत्वनिवृत्तिं चाभिधायेदानीं "नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।

स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् इति ।
नहि कल्याणकृत्कश्चिद् दुर्गतिं तात ! गच्छति ।
प्राप्य पुण्यकृतांल्लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ।
अथवा योगिनामेव कुले भवति धीमताम् ।

इत्युक्तरीत्या तस्य विशिष्टकुलप्रसूतिं देहादिष्वनादरं ततो मुक्तिं चाभिधत्ते । अथेत्यादिना । अथ मृगशरीरत्यागानन्तरमाङ्गिरसस्य यवीयस्यां कनिष्ठायां भार्यायां यन्मिथुनं स्त्रीपुंसयुग्मं समजायत तत्र मिथुने यस्तु पुमान् तं परमभागवतं राजर्षिप्रवरमुत्सृष्टं मृगशरीरं येन तं चरमशरीरेण विप्रत्वं गतमाहुरित्यन्वयः आङ्गिरसप्रवरं विशिनष्टि । द्विजश्रेष्ठस्याङ्गिरसगोत्रोद्भवानां मध्ये प्रवरस्य शमादियुक्तस्य तत्र शमदमावन्तर्बाह्येन्द्रियनिग्रहौ तपोऽनशनादि स्वाध्यायोऽध्ययनं वेदाध्ययनं त्यागो दानं सन्तोषो दैवाल्लब्धेन तितिक्षा द्वन्द्वसहिष्णुता प्रश्रयो विनयः विद्या शास्त्रजन्यज्ञानं अनसूया परेषु दोषानाविष्करणमात्मज्ञानं ज्ञानयोगः आनन्दो ब्रह्मानन्दानुभवरूपो भक्तियोगः आत्मना स्वेन स्वसदृशाः श्रुतादयः गुणा येषां ते श्रुतं वेदार्थश्रवणं नव सोदरा अङ्गजा आत्मजा बभूवुः ज्येष्ठायां भार्यायामिति शेषः ॥ १ ॥ २ ॥

तत्रापि विप्रजन्मन्यपि स्वजनसङ्गादात्मनः प्रतिघातं भ्रंशमाशङ्कमानस्तत्र हेतुः भगवदनुग्रहेणैवानुस्मृता स्वीया पूर्वजन्मनामावलिः परम्परा येन सः आत्मानमुन्मत्तादिरूपेण लोकस्य दर्शयामास किं कुर्वन् कर्मबन्धविध्वंसनं श्रवणस्मरणं गुणानां विवरणं कथनं यस्य तत्कर्मबन्धविध्वंसनसमर्थश्रवणादियुक्तमित्यर्थः एवंविधं भगवतश्चरणारविन्दं मनसा विदधानः विशेषेण धारयन् ॥ ३ ॥

स विप्रः आङ्गिरसस्तस्य जडादिवेषस्य पुत्रस्य पुत्रस्नेहनानुबद्धमासक्तं मनो यस्य तथाभूतः सन् समावर्तनं स्नातकं तत्पर्यन्तान् संयतान् संस्कारान् गर्भाधानादीन् यथाविधिकुर्वाण उपनीतस्य तस्यानभिप्रेतान् पूर्ववासनयावगतत्वात् शिक्षणीयत्वेनानभिप्रेतानपि शौचाचमनादीन् कर्मनियमान्नित्यनैमित्तिकादिभेदेन नियतान् समशिक्षयत् शिक्षायां हेतुमाह । अनुशिष्टेनेति । पितुः सकाशादनुशिष्टेन विविच्य ज्ञापितेनैव पुत्रेण भवितव्यमितीति बुद्ध्येत्यर्थः ॥ ४ ॥

सोऽपि च पितुः शिक्षानिर्बन्धनिवृत्तये तत्सन्निधावसध्रीचीनमसमीचीनमिव करोति छन्दांस्यध्यापयिष्यन् "श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि । युक्तश्छन्दांस्यधीयीतमासान्विप्रोऽर्धपञ्चमान्"इत्युक्तरीत्या वेदानध्यापयिष्यन् तावदादौ व्याहृतिभिः सह प्रणवशिरःसहितां त्रिपदीं सावित्रीं गायत्रीं व्याहृतयो भूरादयः प्रणवमोङ्कारः शिरः ओमापोज्योतिरित्यादि एवंभूतां सावित्रीं ग्रैष्मवासन्तिकान्मासांश्चतुरो मासानधीयानमप्यध्ययनं कुर्वाणमपि पुत्रमसमवेतरूपं स्वरादिगायत्र्यनुपूर्व्या वियुक्तं न भवति यथा तथा ग्राहयामास तावता कालेनापि स्वरानुपूर्व्या वियुक्तव्याहृतिसहिता गायत्री तस्य दृढा नाभूदित्यर्थः ॥ ५ ॥

एवं स्वात्मजे आत्मनि"आत्मा वै पुत्रनामासि"इति श्रुत्युक्तरीत्या पुत्ररूपे आत्मन्यनुरागेणावेशितमासञ्जितं चित्तं येन सः शौचादीन्यौपकुर्वाणस्य सावधिब्रह्मचर्यवतो यानि कर्माणि उपकुर्वाणो गुरुशुश्रूषादिना वेदाध्ययनादि कुर्वाणः ब्रह्मचारी शौचं स्नानादिजन्या शुद्धिः व्रतानि काण्डव्रतादीनि तान्यभियुक्तानप्यविस्मृतवेदस्य तस्याध्ययनानपेक्षत्वादध्यापनाङ्गानि कर्माण्यनुपयुक्तानीत्यर्थः सम्यगनुशिष्टेन पुत्रेण भाव्यमित्यसदाग्रहः दुरभिमानवान् पुत्रमनुशास्यापि शिक्षित्वापि अनधिगतः मनोरथः पुत्रवैदुष्यरूपो येन सः तावदेवाप्रमत्तेन कालेन मृत्युना स्वयं गृहे प्रमत्तः सन्नुपसंहृतः मृत इत्यर्थः ॥ ६ ॥

अथ संहृत्यनन्तरं यवीयसी कनिष्ठा द्विजसती द्विजभार्या स्वगर्भजातं मिथुनं सपत्न्या उपसमीपे निधाय सपत्न्यधीनं कृत्वा स्वयमनुसंस्थया अनुसरणप्रक्रियया पतिलोकमगात्प्राप्तवती ॥७॥

पितर्युपरते मृते सति भ्रातरो नव एनं जडमतिरिति बुद्ध्याऽनुशासनरूपान्निर्बन्धान्न्यवृत्सन्त निवर्तितुमैच्छन् शिक्षां नाकुर्वन्नित्यर्थः जडमतिरित्यत्रहेतुंवदन्विशिनष्टि । अतत्प्रभावविदस्तस्य भ्रातुः प्रभावमजानन्तः तत्रापि हेतुः त्रय्यामेव विद्यायां कर्मावबोधात्मककेवलवेदविद्यायामेव पर्यवसितमतयः न ब्रह्मविद्यायां वेदान्तविद्यायां पर्यवसितमतयः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रायो वैराग्यसाधनसामग्रीसंपन्नस्यापि ब्राह्मणशरीरस्य सतः पुरुषस्य ज्ञानान्मुक्तिरित्यभिप्रायोऽस्मिन्नध्याये निरूप्यते । तदर्थमु-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

त्यक्तज्ञानस्यापि भरतस्य विप्रतनुत्वप्राप्तिमाह । अथेति । अथ मृगशरीरोत्सर्जनानन्तरं कल्याणकरभरतकथोच्यत इति वा त्यागो दानं देवतामुद्दिश्य द्रव्यत्यागलक्षणो यज्ञो वा सन्तोषो यदृच्छालाभेनालं बुद्धिः शमाद्यात्मज्ञानान्तं तैर्य आनन्दस्तेन युक्तस्य शमादीनामानन्देन समृद्ध्या युतस्येति वा आत्मनः पितुर्गुणा-सदृशश्रुतादिगुणा येषां ते तथा सोदर्या अङ्गजाः एकस्या मातुः उदरजातत्वात् सोदर्याः अङ्गजाः पुत्राः ॥ १ ॥

उत्सृष्टं मृगशरीरं येन स तथा चरमशरीरेणान्त्यदेहेन ॥ २ ॥

तत्र विप्रजन्मन्यपि लोकस्यात्मानमुन्मत्तादिरूपेण दर्शयामासेत्यन्वयः उद्विजमानः स्वस्थानप्रच्युतिरिति बिभ्यतः गुणाविवरणं व्याख्यानं विशेषेण दधतः आत्मनः स्वस्य श्रवणादेः प्रतिघातं विघ्नमाशंसमानः निरूपयन् अनुस्मृता स्वस्य पूर्वजन्मनामावलिः परम्परा येन स तथा ॥ ३ ॥

स विप्रः पिता तस्यात्मजस्यापि लोकविद्विष्टस्यापि समावर्तनपर्यन्तं सतः संस्कारान् विप्रजातिविहितान् जातकर्मादीन्यथोपदेशं विदधानः कुर्वाणः पुनरुपनीतस्य शौचाचमनादीन् कर्मनियमाननभीष्टानपि समशिक्षयदित्यन्वयः अनभिप्रेताश्चेत्किमित्यशिक्षयदिति तत्राह । अनुशिष्टेनेति । हवा इत्येतौ भरतस्यापरोक्षज्ञानित्वेन कामचारो न दोषायेति सूचयतः अत एवासदाग्रह इत्युक्तम् ॥ ४ ॥

यत्पित्रा शिक्षितं तदेव सध्रीचीनं समीचीनं रमणीयमिव किञ्चिदन्यथा इत्यनेन अतीतानागतज्ञानी त्रैलोक्योद्धरणक्षमः इत्यादि स्मार्तन्यायमनुसन्दधान इवेति दर्शयति । सह प्रणवेन शिरसा त्रिपदी सप्रणवशिरस्त्रिपदी तामसमवेतरूपं असमञ्जसरूपं यथा तथा छन्दांसि वेदान् ॥ ५ ॥

"आत्मा वै पुत्रनामासि,, इति श्रुतेरात्मनीति व्यपदेशः औपकुर्वाणकानि उपकुर्वाणयोग्यानि उपकुर्वाणो विवाहः भिक्षाटनं वा अतदभियुक्तानि तस्यानपेक्षितानि एवमादीन्यपि कर्माणि ग्राहयन् पुत्रमशिक्षयदित्यन्वयः अनागतमनोरथः अप्राप्तनिजाभिप्रायः उपसंहृतो मृतोऽभूत् ॥ ६ ॥

अनुसंस्थया अनुमरणेन अग्निप्रवेशलक्षणेन त्रय्यां अग्निष्टोमेन स्वर्गकामो यजेतेत्याद्यायां कर्मप्रतिपादिकायां पर्यवसितमतयः पुरुषार्थबुद्धयः "ब्रह्मविदाप्नोति परं तमेवं विद्वानमृत इह भवति,, इत्याद्यायां न निष्णातमतयः अनुशासननिर्बन्धाच्छिक्षालक्षणाग्रहात् न्यवृत्सन्त निवर्तितुमैच्छन् ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भक्तत्वादेवमात्मनो भक्तिप्रतिघातमाशङ्कमानः ॥ १ ॥ २ ॥

स्वजनसङ्गाच्च भृशमुद्विजमान इत्यधिकं चान्यत्र नास्ति स्वाम्यसम्मतञ्च दृश्यते । व्यवधानेन योजितत्वात् ॥ ३ ॥

अनुशिष्टेन हि भाव्यं पितुः पुत्रेणेतीत्यस्य पितुर्वाक्यस्य तस्माद्धयमनुशिष्टः कर्त्तव्यः । व्यतिरेकेतु स्वयं दोषावहः स्यादिति तात्पर्यम् ॥ ४——७ ॥

पितर्य्युपरत इति । एवं जडमतिरिति ज्ञात्वेति योज्यं ज्ञात्वेत्यध्याहारात् न परविद्यायामित्यनेन भगवद्भक्तेस्त्रयीविद्यातीतत्वं परविद्यात्वञ्च दर्शितं तत्रापीत्यादि गद्ये तस्य भक्त्यैकनिष्ठताया दर्शितत्वात् ततश्चैवं परामृश्यते । सोऽयमन्तर्भगवन्निष्ठ एवेत्यात्मारामता तु बहिरङ्गा तदावरणाय प्रयुक्ता तस्याप्यावरणायोन्मत्तचेष्टेति न्यवृत्सन्निति लुङ्प्रत्ययान्त आर्षः ॥ ८-२० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नवमे जडता तस्य गायत्र्या अप्यशिक्षणम् ।
केदारकर्म देव्या अप्युच्चाटनमितीर्यते ॥

आङ्गिरसगोत्रजानां प्रवरस्य श्रेष्ठस्य शमादियुक्तस्य त्यागोऽत्रातिथ्यादिभ्योऽन्नदानादि विद्या कर्मविद्या आत्मज्ञानं देहादिव्यतिरिक्तभोक्त्रात्मज्ञानमात्मना सदृशाः श्रुतादयो गुणा येषां ते समानोदरा नव पुत्रा बभूवुः ॥ १ ॥ २ ॥

कर्मबन्धविध्वंसनं श्रवणादिकं यस्य तथाभूतं चरणारविन्दं विशेषेण दधत् लोकस्य लोकम् ॥ ३ ॥

अनभिप्रेतानिति शश्वदनुभूयमानभगवत्स्वरूपत्वेन स्वस्य कर्मानधिकारमननात् पितुः सकाशात् अनुशिष्टेन ॥ ४ ॥

स भरतः पितुः शिक्षानिर्बन्धनिवृत्तये तत् शौचाचमनादिक मसध्रीचीनं विपर्यस्तं मूत्रपुरीषोत्सर्गादेः प्रागेवाचमनमृत्तिकाशौचादिकं करोति नत्वनन्तरमेवेति तस्य तदपि वस्तुतः समीचीनमेवेति उपाकरणवेदग्रहणाद्यनन्तरं श्रावणादिमासेषु वेदानध्यापयिष्यामि सम्प्रति तु जडमिमं गायत्रीन्तु शिक्षयामीति विचार्य चैत्रादिभिश्चतुर्भिरपि मासैर्निरन्तरमपि गायत्र्याः पादत्रयं पाठयन् सम्पूर्णां तां धारयितुं न शशाकेत्याह । छन्दांसीति । असमवेतरूपं यथा स्यात्तथा ॥ ५ ॥

स्वतनुजे पुत्रे आत्मनि स्नेहात् स्वप्राणादप्यधिके इत्यर्थः । औपकुर्वाणकस्य सावधिब्रह्मचर्यवतः कर्माणि तेनानभियुक्तानि अनादृतान्यपि तं पुत्रं प्रत्यनुशास्य अनुशासननिर्बन्धे पूर्वोक्तमेव हेतुमाह । स्वयमन्विति उपसंहृतः मृतः ॥ ६ ॥

सपत्न्यै उपत्न्यस्य सपत्न्यामिति सप्तम्यन्तोऽपि पाठः । अनुसंस्थया अनुमरणेन सप्तम्यन्तपाठेऽप्ययमेवार्थः ॥ ७ ॥

अनुशिष्टवतीति शेषः एनमनुशिष्टवति पितरि उपरते सतीत्यन्वयः । न्यवृत्सन् निवर्त्तितुमैच्छन् लुङिवा रूपं निवृत्ता इत्यर्थः उभयथाप्यार्षप्रयोगः नतु पितेव तस्मिन्नत्याग्रहवन्त इति भावः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भरतस्य जन्म तत्र प्राणबाधे उपस्थितेऽपि निर्विकारत्वं वर्णयति नवमे । तत्रादौ मृगशरीरत्यागानन्तरम् ।

शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ।
अथवा योगिनामेव कुले भवति धीमताम् इति ॥

श्रीमुखोक्तरीत्या द्विजोत्तमगृहे भरतो जात इत्याह । अथेत्यादिना अङ्गिरसो गोत्रजानां प्रवरस्य शमादियुक्तस्य कस्य चिद्द्विजवरस्य आत्मना सदृशाः श्रुतादयो गुणा येषां ते सोदर्याः समानोदराः नव अङ्गजा बभूवुः यवीयस्यां कनिष्ठायां मिथुनं पुत्रकन्यकायुग्मकम् बभूव ॥ १ ॥ २ ॥

स च प्राकृतैर्द्विपदपशुभिरुन्मत्तजडबधिरेत्यभिभाष्यमाणो यदा तदनुरूपाणि प्रभाषते कर्माणि च स कार्यमाणः परेच्छया करोति विष्टितो वेतनतो वा याच्ञया यदृच्छया वोपसादितमल्पं बहुमिष्टं कदन्नं वाऽभ्यवहरति परं नेन्द्रियप्रीतिनिमित्तम्, नित्यनिवृत्तनिमित्तस्वसिद्धविशुद्धानुभवानन्दस्वात्मलाभाधिगमः सुखदुःखयोर्द्वन्द्वनिमित्तयोरसम्भावितदेहाभिमानः ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत्रापि विप्रजन्मन्यपि स्वजनसङ्गात् चकाराद्देहाभिनिवेशाच्च भृशमुद्विजमानः यतः आत्मनः प्रतिघातं भ्रंशमाशङ्कमानः कर्मबन्धविध्वंसनं श्रवणं गुणविवरणं च यस्य तद्भगवतश्चरणारविन्दयुगलं मनसा विदधत् विधारयन् भगवदनुग्रहेण अनुस्मृता स्वीयपूर्वजन्मनामावलिर्येन सः आत्मानमुन्मत्तादिरूपेण दर्शयामास ॥ ३ ॥

तस्यापि उन्मत्तादिवद्वर्त्तमानस्यापि पुत्रस्नेहेन अनुबद्धं मनो यस्य सः आसमावर्त्तनात् समावर्त्तनपर्यन्तान् उपनयनादीन् संस्कारान् यथोपदेशं विदधानः यथाविधि कुर्वाणः तमुपनीयोपनीतस्य च पुनः शौचादीन् तस्यानभिप्रेतानपि समशिक्षयत् पितुः सकाशादनुशिष्टेन सुशिक्षितेन पुत्रेण भाव्यमिति हेतोः॥ ४ ॥

सचापि तत् उपदिष्टम् असध्रीचीनमसमीचीनं करोतिस्म स विप्रः उपाकरणवेदव्रताद्यनन्तरं श्रावणादिमासेषु वेदानध्यापयिष्यन् आदौ तावद्व्याहृतिभिः सह प्रणवशिरःसहितां त्रिपदीं चैत्रादिचतुरो मासानधीयानप्यसमवेतरूपं यथाभवत्येवं ग्राहयामास ॥ ५ ॥

एवमुक्तप्रकारेण समनुशिष्टेन भाव्यमित्यसन् अयुक्त आग्रहो यस्य सः अतएव आत्मनि "आत्मा वै पुत्रनामासि,, इति वाक्यात् आत्मसूते स्वतनुजे अनुरागेणावेशितं चित्तं येन सः शौचादीनि यान्यौपकुर्वाणकस्य सार्वब्रह्मचर्यवतः कर्माणि अनभियुक्तानि पुत्रानभीष्टान्यपि पुत्रं प्रत्यनुशास्यापि अनधिगतमनोरथः नाधिगतो न प्राप्तः पुत्रकर्मकौशलमनोरथो येन सः स्वयं यमेनोपसंहृतः ।६।

यवीयसी कनिष्ठा द्विजसती विप्रपत्नी सपत्न्यै मिथुनं स्वपुत्रकन्यकायुग्ममुपन्यस्य समर्प्य स्वयमनुसंस्थया अनुमरणेन पतिलोकमगात् ॥ ७ ॥

एनं जडमतिरिति मत्वा अनुशासननिर्बन्धात् न्यवृतन् निवर्तितुमैच्छन् निवृत्ता बभूवुरित्यर्थः । यदारे उन्मत्त ! जड बधिर इत्यभिभाष्यमाणस्तदा तदनुरूपाणि प्रभाषते स परेच्छया कार्यमाणः कर्माणि च करोति ॥ ८ ॥

भाषाटीका ।

श्रीशुकदेवजी बोले इसके अनन्तर अंगिरा गोत्र शम, दम, तपः स्वाध्याय अध्ययन त्याग सन्तोष तितिक्षा नम्रता विद्या अनसूया आत्मज्ञान आनन्दयुक्त ब्राह्मण श्रेष्ठ के अपने सदृश शास्त्र शील आचार रूप औदार्य गुणोंवाले नौ पुत्र भये और छोटी भार्या के एक पुत्र एक कन्या दो भये ॥ १ ॥

उन दोनों में जो पुत्र थे वे तो मृगशरीरको छोडेहुये राजर्षि श्रेष्ठ परम भागवत अन्त शरीर में ब्राह्मणता को प्राप्त भये भरतजी हैं ऐसा महात्मा जन कहते हैं ॥ २ ॥

तिस जन्म में भी स्वजन संगसे अत्यंत डरतेहुये भरतजी कर्म बन्धके नाश करनेवाले भगवान् के चरित्रों के श्रवण स्मरण गुणों के वर्णन तथा चरणारविन्द युगल को मनमें धारण करके अपने आत्मा को घात की शङ्का से भगवान् के अनुग्रह होनेसे पूर्वजन्मों के स्मरण होनेसे सब लोकों को पागल अन्धा बहिरा रूपसे अपने को दिखाने लगे ॥ ३ ॥

उनके पिता ब्राह्मण पुत्र के स्नेह में मन के बंधजाने से अपने पुत्र जन्मादिक समावर्तन पर्यन्त संस्कारोंको विधि पूर्वक कराकर उपनयन होनेपर शौच आचमन आदिक कर्म जोकि भरतजी के प्रिय नहीं थे तिन को भी शिखा ते भये क्योंकि उनने समझा कि पुत्र को शिखाना पिता का धर्म है ॥ ४ ॥

सो भरतजी पिताके समीपही में किसी शिक्षित आचार को नहीं करते थे पिता उनके वेद पढाने की इच्छा से ओंकार शिरो मन्त्रके सहित गायत्री सावित्री व्याहृति ग्रैष्मवासन्तिक मासों के मार्गों को अयथार्थ रूपसे भी ग्रहण कराते थे ॥ ५ ॥

इस प्रकार से अपने पुत्र में अनुराग से चित्तके अभिनिवेश होने से पिता अपने पुत्रको शौच अध्ययन व्रत नियम गुरु अग्निका सेवा इत्यादिक अवधि वाले ब्रह्मचारी के लायक कर्म जो कि भरतजी को अभिमत नहीं थे पिताका ऐसा असत् आग्रह था कि अवश्य शिखानाही चाहिये इस प्रकार पुत्र को शिखाते थे जब तक मनोरथ नहीं पूरा भया तबही इनके प्रमाद मे रहने के समय अप्रमादी कालने इनको संहार कर दिया ॥ ६ ॥

तब ब्राह्मणकी छोटी भार्या अपने दोनों पुत्र पुत्री को दूसरी सौतिन के पास छोड कर पति के साथ सती होगई ॥ ७ ॥

पिता के चले जाने पर भरतजी के प्रभाव को न जानने वाले और सब भ्राता वेद त्रयी के कर्म मार्गमे निश्चित बुद्धि वाले होने से ब्रह्म विद्या को नहीं जानते थे तिससे भरतजी को अति अज्ञानी समझकर भ्राता के सम्बन्ध से उनको अलग करते भये ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यदाभिभाष्यमाणस्तदा तदनुरूपाणि प्रभाषते । मूल्यमन्तरेण बलाद्यत्कर्म कार्यते सा विष्टिः । वेतनं मूल्यम् । विष्ट्यादिभिरुपसादितमन्नमभ्यवहरति परं भुङ्क्ते केवलं नत्विन्द्रियप्रीतये । अत्र हेतुद्वयमाह । नित्यं सदा निवृत्तं निमित्तं यस्मात्स उत्पादकशून्यः स्वसिद्धोऽभिव्यञ्जकशून्यो विशुद्धः केवलो योऽनु-

शीतोष्णवातवर्षेषु वृष इवानावृताङ्गः पीनः संहननाङ्गः स्थण्डिलसंवेशनानुन्मर्दनामज्जनरजसा महामणिरिवानभिव्यक्तब्रह्मवर्चसः कुपटावृतकटिरुपवीतेनोरुमषिणा द्विजातिरिति ब्रह्मबन्धुरिति संज्ञयाऽतज्ज्ञजनावमतो विचचार ॥ १० ॥

यदा तु परत आहारं कर्मवेतनत ईहमानः स्वभ्रातृभिरपि केदारकर्मणि निरूपितस्तदपि करोति किन्तु न समविषमन्यूनमधिकमिति वेद कणपिण्याकफलीकरणकुल्माषस्थालीपुरीषादीन्यप्यमृतवदभ्यवहरति ॥ ११ ॥

अथ कदाचित्कश्चिद्वृषलपतिर्भद्रकाल्यै पुरुषपशुमालभतापत्यकामः ॥ १२ ॥

तस्य ह दैवमुक्तस्य पशोः पदवीं तदनुचराः परिधावन्तो निशि निशीथसमये तमसावृतायामनधिगतपशव आकस्मिकेन विधिना केदारान् वीरासनेन मृगवराहादिभ्यः संरक्षमाणमङ्गिरःप्रवरसुतमपश्यन् ॥ १३ ॥

अथ त एनमनवद्यलक्षणमवमृश्य भर्तृकर्मनिष्पत्तिं मन्यमाना बद्ध्वा रशनया चण्डिकागृहमुपनिन्युर्मुदा विकसितवदनाः ॥ १४ ॥

अथ पणयस्तं स्वविधिनाऽभिषिच्याहतेन वाससाऽऽच्छाद्य भूषणालेपस्रक्तिलकादिभिरुपस्कृतं भुक्तवन्तं धूपदीपमाल्यलाजकिसलयाङ्कुरफलोपहारोपेतया वैशससंस्थया महता गीतस्तुतिमृदङ्गपणवघोषेण च पुरुषपशुं भद्रकाल्याः पुरत उपवेशयामासुः ॥ १५ ॥

अथ वृषलराजपणिः पुरुषपशोरसृगासवेन देवीं भद्रकालीं यक्ष्यमाणस्तदभिमन्त्रितमसिमतिकरालनिशितमुपाददे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भवः स एवानन्दरूपः स्वात्मा तस्य लाभ एवंभूतोऽहमिति ज्ञानं तस्याधिगमः प्राप्तिरस्ति यस्य । द्वन्द्वानि सन्मानावमानादीनि तद्धेतुकयोः सुखदुःखयोरकृतदेहाभिमानः तस्मादेन्द्रियप्रीतिनिमित्तमभ्यवहरतीत्यन्वयः ॥ ९ ॥

अतएव शीतोष्णादिष्वनावृताङ्गो विचचारेत्यन्वयः कीदृशः पीनः पुष्टः संहननाङ्गः संहन्यन्ते निबिडीभवन्ति स्माङ्गानि यस्य कठिनावयव इत्यर्थः । स्थण्डिलसम्वेशनं भूमिशयनम् अनुन्मर्दनं मर्दनाभावः अमज्जनं स्नानाभावः तैर्यद्रजस्तेनाप्रकटं ब्रह्मवर्चसं ब्राह्मं तेजो यस्य । यथा महामणिरनभिव्यक्ततेजा भवति कुत्सितेन पटेनावृता कटिर्यस्य । उरुमषिणाऽतिमलिनेन । तस्वतस्तं न जानन्ति ये तैर्जनैरवमतः सन् ॥ १० ॥

यदा तु परेभ्यः कर्ममूल्येनाहारमपेक्षमाणो भवति तदा केदारकर्मणि शालिक्षेत्रे कर्दमविलोडनादावाहारप्रलोभनेन नियुक्तः सन्करोति किन्त्वत्र कर्दमस्य प्रक्षेपे क्षेत्रे समं भवेदिति उद्धरणे विषमं स्यादित्यादि न वेद भ्रातृभिर्दत्तान्कणादीनप्यमृतवद्भुङ्क्ते । कणाश्चूर्णतण्डुलाः । पिण्याकं तैलयन्त्रोद्धृतं तिलकिट्टम् । फलीकरणं तुषाः । कुल्माषाः कीटदुष्टा माषाः । स्थालीपुरीषं स्थालीलग्नं दग्धान्नम् ॥ ११ ॥

तस्य रागादिराहित्यमवोच्यं चैवमीरितम् ।
अथान्यच्चरितं प्राह चित्रं मृत्यावसंभ्रमम् ।

वृषलपतिः शूद्रसामन्तश्चोरराजः आलमतालब्धुं प्रवृत्तः ॥ १२ ॥

दैवाद्बन्धनविमुक्तस्य पशोः । तमसा व्याप्तायां निशि तत्रापि निशीथसमयेऽर्धरात्रावसरे । आकस्मिको दैवनिर्मितो विधिः प्रकारस्तेन । वीरासनेनोर्ध्वावस्थानेन ॥ १३ ॥

अवमृश्य ज्ञात्वा ॥ १४ ॥

पणयश्चोराः । अहतेन नूतनेन उपस्कृतमलंकृतम् । वैशससंस्थया हिंसाविधानेन गीतादिघोषेण सह ॥ १५ ॥

वृषलराजस्य पणिः पुरोहितत्वेन वर्तमानश्चोरः । तदभिमन्त्रितं भद्रकालीमन्त्राभिमन्त्रितम् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदा स जडविप्रो द्विपदपशुभिर्दे उन्मत्तजड बधिरेत्यभिभाष्यमाणस्तदा तदनुरूपाणि उन्मत्ताद्यनुरूपाणि उन्मादजाड्यबाधिर्यादिसूचकानि वचांस्याभाषते स्वयं निर्व्यापारोऽपि परेच्छया कार्यमाणः कर्माणि करोति मूल्यमन्तरेण बलाद्यत्कर्म कार्यते सा विष्टिः वेतनं भृतिः विष्ट्यादिभिर्यदृच्छया दैवाद्वोपसादितं प्राप्तं तदप्यल्पं बहु वा मृष्टं कदन्नं वाऽभ्यवहरति भक्षयति परं केवलं प्रारब्धोपभोगयुक्तदेहधारणार्थं भुङ्क्ते नत्विन्द्रियप्रीत्यं ॥ ९ ॥

तत्र हेतुं वदन्विशिनष्टि । नित्येति । वित्यं निवृत्तानि निमित्तानि सुखदुःखनिमित्तानि पुण्यापुण्यकर्माण्यात्मस्वरूपतिरोधायकानि

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यस्मात्स एवंविधो यः स्वसिद्धविशुद्धानुभवानन्दः स्वात्मा नित्यसिद्धरागादिरहितज्ञानानन्दस्वरूप आत्मा तस्याधिगमः याथात्म्यविज्ञानं तन्नित्यं सदा यस्य द्वन्द्वानि शीतोष्णादीनि निमित्तानि कारणानि ययोस्तयोः सुखदुःखयोरसम्भावितदेहाभिमानः द्वन्द्वनिमित्तसुखदुःखादिप्रयुक्तदेहात्माभिमानसम्भावनामात्ररहित इत्यर्थः अत एव शीतातपादिषु वृष इव बलीवर्द इवानावृतमनाच्छन्नमङ्गं यस्य सः पीनः परिपुष्टसर्वावयवः संहननानि कठिनान्यङ्गानि यस्य स्थण्डिलसंवेशनं भूशयनम् अनुन्मर्दनं तैलेनाङ्गमर्दनाभावः अमज्जनं मलापनयनार्थं स्नानाभावः एभिर्यद्रजः शरीरमालिन्यं तेनानभिव्यक्तमप्रकटं ब्रह्मवर्चसं ब्रह्मतेजो यस्य यथा महामणिर्बाह्यमलेनानभिव्यक्ततेजा भवति कुत्सितेन पटेनावृता कटिर्यस्य उरुमषिणा प्रभूतं मलं यस्य तेनोपवीतेनोपलक्षणेन द्विजातिरित्यादिसंज्ञया वाचकशब्देन व्यवह्रियमाणोऽतज्ज्ञजनैः योगीश्वरचर्यानभिज्ञजनैरवमतः निन्दितः सन् विचचार ॥ १० ॥

यदा तु वेतनाकृतेः परेभ्यः आहारमीहमानः इच्छन्भवति वेतनमिति पाठे आहारमित्यस्यानन्तरं लब्धुमिति शेषः आहारमन्यदिकं लब्धुं वेतनमीहमानः कुर्वाणो भवति तदा आहारप्रलोभनेन स्वभ्रातृभिः केदारकर्मणि शालिक्षेत्रकर्दमविलोडनादौ नियुक्तस्तदपि केदारकर्म करोति किं त्वत्र कर्दमस्य प्रक्षेपे क्षेत्रं समम्भवेदित उद्धरणे विषमं स्यादिति न वेद वैषम्यं नैव पश्यति । न्यूनमधिकं वा स्यादिति भ्रातृभिर्दत्तान्कणादीनप्यमृतवद्भक्षयति कणाश्चूर्णतण्डुलाः पिण्याकस्तैलयन्त्रोद्धृतं तिलपिष्टं फलीकरणं तुषः कुल्माषा कुलुत्थाः दुष्टा माषाः स्थालीपुरीषं पात्रलग्नं दग्धान्नम् ॥ ११ ॥

एवं तस्य देहानादरमभिधायाथ “कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिम्” इत्युक्तरीत्या मरणोद्योगेऽप्यसम्भ्रमं वक्तुं तस्यार्थन्तमस्वमाविष्कुर्वन्नाह । अथेति । हे विष्णुरात ! भरतस्येदं वक्ष्यमाणमद्भुतं कर्म शृणु कश्चिद्वृषल्याः शूद्रायाः पतिः पुत्रकामः भद्रकाल्यै पशुं पुरुषपशुमालभमानः पुत्रश्चेन्मम भविता तदा भवत्यै पुरुषपशुमालप्स्ये इति कृतसङ्कल्पोऽभूदित्यर्थः ॥ १२ ॥

तस्यैवं कृतसङ्कल्पस्य पुत्रप्राप्तिरूपसिद्ध्यनन्तरं दैवाल्लब्धं पशुमानयतेत्युक्तास्तदनुचराः शूद्राः दैवाद्विमुक्तस्य आलम्भ्यस्य पशोः पदवीं प्रति परितो धावन्तः अन्वेषमाणाः तमसा व्याप्तायां निशि रात्रावर्द्धरात्रिसमये अनधिगतः पशुर्यैस्ते आकस्मिको दैवनिमित्तो विधिः प्रकारस्तेन वीरासनेन ऊर्ध्वावस्थानेन केदारान् मृगादिभ्यः संरक्ष्यमाणं गोबलीवर्दन्यायेन वराहशब्दप्रयोगः आङ्गिरसप्रवरस्य सुतं भरतमपश्यन् दृष्टवन्तः ॥ १३ ॥

अथैनमाङ्गिरससुतमनवद्यानि निर्दुष्टान्यङ्गानि यस्य पङ्गुत्वकाणत्वादिरहितमवमृश्य ज्ञात्वा भर्तुः कर्मणः पुरुषपश्वालम्भनकर्मणः निष्पत्तिं मन्यमाना रशनया रज्ज्वा बध्वा मुदा विकसितानि वदनानि येषां ते चण्डिकाया भद्रकाल्या मन्दिरं प्रत्युपनिन्युर्नीतवन्तः ॥ १४ ॥

अथ पणयः चोराः तमाङ्गिरससुतं स्वविधिना विशसनविधिनाभिषिच्य स्नापयित्वाहतेन नूतनेन वाससा वस्त्रेणाच्छाद्यभूषणादिभिरुपस्कृतमलं भुक्तवन्तं धूपादिभिरुपेतया युक्तया वैशससंस्थया हिंसाविधानेन महता स्तुत्यादिघोषेण च पुरुष एव पशुस्तं भद्रकाल्या अग्रे उपवेशयामासुः ॥ १५ ॥

अथ वृषलराजस्य पणिः पुरोहितत्वेन वर्तमानश्चोरः पुरुषपशोरसृगक्तमेवासवं मद्यं तेन च भद्रकालीं यक्ष्यमाणः तर्पयिष्यमाणः तदभिमन्त्रितं भद्रकालीमन्त्राभिमन्त्रितमतिभयङ्करं तीक्ष्णधारमसिं खड्गमुपाददे गृहीतवान् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अतः परमसौ भरतः किमकरोदत्राह । सचेति । सचैवम् विचचारेत्यन्वयः कथं प्राकृतैरित्यस्य विवरणं द्विपदेति । चतुष्पदः पशोर्द्विपदत्वमेव विशेषः नतु ज्ञानेन तादृशैर्मनुष्यैर्यदा हि उन्मत्तेत्यादिनामभिरभिभाष्यमाणो भवति तदा तदनुरूपाण्युन्मत्तादिवचनानुकूलवचनानि भाषते विष्टितः कर्तुः कर्मानुकूलद्रव्यक्लृप्तिमन्तरेण कर्मणा वेतनतो मौल्येन कर्मानुकूलद्रव्यक्लृप्त्येत्यर्थः कदन्नं कुत्सितान्नम् अभ्यवहरति भुङ्क्ते परं केवलम् नेन्द्रियप्रीतिनिमित्तं न जिह्वादीन्द्रियतृप्तिकारणमत्र हेतुगर्भविशेषणमाह । नित्येति । नित्यनिवृत्तदुःखस्वसिद्धविशुद्धानुभवानन्दोऽहमिति यः स्वात्मलाभस्तमधिगच्छतीति स तथोक्तः यद्वा नित्यनिवृत्तदुःखत्वादिविशिष्टस्वात्मा परमात्मा स एव लाभः फलं जानातीति स तथोक्तः अत एवासम्भावितोऽनुत्पादितो देहाभिमानो येन स तथा शुष्कजलनारिकेलफलसम इत्यर्थः ॥ ९ ॥

उपलिप्तभूमौ शयित्वा निद्राकरणं स्थण्डिलसंवेशनमनुन्मर्दनं देहमलात्यागः अनुन्मज्जनमस्नानं कर्पटेन पटच्चीरेण जीर्णवस्त्रेणेत्यर्थः आवृताच्छादिता कटिर्यस्य सः तथा उरुमषिणातिमलिष्ठेन ॥ १० ॥

यदा परतः आहारं प्रतिवेतनतः कर्मेहमानश्चेष्टमानस्तदा स्वभ्रातृभिरपि केदारकर्मणि निरूपितस्तत्कर्मापि करोति अस्य कर्मण इदं मूल्यं सममिदं विषममिदमधिकमिदं न्यूनमिति न वेद कणां पाषाणोपेताणुतरतण्डुलं पिण्याकं नीरसतिलपिष्टं फलीकरणमवहततण्डुलतुषं कुल्माषः कीटादिविद्धमाषः वनमाषो वा स्थालीपुरीषं स्थालीतण्डुललग्नं दग्धान्नं यावनालश्यामाककोद्रवादीन्यादिशब्दगृहीतानि आरोचयति मधुरीकरोति ॥ ११ ॥

भक्षितकणादिजीर्णीकरणं नातिशयितमाहात्म्यम् औषधादिनापि तत्सम्भवादित्याशङ्क्य विष्णुमाहात्म्यगर्भितं माहात्म्यान्तरमाह । अथेति । अथान्यमाहात्म्यं वक्ष्यामीति शेषः ॥ १२ ॥

दैवविमुक्तस्य अदृष्टोद्बोधकपरमात्मोपेक्षया क्षीणायुषः निशीथसमये मध्यरात्रिकाले अनधिगतपशवः अप्राप्तपुरुषाख्यपशवः केदारान् शालिक्षेत्राणि वीरासनेन मञ्चे स्थित्वा संरक्ष्यमाणं पालयन्तं यत्प्रत्ययस्तु स्वयं हरिणा पाल्यत इति द्योतनपरः ॥ १३ ॥

रशनया रज्ज्वा ॥ १४ ॥

पणयो वृषलाश्चोरा वा स्वविधिना स्वागमोक्तमार्गेण अहतेनाच्छिन्नेन धौतेन वा किसलयः पल्लवः अङ्कुरो नवाङ्कुरः वैशससंस्थया हिंसाविधानेन ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वृषो धर्मो लीयत एभिरिति वृषलास्तेषां राजा वृषलराजः अत एव पणिश्चोरः वृषलराजेषु चोर इत्यर्थः असृगासवेन रक्ताख्यमद्येन तस्याः भद्रकाल्या मन्त्रेण "गृध्रकर्णिविरूपाक्षिलम्बस्तनिमहोदरि। हनशत्रुं त्रिशूलेन कुद्धस्य पिब शोणितम्" इत्यादिनाभिमन्त्रितं जप्तमसिं खड्गम् ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मूल्यमन्तरेण बलात् यत् कार्यते सा विष्टिः नित्यं सदैव पूर्वजन्मन्यपि निवृत्तं निमित्तं कर्म यस्य सः स्वसिद्धेन स्वत एव सिद्धेन विशुद्धेनाप्राकृतेन अनुभवानन्देन हृष्टेनैव स्वात्मनः स्वेष्टदेवस्य कृष्णस्य लाभाधिगमः लाभप्रतीतिर्यस्मिन् स च स च सः अत एव द्वन्द्वानि सम्माननावमानादीनि तद्धेतुकयोः सुखदुःखयोरकृतदेहाभिमानः अत एव नेन्द्रियप्रीतिनिमित्तमभ्यवहरतीत्यन्वयः ॥ ९ ॥

अपावृताङ्गः अनावृताङ्गः संहननाङ्गः अतिबलिष्ठगात्रः स्थण्डिलसम्वेशनं भूमिशयनमनुन्मर्दनमभ्यङ्गाद्यभावः अमज्जनं स्नानाभावस्तैर्यद्रजस्तेनानभिव्यक्तं ब्रह्मवर्चसं ब्राह्मं तेजो यस्य सः उरुमषिणा अतिमलिनेन ॥ १० ॥

कर्मवेतनतः कर्ममूल्येन आहारमीहमानो यदा भवति तदा स्वभ्रातृभिरिति सर्वं दिनं कर्म कारयित्वा आहारमात्रं चेदन्ये ददति तर्हि वयमेव तथा कारयामः अप्रतिष्ठा च नस्तावती न भविष्यतीति मत्वेति भावः कर्दमविलोडनादिकर्मणि अत्र कर्दमस्य प्रक्षेपे चेत्रं समं भवेदिति उद्धरणे विषमं भवेदित्यादि तु न वेद पिण्याकं तैलयन्त्रोत्कृतं तिलकिट्टं फलीकरणं तुषः। कुल्माषाः कीटविद्धमाषाः स्थालीपुरीषं स्थालीलग्नं दग्धान्नं तदादीनि भ्रातृभिर्दत्तानि ॥ ११ ॥

वृषलपतिः शूद्रसामन्तश्चौरराजः आलभत आलब्धुं प्रवृत्तः॥ १२ ॥

दैवाद्बन्धनविमुक्तस्य पलायितस्य पुरुषपशोः वीरासनेन ऊर्ध्वावस्थानेन ॥ १३ ॥ १४ ॥

पणयश्चौराणां पुरोहिताः आहतेन नूतनेन वैशससंस्थया हिंसाविधानेन युक्तम् ॥ १५ ॥

वृषलराजस्य पणिः मुख्यः पुरोहितः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विष्टितः बलात्कार्यमाणा क्रिया विष्टिः वेतनतः वेतनं मूल्यं ततः याच्ञया यदृच्छया वोपसादितं लब्धम् तत्राप्यल्पं बहु वा कुत्सितं मिष्टं वा अन्नम् अभ्यवहरति भुङ्क्ते परं केवलं नत्विन्द्रियप्रीतिनिमित्तं तत्र हेतुमाह। नित्येति। नित्यं निवृत्त्यादिहेतुर्यस्मात् सः अत एव स्वसिद्धः स्वायत्तः स्थितिप्रवृत्तिकः विशुद्धः स्वभावतोऽपास्तसमस्तदोषः सर्ववेदैकवेद्यः श्रीवासुदेवः तद्विषयको योऽनुभवः तस्माद्य आनन्दः स एव स्वात्मनो मुमुक्षोर्लाभस्तस्याधिगमः प्राप्तिरस्ति यस्य सः हेत्वन्तरमाह। द्वन्द्वानि स्वकृतानि पुण्यापुण्यकर्माणि निमित्तानि ययोस्तयोः सुखदुःखयोः असम्भावितदेहाभिमानः अहं सुखी अहं दुःखीत्यकृतदेहाभिमानः ॥ ९ ॥

शीतोष्णादिषु अनावृताङ्गः वृष इव विचचारेत्यन्वयः कथम्भूतः पीनः पुष्टः संहननाङ्गः कठिनावयवः भूशयनादिभिर्यद्रजस्तेन अनभिव्यक्तमप्रकटं ब्रह्मवर्चसं ब्रह्मतेजो यस्य सः कुपटेन मलिनवस्त्रेणावृता कटिर्यस्य सः उरुमषिणातिमलिनेनोपवीतेनोपलक्षणेन द्विजातिरिति संज्ञया अतज्ज्ञजनावमतः ॥ १० ॥

कर्मवेतनतः कर्मवेतनेन कर्ममूल्येन कणा दलितमुद्गादिनिष्कृष्टाः पिण्याकं तिलपिष्टं फलीकरणं तुषाः कुल्माषाः कीटदूषितमाषाः स्थालीपुरीषं स्थालीलग्नं दग्धान्नम् आदिना गतरसाद्यन्नसंग्रहः एतान्यप्यमृतवद्भुङ्क्ते ॥ ११ ॥

वृषलानां शूद्राणां पतिश्चौरराजः पुत्रकामः भद्रकाल्यै पुरुषपशुमालभत आलब्धुं प्रवृत्तः ॥ १२ ॥

यं पुरुषपशुमालब्धुं प्रवृत्तस्तस्य पुरुषपशोः दैवान्मुक्तस्य बन्धनविमुक्तस्य यथेष्टां दिशं पलायमानस्य पदवीं मार्गं तस्य वृषलपतेरनुचराः परिधावन्तोऽपि अनधिगतपशवः तं पलायमानं पशुमप्राप्येत्यर्थः तमसावृतायां निशि निशीथसमये अर्धरात्रावसरे आकस्मिकेन विधिना दैवकृतेन योगेन अङ्गिरःप्रवरसुतमपश्यन् दृष्टवन्तः ॥ १३ ॥

अनवद्यानि शुद्धानि लक्षणान्यङ्गानि यस्य तमवमृत्य वधार्थं ॥ १४ ॥

पणयश्चौराः स्वविधिनाभिषिच्य आहतेन नूतनेन वाससाच्छाद्य भूषणादिभिरुपस्कृतमलंकृतं वैशससंस्थया हिंसाविधानेन गीतादिघोषेण च सह पुरतोऽग्रे उपवेशयामासुः ॥ १५ ॥

अथानन्तरं वृषलराजस्य पणिः चोरभूतः पुरोहितः तदभिमन्त्रितं निशितं तैलधौतम् ॥ १६ ॥

भाषाटीका ।

उन भरतजी को दो पैरवाले पशु सरीके मनुष्य पागल है मूर्ख है बहिरा है ऐसे कहने लगे तब भरतजी तैसाही करने लगे तैसेही बोलने लगे दूसरे के कराने से काम करते थे बेगारसे मजूरीसे मागनें से आपही मिलने से जो कुछ मीठा या खट्टा मिले तिसको खालेते कुछ इन्द्रिय प्रीति नहीं करते थे नित्यही सब निमित्तों को छोडदिये तिससे स्वयं सिद्ध निर्मल आनन्दानुभव आत्मलाभ के होनेसे सुख दुःख देह निमित्त द्वन्द्वसे देहाभिमानको छोडदिये ॥ ९ ॥

ठण्ड गरम पवन वर्षा मे बैलके तुल्य उघाडे ही रहते थे खूब शरीर से मोटे ताजी दीखते थे जमीन मे सोनेसे मर्दनादि न करने से शरीर मे रजके भरजाने से जैसे मणि मैला होने से रहता है तैसे ब्रह्म तेजको छिपाये रहते थे कमरमें मैलासा वस्त्र रखते बहुत मैला जनेऊ रखते थे तिसी से अज्ञानी मनुष्य कहते थे कि यह तो द्विज है अथवा अधम ब्राह्मण है इत्यादि ऐसे अपमान पाकर भरतजी पृथिवी में विचरते थे ॥ १० ॥

इति तेषां वृषलानां रजस्तमःप्रकृतीनां धनमदरजउत्सिक्तमनसां भगवत्कलावीरकुलं कदर्थीकृत्योत्पथेन स्वैरं विहरतां हिंसाविहाराणां कर्म्मातिदारुणं यद्ब्रह्मभूतस्य साक्षाद्ब्रह्मर्षिसुतस्य निर्वैरस्य सर्वभूतसुहृदः सूनायामप्यननुमतमालम्भनं तदुपलभ्य ब्रह्मतेजसाऽतिदुर्विषहेण दन्दह्यमानेन वपुषा सहसोच्चचाट सैव देवी भद्रकाली ॥ १७ ॥

भृशममर्षरोषावेशरभसविलसितभ्रुकुटिविटपकुटिलदंष्ट्रारुणेक्षणाटोपातिभयानकवदना हन्तुकामेवेदं महाट्टहासमतिसंरम्भेण विमुञ्चन्ती तत उत्पत्य पापीयसां दुष्टानां तेनैवासिना विवृक्णशीर्ष्णां गलात्स्रवन्तमसृगासवमत्युष्णं सह गणेन निपीयातिपानमदविह्वलोच्चैस्तरां स्वपार्षदैः सह जगौ ननर्त्त च विजहार च शिरःकन्दुकलीलया ॥ १८ ॥

एवमेव खलु महदभिचारातिक्रमः कार्त्स्न्येनात्मने फलति ॥ १९ ॥

न वा एतद्विष्णुदत्त ! महदद्भुतं यदसम्भ्रमः स्वशिरश्छेदन आपतितेऽपि विमुक्तदेहाद्यात्मभावसुदृढहृदयग्रन्थीनां सर्वसत्त्वसुहृदात्मनां निर्वैराणां साक्षाद्भगवताऽनिमिषारिवरायुधेनाप्रमत्तेन तैस्तैर्भावैः परिरक्ष्यमाणानां तत्पादमूलमकुतश्चिद्भयमुपसृतानां भागवतपरमहंसानाम् ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
पारमहंस्यां संहितायां वैयासिक्याम्
भरतचरिते नवमोऽध्यायः ॥ ९ ॥

भाषाटीका ।

जब दूसरे से काम करने के मजूरी से आहार की इच्छा करते थे तब उनके भाईयो ने भी जब खेतीके काम मे रखदिया तो उसको भी करते थे परन्तु जमीन कहां पर ऊंची है कहां नीची है इस बात को नहीं जानते थे चावलकी कणी खली भूषा आदि जोकुछ मिलै तिसको अमृत के तुल्य खाते थे ॥ ११ ॥

किसी समय पर किसी शूद्रों के राजाने पुत्रकी कामना से भद्रकाली देवी के वास्ते मनुष्य पशु मारने की तैयारी की ॥ १२ ॥

वह मनुष्य दैव योग से छूटकर भाग गया तब तिसके पीछे राजा के चाकर दौडते गये फिर अन्धेरी रात मे उस पशुके न मिलने से आधीरात बीती तब अकस्मात् दैव योग से मृग सूकर आदिकों से खेत की रक्षा करते हुये वीर आसन पर बैठे अङ्गिरा गोत्री भरत जी को उन दूतों ने देखा ॥ १३ ॥

तब वे लोग भरतजी को निर्दोष पशु जानकर अपने मालिककी कार्यसिद्धको समझकर रस्सीसे बांधकर प्रसन्नमुख होकर चंडिका के मंदिरको ले गये ॥ १४ ॥

इसके अनन्तर वे पुरोहितलोग अपनी विधिसे भरतजी को स्नान कराकर धौत वस्त्र से आच्छादित करके गहना चन्दन माला तिलकादि से युक्त करके भोजन कराकर धूप दीप माल्य खाइ नये पत्ते अंकुर फल उपहार से युक्त जो हिंसा विधि तिससे वडे भारी गाजा वाजा से उस पुरुष पशुको लेकर भद्रकाली के आगे वैठाते भये ॥ १५ ॥

इसके अनन्तर पुरोहित नामक चोरने पुरुष पशु के रक्त से भद्रकाली देवी को पूजन करने की इच्छा से काली के मन्त्र को पढकर वडा भयंकर तीक्ष्ण तरवार को हाथ में लिया ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

धनमद एव रजस्तेनोत्सिक्तं व्यक्तमर्यादं मनो येषां भगवत्कलायुक्तं वीराणां ब्राह्मणानां कुलं तुच्छीकृत्य यथेच्छं वर्तमानानां यत्कर्म तदुपलभ्य देवी उच्चचाट प्रतिमां त्यक्त्वा बहिर्निर्गता । कथम्भूतमालम्भनम् सूनायामप्यापत्कालेऽनुज्ञातायामपि हिंसायामननुज्ञातम् भद्रकालीत्यन्तं गद्यम् ॥ १७ ॥

अमर्षोऽपराधासहनं रोषश्च वपुषो दाहनं तयोरावेशस्तस्य रभसेन वेगेन विलसित उत्तम्भितो भ्रूकुटिलक्षणो विटपः शाखा कुटिला दंष्ट्राश्चारुणानीक्षणानि च तेषामाटोपः सम्भ्रमस्तेनातिभयानकं वदनं यस्या इदं जगद्धन्तुमुद्यतेव महान्तमट्टहासं सनादं हासं ततः स्थानादुत्पत्य विवृक्णानि छिन्नानि शीर्षाणि येषां गणेन परिवारेण सह शिरांस्येव कन्दुकानि तेषां लीलया चिक्रीड च ॥ १८ ॥

ननु कथं देव्याराधकानामेवं विपरीतं फलं तत्राह । एवमेवेति । महत्स्वभिचाररूपोऽतिक्रमोऽपराधः ॥ १९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वसम्भावितमिदमेवं यन्मरणेऽप्यव्याकुलत्वं मारकेषु च क्रोधाभाव इत्यादि तत्राह । न वा इति । विमुक्तो देहाद्यात्मभावलक्षणः सुदृढो हृदयग्रन्थिर्यैः सर्वसत्त्वानां सुहृद आत्मानश्च ये तेषां नच तेषां देहाद्यभिमानसद्भावेऽपि मरणादिभयमस्तीत्याह । साक्षाद्भगवतामितो रक्ष्यमाणानां केन अनिमिषः कालः स एवारिचक्रं तेन वरायुधेन तैस्तैर्भावैश्चान्तर्यामितया प्रवर्त्यमानैर्भद्रकाल्यादिरूपैः न कुतश्चिदपि भयं यस्मिन् भागवतानां भगवदुपासकानां परमहंसानाम् ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीधरस्वामिकृतभावार्थदीपिकायाम्

नवमोऽध्यायः ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इतीत्थं तेषां वृषलानां रजस्तमःप्रचुराणां धनमद एव रजस्तेन उत्सिक्तममर्यादं मनो येषां भगवत्कलया युक्तं धीराणां ब्राह्मणानां कुलं कदर्थीकृत्य तुच्छीकृत्य उत्पथे दुर्मार्गे यथेच्छं विहरतां हिंसैव विहारो येषां तेषां यदतिदारुणमालम्भनरूपं कर्म तदुपलभ्य सैव भद्रकाली देवी ब्रह्मभूतस्य ब्रह्मसाम्यमापद्यमानस्य ब्रह्मर्षेराङ्गिरसः सुतस्य सूनायां हिंसायामप्यननुमतस्य दुर्विषहेण सोढुमशक्येन ब्रह्मतेजसातितरां दह्यमानं वपुस्तेन हेतुना सहसा भाशूच्चचाट प्रतिमां त्यक्त्वा बहिर्निर्गताभूदित्यर्थः ॥ १७ ॥

अमर्षोऽपराधासहनं रोषश्च वपुषो दाहस्तयोरावेशस्य रभसेन वेगेन विलसितो विजृम्भितो भृकुटीलक्षणो विटपः शाखा कुटिला दंष्ट्राश्चारुणे ईक्षणे च तेषामाटोपः संभ्रमस्तेनातिभयङ्करं वदनं यस्या इदं जगद्धन्तुकामेव हन्तुमुद्यतेवाट्टहासं सनादं हासं मुञ्चन्ती ततः स्थानादुत्पत्य वृकणानि छिन्नानि शीर्षाणि शिरांसि येषां तेषामतिगर्वितानां पापिष्ठानां कण्ठात्स्रवन्तं प्रसृतमत्युष्णमसृगासवं रुधिररूपं मद्यं परिवारेण सह निपीयाति अत्यन्तरुधिरपानजमदेन विह्वला परवशा स्वपार्षद्गणैः सहोच्चैस्तरां जगौ गानं कृतवती ननर्त च चिशरांस्येव कन्दुकानि तेषां क्रीडया विजहार विहारं कृतवतीव ॥ १८ ॥

ननु भद्रकाल्याराधनमेवं कथं विपरीतफलं तत्राह । एवमेवेति । महद्व्यभिचाररूपः हिंसारूपः हिंसारूपोऽतिक्रमोऽपराधः कात्स्न्येंनात्मने अभिचारिनृणामेव फलति किल ॥ १९ ॥

नन्वेवमसंभावितमेवेदं यन्मरणाव्याकुलत्वं मारकेषु द्रोहाभावश्च तत्राह । न चैतदिति । हे विष्णुदत्त ! भागवतपरमहंसानां भागवताश्च ते परमहंसाश्च तेषामेवं विधानां स्वशिरश्छेदे आपतिते प्राप्तेऽपि यदसंभ्रमः यः असंभ्रमः इत्येतन्महदद्भुतमतीवाश्चर्यं न भवति परमहंसशब्दो विरक्तपरः आङ्गिरससुतस्य चतुर्थाश्रमप्रवेशाभावात् असंभ्रमे हेतुं वदन् विशिनष्टि मुक्तस्त्यक्तः देहादिष्वात्मभाव, आत्माभिमानरूपः सुदृढो ग्रन्थिर्यैः सर्वेषु भूतेषु सुहृत्सौहार्दयुक्तः आत्मा मनो येषामत एव निर्वैराणां देहात्माभिमानाभावाद्वैराभावाच्च व्याकुलत्वाद्यभाव इति भावः देहात्माभिमानादिसत्त्वेऽपि न तेषां मरणभयमस्तीत्याह । साक्षाद्भगवताभिरक्ष्यमाणानां केन अनिमिषः कालः स एवारिश्चक्रं तेन वरायुधेनाप्रमत्तेनानलसेन तैस्तैर्भावैश्च भद्रकालीमारकप्रभृतिष्वपीश्वरात्मकत्वभावैश्चेति ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उत्सिक्तमुच्छृङ्खलं मनो येषां ते तथा तेषां भगवत्कलासन्निहिताङ्गिरसकुलं कदर्थीकृत्य वृषलानां ब्रह्मर्षिसुतस्य भरतस्यालम्भनं हिंसनमतिदारुणं यत्कर्म तदुपलभ्य दृष्ट्वा ब्रह्मतेजसा शत्रुदहनलक्षणभरतस्य श्रीहरिसामर्थ्येन भृशं दंदह्यमानेन देहेन युक्ता सा भद्रकाली सहसोच्चचाल "सद्योऽर्थः सहसा श्रुत,, इति यादवः ॥ १७ ॥

या यष्टुमाकाङ्क्षिता सैवेत्येवशब्दार्थः किम्विशिष्टस्य सूनायां हिंसायामनभिमतस्यायोग्यस्य सर्वप्राणिहिंसका अपि ब्राह्मणहिंसां नानुमन्यन्त इति अमर्षरोषयोर्य आवेशः तस्य रभसेन कोलाहलेन विलसितः प्रकाशितः भृकुटिलक्षणो विटपः शाखा तथा कुटिलाभ्यां दंष्ट्राभ्यां चारुणानामीक्षणानामाटोपेन चातिभयङ्करं वदनं यस्याः सा तथा इदं जगद्धन्तुकामेवाट्टहासं कुर्वती ततः पूर्वस्थानादुत्पत्योत्थायागत्य वृक्णानि छिन्नानि शीर्षाणि येषां ते तथा तेषाम् ॥ १८ ॥

महद्व्यभिचारेण योऽतिक्रमः अनिष्टकरणं तदात्मने कर्त्रे कात्स्न्येंनैकदेशमन्तरेण फलति परिपाकं प्राप्नोति ॥ १९ ॥

आश्चर्यमेतद्यदन्तकान्तिकानीतोऽपि ब्राह्मणस्तूष्णीमासेति राजाभिप्रायज्ञो बादरायणिराह । नवा इनीति । हे विष्णुरात ! परीक्षित्स्वशिरश्छेदन आपातितेऽप्यसम्भ्रम इति यदेतद्भागवतपरमहंसानामद्भुतं नवै नैवेत्यन्वयः विमुक्तो देहादावात्मभावलक्षणसुदृढहृदयग्रन्थिर्यैस्ते तथा तेषां सर्वसत्त्वानां सुहृदश्चात्मभूताश्च सर्वसत्त्वसुहृदात्मानः तेषां सुहृदात्मा मनो तेषां ते तथा तेषामिति वा"साक्षात्प्रत्यक्षतुर्ययो"इत्यभिधानात् साक्षाद्भगवतस्तुर्यमूर्तेर्हरेरनिमिषारिवरायुधेन कालरूपचक्राख्यश्रेष्ठायुधेन तैस्तैर्भावैर्भद्रकाल्यादिसंज्ञैः परितो रक्ष्यमाणानामप्रमत्तेनेत्यनेन चक्रस्य चैतन्यमुपलक्षयति अत एव वैलक्षण्यसूचनाय भगवत् अनिमिषेत्यपसन्धिः कृतः ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

नवमोऽध्यायः ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

नवमोऽध्यायः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

भगवतः कलानामवताराणां वीराः सेनान्यो ये भक्तास्तेषां कुलं कदर्थीकृत्य दुःखयित्वा स्वैरं विहरतां यत् कर्म तदुपलभ्य देवी उच्चचाट। प्रतिमां भित्त्वा बहिर्निर्जगाम यद्वा सैव प्रतिमारूपा देव्येव उच्चचाट भरततेजसा छिन्नभिन्ना बभूव न तु तदीयासिना भरतच्छिन्नो बभूव इत्येवकारार्थो व्यक्तः सूनायामापत्काले स्वरक्षार्थमनुज्ञातायामपि हिंसायामननुज्ञातं सर्वथैव निषिद्धमालम्भनमित्यर्थः ॥ १७ ॥

अमर्षोऽपराधासहनं तद्धेतुकः कोपश्च तयोरावेशस्य योरभसो वेगस्तेन विलसितो विजृम्भितो भ्रुकुटिलक्षणो विटपः शाखा कुटिला दंष्ट्राश्च अरुणानीक्षणानि च तेषामाटोपेन प्रतापेन अतिभयानकं वदनं यस्याः सा इदं जगदपि तस्यैकस्य जगद्वर्तिनोऽपराधेनैत्यर्थः ॥ १८ ॥ १६ ॥

नन्वसम्भावितमेतद्यन्मरणेऽप्यव्याकुलत्वं मारकेषु क्रोधाभावस्तत्राह। नवेति। हे विष्णुदत्त! परीक्षित विमुक्तो देहाद्यात्मभावलक्षणः सुदृढो हृदयग्रन्थिर्यैः सर्वेषामेव सत्त्वानां स्वद्वेन्नृणामपि सुहृत्स्वरूपाणां न विद्यते निमिषमनवधानं यस्य तादृशमरि चक्रं तेन वरायुधेन करणेन भगवता कर्त्राऽप्रमत्तेन तैस्तैः प्रसिद्धैर्भावैर्भक्तवात्सल्यशिष्टपालनदुष्टनिग्रहाद्यैः ॥ २० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।

पञ्चमे नवमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

इत्थमेवं तेषां रजस्तमःस्वभावानां धनेन यो मदः स एव रजस्तेनोरिसिक्तं निर्मर्यादं मनो येषां तेषां भगवत्कलाभिर्वैदादिभिर्युक्तं वीराणां ब्राह्मणानां कुलं कदर्थीकृत्य तुच्छीकृत्य उत्पथेन कुमार्गेण स्वैरं यथेच्छं विहरतां रममाणानां हिंसैव विहारो येषां तेषां ब्रह्मभूतत्वादिगुणवतः यदालम्भनात्मकमतिदारुणं कर्म तदुपलभ्य सैव देवी अतिदुर्विषहेण ब्रह्मतेजसा दंदह्यमानं यद्वपुस्तेन हेतुना सहसा आशु उच्चचाट प्रतिमां हित्वा बहिर्निर्गताभूत् कथंभूतमालम्भनम् सूनायामपि आपत्काले अनुज्ञातायामपि प्राणिहिंसायाम् अननुमतमननुज्ञातम् ब्राह्मणवधस्य आपद्यपि निन्दितत्वमित्यर्थः अतो बुभुक्षितो गरुडः आपदि कश्यपेन निषादग्रामसमूहभक्षणे अनुज्ञातस्तत्र यदि ब्राह्मणस्ते कण्ठं प्राप्स्यति स तदा त्वां दहेत् अतस्त्वया निवारणीय इतिमहाभारते स्थितम् ॥ १७ ॥

तदनन्तरं किंवृत्तमित्यत्राह। भृशमिति। भृशमत्यर्थम् अमर्षो व्यतिक्रमासहनं ततो रोषो व्यतिक्रमोकिनोशहेतुः क्रोधस्तस्यावेशस्य रभसेन वेगेन विलसित उत्तम्भितो भ्रुकुटिरूपो विटपः शाखापरपर्यायः कुटिला दंष्ट्राश्च अरुणानीक्षणानि च तेषामाटोपेन संभ्रमेणातिभयानकं वदनं यस्याः सा इदं विश्वं हन्तुकामेव महाट्टहासं सनादं विमुञ्चन्ती ततः स्थानादुत्पत्य तेनैवासिना विवृक्णानि विदारितानि शीर्षाणि येषां तेषां गलात् स्रवन्तमसृगासवं गणेन परिकरजनसमूहेन सह निपीय जगौ ननर्त शिरांस्येव कन्दुकानि तेषां लीलया चिक्रीड च भरताग्रे इति शेषः ॥ १८ ॥

महत्सु अभिचारो द्रोहस्तन्निमित्तो नानाविधोऽपराधः ॥ १९ ॥

हे विष्णुदत्त! विमुक्तो देहेन्द्रियाद्यात्मभावलक्षणः सुदृढो हृदयग्रन्थिर्येषां तेषां सर्वसत्त्वानां सुहृत् अनुकूलः आत्मा मनो येषाम् अनिमिषः सर्वमारकः कालः अरिवरं सर्वेभ्योऽरिभ्यश्च श्रेभ्यो वरं श्रेष्ठं सुदर्शनाख्यं चक्रं ते हे आयुधे यस्य तेन भक्तरक्षणे सदैवाप्रमत्तेन साक्षाद्भगवता तैस्तैर्भावैश्चान्त्यामितया प्रवर्त्यमानैर्भद्रकाल्यादिरूपैः रक्ष्यमाणानाम् स्वशिरश्छेदे आपतिते प्राप्तेऽपि यदसंभ्रम इत्येतन्महदद्भुतं न भवति ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

नवमाध्यायार्थप्रकाशः ॥ ६ ॥

भाषाटीका

इस प्रकार से रजोगुण तमोगुण प्रकृतिवाले धन के मद से बडे रजोगुणी हिंसा में विहार करनेवाले उन शूद्रों का तेजस्वी ब्राह्मणों के कुल का अपमान करके मर्यादा को छोडकर इच्छा माफिक विहार करना इत्यादि कठिन कर्म साक्षात् ब्रह्मभूत ब्रह्मर्षि पुत्र निर्वैर सर्व सुहृत भरत जी का हिंसा करना जोकि नहीं करने के योग्य तिसको देखकर अति दुःसह ब्रह्म तेज से देवी का शरीर जलने लगा प्रतिमामें से देवी बाहर हो गई ॥ १७ ॥

तदतो देवी बडे असह्य होने से रोषके आवेश होने से जो वेग तिस से देवी का शाखारूपी भृकुटी खडी होगई और टेढी होगई टेढे भयंकर डाढ निकाल लिये लाल आंखें होगई तिनका जो संभ्रम तिससे बडा भयानक देवीका मुख होगया तब देवी ऐसी मालूम भई जैसे इस संसार को नाश करदेगी बडे जोर से अट्टहास कर वहां से उछलकर उन्हीं के उसी तरवार को लेकर उन्हीं शूद्रों के कटेहुए गलों से गिरते हुये गरम मादक-रक्त का सब गणों के साथ पान करके मदसे अति विह्वल

भाषाटीका।

होकर पार्षदों के साथ ऊंचे स्वरसे गान करने लगीं और नाचने लगीं और मूडों की गेंदों से खेलने लगीं ॥ १८ ॥

इसी प्रकार से महात्मा को अपमान करैं तो अपने ऊपर पडता है ॥ १९ ॥

हे विष्णुदत्त ! परीक्षित जी यह बात कुछ बडी अद्भुत नहीं है जो कि अपने मस्तक के छेदन का समय आने से भी जिनके भय नहीं है देहादिक में से आत्मभाव छूटगये हैं जिनकी हृदय ग्रन्थि खुलगई है वे सर्व प्राणियोंके सुहृद होगये हैं निर्वैर हैं साक्षात् चक्रायुध भगवान् सावधानतासे जिनकी रक्षा करते हैं तिन तिन भावों से वे रक्षित रहते हैं सर्व प्रकार निर्भय भगवत्पाद के वे आश्रित हैं परमहंस हैं उनको यह क्या आश्चर्य्य है ॥ २० ॥

इति श्रीभागवत पञ्चमस्कन्ध नवमाध्यायका
भाषानुवाद लक्ष्मणाचार्यकृत
समाप्त ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे नवमोऽध्यायः समाप्तः ॥ ९ ॥

दशमोऽध्यायः।

श्रीशुक उवाच।

अथ सिन्धुसौवीरपते रहूगणस्य व्रजत इक्षुमत्यास्तटे तत्कुलपतिना शिबिकावाहपुरुषान्वेषणसमये दैवेनोपसादितः स द्विजवर उपलब्ध एष पीवा युवा संहननाङ्गो गोखरवद्धुरं वोढुमलमिति पूर्वविष्टिगृहीतैः सह गृहीतः प्रसभमतदर्ह उवाह शिबिकां स महानुभावः ॥ १ ॥

यदा हि द्विजवरस्येषुमात्रावलोकानुगतेर्न समाहिता पुरुषगतिस्तदा विषमगतां स्वशिबिकां रहूगण उपधार्य पुरुषानधिवहत आह हे वोढारः! साध्वतिक्रमत किमिति विषममुह्यते यानमिति ॥ २ ॥

अथ त ईश्वरवचः सोपालम्भमुपाकर्ण्योपायतुरीयाच्छङ्कितमनसस्तं विज्ञापयाम्बभूवुः ॥ ३ ॥

न वयं नरदेव! प्रमत्ता भवन्नियमानुपथाः साध्वेव वहामः अयमधुनैव नियुक्तोऽपि न द्रुतं व्रजति नानेन सह वोढुमुह वयं पारयाम इति ॥ ४ ॥

सांसर्गिको दोष एव नूनमेकस्यापि सर्वेषां सांसर्गिकाणां भवितुमर्हतीति निश्चित्य निशम्य कृपणवचो राजा रहूगण उपासितवृद्धोऽपि निसर्गेण बलात्कृत ईषदुत्थितमन्युरविस्पष्टब्रह्मतेजसं जातवेदसमिव रजसावृतमतिराह ॥ ५ ॥

अहो कष्टं भ्रातर्व्यक्तमुरुपरिश्रान्तो दीर्घमध्वानमेक एव ऊहिवान् सुचिरं नातिपीवा न संहननाङ्गो जरसा चोपद्रुतो भवान् सखे! नो एवापर एते संघट्टिन इति बहुविप्रलब्धोऽप्यविद्यया विहितद्रव्यगुणकर्माशयस्वचरमकलेवरेऽवस्तुनि संस्थानविशेषेऽहंममेत्यनध्यारोपितमिथ्याप्रत्ययो ब्रह्मभूतस्तूष्णीं शिबिकां पूर्ववदुवाह ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

दशमे क्षिपता राज्ञा शिबिकां स्वां वहन्मुनिः।
ऋजुवादानुवादेन विज्ञायाशु प्रसादितः ॥ १ ॥
एवं भूताविकारित्वमज्ञसर्वज्ञयोः समम्।
इति सर्वज्ञता सिद्ध्यै रहूगणकथेरणम् ॥ २ ॥

रहूगणो नाम सिन्धुसौवीरदेशयो राजा तत्त्वजिज्ञासुः कपिलाश्रमं यदा गच्छतिस्म तदा यद्वृत्तं तदाह। अथेति। इक्षुमत्या नद्यास्तीरे तेषां शिबिकावाहानां कुलस्य नाथेन एष गौरिव खर इव च भारं वोढुं समर्थ इति धिया पूर्वं ये केचन विष्ट्या बलाद्गृहीतास्तैः सह प्रसभं बलाद्गृहीतः सन् अतदर्होऽपि स महानुभावः शिबिकामुवाहेत्यन्वयः ॥ १ ॥

हिंसापरिहारार्थं इषुमात्रप्रदेशावलोकस्यानु पश्चाद् या गतिस्तस्या हेतुभूतायाः पुरुषाणां गतिः न सम्यगाहिता एकरूपा नाभूत् ॥ २ ॥

सोपालम्भं साक्षेपं सामदानभेददण्डेषु उपायेषु चतुर्थाच्छङ्कितचित्ताः ॥ ३ ॥

भवन्नियमानुपथास्त्वदाज्ञानुवर्त्तिनः न पारयामो न शक्नुमः ४

कृपणानां वचो निशम्य सांसर्गिकः संसर्गनिमित्त एकस्यापि दोषः सर्वेषामेव भवितुमर्हतीति निश्चित्य रहूगण आह इत्यन्वयः। कथम्भूत उपासिता वृद्धा येन सोऽपि स्वभावेन बलात् परवशः कृतः सन् कथम्भूतं प्रत्याह न विस्पष्टं ब्रह्मतेजो यस्मिन् भस्मनाच्छन्नमग्निमिव स्थितम् ॥ ५ ॥

भ्रातरिति सम्बोधनमाक्षेपाभिप्रायं व्यक्तं निश्चितम् उरु अधिकं परिश्रान्तोऽसीत्यादीनि विपरीतार्थानि षड्वाक्यानि। ऊहिवान् प्रापितवान्। तत्रापि सुचिरं जरसा च वृद्धत्वेन। सङ्घट्टिनः सहचरा बहु यथा भवत्येवं विप्रलब्धोऽपि वक्रोक्त्या उपहसितोऽपि तूष्णीमुवाहेत्यन्वयः। तूष्णीम्भावे हेतुः अविद्यया रचिता द्रव्यादयो यस्मिन् तस्मिन् स्वचरमकलेवरेऽनध्यारोपितः मिथ्याप्रत्ययो येन। तत्र द्रव्याणि महाभूतानि गुणा इन्द्रियाणि कर्माणि पुण्यपापानि आशयोऽन्तःकरणं यतो ब्रह्मभूतः ॥ ६ ॥

अथ पुनः स्वशिबिकायां विषमगतायां प्रकुपित उवाच रहूगणः किमिदमरे त्वं जीवन्मृतो मां कदर्थीकृत्य भर्तृशासनमतिचरसि प्रमत्तस्य च ते करोमि चिकित्सां दण्डपाणिरिव जनताया यथा प्रकृतिं स्वां भजिष्यस इति ॥ ७ ॥

एवं बह्वबद्धमपि भाषमाणं नरदेवाभिमानं रजसा तमसानुविद्धेन मदेन तिरस्कृताशेषभगवत्प्रियनिकेतं पण्डितमानिनं स भगवान् ब्राह्मणो ब्रह्मभूतः सर्वभूतसुहृदात्मा योगेश्वरचर्यायां नातिव्युत्पन्नमतिं स्मयमान इव विगतस्मय इदमाह ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मामनादृत्य भर्तुः स्वामिनो मम शासनमाज्ञामतिक्रामसि ॥७॥ चिकित्सां शास्तिं दण्डपाणिर्यमो यथा जनसमूहस्य शास्तिं करोति तथा स्वां प्रकृतिम् अप्रमत्तताम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं मृत्युभयासंभ्रममभिधायाथ परापरज्ञानवत्तां प्रपञ्चयितुमाह । अथेति । सिन्धुसौवीरदेशयो राज्ञः रहूगणाख्यस्य कपिलमुनिं प्रष्टुं तत्त्वमिति शेषः तत्त्वजिज्ञासोर्व्रजतो गच्छतः सत इक्षुमत्या नद्यास्तीरे शिबिकाया मान्दोलिकाया ये वाहका वोढारस्तेषामन्वेषणसमये तेषां वाहकानां कुलस्य पत्या नाथेन स आङ्गिरससुतो द्विजश्रेष्ठो दैवादुपसादितो लब्धः पीवा पुष्टावयवः युवा संहननाङ्गः सुदृढाङ्गप्रत्यङ्गसन्धिरेष गौरिव खर इव धुरं भारं वोढुमलं समर्थ इतिधिया पूर्वं ये विष्ट्या बलाद्गृहीतास्तैः सहितः सन्नतदर्होऽपि स महानुभावः शिबिकामुवाह ऊढवान् ॥ १ ॥

यदा हि शिबिकावाहनसमये द्विजवरस्येषुमात्रप्रदेशावलोकस्यानु पश्चाद्या गतिः कुटिला तस्या हेतुभूताया: पुरुषाणां गतिर्न सम्यगाहिता एकरूपा नाभूत् इषुमात्रप्रदेशगत्यवलोकनानन्तरद्विजसंबन्धिप्रातिकूल्यगतिनिमित्तवैषम्ययुक्ता पुरुषगतिरभूदित्यर्थः तदा विषमगतां सविषममुह्यमानां स्वशिबिकामुपधार्य दृष्ट्वा रहूगणः अभिवहतः वाहकान्पुरुषानाह उवाच उक्तिमेवाह । अहो इति । अहो वोढारः ! हे वाहकाः ! साधु सम्यगतिक्रमत पादविक्षेपान् कुरुत किमिति किमर्थं यानं शिबिका विषमं यथा तथोह्यत इति ॥ २ ॥

अथ एतदुक्त्यनन्तरं ते वोढारः सोपालम्भं साक्षेपम् ईश्वरस्य भर्तुः रहूगणस्य वच आकर्ण्य उपायेषु सामदानविभिभेदेषु यस्तुरीयश्चतुर्थः तस्माच्छङ्कितमनसः निग्रहरूपादुपायाच्छङ्कितचित्ताः अस्मान् दण्डयेदिति बुद्ध्येत्यर्थः तं यानस्य विषमगतिहेतुकं द्विजम् आङ्गिरससुतं विज्ञापयांबभूवुः विज्ञप्तिपूर्वकं कथयामासुरित्यर्थः विज्ञप्तिपूर्वकत्वमेवाह । नेत्यादिना पारयाम इत्यन्तेन । हे नरदेव ! वयं न प्रमत्ताः किन्तु भवन्नियमानुवर्तिनः साध्वेव सम्यगेव वहामः अयं पुरुषोऽधुनैव नियुक्तोऽस्माभिस्सह द्रुतं नैव गच्छत्यतो वयमनेन सह वोढुं न पारयामः न समर्थाः ॥३॥

इति कृपणानां वचो निशम्य संसर्गनिमित्त एकस्यापि दोषः सर्वेषामपि भवितुमर्हति नूनमिति निश्चित्य रहूगण आहेत्यन्वयः कथम्भूत उपासिता वृद्धा येन सोऽपि स्वभावेन प्राकृतेन बलात्परवशः कृतः रजोगुणव्याप्तचित्तः कुपितमनाः सन् कथम्भूतं प्रत्याह न स्पष्टं ब्रह्मतेजो यस्मिन् रजसा भस्मना आवृतं प्रच्छन्नं जातवेदसमग्निमिव स्थितम् ॥ ४—५ ॥

उक्तमेवाह । अहो इत्यादिना संघट्टिन इत्यन्तेन । अहो भ्रातरिति संबोधनमाक्षेपाभिप्रायकं व्यक्तं निश्चितम् उर्वधिकं परिश्रान्तोऽसीत्यादीनि विपरीतार्थकानि षड्वाक्यानि एक एवोढवान् तत्रापि सुचिरं जरसा वृद्धत्वेन च उपद्रुतः दौर्बल्यं प्राप्तो भवानपरे त्वद्व्यतिरिक्ता एते संघट्टिनः सह वाहका नो एव दीर्घाध्वगमनादिकमकृत्वैव सुखिनस्तिष्ठन्तीत्येवं बहुविप्रलब्धोऽधिक्षिप्तोऽपि ब्राह्मणस्तूष्णीं पूर्ववदुवाह तत्र हेतुं वदन् विशिनष्टि । अविद्ययाहंकारममकाररूपया कर्मसंज्ञया वा हेतुभूतया विरचिताः परिणताः द्रव्याणि पञ्चमहाभूतानि गुणाः शब्दादयः ज्ञानेन्द्रियविषयाः कर्माणि वागादिकर्मेन्द्रियविषयाः अभिजल्पादयः गुणकर्मशब्दौ तदिन्द्रियाणामप्युपलक्षणौ आशयोऽन्तःकरणं वासना वा यस्मिन्नवस्तुनि वसत्येकरूपेणेति वस्तु ततोऽन्यस्मिन्सततविकारिणीत्यर्थः अवयवविन्यासविशेषरूपे स्वचरमकलेवरे तदनुबन्धिनि च अनारोपितः अहंममेत्येवं रूपो मिथ्याप्रत्ययो ज्ञानं येन अनहमर्थे शरीरे अहंप्रत्ययः रजतादिप्रत्ययवत् मिथ्येति मिथ्याप्रत्यय इत्युक्तम् ब्रह्मभूतः ब्रह्मसाधर्म्यमापत्स्यमानः तस्य ब्रह्मभावस्य सान्निध्यात्सन्नेवायं निर्देशः ॥ ६ ॥

अथ पुनः शिबिकायां विषमं नीयमानायां सत्यां रहूगणः प्रकुपितः पूर्वमीषत्कुपित आह । इदानीं तु प्रकुपित आहेति अकुपितस्यैवोक्तिमाह । किमित्यादिना भजिष्यस इत्यन्तेन । इदं किमित्याज्ञातिलङ्घित्वं दर्शयति । अरे त्वं भवान् जीवन्नपि मृतप्रायः मां कदर्थीकृत्य तुच्छीकृत्य भर्तुर्मम शासनमतिचरस्यतिक्रम्य वर्तसे ततः प्रमत्तस्य ते चिकित्सां दण्डं करोमि दण्डपाणिर्यमश्च जनसमूहस्य यथा त्वं स्वां प्रकृतिं भजिष्यसि समीचीनां करिष्यसि तथा चिकित्सां करोमीति ॥ ७ ॥

एवं बहुधिकमबद्धमनन्वितमभिभाषमाणं नराणां देवोऽहमित्यभिमानवन्तं तमसानुविद्धेनानुसक्तेन रजसा रजोगुणकार्येण क्रोधेन तन्मूलभूतमदेन सम्मोहितेन तिरस्कृताशेषभगवत्प्रियनिकेतनं भगवत्प्रियनिकेतनशब्दो भागवतपरः भगवतः प्रियनिकेतनत्वात् तिरस्कृता अशेषा भगवत्प्रिया निकेतना येन सः एतत्तिरस्कारेण सर्वेऽपि भागवतास्तिरस्कृतप्राया एवेत्यभिप्रायेणाशेषपदं प्रयुक्तं यद्वा तिरस्कृतः अशेषः सम्पूर्णः भगवतः प्रियः आश्रयो येनेति च पण्डितमात्मानं मन्यमानं योगीश्वराणां चर्यां जडवदाचरणं तस्यां नात्यन्तव्युत्पन्ना परिचिता मतिर्यस्य तं रहूगणं सर्वभूतसुहृदात्मा कृतागस्यपि सौहृदयुक्तमनाः ब्रह्मभूतो भगवान् जगदुत्पत्त्यादिज्ञानवान् ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥

उक्तेः स ब्राह्मणः भरतः विगतस्मयो विगताश्चर्योऽपि स्मयमानो हसन्निव अनेन सुप्रसन्नता द्योत्यते इदं वक्ष्यमाणमाह ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्र पुरुषान्तरसम्वादबाहुल्येन श्रद्धातिशयो भवतीति पुनरपि पञ्चस्वध्यायेषु हरेस्तत्त्वं निरूपयति । तदर्थं ब्राह्मणरहूगणयोः संलापं घटयितुमाह । अथेति । इक्षुमत्या नद्यास्तटे कस्मिंश्चिदाश्रमे स्थितं कपिलं मुनिं द्रष्टुं व्रजतो रहूगणस्यान्दोलिकावाहकपुरुषान्वेषणवेलायां तस्य राज्ञः कुलपतिना प्रधानपुरुषेण दैवेनादृष्टप्रेरकेण हरिणोपसादितः प्रापितः एष पीवा पुष्टः खरवत् धुरं शिबिकां वोढुमलं समर्थ इति निश्चित्य प्रसभं पूर्वविष्टिगृहीतैर्वाहकैः सह गृहीतोऽतदर्हः वहनायोग्यः स ब्राह्मणः शिबिकामुवाहेत्यन्वयः किं चित्रमिदमिति तत्राह । स हीति । स ब्राह्मणो महानुभावो हि यस्मात्तस्माद्ब्राह्मणेन वाहयितृत्वमनुपपन्नमिदमस्यात्यन्तायोग्यं महासामर्थ्योपेतत्वादित्यर्थः ॥ १ ॥

युगमात्रप्रदेशस्यावलोको दर्शनं युगमात्रावलोकः तदनुकूला गतिर्गमनं यस्य स तथा तस्य गत्या अन्येषां वाहकानां पुरुषाणां गतिर्न समायुक्ता न भवति यदा तदा रहूगणः अधिवहतो वोढॄनाहेत्यन्वयः अतिक्रमत पदं निक्षिपत ॥ २ ॥

सोपालम्भं सतर्जनमीश्वरस्य राज्ञः वचः तुर्यात्सामाद्युपायानाम् मध्ये चतुर्थाद्दण्डात् ॥ ३ ॥

भवतो नियमोऽनुशासनं तस्यानुपथा अनुगुणमार्गाः द्रुतमस्मत्क्रमणानुगुणं न व्रजति पारयामः पारं गच्छामः ॥ ४ ॥

नूनमिदानीमेकस्य सांसर्गिकः सम्बन्धात्सम्भूतः सम्भावनामात्रं ननु तात्त्विकं विचारासहत्वादितीममर्थमपिना सूचयति अयं दुष्ट इति निसर्गेण निश्चयेन सिन्धुविषयस्याधिपतिरहमित्यभिमानबलात्कृतः पूर्णः स्वभावान्तरं राजसं प्राप्त इति वा अत एवोत्थितकोपः ॥ ५ ॥

अहो कष्टमित्याद्याक्षेपाः विपरीतार्था वेदितव्याः भ्रातः सखे ! इत्यादिषु सम्बोधनं ज्ञातव्यं लोके भ्रात्रादिभिः सह विरोधो नान्यैरित्यत एतादृशैः शब्दैः सम्बोधनं कृतमित्यर्थः सङ्घट्टिनः सह वाहकाः ॥ ६ ॥

इत्येवम्विप्रलब्धोऽपि भर्त्सितोऽपि तूष्णीं भूत्वा शिबिकामुवाहेत्यन्वयः तूष्णींभावे कारणमाह । ब्रह्मेति । ब्रह्मभूतः ब्रह्मनिविष्टमना इत्यर्थः अत्रापि कारणमाह । चरमेति । इतः परं भौतिकं शरीरमस्य नास्तीति द्योतनाय चरमेति स्वत्वेनाभिमतेऽन्यदेहे न अध्यारोपितो मिथ्याप्रत्ययो येन स तथा अनात्मनि कर्तृत्वाभिमानो मिथ्याप्रत्ययः नत्वनिर्वाच्यलक्षणः कस्माच्छरीरस्य हेयत्वमिति तत्राह । अवस्तुनीति । अवस्तुत्वादनित्यत्वादित्यर्थः तदपि कुत इत्यत्राह । संस्थानेति । अवयवविन्यासविशेषत्वाद्घटवदित्यर्थः केन विन्यासविशेष इत्यत्राह । अविद्ययेति । हरीच्छया प्रेरितया प्रकृत्या विहितानां द्रव्याणां पञ्चभूतानां गुणानां सत्त्वादीनां कर्मणां पुण्यपापलक्षणानामाशयः समूहो यस्मिंस्तत्तथा द्रव्यादीन्याशेरते यस्मिन्निति वा विहितद्रव्यगुणकर्माशयं च स्वचरमकलेवरं चेति विग्रहस्तस्मिन् विचिकित्सया किम्फलमत्राह । यथेति । प्रकृतिं समस्वभावम् ॥ ७ ॥

एवं राज्ञोपालब्धो ब्राह्मणः किमकरोदत्राह । एवमिति । अत्रद्वाभिभाषणे कारणमाह । रजसेति । फलान्तरञ्चाह । तिरस्कृतेति । अशेषा ये भगवत्प्रिया भागवतास्तत्कालभवमनुष्यास्तेषां निकेत आश्रयो विप्रजन्मा यः स भरतोऽशेषभगवत्प्रियनिकेतः तिरस्कृतो धिक्कृतोऽशेषभगवत्प्रियनिकेतो येन स तथा तं मनुष्यपदं प्रक्षिप्य । किमिति समस्यत इतीयं शङ्का तत्कालस्थितभक्तेषु मानुषेष्वृषभात्मजः वरोऽपि धिक्कृतो राज्ञा सुहृदा वैष्णवेष्वपीत्यनेन परिहर्तव्येति सर्वभूतसुहृदो वैष्णवास्तेष्वात्मा यस्य स तथा अत एव सुहृदा वैष्णवेष्विति तर्हि किमिति धिक्कार इत्यत उक्तं योगेश्वरेति योगेश्वराणां चर्यायां शुश्रूषायां व्यवहारे वा नातिव्युत्पन्नमतिनाऽभ्यस्तबुद्धि स्मयमान इवेतीवशब्दो मन्दहासस्य स्वरूपभूतत्वं दर्शयति स्मयो नामकश्चन दोषः स विगतो यस्मात्स तथा इदं राज्ञ आक्षेपवचनानामुत्तरम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अस्य च श्रीभरतस्य भागवतपरमहंसत्वाद्भगवद्गुणसंक्रान्तत्वेन सर्वत्र समस्यापि भक्तवात्सल्यं परमस्त्येव । ननु भजतोऽपि न वै केचिदिति न्यायेनान्येषामात्मारामाणामिव तत्राप्यौदासीन्यमिति महागुणान्तरं दर्शयितुमाह । अथ सिन्ध्विति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

परिश्रान्तोऽसीति टीकादृष्टमपि सर्वत्र नास्ति परिश्रान्त इत्येव सर्वत्र पाठः ॥ ६—७ ॥

ब्रह्मभूतः देहकृत्यावेशरहितः ॥ ८—१४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वहन्तं शिबिकां स्वीयकटूक्त्यर्थकृतं मुनिम् ।
ज्ञात्वा राजावरुह्याशु तुष्टाव दशमे स्फुटम् ॥

तदेवं श्रीभरतः कणपिण्याकादिभिः स्वपालकेषु भ्रात्रादिषु तत्प्रतिवेषितेषु च कर्मित्वाद्राजसेष्वपि कृपाश्चकारैव यतो बहुकालमपि तेभ्यः स्वदर्शनं ददौ तथैव वृषलराजे दुराचारसक्तत्वादतितामसे स्वघातकेऽपि कृपाञ्चकारैव यतस्तेनापि प्रकारेण स्वस्य देव्याश्च साक्षाद्दर्शनं जन्मान्तरेऽपि तन्मुक्तिकारणं कारयामासैव तथैव रहूगणे ज्ञानित्वात् सात्त्विके राजत्वोचितरजसा शिबिकां वाहयत्यपि कृपाञ्चकारेति तत्र रजस्तमसोः प्रकाशकत्वाभावात् सत्त्वस्य तु प्रकाशकत्वात् रहूगण एव भरतस्य भक्तिज्ञानादिप्रकाशो न पूर्वयोरिति ज्ञापयन् तदुपाख्यानमारभते । अथेति । परमहंसत्वेन सर्वत्र तस्य साम्यस्यौचित्येऽपि महाभागवतत्वादेव कृपाव्याख्येया भरतस्य भक्तिज्ञानवैराग्यादिकं भगवत्कृपया शतगुणी बभूवेति एतत् कथं ज्ञायेतेत्येतदर्थं रहूगणोपाख्यानमिति च केचिदाहुः । सिन्धुसौवीरदेशयोर्नृपस्य तेषां शिबिकावाहानां कुलपतिना पीवा पुष्टाङ्गः संहननाङ्गो बलिष्ठश्च प्रसभं बलात्कृतं यथा स्यात्तथा गृहीतः अलं समर्थ इति मनसि विभाव्येत्यर्थः ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

हिंसापरिहारार्थमिषुमात्रप्रदेशावलोकनानन्तरमेव या गतिस्तस्या हेतोः पुरुषाणां गतिर्न समाहिता न सम्यगाहिता एकरूपा नाभूत् ॥ २ ॥

ईश्वरस्य राज्ञो वचः सोपालम्भं साक्षेपमुपायेषु सामदानभेददण्डेषु मध्ये तुरीयात् चतुर्थात् दण्डात् ॥ ३ ॥

न वयं प्रमत्ताः किं तु भवदाज्ञानुवर्त्तिन एव ॥ ४ ॥

निसर्गेण राजत्वाद्राजसस्वभावेन बलात्कृतः बलात्कारविषयीकृतः जातवेदसमग्निं भस्माच्छादितमिव ॥ ५ ॥

भ्रातरित्याक्षेपाभिप्रायं सङ्घट्टिनः सङ्गिनः विप्रलब्धः विपरीतलक्षणया उपहसितः तेन त्वं न श्रान्तोऽसि यतोऽधुनैवात्र नियोजितः अतिपीवा भवसि दृढाङ्गश्च भवसि युवा चासि एते अन्ये तव सङ्गिनश्च तदपि विरुद्धगत्या वोढुं न शक्नोमीति मयि राजन्यपि दुष्टतां किं प्रकाशयसीत्यर्थः। विप्रलब्धोऽपि तूष्णीमुवाह। तत्र हेतुः अविद्यया मायया रचिता द्रव्यादयो यस्मिन् तत्र स्वचरमकलेवरे न अध्यारोपितो मिथ्याप्रत्ययो येन तत्र द्रव्याणि भूतानि गुणा इन्द्रियाणि कर्माणि पुण्यपापानि आशयोऽन्तःकरणं अवस्तुनि कलेवरस्थ प्राधानिकत्वेन वस्तुत्वेऽपि स्वस्य तत्सम्बन्धाभावादेवेति भावः यतो ब्रह्मभूतः यद्यपि भरतस्य तच्छरीरं शुकदेवादीनामिवाप्राकृतत्वादनश्वरं नित्यमेव तदपि तस्य तदानीमुत्पन्नप्रेमत्वादेव भगवन्तं विना अन्यत्र स्वदेहादौ ममत्वासम्भवात् तदानीं तेन देहेन साक्षात् सेवाया अलाभादौत्कण्ठ्यवृद्ध्यातिदैन्येनाहं त्वस्याप्यनर्पणात् सर्वज्ञत्वेऽपि तत्र स्वदेहे प्राकृतत्वभानमेवातस्तत्सम्मत्या श्रीशुकदेवेनापि तत्प्राकृतमिव वर्णितं वस्तुतस्तु स्वसम्मत्या तदप्राकृतमेव व्याख्यातं सा व्याख्या च यथा अविद्यया मायया न विहिता द्रव्यगुणकर्माशया यत्र तथा भूते स्वस्य चरमेऽवशिष्टे पूर्वपूर्वेभ्यो नष्टेभ्यः कलेवरेभ्योऽवशिष्टेऽनश्वर इत्यर्थः। यद्वा सुष्ठु अचरमे अनिकृष्टे कलेवरे कर्मारब्धत्वाभावाद्वस्तुनि परमसत्ये सम्यगवस्थानविशेषो वैकुण्ठलोको यस्य तस्मिन्नपि प्रेमोत्थदैन्योदयादेव प्राकृतदेह इव अहं ममेति न अध्यारोपितो मिथ्याप्रत्ययो येन सः ॥६-७॥

अवक्षमनन्वितमनुविद्धेन ग्रथितेन तिरस्कृतः अशेषः सम्पूर्णो भगवतः प्रियो निकेत आश्रयो भरताख्यो येन तं सर्वभूतसुहृत् स्वरूपः स्वापराधिन्यपि कृपालुरित्यर्थः। पण्डितमानिनमिति तस्य किञ्चिन्मात्रज्ञानित्वं सर्वज्ञत्वेनैव ज्ञात्वेत्यर्थः। योगेश्वराणां चर्या जडादिवदाचरणं तस्यां तज्ज्ञानेइत्यर्थः स्मयमान इत्यसौ स्वं ज्ञानिनं जानात्यथ चाज्ञानिवदुक्तिरिति इवेति तस्य बहिरनिष्क्रमात् विगतस्मयः ज्ञानित्वगर्वरहितः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवं द्विजवरस्य शिरश्छेदप्रसङ्गेऽपि निर्विकारत्वमुक्त्वाथ शिविकोद्वहनदुर्वचनश्रवणादावपि निर्विकारत्वं वर्णयति दशमेनाध्यायेन। अथेति। तत्त्वजिज्ञासोः रहूगणस्य कापिलाश्रमं व्रजतः शिविकावाहपुरुषान्वेषणसमये तेषां शिविकावाहानां कुलस्य पतिना स द्विजवर उपलब्धः प्राप्तः पीवा पुष्टः संहननाङ्गः सुदृढावयवः एष गौरिव खर इव धुरं भारं वोढुमलं पर्याप्तः इति वुद्ध्या पूर्वं ये विष्ट्या "विष्टिः कर्मकरे मूल्ये भद्राऽऽजूप्रेरणेषु च" इति हैमकोशात् बलात्प्रेरणेन गृहीतास्तैः स शिविकामुवाहेत्यन्वयः कथंभूतः प्रसभं बलादेव गृहीतः सन् अतदर्होऽपि स महानुभावः ॥ १ ॥

यदा शिविकोद्वहनसमये पिपीलिकादिहिंसापरिहारार्थम् इषुपरिमितप्रदेशावलोकस्यानुपश्चाद्या गतिस्तस्या हेतुभूतायाः पुरुषाणामन्येषां वोढॄणां गतिर्न सम्यगाहिता एकरूपाभूत् तदा रहूगण आह ॥ २ ॥

ईश्वरस्य प्रजारक्षितुः सोपालम्भं साक्षेपं वचः उपायेषु सामदानभेददण्डेषु चतुर्थाच्छङ्कितचित्ताः तं द्विजवरं विज्ञापयांबभूवुः ज्ञापितवन्तः ॥ ३ ॥

हे नरदेव ! वयं प्रमत्ताः अनवहिता न किं तु भवन्नियमानुपथाः भवदीयाज्ञानुसारिणः द्रुतं शीघ्रं न व्रजति अतोऽनेन सह वोढुं न पारयामः न शक्नुमः ॥ ४ ॥

अथ रहूगणः कृपणानां तेषां वचो निशम्य श्रुत्वा सांसर्गिकः संसर्गिनिमित्तः एकस्यापि दोषः सर्वेषां संसर्गिणामेव भवितुमर्हतीति निश्चित्य उपासितवृद्धोऽपि रजसावृतमतिर्निसर्गेण राजसस्वभावेन बलात्परवशः कृतः न विस्पष्टं ब्रह्मतेजो यस्मिन् तं रजसा भस्मना छन्नं जातवेदसमग्निमिव वर्त्तमानं प्रत्युवाच ॥ ५ ॥

तदाह। अहो इत्यादिना। हे भ्रातः ! व्यक्तं निश्चितमुर्वधिकं परिश्रान्तो दीर्घमध्वानमेक एवोढवान् प्राप्तवान् तत्रापि सुचिरं नातिपुष्टः कृशोऽस्ति भवान् न संहननाङ्गः शिथिलावयवश्च जरसा च भवानुपद्रुतः संघट्टिनः सहचराः इत्येवं बहु यथा भवति तथा विप्रलब्धोऽपि विपरीतार्थैर्वाक्यैरुपहसितोऽपि अविद्यया अचेतनस्वरूपया भगवन्मायया विहिता रचिता द्रव्यादयो यस्मिन् स्वचरमकलेवरे अवस्तुनि वस्तु आत्मा तद्भिन्ने संस्थानविशेषे आकारविशेषे अनध्यारोपितः देहोऽस्मीति मिथ्याप्रत्ययो येन सः शिविकां तूष्णीं पूर्ववदुवाह ॥ ६ ॥

विषमगतायां विषमं नीयमानायां सत्यां भर्तुः स्वामिनो मे शासनमाज्ञामतिक्रामसि चिकित्सां शास्तिम् ॥ ७ ॥

अनुविद्धेन युक्तेन तिरस्कृतः अशेषस्य साङ्गोपाङ्गस्य ध्येयस्य भगवतः प्रियो निकेतो ध्यानरूप आश्रयो येन तं ब्रह्म अशेषो भगवान् भूतमनुभूतं ध्याने साक्षात्कृतं येन सः स्मयमानः स्वभावादेव हसन्निव विगतस्मयो विगतगर्वः ॥ ८ ॥

भाषाटीका।

श्री शुकदेवजी बोले इसके अनन्तर सिन्धु सौवीर देश का पति राजा रहूगण नाम का किसी समय में ब्रह्मविद्या शीखने को कपिलजी के आश्रम को जाता था तब इक्षुमती नदी के किनारे पर पालकी ढोने वाले मनुष्यों के मालिक ने दुवक्के को कोई मनुष्य ढूंढा उस समय दैवयोग से श्रीभरतजी मिले तब तिसने इनको देखा कि मोटा ताजा है जवान है दृढ शरीर वाला है तब समुझा कि बैल गधा सरीका खूब बोझा ढोवैगा इस बुद्धि से पहिले पकडे

॥ ब्राह्मण उवाच ॥

त्वयोदितं व्यक्तमविप्रलब्धं भर्तुः स मे स्याद्यदि वीर ! भारः ।
गन्तुर्यदि स्यादधिगम्यमध्वा पीवेति राशौ न विदां प्रवादः ॥ ९ ॥
स्थौल्यं कार्श्यं व्याधय आधयश्च क्षुत्तृड्भयं कलिरिच्छा जरा च ।
निद्रा रतिर्मन्युरहं मदः शुचो देहेन जातस्य हि मे न सन्ति ॥ १० ॥
जीवन्मृतत्वं नियमेन राजन्नाद्यन्तवद्यद्विकृतस्य दृष्टम् ।
स्वस्वाम्यभावो ध्रुव ईड्य ! यत्र तर्ह्युच्यतेऽसौ विधिकृत्ययोगः ॥ ११ ॥
विशेषबुद्धेर्विवरं मनाक्च पश्यामि यन्न व्यवहारतोऽन्यत् ।
क ईश्वरस्तत्र किमीशितव्यं तथापि राजन् ! करवाम किं ते ॥ १२ ॥
उन्मत्तमत्तजडवत्स्वसंस्थां गतस्य मे वीर ! चिकित्सितेन ।
अर्थः कियान् भवता शिक्षितेन स्तब्धप्रमत्तस्य च पिष्टपेषः ॥ १३ ॥

॥ श्रीशुक उवाच ॥

एतावदनुवादपरिभाषया प्रत्युदीर्य मुनिवर उपशमशील उपरतानात्म्यनिमित्त उपभोगेन कर्मारब्धं व्यपनयन्राजयानमपि तथोवाह ॥ १४ ॥

भाषाटीका ।

वेगारीयों के साथ इनको भी पकडलिया यद्यपि ये इस लायक नहीं थे तथापि जबरदस्ती करने से महानुभाव होने से पालकी को ढोने लगे ॥ १ ॥

जब हिंसा के भय से एकवाण के जाने पर्यन्त दृष्टि करके जीवों को बचाकर चलने से सबकी चाल उनके साथ नहीं मिली तब पालकी को ऊंची नीची होती देखकर ढोने वाले मनुष्यों से रहूगण बोले हे ढोने वाले ! अच्छे चलो क्यों पालकी को टेढी करते हो ॥ २ ॥

तब तो वे सब लोग राजाके भयानक वचन को सुनकर मारने से शङ्कित होकर भरतजी को राजा के आगे बताने लगे ॥ ३ ॥

वे लोग बोले हे राजन् ! हम लोग प्रमाद नहीं करते हैं आपके हुकम पर चलते हैं अच्छें हीं ढोते हैं यह मनुष्य अभी पकडागया है यह जल्दी नहीं चलता है इस के साथ हम लोग नहीं ढोसकते हैं ॥ ४ ॥

निश्चित है कि सङ्गका दोष एक का हो तौ भी सब सङ्गवालों को लगता है इस प्रकार से उनके दुखित वचनों को श्रवण करके रहूगण राजा वृद्धों के उपासना करने वाले हैं तौ भी स्वभाव के परवस होने से कुछ कुपित होकर रजोगुण की वृद्धि से छिपी हुई अग्नि सरीके छिपे ब्रह्मतेजवाले ब्राह्मण श्रेष्ठ भरतजी से बोले ॥ ५ ॥

हे भाई ! मालूम होता है कि तू बहुत श्रमित होगया है बडी रस्तातक अकेला ही ढोलाया है बडी देर भई तू तो बड़ा मोटा नहीं है दृढ शरीर वाला नहीं है बूढा होगया है हे सखे । तेरे साथ वाले दूसरे ए लोग तो नहीं ढोते हैं इस प्रकार से बहुत कठोर वचनों के कहने परभी ब्रह्मभूत भरतजी अज्ञान से रचित महाभूत सत्त्वादिगुण इन्द्रिय पुण्य पाप वाले अपने अन्त्य शरीर में तुच्छ होने से मै हूं मेरा है ऐसा मिथ्या प्रतीति को आरोप न करने से चुपही पहिले सरीके पालकी को ढोते रहगये ॥ ६ ॥

तदनन्तर फिर भी अपनी पालकी के विषम होने से कुपित होकर रहूगण राजा बोले ॥ ७ ॥

क्यों रे यह क्या है तू जीते ही मरे सरीका मेरा अनादर करके मालिक की आज्ञा को नहीं मानता है तू पागल होगया है जैसे यमराज सब मनुष्यों को दण्ड देते हैं तैसे मैं तेरी दवाई करूंगा जिससे तेरी अकल ठिकाने आजावेगी ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्र वक्रोक्त्या यदुक्तं त्वं न श्रान्तो न च दीर्घमध्वानमागत इति तत्रोत्तरमाह । त्वया यदुदितमुक्तं श्रमादि नास्तीति तद्व्यक्तं स्फुटं तत्तथैव । अविप्रलब्धं विप्रलम्भो न भवति । तदेवाह । हे वीर ! यदि भारो नाम कश्चित्स्यात्स च भर्तुर्वोढुर्देहस्य यदि स्यात् स च मे यदि प्रसक्तः स्यात्तर्हीदानीं भाराभावाद्विप्रलम्भः स्यान्न त्वेतदस्ति भारस्य वोढुश्चानिरूप्यत्वान्मम च तत्संबन्धाभावात् तथा गन्तुरधिगम्यं प्राप्यमध्वा वा यदि स्यात् । अद्धेति पाठे साक्षात्परमार्थतः । तच्च मे यदि स्यादित्यादि योज्यम् । यच्चोक्तं नातिपीवेति तत्राह । चेतनमुद्दिश्य त्वं पीवेति प्रवादो विदां

स चापि पाण्डवेय ! सिन्धुसौवीरपतिस्तत्त्वजिज्ञासायां सम्यक् श्रद्धयाऽधिकृताधिकारस्तद्धृदयग्रन्थिमोचनं द्विजवच आश्रुत्य बहुयोगग्रन्थसम्मतं त्वरयाऽवरुह्य शिरसा पादमूलमुपसृतः क्षमापयन्विगतनृपदेवस्मय उवाच ॥ १५ ॥

कस्त्वं निगूढश्चरसि द्विजानां बिभर्षि सूत्रं कतमोऽवधूतः ।
कस्यासि कुत्रत्य इहापि कस्मात् क्षेमाय नश्चेदसि नोत शुक्लः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विदुषां न भवति किन्तु मूर्खाणाम् । यतोऽयं प्रवादो राशौ भूतसङ्घे देहे एव न त्वात्मनि देह एव पीनो नाहमित्यर्थः ॥ ९ ॥

एतत्प्रपञ्चयति । स्थौल्यमिति । कलिः कलहः । अहङ्कारेण मदश्च देहेन सह तदभिमानेन जातस्य हि भवन्ति मम तु निरभिमानस्य न सन्ति यद्वा । देहे जाते यो जातस्तस्यैव तानि मम तु तत्र न जातस्य न सन्ति ॥ १० ॥

यच्चोक्तं जीवन्मृतोऽसीति तत्राप्याह । जीवन्मृतत्वं न केवलं मम किन्तु विकृतस्य सर्वस्यापि परिणामिनो दृष्टम् । यद्यस्माद्विकृतं प्रतिक्षणमाद्यन्तवत् । यदुक्तं भर्तृशासनमतिचरसीति तत्राह । स्वं च स्वाम्यं च तयोर्भावः सत्ता हे ईड्य ! यत्र पक्षे ध्रुवो यदि व्यवस्थितः स्यादित्यर्थः । तर्हि विधिर्नियोगः कृत्यं कर्म तयोर्योगो ध्रुव उच्यते उचितो भवति । "उच समवाये„ इति धातुः यदि तु तव राज्यभ्रंशो मम च राज्यं स्यात्तदा सर्वमेतद्विपरीतं स्यादित्यर्थः ॥ ११ ॥

ननु यावद्राजाहं तावत्तत्र स्वामी भवास्येवेति चेत्तत्राह । विशेषो राजभृत्यादिभेदस्तद्बुद्धेर्विवरमवकाशं व्यवहारादन्यत्र पश्यामः । मनाक् च ईषदपि अथापि तवायमभिमानश्चेत्तर्हि ब्रूहि किं ते करवामेति ॥ १२ ॥

यत्तूक्तं प्रमत्तस्य ते चिकित्सां करोमि यथा स्वां प्रकृतिं भजिष्यस इति तत्राह । उन्मत्तादिवद्वर्तमानस्य वस्तुतः स्वसंस्थां ब्रह्मभावं गतस्य भवता कृतेन चिकित्सितेन दण्डेन शिक्षितेन वा कियानर्थः मुक्तस्यार्थानर्थयोरसम्भवात् । यदि पुनरहं न मुक्तः किंतु प्रमत्तः स्तब्धः एव तथापि मम शिक्षादिकं पिष्टपेषणवद्व्यर्थमित्यर्थः नहि जडस्वभावः शिक्षयापि पटूकर्तुं शक्यत इति ॥ १३ ॥

अनुवादरूपया परिभाषया भाषणेन तं प्रत्युत्तरं दत्त्वा उपरतमनाऽस्ये देहात्मत्वे निमित्तमविद्या यस्य आरब्धफलं कर्म क्षपयन् ॥ १४ ॥

हे पाण्डवेय ! सम्यक् या श्रद्धा तयैव तत्त्वजिज्ञासायां प्राप्तोऽधिकारो येन । यथा दर्शपूर्णमासाधिकृतस्यैव गोदोहनेन पशुकामस्यापः प्रणयेदिति गुणफलसम्बन्धेऽप्यधिकारः । एवं सात्त्विकश्रद्धायामधिकृतस्यैवाधिकार इत्यर्थः । बहुयोगग्रन्थसम्मतं द्विजस्य तद्वचः श्रुत्वा विगतो नृपदेवोऽधिराज इति स्मयो गर्वो यस्य ॥ १५ ॥

द्विजानां मध्ये कतमः यतः सूत्रमुपवीतं बिभर्षि । यद्वा दत्तात्रेयादीनां मध्ये कतमोऽवधूतः । इहापि कस्मात् हेतोः प्राप्तः नोऽस्माकं क्षेमाय चेत् प्राप्तः तर्हि शुक्लः कपिलो मुनिर्न भवति किम् उतेति वितर्के ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र यदुक्तं वक्रोक्त्या त्वमुरु परिश्रान्तो दीर्घमध्वानमेक एवोढवानित्यादि तत्रोत्तरमाह । त्वयेति । यत्त्वयोक्तं तद्व्यक्तं स्पष्टमविप्रलब्धं लोकदृष्ट्या सत्यं त्वद्वचसां विपरीतार्थपरत्वेन दीर्घमार्गागमनपरिश्रमस्थौल्ययौवनाद्यभिप्रायकत्वेन प्रवृत्तत्वाल्लोकदृष्ट्याऽसत्यमेव तथाप्यन्यगतानामेतेषामन्यत्रारोपेण प्रवृत्तत्वात्परमार्थदृष्ट्या सत्यमेवेति भावः तदेव व्यनक्ति । भर्तुरिति । भर्तुरित्यादिषु तवानुषङ्गेणान्वयः यदि भर्तुर्भारः तत्प्रयुक्तः श्रमश्च स्यात् स न मे स्यान्मम भरणाभावात् यदि गन्तुरधिगन्तव्यं गन्तव्या भूमिः स्यात्स न मे अद्धा साक्षात्स्यात्साक्षाद्गमनस्याप्यभावात् पीवा पीन इति वादो राशौ भूतसङ्घाते देहे स्यान्न मे स्यादिति विदुषामात्मयाथात्म्यविदां प्रवाद इत्यर्थः ॥ ९ ॥

न मेत्युक्तम् प्रपञ्चयति । स्थौल्यमिति । व्याधयः शरीरोद्भवा रोगाः आधयः मनःपीडाः भयमागामिदुःखदर्शनजं ज्ञानं कलिः कलहः इच्छा कामः दम्भो वञ्चनं रतिर्विषयासक्तिः मन्युः क्रोधः अहमहङ्कारः अनात्मन्यात्माभिमानहेतुः मदः मोहः एते बाह्याकारा अन्तराकाराश्च सर्वे देहेन सहजातस्यापि मम स्वतो न सन्तीत्यर्थः एते देहे एव न जातस्याजातस्योत्पत्त्यादिरहितस्य मे न सन्तीति वार्थः ॥ १० ॥

यदुक्तम् । जीवन्मृत इति तत्राह । जीवन्मृतत्वमिति जीवत्वं श्वासवत्त्वं मृतत्वं त्यक्तपूर्वावस्थत्वं चैतन्यशून्यत्वं वा एतदुभयं हे राजन् ! यदाद्यन्तवदुत्पत्तिविनाशवत्तस्य विकृतस्य देहस्य दृष्टं नत्वात्मन इत्यर्थः यदुक्तं भर्तृशासनमतिचरसीति तत्स्वस्वामिभावं प्रतिक्षिपति । स्वस्वामिभावो यत्र ध्रुवः नियतः ईड्य ! हे राजन् ! तत्र नियतस्वस्वामिभाववत्सु पुरुषेषु विधिकृत्ययोगः विधिर्नियोगः शासनमिति यावत् कृत्यं कर्म च तयोर्योगो ध्रुव उच्यते उचितो भवति उच समवाये इति धातुः ययोर्जीवेशयोः स्वस्वामिभावसम्बन्धो नियतस्तयोरेव नियमेन प्रयोज्यप्रयोजकभावः त्वं चेन्न नियमेन भर्ता कालभेदेन यदि तु तव राज्यभ्रंशः मम च राज्यं स्यात्तदा विपर्ययसम्भवात् अतो न तव प्रशास्तृत्वं स्वतोऽस्ति अतः स्वस्य स्वामित्वबुद्धिर्भ्रान्तिरित्यर्थः ॥ ११ ॥

त्वं भृत्यः अहं स्वामीति वैषम्यबुद्धेर्विवरमवकाशं मनागपि दृपि व्यवहारत उक्तिमात्रादन्यत्र न पश्यामः तत्रैव सति क ईश्वरः किमीशितव्यं न त्वमीश्वरो नाहमीशितव्यः यद्ययमर्थस्त

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वानिष्टः अथापि किं कुर्मः अर्थस्थितिरन्यथा कर्तुमशक्येत्यर्थः ॥ १२ ॥

यदुक्तं प्रमत्तस्य ते चिकित्सां करोमीति तस्योत्तरमाह । उन्मत्तेति । स्वस्मिन् ब्रह्मात्मके स्वात्मनि संस्थां निष्ठां "ब्रह्मसंस्थोऽमृतत्वमेति" इति श्रुतौ संस्थाशब्दस्य निष्ठापरत्वेन प्रयोगान्निष्ठाचोपासनाया अविच्छेदः स्वसंस्थां प्राप्तस्य उन्मत्तादीननुकुर्वतः तर्जनताडनादिपरिभवार्थिनो मम हे वीर ! चिकित्सितेन दण्डेन वा कियानर्थः त्वत्कृतं प्रहरणादिकं नानिष्टं स्यादित्यर्थः यदि पुनरहं न स्वसंस्थां गतः किन्तु प्रमत्तः संसार्येव तथापि स्तब्धस्य प्रमत्तस्य मम शिक्षादिकं पिष्टपेषणवद्व्यर्थमेव ज्ञानरहिते मादृशे संसारिजने यत्त्वया चिकित्सितं दण्डप्रदानं तत्पिष्टपेषो निष्फलः पूर्वमेव संसारव्यसनातुरत्वादित्यर्थः॥१३॥

अनुवादपरिभाषयानुवादरूपभाषणपूर्वकम् एतावत्प्रत्युदीर्य प्रतिवचनं कृत्वा उपशमः अक्षोभादिरेव शीलं यस्य उपरतं निरस्तमनात्मनो देहान्तरस्य निमित्तं येन सः विद्यया निरस्तदेहान्तरसम्बन्धापादकपूर्वोत्तरसञ्चितानभ्युपगतप्रामादिकबुद्धिपूर्वकभेदभिन्नपुण्यापुण्यरूपपापः आरब्धमभ्युपगतप्रारब्धरूपमपि कर्म पुण्यापुण्यरूपम् उपभोगेनानुभवेन उपनयन् स मुनिवरः तत्तथैव पूर्ववद्राजयानमप्यूढवान् ॥ १४ ॥

हे पाण्डवेय ! स चापि सिन्धुसौवीरपती रहूगणोऽपि सम्यक्या श्रद्धा तयैव तत्त्वविजिज्ञासायामधिकृतः प्राप्तोऽधिकारभावो येन अधिकारः प्रस्तावः प्रारम्भ इति यावत् तत्त्वजिज्ञासायां कृतारम्भ इत्यर्थः अज्ञानविमोचनं बहुयोगग्रन्थसम्मतं बहुविधाध्यात्मशास्त्रसम्मतं च द्विजवचः आश्रुत्य श्रुत्वा विगलो नराणां देवोऽधिराज इति स्मयो गर्वो यस्य सः शिविकायास्त्वरयावरुह्यावतीर्य तत्पादमूलमुपसृतः द्विजपादमूलं प्रति प्रणतः क्षमापयन् वक्ष्यमाणमुवाच ॥ १५ ॥

तदेवाह । द्विजानां मध्ये त्वं कतमः निगूढः अनभिव्यक्तब्रह्मवर्चसः चरसि नाहं द्विज इति चेन्न यतः । सूत्रमुपवीतम् बिभर्षि अतस्त्वमवधूतः सर्वैः परिभाव्यवेषो ज्ञाननिष्ठः कस्य पितुर्गुरोर्वा असि पुत्रः शिष्यो वासि कुत्र भवः इहापि कस्माद्धेतोः प्राप्तः नोऽस्माकं क्षेमाय चेत्प्राप्तः किं शुक्लः कपिलो मुनिर्भवसि किम् उतेति वितर्के ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उरु परिश्रान्तो दीर्घमध्वानमेक ऊढितवान् सुचिरामिति यदुक्ष्यधायि राज्ञा तत्रोत्तरमाह। त्वयेति । भो वीर ! निरूप्यमाणे सति यद्यहं भर्ता यदि च भर्तुर्मे मम स भारः स्याद्यदि वाहं गन्ता यदि वा गन्तुर्ममाधिगन्तव्यं विषयाख्यं किञ्चित्स्याद्यदि वाध्वा मार्गः कश्चित्स्यात्तर्हि त्वयोदितमिदं सर्वं व्यक्तं स्पष्टमभिप्रलब्धं सत्यं भवेत् किन्तु नाहं भर्ता न तरां भारः नाहं गन्ता न तरां गन्तव्यं नतमां मार्ग इत्यर्थः स्वस्कन्धे शिबिकादण्डस्य प्रत्यक्षासिद्धत्वात् कथमेतद्वचनमित्यत उक्तं व्यक्तमिति "भर्ता सन् भ्रियमाणो बिभर्ति य उ त्रिधातु पृथिवीमुत द्याम्" इत्यादिश्रुतौ भरणादेर्हरिनियतत्वस्य व्यक्तमुक्तत्वात्तदभिप्रायेण भरतेनोच्यत इत्येतदपि भरणादिकं हरिरिति चिन्तयन्नृपमब्रवीदिति स्मृतिसिद्धं यदुक्तम् नाति पीवेति तत्राह । पीवेति । पञ्चभूतात्मके शरीरे पीवेति यः प्रवादः असौ विदां ज्ञानिनां पक्षे न शोभते देहस्य परिणामित्वेन चेतनस्यापरिणामित्वेन सिद्धत्वात् ॥ ९ ॥

नातिसंहननाङ्ग इत्यादि यदुक्तं तत्राह । स्थौल्यमिति । अत्र हिशब्द एवार्थे स्थौल्यादयो देहेन जातस्य देहाभिमानिनो ह्येव सन्ति न मे सन्ति देहाभिमानाभावात् "देहमानी देहजातो विदेहो वर्जित" इति वचनात् देहाभिमानिन एव स्थौल्यादिकानि नान्यस्येति बोद्धव्यमरातिस्तन्द्री अहमहङ्कारः ॥ १० ॥

जीवन्मृतोऽसीत्यस्योत्तरमाह । जीवन्मृतत्वमिति । आद्यन्तवदुत्पत्तिविनाशवद्यत्तस्य विकृतस्य जडस्य नियमेन जीवन्मृतत्वं दृष्टं तथाहि जीवनं प्राणयोगेन चेष्टावत्त्वं मृतत्वं प्राणत्यागेन रतिलक्षणसुखराहित्यमेतच्छरीरस्याविनाभूतं प्राणयुक्तेररत्या च "जडं जीवन्मृतं स्मृतम्,, इति स्मृतेः न चैवं मम चेतनस्य देहयोगवियोगलक्षणजन्ममरणे अन्तरेण स्वतो विकाराभाव नाद्यन्तवत्त्वयोगात् "नित्यो नित्यानां चेतनश्चेतनानाम्" इति श्रुतेः देहस्य सर्वथा नाशादनाशाच्चेतनस्य चेत्यादेश्च अत एव देहेन जातस्येत्युक्तं यच्च मां कदर्थीकृत्य भर्तृशासनमतिचरसीत्युक्तं तत्राकर्णयेति भावेनाह । स्वस्वामीति । यत्र यद्येष स्वस्वामिभावो ध्रुवः सत्य इति त्वयोच्यते तर्ह्यसावच्युते हरौ मुख्य इत्युच्यतां "एष सर्वेश्वर,, इति श्रुतेः नतु त्वयि तवास्मास्वेकत्वात् भृत्यत्वमेव मुख्यं तदुक्तं "स्वामित्वं तु हरेरेव मुख्यमन्यत्र भृत्यतेति एष राजा दण्डनाथ" इतिवचनात् अच्युते मुख्यत्वं कथमत्राहेतीति "मम स्वामी हरिर्नित्यं सर्वस्य पतिरेव च" इति स्मृतेः सन्ध्योपासनवन्मम स्वामी हरिरितीतिकर्तव्यतालक्षणो योग उपासनं हरावेव विहितमिति यस्मात्तस्मादिति शेषः ध्रुव इति विशेषणादन्यत्राध्रुवस्य न्यायप्राप्तत्वाच्च ॥ ११ ॥

"एको रुद्रो न द्वितीयोऽवतस्थ" इतिश्रुतेः रुद्रादीनामपि स्वामित्वप्रतीतेरिति तत्राह । विशेषबुद्धेरिति । मनागीषदपि विशेषबुद्धे रुद्रादौ मुख्यबुद्धेर्विवरमवकाशं स्वामिशब्दप्रवृत्तिनिमित्तं न पश्यामि भरतस्यापरोक्षज्ञानित्वेन करतलामलकवदशेषशब्दप्रवृत्तिनिमित्तस्यापरोक्षत्वात् पश्यामीत्युक्तं तस्मादेतद्दर्शनेन महानिति सूचितं चशब्देन कर्णताडितवत्कूयमाणस्य कथं नोदनमिति तत्राह । यद्व्यवहारतोऽन्यदिति व्यवहारतोऽज्ञरूढिलक्षणाद्यदन्यन्मुख्यं तदिति शेषः अतो देवेषु प्रतीयमानं यत्स्वामित्वं तद्धरिनियतमिति बोद्धव्यं तदुक्तं देवेषु तन्नियत्या चेति अनेन हरिमन्तरेण देवेषु यथा तारतम्यं स्वामित्वं मुख्यमिति च ज्ञातव्यम् तर्हि सिन्धुपतिरिति व्यपदेशो मम कथमित्यतो वाह । विशेषेति । सैन्धवैरज्ञैस्त्वामुद्दिश्य व्यवहारो नतु मुख्य इत्यर्थः एतदप्युक्तं त्वदादेर्व्यावहारिकमिति आदिशब्देन भवन्तो देशाधिपतय इति गृह्यते अस्तु व्यावहारिकमतः किं तत्राह । क ईश्वर इति । हरौ देवेषु च स्वामित्वमृतेऽन्यत्र मानुषेषु तस्य व्यत्यासात् को विशेषः व्यवहारमात्रान्निर्मूलमिति तत्र तस्मिन्पक्षे स्थिते मनुष्येषु क ईश्वरः स्वामी ईशितव्यं समर्थनीयं च किं न किमपीत्यर्थः तदुक्तम् "मानुषेषु विशेषः को व्यवहारमृते वद" व्यत्यासादिति तत्र हरौ देवेषु स्वामित्वे मुख्यतो यथाक्रमं स्थितेऽन्यत्र क ईश्वर इति वा यथा मानुषेषु स्वस्वामिभावस्य व्यत्यासो न तथा देवेष्विति द्योतनाय तत्रेति तदुक्तं नहि देवेषु व्यत्यासः स्वामिता-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ङ्गत इति एवं विचार्यमाणोऽन्येभ्यो जीवेभ्यस्तव विशेषाभावेऽपि संभावनार्थं तव स्वामित्वमङ्गीकृत्याप्यस्माभिः किं कर्तव्यं तद्वदेत्यभिप्रेत्याह । अथापीति । विशेषबुद्धेर्यद्विवरं पश्यामि तद्व्यवहारतोऽन्यत्र कुतः मनागल्पमज्ञविषयत्वादिति वान्वयाविशेषः अवशिष्टं पूर्ववत् ॥ १२ ॥

प्रमत्तस्य ते करोमि चिकित्सामिति यदुक्तं तत्र शृणिवत्याह । उन्मत्तेति । उन्मत्तादिस्वरूपस्थितिं स्वतन्त्रे हरौ स्थितिम् वा प्राप्तस्य मे चिकित्सितेन दण्डलक्षणेन भवता शिक्षितेन विहितेन तवार्थः कियान्न कोऽपि तव रोदनादिदर्शनेन मम मनस्तृप्तिर्भवतीति तत्राह । स्तब्धेति । स्तब्धश्चासौ प्रमत्तश्चेति स्तब्धप्रमत्तः तस्य पिष्टपेषणवन्निष्फलं चिकित्सितं शिक्षासहस्रेणापि निर्मुक्तदेहाभिमानस्य मम व्यथानुभवाभावेन रोदनाद्यनुदयादिति द्विगुणितकोपवह्निना दग्धदेहसन्तापमन्तरेणान्यत्प्रयोजनं नास्तीति भावः ॥ १३ ॥

ब्राह्मणः पुनः किमकार्षीदत्राह । एतावदिति । तथा पूर्ववदुवाहेति अनुवादपरिभाषया उक्तस्य पुनर्वचनमनुवादपरिभाषा तया अनूद्यानूद्येत्यर्थः अनात्मा देहस्तत्सम्बन्ध्यनात्म्यं देहान्तरग्रहणं तस्य निमित्तं कारणं तदुपरतं निवृत्तं यस्य तत्तथा तादृशमारब्धं फलदानायोन्मुखं कर्मोपभोगेन व्यपनयन् क्षपयन् यथा देहान्तरोत्पत्तये न स्यात्तथा भुञ्जान इत्यर्थः ॥ १४ ॥

स रहूगणस्तं परित्यज्यान्येन वाहयित्वा विवक्षितगम्यं गतः किं नेत्याह । स चेति । अपिपदेन स्वोक्तस्य गर्हितत्वं सूचयति । अधिकृताधिकारः । उपदिष्टज्ञानग्रहणयोग्यतावान् बहुयोगग्रन्थमतमनेकयोगशास्त्रसिद्धं हृदयग्रन्थिरहङ्कारबन्धस्तं मोचयतीति हृदयग्रन्थिमोचनं तत् ॥ १५ ॥

कः किं जातिविशिष्टः न दृश्यते किं सत्यमित्याह । द्विजानामिति । सूत्रं लक्षणं यज्ञोपवीतमात्रं मलिनं बहुग्रन्थिवरं न दृश्यते अतः संशयः किं चैवं विधा बहवो योगीन्द्रा भवन्ति तेषां मध्ये त्वं कतमोऽवधूतः योगीन्द्रः कस्य योगीन्द्रस्य वंशे जातोऽसि कुत्रत्यः कस्मिन्देशे विद्यमानः इहास्मिन्देशे कस्मात्कारणादभूः चेद्यदि नोऽस्माकं क्षेमायासि तर्हि शुक्लः कपिलः वासुदेवः उत किं स न भवति तल्लक्षणसामग्र्यभावादित्यर्थः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सम्यक् श्रद्धया श्रीगुरुविषयया ॥ १५—१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ज्ञानिमानिनमेनं ज्ञानेनैव परास्तीकृत्य कृपयिष्यामीत्यभिप्रेत्याह । त्वयोदितमिति । तत्र विरुद्धलक्षणया यदुक्तं त्वया त्वं न श्रान्तो न दीर्घमध्वानमागत इति तदविप्रलब्धं यथार्थमेव नत्वाक्षेपः यतो भर्तुः शिविकावाहकस्य भारो यदि मे मम स्यात्तदा स विप्रलम्भः स्यादिति सम्बन्धः अहं देहाद्भिन्नो वोढेव न भवामीति भावः । एवं गन्तुरित्यादि अधिगम्यं प्राप्यं स्थानादिकमध्वा वा यच्चयोक्तं त्वं पीवा भवसीति तत्र राशौ भूतानां राशिरूपे देहे विदां विदुषां प्रवादो न भवति किन्तु सत्यमेव पीवत्वमित्यर्थः । मयि चेतनस्वरूपे तु प्रवादः कलङ्क एवेति भावः ॥ ९ ॥

न केवलं पीवत्वमेव मे नास्त्यपि त्वन्येऽपि देहधर्मा न वर्त्तन्त इत्याह । स्थौल्यमिति । देहेन सह यो जातस्तदभिमानी जीवस्तस्यैव हि निश्चितं सन्ति नतु मे निरभिमानस्य ॥ १० ॥

यच्चोक्तं जीवन्मृतोऽसीति तत्राप्याह । जीवन्मृतत्वमिति । यदि त्वया मम देहाभिमानित्वमेव निर्धारितं तदपि जीवन्मृतत्वं नियमेन ममैव केवलं न किन्तु सर्वस्यैव विकृतस्य परिणामिनो दृष्टं प्रत्यक्षमेव यद्यस्माद्विकृतं प्रतिक्षणमेवाद्यन्तवत् यच्चोक्तं भर्त्तृशासनमतिचरसीति तत्राह । स्वञ्च स्वाम्यं स्वामित्वञ्च तयोर्भावो विद्यमानत्वं स च यत्र यदा ध्रुवः स्थिरः स्यात्तर्हि विधिकृत्ये शिविकावहनादिकर्मणि योगः अयं जनो युज्यतामित्युच्यते कथ्यते उचितो वा भवतीति "उच समवाये" इत्यस्य रूपं यदि तु तव राज्यभ्रंशो मम राज्यं स्यात्तर्हि त्वामप्यहं शिविकां वाहयन् किमिदमरे इत्यादि कथयेयमित्यर्थः ॥ ११ ॥

ननु यावद्राजाहं तावत्तव स्वामी भवाम्येवेति चेत्तत्राह । विशेषो राजभृत्यादिभेदस्तद्बुद्धेर्विवरमवकाशं व्यवहारादन्यत् न पश्यामि मनाक् ईषदपि तथापि तवायमभिमानश्चेत्तर्हि ब्रूहि किं ते करवामेति ॥ १२ ॥

यच्चोक्तं प्रमत्तस्य ते चिकित्सां करोमीति तत्राह । उन्मत्तादिवद्वर्त्तमानस्य वस्तुतस्तु स्वसंस्थामन्तर्निष्ठां गतस्य चिकित्सितेन कायिकेन वाचिकेन वा दण्डेन कियानर्थः साधितव्यः मुक्तानामर्थानर्थयोरग्रहणात् यदि पुनरहं न मुक्तः किन्तु प्रमत्तस्तब्ध एव तदापि शिक्षितेन त्वदत्तदण्डेन पिष्टपेष एव भवति यथा पिष्टं वस्तु प्रहारेणापिष्टं न भवति किन्त्वतिपिष्टं भवति तथैव प्रमत्तस्य दण्डनेन प्रमत्तता न शाम्यति किन्त्वतिप्रमत्तता स्यात् ॥ १३ ॥

अनुवादरूपया परिभाषया भाषमाणेन उपरतमनात्म्यस्य देहात्मभावस्य निमित्तमविद्या यस्य सः ननु स्वदेहाभिमानं विना तद्वचोऽनूद्य सोढुमसमर्थ इव समादधानः कथं तथा प्रत्युक्तवांस्तत्राह । उपभोगेन राजोचितैश्वर्यभोगेन ज्ञापितं यत् रहूगणस्य प्रारब्धं कर्म तदपि व्यपनयन् व्यपनेतुम् अनुवादमिषेण कृपया स्वोपदिष्टतदनुष्ठितया उक्तैव तत् प्रारब्धमपि दूरीकर्त्तुमित्यर्थः । यद्वा प्रेमोत्थदैन्येन स्वस्य भक्तत्वामननात् उपभोगेन शिविकाभारोद्वहनादिना आरब्धफलं कर्म व्यपनयन् व्यपनयामीति मनसि भावयन्नित्यर्थः ॥ १४ ॥

अधिकृतः प्राप्तोऽधिकारो येन सः ॥ १५ ॥

द्विजानां मध्ये त्वं कतमः यतस्त्वं सूत्रं विभर्षि अवधूतः किं दत्तात्रेयोऽसि कस्य पुत्रोऽसि कुत्रत्यः किंदेशजन्मासि नोऽस्माकं क्षेमाय प्राप्तश्चेत् शुक्लो नारायणो नासि उत तदवतारः कपिलो नासि ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कापिलानां मते अब्रह्मात्मकप्रधानपरिणामभूतेषु भारवाहकादिषु भारादिरूपेषु च पदार्थेषु ब्रह्मदृष्टिर्न भवति तेषां ब्रह्मकार्यत्वाभावात् स्वमते तु "यतो वा इमानि भूतानि जायन्त" इत्यादिश्रुतेः सर्वस्य ब्रह्मकार्यत्वात् "कारणं तु ध्येयः सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत" इत्यादिश्रुतिभ्यः ।

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केन चित् ।
अनिकेतः स्थिरमतिर्मद्भक्तः स मे प्रियः ॥
यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ।
वासुदेवात्मकं प्राहुः क्षेत्रं क्षेत्रज्ञमेव च ॥

इत्यादिस्मृतिभ्यश्च सर्वत्र ब्रह्मात्मकत्वदर्शी मुनिः तत्र विपरीतार्थ-वाक्येन यदुक्तं त्वं न श्रान्तो न च दीर्घमध्वानमागतः न चासहाय इति तत्रोत्तरमाह । त्वयोदितमिति । त्वया यदुक्तं श्रमादि नास्तीति सद्व्यक्तं स्फुटम् । अविप्रलब्धमुपहास्यमत्र न भवति श्रान्तत्वदूरगामित्वासहायत्वाभावात् परभावापन्नस्य ममेति भावः किं तु यदि भारो भर्तुर्वोढुर्मे स्यात् न च सर्वं भारोपलक्षितं पदार्थजातं ब्रह्मात्मकं स्यात् तदा विप्रलब्धं स्यादिति शेषः यदा तु भारः वोढुर्मे न स्यात् "तत्र को मोहः कः शोकः एकत्वमनुपश्यतः । ऐतदात्म्यमिदं सर्वम्" इत्यादि श्रुतेः सर्वस्य वोढृत्वादेः ब्रह्मात्मकत्वात्तदा तु त्वयोदितं न युक्तमिति भावः सर्वस्य ब्रह्मात्मकत्वं पश्यतो मे श्रमादि नास्तीति फलितोऽर्थः "द्वितीयाद्वै भयं भवति" इति श्रुतेः एवं यदि अध्वा गन्तुस्ते अभिगम्यं स्यात्तदा त्वयोदितं विप्रलब्धं भवतु सर्वस्योक्तश्रुत्या ब्रह्मात्मकत्वानुसन्धाने तु तन्न युक्तमित्यर्थः यच्चोक्तं नातिपीवेति तदपि राशौ पाञ्चभौतिके देहे युक्तम् । विद्यामात्मविदां तु पीवेति प्रवादो न भवति पीवा स्थूलो देह एव न त्वात्मा ॥ ९ ॥

किंच स्थौल्यमिति । कलिः कलहः अहंमदः अहङ्कारेण मदः देहेन सह जातस्य देहात्माभिमानवतो जीवस्य भवन्ति मे मम तु आत्मयाथात्म्यविदो न सन्ति ॥ १० ॥

यत्त्वयोक्तं जीवन्मृतोऽसीति जीवन्मृतत्वमपि यदाद्यन्तवत् तस्य विकृतस्य परिणामिनो देहादेरेव नियमेन दृष्टं मम नित्यज्ञानरूपस्य तु नेत्यर्थः अनुशासनमतिचरसीति त्वदुक्तः स्वस्वाम्यभावः स्वं च स्वामी च तयोर्भावः यत्र वच्यते "यदासीत्तदधीनमेवासीत्" "प्रधानक्षेत्रज्ञपतिः" इत्यादिश्रुत्या वर्ण्यते तत्र ध्रुवः हे ईड्य ! नृप असौ प्रसिद्धोऽपि नृपत्वादिविषयः यत्रास्ति तर्हि विधिकृत्यस्य विहितकर्मणो योगः फलमध्रुव इत्यर्थः ॥ ११ ॥

अध्रुवत्वमेवाह । यतो विशेषबुद्धेः अहं नरपत्यादिः स्वामी असौ नरादिः सेवक इति विशेषबुद्धेर्विवरमवकाशं व्यवहारतोऽन्यत्र पश्यामि नरपतित्वनरत्वादिव्यवहारापगमे तु क ईश्वरः किमीशितव्यं च स्यात् अतोऽसौ विधिकृत्ययोगोऽध्रुव इत्यर्थः तथापि हे राजन् ! उच्यतां ते किं करवाम ॥ १२ ॥

यच्चोक्तं प्रमत्तस्य ते चिकित्सां करोमीति तत्राह । उन्मत्त इति ॥ १३ ॥

अनुवादपरिभाषया अनुवादरूपेण भाषणेन प्रत्युदीर्य प्रतिवचनं दत्वा उपरतं निवृत्तमनात्मदेहात्मत्वे निमित्तमज्ञानं यस्य सः आरब्धफलं कर्म उपभोगेन व्यपनयन् ॥ १४ ॥

हे पाण्डवेय ! परीक्षित् ! आधिकृतः प्राप्तोऽधिकारो येन सः ॥ १५ ॥

शुक्रः कपिलः ॥ १६ ॥ १७ ॥

भाषाटीका ।

इस प्रकारसे वहुत अयुक्त भाषण करने वाले राजा के अभिमान वाले रजोगुण तमोगुण के मदसे सम्पूर्ण भगवत्प्रियों के स्थानरूप भरतजी के तिरस्कार करने वाले पण्डितमानी राजा से वे सर्वभूतों के सुहृत् ब्रह्मभूत सबके आत्मा योगेश्वरों के आचरण मे अति निपुण बुद्धि वाले भरतजी गर्वरहित होकर यह वचन वोले ब्राह्मण वोले हे वीर ! तुमारा कथन बुरा नहीं है किन्तु सच्चा ही है उस भारका ढोने वाला मैं होतातो मेरेको दुःखहोता वह तो शरीर है मै नहीं हूं यदि चलने का मार्ग मेरे लेजाने का होता तौ मेरे को श्रम होता वहतो देहका है मोटा होना भी शरीरका धर्म है ऐसा ज्ञानीयों का कथन है तो मेरेको कोइ दुःख नहीं है तुमारा कथन ठीकही है ॥ ९ ॥

मोटा पतलापन शरीर के दुःख मन का दुःख क्षुधा तृषा भय कलह इच्छा जरा निद्रा ग्लानि क्रोध अहङ्कार मद शोक ये सब देह के साथ हमको है वस्तुतः हमारे धर्म नहीं है ॥ १० ॥

हे राजन् ! जीवते मरण यहतो नियमसे सबके है क्योंकि जो विकारवान् वस्तु है वह सब आदि अन्त वाला है स्वामी सेवक भाव यदि नियमसे होता हो तो यह नियम से आज्ञाकरना आप का ठीक है सोतो ठीक है नहीं ॥ ११ ॥

हम राजा हैं यह भृत्य है इस वात में केवल बुद्धि व्यवहार को छोडकर और कोई हेतु नहीं है तो कौन स्वामी है कौन सेवक है यद्यपि ऐसा है तथापि हे राजन् ! तुमको हम क्या करैं ॥ १२ ॥

मै तो अपनी स्थिति से पागल सरीखा होरहा हूं तव मेरे दण्ड आदि चिकित्सा करने से तुमारा क्या सिद्ध होगा पागल को दंड देना तो पीसेको पीसने के तुल्य है ॥ १३ ॥

श्रीशुकदेवजी वोले उपशान्त स्वभाव वाले देहादि भावसे निवृत्त मुनिवर भरतजी प्रारब्ध कर्म के भोगसे क्षय करने के वास्ते राजाकी पालकी को फिर उसी प्रकार ढोने लगे ॥ १४ ॥

हे परीक्षितजी ! वेभी सिन्धु सौवीर देशके राजा रहूगणजी तत्वजिज्ञासामे अच्छे प्रवृत्त्य श्रद्धासे अधिकारीथे तिससे हृदयग्रन्थी के छुटाने वाले वहुत योगग्रन्थ से सम्मत ब्राह्मण के वचनको श्रवण करके तुरत उतरकर मस्तक से चरणमूल मे जाकर राजाके अभिमान को छोडकर क्षमा कराने को यह वचन वोले ॥ १५ ॥

अलक्षित होकर विचरनेवाले आप कौन हो अवधूत वेष आप हो ब्राह्मणों का यज्ञोपवीत धारण किये हो किसके पुत्र हो

नाहं विशङ्के सुरराजवज्रान्न त्र्यक्षशूलान्न यमस्य दण्डात् ।
नाग्न्यर्कसोमानिलवित्तपास्त्राच्छङ्के भृशं ब्रह्मकुलावमानात् ॥ १७ ॥
तद्ब्रूह्यसङ्गो जडवन्निगूढविज्ञानवीर्यो विचरस्यपारः ।
वचांसि योगग्रथितानि साधो! न नः क्षमन्ते मनसाऽपि भेत्तुम् ॥ १८ ॥
अहं च योगेश्वरमात्मतत्त्वविदां मुनीनां परमं गुरुं वै ।
प्रष्टुं प्रवृत्तः किमिहारणं तत्साक्षाद्धरिं ज्ञानकलावतीर्णम् ॥ १९ ॥
स वै भवांल्लोकनिरीक्षणार्थमव्यक्तलिङ्गो विचरत्यपि स्वित् ।
योगेश्वराणां गतिमन्धबुद्धिः कथं विचक्षीत गृहानुबन्धः ॥ २० ॥

भाषाटीका ।

कहां के हो इहां क्यों आये हो यदि हमारे कल्याण को आये हो तो क्या कपिलजी तो नहीं हो ॥ १७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किमनया चिन्तया शिबिकां तावद्वहामीति चेदत आह । नाहमिति । वित्तपः कुबेरः ॥ १७ ॥

यस्मादहं शङ्के तत्तस्मात्कस्त्वमित्यादिप्रश्नानामुत्तरं ब्रूहि । निगूढं पिहितं विज्ञानरूपं वीर्यं प्रभावो येन । अपारोऽनन्तमहिमा । तत्र हेतुः । नो मनसापि भेत्तुं न क्षमं न शक्यम् । किं भेत्तुमित्यपेक्षायामाह । ते वचांसीति । यद्वा मनसा युक्ताः सूक्ष्मदृष्टयोऽपि भेत्तुं न शक्नुवन्तीत्यर्थः ॥ १८ ॥

स्वस्य ज्ञानार्थितां दर्शयति । अहं चेति । इह संसारे यद्रणं शरणं तत्किमिति प्रष्टुं प्रवृत्तोऽस्मि । ज्ञानशक्त्यावतीर्णं कपिलम् ॥ १९ ॥

स एव भवान् किं स्विदेवं विचरति । गृहाविष्टः कथं विचक्षीत पश्येत ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किमनया चिन्तया शिबिकां तावद्वहामीति चेदत आह । नाहमिति । सुरराज इन्द्रः तस्य वज्रादहं न विशङ्के न बिभेमि तथा रुद्रस्य त्रिशूलात् यमस्य दण्डादपि तथाग्न्यादीनामस्त्रादपि तत्र वित्तेशः कुबेरः किन्तु ब्रह्मकुलावमानान्नितरां शङ्के ॥ १७ ॥

तस्मान्मत्प्रश्नानामुत्तरं ब्रूहि असङ्गो निष्परिग्रहः निगूढं पिहितं विज्ञानरूपं वीर्यं प्रभावो येन अपारः दुर्विभाव्याभिप्रायः जडवद्विचरसि तव वचांसि तु योगशास्त्रेण सन्दर्भितानि तत्र हेतुः हे साधो ! नोऽस्माकं मनसापि साक्षाद्दृष्ट्यापि त्वद्वचो भेत्तुमभिप्रायतोऽवगन्तुं न क्षमं न शक्यम् ॥ १८ ॥

स्वस्य ज्ञानार्थितां दर्शयति । अहञ्चेति । तत्त्वविदां चिदचिदीश्वरतत्त्वविदां मुनीनां मध्ये प्रवरं हितोपदेष्टारं ज्ञानकलया निरस्तापरिच्छिन्नज्ञानशक्त्यंशेनावतीर्णं साक्षाद्धरिं योगेश्वरं कपिलमुनिं प्रति इह संसारे यदरणं रक्षकं तत्किमिति प्रष्टुमहं प्रवृत्तः ॥ १९ ॥

लोकनिरीक्षणार्थं स एव कपिलो भवान् विचरति किंस्विदेवं कथंभूतः अव्यक्तलिङ्गः अस्पष्टहेतुः गृहासक्तो मादृशो मन्दबुद्धिर्योगेश्वराणां गतिं कथं विचक्षीत पश्येत् विद्यादित्यर्थः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु यो वा को वास्तु तव तावच्छिबिकावहनमलमिति चेत्त आह । नाहमिति । ब्रह्मकुलस्य ब्राह्मणकुलस्यावमानादपराधात् शङ्के तस्माद्ब्राह्मणश्चेत्क्षमापयितुमिच्छया पृच्छामीत्यर्थः ॥ १७ ॥

यत एवं शङ्के तत्तस्माद्यथा जडस्य सङ्गबुद्धिर्नास्ति तथा तवापीत्यसङ्गः निगूढमप्रकाशितं विशिष्टं ज्ञानवीर्यं यस्य स अत एवापारः अगाधः मादृशानामिति शेषः योगे अध्यात्मविषये ग्रथितानि सम्बद्धानि वचनानि मनसा विभेत्तुं विवक्तुं नोऽस्माकं न क्षमन्ते न शक्यानीत्यन्वयः मनसा विभेत्तुं न शक्नुमः किं पुनर्वचनेनेत्यतो मनसेति ॥ १८ ॥

अहमपि कार्यान्तरमुद्दिश्य जनपदान्तरं गमिष्यामीति शङ्कामाभूत् किन्तु ज्ञानार्थित्वेन कपिलवासुदेवम् अतो ज्ञानाधिकारित्वेन मम तत्त्वमुपदेष्टुं योग्यतास्तीत्यभिप्रेत्य विज्ञापयति । अहं चेति । अहमपीह संसारे क्लिश्यमानानां जनानां यदार्तिं अवगच्छति जानात्यनेन तत्त्वमिति ज्ञानलक्षणमरणं शरणं तत्किं प्रष्टुं प्रवृत्त इत्यन्वयः कपिलः किमयं श्रोत्रिय उत प्रवक्तेति तत्राह । गुरुमिति । श्रोतुरपेक्षिताशेषश्रोतव्यस्योपदेष्टारं केषां मुनीनां किमेते पाषाणवन्मौनशीलाश्चेन्न प्रवचनेन प्रयोजनमेतादृशशिष्यान् संगृह्य व्याख्या सर्वस्य सुशका चेति तत्राह । तत्त्वेति । तत्तत्पदार्थतत्त्वविन्मात्रविकानामप्यस्तीत्यत आत्मेति । नचायं कपिलः सांख्यशास्त्रप्रणेतेत्याह । हरिमिति । न चायं शब्दः सावकाश इत्याह । साक्षादिति । नचास्यान्यत्र व्यापृतत्वे ज्ञानोपदेशानवसर इत्याह । ज्ञानेति । ज्ञानकामधेनुप्रवृत्तयेऽवतीर्णं कलकामधेनाववितिधातुः कलाविस्तार इति वा ज्ञानव्याप्तयं इति वा अनेन तेन मम कार्यान्तरे व्यापारो नास्तीति दर्शयति ॥ १९ ॥

दृष्टः श्रमः कर्मत आत्मनो वै भर्तुर्गन्तुर्भवतश्चानुमन्ये ।
(१) यथाऽसतोदानयनाद्यभावात्समूल इष्टो व्यवहारमार्गः ॥ २१ ॥
स्थाल्यग्नितापात्पयसोऽभितापस्तत्तापतस्तण्डुलगर्भरन्धिः ।
देहेन्द्रियास्वाशयसन्निकर्षात्तत्संसृतिः पुरुषस्यानुरोधात् ॥ २२ ॥
शास्ताऽभिगोप्ता नृपतिः प्रजानां यः किङ्करो वै न पिनष्टि पिष्टम् ।
स्वधर्ममाराधनमच्युतस्य यदीहमानो विजहात्यघौघम् ॥ २३ ॥
तन्मे भवान्नरदेवाभिमानमदेन तुच्छीकृतसत्तमस्य ।
कृषीष्ट मैत्रीदृशमार्तबन्धो ! यथा तरे सदवध्यानमंहः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ततः किं प्रकृत इति तत्राह । सवा इति । भवान्स वै कपिलो भगवानेव लोकनिरीक्षणार्थं साध्वसाधुजनपरीक्षणार्थम् अव्यक्तलिङ्गो भूत्वा विचरत्यपि स्वित् किमित्यन्वयः मादृशानां संशयः श्लाघ्य इत्याशयेनाह । योगेश्वराणामिति । विचक्षीत जानीयात् अन्धबुद्धित्वे कारणं गृहानुबद्ध इति ॥ २० ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नोऽस्माकं मनसा सह योगेनोपायेन युक्त्या ग्रथितान्यपि यद्भेत्तुं न क्षमन्ते तद्ब्रूहि विशदीकुर्वित्यर्थः ॥ १८—२२ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु शिबिकारूढस्य तव किमनेन विचारेण इत्यत आह । नाहमिति । सुरराजादयो वज्रादिभिर्युधि मां हन्तुं यदि प्रयतन्ते तदपि स्वस्य वीरत्वस्वभावात् न शङ्के प्रत्युतोत्साहसुखमेव प्राप्नोमीति भावः यद्वा सुरराजादिषु जातापराधोऽहं तेषां कुपितानां वज्रादिप्रहारादपि न शङ्के इत्यर्थः ॥ १७ ॥

तत्तस्माद्ब्रूहि कस्त्वमित्यर्थः । त्वच्छिबिकावाहकोऽस्मीति चेदतः परमपि मद्विडम्बनैस्त्वामहं कमपि महायोगीन्द्रमज्ञासिषमेवेत्याह । वचांसीति । यतो योगग्रथितानि ते वचांसि नोऽस्माकं मनसापि भेत्तुं न क्षमं न क्षमाणि न शक्यानि इत्यर्थः । यद्वा वचांसि योगैर्ग्रथितान्यपि योगेश्वराणामुपदेशवाक्यानि कर्तॄणि नोऽस्मानतिकठोरान् भेत्तुं छिन्नसंशयीकर्त्तुं न क्षमन्ते न शक्नुवन्ति । कीदृशान् मनसापि सहितान् अवहितमनसोऽप्यवादित्वेन तानि जिघृक्षूनपीत्यर्थः । तव त्वेतावतापि प्रतिवचनेनैव छिन्नसंशयोऽस्मि सम्वृत्त इति भावः ॥ १८ ॥

योगेश्वराणामतिमुख्य एव मत्संशयं छेत्तुं समर्थ इति द्योतयन्नाह । अहञ्चेति । साक्षाद्धरिं श्रीकपिलदेवं ज्ञानस्य कलायै ज्ञापनाय अवतीर्णम् ॥ १९ ॥

स एव भवान् कच्चिदेव विचरति अन्धबुद्धिर्मद्विधः ॥२०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु मद्रूपादिकं स्वयमेव वेदितुमर्हसीत्यत्राह । नो मनसापि भेत्तुं न क्षमं न शक्यं यत्तत् कस्त्वमित्यादिप्रश्नानामुत्तरं ब्रूहि यतो निगूढं विज्ञानरूपं वीर्यं येन सः अपारः दुर्ज्ञेयाभिप्रायः एवं भूतो विचरसि हे साधो ! त वचांसि योगग्रथितानि ज्ञानयोगभक्तियोगविषयाणि ॥ १८ ॥

इह यदरणं शरणं तत्किमिति प्रष्टुं प्रवृत्तोऽस्मि ज्ञानशक्त्याविर्भूतं कपिलम् ॥ १९ ॥

लोकनिरीक्षणार्थं गूढचिह्नः सन् सः कपिल एव भवान् किं स्विद्विचरति गृहानुबद्धः कथं विचक्षीत पश्येत् ॥ २० ॥

———

भाषाटीका

इन्द्र के वज्रसे मै नहीं डरता हूं रुद्रजी के त्रिशूल से भी नहीं डरता हूं यमके दण्डसे भी नहीं डरता हूं अग्नि सूर्य चन्द्रमा पवन कुवेरास्त्रसे भी नहीं डरता हूं केवल ब्राह्मण कुलके अपमान से अत्यन्त डरता हूं ॥ १७ ॥

तिससे विज्ञान के गुप्त करने को आप जड सरीके निःसङ्ग होकर विचरते हो अगाध हो हे साधो ! योगग्रन्थित आपके वचनों को हम लोक मनसे भी भेद न करने को समर्थ नहीं हैं सो आप अपना हाल कहो ॥ १८ ॥

मैं तो आत्मज्ञानी मुनियों के परमगुरु योगेश्वर ज्ञानकलासे अवतीर्ण साक्षात् हरि कपिलजी को पूछने को प्रवृत्त हुआ हूं कि संसार में शरण करने को क्या वस्तु है ॥ १९ ॥

किंवा वही कपिल रूपही आप छिपकर संसार के देखने को विचरते होगे हम सरीका गृहादिक में बुद्धिवाला योगेश्वरों की गति को कैसे देख सकैगा ॥ २० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं तत्स्वरूपं पृष्ट्वा तदुक्तोत्तराण्यपाक्षिपति तत्र यदुक्तं मम श्रमो नास्तीति तत्राह । दृष्ट इति । आत्मनो मे अनुमन्ये अनुमिमे अनुमानं चैवं भवान् भारवाहमार्गेण श्रान्तः

(१) यथा श्रुतोदानायनादिभावाः समूलदृष्टोव्यवहारमार्ग इति श्रीविजयध्वजतीर्थपाठः ।

न विक्रिया विश्वसुहृत्सखस्य साम्येन वीताभिमतेस्तवापि ।
महद्विमानात्स्वकृताद्धि मादृङ्नङ्क्ष्यत्यदूरादपि शूलपाणिः ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां जडभरतरहूगणसम्वादे
दशमोऽध्यायः ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कर्तृत्वात् यः कर्ता स श्राम्यति यथाऽहं युद्धादिकर्तेति । नन्विदं व्यवहारमात्रं न तु सत्यम् । यदुक्तं व्यवहारतोऽन्यत्र पश्यामीति तत्राह । यथेति । व्यवहारमार्गः प्रपञ्चः समूलः सप्रमाणक एव दृष्टः । यथा यथावत् । असता घटादिनोदकानयनादेरभावात् । एवं प्रयोगः । प्रपञ्चः सत्यः अर्थक्रियाकारित्वात् यः पुनरसत्यः नासावर्थक्रियाकारी यथा मिथ्याघटादिरिति ॥ २१ ॥

यदुक्तमुपाधिधर्माः स्थौल्यादयो मे न वस्तुतः सन्तीति तत्रौपाधिकत्वेऽपि सत्यत्वं किं न स्यादित्याह । स्थाल्या अग्निना तापात्तन्मध्यवर्तिनः क्षीरस्य तापः तस्य तापात्तण्डुलानां बहिर्भागस्य ततस्तद्गर्भस्य च रन्धिः पाकः । न चात्र किञ्चिन्मिथ्या एवं देहादिभिः सन्निकर्षात्सम्बन्धात्तन्निमित्ता संसृतिः पुरुषस्य भवति । असवः प्राणाः आशयो मनः अनुरोधादुपाधिधर्मानुवृत्तेः । तथाहि । निदाघादिना देहे तप्ते इन्द्रियाणां तापस्ततः प्राणस्य ततो मनस इत्येवं यथायथमूह्यम् ॥ २२ ॥

यदुक्तं स्वस्वाम्यभावो ध्रुव इति तत्राह । शास्तेति । अध्रुवत्वेऽपि यदा यो नृपतिः स प्रजानां शास्ता गोप्ता च । यच्चोक्तं स्तब्धादेः शिक्षा पिष्टपेष इति तत्राह । योऽच्युतस्य किङ्करः स पिष्टं न पिनष्टि निष्फलं न करोति । स्तब्धत्वाद्यनपगमेऽपि शास्तुरीश्वराज्ञासम्पादनेनैव सफलत्वात्तदाह । स्वधर्मरूपमच्युतस्याराधनं कुर्वन्नहमाशघौघं विजहाति ॥ २३ ॥

यस्मादेवं मम त्वदुक्तं विपरीतं प्रतिभाति तत्तस्मान्नरदेवाभिमानमदेन तुच्छीकृतास्तिरस्कृताः सत्तमा भवादृशा येन तस्य मे मैत्रीदृशं स्नेहयुक्तां दृष्टिं कृषीष्ट करोतु सतामवज्ञारूपं पापं यथा तरिष्यामि ॥ २४ ॥

ननु ममावज्ञाकृतविकाराभावात्कुतः पापं तत्राह । नेति । यद्यपि तव विक्रिया नास्ति । विश्वस्य सुहृच्चासौ सखा च तस्य अतः सर्वत्र साम्येन स्वदेहे विगताभिमानस्य तथापि महतामवमानान्मादृशो विनङ्क्ष्यति अदूरात् क्षिप्रं शूलपाणिरिवातिसमर्थोपीत्यर्थः ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
दशमोऽध्यायः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं तत्स्वरूपं पृष्ट्वा तदुक्तोत्तराण्याक्षिपति । तत्र यदुक्तं मम श्रमो नास्तीति तत्राह । दृष्ट इति । देहादन्यत्वेऽपि देहयोगादात्मनो मम कर्मतः युद्धादिकर्मणा श्रमो दृष्टः अतो मद्दृष्टान्तेन भर्तुर्भारस्य गन्तुरध्वनश्च गन्तुर्भवतोऽपि श्रममनुमन्येऽनुमिमे भवता श्रान्तेन भवितव्यं भर्तृत्वाद्गन्तृत्वाच्च यथा युद्धादिकर्ताहमित्यनुमिनोमीत्यर्थः । नन्विदं व्यवहारमात्रं न तु सत्यं तत्राह । असता घटादिना उदकाहरणाद्यभावदर्शनात् सता तु दर्शनाच्च व्यवहारमार्गः प्रपञ्चः समूलः प्रमाणमूलक एवेष्टः अत्रायं प्रयोगः प्रपञ्चः सत्यः अर्थक्रियाकारित्वात् यः पुनरसत्यः नासावर्थक्रियाकारी यथा शुक्तिरजतादिरिति ॥ २१ ॥

आत्मनः स्वतो दुःखाद्यभावेऽपि देहसंसर्गो तत्सम्भवतीत्यभिप्रायेणाह । स्थालीति । स्थाल्यादिगताग्नितापात्तन्मध्यवर्तिनः शिशिरस्य पयसोऽभितापस्तस्य तापात्तण्डुलगर्भविक्लित्तिर्भवति तत्तस्माद्दृष्टान्तदर्शनाद्देहादीनां सन्निकर्षादनुरोधात्सन्निकृष्टस्यावर्जनीयत्वात्तन्निमित्ता पुरुषस्य संसृतिः सुखदुःखाद्यनुभूतिर्भवतीत्यर्थः असवः प्राणा आशयो वासना अन्तःकरणं वा ॥ २२ ॥

तथाहि निदाघादिना देहे तप्ते इन्द्रियाणां तापः ततः प्राणस्य ततो मनसस्तत आत्मन इत्येवं च सति दण्डयितृत्वादिकमपि सफलमित्याह । शास्तेति । यदाहं कर्मवशान्नृपतिस्तदा प्रजानामुत्पथवर्तिनीनां शास्ता सन्मार्गवर्तिनीनां तु गोप्ता ननु पूर्वमेव व्यसनातुरं दण्डयन्पिष्टं पिनष्टीत्युक्तमिति चेत्तत्राह । अच्युतस्य भगवतः स्ववर्णाश्रमधर्मेण किङ्करः आराधकः भगवदाराधनस्वरूपं स्वस्ववर्णाश्रमप्रयुक्तं निग्रहादिकं कुर्वन् पिष्टं न पिनष्टि नैष्फल्यं न प्राप्नोति यत्स्ववर्णाश्रमोचितं कर्म ईहमानः कुर्वाणः अघौघं पापराशिं विजहाति विधुनोति ॥ २३ ॥

तस्मादेवं जिज्ञासुत्वाद्धे आर्तबन्धो ! नरदेवोऽहमित्यभिमानजमदेनानादृतसज्जनस्य मे मह्यं मैत्रीदृशं स्नेहयुक्तां दृष्टिं कृषीष्ट कुरु यया दृशा सदवज्ञानं सतामवज्ञानरूपमंहः पापं तरे तरिष्यामि ॥ २४ ॥

ननु ममावज्ञाकृतविकाराभावात्कुतः पापं तत्राह । नेति । विश्वसुहृदीश्वरः सखा यस्य स विश्वसुहृत्सखः "द्वा सुपर्णा सयुजा सखाया" इति श्रुतेः तस्य साम्येन सर्वस्य ब्रह्मात्मकत्वभावेन वीता निरस्ताऽभिमतिर्देहात्माभिमतिः स्वतन्त्रवस्त्वभिमतिश्च यस्य तव यद्यपि मत्कृतादवज्ञानाद्विकारो नास्ति तथापि महतामवमानात्स्वकृतान्मादृशो जन्तुः शूलपाणिरिवातिसमर्थोऽप्यदूरात् क्षिप्रं नङ्क्ष्यति स्थावरतामेष्यति

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्थावरताप्राप्तिरेव हि जीवस्य विनाशो नाम तत्र नितरां चैतन्यानभिव्यक्तेः ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
दशमोऽध्यायः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अधुना यत्त्वयोक्तं भर्तुर्मम भारो नास्ति गन्तुः क्रमतः श्रमो नास्तीति तत्राह । दृष्ट इति । यथात्मनो मम भर्तुः कण्ठभुग्नताहेतुर्भारो गन्तुर्गमनलक्षणात्क्रमतः श्रमः पादवेदनालक्षणो दृष्टस्तथा भर्तुर्गन्तुर्भवतोऽद्य वहनगमनादिक्रियादर्शनाच्छ्रमो युक्त इति मन्ये वै सर्वानुभवसिद्ध इति न केवलं दृष्टिः श्रुतिरप्यस्तीत्याह । श्रुतेति । श्रुता उदानयनादिभावा इति प्रयोगमुत्सृज्य एकपद्येन प्रयोगस्तु छान्दसः उदानयनादिभावा जलाहरणसाधनघटादिपदार्था वोढॄणां श्रमजनकाः श्रुताः इतीदमपि श्रमसद्भावे प्रमाणमित्यर्थः "भावो लीला क्रिया चेष्टा" इत्यभिधानाज्जलानयनादिक्रियाः श्रमहेतव इति वा किमत इति तत्राह । समूल इति । यतो वहनगमनादिक्रियाः श्रमजनकत्वेन सत्याः तस्माद्धानोपादानादिव्यवहारमार्गः समूलः सप्रमाणः दृष्टः साक्षिसिद्ध इत्यर्थः केचिदुदानयनादिभावेति पठन्ति तत्र श्रुतेति पदच्छेदः क्रियावाचिनो भावशब्दस्य टापि कृते स्त्रीलिङ्गत्वं साधु अनेन जीवन्मृतत्वं नियमेन राजन्नित्यत्र यद्देहस्येति उक्तं तत्प्रत्युक्तं "शतं कुम्भमसिञ्चन्तं सुराया" इति श्रुतेः क्रियायाश्चेतननियतत्वात् ॥ २१ ॥

स्थौल्यादयो न मे सन्तीति यद्वादि तत्रोच्यते । स्थालीति । स्थाल्याः भाण्डस्याग्निना तापात् भाण्डस्थपयसो जलस्य तापः स्यात्तस्य पयसस्तापात्तण्डुलगर्भस्य तण्डुलान्तःसारस्य रन्धिः पाकः संयोगलक्षणसम्बन्धपरम्परयाऽन्नाख्यकार्योत्पत्तिर्यथा तथा देहश्चेन्द्रियाणि चासवश्चाशयोन्तःकरणं ते तथा तेषां सन्निकर्षात्संयोगलक्षणसम्बन्धात् या स्थौल्यादिलक्षणा संसृतिः सा पुरुषस्य भवतीत्यन्वयः कुतः अनुरोधात् अभिमानात् नचाभिमानो नास्तीति वाच्यं देहसद्भावेऽभिमानस्यावश्यं भावित्वाद्ग्निसन्तप्तायोवत् ननु हेयाहेययोः स्वरूपे सामान्यतो ज्ञातेऽत्र प्रश्नपूर्वकं विशेषतो जिज्ञासा सङ्घटीतीति तदभावे स्तम्भसम्बोधनवद्व्यर्थः स्यादित्यतो वा हेयस्वरूपं निरूपयति । स्थालीति । अर्थस्तूक्त एव आत्मा संसारी संसारान्तः पातित्वादन्तः करणवत्स [१] च सत्योऽर्थक्रियाकारित्वादात्मवदित्याद्यूहनीयम् ॥ २२ ॥

स्तब्धप्रमत्तस्य च पिष्टपेष इति यदुक्तं तत्राह । शास्तेति । यो नृपनिर्दुष्टप्रजानां शास्ता शिष्टप्रजनां गोप्ता देवब्राह्मणमुनीनां किङ्करश्च स्वविहितं नित्यनैमित्तिकं कर्माच्युतस्याराधनं स्वधर्मं यदीहमानः कुर्वाणश्च भवति तर्हि स राजा पिष्टं न पिनष्टि निष्फलव्यापारवान्न भवति किन्तु सफलव्यापारवानेव एतत्कुतोऽवगम्यत इति तत्राह । त्रिजहातीति । ज्ञानमन्तरेणान्येन न हन्यन्त इत्यघानि दुःखान्याधिव्याधिनिमित्तानि तेषामोघो यस्मिन् स संसारस्तथा तं विजहाति मुञ्चति मुक्तो भवतीत्यर्थः एवं संसारस्वरूपं निरूप्य राज्ञः स्वधर्मं निरूपयतीत्यतो वाह । शास्तेति ॥ २३ ॥

यत एवं मम ज्ञानं शबलं न शुद्धं फलादर्शनादतः संसारनिर्मूलनकरं ज्ञानमुपदिशेत्याह । तन्म इति । नराणां देवोऽहमित्यभिमाननिमित्तमदेन तुच्छीकृतसत्तमस्य धिक्कृतसज्जनोत्तमस्य मे यया दृशा सदवध्यानं सज्जनावज्ञाननिमित्तमंहः पापं तरेयं तीर्णो भवामि तां मैत्रीं मित्रं सर्वस्मादिष्टतमो हरिस्तद्विषयां दृशं कृषीष्ट अत्र करणं नाम प्रकाशनं विवक्षितं नत्वविद्यमानस्य निर्माणं प्रकाशयेत्यर्थः मुक्तौ मुख्यं साधनं ब्रह्मज्ञानमेवान्यत् सर्वं तत्साधनमिति द्योतनाय वा कृषीष्टेत्युक्तम् आर्तबन्धो इत्यनेन संसारान्धकूपे पतितानां जनानां दीपिकालक्षणदृष्टिप्रदानेन समुद्धरणबन्धुभूतस्त्वमेव त्वादृशोऽन्यो नास्तीति स्वाभिप्रायासिद्ध्ये प्रयुक्तमिति ज्ञातव्यं "हि गतौ" इति धातोर्गतेर्ज्ञानस्य प्रतिबन्धकत्वेन पापार्थे अंह इति निपातनात् साधुः ॥ २४ ॥

शिविकावाहनलक्षणयाऽस्मदवज्ञया तव कोपादिविकारो नास्तीत्याह । न विक्रियेति । विश्वसुहृत् विश्वस्य विश्वात्मना सर्वप्रकारेण वा सुहृत् श्रीनारायणः स एव सखा यस्य स तथा तस्य ते तव विक्रिया सन्तापलक्षणो मनसि विकारः कोपो वा नास्ति केन हेतुनेत्यत उक्तम् । साम्येनेति । मानावमानयोः समत्वकारणेन "मानावमानयोस्तुल्य" इति स्मृतेः तत्रापि किङ्कारणमत्राह । वीताभिमतेरिति । वीता विगताभिमतिरभिमानो यस्य स तथा तस्य सामान्यज्ञानिनोऽपि मनसि विकारो न स्याद्विशिष्टज्ञानिनस्तस्य तव किं वक्तव्यमित्यपिशब्दार्थः वीताभिमानत्वेन तव मनसि विकाराभावोऽपि सम्भावित इति वा मम तु देहाभिमानो दुस्त्यजो यतोऽतो महदवज्ञाने प्राप्ते शास्त्रतः कर्तव्य आत्मदाहो न कृत इत्याशयेनाह । महद्विमानादिति । मादृक् पुरुषः स्वकृतान्महतां भवादृशस्य विमानादवज्ञानाददूरात्तदानीमेवात्मानं धक्ष्यति दहति न केवलं मादृगेवात्मानं दहति किन्तु मत्तोऽप्यधिकः शूलपाणिः सदा शिवोऽपि स्वतो महदवज्ञानादात्मानं दहति ।

ब्रह्महत्यासहस्रस्य पापं शाम्येत् कथञ्चन ।
न पुनस्त्वदवज्ञाने कल्पकोटिशतैरपि ॥
स्वतो महदवज्ञानाद्रुद्रोऽप्यात्मानमादहेत् ।

इति वाक्यद्वयं हिशब्देनोपात्तमिति ज्ञातव्यमतो भवन्तं प्रार्थय इत्यपिशब्दार्थ इति ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
दशमोऽध्यायः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

किङ्करो वेदरूपेश्वराज्ञाकारी मादृशो जनः ॥ २३—२५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
दशमोऽध्यायः ॥ १० ॥

---

(१) संसारः ।

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कपिलदेवं प्रष्टुं प्रवृत्तोऽहमधन्येव तमिमं प्राप्तस्तदेतदुत्तरायणैव प्रथममाक्षिपन् सर्वमेव स्वजिज्ञास्यमाविष्करिष्यामीति मनसि विचारयन् यदुक्तं मम श्रमो नास्तीति तत्राह । दृष्ट इति । आत्मनो मे अनुमन्ये अनुमिमे अनुमानञ्चैवं भवान् भारवाहादिना श्रान्तः कर्तृत्वात् यः कर्त्ता स श्राम्यति यथाहं युद्धादिकर्त्तेति नचेदं व्यावहारिका एवं जल्पन्ति ननु पारमार्थिका इति वाच्यं व्यवहारमार्गस्यापि निर्मूलीकर्तुमशक्यत्वादित्याह । यथेति । घटादिकरणकजलादिकमाहरेत्युक्ते असता घटादिना उदकानयनादेरदृष्टत्वात् व्यवहारमार्गः प्रपञ्चः समूलः सप्रमाणक एवेष्टः । यथा यथावत् एव प्रयोगः प्रपञ्चः सत्यः अर्थक्रियाकारित्वात् यः पुनरसत्यः नासावर्थक्रियाकारी यथा मिथ्या घटादिरिति ॥ २१ ॥

भारोद्वहनादिना देहेन्द्रियादेः श्रान्त्या आत्मा विश्रान्तो भवतीति तत्र दृष्टान्तमाह । स्थाल्या अग्निना तापात् तन्मध्यवर्त्तिनः पयसस्तापः । तस्य तापात् तण्डुलानां बहिर्भागस्य तापः ततस्तद्गर्भस्य रन्धिः पाको यथा तथैव देहादिभिः सन्निकर्षात् सम्बन्धात् तत्संसृतिस्तन्निमित्तकः संसारः पुरुषस्य भवति असवः प्राणाः आशयो मनः । अनुरोधादुपाधिधर्मानुवृत्तेः । यथा निदाघादिना देहे तप्ते इन्द्रियाणां तापः ततः प्राणस्य ततो मनसस्तत आत्मन इति ॥ २२ ॥

यदुक्तं स्वस्वाम्यभावो ध्रुव इति तत्राह । शास्तेति । अध्रुवत्वेऽपि यदा यो नृपतिः स प्रजानां शास्ता गोप्ता च भवत्येव यच्चोक्तं स्तब्धादेः शिक्षा पिष्टपेष इति तत्राह । योऽच्युतस्य किङ्करो मद्विधः स पिष्टं न पिनष्टि यतस्तब्धत्वाद्यनपगमेऽपि शास्तुरीश्वरस्याज्ञासम्पादनेनैव फलवत्त्वात्तदाह । प्रजाशासनलक्षणं स्वधर्मरूपमच्युतस्याराधनं नृप ईहमानः कुर्वन् स्वस्याघौघं प्रत्यवायसमूहं जहाति ॥ २३ ॥

यस्मादेवं मम त्वदुक्तं विपरीतं विभाति । तत्तस्मान्नरदेवोऽहमित्यभिमानेन यो मदो विज्ञंमन्यत्वादिर्मिथ्यागर्वस्तेन तुच्छीकृता इमे किं जानन्तीत्यनादृताः सत्तमाः भवादृशा येन तस्य मे मैत्रीदृशा दुर्जीवोऽयं नरकेऽपि पतिष्यतीति विभाव्य स्नेहयुक्तां दृष्टिं कृषीष्ट करोतु यया सतामवज्ञारूपमंहस्तरिष्यामि ॥ २४ ॥

ननु त्वत्कृतेन तिरस्कारेणास्मादृशां दुःखं नोत्पद्यते कुतस्तत्राघस्तत्राह । नेति । तथापि तव यद्यपीत्यर्थः। तदपि मादृक् विनङ्क्षाति शूलपाणिसदृशोऽपि यदुक्तं सेर्ष्यं महापुरुषपादपांशुभिर्निरस्ततेजःस्वित्यादि ॥ २५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

पञ्चमे दशमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इत्थं तत्स्वरूपं पृष्ट्वाथ यदुक्तं मम ब्रह्मात्मकत्वानुसन्धानवतः श्रमो नास्तीति तत्राह । दृष्ट इति । कर्मतः श्रमः सामान्यतः सर्वेषां दृष्टः अतः ब्रह्मात्मकत्वानुसन्धानवतोऽपि भर्तुर्वोढुः गन्तुर्भवतश्च भवतोऽपि अनुमन्ये यदुक्तं विशेषबुद्धेर्विवरं व्यवहारतोऽन्यं न पश्यामीति तत्राह । यथेति । व्यवहारमार्गः नरदेवः नरादिस्वस्वामिभावरूपः समूल दृष्टः ब्रह्ममूल इत्यर्थः अतो यथा यथावदेव ब्रह्मविचारवदादरणीय इत्यर्थः व्यवहारस्य निर्मूलत्वं तु न सम्भवतीति हेतुना साधयति । असता निर्मूलेन घटादिना उदानयनाद्यभावादिति ॥ २१ ॥

यच्चोक्तं स्थौल्यादयः देहात्ममानिनः सन्ति न त्वात्मविद इति तत्राह। स्थालीति। स्थाल्या अग्निना तप्तायास्तद्गतस्य क्षीरस्य तापस्तत्तापतस्तण्डुलगर्भस्य रन्धिः विक्लित्तिः एवं देहादिभिः सन्निकर्षात्संबन्धात् अनुरोधात्स्वस्वकर्मानुरोधात् तत्तस्य देहादिसंसर्गिणः अज्ञस्य ज्ञानिनश्च पुरुषस्य संसृतिः सुखदुःखाद्यनुभूतिर्भवति असवः प्राणाः आशयोऽन्तःकरणम् ॥ २२ ॥

यदप्युक्तमसौ विधिकृत्ययोगः अध्रुव इति तत्राह। अध्रुवत्वेऽपि यदा यो नृपतिः स प्रजानां शास्ता गोप्ता च भवत्येव यदुक्तं स्तब्धादेः शिक्षा पिष्टपेष इति तत्र स्तब्धादयो राज्ञा धृतदण्डाः स्वर्गं यान्ति राजा च निष्पापो भवतीत्याह। यो ऽच्युतस्य किङ्करः यथायथं प्रजाशासनेन आज्ञापालकः पिष्टं न पिनष्टि किन्तु प्रजां शोधयति स्वयं च प्रजाशासनाख्यस्वधर्मरूपमच्युतस्याराधनमीहमानोऽघौघं विजहाति ॥ २३ ॥

योगशास्त्रे राजशास्त्रे च स्वकौशलं प्रदर्श्यापराधनिवृत्त्यर्थं प्रार्थयते । तदिति । तत्तस्यासमीक्ष्यकारिणो मे नरदेवमदेन तुच्छीकृतः सत्तमो येन तस्य मैत्रीदृशा स्नेहदृष्टिं कृषीष्ट करोतु यथा सदवध्यानमंहः महदवज्ञारूपं पापं तरे तरिष्यामि ॥ २४ ॥

विश्वस्य सुहृच्चासौ सखा च स तथा तस्य साम्येन सर्वत्र ब्रह्मात्मकत्वानुसन्धानेन वीता अभिमतिरुत्तमत्वाभिमानो यस्य तस्य तव यद्यपि विक्रिया नास्ति तथापि महतां विमानादवमानात् मादृक् नङ्क्ष्यति अदूरात् क्षिप्रं शूलपाणिरतिप्रबलोऽपीत्यर्थः ॥ २५ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

दशमाध्यायार्थप्रकाशः ॥ १० ॥

भाषाटीका ।

आपने जो कहा मेरे को श्रम नहीं है तिसमें हमारा कथन है कि मेरे को जैसे युद्धादिक करने से श्रम होता है तैसेही बोझा ढोने से तथा चलने से आपको भी होता होगा जैसे झूंठे घडा से जल नहीं लाया जाता है तैसे मिथ्या सब जगत् हो तो कोई व्यवहार नहीं होगा ॥ २१ ॥

जैसें कि वर्तनमें अग्नि के ताप लगने से जल तपता है तिसके तपने से चामल के भीतर का अंश पकजाता है तैसेंहीं घामादिकों से देह तपता है फिर इन्द्रिय तपती हैं फिर प्राण फिर मन इसप्रकार आत्मा को संताप होना सत्य ही है ॥ २२ ॥

भाषाटीका ।

राजा तो प्रजों का शासन तथा रक्षा करनेवाला है सो ईश्वर की आज्ञा को करनेवाला है वह पीसे को नहीं पीसता है भगवान् की आज्ञा करना स्वधर्म है वही अच्युत का आराधन है तिसके करने से सब पाप दूर होते हैं ॥ २३ ॥

तिससे हे मुनिवर्य!नरदेव के अभिमान के मदसे आपसरीके महत्पुरुषों के तिरस्कार करनेवाले मेरेपर आप मित्रदृष्टी करो हे आर्तबन्धो ! जैसे सत्पुरुषों के अपमान के पापों से छूटें तैसा उपाय कीजिये ॥ २४ ॥

यद्यपि समदृष्टि होने से अभिमान के छोडने से सबके सुहृत सखा होने से आपके मन में कोई विकार नहीं है तथापि हम सरीका पुरुष तो महात्मों के अपमान करने से रुद्रके तुल्य हो तौ भी शीघ्र ही नष्ट होजायगा ॥ २५ ॥

इति श्रीभागवत पञ्चमस्कन्ध दशमाध्यायका
भाषानुवाद लक्ष्मणाचार्य्यकृत
समाप्त ॥ १० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे दशमोऽध्यायः समाप्तः ॥ १० ॥

एकादशोऽध्यायः ।

ब्राह्मण उवाच

अकोविदः कोविदवादवादान् वदस्यथो नातिविदां वरिष्ठः ।
न सूरयो हि व्यवहारमेनं तत्त्वावमर्शेन सहामनन्ति [1] ॥ १ ॥
तथैव राजन्नुरुगार्हमेधवितानविद्योरुविजृम्भितेषु ।
न वेदवादेषु हि तत्त्ववादः प्रायेण शुद्धो नु चकास्ति साधुः ॥ २ ॥
न तस्य तत्त्वग्रहणाय साक्षाद्वरीयसीरपि वाचः समासन् ।
स्वप्ने निरुक्त्या गृहमेधिसौख्यं न यस्य हेयानुमितं स्वयं स्यात् ॥ ३ ॥
यावन्मनो रजसा पूरुषस्य सत्त्वेन वा तमसा वानुरुद्धम् ।
चेतोभिराकूतिभिरातनोति निरङ्कुशं कुशलं चेतरं वा ॥ ४ ॥
स वासनात्मा विषयोपरक्तो गुणप्रवाहो विकृतः षोडशात्मा ।
बिभ्रत्पृथङ्नामभि रूपभेदमन्तर्बहिष्ट्वं च [2] पुरैस्तनोति ॥ ५ ॥
दुःखं सुखं व्यतिरिक्तं च तीव्रं कालोपपन्नं फलमाव्यनक्ति ।
आलिङ्ग्य मायारचितान्तरात्मा स्वदेहिनं संसृतिचक्रकूटः ॥ ६ ॥
तावानयं व्यवहारः सदाविः क्षेत्रज्ञसाक्ष्यो भवति स्थूलसूक्ष्मः ।
तस्मान्मनो लिङ्गमदो वदन्ति गुणागुणत्वस्य परावरस्य ॥ ७ ॥
गुणानुरक्तं व्यसनाय जन्तोः क्षेमाय नैर्गुण्यमथो मनः स्यात् ।
यथा प्रदीपो घृतवर्तिमश्नन् शिखाः सधूमा भजति ह्यन्यदा स्वम् ।
पदं तथा गुणकर्मानुबद्धं वृत्तीर्मनः श्रयतेऽन्यत्र तत्त्वम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एकादशे तु संपृष्टो रहूगणमहीभृता ।
उपादिशत्परं ज्ञानं स योगीति निगद्यते ॥ १ ॥

अकोविदोऽविद्वानपि त्वं कोविदानां वादा उद्ग्रहणिकास्तत्तुल्यान् वादानेव वदसि अथो अतः अत्यन्तं विदुषां मध्ये श्रेष्ठो न भवसि कुतः हि यस्मात् यं स्वामिभृत्यादिलौकिकव्यवहारं त्वं सत्यमात्थ एनं सूरयस्तत्त्वविचारेण सह न वदन्ति किन्त्वविचारसुन्दरं वदन्ति अतो न सत्यः ॥ १ ॥

वैदिकोऽपि कर्मव्यवहारो न सत्य इत्याह । तथैवेति । उरवो गार्हा गृहसम्बन्धिनो मेधा यज्ञास्तेषां वितानो विस्तारस्तद्विषयासु विद्यासु उरु अधिकं विजृम्भितेषु विलसितेषु वेदवादेषु तत्त्ववादो नु निश्चितं न चकास्ति न प्रकाशते तथाच श्रुतिः "नेह नानास्ति किञ्चन" इत्यादि शुद्धो हिंसादिशून्यः साधु रागादिशून्यश्च प्रायेणेतीश्वरार्पितकर्मणां परमार्थफलत्वाभिप्रायेणोक्तम् ॥ २ ॥

ननु श्रुतवेदान्तस्यापि पुंसः कर्मसु प्रवृत्तेः कथमसत्यता तत्राह । नेति । साक्षाद्यथावत्तत्त्वज्ञानाय वरीयस्योऽपि वेदान्तवाचस्तस्य न सम्यगासन् बभूवुः स्वप्ने या निरुक्तिस्तया स्वप्नदृष्टान्तेन दृश्यत्वादिहेतुना स्वयमेव हेयत्वेनानुमितं यस्य न स्यात् ॥ ३ ॥

एवं प्रपञ्चस्य सत्यत्वं तदुक्तं निराकृत्य संसारस्यापि तदुक्तां सत्यतां निराकर्तुं तस्य मनोनिमित्ततामाह । यावदित्यादिना यावत्समाप्ति । मनो यावद्रजआदिभिर्गुणैरनुरुद्धं वशीकृतं भवति तावत्तन्मनो निरङ्कुशं सत्पुरुषस्य कुशलं धर्मम् इतरमधर्मं वा आतनोति । कैः चेतोभिर्ज्ञानेन्द्रियैः आकूतिभिः कर्मेन्द्रियैश्च ॥ ४ ॥

---

(१) समामनन्तीति श्रीवीरराघवपाठः । (२) वयुनैरिति श्रीवीरराघवपाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततश्च धर्माधर्मवासनायुक्तं तदेवानेकदेहादिवैचित्र्यं करोतीत्याह । स इति । पुंस्त्वमात्मशब्दविशेषणत्वेन तन्मन इत्यर्थः वासनायुक्त आत्मोपाधित्वादात्मा अतो विषयैरुपरक्तोऽनुविद्धः अतो गुणप्रवाहो गुणैरितस्ततश्चाल्यमानः । अत एव विकृतः कामादिपरिणामवान् षोडशात्मा षोडशकलासु भूतेन्द्रियरूपासु मुख्यः पृथङ्नामभिः सह पृथग्रूपभेदं देवतिर्यगादिरूपं बिभ्रत् । अन्तर्बहिष्ट्वमुत्कृष्टत्वं निकृष्टत्वं च पुरैस्तैरेव देहैर्हेतुभूतैस्तनोति । नामभिरित्यत्र रेफलोपे दीर्घाभाव आर्षः ॥ ५ ॥

फलं च तदनुरूपं करोतीत्याह । दुःखं सुखं व्यतिरिक्तं च मोहं तीव्रं दुर्निवारं कालप्राप्तं सर्वतोऽभिव्यनक्ति सृजाति ननु जडः कथं सृजति तत्राह । स्वदेहिनमालिङ्ग्य । आलिङ्गने कारणमाह । मायारचितोऽन्तरात्मा जीवोपाधिः । उपाधितामाह । संसृतिचक्रे कूटयति छलयतीति तथा यथा ग्रामकूटक इति ॥ ६ ॥

एवमयं मनोनिबन्धनः संसारो जीवे फलतीत्याह । तावानिति । आविः प्रकाशमानः सदा क्षेत्रज्ञस्य साक्ष्यो दृश्यो भवति । स्थूलसूक्ष्मो जाग्रत्स्वप्नस्वरूपः मनसः संसारहेतुत्वमुपसंहरन् मोक्षस्यापि तदेव कारणमित्याह । तस्मादिति । अदो मनः लिङ्गं कारणं गुणत्वं गुणाभिमानित्वमगुणत्वं तद्राहित्यं तदेव परमवरं च तस्य ॥ ७ ॥

कथमेकमेव विलक्षणयोः कारणमवस्थाभेदादित्याह । गुणेति । नैर्गुण्यं निर्गुणमथो इति कार्त्स्न्येन दृष्टान्तेन स्फुटयति । यथेति । अन्यदा तु घृतक्षये स्वं पदं शुक्लभास्वररूपं महाभूतात्मत्वं वा अन्यत्रान्यदा ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं देहगतानां परिश्रमस्थौल्यादीनां सत्यानामेव देहात्मभ्रान्त्यात्मनि प्रतीयमानानामपि वस्तुत आत्मन्यभावे निराक्षेपे मयाभिहिते सत्ययं प्रपञ्चानित्यत्वं मिथ्यात्वं मयाभिहितमिति भ्राम्यन् क्रियाकारित्वहेतुना घटादीनामिव तेषां सुखदुःखाद्यर्थक्रियाकारित्वेन सत्यतामुपपादयन्न कुशलः असत्यत्वेऽभिहिते सत्यत्वोपपादनं युक्तिमदन्यथान्यत्र गतानामन्यत्र प्रतीतेर्भ्रमरूपत्वे कथिते तेषां सत्यत्वोपपादनवैयर्थ्यात् तथा देहसम्बन्धादात्मनि तेषां प्रतीतिर्न वस्तुत इत्युक्तेः पुनर्देहादिसम्बन्धादात्मनि परिश्रमादिप्रयुक्तसुखदुःखादिप्रतीतिरिति वदन्नयं न निपुणः उक्तस्यैव पुनराक्षेपत्वेनोक्तेः तथा जीवानां मिथः स्वस्वामिभावस्यौपाधिकत्वे कथिते पुनस्तस्य स्वाभाविकत्वाभिमानेन स्वस्य दण्डनेतृत्वं साधयन्नयं न निपुण इत्यभिप्रयन्नाह । अकोविद इति । विविक्तात्मपरमात्मयाथात्म्यज्ञानरहित एव त्वं कोविदवादवादान् कोविदवाक्यतुल्यानि वाक्यानि वदस्यथोऽत्यन्तविदुषां मध्ये श्रेष्ठो न भवसि कुतः हि यस्मादेतं व्यवहारं देहात्माभिमानस्वतन्त्रात्माभिमानप्रयुक्तं पीनत्वयुवत्वदूरगन्तृत्वादिव्यवहारमात्मविषयं देहिनां परस्परं स्वस्वामिभावादिव्यवहारमन्यच्च सर्वं सूरयस्तत्त्वत्रययाथात्म्यविदः तत्त्वावमर्शेन तत्त्वविचारमूलकेन न समामनन्ति न सम्यग्वदन्ति न परमार्थत्वेन गृह्णन्तीत्यर्थः सहामनन्तीति पाठे तत्त्वविचारेण सह न वदन्ति किन्त्वविचारितसुन्दरं वदन्ति सूरयो न समामनन्ति इत्यनेन निरन्तरमध्यात्मशास्त्रपरिशीलनवतामात्मपरमात्मयाथात्म्यज्ञाननिष्ठानां अस्मिन्देहात्मभ्रान्त्यादिमूले व्यवहारेऽपारमार्थ्यज्ञानं तद्विपरीतानां त्वस्मिन् पारमार्थ्याभिमानश्चेति सूचितम् ॥ १ ॥

तत्र तेषां तदभिमाने हेतुस्तत्त्वत्रयस्वरूपस्वभावप्रतिपादकवेदान्तशास्त्रार्थापरिशीलनमेवेति वक्तुं तावत् शास्त्रस्तुतये पूर्वभागस्यातत्त्वावेदकत्वमाह । तथैवेति । तथाहि हे राजन्नुरवो बहवः गार्हमेधाः गृहमेधिसम्बन्धिनो वितानाः यज्ञादिकर्मविस्तारास्तद्विषयविद्यया उरु भृशं विजृम्भितेषु विलसितेषु वेदवादेषु वेदरूपेषु उक्तेषु वेदपूर्वभागेषु तत्त्ववादः शुद्धो निर्णयात्मकः अत एव साधुः प्रायेण न चकास्ति न प्रकाशते प्रायेणेत्यनेनेश्वराराधनत्वेन कर्म कुर्वतां रोचते एवेदमुक्तं देहातिरिक्तस्य फलभोक्तृत्वमात्रं ज्ञायते न तु स्वरूपं शोध्यते इत्यर्थः यद्वा तत्त्वस्य वाद उक्तिर्यस्मिन् स तत्त्ववादः तत्त्ववादीत्यर्थः एवं वेदवादेष्वित्यत्रापि वेदशब्दस्तत्पूर्वभागपरः पूर्वभागवक्तदर्थवादिषु उत्तरभागार्थवादी न सम्यक् प्रकाशत इत्यर्थः कर्मस्वेव रुचिमतां ज्ञाने रुचिं नोत्पादयितुं शक्नुयादिति भावः ॥ २ ॥

श्रुतवेदान्तस्याप्यविरक्तस्य न तैस्तत्त्वावबोध इत्याह । नेति । स्वप्ने स्वाप्नपदार्थे निरुक्त्या व्याख्यानेन स्वप्नसुखस्याल्पास्थिरत्वावगमेनान्यदपि गृहमेधिन ऐहिकामुष्मिकसुखं यस्य हेयत्वेनानुमितं न स्यात्तस्य सांसारिकदुःखविरक्तिविरहाद्वा तत्र संसक्तस्य साक्षाद्यथावत्तत्त्वज्ञानाय वरीयसीर्वरीयस्यः गरीयस्योऽपि वेदान्तवाचः सम्यङ्नासन् वेदान्तैर्न तत्त्वावबोध इत्यर्थः स्वप्नदृष्टान्तेन गृहमेधिसौख्यस्य हेयत्वानुमानं तत्त्वानवबोधकारणं क्षुद्रसुखासक्तिमूलकमित्युक्तम् अनेन गृहसौख्यस्य हेयत्वाध्यवसाये तत्त्वज्ञानोदय इति फलितम् ॥ ३ ॥

तत्र गुणत्रयोपरागेण कुशलाकुशलकर्मोपादनद्वारोच्चावचदेहसम्बन्धमापादयन्मन एवाल्पास्थिरसुखासक्तिजननद्वारा तत्त्वज्ञानप्रतिबन्धकं संसृतिकारणं तदेव च गुणत्रयाकलुषितं सज्ज्ञानजननद्वारा मुक्तिहेतुश्चेत्याह । यावदिति सार्द्धैः पञ्चभिः । यावदस्य पुरुषस्य मनो रजआदिभिरनुबद्धम् उपरक्तं भवति तावन्निरङ्कुशं सत्तद्गुणानुसारेण चेतोभिर्ज्ञानेन्द्रियव्यापारैराकूतिभिः कर्मेन्द्रियव्यापारैश्च हेतुभूतैरुभयेन्द्रियकर्मभिः पुण्यापुण्यरूपैः कुशलमुत्कृष्टमितरं निहीनं वा देहमातनोति सम्पादयति ॥ ४ ॥

एतदेव प्रतिपादयति । स इति । पुंस्त्वमात्मशब्दविशेषणत्वेन तन्मन इत्यर्थः सवासनात्मा वासनाधीनस्वरूपः विषयोपरक्तः शब्दादिभिरुपरक्तः गुणैः सत्त्वादिभिः प्रवाहः प्रवृत्तिर्यस्य स गुणप्रवाहः पञ्चभूतैकादशेन्द्रियरूपषोडशद्रव्यैश्चात्मा प्रधानः नामभिर्वाचकशब्दैः सह रूपभेदं देवमनुष्यत्वाद्यवयवसंस्थानरूपाकारभेदं बिभ्रद्देवमनुष्यत्वादिकमात्मनो बहिष्ठं चान्तर्गतं रागादिकं च वयुनैः सङ्कल्पविकल्पात्मकैर्ज्ञानैस्तनोति आत्मानं देवोऽहं मनुष्योऽहमिच्छामि द्वेष्मीत्येवं रूपबुद्धिभिश्चोपाध्याकारयुक्तं करोतीत्यर्थः । यद्वा वयुनैः सङ्कल्पविकल्पात्मवृत्तिभेदैः रूपभेदमनेकरूपतां बिभ्रत्सवासनात्मान्तर्गतरागादिकं बहिर्गतदेवादिरूपं नामभिः सह तनोति अत्र पुरैस्तनोतीत्यपि पाठो दृश्यते तदायमर्थः पुरुषस्य मनो यावद्रजआदिभिरनुविद्धं सन्निरङ्कुशं यथा भवति तथा ज्ञानकर्मोभयेन्द्रियैर्गुणानुसारेण पुण्यापुण्यरूपव्यापारमापादयति तावदयं स्वतोऽविकृतोऽपि पुरुषः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सवासनाधीनस्वरूपान्तःकरणयुक्तः अत एव वासनावशाद्विषयैरारक्तः विषयासक्तः गुणप्रवाहः गुणैः प्रवाहः प्रवृत्तिर्यस्य गुणानुरूपप्रवृत्तिमान् ततः पञ्चभूतैकादशेन्द्रियरूपषोडशपदार्थानामात्मा धारकः सन् अविश्लिष्टरूपसूक्ष्मदेह इत्यर्थः नामभिः सह देवमनुष्यादिरूपभेदं बिभ्रत्तैः पुरैः शरीरैः पुनरन्तर्गतरागद्वेषादिकं बहिष्ठं बाह्यं च कर्मगुणानुसारेण पुण्यापुण्यरूपं करोति ॥ ५ ॥

तदनुरूपमीश्वरादिष्टं फलं च प्राप्नोतीत्याह । दुःखमिति । एवंविधं यत्संसृतिचक्रं तस्मिन्कूटवत् पर्वतशृङ्गवदविचाल्यतया वर्तमानः मायारचितान्तरात्मा प्रकृतिपरिणामरूपान्तःकरणवान् स्वदेहिनं स्वशरीरिणं परमात्मानमालिङ्ग्य तमविनाभूयैवान्तःकरणपारवश्यात्स्वदेहिनं परमात्मानमजानन्नपि तच्छरीरतया वर्त्तमान एवेत्यर्थः । यद्वा स्वः देहो यस्य स स्वदेहस्तमालिङ्ग्येत्यर्थः कालेन दैवादुपपन्नं प्राप्तं दुःखादिकं फलं कर्मफलमाव्यनक्ति आप्नोति व्यतिरिक्तं मोहं तीव्रं दुर्निवारमित्यर्थः अञ्जिरत्र गत्यर्थः ॥ ६ ॥

यावदेवं तावान् तत्पर्यन्तवानयं स्थूलसूक्ष्मो व्यवहारो व्यवहारस्य स्थूलत्वं सूक्ष्मत्वं च व्यवह्रियमाणाकारस्थूलत्वसूक्ष्मत्वे देवोऽहं मनुष्योऽहं स्थूलोऽहं कृशोऽहमित्यादिबाह्याकारविषयः स्थूलः इच्छामि द्वेष्मि सुख्यहं दुःख्यहमित्याद्यन्तराकारविषयः सूक्ष्मः सदानिः क्षेत्रज्ञसाक्ष्यो भवति सर्वदा स्वरूपेणातिरोहितजीवः साक्ष्यो विषयो यस्य तथाभूतो भवति कर्मणा स्वस्वभावसङ्कोचरूपतिरोधाने सत्यपि स्वरूपस्यातिरोधानात्सदाविरित्युक्तं सदा आविः स्वरूपेण भासमानो यः क्षेत्रज्ञो जीवः तद्विषय एवायं व्यवहारो देहात्माभिमानात् उक्तमर्थमुपसंहरन्मनस एव बन्धमोक्षकारणत्वं सदृष्टान्तमाह । तस्मादिति द्वाभ्याम् । तस्मान्मनसो गुणानुरक्तादुक्तविधसंसृतिचक्रापत्तेरनुरक्ताच्च तत्त्वज्ञानोदयादगुणागुणत्वस्य गुणागुणत्वयोः गुणत्रयसहितत्वतद्रहितत्वयोः संसारमोक्षयोरित्यर्थः "गुणवचनेभ्यो मतुपो लुगिष्टः" इति गुणशब्दो गुणिपरः लिङ्गं हेतुमपि तन्मनो वदन्ति तथा परावरस्य देवादिस्थावरान्तपरावरभावस्य च मन एव लिङ्गं वदन्ति यद्वा । परावरशब्दो व्युत्क्रमेण गुणागुणत्वविशेषणम् अवरं निकृष्टं यद्गुणसहितत्वं परमुत्कृष्टं यद्गुणराहित्यं तयोर्लिङ्गं मन इत्यन्वयः ॥ ७ ॥

तद्विवृणोति । गुणानुरक्तमिति । गुणशब्दस्त्रिगुणपरः त्रिगुणानुरक्तं मनः जन्तोर्व्यसनाय संसाराय नैर्गुण्यममलं मनस्तु क्षेमाय मुक्तये स्यादित्यर्थः निर्गन्तं गुणान्निर्गुणं तदेव नैर्गुण्यं चातुर्वर्ण्यादेराकृतिगणत्वात्स्वार्थे ष्यञ् मनसो मलिनत्वे विमलत्वे च दृष्टान्तमाह । यथेति । घृतवर्तिं घृतावसिक्तां वर्तिमश्नन् प्राप्नुवन् सधूमां शिखां भजति अन्यदा घृतानवसिक्तवर्त्तिगतः स्वं परं रूपं धूमानाविलं भजति तथा गुणकर्मानुबद्धं गुणानुसारिभिः पुण्यापुण्यकर्मभिः कलुषितं मनः प्रदीपस्थानीयं शिखास्थानीया धूमतुल्या रागद्वेषाद्यावृता वृत्तीर्भजते अन्यत्र गुणत्रयेणाकलुष्ये सति तत्त्वं स्वस्वभावं सत्त्वप्राचुर्यंतां श्रयते प्राप्नोति । यद्वा तत्त्वं श्रयते तत्त्वावभासस्तदा स्यादित्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अस्मिन्नध्याये हेयत्वेन प्रथमतो वक्तव्यत्वेन संसारस्वरूपं निरूप्य तन्निवर्तकसाधनं निरूपयति प्रथमतस्तदुक्तमाक्षिपन्निवाह । अकोविद इति । राजंस्त्वमकोविदोऽपण्डितः कथं कोविदवादान्वदसि यत्कोविदानां पण्डितानां वादवद्वचनवदवभासमानान् वादान् वचनविशेषान् ब्रूष इति यस्मात्तस्मात्स्वधर्ममाराधनमच्युतस्येत्यादिवदतो ममापाण्डित्यं कथमत्राह । नातिविदामिति । भिक्षुकश्रुतगलोपरिवकृत्ववद्वक्तृत्वान्नातिविदां दृष्टकरतलामलकवत्तत्त्वज्ञानां मध्ये गणनीयत्वेन वरिष्ठः न हि हेतुवद्भासमानान् प्रपञ्चमिथ्यात्वे प्रयुक्तान् दृश्यत्वादिहेतून् प्रयुञ्जान आनुमानिकेषु कोविदो भवति कुतस्तरां वरिष्ठः कुतो वचसामाभासत्वमत्राह । न सूरय इति । सूरयः सर्वज्ञाः शब्दतत्त्वज्ञाः एनं व्यवहारं "भर्त्तुर्गन्तुर्भवतश्चानुमन्ये । शास्ताधिगोप्ता नृपतिः प्रजानां स्थाल्यग्नितापात्पयसोऽभितापस्तत्तापतस्तण्डुलगर्भरन्धिः" इत्यादिलक्षणतत्त्वावमर्शेन यथास्थितवस्तुस्वरूपविचारेण सह नामनन्ति देहेन जातस्य हि मे न सन्ति विशेषबुद्धेर्विवरं मनाक् पश्यामीत्यादिग्रन्थस्यार्थापरिज्ञानाद्विजृम्भितमिति एतद्धिशब्देनाह । अतः प्रेक्षावद्भिः कटाक्षेणाप्यनभिवीक्षितत्वादुपेक्षणीयस्त्वयं पक्ष इति ॥ १ ॥

ननु माभूत्सूरिभिरामननं वेदैः किं न स्यादिति तत्राह । तथेति । यथा सूरिसिद्धान्ते त्वद्व्यवहारो न चकास्ति सदोषत्वाज्जलदच्छन्नद्युमणिवदल्पबुद्धीनां वेदानां वादेषु मुखतः प्रतीयमानार्थप्रतिपादकलक्षणेषु वाक्येषु तत्त्ववादः परब्रह्मस्वरूपविषयज्ञानसिद्धान्तो नानु चकास्ति न प्रकाशते कथं न चकास्तीत्यत उक्तं शुद्ध इति । „स्वर्गकामो यजेत„ इत्यादिकर्मप्रतिपादकानां „ब्रह्मविदाप्नोति परम्" इति ब्रह्मज्ञानप्रतिपादकानां च वाक्यानां यथैकवाक्यत्वं तथा न प्रकाशत इत्यर्थः कस्मात्तथा न प्रकाशनमत्राह । उरुगार्हमेधेति । उरु विस्तीर्णं गार्हमेधं गृहस्थसम्बन्धिवितानं यज्ञकर्म तत्प्रतिपादकया विद्यया उरुधा विजृम्भितेषु सम्यग्बुद्बोधकेषु यतोऽल्पबुद्धीनां न प्रतीयते ततो महाबुद्धीनां प्रकाशत इत्यतो हीति "न वेदेष्वल्पबुद्धीनां ब्रह्म तत्त्वं समीक्ष्यते । महाबुद्धिस्तु वेदेषु पश्येद्ब्रह्मैव केवलम्" इति वचनात् अल्पबुद्धीनां बाहुल्याभिप्रायेण प्रायेणेति अयोग्यानामयमेवार्थ इत्यस्मिन्नर्थे एवशब्दः "वादो विषयवक्तृत्वं मुखतो वचनं स्मृतम्„ इत्यभिधानं कर्मपराणां कर्मैव न तत्र विभाग इतरेषामितर एव शुद्धः किं न स्यादिति नेत्याह । साध्वीति । एकवाक्यत्वकरणमेव साधु नान्यदित्यर्थः ॥ २ ॥

पुरुषार्थबोधकत्वेन प्रवृत्तस्य वेदस्य सर्वस्य पुरुषार्थित्वेन सर्वसाधारणस्य केषांचित्तत्त्वप्रकाशकत्वं केषांचिन्नेति विशेषो वैषम्यादिदोषापत्तेरित्याशङ्क्य पुरुषदोषादिदमित्याह । न तस्येति । वरीयसीः वरीयस्योऽपौरुषेयत्वेन प्रशस्ता वेदान्तगता अपि वाचस्तस्य पुरुषस्य साक्षात्तत्त्वग्रहणाय पुरुषार्थोपयोगिब्रह्मज्ञानाय न समासन्न सम्यगभवन्नित्यन्वयः तच्छब्देनोक्तं यच्छब्देन विशिनष्टि । स्वप्न इति । यस्य पुरुषस्य गृहमेधिसौख्यं स्वप्ने निरुक्त्या स्वप्नदृष्टान्तेन स्वयमेव स्वत एव हेयत्वेनानुमितं न स्यादित्यन्वयः स्वप्नसुखवज्जाग्रत्सुखं हेयमिति लिङ्गज्ञानं न स्यादित्यर्थः अनेन विषयराग एव वेदान्तवाक्योक्ततत्त्वज्ञानानुदये कारणं नान्यदित्युक्तं भवति ॥ ३ ॥

ननु हेयाननुमितत्वे किं कारणमित्यतो रहूगणस्याकोविदत्वख्यापनाय तन्निरूपितादन्यथा संसारस्वरूपं निरूपयति । यावदिति ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यावत्पुरुषस्य मनो रजआदिगुणैरनुरुद्धं गुणवशत्वेन स्थितं तावत्पर्यन्तं चेतोभिर्बुद्धिवृत्तिभिरत एवाकृतिभिर्विषयसुखेच्छाभिः पूर्वानुभवसंस्कारैर्वा निरङ्कुशः शास्त्रविधिमुत्सृज्य वर्तमानो यः पुरुषः कुशलाकुशलयोरेकतरमातनोतीत्यन्वयः ॥ ४ ॥

कुशलाकुशलकर्मभ्यां किं फलमापादयतीति तत्राह । स वासनात्मेत्यादिश्लोकद्वयेन । स मायारचितान्तरात्मा प्रकृतिनिमित्तं मनः पृथङ्नामभिः स्वपुरैः स्वस्य जीवस्य सुरनरतिर्यगादिदेहै रूपभेदं सुरनरतिर्यगादिदेहभेदं चित्रं बहुविधं तनोति अन्तरात्मानं विशिनष्टि । वासनात्मेति । नानाकर्मवासनामयः गुणानां प्रवाहो यस्मिन् स तथा षोडशात्मा दशेन्द्रियाणि पञ्च प्राणाः स्वयमेकं मन एवं षोडशभेदेन विकृतः अन्तर्बहिष्ठः वासनारूपेणान्तःस्थितं विषयरूपेण वहिःस्थितं संसृतिचक्रस्य कूटं राशिर्यस्मिन् स तथा तं स्वदेहिनमालिङ्ग्य वशीकृत्य सुखं दुःखं वा व्यतिमिश्रं सुखमिश्रं दुःखं दुःखमिश्रं सुखं फलं च व्यनक्ति व्यञ्जयतीत्यन्वयः ॥ ५—६ ॥

यावानहंममेत्यभिमानस्तावानयं व्यवहारः संसारः सुखदुःखलक्षणः अभिक्षाभिवदनादिलक्षणो वा भवति ननु मनसः प्रवर्तकत्वाङ्गीकारे प्रवृत्तेर्भगवत्कर्तृकत्वं गतं स्यादिति तत्राह । क्षेत्रज्ञेति । क्षेत्रज्ञः श्रीनारायणः साक्षी प्राणः ताभ्यां प्रेरितेन मनसा जीवः संसारमनुभवतीत्यर्थः "क्षेत्रवित्तु हरिः प्राणः साक्षी ताभ्यां पुमान्सरेत्" इति वचनादुक्त एवार्थः स्थूलसूक्ष्मदेहविषयः"मन एव मनुष्याणां कारणं बन्धमोक्षयोः"इत्यभिप्रेत्योपसंहरति । तस्मान्मन इति । यत एवं श्रीहरिकटाक्षचितमनसा संसारस्तस्मादद्वो मनः परावरस्य पूर्वोत्तरकाले वर्तमानस्य गुणागुणस्य मुख्यकर्तृ हरेः प्रवृत्तौ गुणभूतस्य स्वतः सत्त्वादिगुणमुक्तस्यास्य जीवस्य संसृतौ लिङ्गं हेतुं वदन्ति अयं व्यलीको नेत्याह । सदेति । वा इत्यनेन हेतुभूतं प्रमाणं सूचयति ॥ ७ ॥

एकस्योभयहेतुत्वं कथमत्राह । गुणेति । गुणानुरक्तं विषयाभिनिविष्टं गुणानां विषयाणां समुदायो गुणं निर्गतं विषयजाताद्यत्तन्निर्गुणं ब्रह्म तत्सम्बन्धि नैर्गुण्यं "केवलो निर्गुणश्च,,इति श्रुतेः सत्त्वादिगुणरहितं तत्सम्बन्धि वा नैर्गुण्यं क्षेमाय मोक्षाय मनोनिमित्तं भवतीत्यर्थः उभयत्रापि दृष्टान्तमाह । यथेति । घृतेन सह वर्तमानां वर्तिमास्थितो ग्रसमानः प्रदीपो यथा सधूमां स्थितिं शिखालक्षणां भजति धूमसाहित्येन सम्यक् ज्वलतीत्यर्थः अन्यदा घृतवर्त्यभावे स्वरूपं तेजोमात्रलक्षणं निजस्वरूपलाभेन सम्यक् प्रकाशितो भवति घृतवर्तिग्रासाभावे निर्मषीकस्वप्रकाशलक्षणं स्वरूपं व्रजतीति वा हिशब्देन लोकदृष्टं प्रमाणयति तथा सत्त्वादिगुणैः पूर्वसञ्चितैः कर्मभिश्चानुबद्धं पृष्ठबन्धनप्राप्तचोरवन्मनो वहिः (१) पदं विषयं शब्दादिलक्षणं श्रयते सेवते पुनः पुनरुत्पन्नप्रवृद्धरागादिदोषान्धीकृतमिदमेव श्रेयो नान्यदिति निर्धार्य वर्तत इत्यर्थः अन्यत्र तुच्छीकृतविषयसंपर्कत्वे तत्त्वमनारोपितं ब्रह्मस्वरूपं श्रयते निरस्तरागादिदोषत्वेन निर्मलं मनोऽमादिमत्परं ब्रह्मेति स्मृतिबलादिदमेवाभावृत्य श्नश्वरं श्रेयोऽन्यन्नश्वरं दुःखाकरमिति निश्चित्य तदेकनिष्ठं भूत्वा वर्तत इति भावः अतो विरुद्धधर्माक्रान्त्या त्वेकस्य मनसः उभयत्र प्रवृत्तिर्न घटत इति दोषो निरस्तो भवत्यनेनेति सिद्धम् ॥८॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

स्वप्ने निरुक्त्येति । भवणात् पूर्वं व्यवहारवैराग्यं तर्कदृष्ट्यापेक्ष्यत इत्यर्थः ॥ १—५ ॥

मायारचितान्तरात्मेति । श्रीवेदव्याससमाधिवाक्यानुसारेण भयं द्वितीयाभिनिवेशतः स्यादित्याद्यनुसारेण च क्षेत्रज्ञ एता मनसोविभूतीत्यन्य वक्ष्यमाणवाक्यानुसारेण व्याख्याय प्रकरणस्यास्य सिद्धान्तक्रमः समाधेयः ॥ ६—८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मनसैव हि संसारो यद्वृत्तीनामनन्तता ।
एकादशेऽत्र तेनैव मोक्षो भक्तियुजोदितः ॥

त्वं कोविदो न भवसि अथ च कोविदानां ये वादा उद्ग्राहास्तत्तुल्यानेव वादान् वदसि अथो अत एव अत्यन्तं विदुषां मध्ये श्रेष्ठो न भवसि । यतः सूरयः कोविदा एनं व्यवहारं व्यावहारिकं वस्तु च तत्त्वावमर्शेन तत्त्वविचारेण तत्त्ववस्तुना च सह न आमनन्ति दृष्टान्तादिना नाभ्यस्यन्ति । तयोः परस्परातिवैधर्म्यात् तथाहि स्थालीतापात् पयसस्तापस्तत्तापात्तण्डुलताप इति तण्डुलस्य जडस्य स्थाल्यादिभिर्जडैर्वह्निनापि जडेन यथा संसर्गस्तथा देहेन्द्रियादिभिर्जडैर्मुक्तजीवस्य चिद्वस्तुनः संसर्गाभावादेव देहादिधर्मैर्न भ्रमः सिद्ध्यति । बद्धजीवस्य तु जडदेहाध्यासाज्जडत्वेन तैर्भवत्येव भ्रम इति बद्धजीवैर्युष्माभिर्मुक्तजीवानामस्माकं सादृश्यासम्भवादनुमानं न घटत इति ॥ १ ॥

ननु मीमांसकाः कर्मफलात् स्वर्गसुखादतिरिक्तं पुरुषार्थं न मन्यन्त इत्यतः किं तत्त्ववादेनेति चेत् सत्यं तेष्वज्ञेष्वनाधिकारिषु तत्त्वोपदेशो नैव समुचित इत्याह । तथैवेति । यथैव भवाद्विधानां दृष्टफलेषु व्यवहारकर्मसु तथैव उरवो गाढा गृहसम्बन्धिनो मेधा यज्ञास्तेषां वितानो विस्तारस्तद्विषयासु विद्यासु उरु अधिकं विजृम्भितेषु विलसितेषु वेदवादेष्वदृष्टफलेष्वपि कर्मसु नु निश्चितं तत्त्ववादो न चकास्ति न प्रकाशते शुद्धः कुतः हिंसादिशून्यः साधुः रागादिशून्यश्चेति साजात्याभावादेवेत्यर्थः प्रायेणेति ईश्वरार्पितनिष्कामकर्मणां ज्ञानवैराग्यद्वारा परमार्थफलत्वाभिप्रायेणोक्तम् ॥ २ ॥

ननु कर्मिणस्तांस्तत्त्वं ग्राहयितुं का चिन्ता युक्तिरस्ति किम्वा तान्नोपदिशाम इति केवलं प्रौढिवाद एवेत्यत आह । नेति । तस्य जनस्य साक्षाद्यथावत्तत्त्वग्रहणार्थं वरीयस्योऽपि वेदान्तवाचः न सम्यगासन् न समर्था बभूवुः । स्वप्ने भोगानां स्वल्पकालमात्रस्थायित्वं स्वप्नस्य स्वतो विनाशित्वं मिथ्यात्वञ्चेति या निरुक्तिस्तया स्वप्नदृष्टान्तेनेत्यर्थः । स्वयमेव हेयत्वेनानुमितं यस्य न स्यात् कर्मिणां नश्वरमसार्वकालिकं सुच्छं वैषयिकमेव सुखं तथा वैषयिकेण सुखेनात्मनो वस्तुतः सम्बन्धाभावात् तत् सुखमात्मनः शशस्य शृङ्गमिव मिथ्याभूतञ्च ज्ञानि-

(१) पद्यत इति पदं विषयमित्यर्थः ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नान्त्वनश्वरं सार्वकालिकं महद्ब्राह्म सुखमिति बह्वेवान्तरमित्येवैव तत्त्वग्रहणे युक्तिरिति भावः ॥ ३ ॥

नन्वेवं सद्भिः प्रबोधिता अपि प्रायः सर्वे जना वैषयिके सुख एव प्रवर्त्तमानाः कथं दृश्यन्ते तत्राह । यावन्मनो रजआदिभिरनुरुद्धं संबद्धं भवति तावत्तन्मनो निरङ्कुशमत्तमतङ्गजोपमं सत् पुरुषस्य कुशलं धर्ममितरमधर्मं वा आतनोति कैः चेतोभिर्ज्ञानेन्द्रियैः आकृतिभिः कर्मेन्द्रियैश्च गुणमयं मन एव बलाद्विवेकादिकमपि निगीर्य पुण्यपापकर्मणोः प्रवर्त्तयति पुरुषस्य को दोष इति भावः ॥ ४ ॥

ततश्च सवासनात्मा पुण्यपापवासनायुक्त आत्मा मनः विषयैरुपरक्तोऽनुविद्धः अत एव गुणप्रवाहः गुणैरितस्ततश्चाल्यमानः अत एव विकृतः कामादिविकारवान् षोडशेषु भूतेन्द्रियेषु मुख्यः रूपभेदं देवतिर्यगादिशरीरभेदं बिभ्रत् दधत् पुरैस्तैरेव शरीरैर्हेतुभिः अन्तर्बहिष्ट्वमुत्कृष्टत्वं निकृष्टत्वञ्च तनोति नामभिरिति रेफलोपे दीर्घाभाव आर्षः ॥ ५ ॥

फलञ्च तदनुरूपं सृजतीत्याह । दुःखं सुखं व्यतिरिक्तं मोहञ्च तीव्रं दुर्निवारं व्यनक्ति सृजति ननु जडः कथं सृजति तत्राह । स्वदेहिनं जीवात्मानमालिङ्ग्य आलिङ्गने कारणमाह । मायया रचितः अन्तरात्मा जीवोपाधिः उपाधितामाह । संसृतिचक्रे कूटयति छलयतीति तथा यथा ग्रामकूटक इति ॥ ६ ॥

एवमयं मनोनिबन्धनः संसार एव व्यवहारपदवाच्य इत्याह । तावानिति । आविः प्रकाशमानः सदा क्षेत्रज्ञस्य साक्ष्यो दृश्यः स्थूलो जागरः सूक्ष्मः स्वप्नश्च तत्त्वपदवाच्यमात्मसुखमपि मनोनिबन्धनमेवेत्याह । तस्माददो मन एव लिङ्गं कारणं कस्य गुणस्य संसारस्य अगुणत्वस्य मोक्षस्य च तौ च संसारमोक्षौ कस्य स्यातामित्यत आह । परावरस्य उत्कृष्टनिकृष्टजनसङ्घस्य पाठकमो नात्र विवक्षितः निकृष्टस्य संसारो भवति उत्कृष्टस्य तु मोक्ष इत्यर्थः ॥ ७ ॥

कथमेकमेव विलक्षणयोः कारणमवस्थाभेदादित्याह । गुणेति सार्द्धेन । नैर्गुण्यं निर्गुणमन्यदा घृतक्षये सति निर्वाणो भूत्वा स्वं पदं महाभूतात्मत्वं भजति अन्यत्र अन्यदा । यद्वा घृतवर्त्तिमदनन्नेवाग्निः सधूमाः शिखा भजति अन्यदा काञ्चनपिण्डमदनंस्तु स्वपदं निर्धूमतेजःस्वरूपं तथैव मनोऽपि तत्त्वं भगवन्माधुर्यास्वादम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एकादशे रहूगणोक्तं बालभाषितमिवानादृत्य प्रसङ्गतो मुनिः बन्धमोक्षयोः कारणं मन एवेत्याह । अकोविद इति । अकोविदः सिद्धान्तानभिज्ञः कोविदवादाः यत् सर्वस्य ब्रह्मात्मकत्वानुसन्धानवत्त्वेन प्रावण्यं तद्विषयकाः शब्दास्तत्तुल्यान् वादान् शब्दान् वदसि अथो अतो विदां मध्ये अतिवरिष्ठो नासि एतं नरदेवनरादिस्वस्वामिभावरूपं व्यवहारं तत्त्वावमर्शेन ब्रह्मविचारेण सह न आमनन्ति ब्रह्मविचारवदादरणीयं न वदन्ति ॥ १ ॥

तमेतमात्मानं ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेनेति भगवत्या श्रुत्योक्तो यः परमानन्दसाधने कर्मकाण्डस्योपयोगस्तमृते सर्वोऽपि कर्मकाण्डोऽनित्यफलविषयः संसारहेतुर्नतु तत्त्वप्रस्तावे योजितुं योग्य इत्याह । तथैवेति । उरवो गार्ह्याः गृहसम्बन्धिनो मेधा यज्ञास्तेषां वितानो विस्तारस्तद्विद्यासूरुविजृम्भितेषु बहुविलसितेषु वेदवादेषु तत्त्ववादः शुद्धः फलतः स्वरूपतश्च निर्दोषः साधुर्मुमुक्षूपादेयः नु निश्चितं न चकास्ति न प्रकाशते प्रायग्रहणं विविदिषावाक्योक्तप्रकारं विनेति द्योतयति ॥ २ ॥

नन्वध्ययनविध्युपात्ता वेदान्तवाचः सर्वेषां विविदिषोत्पादनादिना कुतो न तत्त्वज्ञानदाः स्युरित्यत आह । नेति । यस्य मन्दबुद्धेः स्वप्ने या निरुक्तिः नितरां क्रियमाणानित्यतोक्तिस्तया गृहमेधिसौख्यं हेयत्वेनानित्यत्वेन हेतुना अनुमितं न स्यात्तस्य साक्षाद्यथावत्तत्त्वग्रहणाय वरीयस्योऽपि वेदान्तवाचः न सम्यगासन् बभूवुः प्रयोगस्तु कर्मफलं गृहमेधिसौख्यमनुपादेयम् अनित्यत्वात् स्वप्नधनवदिति ॥ ३ ॥

ननु कस्यचिद्वरीयस्यो वाचस्तत्त्वग्रहणाय न समासन्नित्युक्त्या तस्य संसारित्वं दर्शितं तत्र कः संसारहेतुः अर्थात् यस्य तु तास्तत्त्वग्रहणाय स्युः स मुक्त्यधिकारी तत्र च को मुक्तिहेतुरित्याकाङ्क्षायां मन एवेत्याह । यावदिति सार्द्धैः पञ्चभिः । रजआदिभिः पुरुषस्य मनो यावदनुरुद्धं व्याप्तमत एव निरङ्कुशं दुर्निग्रहं सत् तावत् कुशलं धर्मं सत्त्वव्याप्तम् इतरमधर्मं तमोव्याप्तं चकाराद्रजोव्याप्तं युक्तञ्चेतोभिर्ज्ञानेन्द्रियैः आकृतिभिः कर्मेन्द्रियैश्च आतनोति समन्ततो विस्तारयति ॥ ४ ॥

तदेवं धर्मादिवासनायुक्तं नानादेहप्रापकं भवतीत्याह । स इति । पुंस्त्वमात्मशब्दविशेषणत्वात् वासनानामात्माश्रयः धर्मादिवासनायुक्त इत्यर्थः विषयोपरक्तो विषयासक्तः गुणप्रवाहः गुणैश्चाल्यमानः विकृतः अनेकशाखः षोडशात्मा लिङ्गशरीरे मुख्यः पृथङ्नामभिः सह पृथक् रूपभेदं देवमनुष्यपश्वादिरूपभेदं बिभ्रत् अन्तर्बहिष्ट्वमुत्कृष्टत्वं निकृष्टत्वं च पुरैस्तैरेव देहैश्च तनोति विस्तारयति नामभिरित्यत्र "ढूलोपे पूर्वस्य दीर्घोऽणः" इतिदीर्घाभावः आर्षः ॥ ५ ॥

दुःखादिकं फलं चाव्यनक्ति प्राप्नोति व्यतिरिक्तं मोहं तीव्रं क्रोधादिकं च ननु जडः कथमातनोति तत्राह । स्वदेहिनं जीवमालिङ्ग्येति यतः मायारचितः प्रकृतिपरिणामभूतः अन्तरात्मा अन्तःकरणमेवात्मा जीवेन मायामोहितेनात्मतयारोपितमित्यर्थः अत एव संसृतिचक्रं जन्ममरणचक्रं कूटयति देहाद्देहान्तरं गच्छन् छलयतीति तथा एकत्र स्थिरो न भवतीत्यर्थः ॥ ६ ॥

यावदेव तावान् अयं प्रसिद्धः व्यवह्रियते इति व्यवहारः संसारः क्षेत्रज्ञसाक्ष्यः जीवस्य दृश्यः जीवभोग्य इत्यर्थः स्थूलसूक्ष्मः सूक्ष्मसंहार्यरूपः कस्य चिन्मुमुक्षोर्मुक्तस्यापि अनन्तवज्जीवव्याप्तत्वात्सदाविः सर्वदा प्रकाशमानः सृष्ट्यनन्तरस्थूलरूपेण प्रलयानन्तरं सूक्ष्मरूपेण च न केवलं मनः संसारकारणं किन्तु संसारमोक्षयोरुभयोः कारणमित्याह । गुणत्वमुपादेयत्वं मोक्षभावः अगुणत्वमनुपादेयत्वं संसारभावः तयोः समाहारद्वन्द्वः तस्य तद्द्वयं क्रमादाह । परावरस्येति । अदो मनः लिङ्गं कारणम् ॥ ७ ॥

गुणानुरक्तं विषयासक्तं व्यसनाय संसाराय निर्गुणं त्यक्तविषयं

एकादशासन्मनसो हि वृत्तय आकूतयः पञ्च धियोऽभिमानः ।
मात्राणि कर्माणि पुरं च तासां वदन्ति हैकादश वीर ! भूमीः ॥ ९ ॥
गन्धाकृतिः स्पर्शरसश्रवांसि विसर्गरत्यर्त्यभिजल्पशिल्पाः ।
एकादशं स्वीकरणं ममेति शय्यामहं द्वादशमेक आहुः ॥१०॥
द्रव्यस्वभावाशयकर्मकालैरेकादशामी मनसो विकाराः ।
सहस्रशः शतशः कोटिशश्च क्षेत्रज्ञतो न मिथो न स्वतः स्युः ॥ ११ ॥
क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचितस्य नित्याः ।
आविर्हिताः क्वापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्तुः ॥ १२ ॥
क्षेत्रज्ञ आत्मा पुरुषः पुराणः साक्षात्स्वयंज्योतिरजः परेशः ।
नारायणो भगवान् वासुदेवः स्वमाययाऽऽत्मन्यवधीयमानः ॥ १३ ॥
यथानिलः स्थावरजङ्गमानामात्मस्वरूपेण निविष्ट ईशेत् ।
एवं परो भगवान् वासुदेवः क्षेत्रज्ञ आत्मेदमनुप्रविष्टः ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तदेवं नैर्गुण्यं स्वार्थे ष्यञ् क्षेमाय परमपुरुषध्यानपूर्वकतत्पादप्राप्ति-रूपमोक्षाय च मनः स्यात् निर्मलं मनः परमपुरुषध्यानार्हं भवति अतस्तस्य निर्मलं रूपं दृष्टान्तेन स्फुटयति यथा प्रदीपः घृतयुक्तां वर्तिमश्नन् सधूमाः शिखा भजति मलिनवृत्तिमान् भवतीत्यर्थः अन्यदा तु घृतवर्तिक्षये स्वं पदं महाभूतावस्थाख्यं शुक्लं रूपं प्राप्नोति एवं विषयसेवनार्थं कर्मासक्तं सत् मलिनाः वृत्तीर्भजते अन्यदा विषयपरित्यागे निर्मलं सत् परमपुरुषध्यानार्हं तत्त्वं शुक्लं निजरूपं भजते ॥ ८ ॥

भाषाटीका ।

ब्राह्मण श्रीभरतजी बोले तुम पण्डित नहीं हो परन्तु पण्डितों की सी बातें करते हो तिससे तुम ज्ञानियोंमें श्रेष्ठ नहीं हो जो विद्वान् हैं सो तो इस व्यवहार को तत्त्व विचार के साथ नहीं गिनते हैं ॥ १ ॥

हे राजन् ! इसी प्रकार गृहस्थों के करनेयोग्य जो यज्ञ हैं तिनके विस्तार से युक्त जो वेदवाद तिनमें तत्त्ववाद अति शुद्ध होने से भी अति उत्तम प्रायः नहीं प्रकाशित होता है ॥ २ ॥

जिस पुरुष को स्वप्न के तुल्य यज्ञादि जन्य सुख हेय नहीं है उस पुरुष को साक्षात् वेदवचन भी तत्त्व ग्रहण नहीं करा सकते हैं ॥ ३ ॥

जबपर्यन्त पुरुष का मन रजोगुण से अथवा तमोगुणसे या मिश्रित इन कर्मों को करता रहता है तबतक वह मन निरंकुश होकर ज्ञान कर्म इंद्रियोंसे पुण्य अथवा पाप करता है ॥ ४ ॥

वासना सहित वह मन गुणों के साथ बहता हुआ षोडश विकार वाला भिन्न रूपों को धारण करनेवाला होकर वैदिक अधिकारी अनधिकारी पुरुष को करदेता है ॥ ५ ॥

माया से रचित जो मन है सो जीव को आलिङ्गन कर के संसार चक्र में गत हुआ काल से प्राप्तः सुख दुःख वा अतिरिक्त तीव्र मोह फल को प्रकट करता है ॥ ६ ॥

जबतक यह मन इस पुरुष को भ्रमाता है तभीतक जीव का दृश्य यह स्थूल सूक्ष्म प्रपञ्च प्रकाशमान रहता है तिसी से भली बुरी योनी का बन्ध मोक्ष का कारण मन ही है ऐसा महापुरुषों का कथन है ॥ ७ ॥

गुणों में आसक्त जो मन है वह बन्ध का हेतु है गुणरहित मन मोक्षका हेतु है जैसे दीपक घृतकी बत्ती के खाने से धुंआं सहित शिखों को निकालता है खाली रहने से केवल अपने शुक्ल रूपसे रहता है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वृत्तीर्दर्शयति । एकादश वृत्तय आसन् । आकूतयः क्रियाकाराः पञ्च धियश्च ज्ञानाकाराः पञ्च अभिमानश्चेति हे वीर ! भूमीर्विषयान् ॥ ९ ॥

विषयानेवाह । गन्धादयः पञ्च ज्ञानेन्द्रियद्वारा धीवृत्तीनां विषयाः आकृतिः रूपम् । श्रवः शब्दः विसर्गादयः पञ्च कर्मेन्द्रियद्वारा कर्माकारवृत्तीनां विषयाः रतिः सम्भोगः अर्तिर्गतिः पुरस्याभिमानविषयत्वप्रकारमाह । एकादशं पुरम् । स्वीक्रियत इति स्वीकरणम् अयमर्थः शरीरमभिमानस्य न ज्ञेयतया गन्धादिवद्विषयः नापि कार्यतया विसर्गादिवत् किन्तु ममेति भोगायतनत्वेन स्वीकार्यतया विषय इति । एके तु विवेकिनामेव पुरं ममत्वाभिमानविषयो न तु मूढानामतो मूढदृष्ट्या अहमहङ्कारं द्वादशं वृत्त्यन्तरमाहुः । तस्य च पुरमेव शय्यासंज्ञं द्वादशं विषयमाहुः । तत्र हि जीवोऽहङ्कारेण सह शेते यतः पुरि शयनात्पुरुष इत्युच्यते ॥ १० ॥

तासां वृत्तीनामवान्तरभेदैरानन्त्यमाह । द्रव्याणि विषयाः

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वभावः परिणामहेतुः आशयः संस्कारः कर्म अदृष्टं कालः क्षोभकः तैर्निमित्तभूतैः प्रथमं शतशस्ततः सहस्रशस्ततः कोटिशः स्युर्न तु मिथः स्युर्न च स्वतः किन्तु क्षेत्रज्ञतः परमेश्वरात् । तस्य चानन्तशक्तित्वादनन्ताः स्युरित्यर्थः । यद्वा । तासां मिथ्यात्वमनेनोच्यते कोटिशो भवन्त्यतस्ताः क्षेत्रज्ञत एव स्युस्तत्सत्तयैव सत्तां लभेरन्न तु मिथो न च स्वत इति । यद्वा । क्षेत्रज्ञो जीवस्तस्मान्न स्युः तस्याविकारित्वात् न मिथः इतरेतराश्रयत्वापत्तेः न स्वतः आत्माश्रयत्वापत्तेः अतो मिथ्याभूता एव ॥ ११ ॥

तदेवं श्लोकत्रयेण गुणकर्मानुबद्धं मनो वृत्तीः श्रयत इति यदुक्तं तत्प्रपञ्चितम् । अन्यदा तत्त्वं श्रयत इति यदुक्तं तदेव तत्त्वमाह । क्षेत्रज्ञ इति । जीवस्य जीवोपाधेः अविशुद्धकर्तुर्मनसः नित्याः प्रवाहरूपेणाविच्छिन्ना जाग्रत्स्वप्नयोराविर्भूताः पश्यति क्वापि सुषुप्तौ तिरोभूताः पश्यति अवस्थात्रयसाक्षी क्षेत्रज्ञ आत्मा तत्त्वमित्यर्थः ॥ १२ ॥

क्षेत्रज्ञो द्विविधः । त्वंपदार्थो जीवः तत्पदार्थ ईश्वरश्च । तत्राद्यो निरूपितः इदानीं तत्प्राप्यमीश्वरं निरूपयति । क्षेत्रज्ञ आत्मा व्यापी । पुराणो जगत्कारणभूतः । पुरुषः पूर्णः साक्षादपरोक्षः । स च स्वयंज्योतिः नतु ज्ञानस्य विषयत्वेनाश्रयत्वेन वा परोक्षः अजो जन्मादिशून्यः परेषां ब्रह्मादीनामपि ईशः नारं जीवसमूहः सोऽयनं यस्य नियन्तुः भगवानैश्वर्यादिषड्गुणवान् । वासुदेवः सर्वभूतानामाश्रयः स्वाधीनया माययात्मनि जीवेऽवधीयमानोऽवस्थाप्यमानः । कर्मकर्तरि प्रयोगः । तन्नियन्तृत्वेन वर्तमान इत्यर्थः ॥ १३ ॥

एतत्सदृष्टान्तमाह । यथेति । आत्मस्वरूपेण प्राणरूपेण ईशेशितव्यमयति । इदं विश्वम् ॥ १४ ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

गुणकलुषस्य मनसो वृत्तीः प्रपञ्चयति । एकादशेत्यादिना । मनसः एकादशवृत्तीर्वृत्तय आसन् ताः का इत्यत्राह । आकूतयः कर्मेन्द्रियाणां व्यापारविषयाः पञ्च धियः क्रियाकारा धियः ज्ञानेन्द्रियद्वारेण पञ्चवृत्तयो ज्ञानाकाराः एकादश सद्वारकाः अहंममाद्यभिमानात्वद्वारकैका संभूयैकादश हे वीर ! तासां वृत्तीनां भूमीर्विषया मात्राणि पञ्च कर्माणि पञ्च पुरम् इत्येकमिति संभूयैकादशेति वदन्ति तत्त्वविदः तत्र मात्राणि गन्धादीनि ज्ञानाकाराणाम् वृत्तीनां विषयाः कर्माणि तु विसर्गादीनि क्रियारूपाणां पुरं त्वभिमानरूपाया इति विवेकः पुरमत्र शरीरं तस्याहंममाभिमानविषयत्वादिति ॥ ९ ॥

ज्ञानकर्मोभयेन्द्रियव्यापारविषयाणि मात्राणि कर्माणि प्रपञ्चयति गन्धेति । गन्धः घ्राणेन्द्रियवृत्तिविषयः आकृती रूपं चक्षुरिन्द्रियवृत्तिविषयः स्पर्शः त्वगिन्द्रियविषयः रसो रसनेन्द्रियविषयः श्रवः शब्दः श्रोत्रेन्द्रियस्य विषयः एवं पायूपस्थपादवाक्पाणिवृत्तीनां क्रमेण विसर्गादयः पञ्च विषयाः तत्र विसर्गः पुरीषोत्सर्गः रतिः संभोगः अतिर्गमनमभिजल्पो भाषणं शिल्प आदानादिः गन्धादयः पञ्च ज्ञानेन्द्रियद्वारा मनोवृत्तीनामेव विषयाः तथा विसर्गादयः कर्मेन्द्रियद्वारा मनोवृत्तीनामेव पञ्चानां पञ्च विषया इति विवेकः पुरस्याभिमानविषयत्वप्रकारमाह । एकादशमिति । स्वीकरणं ममेदं शिरः ममाऽयं हस्त इत्याद्यभिमानेन स्वीकरणं स्वीकार्यं शरीरमभिमानस्य विषयः तदेकादशं वदन्ति अयमर्थः शरीरमभिमानस्य न ज्ञेयतया गन्धादिवद्विषयः नापि कार्यतया विसर्गादिवत्किंतु ममेति स्वशेषतया स्वीकार्यत्वेन विषय इति विवेकिनामेव शरीरं ममाभिमानविषयमिति वदन्ति प्रायेण स्वीकरणं ममाभिमानस्य विषयत्वेनोक्तमविवेकिनां तु शरीरमहमभिमानविषयमिति तदभिप्रायेणाह । शय्यामहं द्वादशमेक आहुः इति । एके केचिदहमहङ्कारः अनात्मन्यात्मतादात्म्याभिमानरूपस्तं द्वादशीं वृत्तिं तस्या विषयभूतां शय्यां शरीरं द्वादशविषयम् चाहुरित्यर्थः जीवो यतः स्वस्वरूपव्यामोहेन शरीरे शेते वसतीति शरीरं शय्याशब्देनोच्यते ननु गन्धादीनां तद्विषयज्ञानानां च वृत्तिरूपाणां भेदाद्विषयिविषयभाव उपपन्नः विसर्गादीनां कर्मेन्द्रियवृत्तित्वात्तेषामेव पुनस्तद्विषयत्वमनुपपन्नमिति चेन्न, विसर्गादीनां क्रियात्मकत्वात् क्रियायाश्च फलव्यापारभेदेन द्वैविध्यात्तत्र व्यापारांशस्य वृत्तित्वं फलांशस्य विषयत्वमिति भेदात् तथाहि उत्सर्गस्त्यागो विश्लेषस्तद्विषयः तदनुकूलो व्यापारो वृत्तिरेवं रत्यादिष्वपि बोध्यम् ॥ १० ॥

उक्तानामेकादशानां वृत्तीनामवान्तरभेदैरानन्त्यमाह । द्रव्यं पृथिव्यादिभूतपञ्चकं तेषामसाधारणो गुणः स्वभावस्तेषां परिणामस्वभावो वा तेषां विचित्रपरिणामहेतुर्वा आशयो वासना कर्माणि पुण्यपापानि एतैः पूर्वोक्ता एकादशवृत्तिरूपा मनसो विकाराः प्रथमं शतशस्ततः सहस्रशः ततः कोटिशश्च स्युर्नैते विकाराः केवलस्य मनसः किन्तु क्षेत्रज्ञाधिष्ठितस्यैव भवन्तीत्याह । क्षेत्रज्ञाधिष्ठितस्य मनसो भवन्तीत्यर्थः क्षेत्रज्ञमनसोरपि परस्पराधिष्ठितयोर्न भवन्ति किन्तु क्षेत्रज्ञाधिष्ठितमनस एवेत्याह । न मिथ इति । तत्रापि न स्वतो भवन्ति किन्तु कर्मत इत्याह । न स्वत इति कर्माधीना इति भावः क्षेत्रज्ञशब्दोऽत्र जीवपरः तस्यैव मनोऽधिष्ठातृत्वात्सङ्कोचविकासवद्धर्मभूतज्ञानाश्रयत्वाच्च यद्यप्यत्र प्रकरणे क्षेत्रज्ञशब्दो नारायणवासुदेवभगवदादिसामानाधिकरण्येन प्रयुज्यमानः परमात्मपरोऽवगम्यते क्षेत्रं जानातीत्यवयवार्थपौष्कल्यञ्च तत्रैव तथाप्यत्र जीवपरः आश्रयणीय उक्तयुक्तेः क्षेत्रज्ञ एता मनसो विभूतीः क्षेत्रज्ञ आत्मा पुरुषः पुराण इत्यत्र तु परमात्मपरः यद्वात्रापि क्षेत्रज्ञशब्दः परमात्मपर एव तस्य सर्वोपादानतया चिदुपादानत्वाच्चेतनद्वारा तद्धर्मभूतज्ञानसङ्कोचविकासाश्रयत्वात् जीवद्वारा मनोऽधिष्ठातृत्वसम्भवाच्च ।

> अधिष्ठानं तथा कर्ता करणं च पृथग् विधम् ।
>
> विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम् ।

इति प्रयोजकतया दैवस्य परमात्मनोऽपि सर्वत्रान्वयस्मरणाच्च ११॥

तदेवं मनसो गुणत्रयोपरागानुपरागाभ्यां बन्धकत्वमोचकत्वे गुणोपरक्तस्य मनसः क्षेत्रज्ञस्याधिष्ठितस्य वृत्तयश्चाभिहिताः एवमचेतनतत्त्वं निरूपितमिदानीं चेतनतत्त्वं निरूपयिष्यन् तावत्प्रधानभूतं परमात्मतत्त्वं शोधयति । क्षेत्रज्ञ इति त्रिभिः । अत्र क्षेत्रज्ञशब्दो न जीवपरः किन्तु परमात्मपरः जीवस्येति पृथङ्निर्देशात् अविशुद्धकर्मकर्तुर्जीवस्य मनसः जीवाधिष्ठितस्य

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मनसः मायारचिताः प्रकृतिमूला एता उक्ताः तत्फलभोक्तुश्च विभूतीः वृत्तिविस्तारानित्याः प्रवाहतो नित्याः क्वचिज्जाग्रत्स्वप्नयोराविर्भूताः क्वापि सुषुप्तौ तिरोहिताश्च क्षेत्रज्ञः परमात्मा शुद्धवृत्त्या यतः सुखदुःखादिरूपमालिन्यरहित एव विचष्टे तथाच श्रुति "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न्यो अभिचाकशीति" इति मायारचितस्येति पाठे मनसो विशेषणं प्रकृतिपारिणामरूपस्य मनसः ॥ १२ ॥

एवं कर्मकर्तृतत्फलभोक्तृजीवसाक्षितया तदभोगेन स्वयंप्रकाशमानतया च वर्तमानः परमात्मेत्युक्तं भवति पुनः प्रकृतिपुरुषयोरसंभावितधर्मविशेषैस्तं विशिनष्टि । क्षेत्रज्ञ इति । अनेनाचेतनव्यावृत्तिर्जीवव्यावृत्तिश्च नहि जीवः क्षेत्रं यादृक् यत्स्वरूपं तथा जानाति किंतु समेदमिति सामान्याकारेणात्मा प्रकृतिपुरुषयोरन्तः प्रविश्य नियन्तृत्वेन धारकः पुराणः पुरुषः न जगदादिकारणतया वर्तमानः पुरुषः साक्षात्स्वप्रकाशस्वरूपः स्वयं ज्योतिष्ट्वं जीवेऽपि प्रसक्तं तद्व्युदासाय यत्साक्षादित्युक्तं साक्षादपरोक्षं स्वयंज्योतिः नहि जीवस्वरूपं मनआदिभ्यो विविक्तं बद्धावस्थायामवभासते मुक्तावस्थायामपि तदवभासस्य परमात्मप्रसादायत्तत्वात् निरुपाधिकसाक्षाद्वभासाभावान्निरुपाधिकसाक्षात्स्वयंज्योतिष्ट्वस्यैवात्राभिप्रेतत्वात् नित्यसिद्धानामपि तथात्वस्य परमात्मनो नित्येच्छायत्तत्वेन निरुपाधिकत्वाभावात् अजः स्वरूपतः स्वभावतश्चोत्पत्त्यादिविकाररहितः अचेतनस्वरूपस्वभावाभ्यामुत्पत्तिमतोः प्रकृतिपुरुषयोर्व्यावृत्तिः जीवस्यापि ज्ञानविकाशरूपस्वभावोत्पत्तेः सत्त्वात् परेषां ब्रह्मादीनामपि ईश्वरः दैवताविशेषनिश्चयायोक्तम् । नारायणो भगवान् वासुदेव इति । नारं जीवसमूहस्तस्यायनं प्राप्यं प्रापकमाधारश्चेत्येवं नारायणशब्दो योगरूढिभ्यां विष्णोरेवासाधारणः अत्र निर्वचनानि पूर्वमेवोपन्यस्तानि एवं वासुदेवशब्दोऽपि "वसन्ति यत्र भूतानि भूतात्मन्यखिलात्मनि" इति तत्रैव नियतः स्मर्यते भगवच्छब्दोऽपि भगवत्पराशरादिभिः "संहर्ता च तथा भर्ता" इत्यादिभिरंशतः समुदायरूपेण च तत्रैव नियतः स्मृतः नन्वात्मतया सर्वव्यापकश्चेत्कथमदर्शनमत आह । स्वमायया स्वाधीनमायया आत्मन् जीवे आर्षत्वात्सप्तम्या लुक् परमे व्योमन्नितिवत् व्यवधीयमानः तिरोधीयमानः प्रकृतिवशगैर्द्रष्टुमशक्य इत्यर्थः ॥ १३ ॥

न प्रकृतिवशगैर्दुर्दर्शत्वमात्रेण सर्वव्यापकत्वं भगवतः किन्तु वायुवददृश्य एव सर्वव्यापकतया नियमयतीत्याह । यथेति । यथानिलो वायुरात्मस्वरूपेण चराचरभूतानामन्तःप्रविष्ट ईष्टे प्रेरयति । एवं क्षेत्रज्ञः परमात्मा भगवान् वासुदेवोपीदं जगच्चेतनाचेतनात्मकमन्तर्नियन्तृतया प्रविष्टः भगवतो व्याप्तिद्वारा प्रेरकतया चेत्यनिलदृष्टान्तः ततः सिद्धः ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रोत्रादीन्द्रियेषु सत्सु मनस एव प्राधान्यं कथमित्याशङ्क्य तत्तदिन्द्रियद्वारा तत्तद्विषयेषु मनसः प्रवृत्तेरित्याह । एकादशेति । अस्य मनस एकादशवृत्तयः सन्तीत्यन्वयः । अयमर्थः श्रोत्रादीनि दश एकं मनः स्वयमित्येकादशेन्द्रियाणि इन्द्रियद्वारेण शब्दरूपादिषु प्रवर्तमानस्य मनस एकादशवृत्तय इत्युच्यन्ते तदुक्तम् "एकादशेन्द्रियद्वारा स्युरेकादश वृत्तय" इति अत्र काश्चिद्विभागोऽप्यस्ति एकादशधा विभक्तस्य मनस आकूतयः अहं शब्दं शृणवानीत्यादिविषयानुभवेच्छा पञ्चशब्दादीनां च तावत्त्वान्निश्चयलक्षणरूपान्तरमास्थितस्य धियो बुद्ध्यपरपर्यायस्य मनसोऽभिमाना अहं मधुरं शृणोमीत्यादिरूपाश्च पञ्च तदुक्तं "शब्दाद्यास्तदभीमानास्तदिच्छाश्चैव पञ्चश" इति कर्मेन्द्रियाणां स्पर्शान्तर्भावेण एकत्वेन पृथग्विषयाभावेन पञ्च पञ्च सङ्ख्यात्वोपपत्त्या एकादशधापि विभक्तस्य मनस एकादशाकूतयोऽप्यपेक्षिता इति दुराग्रहो निरस्तः "स्पर्शान्तर्भावतः कर्मस्थानां नैव पृथग्गतिः" इति वचनात् । तर्हीन्द्रियचेष्टानामपि पञ्चत्वं स्यादित्याशङ्क्य विषयबाहुल्येन तावत्त्वं न घटत इत्यभिप्रेत्याह । मात्राणीति । मात्राणि श्रोत्रादिज्ञानेन्द्रियविषयाः शब्दादयः कर्माणि वागादिकर्मेन्द्रियविषया गमनादिव्यापाराः पुरं शरीरं चेत्यक्तस्तासामिन्द्रियवृत्तीनां भूमिमधिष्ठानमेकादश वदन्ति हेत्यनेनेन्द्रियगणं च भूमिं वदन्ति तदुक्तम् ।

एकादशैव चेष्टाः स्युरिन्द्रियाणां पृथक् पृथक् ।
गोलकास्तदधिष्ठानं चैकादश निगद्यत इति ।

हे वीर ! ज्ञानग्रहणेच्छालक्षणाध्यवसायान्तगामिन् ! मात्राणीत्यादिनोक्ता भूमीः पृथक् पृथक् निदर्शयति ॥ ९ ॥

गन्धेति । आकृती रूपं अतिरुपस्थविषयः शिल्पो हस्तविषयः । एकादशमधिष्ठानं ममेति स्वीकरणं सङ्कल्पविकल्पलक्षणं स्वीकारयोग्यमिन्द्रियगणं चाहुः । 'पुरि तनौ शेत' इतिश्रुतेः हृदयलक्षणानाद्यधिष्ठानसम्भवात्कथमेकादशत्वमित्याशङ्क्य संख्यान्तरमाह । मायामिति । मायां नानाधिष्ठानभूतां नाडीमहमित्यभिमन्तव्यं मायां निश्चयज्ञानविषयीं वा तदुक्तम् "एष संसृतिसम्भारो द्वादशैवाथ वा भवेत्" इति एकादशत्वं च प्रसङ्गाद्वक्ति "दशकं विषयाणां च म(१)माहमिति च द्वयम्" इति सर्वान्तर्भावेण द्वयमेव वक्ति द्वयमेव ममाहश्चेति । मायामहमित्यनेनायमर्थो ध्वनितः तथाहि विषयाणां दशकं मायामित्येकमहमित्येकमिति द्वादशमित्यर्थः ममेति वृत्तिविशिष्टमन्तःकरणं मायामिति ज्ञातव्यम् । यद्वा द्वादशसङ्ख्याविशिष्टत्वेनोक्तमहमिति वृत्तिविशिष्टमन्तःकरणमेकमेव संसृतिकारणमिति शेषः तदुक्तं संसृतिस्त्वहमेव चेति ॥ १० ॥

शृङ्गग्राहिकयैवाभिव्यक्तिनिमित्तमाह । द्रव्येति । द्रव्यं देहादिः स्वभावो जीवस्यानादियोग्यता आशयः पूर्वानुभवसंस्कारः कर्म जन्मान्तरकृतं पुण्यपापलक्षणमदृष्टं कालः फलपाचकः एतैः क्षोभिता अमी मनसः एकादश विकारा जायन्त इति शेषः न केवलं मनस एकादशैव विकाराः किन्तु मन्दमध्यमोत्तमविक्षेपभेदेन शतश आदिविकाराः सन्तीत्याह । सहस्रश इति । क्रमभङ्गस्तु नियमभङ्गाय ननु देहाद्येवैषां यदि निमित्तं तर्हि जन्मादिसूत्रोक्तमसङ्कोचेन ब्रह्मकारणत्वमनर्थकं स्यादपि च ब्रह्म वा एतैः कार्यैः कारयतीति श्रुतिश्चापहसिता स्यादिति तत्राह । क्षेत्रज्ञत इति । क्षेत्रज्ञतो ब्रह्मणो जीवान्तर्यामिणो हरेरेते विकाराः स्युर्जीवस्येति शेषः देहाद्यधिष्ठाय जीवान्तर्यामी हरिः जीवादृष्टमपेक्ष्य तद्भोगार्थमुत्पादयत्यतो देहादेः कर्तृत्वोपचारोऽतो न श्रुतिसूत्रे व्यर्थे इति भावः नन्वन्योऽन्यापेक्षया मदिराद्रव्यवत्स्वतो वैषामुत्पत्तिः किं न स्यात् किं मध्ये ब्रह्मकल्पनयेति तत्राह । न मिथ इति ॥ ११ ॥

(१) ममैते अहंकर्तेत्यभिमानद्वयम् ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नन्वेषां सत्यत्वे किं मानमिति तत्राह । क्षेत्रज्ञ इति । भोगयोग्यः क इत्यत उक्तं जीवस्येति । उपादानाभावेनेन्द्रजालसृष्टिवत् मिथ्याभूता इति नेत्याह । मायारचिता इति । मायया प्रकृत्या रचिताः "मायां तु प्रकृतिं विन्द्यात्" इति वचनात् नित्यत्वे कथं रचितत्वमित्यत उक्तमनित्या इति नित्यस्य जीवस्यानित्यानामनुभवः कथमित्यत उक्तमाविर्हिता इति जाग्रत्स्वप्नयोराविर्हिताः क्वापि सुप्तौ तिरोहिताः विचष्टे पश्यति दर्शनं साक्षित्वेन नत्वनुभवनम् "अनश्नन्नन्यो अभिचाकशीति" इति श्रुतेः अविशुद्धकर्तुरित्यनेन साक्षिणो हरेर्जीवं व्यावर्तयति॥१२॥

शुद्धाशुद्धत्वविशेषणाभ्यां वैलक्षण्ये ज्ञाते मन्दस्यैकमेव वस्तु शबलनिर्गुणाभेदेनोच्यत इति शङ्का स्यादिति तत्परिहाराय क्षेत्रज्ञं विशिनष्टि । क्षेत्रज्ञ इति । आत्मा व्यापी "यश्चाप्नोति यदादत्ते महान्तं विभुमात्मानम्" इत्यादिश्रुतेः व्याप्तस्य नीरूपत्वेनाकाशवत्प्रतिपत्त्यनुपपत्तिरित्यतः पुरुष इति "सहस्रशीर्षा पुरुषः" इतिश्रुतेः पुरि शरीरे निषण्णो भवतीति निरुक्त्या पुरुषश्चेत्तत्परिणामे तत्स्थस्यापि परिणामप्रसङ्ग इत्यतः पुराण इति "शाश्वतोऽयं पुराण" इति श्रुतेः कतिपयदिनस्थायित्वेनापि पुराणशब्दार्थोपपत्तेरित्यतः साक्षादिति जडप्रकृतेरपि साक्षात् पुराणत्वोपपत्तेरनादित्वादित्यतः स्वयंज्योतिरिति "अत्रायं पुरुषः स्वयंज्योतिर्भवति" इति श्रुतेः स्वयंज्योतिषोऽपि जीववत् जननं किं न स्यादित्यतोऽज इति "अजो नित्य" इति श्रुतेः नन्वयं हिरण्यगर्भः किं न स्यादित्यतः परेश इति । परो हिरण्यगर्भस्तस्येशः "यो ब्रह्माणं विदधाति पूर्वम्" इति श्रुतेः "ब्रह्मणोऽधिपतिः" इति श्रुतेः हिरण्यगर्भेशोऽपि पशुपतिः किं न स्यादित्यतो नारायण इति । नरसमुदायो नारः तस्याश्रय इति कस्यचिद्ग्रामाधिपतेरपि नारायणत्वं स्यादित्यतो भगवानिति ।

> उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।
>
> वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति इति स्मृतेः

ऋषित्रिकालदर्शी स्यात्तस्मादृषेरपि भगवच्छब्दवाच्यत्वोपपत्तेरित्यतो वासुदेव इति । अत्र व्याप्तिः पौराणिकरीत्योक्ता ननु न्यायशास्त्रोक्तिमवलम्ब्येति नोपहासविषयोऽयमिति ज्ञातव्यं नन्वेवंलक्षणकः क्षेत्रज्ञश्चेत्किमिति जनैर्न दृश्यत इत्यतः स्वमाययेति । स्वमायया स्वेच्छयात्मन्यात्मनि स्वस्मिन्नेव व्यवधीयमानः तिरोहितत्वेन स्थितः स्वात्माधारः स्वेच्छयैव जीवदृष्टेस्तिरोहितः क्षेत्रज्ञैरुच्यते विष्णुः जीवस्थः पुरुषोत्तम इति च अतो निर्वाच्याविद्ययाच्छाद्यमानो न स्यादित्यर्थः "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराण"मिति श्रुतेश्च॥१३॥

ननु क्षेत्रज्ञो मनसो विभूतीः पश्यतीत्युक्तं तत्र दर्शनं बहिः स्थित्वोतान्तः स्थित्वा नाद्यः बहिष्ठस्यान्तर्दर्शनायोगात् न द्वितीयः "असङ्गो ह्ययं पुरुष" इति श्रुतेरसङ्गस्य देहान्तः प्रवेशायोगात्तद्योग्यसुखदुःखभोगप्राप्तेश्चेत्याशङ्क्याह । यथानिल इति । यथानिल आत्मस्वरूपेण प्राणरूपेण स्थावरजङ्गमानामन्तर्निविष्टः स्थावरजङ्गमानामीष्टे चेष्टालक्षणमीशनं करोति "अधीगर्थदयेशां कर्मणि" इति द्वितीयार्थे षष्ठी नह्येतावता वायोः सुखादिभोगः श्रुतचरः एवं क्षेत्रज्ञनामा वासुदेवो भगवानिदं जगदात्मस्वरूपेणान्तर्यामिरूपेणान्तः प्रविष्टः एता मनोविभूतीः पश्यतीति पूर्वेणान्वयः सर्वत्रोषित्वा क्रीडत इति वासुदेव इति वासुदेवपदप्रयोगेन दुर्भगशरीरयोग्यदुःखभोगाभावो जीवान्तःस्थत्वेन क्षेत्रज्ञशब्दार्थोऽपि दर्शित इति ज्ञायते न निलः सङ्गो यस्यासावनिल इत्यतोऽसङ्गस्याप्यन्तःप्रवेशो युज्यत इति॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मात्राणि विवृणोति । गन्धाकृतीति । कर्माणि विवृणोति विसर्गेति ॥ ९—११ ॥

क्षेत्रज्ञ इति । यः शुद्धोऽपि मायारचितस्य वक्ष्यमाणसर्वक्षेत्रज्ञस्य मायया कल्पितस्य मनसोऽन्तःकरणस्यैताः प्रसिद्धा विभूतीर्वृत्तीर्विचष्टे विशेषेण पश्यति । पश्यंस्तत्राविष्टो भवति । स खल्वसौ जीवनामा स्वशरीरद्वयलक्षणक्षेत्रस्य ज्ञातृत्वात् । क्षेत्रज्ञ उच्यते इत्यर्थः तदुक्तं "यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकम्" इत्यादि । तस्य मनसः कीदृशतया मायारचितस्य तत्राह । जीवोपाधितया जीवतादात्म्येन रचितस्य ततश्च तत्तयोपचर्यमाणस्येत्यर्थः ततश्च कीदृशस्य । अविशुद्धं भगवद्बहिर्मुखं कर्म करोतीति तादृशस्य । कीदृशीर्विभूतीः । नित्या अनादित एवानुगताः । तत्र च कदा कीदृशीरित्यपेक्षायामाह । जाग्रत्स्वप्नयोराविर्भूताश्चेति ॥ १२ ॥

यस्तु पुराणः पुरुषः आद्योऽवतारः पुरुषः परस्येत्यादिना द्वितीयस्कन्धादौ प्रसिद्धः साक्षाद्देवं स्वयं ज्योतिः स्वप्रकाशः । नतु जीववदन्यापेक्षया अजो जन्मादि शून्यः परेषां ब्रह्मादीनामपीश्वरः नारं जीवसमूहः स नियम्यत्वेनायनं यस्य भगवान् ऐश्वर्याद्यंशवान् भगवदंशत्वात् । स्वमायया स्वरूपशक्त्या आत्मनि स्वरूपे । अवधीयमान इति । मायया मायिकेऽप्यन्तर्यामित्वेन प्रविष्टोऽपि स्वरूपशक्त्या स्वरूपस्थ एव नतु तत् संसक्त इत्यर्थः । वासुदेवत्वेन सर्वक्षेत्रज्ञातृत्वात् सोऽपरः क्षेत्रज्ञः आत्मा परमात्मेति । तदेवमपि मुख्यं क्षेत्रज्ञत्वं परमात्मन्येव । तदुक्तं । सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे इति । तथा श्रीगीतोपनिषत्सु ।

> इदं शरीरं कौन्तेय ! क्षेत्रमित्यभिधीयते ।
>
> एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ।
>
> क्षेत्रज्ञञ्चापि मां विद्धि सर्वक्षेत्रेषु भारत ! ।
>
> क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज् ज्ञानं मतं मम इति ।

अत्र खलु क्षेत्रज्ञञ्चापि मां विद्धीति सर्वेष्वपि क्षेत्रेषु माञ्च क्षेत्रज्ञं विद्धि नतु जीवमिव स्वस्वक्षेत्र एवेत्येवार्थं वदति । नच जीवेशयोः सामानाधिकरण्येन निर्विशेष चिद्वस्त्वेव ज्ञेयतया निर्दिशति । सर्वक्षेत्रेष्वित्यस्य वैयर्थ्यापत्तेः। ज्ञेयं यत्तत् प्रवक्ष्यामीत्यादौ सर्वतः पाणिपादं तदित्यादिना सविशेषत्वस्यैव निर्दिष्टत्वात् । अमानित्वमित्यादिना ज्ञानस्य च तथोपदिष्टत्वात् । किञ्च क्षेत्रज्ञं चापीत्यत्र तत्त्वमसीतिवत् सामानाधिकरण्येन तन्निर्विशेषज्ञाने विवक्षिते क्षेत्रज्ञेश्वरयोर्ज्ञाने विवक्षिते क्षेत्रज्ञेश्वरयोर्ज्ञानमित्येवानूद्येत । नतु क्षेत्रक्षेत्रज्ञयोर्ज्ञानमिति । किन्तु क्षेत्रक्षेत्रज्ञयोरित्यस्यायमर्थः द्विविधयोरपि क्षेत्रक्षेत्रज्ञयोर्यज्ज्ञानं तन्ममैव ज्ञानं मतम् । "अन्यार्थस्तु परामर्श" इति न्यायेन तज्ज्ञानैकतात्पर्यक-

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मित्यर्थः । ज्ञेयस्यैकत्वेन निर्दिष्टत्वात् योग्यत्वाच्च । नच निरीश्वर-साङ्ख्यवत् क्षेत्रक्षेत्रज्ञमात्रविभागादत्र ज्ञानं मतं मामित्यनेने-श्वरस्यापेक्षितत्वात् । नच विवर्तवादवदीश्वरस्यापि भ्रममात्र प्रतीतिपुरुषत्वम् । तद्वचनलक्षणासवेदगीतादिशास्त्राणामप्रामा-ण्याद्बौद्धवादापत्तेः तस्यां च सत्यां बौद्धानामिव विश्व-र्तवादिनां तद्व्याख्यानायुक्तेः ॥ १३ ॥

यथेति । श्रुतिश्च

वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो

बहिश्चेति काठके ॥ १४—१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वृत्तीर्दर्शयति । एकादश वृत्तयः इन्द्रियरूपाः तत्र पञ्च आकूतयः कर्माकाराः पञ्च धियः ज्ञानाकाराः एकोऽभिमानोऽहङ्कारः इत्ये-वमेकादश तासां वृत्तीनां भूमीर्विषयानप्येकादशैव वदन्ति वीर । हे ज्ञानवीर राजन् ! मात्राणि गन्धादयः पञ्च ज्ञानेन्द्रियाणां विसर्गादिकर्माणि पञ्च कर्मेन्द्रियाणां पुरं देहगेहाद्येकम् अभि-मानस्येत्येकादश ॥ ९ ॥

मात्रादीनि विवृणोति । गन्धेति । पञ्च नासिकादीनां ज्ञानेन्द्रि-याणां विषयाः आकृतिः रूपं विसर्गादयः पञ्च पाय्वादीनां कर्मेन्द्रि-याणामेवं दश अर्सिगमिने स्वीक्रियत इति स्वीकरणम् एकादशं पुरमभिमानस्य विषयमाहुः । एके आचार्याः अभिमानस्य द्वैवि-ध्यात् ममेति ममकारस्य शय्यां विषयं गेहादिकमेकादशम् अह-मिति अहङ्कारस्य शय्यां देहं द्वादशमाहुः ॥ १० ॥

तासां वृत्तीनामवान्तरभेदैरानन्त्यमाह । द्रव्यादिभिर्भेदैरमी विकाराः वृत्तिरूपाः प्रथमं शतशः ततः सहस्रशः लक्षशः कोटि-शश्च स्युः द्रव्याणां चन्दनकस्तूरीकुङ्कुमादीनां स्वर्णरजत-प्रवालादीनाञ्चानन्त्यात् कोऽपि गन्धरूपादिः कस्मैचित् रोचत इति स्वभावानन्त्यात् आशयोऽन्तःकरणं तस्य शिष्टतादुष्टताभ्यां कर्म अदृष्टं तद्वशादपि कालो बाल्ययौवनादिस्तद्वशादपि प्रत्येकमनन्ता एव गन्धादयः स्युरित्यर्थः नतु मिथः स्युर्नापि स्वतः स्युः किन्तु क्षेत्रज्ञतः परमेश्वरात् तस्य चानन्तशक्तित्वा-दनन्ताः स्युरित्यर्थः ॥ ११ ॥

क्षेत्रज्ञो हि द्विविधः परमात्मा जीवात्मा च तयोः प्रथमः पूर्व-श्लोके उद्दिष्ट उत्तरश्लोके वक्ष्यते च द्वितीयश्च द्विविधः बद्धो मुक्तश्च तत्र मनसा आलिङ्गितः तदभिमानी बद्धः तेन अनालि-ङ्गितो निरभिमानी मुक्तः तयोः पूर्वो ज्ञायत एव उत्तरः कीदृशः स्यादित्यपेक्षायामाह । क्षेत्रज्ञः एता मनसो विभूतीर्विचष्टे पश्यति जानाति केवलं नतु तदभिमानी सन् भुङ्क्ते । अत एव शुद्धः संसारान्मुक्तः अन्यस्त्वशुद्धः संसारीत्यर्थः मनसः कीदृशस्य जीवस्य जीवोपाधेः यतो मायया रचितस्य अत एवाविशुद्धं भगवद्बहिर्मुखं कर्म करोतीति तस्य । विभूतीः कीदृशीः नित्याः । अनादित एवानुगताः कथं तर्हि सदा न दृश्यन्त इत्यत आह । आविर्हिताः क्वापि जाग्रत्स्वप्नयोः तिरोहिताः क्वापि सुषुप्ति-प्रलययोः ॥ १२ ॥

बद्धजीवस्य व्यवहार एव सदैवावधानविषयो यथा तथा मुक्तजीवस्यावधानविषयः क इत्यपेक्षायामाह । क्षेत्रज्ञः क्षेत्रस्य का-र्त्स्न्येन ज्ञाता परमात्मेत्यर्थः । आत्मा व्यापकः पुराणो जगत्कार-णभूतः पुरुषः पुरुषाकारः स्वयंज्योतिः स्वप्रकाशः अजो मायिक-जन्मादिशून्यः परेषां ब्रह्मादीनामपीशः नारायणः कारणार्ण-वशायी भगवान् षडैश्वर्यपूर्णो वैकुण्ठनाथः वासुदेवो वसुदेव-नन्दनः श्रीमथुराद्यधिपतिः । सुष्ठु अमायया हेतुना आत्मनि अवधीयमानः मुक्तजीवेन आत्मनि मनसि अवधानविषयीक्रिय-माणः । यद्वा स्वयायया स्वरूपशक्त्या कृपया वा सहितः ॥१३॥

स च भगवान् मुक्त जीवेन सुलभ एवेति सदृष्टान्तमाह । यथेति । आत्मस्वरूपेण ईशेत् ईशीत इदं विश्वम् ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वृत्तयस्तु आकूतयः क्रियाकाराः पञ्च धियश्च ज्ञानाकाराः पञ्च अभिमानश्चेत्येकादश आसन् विषयानाह । मात्राणीति । मात्राणि गन्धादीनि ज्ञानाकाराणां कर्माणि विसर्गादीनि क्रियाकाराणाम् पुरं शरीरमभिमानस्य एवमेकादश हे वीर ! तासां वृत्तीनां भूमीः विषयान् वदन्ति ॥ ९ ॥

विषयानाह । गन्धेति । आकृतिः रूपमर्तिर्गतिः ममेति स्वीक्रियते इति स्वीकरणं शरीरं केचित्तु अभिमानो द्विविधः विदुषां मम देहः इति मूढानां तु देहोऽहमिति तत्र देहोऽहमित्यहङ्कारं द्वादशं वृत्त्यन्तरमाहुः तस्य देहमेव शय्यां विषयमाहुः ॥ १० ॥

एकादशवृत्तीनामवान्तरभेदैर्बाहुल्यमाह । द्रव्येति । द्रव्याणि विषयाः स्वभावः परिणामहेतुः । आशयो वासना कर्म पुण्या-दिकम् कालः क्षोभकः तैर्निमित्तभूतैः अमी पूर्वोक्ता एकादश मनसो विकाराः वृत्तयः प्रथमं शतशस्ततः सहस्रशस्ततः कोटिशः ता[illegible]केवलान्मनसो न स्युस्तस्य करणत्वात् न च मिथो न च स्वतश्च स्युः नहि अचेतने करणे एकैकशः मिलित्वा वा वृत्तयो जायन्ते असम्भवात् अतः क्षेत्रज्ञतः मनसि जायन्ते इति सिद्धान्तः ॥ ११ ॥

अथ भजनीयस्य मुक्तौ प्राप्यस्य भगवतः सर्वज्ञत्वादीन् गुणान् क्षेत्रज्ञादीनि बहूनि नामानि चाह । क्षेत्रज्ञ इति त्रिभिः । अविशुद्ध-कर्त्तुर्बद्धस्य जीवस्य सम्बन्धि यन्मनस्तस्य मायारचितस्य प्रकृति-कार्यस्य प्रवाहरूपेण नित्याः जाग्रत्स्वप्नयोराविर्भूताः क्वचि-त्सुषुप्त्यादौ तिरोहिताः एताः विभूतीर्वृत्तीः क्षेत्रज्ञः समष्टिव्यष्टि-रूपसर्वशरीरवित् शुद्धः स्वभावतोऽपास्तसमस्तदोषो भगवान् विचष्टे पश्यति ॥ १२ ॥

स्वमायया "मायादम्भे कृपायां च" इति विश्वः स्वकृपया आत्मनि जीवे अवधीयमानः प्रेरकतया वर्त्तमानः ॥ १३ ॥

यथा अनिलो वायुः आत्मस्वरूपेण प्राणरूपेण स्थावरजङ्गमाना-मन्तर्निविष्टः ईशेत् प्रेरयति एवं भगवानपि इदं विश्वमनुप्रविष्टः ईशेत् प्रेरयति ॥ १४ ॥

न यावदेतां तनुभृन्नरेन्द्र ! विधूय मायां वयुनोदयेन ।
विमुक्तसङ्गो जितषट्सपत्नो वेदात्मतत्त्वं भ्रमतीह तावत् ॥ १५ ॥
न यावदेतन्मन आत्मलिङ्गं संसारतापावपनं जनस्य ।
यच्छोकमोहामयरागलोभवैरानुबन्धं ममतां विधत्ते ॥ १६ ॥
भ्रातृव्यमेनं तददभ्रवीर्यमुपेक्षयाध्येधितमप्रमत्तः ।
गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं स्वयमात्ममोषम् ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां जडभरतरहूगणसम्वादे
एकादशोऽध्यायः ॥ ११ ॥

भाषाटीका

मनकी वृत्तियां ग्यारह हैं तिनमें पांच क्रिया मय कर्मेन्द्रिय हैं पांच ज्ञानेद्रियहैं एक अभिमान है हे वीर ! कर्मेन्द्रियों के पांच कर्म विषय हैं ज्ञानेन्द्रियों के पांच गन्धादिक विषय हैं मन अभिमान का विषय है ॥ ९ ॥

ज्ञानेन्द्रियों के विषय गन्ध रूप स्पर्श रस शब्द कर्मेन्द्रियोंके विषय मल त्याग रति चलना बोलना करना मेरा है ऐसा स्वीकार करना अभिमान का विषय है कोई लोग शरीर के अभिमान को बारहमा इन्द्रिय कहते हैं ॥ १० ॥

चन्दनादि द्रव्यों के रुचि के स्वभाव अन्त:करण अदृष्टवाल्यादिकाल आदि के भेदों से मन के भिन्नतासे यही विकार सो हजार कोटि अनंत हो जाते हैं सो विकार न जीवसे हैं न परस्पर से हैं आपहीसे हैं किंतु वृत्ति से कल्पित हैं ॥ ११ ॥

अशुद्ध कर्मों के करनेवाले मनकी वृभूती जो कि जीव की माया से रचित हैं प्रवाह से नित्य जाग्रत अवस्था में प्रगट स्वप्नावस्था मे अप्रगट इन मनकी वृत्तियों का देखनेवाला जो शुद्ध है वही क्षेत्रज्ञहै ॥ १२ ॥

ईश्वर क्षेत्रज्ञका स्वरूप यह आत्मा है पुराण पुरुष हैं साक्षात् स्वयं ज्योति है परेश है नारायण भगवान् वासुदेव हैं जीवों के हृदय मे वर्तमान है ॥ १३ ॥

जिस प्रकारसे पवन बाहिर स्थितहोकर भी स्थावर जंगम प्राणियों के आत्मरूप होकर भीतरभी प्रेरक होता है तैसेही भगवान् वासुदेव क्षेत्रज्ञहोकर जीवों के बाहिर भीतर व्याप्तहो रहे हैं ॥ १४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवमात्मनः शुद्धत्वं संसारस्य च मिथ्यात्वं प्रदर्श्येदानीं तन्निवृत्तिमाह । तनुभृद्देही वयुनोदयेन ज्ञानोत्पत्त्या यावन्मायां विधूयात्मतत्त्वं न वेद तावदिह भ्रमति ॥ १५ ॥

यावच्च विषयानुरक्तं मन एवानर्थहेतुरिति न वेद तावन्निर्वेदाभावात्परिभ्रमत्येवेत्याह । नेति । आत्मनो लिङ्गमुपाधिभूतं मनः संसारतापानामावपनं क्षेत्रं यावन्न वेद तावद्भ्रमतीत्यनुषङ्गः । तापावपनत्वे हेतुः । यन्मनः शोकाद्यनुबन्धं ममतां च विधत्ते ॥ १६ ॥

तत्तस्मात् । भ्रातृव्यं शत्रुमध्येधितं संप्रवृद्धं स्वयं व्यलीकं मिथ्याभूतं तथाप्यात्मानं मुष्णातीति तथा तं गुरोश्च हरेश्च चरणोपासनमेवास्त्रं यस्य तथाभूतः सन् जहि घातय ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं प्रकृतिपुरुषविलक्षणं परमात्मस्वरूपमुपदिश्य तदुपासनया तत्साक्षात्कारापन्नज्ञानपर्यन्तं संसारो न निवर्तत इत्याह । नेति । हे नरेन्द्र ! रहूगण ! तनुभृद्देही वयुनोदयेन ज्ञानोदयेन यावदेतां मायामहंममाभिमानरूपां विधूय निरस्य विमुक्तः सङ्गो देहगेहादिषु येन जिताः षट् सपत्नाः शत्रवो मनसा सह इन्द्रियरूपाः येन तथाभूतः सन्नात्मनः परमात्मनः तत्त्वं याथात्म्यं न वेद तावदिह संसारे भ्रमति ॥ १५ ॥

कदायं तनुभृदात्मतत्त्वं वेदेत्यत्राह । नेति । यदि जनस्य संसारतापानामाध्यात्मिकादीनामावपनं क्षेत्रमात्मनो जीवस्य लिङ्गं पूर्वोक्तरीत्या संसृतिमुक्त्योः कारणं मनो यावच्छोकादिकं ममतां च न विधत्ते तदा वेद । यद्वा यावच्छोकादिकं विधत्ते तावन्न वेदेत्यन्वयः तत्र मोहः प्रमादः आमयो रोगः वैरानुबन्धः वैरपूर्वकानुस्मरणं शोकादीनां समाहारद्वन्द्वः । यद्वा शोकादिरूपमनुबन्धमनुबध्यते पृष्ठतः सम्बध्यते इत्यनुबन्धः अग्रतो ममतां तत्पृष्ठभागेन शोकादिकं च यावन्न विधत्ते इत्यर्थः कदेदं मनः शोकाद्यविधायकमिति चेदत्र न गुणा-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नुरक्तं कदा गुणानुपरक्तमिति चेत् "आहारशुद्धौ सत्त्वशुद्धिः" इत्याद्युक्तसात्त्विकाहारसत्क्रियादिभिः सत्त्वप्रचुरमित्यन्यदेतत् ॥ १६ ॥

तस्मादेनमन्तःकरणरूपं भ्रातृव्यं सहजशत्रुमुपेक्षयानिग्रहेणात्यन्तमेधितं संवृद्धमत एवादभ्रमनल्पवीर्यं संसारयितृत्वरूपं यस्य अत एव व्यलीकमप्रियकारिणं तत्र हेतुः आत्ममोषमात्मापहारिणं त्वम् अप्रमत्तः अनलसः गुरोर्हरेः गुरुरेव हरिस्तस्य चरणोपासनमेवास्त्रं यस्य तथाभूतः सन् जहि यातय सदाचार्य्यसेवादिप्रणाड्या स्ववशीकुर्वित्यर्थः ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एवं संसारबन्धस्य श्रीनारायणसाक्षिसिद्धत्वेन सत्यत्वं प्रसाध्याधुना श्रीहरिकटाक्षानुगृहीतस्वापरोक्षज्ञानमन्तरेण तन्निवृत्त्यनुपपत्तेस्तन्निवर्तकसाधनमाह । न यावदिति । तनुभृज्जीवो यावद्यावन्तं कालमहम्ममेति मनोनिगूढामेतां सर्वसाक्षिसिद्धां मायां भ्रान्ति वयुनोदयेन शास्त्रश्रवणजनितज्ञानोदयेन विधूय भ्रान्तिरेषेति निश्चित्यात्मतत्त्वं सकलवेदान्तविषयीभूतभगवत्स्वरूपं न वेद तावत्पर्यन्तमिह संसारे पूर्वोक्तप्रकारेण भ्रमति पुनः पुनः जननमरणावृत्त्या वर्तते इत्यन्वयः कीदृशस्येदं घटत इत्यत उक्तम् । विमुक्तेति । फलसंकल्परहितः अत्रापि किं कारणमित्यत उक्तम् । जितेति । जिताः षडिन्द्रियशत्रवो येन स तथा पुरुषार्थविरुद्धचेष्टाहेतुत्वादिन्द्रियाणां सपत्नत्वमन्यथा सुहृत्त्वमिति भावः ॥ १५ ॥

ननु भ्रान्तीनामनेकत्वेन प्रत्येकं तन्निवर्तनानुपपत्तेरतः क उपाय इति सुहृद्भावेन पृच्छन्तमाह । न यावदित्यादिश्लोकद्वयेन । यावन्तं कालं जनस्य यदेतन्मनो ममतां विधत्ते ममेदमहमित्यभिमानमुत्पाद्य स्वामिनं संसारयतीत्यर्थः तावन्तं कालं न निवर्तत इतिशेषः कीदृशमात्मलिङ्गमात्मनो योग्यताज्ञापकं संसारतापकं संसारताप उच्यतेऽनेनेति संसारतापावपनं कीदृशं तापं वपतीत्यत उक्तम् । शोकेति । शोकादीनामनुबन्धो येन तत्तथा शोकादिजनकत्वेन तापावपनमित्यर्थः ॥ १६ ॥

हे राजंस्त्वमेनमात्मनो मनसः उत्पन्नं मोहं विपरीतज्ञानमत एव भ्रातृव्यं शत्रुं जहि नाशयेत्यन्वयः अल्पत्वेन स्वयमेव विरमतीत्यत उक्तमदभ्रेति । अदभ्रं महद्वीर्यं यस्य तत्तथा अदभ्रवीर्यत्वे हेतुमाह । उपेक्षयेति । अतिगर्हितेन पापेनैधितं वर्द्धितं शत्रुहननमस्त्रेण भाव्यं किमत्रास्त्रमित्यत उक्तं गुरोरित्यादि । उपासनमेवास्त्रं यस्य स तथा प्रमादादवाप्तस्य हनने अप्रमाद एव प्रथमसाधनमित्यभिप्रायेणोक्तम् । अप्रमत्त इति । गुर्वादिचरणसेवाद्यन्तरङ्ग साधनमनलीकत्वमित्यत उक्तम् । व्यलीकमिति । क्रियाविशेषणमेतत् आत्मनो मोहविशेषणं वा विविधवस्तुविषयमनेनानेकान्यथाज्ञानानीति सूचितं परकीयं चेद्दुःखसाधनं हननमत उक्तम् । स्वयमिति । स्वकीयमित्यर्थः अत्रेदमाकूतं द्विविधं मनः चिदचिद्भेदेन तत्र चिन्मनस्तु स्वरूपमभिन्नं मुक्तावानन्दानुभवसाधनं तन्नाशे स्वरूपनाश एव स्यात्तथा च "अविनाशी वा अरे अयमात्मानुच्छित्तिधर्मा" इति श्रुतिव्याकोपः स्यादितरन्मन आदिमं प्रलये लिङ्गशरीरवत्सूक्ष्मं यावन्मुक्ति तदीयतया स्थितं सतत्सृष्टावुपचितं स्थूलशरीरवर्तिनश्चेतनस्य ममेदमहमित्यभिमानमुत्पाद्य संसारापादनपटु स्वामिनश्चिदानन्दलक्षणस्य दुःखापादकत्वेन वैरि मनो जहि हन तस्य हननेन तन्निमित्ताभिमानलक्षणमोहनाशेन व्यलीकं विगताचिन्मनः संसर्गं स्वयं स्वरूपभूतं सच्चिन्मनः स्वयमिति द्विरावर्तनीयं सुपूजितमिष्टप्रदं देवं श्रीनारायणाख्यं जहि गमय तद्विषयं कुरु अत्रार्थद्वयाभिप्रायेण "हन हिंसागत्योः" इतिधातुः प्रयुक्त इति ज्ञायते अनेनाहमित्यभिमानः संसारहेतुः तन्मूलाचिन्मनोनाशेन तदभावेन तदभाव इति परिहारः सूचित इति तदुक्तमभिमानादेव संसारोऽन्यथा नेति परिहार इति ॥ १७ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

एकादशोऽध्यायः ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एवमविद्योत्तीर्णानां भगवदवधानलक्षणं ज्ञानं शाश्वतिकमेवेत्युक्तम् । अविद्यापतितानां जीवानामप्यविद्योत्तारणे तदेव साधनमित्याह । नेति । वयुनोदयेन उक्तलक्षणज्ञानोत्पत्त्या विमुक्तसङ्गः सन् यावन्मायां विधूयात्मतत्त्वं न वेद तावदिह भ्रमति ॥ १५ ॥

मायाविधूननञ्च सम्यक्तया कथं ज्ञातव्यमिति चेत् यावद्विषयानुरक्तं मनस्तावन्मायाविधूननमात्मतत्त्वज्ञानञ्च न स्यादित्याह । नेति । आत्मनो लिङ्गमुपाधिभूतं मनः यावन्ममतां विधत्ते तावदात्मतत्त्वं न वेदेत्यनुषङ्गः । कीदृशं संसारतापानामावपनं क्षेत्रं तापानेवाह । यद्यतः शोकादीन्यनुबध्नातीति तत्तदेवं मनः श्रयते अन्यत्र तत्त्वमिति यदुक्तं तत् क्षेत्रज्ञ एता इत्यादिश्लोकपञ्चकेन प्रपञ्चितम् ॥ १६ ॥

तस्मान्मन एव निग्रहीतव्यमित्याह । भ्रातृव्यं शत्रुम् उपेक्षयैव जहि निगृहाण तदुपेक्षणमेव तद्वध इति भावः । ननु तदिष्टविषयभोगप्रदानलक्षणया अपेक्षया अनुगृहाणेत्यर्थः । सर्वथैव तद्वधस्त्वनभिप्रेत एव तस्मान्मनो लिङ्गमदो वदन्ति गुणागुणत्वस्य परावरस्येति श्रूयते अन्यत्र तत्त्वमिति च पूर्वोक्तेः दृष्टान्ते च भ्रातुष्पुत्रस्यावध्यत्वात् । मनः कीदृशमधिकमेधितं स्ववृत्तीः संश्रित्य संवृद्धं ननु बलवन्तमिमं दुर्बलोऽहं कथं निगृह्णामीत्यत आह । गुरोः सकाशात् प्राप्तस्य मन्त्ररूपस्य हरेश्चरणयोरुपासना श्रवणादिनवविधभक्तिरेवास्त्रं यस्य सः । यद्वा गुरुरेव हरिस्तस्य चरणोपासनमेवास्त्रं यस्य सः । व्यलीकमप्रियं यतः स्ववृत्ति-

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सन्दर्शनया सम्मोह्य आत्मानं परमात्मरूपं सर्वस्वमेव मुष्णातीति तं महाचौरमित्यर्थः ।

भक्त्यस्त्रेण त्याजयित्वा विषयान् स्वमनो यतिः ।
ध्वस्ताविद्योऽवधत्ते यः कृष्णं मुक्तः स उच्यते ।
भक्त्यभावान्मनोवृत्तीराश्रयद्वासनामयम् ।
अविद्यां यस्य पुष्णाति स पुमान् बद्ध उच्यते ॥ १७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
एकादशः पञ्चमस्य सङ्गतः सङ्गतः सताम् ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तनुभृत् जीवः मायैव मम संसारकारणमिति वयुनोदयेन ज्ञानोत्पत्त्या एतां मायां प्रकृतिं विधूय यावत् आत्मतत्त्वं पूर्वोक्तं भगवत्तत्त्वं न वेद तावत् इह संसारे भ्रमति ॥ १५ ॥

किञ्च यत् शोकाद्यनुबन्धं ममतां विधत्ते तदेतन्मनः लिङ्गं सूक्ष्मशरीरभूतं तत्र तस्यैव मुख्यत्वात् जनस्य देहिनः संसारतापानामाध्यात्मिकादीनामावपनं क्षेत्रं तनुभृत् यावन्न वेद तावदिह भ्रमतीत्यन्वयः ॥ १६ ॥

तस्मादेनं मनोरूपं भ्रातृव्यं शत्रुमध्ये॰भितं प्रवृद्धं व्यलीकं दुष्टम् आत्मानं मुष्णातीति तत् श्रीगुरुरेव हरिः तस्य चरणोपासनमेवास्त्रं यस्य तथाभूतः सन् जहि घातय ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
एकादशाध्यायार्थप्रकाशः ॥ ११ ॥

भाषाटीका ।

हे नरेन्द्र ! जब तक मनुष्य ज्ञान को उदय करके इस माया को दूर करके कामादि छैः शत्रुओं को जीतकर निःसंङ्ग होकर तत्व को नहीं जानता है तवतक इस संसार में भ्रमता रहता है ॥ १५ ॥

जब तक आत्माके उपाधिरूप ससार तापों का बढानेवाला मनुष्य का मन शोक मोह रोग प्रीति लोभों की वृद्धि तथा ममता को धारण करता है तावत् मनुष्य भ्रमता है ॥ १६ ॥

तिस हेतु से वडे वलवाले शत्रु रूप इस मनका उपेक्षा करके वढेहुये इस मन को सावधान होकर श्रीहरि गुरु चरण की उपासना रूप अस्त्रको धारण करके आत्मा के नाश करनेवाले इस मनको नाश करो ॥ १७ ॥

इति श्रीभागवत पञ्चमस्कन्ध एकादशअध्यायका
भाषानुवाद लक्ष्मणाचार्य्यकृत
समाप्त ॥ ११ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे एकादशोऽध्यायः समाप्तः ॥ ११ ॥

द्वादशोऽध्यायः ।

रहूगण उवाच ।

नमो नमः कारणविग्रहाय स्वरूपतुच्छीकृतविग्रहाय ।
नमोऽवधूत ! द्विजबन्धुलिङ्गनिगूढनित्यानुभवाय तुभ्यम् ॥ १ ॥
ज्वरामयार्तस्य यथागदं सन्निदाघदग्धस्य यथा हिमाम्भः ।
कुदेहमानाहिविदष्टदृष्टेर्ब्रह्मन् ! वचस्तेऽमृतमौषधं मे ॥ २ ॥
तस्माद्भवन्तं मम संशयार्थं प्रक्ष्यामि पश्चादधुना सुबोधम् ।
अध्यात्मयोगग्रथितं तवोक्तमाख्याहि कौतूहलचेतसो मे ॥ ३ ॥
यदाह योगेश्वर ! दृश्यमानं क्रियाफलं सद्व्यवहारमूलम् ।
नह्यञ्जसा तत्त्वविमर्शनाय भवानमुष्मिन् भ्रमते मनो मे ॥ ४ ॥

ब्राह्मण उवाच ।

अयं जनो नाम चलन् पृथिव्यां यः पार्थिवः पार्थिव ! कस्य हेतोः ।
तस्यापि चाङ्घ्र्योरधिगुल्फजङ्घाजानूरुमध्योरशिरोधरांसाः ॥ ५ ॥
अंसेऽधिदार्वी शिबिका च यस्यां सौवीरराजेत्यपदेश आस्ते ।
यस्मिन् भवान् रूढनिजाभिमानो राजास्मि सिन्धुष्विति दुर्मदान्धः ॥ ६ ॥
शोच्यानिमांस्त्वमधिकष्टदीनान् विष्ट्या निगृह्णन्निरनुग्रहोऽसि ।
जनस्य गोप्तास्मि विकत्थमानो न शोभसे वृद्धसभासु धृष्टः ॥ ७ ॥
यदा क्षितावेव चराचरस्य विदाम निष्ठां प्रभवं च नित्यम् ।
तन्नामतोऽन्यद्व्यवहारमूलं निरूप्यतां सत्क्रिययाऽनुमेयम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वादशे पुनरापृष्टः सन्देहेन महीभृता ।
स योगी सर्वसन्देहानपानुददितीर्यते ॥ १ ॥

कारणमीश्वरस्तस्यैव लोकसंरक्षणार्थो विग्रहो देहो यस्य स्वरूपेण परमानन्दप्रकाशेन तुच्छीकृतो विग्रहो येन हे अवधूत ! योगेश्वर ! द्विजबन्धोर्लिङ्गेन वेषेण निगूढो नित्यानुभवो येन तस्मै नमः ॥ १ ॥

विशेषतः प्रष्टुं तद्वाक्यमभिनन्दति । ज्वर एवामयो रोगस्तेनार्तस्य यथा सत्स्वादु अगदमौषधम् । यथा च निदाघेन दग्धस्य सन्तप्तस्य हिमाम्भः शीतलमुदकं गङ्गोदकं वा तथा हे ब्रह्मन् ! कुत्सिते देहे यो मानोऽहङ्कारः स एवाहिस्तेन विशेषेण दष्टा दृष्टिर्विवेकलक्षणा यस्य तस्य मे तवेदं वचोऽमृततुल्यमौषधम् ॥ २ ॥

मम संशयविषयमर्थं पश्चात्प्रक्ष्यामि अधुना तावत्त्वदुक्तं वचोऽध्यात्मयोगेन ग्रथितं दुर्बोधं सुबोधं यथाभवत्येवं व्याख्याहि कौतूहलयुक्तं चेतो यस्य तस्य मम ॥ ३ ॥

त्वयोदितं व्यक्तमविप्रलब्धमित्यादिना भारवहनादिक्रिया च तत्फलं च श्रमादिप्रत्यक्षादिभिर्दृश्यमानं सद्बाधितमपि व्यवहारमात्रमूलम् । यद्वा । सतोऽबाधितव्यवहारस्य मूलं कारणमपि नह्यञ्जसा तत्त्वविमर्शनाय क्षममिति भवान् यदाह । अमुष्मिन्नर्थे मम मनो भ्रमति ॥ ४ ॥

अबाधितत्वमसिद्धमित्याह । हे पार्थिव ! यः पार्थिवो विकारः स एव कस्य हेतोः कस्माच्चित्कारणात्पृथिव्यां चलन्नयं भारवाहकादिर्जनो नाम प्रसिद्धः यस्तु न चलति स पाषाणादिरित्येतावानेव भेदः तस्य च जडत्वान्न भारः श्रमश्च किञ्च । भवेदेवं यदि श्रमस्याश्रयो निरूप्येत नत्वेतदस्ति अवयव-

श्रीधरस्वामिकृतभावार्थदीपिका ।

व्यतिरेकेण श्रमास्पदस्यावयविनोऽनिरूपणादित्याशयेनाह । तस्यापि पृथ्वीविकारस्यापि अङ्घ्र्योरध्युपर्युपरि गुल्फादयः उरसः सलोप आर्षः ॥ ५ ॥

शिबिकायामप्यवयवी नास्ति त्वय्यपि नास्ति तदाह । सौवीरराजेत्यपदेशो नाममात्रं यस्य स पार्थिवो विकार आस्ते राजेति सन्धिरार्षः यस्मिन् भवान्निरूढात्माभिमानः सिन्धुषु राजास्मीति दुर्मदनान्धः सन् ॥ ६ ॥

शोच्यानिमान्विष्ट्या निगृह्णान्निष्कृपो वर्तसेऽतो मिथ्यैव गोप्तास्मीति श्लाघमानो महतां सभासु न शोभसे यतो धृष्टः ॥ ७ ॥

न चोत्तरोत्तरावयवभारः पूर्वपूर्वावयवानां भवेदिति वाच्यम् तेषामप्यनिरूपणादित्याशयेनाह । यदेति । निष्ठां नाशं प्रभवमुत्पत्तिं विदाम विद्मस्तत्तदा क्षितेरन्यस्य विकारस्याभावान्नाममात्रादन्यद्व्यवहारस्य मूलं कारणमर्थक्रियया सादित्यनुमेयं निरूप्यताम् तथाच श्रुतिः "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कारणे परमात्मस्वरूपे चोपदिष्टे, देहात्मनोरन्योऽन्यभेदं जिज्ञासुः प्रणत्या तदुक्ताभिनन्दनेन च तं प्रसादयन्पृच्छति रहूगणः । नमो नम इति चतुर्भिः । कारणविग्रहाय कारणस्य परमात्मनो विग्रहाय शरीरभूताय । यद्वा मादृशलोकरक्षणकारणेन विग्रहो देहो यस्य तस्मै "आचार्यदेवो भव देवमिवाचार्यमुपासीत आचार्यं मां विजानीयात्" इति शास्त्रानुसन्धानकृतेनेश्वरभावेनैव-मुक्तं स्वरूपानुसन्धानेन तुच्छीकृतो निरस्तो विग्रहो विरोधः कृतापराधेष्वपि मादृशेषु यस्य अवधूतः सर्वैः परिभाव्यवेषः द्विजबन्धोर्लिङ्गेन वेषेण निगूढो नित्यानुभवः नित्यस्य परमात्मनोऽनुभवः येन ततोऽवधूतशब्देन कर्मधारय एवं भूताय तुभ्यं नमः ॥ १ ॥

ज्वररूप आमयो रोगः तेनार्तस्य पीडितस्य यथा सद्भिषक्कृतमगदमौषधं यथा वा निदाघेन ग्रीष्मतापेन तप्तस्य हिमाम्भः पीडानिवर्तकं च तथा हे ब्रह्मन् ! कुत्सितो यो देहस्तस्मिन्मान आत्माभिमानः स एवाहिः सर्पस्तेन विशेषेण दष्टा दृष्टिर्विवेकलक्षणा यस्य तस्य मम ते तव वचः अमृततुल्यमौषधम् ॥ २ ॥

तस्माद्भवन्तं प्रति मम संशयार्थं संशयनिवृत्त्यर्थमर्थशब्दोऽत्र निवृत्तिवाची मशकार्थो धूम इतिवत् तं पश्चाद्वक्ष्यामि अधुना तु यत्तव त्वया उक्तं तदध्यात्मयोगेन ग्रथितमतो दुर्बोधं सुबोधं यथा तथा कौतूहलचेतसः कौतूहलशब्दस्तद्युक्तपरः कौतूहलयुक्तं चेतो यस्य तस्य मे मह्यमाख्याहि कथय ॥ ३ ॥

तत्र दुर्बोधमर्थमनुवदति । यदाहेति । हे योगेश्वर ! भवान्प्रत्यक्षादिभिर्दृश्यमानं यत्क्रियाफलं दूरगमनक्रियाफलं खेदश्रमादिकं सद्व्यवहारमूलमबाधितव्यवहारहेतुकमुरुपरिश्रान्तोऽसीत्यबाधितव्यवहारस्य मूलं नहि भवतीति यद्भवानाह तत्र मे मनः अञ्जसा सुखेन तत्त्वविमर्शनाय भ्रमते भ्राम्यते क्लिश्यति ॥ ४ ॥

तत्र क्रियाफलस्य बाधितव्यवहारमूलत्वं भवतु नाहि स्थौल्यकार्श्यादिव्यवहारस्य स्वरूपेणासत्त्वमुक्तं देहविषयस्य तस्याबाधितत्वात् किन्त्वात्मनि यद्भवता परिश्रान्तोऽसि नातिपीवा शास्ताधिगोप्ता पतिरिति व्यवहृतं तद्बाधितमित्युच्यते न च मदीयोऽपि व्यवहारः शरीरविषय एवेति बाधितत्वमहंत्वंशब्दयोरात्मविषयत्वादभिमुखी कर्तव्यतत्प्रतिसंबन्धिनि प्रत्यग्वस्तुनि च चेतने एव तयोर्वृत्तेः अचेतनांशेष्वभिमुखादचेतनविषयत्वेऽपि विशेष्यास्थौल्यादेर्बाधितत्वादिति वद्देहात्मनोरत्यन्तभेदमाह ब्राह्मणः । अयमिति । हे पार्थिव ! यः पार्थिवः पृथिव्या विकारः स एव कस्य हेतोः कस्माच्चित्कारणात्पृथिव्यां चलन्नयं भारवाहादिजनो नाम प्रसिद्धः यस्तु न चलति स पाषाणादिरित्येतावानेव भेदः कस्य हेतोरित्यनेन कश्चिज्जीवस्य कर्म शेष एव एतच्छरीरस्य चराचरत्वयोर्हेतुरित्यभिप्रेतं तस्यापि पृथिवीविकारस्याप्यङ्घ्र्योः पादयोः उपर्युपरि गुल्फादयः उरसः सलोप आर्षः शिरोधरा ग्रीवा अंसौ स्कन्धौ ॥ ५ ॥

अंसे च दारुमयी शिबिका तस्यां च सौवीराणां राजेत्यपदेशः अपदिश्यत इत्यपदेशः व्यवहर्तव्यः आस्ते सौवीरराजेति व्यपदेशो व्यवहारो यस्य स मांसपिण्ड आस्ते इति वा यस्मिन् सौवीरराजव्यपदेशे भवान् स्वरूपतः स्वभावतश्च ततोऽत्यन्तविलक्षणोऽपि भवान्निरूढतादात्म्याभिमानः सिन्धुदेशेषु राजास्मीति दुर्मदेनान्धः सन् अनात्मनि राजत्वबुद्धिभ्रान्तिरित्युक्तम् ॥ ६ ॥

अत्यन्तं कष्टेन वहनादिजनितदुःखेन दीनानत एव शोच्यानिमान् विष्ट्या बलान्निगृह्णन्निरनुग्रहः निष्कृपो वर्तसे अनेनात्मनि राजत्वबुद्धिप्रयुक्तनिग्रहादिकर्तृत्वस्य च स्वरूपप्रयुक्तत्वबुद्धिभ्रान्तिरित्युक्तं जनस्य गोप्ता रक्षकोऽस्मीति कत्थमानस्त्वं वृद्धसभासु देहात्मविवेकिषु न शोभते यतो धृष्टः देहात्मभ्रान्त्योद्धतः ॥ ७ ॥

अस्थिरेषु स्थिरबुद्धिश्च भ्रान्तिरिति दर्शयितुमस्थिरत्वमाह । यदेति । चराचरस्य देहजातस्य प्रभवमुत्पत्तिं निष्ठां नाशं च क्षितौ भूम्यामेव विदाम क्षितिशब्दो ब्रह्माण्डपरः "सभूमिं विश्वतो वृत्वा" इति श्रौतप्रयोगात् उत्पत्तिविनाशौ क्षितावेव पश्याम स्थिरत्वं पश्याम इति भावः तस्मादस्थिरत्वान्नाम तत अनित्ये नित्यत्वाद्देहात्मभ्रान्तिमूलान्नित्यत्वस्य बाधितत्वात्त्वदुक्तिमात्रादन्यत्सत्क्रियया अबाधितव्यवहारेणानुमेयव्यवहारस्यात्मनि राजत्वादिव्यवहारस्य मूलं निरूप्यतां तन्न किञ्चिदप्यस्ति उक्तत्रिविधस्य भ्रान्तिमूलत्वादित्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

जन्माद्यस्य यतोऽन्वयादित्यत्र कारणत्वं हरेरुक्तं तदधुना हरेरेव नान्यस्येति सयुक्तिकमस्मिन्नध्याये निरूप्येते तत्रादौ ब्राह्मणस्तुतिव्याजेन तदन्तर्यामिणं स्तौति । नम इति । लोकानुग्रहलक्षणकारणाद्विग्रहो यस्य स तथा तस्मै 'अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनदानाय देहं धृतवत इत्यर्थः स्वरूपापरोक्षज्ञानदीपेन तुच्छीकृतो धिक्कृतो विग्रहः पाञ्चभौतिको देहो यस्य स तथा तस्मै किमर्थं तर्हि स्वसामर्थ्यं न प्रकाश्यत इति तत्राह । अवधूतेति । अवधूतश्चासौ द्विजबन्धुर्ब्राह्मणाभासः तस्य लक्षणेन निगूढः सम्वृतो नित्यानुभवः स्वरूपसामर्थ्यं यस्य स तथा तस्मै अवधूतद्विजा एव बन्धवो येषां ते तथा तेषां लिङ्ग-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नेति वा अवधूत! तुभ्यं नम इति वा तुभ्यं तवान्तर्यामिणे नमः किं विशिष्टाय कस्यानन्दस्यारणं शरणं विग्रहो यस्य कमेवारणं विग्रहो यस्येति वा स तथा तस्मादानन्दमूर्तय इत्यर्थः क्षितिभारासुरानिरसनलक्षणकारणमुद्दिश्य विग्रहो यस्य स तथा असुरनिरासाय स्वीकृतदेहायेत्यर्थः "यदा यदाहि धर्मस्य ग्लानिर्भवति भारत" इत्यादेः मायया कष्टो रणो येषान्ते कारणा असुराः तैर्विग्रहो विरोधो यस्य स तथा तस्मै "मायाभिरुत्सिसृक्षत इन्द्राद्या मारुरुक्षत: अवदस्यूंरधूनुथा" इति श्रुतेः स्वरूपेण चिदानन्दलक्षणाकारेण दूरीकृतप्राकृतदेहाय द्विजबन्ध्विति भावप्रधानो निर्देशः द्विजानां बन्धुः तस्य भावो द्विजबन्धुत्वं तदेव लिङ्गं यस्य स तथा नितरां गूढश्छन्नो लोकापेक्षया प्रकृत्यापिहितो नित्यानुभवो यस्य स तथा द्विजबन्धुलिङ्गश्चायं निगूढनित्यानुभवश्च तस्मै ॥ १ ॥

किं फलरत्नमुपलभ्य स्तौषीति तत्राह । ज्वरेति । निदाघेन औष्ण्येन दग्धस्य ततस्य कुदेहमानाहिसुनष्टदृष्टेरिति पाठः दुष्टदेहाभिमानाख्यसर्पेण सम्यङ् नष्टज्ञानचक्षुषो मे अमृतममृतकल्पं सम्यग् उषो दाहो येषां ते औषास्तान् दधाति पुष्णातीत्यौषधम् ॥ २ ॥

किमत इति तत्राह । तस्मादिति । यस्माद्भवद्वचनामृतं संसाराख्यरोगोन्मूलनकरं तस्मात्संशयार्थं कोटिद्वयारूढमर्थम् । यद्वा संशयनिवृत्त्यर्थं मशकार्थो धूम इति वत् वक्तव्यत्वे निमित्तमाह । पश्चादिति । अधुना त्वत्सन्निधौ सुबोधं पश्चात्त्वत्सन्निधिमन्तरेणासुबोधं ज्ञातुमशक्यं यस्मात्तस्मादितिशेषः किमुक्तार्थे प्रश्न उतार्थान्तर इतिविकल्पो मा भूदित्याह । अध्यात्मेति । अध्यात्मयोगेन परमात्मज्ञानेन प्रथितं वचं यत्पुरा तवोक्तं वचनं तस्याभिप्रायं ममाख्याहि विस्तृत्य वदेत्यन्वयः ॥ ३ ॥

किं तदुक्तं तदाह । यदाहेति । हे योगेश्वर ! दृश्यमानं प्रत्यक्षादिप्रमाणैर्ज्ञायमानं क्रियाफलं भरणगमनक्रियाजनितं भर्तृत्वगन्तृत्वलक्षणं फलं लौकिकम् "अपाम सोमम्" इत्यादिना निरूप्यमाणं सोमपानादिक्रियाजातममृतत्वादिकं फलं वैदिकं च सद्व्यवहारमूलमबाधिताभिक्षादिव्यवहारकारणमञ्जसा मुख्यया वृत्त्या तत्त्वविमर्शनाय तत्त्वनिर्णयाय न भवति स्थायित्वेनैकनिष्ठं भवतीति यद्वचनं "भर्तुः स मे स्याद्यदि वीर ! भारः व्यवहारमेनं तत्त्वावमर्शेन सहामनन्ति" इति उरुगार्हमेधवितानविद्येत्यादिरूपं भवानाह । अमुष्मिन्वचसि मे मनो भ्रमते अस्य वचनस्यार्थोऽयमेव नान्य इति स्थिरस्थितिं न लभते सा यथा स्यात्तथाख्याहीति भावः भ्रमत इत्यात्मनेपदप्रयोगेण सकलिङ्गदितनिगदाभिप्रायापरिज्ञाने नात्मनोऽनुत्तमाधिकारित्वं तत्त्वोपदेष्टृज्ञानिसद्भावे तस्मात् त्वयोग्यं सविशेषं ज्ञातव्यमन्यथानर्थः स्यादिति श्रोतृजनशिक्षार्थं चेति सूचयति ॥ ४ ॥

भर्तुः स मे स्याद्यदि वीर ! भार इत्यादिनोच्यमानं भरणादिकमन्तर्यामिहरिनियतमित्येव मुमुक्षुणा स्मर्तव्यमेवं परो भगवानित्युक्तेः यत "अक्षरमम्बरान्तधृतेः"य उत्रिधातु पृथिवीमुतद्यामेको दधार भुवनानि विश्वा आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चनमिषत्स इमांल्लोकानसृजत" इत्यादिनोच्यमानमूलकारणत्वं हरेरेव नहि मूलं विसृज्यान्यग्रहणं युक्तिमत् अनव-

स्थानापातात् कथं तदितिशङ्कित्वा विपक्षे बाधकमाह । अयं जन इति । हे पार्थिव ! यदि मूलकारणविवक्षा न स्यात्तर्हि यः पृथिव्यामुत्पन्नत्वादत्र विद्यमानत्वाद्वा पार्थिवो नाम सोऽयं जन्यत इति जनो देहो देही वा पृथिव्यामेव चलन् चलतीति व्यवहारः कस्य हेतोः कुतो वर्तते प्रत्यक्षसिद्धं कथमपलपितुं शक्यत इति चेत्तत्राह । तस्यापीति । तस्य जनस्यापि पादाद्यवान्तराधाराः सन्तीति यस्मात्तस्मादस्यापि प्रामाणिकत्वात्पृथिव्यामिव पादादिष्वपि चलतीति कस्मान्न भवेन्न चासावस्ति तस्मान्मूलकारणमेकमङ्गीकर्तव्यं तदनङ्गीकारे सर्वस्यापलापः प्रसज्यते अत्राधिशब्द उपर्युपर्यर्थवाचकः तथाह्यङ्घ्योरङ्घ्र्युपरि गुल्फौ तयोरुपरि जङ्घे इत्येवं योजना गुल्फौ च जङ्घे च जानुनी च ऊरू च मध्यं च उरश्च शिरोधरा च अंसौ च ते तथा ॥ ५ ॥

दार्वी दारुमयी यस्यां शिबिकायां सौवीरराजेत्यपदेशः शब्दमात्रं नतु रञ्जनाद्राजेत्यर्थो यस्य स तथा पिण्ड आस्ते यस्मिन् पञ्चभूतरचिते देहलक्षणे पिण्डे भवान्वर्तते कथंभूतो भवान् रूढो बद्धमूलो निजत्वेनाभिमानो देहे यस्य स तथा अत एव सिन्धुषु राजास्मीति दुष्टो मदोऽस्ति तेनान्धश्चक्षूरहितः ॥ ६ ॥

एतत्फलमाह । शोच्यानिति । तानिमान् वाहकान्विष्ट्या निगृह्णन्यस्त्वं निरनुग्रहोऽसि मधुरवचनाद्यनुग्रहरहितोऽसीति यस्मात्तस्मादिहामुत्र च तवाधिरधिकः स्यादित्यन्वयः यथा शिबिकाभर्तृत्वं मदन्तर्यामिमूलकारणनिष्ठमेवं जनस्य गोप्तास्मीति त्वयि कल्प्यमानं मूलगोप्तृत्वं च त्वदन्तर्यामिहरिनिष्ठमित्यभिप्रेत्याह । जनस्येति । वृद्धसभासु विद्वत्समितिषु जनस्य गोप्तास्मीति विकत्थमानो बहुभाषमाणो दुष्टोऽयं तत्त्वं न जानातीति श्लाघ्यो न भवतीत्यर्थः ॥ ७ ॥

नन्वेवं तर्हि पृथिव्या मूलाश्रयत्वमापन्नं तथाहि यदि मूलाश्रयविवक्षा न स्यात्तर्हि पृथिव्यां चलतीति व्यवहारो न स्यान्न च तथा तस्मात्पृथिव्या मूलाश्रयत्वं विष्णुविवक्षायामसङ्गतं चेत्याशङ्कां शाखाचन्द्रन्यायेनोक्तमिति परिहरति । यदीति । उत्पत्तिस्थित्योः पृथिव्यां दर्शनात्तस्याः मूलकारणत्वमित्यतो वाह । यदीति । यदि चराचरस्य क्षिताविव निष्ठां स्थितिं तत एव प्रभवमुत्पत्तिं च विदाम विद्मः अविद्वद्रूढ्येति शेषः तथाप्यालोचने तन्नामतः प्रसिद्धक्षितिनाम्नोऽन्यद्व्यवहारमात्रं क्षितिशब्दव्यवहारयोग्यं सत्क्रियया अबाधितार्थक्रियया "क्षि निवासगत्योः"इति धातोः निवसत्यस्यामिति गच्छत्यस्यामिति निवासगत्योरप्रतिहताश्रयभूतं यत्तदनुमेयं क्षितिशब्दमुख्यार्थमिति निरूप्यतामित्यन्वयः "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तर" इति श्रुतेः क्षितिशब्दमुख्यार्थो हरिरन्यस्याः पृथिव्यास्तन्नियतत्वेन तच्छब्दवाच्यत्वं" तदधीनत्वादर्थवत्" इतिसूत्रादिति सञ्चिन्तनीयमित्यर्थः प्रथितत्वात्पृथुत्वाद्वा पृथिवीति पृथिवीशब्दवाच्यत्वं मुख्यं हरेरेवेति पृथिव्यां चलतीत्युक्तं नतु पृथिव्या मुख्याश्रयत्वविवक्षया अङ्घ्र्याद्याश्रयत्वनिरासाय चेत्यतो नासङ्गतदोषोऽपीति उत्पत्तिस्थिती इन्द्रजालवन्न यादृच्छिक्यौ किन्तु प्रवाहरूपेण सदातने इत्यतो नित्यमिति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

स्वरूपेण तदनुभवेन तुच्छीकृतो दण्डरूपो विग्रहो येन ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

हे ब्रह्मन् ! ते तव वचः कुदेहाभिमानाहिदंशव्याप्तबुद्धिपर्य्यन्तस्य ममौषधं तत्र दृष्टान्तः।जरेति। क्वचित्तद्व्यभिचारतर्कात् पुनर्दृष्टान्तः। निदाघेति । तत्राप्यपरितोषात् अमृतमिति लुप्तोपमेयममृतमिवेत्यर्थः ॥ २—४ ॥

तत्र श्रीभगवदाख्यं तत्त्वमेव सर्व्वसाधकं स्वातन्त्र्येण तु किमपि रूपयितुं न शक्यमित्याह । अयमिति सप्तभिः ॥ ५—८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मिथ्यात्वेऽप्यस्य विश्वस्य सत्याः कृष्णस्य षड्गुणाः ।
द्वादशे कथिता धामभक्त्याद्या अपि ते ततः ॥

कारणमीश्वरस्तस्यैव लोकरक्षणार्थो नित्यो विग्रहो देहो यस्य तस्मै । स्वरूपेण स्वानन्दानुभवेन तुच्छीकृतविग्रहाः शास्त्रकृता विवादा येन तस्मै हे अवधूत! ॥ १ ॥

कुत्सिते देहे अभिमान एवाहिस्तेन विशेषतो दष्टा दृष्टिर्यस्य तस्य मम हे ब्रह्मन् ! ते वचः अगदमौषधं तत्र दृष्टान्तः। जरेति । क्वचित्तद्व्यभिचारतर्कात् पुनर्दृष्टान्तः । निदाघेति । तत्राप्यपरितोषात् अमृतममृतमिवेत्यर्थः ॥ २ ॥

मम संशयविषयमर्थं पश्चात् प्रक्ष्यामि अधुना तावत् त्वदुक्तं वचः अध्यात्मयोगेन ग्रथितं दुर्बोधं सुबोधं यथा भवत्येवं व्याख्याहि कौतूहलयुक्तमनसो मम कृते ॥ ३ ॥

हे योगेश्वर ! यद्भवानाह । दृष्टः श्रमः कर्मत इत्यादि मदुक्तौ भारवहनादिक्रिया तत्फलञ्च श्रमादि प्रत्यक्षादिभिर्दृश्यमानं सत् विद्यमानं व्यवहारमात्रमूलं तत्त्वविमर्शनाय दृष्टान्तादिनापि तत्त्वज्ञानमुपकर्त्तुं न क्षममिति । अमुष्मिन् त्वद्वचने भ्रमते स्पष्टस्याभिप्रायस्याप्राप्त्या मनो भ्रमति ॥ ४ ॥

पूर्वं स्वमतेन भङ्ग्या दत्तमप्युत्तरमबुद्ध्वैव पुनः पृच्छन्तं राजानमवजानन्निव भो राजंस्तव व्यवहारोऽयमप्रमाण एवेति मतान्तरमाश्रित्य पुनः प्रत्याह । अयं जनो भारवाहकः नाम प्रसिद्धः पार्थिवः पृथिव्या विकारः कस्यापि हेतोश्चलन् भवति यस्तु न चलति स तु पाषाणादिरित्येतावानेव भेदः । तस्यापि पार्थिवस्य अङ्घ्री पृथिव्या उपरिस्थौ अङ्घ्र्योरधि उपर्युपरि गुल्फादयः उरसः सलोप आर्षः ॥ ५ ॥

अंसे स्कन्धे दार्वी दारुविकारः शिविका यस्यां सौवीरराजः इत्यपदेशो नाम मात्रं यस्य स पार्थिवो विकार आस्ते यस्मिन् भवान् राजास्मीत्यभिमानेनैवास्ते ननु वस्तुतः । अत्र पृथिव्यादीनां शिविकान्तानां भारवहनात् किं सर्वेषां श्रमः उत कस्यचित् कस्यचित् न तावत् सर्वेषां पृथिव्याः शिविकायाश्च श्रमादर्शनात् अङ्घ्र्यादीनां श्रम उपलभ्यते इति चेन्न शिविकाया अभावे गुल्फादिभारवाहिनामपि तेषां श्रमानुपलब्धेः अङ्घ्र्याद्यवयविनः शिविका वहनात् श्रम इति चेन्न अवयवेभ्यः पृथगवयविनः श्रमाश्रयस्यानिरूपणात् । नन्वस्तु मास्तु वा अवयवी भारवाहिनः श्रमदुःखमनुभूयत एवेति चेदेतदपि नैकान्तिकं अतिसुकुमार्यो अपि रत्नालङ्कारान् वहन्त्याः स्वबालकं च वहन्त्याः श्रमदुःखानुपलब्धेस्तस्मादभिमानविशेषेणैव दुःखं सुखं च यथा राजास्मीति दुर्मदेन दुरभिमानमत्ततया अन्धः किमपि न पश्यसीत्येतदेव तव सुखं निरभिमानानान्तु न ते दुःखसुखे इति भावः ॥ ६ ॥

ज्ञानाभावेऽपि राज्ञः प्रजाशासनं धर्म एवेति यदुक्तं तत्राह । शोच्यानिति । दिष्ट्या निगृह्णन्निति ईदृशमेव निर्दयस्य तव प्रजाशासनं धर्म इति धृष्ट एव तदप्यच्युतस्य किङ्करोऽस्मीति जिज्ञासुरस्मीति कत्थस इति भावः ॥ ७ ॥

नन्वभिमानशून्यस्य मुक्तस्यापि प्रारब्धसुखदुःखभोगश्रवणात् तवापि भारवहनक्रियाफलस्य श्रमस्य प्रत्यक्षादिभिर्दृश्यमानत्वेनाबाधितत्वाद्व्यवहारस्याप्रामाण्यं त्वदुक्तं न घटत इति चेत् सत्यं मुक्तानां मादृशानां बाधितानुवृत्त्यैव दुःखसुखाभासौ यथा स्वप्नात् प्रबुद्धस्य जनस्य स्वप्नदृष्टसर्पस्य मिथ्यात्वज्ञानेऽपि कियत्क्षणपर्यन्तं भयकम्पावकिञ्चित्करावेव अप्रबुद्धानान्तु स्वाप्निकः सर्पः सत्य एव भाति यथा युष्माकं व्यवहारस्तदपि व्यवहारस्यासत्यत्वं युक्त्या दर्शयामि शृण्वित्याह । यदेति । चराचरस्य जगतः क्षितावेव निष्ठां नाशं प्रभवमुत्पत्तिञ्च विद्याम विद्मस्तत्तस्मात् सर्वेषां विकाराणां क्षितिभिन्नत्वाभावात् नाममात्रादन्यद्व्यवहारस्य मूलं कारणमर्थक्रियया सदेत्यनुमेयं निरूप्यतां यदि ते युक्तिः प्रतिभातीति भावः । तथा च श्रुतिः "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

. द्वादशे रहूगणकृतान् संदेहान् मुनिरपानुदादीति वर्ण्यते हे अवधूत ! तुभ्यं नमः कारणमृषभादिपरमहंसमूर्तिर्विष्णुस्तस्यैव विग्रहो यस्य तस्मै स्वरूपेण भगवत्स्वरूपेण प्रत्यहं धैर्येन तुच्छीकृतो विग्रहो कृतापराधेष्वपि कलहो येन तस्मै द्विजबन्धोर्लिङ्गेन वेषेण निगूढो नित्यानुभवो येन तस्मै नमः ॥ १ ॥

कुत्सितः देहमानः देहात्माभिमानः स एवाहिस्तेन विदष्टा विवेकलक्षणा दृष्टिर्यस्य तस्य ॥ २ ॥

मम संशयविषयमर्थं पश्चात्प्रक्ष्यामि अधुनेदानीन्तु अध्यात्मयोगेन ग्रथितं दुर्बोधं त्वद्वचः सुबोधं यथा भवति तथा कौतूहलयुक्तचेतसो मे आख्याहि कथय ॥ ३ ॥

तदेव दुर्बोधमनुवदति । यदेति । अयं सुखी अयं दुःखी इत्यादिव्यवहारस्य मूलं निर्वाहकं क्रियाफलं पुण्यापुण्यकर्मजन्यं दृश्यमानम् अब्रह्मात्मकतया प्रत्यक्षप्रमाणावगतम् वोढृ वोढव्यादिकं सर्वं त्वयोदितं व्यक्तमित्यादिना भवान् सदेव ब्रह्मात्मकमेवाह । अमुष्मिन् त्वद्वचसि मे मनो भ्रमति अञ्जसा तत्त्वविमर्शनाय न भवति अतः यथा सर्वस्य ब्रह्मणि अन्तर्भावः स्यात्तथा आख्याहीति भावः ॥ ४ ॥

एवं साङ्ख्यतार्किकादिकुतर्कविमोहितेन ब्रह्मात्मकमिदमित्येवं मन्यमानेन राज्ञा पृष्टो मुनिस्तं वेदमार्गे प्रवर्तयन् सर्वस्य पदार्थजातस्य शक्तिमति वासुदेवे ब्रह्मणि कारणे अन्तर्भावमाह । अयमिति सप्तभिः । हे पार्थिव! पार्थिवः अयमयं कस्यचिद्धेतोः परमेश्वरांशभूतजीवसम्बन्धादित्यर्थः साङ्ख्यादितर्कमोहितो यथावज्जानाति न वा रहूगणः अतः कस्यचिद्धेतोरित्युक्तिः

एवं निरुक्तं क्षितिशब्दवृत्तमसन्निधानात्परमाणवो ये ।
अविद्यया मनसा कल्पितास्ते तेषां समूहेन कृतो विशेषः ॥ ९ ॥
एवं कृशं स्थूलमणुर्बृहद्यदसच्च सज्जीवमजीवमन्यत् ।
द्रव्यस्वभावाशयकालकर्मनाम्नाऽजयाऽवेहि कृतं द्वितीयम् ॥ १० ॥
ज्ञानं विशुद्धं परमार्थमेकमनन्तरं त्वबहिर्ब्रह्म सत्यम् ।
प्रत्यक्प्रशान्तं भगवच्छब्दसंज्ञं यद्वासुदेवं कवयो वदन्ति ॥ ११ ॥
रहूगणैतत्तपसा न याति न चेज्यया निर्वपणाद्गृहाद्वा ।
न च्छन्दसा नैव जलाग्निसूर्यैर्विना महत्पादरजोऽभिषेकम् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अयं वोढ्रादिरूपः पृथिव्यां चलन् नाम प्रसिद्धः जनो भवति तस्य पार्थिवस्यापि अङ्घ्र्योः अधि उपरि उपरि गुल्फादयः तदात्मका इत्यर्थः उरसः सलोप आर्षः ॥ ५ ॥

शिबिकापदार्थश्च पार्थिव एव तत्र सिन्धुराजनामको देहश्च पार्थिव इत्याह । अंस इति । सौवीरराजेत्यत्र सन्धिरार्षः ॥ ६ ॥

जीवस्तु सर्वात्मभूतवासुदेवज्ञानहीनः पार्थिवदेहात्माभिमानी अन्यांश्च तथा विधानुपतापयति सर्वात्मभूतवासुदेवज्ञानवांस्तु नोपतापयति नोपतप्यते चेत्याशयेनाह । शोच्यानिति ॥ ७ ॥

चराचरस्य जङ्गमस्य स्थावरस्य च पार्थिवमात्रस्य क्षितौ कारणभूतायां सत्यां क्रियया अन्नोपार्जनतद्ग्रासनपूर्वकगर्भाधानादिक्रियापारम्पर्येणानुमेयम् अन्नाद्भवन्ति भूतानीत्यादिवचनेन च प्रभवमुत्पत्तिं निधनं च प्रलयञ्च यदा विदाम तदा तत्रामतः क्षितिनामकात् कारणात् अन्यत् पृथक् व्यवहारमूलं क्षितिमयव्यवहारकारणं निरूप्यताम् ॥ ८ ॥

भाषाटीका ।

रहूगणजी बोले किसी कारण से देहधारण करनेवाले स्वरूप के अनुभव से सब कलह को दूर करने वाले अवधूत के वेषसे ब्राह्मण के चिन्ह को गुप्त करने वाले नित्यस्वरूपके अनुभव स्वरूप आपको नमस्कार है ॥ १ ॥

हे ब्रह्मन् ! ज्वर रोग दुःखित पुरुष को जैसे औषध अच्छा होता है घाम में जलने वाले को जैसे बरफ का जल होता है इसी प्रकार खोटे देहके मान से ज्ञान नष्ट होनेवाले मेरे वास्ते आपका वचन अमृतमय औषधके तुल्य है ॥ २ ॥

तिससे अपने संशय अर्थ को तो मैं पीछे पूछूंगा इस वखत तो आपके कहे वचनों का जैसे अर्थ मालूम पडे सो कहिये मेरे को बड़ा कौतुक है ॥ ३ ॥

हे योगेश्वर आपने जो कहा कि दृश्यमान क्रिया फल वर्तमान है तो भी व्यवहार मात्र ही है किन्तु अनायास से तत्वज्ञान के वास्ते नहीं है सो इस बात में हमारा मन भ्रमता है ॥ ४ ॥

ब्राह्मण बोले हे पार्थिव सबही पृथिवी का विकार है तौभी किसी हेतु से यह पृथिवी में चलता हुआ पृथिवी का विकार पुरुषरूप है तिस पुरुष के भी पैरोंपर गुल्फ पींडुरी घोंटू जांघ कमर छाती कांधा गला शिर ये अवयव हैं ॥ ५ ॥

तिसी कांधेपर काठ की पालकी है जिसपर भी सौवीरदेश के राजा के नाम से प्रसिद्ध तुमारा शरीर है जिसपर मेरा ऐसा अभिमान करने वाले सिन्धु देश के हम राजा हैं ऐसा माननेवाले दुष्ट मद से अन्धे तुम बैठे रहो ॥ ६ ॥

अधिक कष्ट से दुःखित शोचने के योग्य इन मनुष्यों को वेगार में पकडने वाले तुम निर्दयी हो हम प्रजा के रक्षा करनेवाले हैं ऐसे गप्प मारने वाले धृष्ट हो सो वृद्धोंकी सभा में तुम नहीं शोभित होनेवाले हो ॥ ७ ॥

अब कि सब चर अचर की उत्पत्ति तथा नाश पृथिवीही में नित्य है तो फिर व्यवहार को छोडकर क्रियामत है ऐसा अनुमान करने के योग्य और क्या है सो कहो ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तर्हि क्षितेः सत्यता स्यात्तत्राह । एवं क्षितिशब्दस्यापि वृत्तं वर्तनमर्थं विनैव निरुक्तम् । यद्वा । क्षितिशब्दस्य वृत्तं यस्मिंस्तदपि मिथ्यात्वेन निरुक्तमित्यर्थः । कुतः । असत्सु सूक्ष्मेषु परमाणुषु स्वकारणभूतेषु निधानाल्लयात् अतः परमाणुव्यतिरेकेण क्षितिर्नास्तीत्यर्थः । परमाणवस्तर्हि सत्याः स्युः तत्राह । ते मनसा कार्यानुपपत्त्या वादिभिः कल्पिताः । कल्पनाबीजमाह । येषां समूहेन विशेषः कृतस्तेषां समूहः पृथ्वीबुद्ध्यालम्बनमित्यर्थः अवयविनो निरस्तत्वात्समूहग्रहणम् । तथापि सत्याः स्युः न अविद्यया प्रपञ्चस्य भगवन्मायाविलसितत्वादज्ञानेन कल्पिताः ॥ ९ ॥

एवमन्यमपि कृशत्वादिधर्मकं बुद्ध्या प्रतीतं द्वितीयं द्वैतं द्रव्यादिनामभिरुपलक्षितयाऽजया मायया कृतमवेहि । तत्र कृशं दूरं स्थूलं तत्प्रतियोगि । अणुबृहतोः पृथगुपादानात् असत्कारणं सत्कार्यं जीवश्चेतनम् अजीवश्जडम् ॥ १० ॥

तर्हि किं सत्यं तदाह । ज्ञानं सत्यं व्यावहारिकसत्यत्वं व्यावर्तयति परमार्थम् वृत्तिज्ञानव्यवच्छेदार्थानि बहिर्विशेष-

श्रीधरस्वामिकृतभावार्थदीपिका ।

णानि । विशुद्धं तत्त्वाविधकम् । एकं तत्तु नानारूपम् अनन्तरं त्वबहिर्बाह्याभ्यन्तरशून्यं तत्तु विपरीतम् । ब्रह्म परिपूर्णं तत्तु परिच्छिन्नम् । प्रत्यक् तत्तु विषयाकारम् । प्रशान्तं निर्विकारम् तदेव स्वरूपज्ञानं सत्यमित्युक्तम् । कीदृशं तत् । ऐश्वर्यादिषड्गुणत्वेन भगवच्छब्दः संज्ञा यस्य यच्च ज्ञानं वासुदेवं वदन्ति ॥ ११ ॥

एतत्प्राप्तिस्तु महत्सेवां विना न भवतीत्याह । हे रहूगण ! एतज्ज्ञानं तपसा पुरुषो न याति । इज्यया वैदिककर्मणा । निर्वपणादन्नादिसम्बिभागेन । गृहाद्वा तन्निमित्तपरोपकारेण । छन्दसा वेदाभ्यासेन । जलाग्न्यादिभिरुपासितैः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्थितावेवोत्पत्तिविनाशौ चराचरस्य विदाम इत्यनेन क्षितेस्तु नित्यत्वं प्रतीतं तन्निराकुर्वन्नाह । एवमिति । असन्निधानमसतामनित्यानां कार्याणां निधानं लयस्थानं यत्क्षितिशब्दवृत्तं क्षितिशब्दस्य वृत्तं वृत्तिर्यस्मिंस्तत् क्षितिशब्दवाच्यं तदप्येवं निरुक्तं दर्शितं यत्र देहाद्युत्पत्तिः सा क्षितिरप्यनित्येत्यर्थः । भूमेरनित्यत्वज्ञापनाय तत्राप्यवयवविभागमवयवानां चानित्यत्वमाह । परमाणव इति । ये परमाणवः भूतसूक्ष्माणि येषां परमाणूनां समूहेन विशेषः कृतः भूमण्डलं कृतं ते परमाणवः मनसाधिष्ठातुरीश्वरसङ्कल्पेनाविद्यया प्रकृत्या कल्पिता ईश्वराधिष्ठितप्रकृतिपरिणामरूपत्वादनित्या एवेति भावः । यद्वा ये परमाणवो नित्यास्ते मनसाविद्यया कल्पिताः शरीराकारेण संहिताः त एवाहंममेत्यविद्यया आत्मत्वेन कल्पिता इत्यर्थः वेदान्तार्थोपबृंहणपरेऽस्मिन् प्रबन्धे परमाणुकारणवादायोगाद्वैशेषिकादिभिस्तेषामविद्याकल्पितत्वानभ्युपगमाच्च यथोक्त एवार्थः असन्निधानादित्यपि पाठो दृश्यते तत्रासत्स्वनित्येषु स्वकारणभूतेषु भूतसूक्ष्मेषु निधानात् लयात् क्षितिशब्दवृत्तमप्यनित्यमित्यर्थः ॥९॥

शरीरा नित्यत्वं निगमयन्स्थौल्यादिकं तद्गतमेवेत्याह । एवमिति । एवं काश्यादिगुणयुक्तं सदसदात्मकं कार्यकारणात्मकमुत्कृष्टापकृष्टात्मकं वा जीवमजीवं जीवभेदभिन्नं चराचरात्मकं द्वितीयमात्मनो भिन्नं शरीरं द्रव्यादिनाम्ना ऽजया प्रकृत्या कृतमिति बुद्ध्या निपुणयावेहि तत्र द्रव्यं पृथिव्यादिपञ्चभूतजातं स्वभावस्तेषां परिणाम आशयोऽन्तःकरणं वासना वा कालः सत्त्वादिगुणक्षोभकः द्रव्यादीनां प्रकृतिप्रपञ्चत्वात् द्रव्यादिनाम्नेत्युक्तम् ॥ १० ॥

एवं देहस्यानात्मत्वमुक्त्वमथात्मस्वरूपं शोधयति । ज्ञानमिति । जडात्मवादव्युदासः विशुद्धं स्वतः कर्मसम्बन्धरहितं रागादिदोषरहितं वा परमार्थं पुरुषार्थभूतमेकं सर्वत्र ज्ञानैकाकारमनन्तरं न बहिरन्तर्बहिः प्रदेशभेदरहितं निरवयवत्वात् ब्रह्म गुणतो व्यापकं सत्यं नित्यं प्रत्यक् स्वस्मै भासमानं प्रशान्तमशनायापिपासाशोकमोहजरामृत्यूर्मिषट्करहितं साङ्ख्यमतव्यावृत्त्यर्थं ब्रह्मात्मकं सामानाधिकरण्येनाह । भगवच्छब्दसंज्ञं वासुदेवमिति । भगवच्छब्दः संज्ञा यस्य स भगवच्छब्दसंज्ञः

> तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः ।
> शब्दोऽयं नोपचारेण ह्यन्यत्र ह्युपचारतः ।

इत्युक्तरीत्या भगवच्छब्दो यत्र वासुदेवे मुख्यवृत्तस्तं वासुदेवं वसुदेवात्मजं वदन्ति कवयः आत्मयाथात्म्यविदः वदन्ति ॥ ११ ॥

अत्र विशुद्धं परमार्थमित्यादिविशेषणैरचेतनशरीरव्यावृत्तिः वासुदेवात्मकत्वकथनेन तत्सृज्यत्वपाल्यत्वानियाम्यत्वशेषत्वादिधर्मैः तत्तदाक्षिप्तैस्ततो वैलक्षण्यं सूचितमेवम्भूतप्रकृतिविलक्षणस्वात्मपरमात्मयाथात्म्यज्ञानं कथं लभ्येतेत्यपेक्षायां नोपायान्तरैः किन्तु महत्सेवाभगवद्गुणानुश्रवणादिप्रणाड्यैवेत्याह द्वाभ्याम् । हे रहूगण तदात्मपरमात्मयाथात्म्यज्ञानं महतां भागवतानां पादरजःसेवां विना तपआदिभिः स्वमनीषापूर्वकैर्न याति न प्राप्नोति तत्र तपः कृच्छ्रचान्द्रायणादिरनशनादिर्वा इज्या वैदिकं कर्म निर्वपणं सत्पात्रनिःक्षेपरूपं दानं गृहं गृहस्थधर्मः छन्दो वेदाभ्यासः एभिस्तपआदिभिस्तथोपासितैर्जलादिभिश्च न यातीत्यर्थः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

फलितमाह । एवमिति । यथा प्रथितत्वयोगेन पृथिवीशब्दवाच्यत्वं हरौ निर्णीयते एवमाश्रयत्वात्क्षितिशब्दवृत्तं क्षितिशब्दप्रवृत्तिनिमित्तमपि निरुक्तं निर्णीतं हरावपीति शेषः क्षितिशब्दरूपं निर्वचनेन मुख्यं हरावेव दर्शितमिति वा प्रत्यक्षस्य क्षितेराश्रयत्वापलापे बाधकं किमित्याशङ्क्य परमाणुमात्रायाः पृथिव्या आधारत्वानुपपत्तिरेव बाधिकेत्यभिप्रेत्याह । असन्निधानमिति । ये परमाणवः पार्थिवा इति शेषः ॥ येषां पार्थिवानां परमाणूनां समूहेन पुञ्जेन विशेषः पृथिवीलक्षणः पदार्थश्च कृतः ते परमाणवश्चराचरस्याश्रया इत्यसन्निधानं दूरे ननु क्तस्य चोद्यस्य परिहारः कथमागत इति तत्राह । अविद्ययेति । अविद्ययाऽज्ञानेन मनसा मनोरथेनाधारत्वेन कल्पिताः ननु मुख्याधारा इतिशेषः किमेकैके परमाणवश्चराचरस्याधारा उत मिलिता इत्युभयोरपीदमेवोत्तरमसन्निधानमिति ये पार्थिवाः परमाणवस्तेषां निधानं नितरां स्वातन्त्र्येण धानं धारणमसदनुपपन्नं येषां समूहेन विशेषः कृतस्तेषां चासन्निधानं सामर्थ्यं नास्ति ईश्वरनियतप्रकृतिमन्तरेणेति शेषः तत्कुत इत्यत उक्तम् । अविद्ययेति । मनसेश्वरेच्छाविशिष्टेन तदन्तःकरणेन नियतया अविद्यया प्रकृत्या ते परमाणव आधारत्वेन कल्पिताः ननु स्वतन्त्रा इति वा येषां परमाणूनां द्व्यणुकादिसमूहेनेति काणादाः पुञ्जेनेति बौद्धाः अविद्यया कल्पिता ये परमाणवस्तेषां समूहेनेति मायावादिनः तेषां सर्वेषां पक्षेऽपि तेषां परमाणूनां चराचरधारणमसन्निधानं दूरीभूतमिति भाव इति वा ॥ ९ ॥

ननु क्षित्यादिशब्दानां मुख्यार्थो हरेश्चराचरस्योत्पत्त्यवस्थाने यदि स्यातां तर्हि जगत्यां जगत्पृथिवी वा "इदं सर्वम्" इत्यादिश्रुतेः प्रकृत्यादिवाच्याभावेनाप्रामाण्यमापन्नमिति तत्राह । एवमिति । असत्कारणं सत्कार्यं वाय्वाकाशौ वा पृथिव्यप्तेजांसि वा जीवं चैतन्यविशिष्टं वस्तु अजीवमन्यदस्वतन्त्रं जडमिति यावत् अन्यन्मिथो विलक्षणं भिन्नमेवं विधं जगद्यथा हरिणा कृतं धृतं चैवमजया भगवन्नियतया प्रकृत्या द्वितीयकारणं धारणं च कृतमवेहीत्यन्वयः अत्रायमाशयः पाजादीनां गोप्तृत्वे परमा-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

णुमात्राया भूमेराश्रयकारणत्वे च यो व्यवहारः स उपचारो यतो राजादीनामाश्रयो जनिकर्ता च ब्रह्मा तस्य प्रकृतिस्तस्याः श्रीनारायणो नान्याधारोऽतः सर्वाधारत्वादिकं मुख्यतः सर्वशब्दवाच्यत्वं च तस्यैव तदनुग्रहलेशेन प्रकृत्यादीनां तत्तत्कार्यकरत्वं तत्तच्छब्दवाच्यत्वं शिरआद्यवयवाधारत्ववदाधारत्वं चामुख्यमिति एतदभिप्रायेण द्रव्यादिनान्येत्युक्तं चित्प्रकृतेर्द्रव्याद्यभिमानित्वेनान्यस्याः तदात्मत्वेनेति शेषः

राजा गोप्ताश्रयो भूमिः कारणं चेति लौकिकः ।
व्यवहारो न तत्सत्यं तयोर्ब्रह्माश्रयो विभुः ॥
गोप्ता च तस्य प्रकृतिस्तस्या विष्णुः स्वयं प्रभुः ।
तव गोप्त्री तु पृथिवी न त्वं गोप्ता क्षितेः स्मृतः ॥
अतः सर्वाश्रयश्चैव गोप्ता च हरिरीश्वरः ।
सर्वशब्दाभिधेयश्च शब्दवृत्तेश्च कारणम् ।
सर्वान्तरः सर्वबहिरेक एव जनार्दनः ।
शिरसो धारता यद्वद्ग्रीवाया स्तद्वदेव तु ॥
आश्रयत्वं च गोप्तृत्वमन्येषामुपचारतः ।

इत्येतद्वाक्यमस्मिन्नुक्तार्थे जागर्ति अत इदमेव श्रद्धेयं नान्यत्स्वकपोलकल्पितमिति ज्ञायते ॥ १० ॥

ननु हन्त प्रकृत्यादिसर्वजगत्प्रवर्तकस्य हरेः स्वरूपम् कीदृशं येन तदन्तःपतितस्यापि न तन्मलालेप इति तत्राह । ज्ञानमिति । "ज्ञानमनन्तं ब्रह्म" इति श्रुतेर्गुणगुणिनोरभेदाभिप्रायेण गुणव्यपदेशः वृत्तिज्ञानवद्विषयोपरक्तं नेत्याह । विशुद्धमिति । विशुद्धं विषयसंसर्गेऽपि तत्कृतदोषलेशस्पर्शो नास्तीत्यर्थः "असङ्गोऽह्ययं पुरुष" इतिश्रुतेः विशुद्धस्यापि केनचित्पारतन्त्र्यवद्भावः किं न स्यादिति नेत्याह । परमार्थमिति । परमार्थम् उत्तमार्थमबाधितं वस्त्वित्यर्थः "वस्तु हेतुनिवृत्तिषु" इत्यभिधानात् तादृशमन्यदस्तीति नेत्याह । एकमिति । एकम् "आत्मा वा इदमेक एवाग्र आसीत्" इति श्रुतेः लोके साम्याधिक्यदर्शनात् कथमस्य तदभाव इति नेत्याह । अनन्तरमिति । अन्तःस्थित्वा प्रेरको नास्तीत्यनन्तरमन्तरभावे बहिः किं न स्यादिति नेत्याह । न बहिरिति । बाहिरपि प्रेरको नेति घटादिवत्परिच्छिन्नं नेत्यतो वाह । अनन्तरं न बहिरिति । यस्मादन्तर्बहिश्च नास्तीति "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित" इतिश्रुतेः "अणोरणीयान्महतोमहीयान्" इति च किमस्य संज्ञेत्यत उक्तम् । ब्रह्मेति । कस्माद्यस्यान्तर्बहिर्नास्तीत्यतो वाह । ब्रह्मेति । ब्रह्म पूर्णं निरुपमचरितमितिशेषः किमेक एव गुण इति नेत्याह । सत्यमिति । सत्यं साधु सुखादिगुणयुक्तं किमिदं चतुर्मुखाख्यमिति नेत्यतो वाह । सत्यमिति । "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतेः मुख्यं ब्रह्मेत्यर्थः गुणानां साम्येऽपि ज्ञानानन्दयोर्लोकापेक्षया प्राधान्यज्ञापनायावतारयोः रामकृष्णयोरिवेत्यतो वाह । सत्यमिति । उत्कृष्टानन्दज्ञानम् ।

सच्छब्द उत्तमं ब्रूयादानन्दन्तीति वै वदेत् ।
येति ज्ञानं समुद्दिष्टं पूर्णानन्दद्दशिस्ततः ।

इति वचनात् एतद्वस्तु कुत्र सदिति तत्राह । प्रत्यगिति । जीवस्य हृद्यभिमुखं बिम्बरूपमिति यावत् "रूपं रूपं प्रतिरूपो बभूव" इति श्रुतेः क्रुद्धस्वभावं नेत्याह । प्रशान्तमिति । प्रशान्तम् निस्तरङ्गस्तिमितसमुद्रकल्पं "निष्कलं निष्क्रियं शान्तम्" इतिश्रुतेः किमस्माकं कार्यमित्यत्राह । भगवच्छब्दवाच्यमिति । अस्माकं पूज्य इतिशब्देनोच्यते अत्र भगवानिति शब्दो वृद्धैः प्रयुज्यते "भगवान् पूज्य" इति हलायुधः नन्वस्य शब्दस्य तापसमात्रेऽपि प्रयोगदर्शनात् कथं निर्णय इति तत्राह । यदिति । कवयो यद्भगवच्छब्दवाच्यं वस्तु क्रीडित्वा सर्वत्र वसनाद्वासुदेवनाम गृणन्ति तज्ज्ञानादिगुणपूर्णं ब्रह्म प्रकृत्यादिप्रेरकं जानीहीति वाक्यशेषः उक्तानामनुक्तानां सर्वेषां गुणानां कवलीकरणेनेति वा भगवच्छब्दवाच्यं तत्प्रतिपादनार्थं वासुदेवपदं वेति बलज्ञानानन्दादयो गृह्यन्ते असितिः शत्रुनिरासपटीयोवीर्यशौर्यौदार्यादयो. दीव्यन्ति क्रीडाजिगीषाकान्त्यादयः एते यत्र प्रत्येकं पूर्णतयाऽन्योऽन्याविरुद्धतया च विहृत्य वसन्ति तद्वासुदेवसंज्ञं वदन्तीति समुदायार्थ इति वा अज्ञानामपि बुद्ध्यवतारार्थं वसुदेवपुत्रत्वाद्वासुदेवमित्युक्तमिति वा ॥ ११ ॥

एतादृशवस्तुज्ञानप्रापकः कोऽन्तरङ्गोपाय इत्याशङ्क्य वैराग्यरसायनसेवया प्रवृद्धबला भक्तिरेव सा च सुदृढातिविशदा महत्सेवामन्तरेण न स्यात्तपआदयस्तदुपदिष्टा एव तस्या निदानभूतास्तदर्थं तत्सेवैवावश्यं भाविनीत्यभिप्रेत्याह । रहूगणेति । यातिरत्र ज्ञानं गतिं च वक्ति विद्यया शास्त्रविषयया केवलया निर्वसनं संन्यासः छन्दसा ब्रह्मयज्ञेन अवाग्निसूर्यैः सेवितैरितिशेषः "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन इत्यादिश्रुतेः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अविद्ययेति । यस्य समूहरूपस्य विशेषस्यान्यथानुपपत्त्या तद्धेतवः परमाणवः कल्प्यन्ते । तस्याप्यवयविवन्निरूपणाशक्यत्वात्सेऽप्यज्ञानेनैव कल्पिता इत्यर्थः ॥ ९—१० ॥

एवं तर्कमयस्वतन्त्रकारणसमूहवादमायावर्याविखण्डनाय तर्कः प्रयोजितः अथ शब्दमयस्वमतस्थापनाय सर्वत्र परमात्मैकत्वावयविर्त्वं वदंस्तत्र तारतम्येन मतद्वयमाह । ज्ञानमिति । यदेव कवयः पूर्वोक्तनिर्विशेषज्ञानवादिभ्योऽपि शब्दप्रमाणनिपुणा भगवच्छब्दसंज्ञमाहुः श्रुत्या युक्त्या च सशक्तित्वेनैव सिद्धत्वात् । तथैव सर्वाश्रयत्वेन दर्शयति । वासुदेवमिति ॥ ११ ॥

एतद्भगवत्संज्ञं तत्त्वं छन्दसा ब्रह्मचर्येण गृहाद्गार्हस्थ्येन तपसा वानप्रस्थेन निर्वपणात् संन्यासात् । इज्यया तत्र तत्र तत्तद्देवतोपासनया तस्यामपि विशेषः जलाग्निसूर्यैरिति । महत्पादरजोऽभिषेकं विनेति । तस्यैव सर्वशुद्धिहेतुत्वेन योग्यताहेतुत्वात् ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तर्हि क्षितेः सत्यता स्यात्तत्राह । एवं क्षितिशब्दस्यापि वृत्तिवर्त्तनं सत्ता नाममात्र एवेत्यर्थः । कुतः असत्सु सूक्ष्मेसु परमाणुषु स्वकारणेषु निधानादन्वयात् । ततः परमाणुव्यतिरेकेण

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

स्थितिर्नास्तीत्यर्थः । परमाणवस्तर्हि सत्याः स्युस्तत्राह । अविद्यया अज्ञानेनैव हेतुना मनसा ते कार्यानुपपत्त्या कल्पिता वादिभिरतोऽसत्या एवेत्यर्थः । कल्पनावीजमाह । येषां समूहेन विशेषः पृथिवीशब्दवाच्योऽर्थः कृतः । अवयविनो निरस्तत्वात् समूहग्रहणम् ॥ ९ ॥

एवमन्यदपि कृशत्वादिधर्मकं द्वितीयं द्वैतं द्रव्यादिनाऽन्योपलक्षितयाऽजया मायया कृतमवेहि तत्र कृशं सूक्ष्ममणुरतिसूक्ष्मं वृहत् अतिस्थूलम् असत् कारणं सत् कार्यं जीवं सचेतनम् अजीवमचेतनम् ॥ १० ॥

तर्हि किं सत्यमिति चेत् पूर्वोक्तं तत्त्वमेव शब्दप्रमाणवेद्यं तच्च तत्त्वं "वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्" इति प्रथमस्कन्धोक्तवदेवाह । ज्ञानं सत्यं कीदृशं विशुद्धं गुणातीतं परमोऽर्थो मोक्षादिको यस्मात्तत् एकमद्वयम् अनन्तरमबाहिर्बाह्याभ्यन्तरशून्यं व्यापकमित्यर्थः । तच्च ज्ञानं "ब्रह्मेति परमात्मेति भगवानिति शब्द्यत" इत्युक्तवदेवाह । ब्रह्म ब्रह्मशब्दवाच्यं निर्विकल्पकं ज्ञानिनामुपास्यं प्रत्यक् प्रशान्तं परमात्मशब्दवाच्यं योगिनामुपास्यं प्रशान्तमिति जीवात्मव्यावृत्त्यर्थं भगवच्छब्दः संज्ञा यस्य तत् भक्तानामुपास्यं यत्त्रिरूपम् इदमपि वासुदेवं वसुदेवनन्दनं वदन्ति पूर्णं ब्रह्म सनातनमिति कृष्णाय परमात्मने इति ततस्तु भगवान् कृष्ण इत्यादिभ्यः तत्रापि ब्रह्मणो हि प्रतिष्ठाहमिति "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति वासुदेवो भगवतामित्यादिभ्यो वसुदेवनन्दनस्यैव परमपूर्णत्वम् अत्र भगशब्दस्यैश्वर्यवाचित्वादैश्वर्यस्य चेशितव्यापेक्षितत्वादीशितव्यानां मायिकानाञ्चोक्तयुक्त्या मिथ्यात्वाद्भक्तास्तद्धामवासिन एव ईशितव्या नित्या अवगतास्तेषां तद्धाम्नश्च नित्यसत्यत्वं भगवत इव शब्दप्रमाणसिद्धमेव प्रथमस्कन्धादौ प्रपञ्चितमेव तथैव मत्सेवायां तु निर्गुणेति मन्निकेतन्तु निर्गुणमित्यादिभिरेकादशे भक्तिसम्बन्धिवस्तुमात्रस्यैव नित्यसत्यत्वं प्रपञ्चयिष्यते च । प्रकरणाभिप्रायश्चायं भो राजन् ! युष्माकं प्रत्यक्षादिप्रमाणसिद्धस्यापि व्यवहारस्य मायाजीवस्य मायारचितस्य नित्याः आविर्हिताः क्वापि तिरोहिताश्चेत्यनेन स्वमतेन कालदेशादिपरिच्छिन्नत्वान्नश्वरत्वमङ्गीकुर्वता कालदेशाद्यपरिच्छिन्ने तत्त्वे चिद्घनवस्तुनि व्यवहारो वैजात्यादेव नाश्रीयते इत्युक्तं तदपि व्यवहारमेव पुनः पुनरुत्थापयसि चेदेवमन्ये वादिनो मिथ्यैवाचक्षत इति तन्मतमुदाहृतम् । शब्दप्रमाणसिद्धे तत्त्वे तु तेऽपि न विप्रतिपद्यन्त इत्यन्तेन ज्ञानं विशुद्धमिति पद्यमुक्तमिति । ननु देहेन्द्रियादिव्यापारः श्रीकृष्णस्यैकनिष्ठो भक्तिरिति भक्तिर्लक्षिता । तस्याश्च लक्षणं भक्तियोगस्य निर्गुणस्येत्युदाहृतमिति भगवदुक्तेर्निर्गुणत्वमवसीयते तच्च परिणामवादे कार्यस्य सत्त्वात् । प्राकृतदेहेन्द्रियादीनामेव भक्तिसंसर्गादप्राकृतत्वं स्पर्शमणिन्यायेनैव साधु बुद्ध्यामहे । विवर्त्तवादे तु कार्यमात्रस्यैवासत्त्वात् देहेन्द्रियादीनां मिथ्याभूतत्वाद्भक्तेः स्थितिरेव नास्ति कुतस्तस्या निर्गुणत्वं घटतां तथाहि निर्गुणां भक्तिमयमुपदेक्ष्य इति गुरूपदेशकाले उपदेष्टव्यजनस्य मिथ्याभूतत्वादाकाशक्षेत्रे वीजवपनमिव गुरूपदेश एव तावन्न भवेत् । कुतः कृष्णभक्तिः कुतस्तरां तदभ्यासेन प्रेमोदयः कुतस्तमां तेन भगवद्वशीकार इति सत्यं महाचिन्त्यशक्तौ भगवति क्वाप्यसम्भावना न भावनीया यदुक्तं स्वयं भगवतैव । "एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणाम् । यत् सत्यमनृतेनेह मर्त्येनाप्नोति मामृतम्" इति । अस्यार्थः यत् यतः अनृतेन मिथ्याभूतेनापि मर्त्येन मर्त्यशरीरेण मामृतं सत्यं परमसत्यमेति प्राप्नोति । यद्वा मा माममृतं परमानन्दस्वरूपं सत्यमनृतेनापि मर्त्येन मरणधर्मवता देहेन्द्रियप्राणादिना पत्रपुष्पगन्धधूपदीपविविधनैवेद्यच्छत्रचामराद्युपचारेण च यदाप्नोति एषैव बुद्धिमतां बुद्धिरेषैव मनीषिणां परमपरामर्शवतां मनीषा विचार इति प्राप्तिप्रकारश्च स्वयं भगवतैवोक्तो यथा । "मर्त्यो यदा त्यक्तसमस्तकर्म्मा निवेदितात्मा विचिकीर्षितो मे । तदामृतत्वं प्रतिपद्यमानो मयात्मभूयाय च कल्पते वै„ अस्यार्थः यदा मर्त्यस्त्यक्तसमस्तकर्मा गुरूपदेशकाले त्यक्तसमस्तवर्णाश्रमधर्मकामनः मयि श्रीगुरुरूपे निवेदितौ आत्मानौ अहन्तास्पदममतास्पदे येन सः । "योऽहं ममास्ति यत् किञ्चिदिह लोके परत्र च । तत् सर्वं भवतो नाथ ! चरणेषु समर्पितम्" इति व्यवसायवान् भवति तदा स जनो मिथ्याभूतोऽपि मे मया विचिकीर्षितः स्यात् विशिष्टः कर्तुमिष्टः स्यात् निर्गुणो मदपाश्रय इति मदुक्ते निस्त्रैगुण्य एव स्यादित्यर्थः स हि मायाकार्यत्वान्न नश्वरः सत्यः नाप्यज्ञानकार्यत्वान्मिथ्याभूतः किन्तु स्वरूपभूतो मत्कार्यत्वान्निर्गुण एव स्यात् । किञ्च मायाविशिष्टः कृतः स्यादित्यप्रयुज्य विचिकीर्षित इति सन्प्रत्ययप्रयोगान्निर्गुणः कर्तुमारभमाण एव स शनैः शनैर्भक्त्यभ्यासवान् निष्ठारुच्यासक्तिरतिभूमिकारूढ एव सम्यङ्निर्गुणः स्यात्ततो मिथ्याभूतवस्तुभिः सह तस्य व्यवहारो न स्यात् तत्पूर्वन्तु यथा योगं व्यवहारस्तैश्च सह लभ्यते । अयमर्थः अचिन्त्यशक्त्या भक्त्युपदेशकाल एव तस्य गुणातीतानि देहेन्द्रियमनांसि मया भक्तिमाहात्म्यदर्शनार्थमलक्षितमेव सृज्यन्ते मिथ्याभूतानि तान्यलक्षितमेव क्षयं यान्ति । यथा "नैवंविधः पुरुषकार उरुक्रमस्य पुंसां तदङ्घ्रिरजसा जितषड्गुणानाम् । चित्रं विदूरविगतः सकृदाददीत यन्नामधेयमधुना स जहाति बन्धम्" इति । अस्यार्थः एवंविधः प्रियव्रतकर्त्तृकसप्तसमुद्रनिर्माणप्रपञ्च इव पुरुषकारो न चित्रं चित्रं खल्वेतदेव यद्विदूरविगतोऽन्त्यजोऽपि यस्योरुक्रमस्य नामधेयं सकृदप्याददीत अधुना तत्क्षण एव तन्वं तनुं विजहातीति तदानीं तनोर्दृश्यमानत्वेऽपि प्रारब्धकर्मसम्बलिततनुत्यागः अलक्षित एवेत्यर्थः । ततश्च तदा अमृतत्वं मरणधर्माभावं प्रतिपद्यमानः तदानीमेव प्राप्नुवन् मया सह आत्मभूयाय आत्मभावाय आत्मनः स्वस्य स्थित्यै कल्पते यत्राहं तिष्ठामि तत्रैव सोऽपि मत्सेवार्थं तिष्ठतीत्यर्थः । एवञ्च जगत्यस्मिन् यानि यानि वस्तूनि मिथ्याभूतान्युपलभ्यन्ते तेषामेव भक्तिसम्पर्कान्मिथ्याभूतत्वं प्रविलाप्य भगवता स्वभक्तेच्छानुकूलेन परमसत्यत्वमेव तत्क्षण एव सृज्यते किमशक्यमचिन्त्यशक्तेर्भगवत इत्यत एव मत्सेवायान्तु निर्गुणेति मन्निकेतन्तु निर्गुणमित्यादिकानि भगवद्वाक्यानि सङ्गच्छन्ते । "अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् । प्रकृतिभ्यः परं यत्तु तदचिन्त्यस्य लक्षणम्" इत्युद्यमपर्ववचनं भाष्यकारेणापि धृतं तत्र भावा इति बहुवचने नाद्वैतभङ्गो भव्यपक्षतेषामैक्यादिति सर्वमवदातम् ॥ ११ ॥

यत्रोत्तमश्लोकगुणानुवादः प्रस्तूयते ग्राम्यकथाविघातः ।
निषेव्यमाणोऽनुदिनं मुमुक्षोर्मतिं सतीं यच्छति वासुदेवे ॥ १३ ॥
अहं पुरा भरतो नाम राजा विमुक्तदृष्टश्रुतसङ्गबन्धः ।
आराधनं भगवत ईहमानो मृगोऽभवं मृगसङ्गाद्धतार्थः ॥ १४ ॥
सा मां स्मृतिर्मृगदेहेऽपि वीर ! कृष्णार्चनप्रभवा नो जहाति ।
अथो अहं जनसङ्गादसङ्गो विशङ्कमानोऽविवृतश्चरामि ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एतत् ज्ञानञ्च महत्कृपाविर्भूतया भक्त्या विना न भवतीत्याह द्वाभ्याम् । हे रहूगण ! एतदुक्तलक्षणं त्रिविधं ज्ञानं तपआदिभिर्न प्राप्नोति तत्र तपश्चित्तैकाग्र्यमिज्या वैदिकं कर्म निर्वपणमन्नादिसंविभागः गृहं तन्निमित्तपरोपकारादि छन्दो वेदाभ्यासः । जलाग्निसूर्यास्तत्करणकतपश्चरणानि ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं पार्थिवानां देहादीनां पृथिव्यात्मकत्वं दर्शितम् अथ पृथिव्या भूतसूक्ष्मात्मकतां दर्शयति। एवमिति। क्षितिशब्दस्य वृत्तं वृत्तिर्यत्र तदपि भूतम् असत्सु भूतसूक्ष्मेषु स्वकारणेषु निधानात् लयात् निरुक्तं भूतसूक्ष्मात्मकत्वेन निरूपितं येषां समूहेन विशेषः भूमिपदार्थः कृतस्तानि भूतसूक्ष्माणि ये च परमाणवः अणुपरिमाणकाः प्राणाः एकादशेन्द्रियाणि च अविद्यया प्रकृत्याख्यया यस्या मनसा सङ्कल्पमात्रेणैव वासुदेवेन ब्रह्मणा परमकारणेन कल्पिता रचिताः तदात्मका इत्यर्थः ॥ ९ ॥

किंबहुना एवमन्यत् यत्कृशत्वादिधर्मकं द्रव्यादिनाम्ना उपलक्षितमजया प्रकृत्या सह द्वितीयं कृतं कार्यजातं च तत्सर्वं यद्वासुदेवाख्यं ब्रह्म कवयो वदन्ति तदेव हीत्यन्वयः “सदेव सोम्येदमग्र आसीत् ऐतदात्म्यमिदं सर्वं सर्वं खल्विदं ब्रह्म”इत्यादिश्रुतिभ्यः ।

न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ।
अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते ।
इन्द्रियाणि मनोबुद्धिः सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञमेव च ॥

इत्यादिस्मृतिभ्यः ॥ १० ॥

तदेव ब्रह्म विशिनष्टि । ज्ञानमिति । ज्ञानं “सत्यं ज्ञानमनन्तं ब्रह्म”इति श्रुतेः विशुद्धं हेयगुणशून्यं परमार्थं मुक्तोपसृप्यम् एकं समानातिशयशून्यम् अनन्तरं त्वबहिः सर्वसंनिहितं मद्गतं च ब्रह्म बृहत्स्वरूपगुणशक्ति प्रत्यक् जीवः प्रशान्तो यस्मात्तत् भगवच्छब्दः संज्ञा यस्य तत् ॥ ११ ॥

अथ मम संशयार्थं पश्चात्प्रक्ष्यामीत्युक्तवता राज्ञानापृष्टोऽपि मुनिः स्वयं कृपया तद्भाषार्थेषु तं विसंशयं कृत्वा हरिज्ञानभक्तिभ्यां मुक्तो भवेति राजानं प्रत्याह । रहूगणेत्यारभ्य “असज्जितात्मा हरिसेवया शितं ज्ञानासिमादाय तरातिपारम्” इत्यन्तेन महतां भागवतानां पादरजोऽभिषेकं विना तच्चरणसेवां विना एतत्सर्वात्मभूतं ब्रह्म पुरुषस्तपआदिभिर्न याति तपसा कृच्छ्रादिना इज्यया वैदिककर्मणा निर्वपणात् अन्नादिसंविभागात् गृहात्पुत्राद्युत्पादनेन छन्दसा वेदाभ्यासेन जलादिभिरुपासितैः ॥ १२ ॥

भाषाटीका

इसी प्रकार से पृथिवी शब्द के अर्थ की भी स्थिति है क्यों कि पृथिवी अपने परमाणुओं में लीन हो जाती है जो परमाणु होंगे सोभी नैयायिकोंने युक्तिसे नित्यरूप अज्ञान से कल्पना किये हैं उन परमाणुओं के समूह से ही पृथिवी बनी है ॥ ९ ॥

इसी प्रकारसे पतला मोटा छोटा बड़ा कारण कार्य जड़ चेतन और जो कुछ पृथिव्यादि द्रव्य स्वभाव संस्कार काल अदृष्ट इत्यादि नाम से जो पदार्थ प्रसिद्ध है वह सब व्यवहार के लिये भेद कल्पित करके बनाया गया है ॥ १० ॥

विशुद्ध अबाधित एक बाहिर भीतर रहित सत्य एक स्वयं प्रकाशमान प्रशान्त भगवत् शब्दवाच्य ज्ञान स्वरूप ब्रह्म जिनको कविजन वासुदेव कहते हैं सोई सत्य है ॥ ११ ॥

हे रहूगण ! इस आत्मतत्त्व को मनुष्य न तपस्या करने से न यज्ञादि कर्मों से न अन्नादि दान से न संन्यास से न वेदाध्ययन से न जल अग्नि सूर्यादिकों की उपासना से प्राप्त हो सका है किंतु महापुरुषों के चरण रजके स्नान होनेही से प्राप्त होता है ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

महत्सेवायास्तत्प्राप्त्युपायतामाह । यत्र येषु महत्सु । ग्राम्यकथानां विघातो यस्मात् ॥ १३ ॥

विषयसङ्गस्तु योगभ्रंशक इति वदन्कस्त्वं निगूढश्चरसीति प्रश्नस्योत्तरमाह । अहमिति द्वाभ्याम् । विमुक्तो दृष्टश्रुताभ्यां सङ्गनिमित्तो बन्धो येन हतोऽर्थः प्रयोजनं यस्य ॥ १४ ॥

श्रीकृष्णार्चने अहमभ्युद्यतस्तीत्याह । सेति । जनसङ्गाद्विशङ्कमानः । अविवृतोऽप्रकटः ॥ १५ ॥

तस्मान्नरोऽसङ्गसुसङ्गजातज्ञानासिनेहैव विवृक्णमोहः ।
हरिं तदीहाकथनश्रुताभ्यां लब्धस्मृतिर्यात्यतिपारमध्वनः ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां ब्राह्मणरहूगणसम्वादे
द्वादशोऽध्यायः ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

असङ्गैर्महद्भिर्यः सुसङ्गस्तेन जातं ज्ञानमेवासिः खड्गस्तेन छिन्नमोहः सन् अध्वनः संसारमार्गस्यातिशयितं श्रेष्ठं पारं हरिं याति । यद्वा । पारमति अतिक्रम्य हरिं याति । "अतिरतिक्रमणे च" इति कर्मप्रवचनीयत्वाद्द्वितीया तस्य हरेरीहानां कथनस्मृतिभ्यां लब्धा स्मृतिर्येन सः ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कथं महत्सेवया तद्यातीत्यत्राह । यत्र येषु महत्सु ग्राम्यकथानामभिघातो यस्मात्स उत्तमश्लोकस्य भगवतो गुणानुवादः प्रस्तूयते प्रस्तूयतां गुणानुवादः प्रकृते किमायातं तत्राह । अनुदिनं निषेव्यमाणो गुणानुवादः वासुदेवे सतीं मतिं मुमुक्षोर्यच्छति स्वात्मपरमात्मयाथात्म्यविषयं ज्ञानं संपादयतीत्यर्थः ॥ १३ ॥

एवं गृहमेधिसौख्यवैराग्यस्य ज्ञानहेतुत्वमभिधाय विषयसङ्गस्य ज्ञानभ्रंशकरत्वं स्वदृष्टान्तेन वदन् कस्त्वं निगूढ इत्यादिप्रश्नस्योत्तरमाह । अहमिति द्वाभ्याम् । पुरा पूर्वतरस्मिन् जन्मनि अहं भरतो नाम प्रसिद्धः राजाऽभूवं तत्र विशेषेण व्यक्तः दृष्टेष्वैहिकसुखेषु श्रुतेष्वामुष्मिकेषु स्वर्गादिषु च सङ्गरूपो बन्धो येन तथाभूतः सन् भगवत आराधनं कुर्वाणस्तत्र मृगसङ्गाद्धतः विहतः आराधनलक्षणोऽर्थो यस्य तथा भूतो मृगोऽभवं मृगजन्मप्राप्तोऽभूवम् ॥ १४ ॥

हे वीर ! कृष्णार्चनप्रभावाद्भगवदाराधनजा सा भगवद्विषया स्मृतिः मृगदेहेऽपि मां न जहाति नात्याक्षीत् कृष्णार्चनप्रभावविषयको विस्मय अहो इति अधुना जनसङ्गाद्विशङ्कमानः अत एवासङ्गः विवृतः अप्रकटः गूढाग्रविष्टश्चरामि ॥ १५ ॥

तस्मात्सङ्गस्य बन्धकत्वान्नरः असङ्गेषु ज्ञानिषु सङ्गेन जातो यः ज्ञानरूपोऽसिः खड्गस्तेन विशेषेण वृक्णश्छिन्नः सङ्गो देहतदनुबन्धिषु येन तथाभूतः सन्नध्वनः संसाराटव्यध्वनः पारमन्तमवधिं हरिं भगवन्तं तदीहाकथनश्रुताभ्यां भगवच्चेष्टितकथनश्रवणाभ्यां कथनादिप्रभावेणेत्यर्थः लब्धा स्मृतिर्भगवद्विषया यस्य स याति प्राप्नोति ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यत्र येषां महतां सकाशे प्रस्तूयते प्रसज्यते प्रकर्षेण स्तूयते वा ग्राम्यकथाविघातः विषयवार्ताप्रसङ्गनाशनः सेवाफलमाह । निषेव्यमाणा इति । भक्तिशाणोल्लीढा सती मतिरुच्यते यच्छतिरत्र भक्तिनिशितज्ञानंदत्वा संसारोपरमं करोतीत्युमर्थः ॥ १३ ॥

इदानीं भरतः स्वोकार्थासिजननाय कुत्रत्य इतिचोद्यपरिहाराय च स्वरूपं स्वचरितं च वक्ति । दृष्टेषु राजादिविभवेषु श्रुतेषु स्वर्गादिविषयेषु सङ्गबन्धः स्नेहबन्धः दृष्टश्रुतसङ्गबन्धः स विमुक्तो येन स तथा हतार्थः नष्टपुरुषार्थलक्षणप्रयोजनः ॥ १४ ॥

या पूर्वजन्मनि कृष्णार्चनजाता सा मां नो जहाति न त्यजति अधुनापि वर्तत इत्यर्थः अवधूतो ज्ञातलिङ्गः दुःसङ्गात्संसारो भवतीति शङ्कया भियाऽवधूतः कम्पितः हृदयसाररहित इत्यर्थ इति वा ॥ १५ ॥

उपसंहरति । तस्मादिति । यस्माद्भगवतः पूजैतादृशफला तस्मान्नरः पुरुषः संसारमतीत्याध्वनः संसारमार्गस्य अतिपारं तीरान्तरीभूतं हरिं यातीत्यन्वयः केन साधनेन असङ्गानां दुष्टसङ्गरहितानां सतां सुष्ठु सङ्गेन सेवालक्षणेन ज्ञानेन ज्ञानाख्यासिपत्रिकया विवृक्णाश्छिन्नः सङ्गः स्वर्गादिफलस्नेहो यस्य स तथा तस्य हरेरीहानां चरितानां कथनेन श्रवणेन च लब्धा स्मृतिर्यस्य स तथा संसाराध्वनः पारं विष्णोर्लोकमतियाति अतिक्रम्य यातीत्यर्थोऽनुपपन्नः हरिमित्यस्यान्वयानुपपत्तेरतोऽसङ्गतोऽयमर्थइति ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र विशेषमपि वदंस्तत्त्वप्राप्तिसोपानमाह । यत्रेति । मुमुक्षोस्तद्व्यतिरिक्तसर्वपरित्यागेच्छोः ॥ १३—१६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ते च महान्तः कृष्णभक्ता एवेत्याभिव्यञ्जयति । यत्र महत्पादरजोऽभिषेके सति यत्र महत्सु वा गुणानां भक्तवात्सल्यादीनामनुवादः पुनः पुनःकथनं मुमुक्षोर्मोक्षकामस्यापि सतीं मोक्षेच्छाराहित्येन शुद्धां मतिं वासुदेवे वसुदेवनन्दने ॥ १३ ॥

मह्यं स्वापराधिने महापामरायाप्येवं ज्ञानमुपदिशन् परमकृपालुः को भवानित्यपेक्षायामाह । अहमिति । दृष्टे श्रुते च व्यवहारे सङ्गबन्धः आसक्तिलक्षणो बन्धो विमुक्तो येन सः तदपि दैवाद्सावधानोऽभवमित्याह । मृग इति ॥ १४ ॥

श्रीकृष्णार्चनं भ्रष्टमप्युद्धरतीत्याह । सेति । जनसङ्गाद्विशङ्कमानः अविवृतोऽप्रकटः ॥ १५ ॥

असङ्गो व्यवहारानासक्तिः सुसङ्गः साधुष्वासक्तिस्ताभ्यां जातं ज्ञानमेवासिः तेन छिन्नमोहः अध्वनः संसारमार्गस्य अतिपारं हरिम् ॥ १६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमे द्वादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यत्र येषु महत्सु ग्राम्याणां या कथा सिश्नोदरनिमित्ता वार्ता तस्या विघातो यस्माद् स उत्तमश्लोकगुणानुवादः प्रस्तूयते ते महान्त इत्यन्वयः ॥ १३ ॥ १४ ॥ १५ ॥

यस्मात्प्राणिषु मोहः संसारहेतुस्तस्मात् असङ्गैर्महद्भिर्यः सुसङ्गस्तेन जातं ज्ञानमेवासिस्तेन इह गृहादौ विशेषतो वृक्णाश्छिन्नो मोहो येन सः तदीहाकथनश्रुताभ्यां हरिचेष्टितकीर्तनश्रवणाभ्यां लब्धस्मृतिः प्राप्तध्रुवास्मृतिः अध्वनः संसारमार्गस्य अतिपारमतिशयितं श्रेष्ठं पारं हरिं याति ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
द्वादशाध्यायार्थप्रकाशः ॥ १२ ॥

भाषाटीका ।

जिन महात्माओं में संसारी चर्चाओं का बन्द करनेवाला उत्तम श्लोक भगवान् का गुणानुवाद होता है उस गुणानुवाद के प्रतिदिन सेवन करने से वह गुणानुवाद मुमुक्षुपुरुष की भगवान् वासुदेव में सुन्दर मती को कर देता है ॥ १३ ॥

हम पूर्वजन्म में भरत नाम के राजा थे देखे सुने इस लोक परलोक के सङ्गों के बन्धों से छूटकर रहते थे फिर भगवान् का आराधन करने समय में मृग के साथ स्नेह करने से अपने स्वार्थ से नष्ट होकर मृग होगये ॥ १४ ॥

हे वीर ! श्रीकृष्ण भगवान् की पूजा के प्रभाव से मृग होनेपर भी वह स्मरण मेरे को बना ही रहा था इसी हेतु से सङ्गसे डर कर मैं अब भी छिपकर विचरता हूं ॥ १५ ॥

तिस हेतु से जो मनुष्य सब से विरक्त महापुरुषों के सङ्गसे उत्पन्न भये ज्ञान वैराग्य रूप खड्ग से मोह को छेदन करके भगवान् की कथा और स्मरण से आत्मज्ञान को प्राप्त होता है सो संसार से पार होकर श्रीहरि के शरण को प्राप्त होता है ॥ १६ ॥

इति श्रीभागवत पञ्चमस्कन्ध द्वादश अध्यायका
भाषानुवाद लक्ष्मणाचार्य्यकृत
समाप्त ॥ १२ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे द्वादशोऽध्यायः समाप्तः ॥ १२ ॥

॥ त्रयोदशोऽध्यायः ॥

:o:

ब्राह्मण उवाच ।

दुरत्ययेऽध्वन्यजया निवेशितो रजस्तमःसत्त्वविभक्तकर्मदृक् ।
स एष सार्थोऽर्थपरः परिभ्रमन्भवाटवीं याति न शर्म विन्दति ॥ १ ॥
यस्यामिमे षण्नरदेव दस्यवः सार्थं विलुम्पन्ति कुनायकं बलात् ।
गोमायवो यत्र हरन्ति सार्थिकं प्रमत्तमाविश्य यथोरणां वृकाः ॥ २ ॥
प्रभूतवीरुत्तृणगुल्मगह्वरे कठोरदंशैर्मशकैरुपद्रुतः ।
क्वचित्तु गन्धर्वपुरं प्रपश्यति क्वचित्क्वचिच्चाशुरयोल्मुकग्रहम् ॥ ३ ॥
निवासतोयद्रविणात्मबुद्धिस्ततस्ततो धावति भो ! अटव्याम् ।
क्वचिच्च वात्योत्थितपांसुधूम्रा दिशो न जानाति रजस्वलाक्षः ॥ ४ ॥
अदृश्यझिल्लीस्वनकर्णशूल उलूकवाग्भिर्व्यथितान्तरात्मा ।
अपुण्यवृक्षान्श्रयते क्षुधार्दितो मरीचितोयान्यभिधावति क्वचित् ॥ ५ ॥
क्वचिद्वितोयाः सरितोऽभियाति परस्परं चालषते निरन्धः ।
आसाद्य दावं क्वचिदग्नितप्तो निर्विद्यते क्व च यक्षैर्हृतासुः ॥ ६ ॥
शूरैर्हृतस्वः क्व च निर्विण्णचेताः शोचन्विमुह्यन्नुपयाति कश्मलम् ।
क्वचिच्च गन्धर्वपुरं प्रविष्टः प्रमोदते निर्वृतवन्मुहूर्तम् ॥ ७ ॥
चलन्क्वचित्कण्टकशर्कराङ्घ्रिर्नगारुरुक्षुर्विमना इवास्ते ।
पदे पदेऽभ्यन्तरवह्निनाऽर्दितः कौटुम्बिकः क्रुध्यति वै जनाय ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रयोदशेऽविरक्ताय वृथा तत्त्वनिरूपणम् ।
इति वैराग्यदार्ढ्याय भवाटव्युपवर्ण्यते ॥ १ ॥

अध्वनः पारमित्युक्तं तमेवाध्वानं प्रसिद्धमार्गरूपकेण वैराग्याय प्रपञ्चयति । दुरत्यये दुस्तरेऽध्वनि प्रवृत्तिमार्गे रजस्तमःसत्त्वैर्विभक्तानि कर्माणि कार्यतया पश्यतीति तथा स एष प्रसिद्धः सार्थो जीवसमूहोऽर्थपरः सुखार्थः सन् यथा वणिक् सार्थोऽर्थार्जनाय गच्छन्नटवीं याति तद्वत् ॥ १ ॥

अस्याध्यायस्य व्याख्यानरूप उत्तराध्यायोऽस्ति तथापि सुखप्रतिपत्तये किञ्चित्किञ्चिद्व्याख्यायते । यस्यां भवाटव्यामिमे इन्द्रियनामानः षड् दस्यवश्चोराः । कुत्सितो नायकः सारथिर्बुद्धिर्यस्य तं सार्थं विलुम्पन्ति यस्य धर्म्यं धनमुपभोगेन मुष्णन्तीत्यर्थः । गोमायवः सृगालतुल्या दारापत्यादयस्त्वं मे भर्ता पितेत्येवं प्रविश्य प्रमत्तं सार्थिकं सार्थे स्थितं हरन्ति इतस्तत आकर्षन्ति उरणा मेषम् ॥ २ ॥

वीरुधो लतास्तृणानि च गुल्माश्च लतादिजालानि प्रभूतैस्तैर्गह्वरे दुष्प्रवेशे चेत्रे कठोरैस्तीक्ष्णैर्दंशैर्मक्षिकाविशेषैर्मशकैश्च यथा कश्चिदुपद्रुतो भवत्येवं कामकर्मादिभिर्गह्वरे गृहाश्रमे वर्तमानो दुर्जनैरुपद्रुतो भवतीत्यर्थः । गन्धर्वपुरवदसन्तमेव देहादिकं प्रकर्षेण सत्यमेवेदमिति पश्यति । कचित्कचित्क्वापि क्वाप्याशुरयोऽतिवेगो य उल्मुकाकारो ग्रहः पिशाचस्तत्तुल्यं सुवर्णमुपादेयत्वेन प्रपश्यतीत्यर्थः ॥ ३ ॥

निवासादिष्वात्मा स्वभावो यस्याः सा बुद्धिर्यस्य स ततस्ततो धावतीत्युभयत्र तात्पर्यार्थः । वात्या चक्रवातस्तयोत्थितः पांसुस्तेन धूम्रा दिशो रजस्वले रजोव्याप्ते अक्षिणी यस्य स यथा न जानाति तथा वात्येव भ्रमयन्ती या स्त्री तस्यामुद्धतैः रागादिभिरप्रकाशमानाः दिग्देवताः कर्मसाक्षिभूता न जानातीत्यर्थः ॥ ४ ॥

अदृश्यानां झिल्लीनां भृङ्गारिकासंज्ञानां कीटविशेषाणां स्वनैः कर्णयोः शूलं व्यथा यस्य उलूकाः घूकास्तेषां वाग्भिर्व्यथितोऽन्तरात्मा मनो यस्य अत्र च परोक्षमप्रियवक्तारो झिल्ली-

श्रीधरस्वामिकृतभावार्थदीपिका ।

तुल्याः प्रत्यक्षमप्रियवक्तारो घूकतुल्याः येषां छायापि पापहेतुस्ते अपुण्यवृक्षास्तत्तुल्यानधार्मिकान्सेवते । मरीचितोयानिति । निष्फलत्वेन विज्ञातानपि विषयान् ॥ ५ ॥

वितोयासु सरित्सु पतितस्य गात्रभङ्गात्सद्यो दुःखं भवति नचोदकलाभस्तद्वदिह च परत्र च दुःखदान्पाखण्डानभियाति आशपते दायादादिभ्योऽन्नादि वाञ्छति । उभयत्रापि स एवार्थः । दावं दावाग्नितुल्यं दुःखदं गृहं प्राप्य शोकाग्निना तप्तो निर्विद्यते विषीदति । तत्र च यक्षराक्षसतुल्यैः राजभिर्हृतमसुवत्प्रेष्ठं धनं यस्य स निर्विद्यते ॥ ६ ॥

अन्यैश्च शूरैर्हृतं स्वं वित्तं यस्य निर्विण्णां विषण्णां चेतो यस्य कश्मलं मूर्छाम् गन्धर्वपुरमिव मनोरथोपगतपितृपुत्रादिसमाजं प्रविष्टः सन् ॥ ७ ॥

कण्टकादिविद्धाङ्घ्रिरिव विघ्नैरभिभूतः सन्नगतुल्यं महत्कर्मारोढुं कर्तुमिच्छुर्विमना इव आस्ते पदे पदे क्षणे क्षणे अभ्यन्तरेण वह्निना जाठरेण ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं तत्त्वं निरूपितमप्यविरक्तस्य न प्रतिष्ठितं भवतीति वैराग्योदयाय संसाराध्वानं लोकप्रसिद्धदुर्गाधत्वेन संसारमटवीत्वेन च रूपयति । दुरत्यय इति त्रयोदशेनाध्यायेन ब्राह्मणः । दुरत्यये दुरतिक्रमेऽध्वनि कर्ममार्गेऽजया प्रकृत्या निवेशितः रजस्तमःसत्त्वैर्विभक्तानि कर्माणि कार्यतया पश्यतीति तथा शुभाशुभमिश्ररूपकर्मणि दृष्टिमानित्यर्थः स एवः सार्थो जीवसमूहः अर्थपरः धर्मादिपुरुषार्थत्रयासक्तः भवाटवीं याति कर्मफलं तु प्राप्नोतीत्यर्थः शर्म सुखं न विन्दति न लभते यथा वणिक् अर्थार्जनाय गच्छन्नटवीं याति सुखं च न विन्दति तद्वदित्यर्थः ॥ १ ॥

पञ्चदशाध्यायस्य व्याख्यानरूप उत्तराध्यायः प्रवृत्तस्तथापि सुखप्रतिपत्तये किञ्चिदत्रापि व्याख्यायते तदेवाह । यस्यामिति । हे नरदेव ! यस्यां भवाटव्यां षडिन्द्रियनामानः दस्यवो दुष्टजन्तवः चौराः कुत्सितः सन्मार्गानभीष्टः नायकः बुद्धिरूपः नेता यस्य तं सार्थं जीवसमूहं विलुम्पन्ति जीवस्य भगवदाराधनरूपं धनं लुम्पन्तीत्यर्थः यत्र भवाटव्यां गोमायवः शृगालतुल्या दारापत्यादयः प्रमत्तमनवहितसार्थकं त्वं मे भर्तासि पितासीत्येवं प्रविश्य हरन्ति यथोरणां मेषं वृका हरन्ति तद्वत्"योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते"इत्युक्तरीत्या आत्मस्वरूपविस्मारकाभिमानजननद्वारा आत्मानमपहरन्तीत्यर्थः ॥२॥

वीरुधो लता गुल्मानि च तैः गह्वरेऽधकर्मबीजवत्फलप्ररोहक्षेत्रभूते गृहाश्रम इत्यर्थः कठोरैस्तीव्रैर्दंशैर्मक्षिकाविशेषैर्मशकैश्च यथा कश्चिद्वने उपद्रुतो भवति तथा दंशादिसदृशैः राजभटादिभिरुपद्रुतो भवतीत्यर्थः क्वचिद्गन्धर्वपुरवदस्थिरं मनुष्यशरीरं स्थिरवत् पश्यति गन्धर्वाणां हि पुरं न विद्यते तद्वद्देहस्यापि नित्यत्वमविद्यमानमपि पश्यतीत्यर्थः क्वापि क्वापि आशुरयः अतिवेगो य उल्मुकाकारो ग्रहः तत्तुल्यं सुवर्णमुपादेयत्वेन प्रपश्यतीत्यर्थः असुहरोल्मुकग्रहमित्यपि पाठो दृश्यते तत्र प्राणहरोल्मुकपिशाचतुल्यं परकीयं सुवर्णमुपादेयत्वेन प्रपश्यतीत्यर्थः यथा पिशाचगतोल्काज्वलनं प्रकाशार्थं जिघृक्षन् यथा पिशाचहतो भवति एवं दुर्जनसम्बन्धि सुवर्णस्य स्वोपकारकत्वबुद्ध्या जिघृक्षुः दुर्जनैरुपद्रुतो भवतीत्यर्थः ॥ ३ ॥

पिपासतोयद्रविणात्मबुद्धिः पिपासाविषयं तोयं पिपासतोयं पीपासतोयं मृगतृष्णिका पिपासाशब्दस्य "ङ्यापोः संज्ञाच्छन्दसो"रित्यार्षो ह्रस्वः पिपासाविषयतोयतुल्यं द्रविणं वित्तं तस्मिन्नात्मबुद्धिः स्वबुद्धिर्यस्य तथाभूतः क्वचिन्निवासतोयं द्रविणात्मबुद्धिरिति पाठस्तत्र निवासादिष्वात्मभावो यस्याः सा बुद्धिर्यस्येत्यर्थः अटव्यामितस्ततो धावति भ्रमति भो राजन् ! वात्या चक्रवातः तत्तुल्या नारी वात्या वात्यया प्रमदया उत्थितो रागादिदोषः पांसुस्तेन धूम्रा आविला दिशः धर्ममर्यादाः रजस्वलाक्षो रजोव्याप्ते अक्षिणी यस्य सः रजोगुणोपहतज्ञानः सन् न जानाति यथा चक्रवातोत्थितधूलिव्याप्तनेत्रो प्राच्यादिदिग्विभागान्न जानाति तद्वद्धर्ममार्गान् स न जानातीत्यर्थः ॥४॥

क्वचिदल्पदृश्यानां झिल्लीनां भृङ्गारकासंज्ञानां कीटविशेषाणां स्वनेन ध्वनिना कर्णयोः शूलं व्यथा यस्य सः परोक्षमप्रियभाषिरिपुवाक्यश्रवणजनितकर्णव्यथायुक्तो भवति यथाटव्यां प्रविष्टोऽदृश्यझिल्लीस्वनव्यथितकर्ण इत्यर्थः तथा उलूकानां प्रत्यक्षमप्रियभाषिणां घूकसदृशानां राजभटादीनां वाग्भिर्व्यथितः अन्तरात्मा मनो यस्य तथाभूतः क्वचिद्भवति यथारण्ये उलूकवाग्भिर्व्यथितहृदयो भीतहृदयो भवति इत्यर्थः क्वचित् क्षुधाऽशनायया अर्दितः पीडितः अपुण्यवृक्षान् विषवृक्षसदृशान् अनुपकारकर्माप्रतिग्राह्यधनान् श्रयते आश्रयति क्वचिन्मरीचितोयानि मरीचिकाजलवत्सुखाभासान् विषयाननुधावति भोग्यबुद्ध्यान्वेषयति असोढव्यं हेयं विषयमनुधावतीत्यर्थः ॥ ५ ॥

क्वचिन्निर्तोयाः जलरहिताः सरितः नदीरभियाति यथा-वितोयासु सरित्सु पतितस्य गात्रभङ्गात्सद्यो दुःखं भवति नचाप्युदकलाभः तद्वदिह परत्र च दुःखदान्निष्फलान् पाखण्डाश्रमानभियाति आश्रयते क्वचिन्निरन्नः परस्परं दायादेभ्योऽन्नादिकं लषते वाञ्छति पुत्रः पितृधनमिच्छति पुत्रार्थमिच्छति पिता निरन्नकतयेत्यर्थः क्वचिद्दावं दावाग्नितुल्यं गृहमभिमतविषयशून्यं दुःखदं प्राप्तः प्रविष्टः अग्नितप्तः शोकातुरो भवति क्वचित् यक्षैर्यक्षवत्प्रतिहर्तुमशक्यैः राजभिर्हृतासुरपहृतप्राणतुल्यधनः निर्विद्यते खिद्यते ॥ ६ ॥

तथा शूरैः राजभटादिभिर्हृतं स्वं धनं यस्य सः क्वचित् दुःखितचित्तो भवति हे नृप ! क्वच शोचन् विमुह्यंश्च कश्मलं मूर्च्छां याति क्वचिद्गन्धर्वपुरमिवास्थिरं बन्धुवर्गं प्रविष्टः निर्वृतवत्सुखितवत् मुहूर्तमात्रं मोदते ॥ ७ ॥

क्वचिन्नगारुरुक्षुः पर्वतवत्दुरारोहयज्ञादिकलापं विधित्सुः कण्टकैः शर्कराभिः सूक्ष्मपाषाणैश्च दुःखितचरणो यथा पर्वतमारोढुं न शक्तस्तथा कण्टकादितुल्यैर्विघ्नैरभिभूतः महत्कर्मारोढुं कर्तुमशक्तः सन् विमना इवास्तेऽभास्वरत्वेनावतिष्ठते कश्चिच्च क्षणे क्षणेऽभ्यन्तरवह्निना जाठराग्निनाऽर्दितः पीडितः जनाय कलत्रादीन् प्रति कुप्यति यतोऽयं कौटुम्बिकः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अस्मिन्नध्याये संसारविरक्तस्य हरौ सुदृढा भक्तिः स्यात्तया तदपरोक्षज्ञानं जायते तेन स्वयोग्या मुक्तिः स्यादित्यतः संसारस्य हेयत्वज्ञानेन तत्र विरक्तिस्तदर्थं तत्स्वरूपं निरूपयति । दुरत्यय इत्यादिना । दुरत्यये हरिकटाक्षमन्तरेणात्येतुमशक्ये अजया प्रकृत्या रजस्तमःसत्त्वगुणैः विभक्तानि यानि कर्माणि तानि पश्यति ममाहमित्यभिमन्यते इति रजस्तमःसत्त्वविभक्तकर्मदृक् सार्थः परिषज्जनः वणिक् सार्थवदर्थपरः स्वप्रयोजनाभिनिविष्टबुद्धिः भवाटवीं ब्रह्मादिस्तम्बपर्यन्तं संसारवनं याति तत्र शर्म स्वाभिप्रेतसुखं न लभत इत्यन्वयः ॥ १ ॥

स्वार्थालाभे निमित्तमाह । यस्यामिति । षट् दस्यवः श्रोत्रादिज्ञानेन्द्रियाणि मनश्चेति स्वार्थं पुण्यलक्षणं विलुम्पन्ति विषयोपभोगद्वारेणापहरन्ति कुत्सितः कामादिर्नायको यस्मिन्स तथा अन्तःशत्रूनुक्त्वा बाह्यानाह । गोमायव इति । गोमायव इति लुप्तोपमा शृगालसदृशाः पुत्रकलत्रादयः सार्थकं संपद्युक्तं कलभाषणादिना मन आविश्य उरणमजाम् ॥ २ ॥

वीरुधो महत्यो गुल्मान्यणूनि अङ्कुरादीनि समृद्धवीरुत्तृणगुल्मवदपरिपक्वकामबीजः श्रौतस्मार्तकर्मभिर्गह्वरे गृहस्थाश्रमे वर्तमानः कठोरमशकदंशकल्पैः राजभटतस्करादिभिरुपद्रुतो बाधितः अपहृतहिरण्यशाल्यादिकः क्वचित्संसारस्थाने गन्धर्वैः कर्मभिः निर्मितपुरं मनुष्याद्यन्यतमं शरीरं दृष्ट्वाऽऽविश्य च कर्म भुङ्क्ते इत्यर्थः अस्थिरत्वात्प्रसिद्धगन्धर्वपुरसाम्यमसुहरः प्राणहरः उल्मुकग्रहः उल्मुकपिशाचः तत्सदृशशब्दादिविषयं पश्यतीति शेषः ॥ ३ ॥

निवासतोऽन्यत्र यत् यस्मिन्द्रविणे आत्मबुद्धिर्यस्य स तथा ततस्ततस्तत्र तत्र धावति धावनमेवावशिष्यते न तु काचित्कार्यसिद्धिरित्यर्थः अत्र क्वचिच्छब्दा अनवस्थानवाचका इति । वात्योत्थितपांसुधूम्राः मण्डलवायुसदृशस्त्रीनिमित्तरागादिलक्षणपांसुभिश्छन्नाः दिशन्ति स्वाभिमतं प्रयच्छन्तीति दिशः सूर्यादिदेवताः रजस्वलाक्षः अविवेकविज्ञानः ॥ ४ ॥

अतिगहनवनवासिन्यो झिल्ल्यः कीटविशेषाः तेषां शब्दा एव दृश्यन्ते न स्वरूपं दृश्यत इत्यदृश्यानां झिल्लीनां स्वनवद्दुःसहराजचोरादिनिष्ठुरशब्दैः पूरितकर्णमूलः उलूकवाग्भिः दुर्जनतर्जनैः व्यथितान्तरात्मा परिखिन्नहृदयः कदाचित्क्षुधार्दितः विषयतृष्णया क्लिष्टः अपुण्यवृक्षान् कारस्करादिवृक्षवद्दृष्टादृष्टफलशून्यपाखण्डाश्रमान्मरीचितोयानि मरीच्युदकसदृशशब्दादीन् ॥ ५ ॥

वितोया अधरामृतशून्याः सरितः पुंश्चलीः परस्परं खादयते स्वीकरोति पितृधनं पुत्रो लभते पुत्रधनं पिता च श्ववत् भ्रात्रादिजनोऽन्योऽन्यं शब्दं कुरुते धनविषय इति वा निरन्नोऽशनवसनादिपरिकरशून्यः दुनोतीति दावं प्रयोजकशून्यं वनसमं गृहं शोकाग्निना संतप्तः यक्षग्रहवत्प्रबलराजामात्यादिभिर्हृतासुः अपहृतबहिःप्राणाख्यहिरण्यः तदुक्तं कौर्मे "हिरण्यं हि मनुष्यस्य प्राणा ह्येते बहिश्चराः" इति ॥ ६ ॥

क्व च संसारे परस्वापहारपटुभिर्ग्रामाधिपतिभिः हृतस्वः अपहृतद्रव्यः तेन विरक्तबुद्धिः देशत्यागकृतमनाः शोकमोहाभ्यां कश्मलं कष्टावस्थां याति क्वापि कर्मविशेषात् गन्धर्वपुरं स्वर्गादिलक्षणलोकमाप्तो यावत्प्रारब्धसमाप्ति सुखमनुभवति पतनभयान्निर्वृतवदित्युक्तमाकस्मिकपितृपितामहादिसंयोगं वा ॥ ७ ॥

कण्टकशर्करार्ङ्घ्रिः कण्टकादिलग्नपाद इवाशक्यगन्तव्यकर्ममार्गः कण्टकादियुक्तमार्गगतिशील इव दुःसहकर्ममार्गो वा अर्ङ्घ्रिरत्र गत्यर्थः क्वचिन्नगवत् दुर्गं निवृत्तिमार्गमारुरुक्षुरशक्तः सन् नष्टमना इव तिष्ठति अत्युच्छ्रितारोहाशक्यपर्वतसदृशवेदविहितानेककर्मसंपादनेच्छुस्तदशक्त इव वा अभ्यन्तरवह्निना जाठराग्निना ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कर्हिस्मेति नानुपहरकान् यदाभियुङ्क्ते इति शेषः तेषामाभिमुख्येन युद्धोद्यमं करोतीत्यर्थः ॥ १—१३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

त्रयोदशे भवाटव्याः पारं प्रापयितुं नृपम् ।
तां वर्णयित्वा वैराग्यहृयमारोहयन्मुनिः ॥

अध्वनः पारमित्युक्तं स एवाध्वा अध्वनीनश्च कीदृश इत्यपेक्षायामाह । दुरत्यये दुस्तरे अध्वनि प्रवृत्तिमार्गे अजया अविद्यया रजस्तमःसत्त्वैर्विभक्तान्येव कर्माणि कार्य्यतया पश्यतीति स तथा एषः प्रासङ्गः सार्थः "सार्थो वणिक् समूहे स्यात्" इति मेदिनी । स इव अर्थपर एष जीवलोक इत्यर्थः एतदादीनां व्याख्या उत्तराध्याय एवास्ति तदपि सुखप्रतिपत्तये किञ्चिद्व्याख्यायते ॥ १ ॥

इमे इन्द्रियनामानः कुत्सितो नायकः सारथिर्बुद्धिर्यस्य तं विलुम्पन्ति भगवत्सेवार्थविनियुक्तमपि धनं स्वस्वविषयभोगार्थं मुष्णन्तीत्यर्थः गोमायवः शृगालतुल्या दारापत्यादयः त्वं मे भर्ता पितेत्येवं सार्थिकं सार्थभवमन्नवस्त्रादिसम्पुटं प्रमत्तं परमार्थदृष्टिविमुखमाविश्य तस्य गृह इवान्तःकरणेऽपि प्रविश्येत्यर्थः उरणं मेषम् ॥ २ ॥

प्रभूतवीरुदादिसदृशैः कामकर्म्मादिभिर्गह्वरे गृहाश्रमे दंशमशकतुल्यैर्दुर्जनैः गन्धर्वपुरवदघटमानं देहगेहादिकम् प्रकर्षेण सत्यं स्थिरमेवेदमिति पश्यति क्वापि क्वापि आशुरयः अतिवेगो य उल्मुकाकारो ग्रहः पिशाचः तं तत्तुल्यं सुवर्णमुपादेयत्वेन पश्यति ॥ ३ ॥

निवासादिषु आत्मनो ममैवेदमिति बुद्धिर्यस्य तथाभूतः सन् ततस्ततस्तत्र तत्र धावतीत्युभयत्र पक्षे तावानेवार्थः वात्या चक्रवातरूपा या स्त्री तदुत्थितैः पांसुभिः कन्दर्पवेगैर्धूम्रा आच्छन्नीकृता दिशः दिग्देवताः कर्मसाक्षिभूता न जानाति रजस्वलाक्षः कामान्धः ॥ ४ ॥

अदृश्यानां झिल्लीनां भृङ्गारिकाख्यकीटविशेषाणामिव परोक्षमप्रियवक्तॄणां स्वनैः कटुभाषणैः कर्णयोः शूलं व्यथा यस्य सः उलूकानामिव प्रत्यक्षमप्रियवक्तॄणां वाग्भिः कटुभाषितैर्व्यथितमनाः येषां छायापि पापहेतुस्तान् अपुण्य-

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वृत्त्यानिव अधार्मिकलोकान् भिक्षार्थं सेवते मरीचितोयतुल्यान् अदातृलोकानपि कचिद्वित्तार्थं गच्छति ॥ ५ ॥

वितोयासु सरित्सु पतितस्य गात्रभङ्गात् सद्यो दुःखं भवति न चोदकलाभस्तदिह च परत्र च दुःखदान् पाखण्डानभियाति आलषते अभिलषति निरन्ध इति निरन्नश्चेति पाठद्वयमुभयत्र पक्षे साम्यं दावं दावाग्नितुल्यं दुःखदं गृहं प्राप्य शोकाग्निना तप्तो निर्विद्यते विषीदति । यक्षराक्षसतुल्यैः राजभिर्हृतमसुवत् प्रेष्ठं धनं यस्य सः भिद्भमं धनरहितमिति निर्विद्यते । कदाचित् अन्यैः शूरैः संग्रामे विजयिभिश्च हृतधनः ॥ ६ ॥

गन्धर्वपुरमिव मनोरथोपलब्धं पुत्रकलत्रधनैश्वर्यं प्रविष्टः प्राप्नुवन् ॥ ७ ॥

नगान् रुरुक्षुः नगं महापर्वतमिव कन्यापुत्रोद्वाहादियशः आरुरुक्षुः प्राप्तुमिच्छुर्विमनाः कथमेतत् पारं प्राप्स्यामीति भावयन्नास्ते । यतः पादुकाद्यभावात् कण्टकादिविद्धाङ्घ्रिः पक्षे सहायाद्यभावात् विघ्नाभिभूतः अभ्यन्तरेण वह्निना जाठरेण ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अध्वनोऽतिपारं हरिं यातीत्युक्तं तत्र हरिस्तु प्रागेव निरूपितोऽथाध्वानं प्रसिद्धदुर्गमार्गरूपकेण वैराग्याय प्रपञ्चयति । दुरत्यये इति त्रयोदशेनाध्यायेन । दुरतिक्रमे अध्वनि प्रवृत्तिमार्गे अजया जीवमोहिन्या प्रकृत्या निवेशितः रजआदिभिर्विभक्तानि कर्माणि कार्यतया पश्यतीति तथा स एष प्रसिद्धो जीवसंमूहः अर्थपरः त्रिवर्गासक्तः भवाटवीं याति शर्म सुखं च न विन्दति न लभते यथा वणिक् सार्थोऽर्थार्जनाय गच्छन् अटवीं याति सुखं च न विन्दति तद्वत् अयमध्याय उत्तराध्यायेन व्याख्यातस्तथापि सुखबोधाय किञ्चिद्व्याख्यायते ॥ १ ॥

इमे पञ्च ज्ञानेन्द्रियाणि मनश्च षट् कुत्सितो नायकः बुद्धिर्यस्य तम् सार्थं विलुम्पन्ति यस्य परमपुरुषाराधनलक्षणधर्मरूपं धनमुपभोगेन मुष्णन्ति गोमायवः तत्तुल्याः कौटुम्बिकाः सार्थिकं सार्थे स्थितं हरन्ति धर्ममार्गादपकर्षन्ति वृका उरणं मेषम् यथा आकर्षन्ति ॥ २ ॥

वीरुधो लताश्च तृणानि च गुल्मानि लतादिजालानि च प्रभूतैरेतैर्गह्वरे दुष्प्रवेशे कठोरदंशैर्मशकैश्च यथा कश्चिदुपद्रुतो भवति तथा प्रदग्धवीजक्षेत्रवत्कर्मक्षेत्रे गृहाश्रमे वर्तमानः दंशमशकसदृशैः मनुजापसदैरुपद्रुतोऽपि कचित्तु गन्धर्वपुरवदल्पकालस्थायि देहादिकं नित्यमिव प्रपश्यति कचिच्च आशुरयः अतिवेगः उल्मुकग्रहः उल्मुकसदृशः पिशाचः तत्सदृशं सुवर्णमुपादेयतया प्रपश्यति ॥ ३ ॥

निवासादिष्वात्मा स्वभावो यस्या सा बुद्धिर्यस्य सः वात्यायां चक्रवाते उत्थितेन पांशुना धूम्रा दिशः रजस्वले रजसा व्याप्ते अक्षिणी यस्य स न जानाति यथा तथा वात्यातुल्यायां प्रमदायामुद्धतेन रागादिना प्रकाशमाना दिग्देवताः कर्मसाक्षिभूताः दिग्जाता देवता न जानाति रजोगुणावृतदृष्टिः ॥ ४ ॥

अदृश्यझिल्लीनिभाः परोक्षाप्रियवादिनस्तत्स्वनेन कर्णयोः शूलं पीडा यस्य उलूकनिभाः प्रत्यक्षाप्रियश्रावयितारः तद्वाग्भिर्व्यथितोऽन्तरात्मा यस्य अपुण्यवृक्षनिभाः अधार्मिकास्तान् सेवते मरीचितोयवन्निष्फलतयावगतानपि विषयाभासान् अभिधावत्यन्वेषयति ॥ ५ ॥

वितोयसरिद्वद्वृथा क्लेशदान् पाषण्डानभियाति प्रयाति निरन्धो निरन्नः परस्परमन्योऽन्यतः अन्नादिकमालषते वाञ्छति दावं वनानिलनिभं गृहमासाद्याधिष्ठाय अग्नितप्तः अग्निवद्दुःसहशोकसंतप्तः निर्विद्यते विषीदति यक्षैर्यक्षवद्दुर्निवार्यैः राजभिर्हृतमसुवद्दुस्त्यजं धनं यस्य सः निर्विद्यते ॥ ६ ॥

अन्यैश्च शूरैः राजभटादिभिः गन्धर्वपुरवदस्थिरं पितृपुत्रादिसमाजम् ॥ ७ ॥

कण्टकादितुल्यैर्विघ्नैः शिथिलक्रियः सन् नगवद्दुर्लङ्घ्यं महाकार्यं विधित्सुः पदे पदे प्रतिक्षणम् ॥ ८ ॥

भाषाटीका ।

ब्राह्मण बोले रजोगुण सत्त्वगुण तमोगुण में दृष्टि रखनेवाला पुरुष अर्थों का अभिलाषी होकर स्वार्थी वनिया के समूह सरीका जन समुदाय भगवान् की माया से प्रवृत्तिरूप मार्गमे निवेशित हुआ है देवादियोनियों में घूमते २ भवाटवी को प्राप्त होता है सुख नहीं पाता है ॥ १ ॥

हे नरदेव ! जिस भवाटवी में ये छः इन्द्रियनाम के चोर हैं बुद्धिरूप खोटा जिनका नायक है तिस समूह को जबरदस्ती लूटते हैं जिस वन में पैठकर प्रमादी पुरुष को कुटुम्बी सब स्याल सरी के चारों ओर खेंचते हैं जैसे बकरी को भेड़िये खेंचते हैं ॥ २ ॥

बहुत से गुल्म लता तृणों (कर्मादिको) से अति कठिन डांश मच्छरों (दुर्जनों) से उपद्रवयुक्त होता है कहींपर गंधर्व नगर (अलक्ष्य मनोरथों) को देखता है कहींपर बडे वेगवाले अगिया वेताल (सुवर्ण) को देखता है ॥ ३ ॥

हे राजन् ! वासस्थान जल धन देह इन में लगी है बुद्धि जिस की ऐसा पुरुष वन में इधर उधर दौडता है कहींपर आंधी के उडने से धूल भरी नेत्रों (कामादि दृष्टि) से दिशों को भूल जाता है ॥ ४ ॥

कहींपर अदृश्यझिंगारी (खोटे वचन कहनेवाले मनुष्यों) के शब्दों को सुनकर दुखपाता है कहींपर घुग्घू [राजपुरुषों] के शब्द से दुःखित होता है कहींपर भूख के मारे विना छाया के पेडों (पापी पुरुषों) का आश्रय करता है कभी मृगतृष्णा [निष्फल विषयों] पर दौडता है ॥ ५ ॥

कहींपर विनाजल की नदी [पाखण्डमार्गों] को आश्रय करता है और अन्न नमिलने से परस्पर में चाहना करता है कभी दावानल ग्रहादि प्राप्तहोकर बडी गर्मी [शोकाग्नि] के मारे व्याकुल होता है कभी यक्ष [राजपुरुष] धन हर लेते हैं ॥ ६ ॥

कभी प्रबल शूरलोग धन हरलेते हैं तब दुःखित होजाताहै शोचकर के मोहित होकर मूर्छा को प्राप्त होता है कभी गन्धर्वपुर [मनोरथों] में प्रविष्ट होता है सुखित सरीका मुहूर्तभर आनन्दित होता है ॥ ७ ॥

क्वचिन्निगीर्णोऽजगराहिना जनो नावैति किञ्चिद्विपिनेऽपविद्धः।
दष्टः स्म शेते क्व च दन्दशूकैरन्धोऽन्धकूपे पतितस्तमिस्रे ॥ ९ ॥
कर्हि स्म चित्क्षुद्ररसान्विचिन्वंस्तन्मक्षिकाभिर्व्यथितो विमानः।
तत्रातिकृच्छ्रात्प्रतिलब्धमानो बलाद्विलुम्पन्त्यथ तं ततोऽन्ये ॥ १० ॥
क्वचिच्च शीतातपवातवर्षप्रतिक्रियां कर्तुमनीश आस्ते।
क्वचिन्मिथो विपणन्यच्च किञ्चिद्विद्वेषमृच्छत्युत वित्तशाठ्यात् ॥ ११ ॥
क्वचित्क्वचित्क्षीणधनस्तु तस्मिन् शय्यासनस्थानविहारहीनः।
याचन्परादप्रतिलब्धकामः पारक्यदृष्टिर्लभतेऽवमानम् ॥ १२ ॥
(१)अन्योऽन्यवित्तव्यतिषङ्गवृद्धवैरानुबन्धो विवहन्मिथश्च।
अध्वन्यमुष्मिन्नुरुकृच्छ्रवित्तबाधोपसर्गैर्विहरन्विपन्नः ॥ १३ ॥
तांस्तान्विपन्नान्स हि तत्र तत्र विहाय जातं परिगृह्य सार्थः।
आवर्ततेऽद्यापि न कश्चिदत्र वीराध्वनः पारमुपैति योगम् ॥ १४ ॥
मनस्विनो निर्जितदिग्गजेन्द्रा ममेति सर्वे भुवि बद्धवैराः।
मृधे शयीरन्न तु तद्व्रजन्ति यन्न्यस्तदण्डो गतवैरोऽभियाति ॥ १५ ॥
प्रसज्जति क्वापि लताभुजाश्रयस्तदाश्रयाव्यक्तपदद्विजस्पृहः।
क्वचित्कदाचिद्धरिचक्रतस्त्रसन्सख्यं विधत्ते बककङ्कगृध्रैः ॥ १६ ॥

भाषाटीका

कभी पर्वतोंपर चढने [शास्त्रोक्त कर्मों को करने] चाहसाहै तब कांटे कंकडों (विघ्नों) के मारे दुःखित होता है कभी कभी जठराग्नि से पीडित होने से कुटुम्ब वाला होने से अपने पुत्रादिकोंपर क्रोध करता है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अजगराहिना निद्रारूपेण गिलितो न वेत्ति। विपिने त्यक्तः शव इव दन्दशूकैर्हिंस्रैर्दुर्जनैर्दष्टः पीडितोऽन्धो लुप्तविवेकोऽन्धकूपे मोहे पतितस्तमिस्रे दुःखे शेते लीयते ॥ ९ ॥

क्षुद्ररसान्परयोषादीन्विचिन्वन्गवेषयंस्तन्मक्षिकाभिर्योषादिस्वामिभिर्विमानोऽवज्ञातस्ताडितः सन्व्यथितो भवति। यदि कथंचित्तत्रातिक्लेशेन प्रतिलब्धमानः प्राप्तयोषादिर्भवति तदा बलाद्न्येऽपहरन्ति तान्यदाऽभियुङ्क्ते तदा ततोऽप्यन्ये हरन्ति ॥ १० ॥

यत्किञ्चिदत्यल्पमपि मिथो व्यवहरन् क्रयादिना गृह्णन् वित्तशाठ्याद्वञ्चनात् ॥ ११ ॥

शय्याविहीनः। आस्यतेऽस्मिन्नित्यासनं कम्बलादि। स्थीयतेऽत्रेति स्थानं गृहम्। विहरन्त्यनेनेति विहारो यानादि। याचमानोऽपि यदा परस्मादप्राप्तकामस्तदा परकीये वस्तुनि दृष्टिरभिलाषो यस्य सोऽवमानं प्राप्नोति ॥ १२ ॥

एवमन्योऽन्यं वित्तव्यतिषङ्गेण धनविनिमयेन विवृद्धो वैरानुबन्धो यस्य तथाविधोऽपि परस्परं विवहन्विवाहादिसम्बन्धं कुर्वन्नुरुभिः कृच्छ्रैः श्रमैर्वित्तबाधैरुपसर्गैश्च द्वेषादिभिर्विपन्नो मृतप्रायो भवति ॥ १३ ॥

दुरत्ययत्वमध्वनो दर्शयति। तांस्तान्विपन्नान्मृतान्विहाय जातं जातं परिगृह्य विहरन्यतः प्रस्थितस्तं प्रति नावर्तते। हे वीर! अध्वनः पारं यो योगस्तं च नोपैति। अत्र सार्थे कश्चिदतिसमर्थोऽपि ॥ १४ ॥

तदेवाह। मनस्विनः शूराः निर्जिता दिग्गजेन्द्रा यैः ममेयं भूर्ममेयमिति भुवि निमित्तभूतायां बद्धं वैरं यैः न्यस्तदण्डः संन्यासी यद्विष्णोः पदमभियाति तत्तु न व्रजन्ति ॥ १५ ॥

सिंहावलोकनेन पुनर्भवाटवीमेवानुवर्णयति। प्रसज्जत्यासक्तिं करोति। कीदृशः। लतानां भुजाः शाखास्तद्वत्सुकुमारा ये स्त्रीणां भुजास्तदाश्रयः सन्। तदाश्रया अव्यक्तपदा अस्फुटाक्षराः कलभाषिणो ये द्विजाः पक्षिणस्तत्तुल्येषु स्त्रीसङ्गप्रसक्तेष्वपत्येषु स्पृहा यस्य तादृशो भूत्वा हरिचक्रं सिंहसमूहस्तत्तुल्यात्कालचक्रनिमित्ताज्जन्ममरणादेस्त्रसंस्तत्परिहाराय कैश्चित्प्रलोभितो बकादिवद्वञ्चकैः क्षुद्रैः क्रूरैश्च पाखण्डैः सह सख्यं करोति तेषु प्रविशति ॥ १६ ॥

(१) इतःपरं श्लोकत्रयं श्रीविजयध्वजतीर्थमते सटीकमष्टादशश्लोकानन्तरं विद्यते तथैवात्रापि टीका स्थापितास्ति अत्र तु प्रसज्जतीत्यादित्रयं तन्मते ज्ञेयम्।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

क्वचिदयं जनः अजगराहिना अजगराख्यसर्पतुल्यया निद्रया निगीर्णो ग्रस्तः किञ्चिदपि न वेत्ति यथा विपिनेऽरण्येऽपविद्धस्त्यक्तः शव इव क्व च दन्दशूकैः सर्पतुल्यैर्हिंस्रैर्दुर्जनैर्दष्टः पीडितः अन्धो लुप्तविवेकः अन्धकूपे मोहे शरीरदुःखे वा पतितः तमिस्रे दुःखादिभिर्व्याप्ते ॥ ९ ॥

कर्हिचित् क्षुद्ररसान् विचिन्वन् तन्मक्षिकाभिः रसादिस्वामिभिर्व्यथितः ताडितः विमानोऽवज्ञातो भवति यदि कथञ्चित्तत्रातिक्लेशेन प्रतिलभ्यमानः प्राप्तपरदारादिर्भवति तदा तं वञ्चयित्वा बलादन्ये तान् क्षुद्ररसानपहरन्ति एवं तेभ्योऽप्यन्येऽपहरन्तीत्यर्थः ॥ १० ॥

क्वचिच्च शीतादीनां प्रतिक्रियां कर्तुं शीतादिनिर्हारकवस्त्रगृहादिकं सम्पादयितुमसमर्थस्तैर्दुःखित आस्ते क्वचिन्मिथः यत्किञ्चिदत्यल्पमपि विपणान् क्रयविक्रयादिभिर्व्यवहारं वाणिज्यकुर्वन्नित्यर्थः वित्तशाठ्याद्धनवाञ्छया विद्वेषं प्राप्नोति ॥११॥

तस्मिन् संसाराध्वनि क्वचित् क्षीणं धनं यस्य सः अत एव शय्यादिभिर्विहीनः रहितः भवति शेतेऽस्यामिति शय्या पर्यङ्कादि आस्यतेऽस्मिन्नित्यासनं कम्बलादि स्थीयतेऽस्मिन्निति स्थानं गृहादि विहरन्त्यनेनेति विहारो यानादिः याचमानो यदा परस्मादप्राप्तकामः तदा परकीये वस्तुनि दृष्टिरभिलाषो यस्य सोऽवमानमवज्ञां लभते ॥ १२ ॥

एवमन्योऽन्यं वित्तव्यतिषङ्गेण वित्तव्यत्यासेन वृद्धः वैरानुबन्धो यस्य सः मिथः विवादं कुर्वन् विवहन्निभश्चेत्यपिपाठः तदाभाषालब्धवित्तनियमव्यत्यासेन विवृद्धवैरानुबन्धः वैराविष्टचित्तः परस्परं विवाहं कुर्वन्नमुस्मिन् दुरत्ययेऽध्वनि उरुभिः कृच्छ्रैः श्रमैः वित्तबाधैरुपसर्गैश्च द्वेषादिभिर्विपन्नः मृतप्रायो भवति ॥ १३ ॥

दुरत्ययत्वमध्वनो दर्शयति । तांस्तान् विपन्नान् मृतान् पित्रादीन् तत्र विहाय जातं सार्धं पुत्रादिकं परिगृह्याद्याप्यत्रावर्त्तते भ्रामयति हे वीर ! अध्वनः पारं योगं कश्चिदपि नोपैति अत्र सार्थे कश्चिदतिसमर्थोऽपि ॥ १४ ॥

तदेवाह । मनस्विनः शूरा निर्जिताः दिग्गजेन्द्रा यैस्ते ममेयं भूमिर्ममेयं भूमिरित्यभिमाननिमित्तभूतायां भुवि बद्धं वैरं यैस्ते मृधे युद्धे केवलं शरीरान्प्राणांस्त्यक्तवन्तः नतु तद्व्रजन्ति प्राप्नुवन्ति किं तत् यत्र व्रजन्ति मनस्विनस्तत्राह । न्यस्तदण्डस्त्यक्तभूतदण्डः त्यक्तभूतवैरश्च योगी यद्विष्णोः पदं याति तत्र व्रजन्तीत्यर्थः ॥ १५ ॥

सिंहावलोकनन्यायेन पुनर्भवाटवीमेवानुवर्णयति । प्रसज्जतीति । प्रसज्जत्यासक्तिं करोति कीदृशः लतानां भुजाः शाखाः तानाश्रितः लतातुल्यकामिनीभुजोपधान इत्यर्थः तदाश्रयाः कामिनीलताश्रया येऽव्यक्तपदाः स्वानभिव्यक्तवर्णमधुरवचोभाषिणो द्विजाः पक्षिसदृशाः शिशवः बालाः तेषु स्पृहा यस्य सः तादृशो भूत्वा प्रसजतीत्यर्थः क्वचित् हरिचक्रं सिंहसमूहस्ततुल्याद्धरिचक्राद्गवरसम्बन्धिनः कालचक्रात् त्रसन् बिभ्यत् कालचक्रनिमित्तजन्मजरामरणादेस्त्रसन् तत्परिहाराय कैश्चित्प्रलोभितः वकादितुल्यैः पाखण्डदैवतैः सह सख्यं विधत्ते तेषु भक्तिं करोतीत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अजगराहिना "अजगरः शयुः" इत्यभिधानान्निद्राशीलो महा॰सर्पः तद्वन्निद्रया काललक्षणेन वा पिनोतेर्गतिकर्मणोऽर्थुपपदाया-विपरीतार्थायाः ङ्का (१) नोपरतिलक्षणारात्रिरित्यर्थः तत्रापविद्धः तिरश्चीनागतशरविद्ध इव दुःखितो दन्दशूकैः पुनः पुनरुपद्रवशीलैरसज्जनैर्दष्टोऽधिक्षिप्तोऽन्धो विवेकशून्योऽन्धकूपसमानयोनिविशेषे तमिस्रे नरकवत् दुःखरूपे ॥ ९ ॥

परवनितासङ्गेन क्षुद्ररसानल्पानन्दान् विचिन्वन्नन्वेषणं कुर्वंस्तन्मक्षिकाभिस्तासां वनितानां समानशीलैरन्योऽन्यवनितालोलैः स्वामिभिर्व्यथितस्ताडितो विमानो विगताभिमानस्तत्रापि परस्त्रीविषयेऽपि कृच्छ्रात्स्वामिवञ्चनायासेन प्रतिलब्धं स्त्रीधनादि अन्ये राजानो बलात् विलुम्पन्ति अपहरन्ति अथ ततः तेभ्यः अन्ये उपपतयस्तं स्त्रीजनमपहरन्तीत्येवमनवस्थाविषयसुखस्य क्षुद्रं रान्तीति क्षुद्राः अल्पत्वेनेति शेषः तान् क्षुद्ररसानन्नलक्षणान् विचिन्वंस्तन्मक्षिकाभिस्तदन्नदातृभिरदानेन दुःखितो विमानोऽनाश्रयो भवति तत्र कचित्कालान्तरे अत्यायासेन प्रतिनिधिना स्वाम्युक्तकर्मकरणलक्षणेन लब्धं निष्पन्नमन्येऽन्नकाङ्क्षिणो याचका विद्याबलादपहरन्ति तेभ्यो याचकेभ्योऽन्ये ततोऽप्यधिकविद्याबलेन महामार्गे क्लृप्तं विप्रभोजनमपहृत्य भुञ्जत इति धर्मभोजनस्यासिद्धिः अथशब्दः आश्चर्यार्थे इति वा ॥ १० ॥

प्रतिक्रियां परिहारं प्रावरणाद्यभावेनेति शेषः विपणान् क्रयविक्रयलक्षणं व्यवहारं कुर्वन् यत्किञ्चिदपि विक्रेयं रसलक्षणादिकमपि ऋच्छति प्राप्नोति ॥ ११ ॥

तस्मिन् व्यवहारे क्षीणधनः नष्टमौल्यः यावद्यदा दरिद्रः परं प्रार्थयते तदा परादन्यस्मादप्रतिलब्धकामः प्रतिग्रहादिधर्मेणाप्राप्ताभीष्टधनः पारक्यदृष्टिः परकीयद्रव्यस्वीकारेच्छुश्चौर्येणेति शेषः अवमानं बन्धनताडनादिकम् ॥ १२ ॥

(२)लतावत्कोमलभुजाश्रयः अव्यक्तपदमव्यक्तस्य प्रकृतिसंज्ञस्य स्त्रीजनस्य पदं स्थानं प्रसज्जति प्रकर्षेण सक्तो भवति द्विजस्य कुले जातोऽपीति शेषः तदाश्रय इति हेतुगर्भं विशेषणं स्त्रीजनाश्रयत्वादिति ।

प्रभवति मनसि विवेको विदुषामपि शास्त्रसम्भवस्तावत् ।
निपतन्ति दृष्टिविशिखा यावन्नेन्दीवराक्षीणाम् ॥

इति प्रसिद्धिं हशब्देनाह । हरिचक्रतः कालचक्रात् त्रसन् बिभ्यत् "बकभक्षणे" "ककिलौल्ये" "गृधु अभिकाङ्क्षायां" बकवदिक्षुदण्डादिभक्षणशीलविघ्नेश्वरदेवतया कङ्कवन्मैथुनलोलचित्तयक्षादिदेवतया रुधिरासवाकाङ्क्षारतभद्रकालीदेवतया च सेवालक्षणं शक्यम् ॥ ० ॥

वञ्चितो विपुलदण्डः अभीष्टफलाभावादिति शेषः हंसकुलं

---

(१) विपिनइत्यस्यार्थोयम् ।

(२) लताभुजाः लतानां शाखाः तदाश्रयः। द्विजस्य पक्षिसमूहस्य यत् अव्यक्तपदं कलभाषितं । तदाश्रयः तत्रैवासक्तचित्तः । प्रसज्जतिप्रकर्षेणासक्तोभवतीतिवर्णाकृपक्षे योज्यम् । दार्ष्टान्तिके तु लतावत्कोमलायाः स्त्रियोर्यौभुजौतदाश्रयः ताभ्यामालिङ्गितः । द्विजस्यलताश्रितपक्षितुल्यस्यस्त्र्याश्रितापत्यादेः यदव्यक्तपदंकलभाषितं तदाश्रयः प्रकर्षेणासज्जतीति ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ब्राह्मणकुलं संन्यासाश्रमं वा हंसानां शीलमुपनयनादिसंस्कारं त्रिषवणस्नानभिक्षावृत्यादिकं वा न रोचयन् पथ्यं नेदमिति मन्वानो वानरः वानेन हिंसया रमत इति शूद्रस्वभावं हिंसालक्षणं वानेन रमत इति गमनागमनलक्षणां सेवां वा शूद्रवत्सेवावृत्तिमुपजीव्य वर्तेत इत्यर्थः तज्जातिरासेन शूद्रजातिक्रीडारसेन सुष्ठु निर्वृतानि प्रीतानीन्द्रियाणि यस्य स तथा परस्परान्वीक्षणाविस्मृतावधिः स्त्रीपुरुषयोरन्योऽन्यमुखनिरीक्षणेन विस्मृतविहितकालमर्यादः ॥ ७ ॥

द्रुमेष्वैहिकफलभोगयोग्यलक्षणेषु गृहेषु रंस्यन् रतिं कुर्वन् सुतदारेषु स्निग्धो व्यवायेन मैथुनक्रियया दीनः शोच्यां दशामापन्नोऽत एव विवशो वने संसाराख्ये चरन् भवति ततः कदाचित् प्रमादाद्भगवत्तत्त्वापरिज्ञानाद्गिरिकन्दरवद्भयङ्करनरके पतन्वल्लीं जन्मान्तरोपार्जितपुण्यकर्मलक्षणां पाशमवलम्ब्य गजभीतो भयङ्करमृत्युभीतोऽपि ॥ ८ ॥

ततः आपदः कथञ्चिन्मुक्तो भूत्वा श्रद्धानः सार्थं सदाचारोपेतवर्णाश्रमं स्थानं प्रविशति संसाराध्वनि प्रवेशस्य प्रधानकारणमिदमेवेत्याह । अध्वनीति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विपन्नः कश्चिन्मृतो भवति ॥ १४—२२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अजगराहिंना निद्रारूपेण अपविद्धः बन्धुभिरप्रबोधितः दन्दशूकैरिव दुर्जनैः पीडितः अन्धो विवेकहीनः । अन्धकूपे मोहे तमिस्रे तमोवृते पक्षे दुःखमये ॥ ९ ॥

क्षुद्ररसान् परदारान् तन्मक्षिकाभिस्तद्भर्त्तृश्वश्रुरादिभिर्विमानो विगतमानः कृतो व्यथितो भवति । यदि कथञ्चित्तमतिक्रम्य धनव्ययादिना प्रतिलब्धमानः प्राप्तपरदारसम्भोगस्तदा तान् दारान् अन्ये विलुम्पन्ति ततोऽप्यधिकवित्तव्यये नान्येऽपीत्येवम् ॥ १० ॥

मिथो विपणान् विपणयन् क्रयविक्रयादिना व्यवहरन् वित्तशाठ्यात् धनवञ्चनात् विद्वेषं प्राप्नोति ॥ ११ ॥

परात् परस्मात् याच्यमानादपि अप्राप्तधनो भवेत्तदा परोक्षे परकीये वस्तुनि दृष्टिरभिलाषो यस्य सोऽवमानं प्राप्नोति ॥१२॥

एवमन्योऽन्यवित्तस्य व्यतिषङ्गेण परस्परासक्त्या परस्परजिघृक्षया विवृद्धो वैरानुबन्धो यस्य तथाविधोऽपि परस्परं विवहन् विवाहादिसम्बन्धं कुर्वन् अध्वनि विहरन् विभ्रमन् उरुभिः कृच्छ्रैर्वित्तवाधैरुपसर्गैः रोगादिभिश्च विपन्नो मृतप्रायो भवति ॥ १३ ॥

विपन्नान् मृतान् विहाय जातं जातं परिगृह्य बलसञ्चायि नावर्तते यतश्चलितस्तं परमेश्वरं प्रतीत्यर्थः । तत्प्राप्तिसाधनयोगमुपायं भक्तिज्ञानादिकं पारं पारप्रापकं न उपैति अत्र सार्थेषु मध्ये कश्चिदपि ॥ १४ ॥

तदेवाह मनस्विनः शूरा निर्जितेत्यतिदूरवर्त्तिनो दिग्गजेन्द्रानपि निर्जयन्तिस्म नत्वतिनिकटवर्तिन एकादशेन्द्रियभटानपि इति व्यवहार एव तेषां शौर्यं नतु परमार्थ इति भावः ततो ममेत्यादिपरमार्थतः शूरमाह । न्यस्तेति । गतवैरत्वेन न्यस्तदण्डत्वमेव शौर्यमिति भावः ॥ १५ ॥

सिंहावलोकेन पुनर्भवाटवीमेवानुवर्णयति । प्रसज्जतीति । लतानां स्त्रीणां भुजान् स्पर्शसुखानाश्रयत इति सः तदाश्रयेषु लतावलम्बिषु सुस्तत्वादव्यक्तपदेषु द्विजेषु पक्षिषु स्पृहा दिदृक्षा यस्य सः । पक्षे भार्यानुसङ्गवर्त्तिनि अस्फुटाक्षरभाषिणि द्वाभ्यां स्त्रीपुंसाभ्यां जातत्वात् द्विजे बालके दर्शनस्पर्शनादिस्पृहा यस्य तादृशो भूत्वा कदाचित् काले क्वापि देशे स्वयमेव वा कथमरे संसारं तरिष्यसीति दैवात् पाखण्डानां वाक्येन वा हरिचक्रतः सिंहसङ्घतुल्यात् कालचक्रात् त्रसन् त्रस्यन् तत्परिहाराय तैरेव पाखण्डैरेवं सुखेन तरिष्यसीति प्रलोभितो वकादिवद्वञ्चकैः कुबुद्धिभिः क्रूरैस्तैरेव पाखण्डिभिः सह सख्यं करोति ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अजगराहितुल्यया निद्रया ग्रस्तः विपिने अपविद्धस्त्यक्तशव इव दन्दशूकैः सर्पसदृशैः हिंस्रैर्जनैः दष्टः मर्मसु वाक्शरैस्ताडितः अन्धो नष्टविवेकः अन्धकूपे मोहे पतितः तमिस्रे दुःखगर्त्ते शेते लीयते ॥ ९ ॥

क्षुद्ररसान् तत्तुल्यान् परदारादीन् तन्मक्षिकाभस्तत्स्वामिभिः कृच्छ्रं यथा भवति तथा प्रतिलब्धमानः प्राप्तपरदारादिर्भवति तदा बलाद्विलुम्पन्ति तान्विलुम्पकान् अन्ये विलुम्पन्ति ॥१०॥

विपणान् व्यवहरन् ॥ ११ ॥

तस्मिन् भवाध्वनि शेतेऽस्यामिति शय्या आस्यतेऽस्मिन्निति आसनम् विहरत्यनेनेति विहारः यानादिः परात् याचन् याचमानः अप्रतिलब्धकामः यदा भवति तदा पारक्ये परकीये शय्यादौ दृष्टिर्ग्रहणे मतिर्यस्य स अवमानमवज्ञां प्राप्नोति ॥ १२॥

इत्थं परस्परं धनस्य व्यतिसङ्गेन विनिमयेन विवृद्धो वैरानुबन्धो यस्य स तादृशोऽपि व्यवहरन् नानाव्यवहारान् कुर्वन् अस्मिन् अध्वनि उरुकृच्छ्रैः नानाक्लेशैः वित्तबाधैर्धननाशैरुपसर्गैर्द्वेषादिभिश्च विपन्नो नष्टप्रायो भवति ॥ १३ ॥

हे वीर ! विपन्नान्नष्टान् पित्रादीन् विहाय जातान् पुत्रादीन् आदाय अद्यापि अत्रैव भवाध्वनि परिवर्त्तते भ्रमति योगं ज्ञानभक्तिलक्षणं साधनम् अध्वनः पारं हरिं च कश्चिदपि प्रवृत्तिनिष्ठः नोपैतीत्यन्वयः ॥ १४ ॥

हरिं त्रैवर्गिका नैव यान्तीति वदन् तच्छरणो मुमुक्षुर्यातीत्याह । मनस्विन इति । मनस्विनस्त्रिवर्गेऽर्पितचित्ताः भुवि शयीरन् प्राणांस्त्यक्तवन्तः तत्र ये च ममेति बद्धवैराः निर्जितदिग्गजेन्द्रा राजानः मृधे शयीरन् ते सर्वेऽपि तदध्वनः पारं हरिं न भजन्ति यत् यं हरिं न्यस्तदण्डः सर्वभूताभयप्रदः कृतापराधेऽपि गतवैरः हरिभक्तः याति "मद्भक्ता यान्ति मामपि" इति श्रीमुखवचनात् ॥ १५ ॥

क्वापि कदाचित् यदा प्रसज्जति विषयासक्तिं करोति तदा लतायुक्ताः भुजा द्रुमशाखाः तत्सदृशा ये भार्याभुजास्तदा-

तैर्वञ्चितो हंसकुलं समाविशन्नरोचयञ्छीलमुपैति वानरान् ।
तज्जातिरासेन सुनिर्वृतेन्द्रियः परस्परोद्वीक्षणविस्मृतावधिः ॥ १७ ॥
द्रुमेषु रंस्यन्सुतदारवत्सलो व्यवायदीनो विवशः स्वबन्धने ।
क्वचित्प्रमादाद्गिरिकन्दरे पतन्वल्लीं गृहीत्वा गजभीत आस्थितः ॥ १८ ॥
अतः कथंचित्स विमुक्त आपदः पुनश्च सार्थं प्रविशत्यरिन्दम ! ।
अध्वन्यमुष्मिन्नजया निवेशितो भ्रमन् जनोऽद्यापि न वेद कश्चन ॥ १९ ॥
रहूगण ! त्वमपि ह्यध्वनोऽस्य संन्यस्तदण्डः कृतभूतमैत्रः ।
असज्जितात्मा हरिसेवया शितं ज्ञानासिमादाय तरातिपारम् ॥ २० ॥

राजोवाच ।

अहो नृजन्माखिलजन्मशोभनं किं जन्मभिस्त्वपरैरप्यमुष्मिन् ।
न यद्धृषीकेशयशःकृतात्मनां महात्मनां वः प्रचुरः समागमः ॥ २१ ॥
न ह्यद्भुतं त्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधोक्षजेऽमला ।
मौहूर्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोऽपहतोऽविवेकः ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अयः सन् तदाश्रयाः अव्यक्तपदाश्च ये द्विजाः अण्डजाः कोकिलादयस्तत्सदृशेषु भार्यासङ्गसाध्येष्वपत्येषु स्पृहा यस्य स तथाभूतो भवति क्वचिच्च हरिचक्रतः सिंहसमूहसदृशात् कालचक्रतस्त्रसन् विभ्यत्तत्परिहाराय बकादितुल्यैः केवलमुदरम्भरैः पाषण्डिभिः सख्यं विधत्ते तद्भक्तो भवतीत्यर्थः ॥ १६ ॥

भाषाटीका ।

कहींपर मनुष्य अजगर सर्प (निद्रा) से ग्रसित होता है फिर जङ्गल में छोडदिया जाताहै तब कुछभी नहीं जानताहै कहींपर सर्पों (क्रूरमनुष्यों) से पीडित होता है तब विना पानीके कूये (मोह) में अंधेरे (दुःख) में पडता है ॥ ९ ॥

कभी क्षुद्ररस (परस्त्रीआदि) को ढूंढता है तब मधुमाखि (उन स्त्रियों के स्वामि) आदिकों से दुखित होने से खिन्न हो जाता है यदि कदाचित् उसमें परदारादि प्राप्त होजावें तो तिससे बली उसको लूटकर लेजाते हैं ॥ १० ॥

कहींपर शीत पवन वर्षा इनके निवारण करने में असमर्थ होकर रहता है कहींपर आपसमें मोल लेता बेचता है धनकी शठता से थोडे में बहुत चाहता है ॥ ११ ॥

कहीं कहीं पर तिस वनमें शय्या आसन स्थान विहार से रहित होता है फिर दूसरे से मागता है तौभी कामना नहीं पूरी होतीहै पराई वस्तु में इच्छा करनेसे अपमानको प्राप्त होताहै॥१२॥

आपसमे धनके बदलावदली मे बैरके बढने परभी विवाहादिक करता है इस मार्ग में घूमने में बडे कष्टोंसे धनकी बाधासे रोगों से विपत्तिकों प्राप्त होता हैं ॥ १३ ॥

हे वीर ! उन उन दुःखिया मरे मनुष्यों को तहींपर छोडकर नयेको या पैदा होनेवाले को लेकर वह मनुष्य समूह चला जाता है इस प्रकार चलने में भी जहां से यह चलताहै वहां को नहीं जा सकता है और मार्ग के जानेके योगकों भी नहीं प्राप्त होता है ॥ १४ ॥

बडे युद्ध के उत्साही दिग्गजों के जीतने वाले मेरी है करके पृथिवी पर वैर बांधने वाले सब युद्धमें मरगये परन्तु सर्व भूतों के अभय देनेवाले जिस स्थान को जाते हैं तहां न जासकते हैं ॥ १५ ॥

कहींपर लतासरीके स्त्रीभुजों का आश्रय करके उनके आश्रित अव्यक्त भाषण करने वाले पक्षि (पुत्रादिक) में इच्छा करता है फिर इनके पोषण में आसक्त होता है कभी कहींपर सिंह के समूह (जन्ममरणादि कालचक्रसे) डरकर बचने को बक कङ्क गीध (पाखण्डी) इनके साथ मित्रता करता है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तैर्वञ्चितस्तत्र फलाभावं ज्ञात्वा हंसानां ब्राह्मणानां कुलं पुनः प्रविशंस्तेषां शीलं प्रायश्चित्तपूर्वकं पुनरुपनयनाद्याचारमरोचयन् प्रियं पश्यन्वानरतुल्यान् भ्रष्टाचारान् शूद्रप्रायानुपैति । तज्जातिरासेन वानरजातिक्रीडया स्त्रिया मिथुनीभूय परस्परमुखोद्वीक्षणेन विस्मृतो जीवितावधिर्मरणकालो येन ॥ १७ ॥

द्रुमवत्केवलदृष्टार्थेषु गृहेषु व्यवायदीनः सुरतेच्छया कृपणः एवं स्वस्य यद्बन्धनं प्राप्तं तस्मिन्विवशः परिहर्तुमशक्तः । पाठान्तरे तु वने संसारे चरन्नित्यर्थः । गिरिकन्दरवदतिभयानके रोगादिदुःखे पतन्कन्दरस्थगजतुल्यान्मृत्योर्भीतः सन् वल्लीतुल्यं प्राचीनं कर्मावलम्ब्यावस्थितो भवति ॥ १८

श्रीधरस्वामिकृतभावार्थदीपिका।

सार्थं प्रविशति यथा पूर्वं प्रवृत्तिमार्गे रमते न वेद परमपुरुषार्थम् ॥ १९ ॥

त्वमपि अध्वनि निवेशित इत्यनुषङ्गः। अतोऽस्याध्वनः पारमतितर। असज्जितात्मा विषयेष्वनभिनिवेशितचित्तः सन् हरिसेवया शितं तीक्ष्णीकृतम् ॥ २० ॥

अखिलजन्मसु शोभनं नृजन्मैव न परं श्रेष्ठं येभ्यो देवादिजन्मभ्यस्तैरपि किम् अमुष्मिन् स्वर्गेऽपि जन्मभिः किं न किञ्चित् यद्येषु जन्मसु यत्र स्वर्गे वा वो महात्मनां समागमः प्रचुरो न भवति हृषीकेशस्य यशसा कृतः शोधित आत्मा यैस्तेषाम् ॥२१॥

सन्ततमुपासितैस्त्वत्पदाब्जरेणुभिर्हतमंहो यस्य तस्याधोक्षजे निर्मला भक्तिर्भवतीति नैवाद्भुतं यस्य तव मुहूर्तमात्रभवात् समागममात्रादपि दुस्तर्केण बद्धमूलोऽपि ममाविवेको नष्टः ॥ २२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

तैर्वञ्चितः स्वयं तान् वञ्चयंस्तैर्वञ्चितः फलाभावं ज्ञात्वा हंसकुलं पुनर्विशुद्धं ब्राह्मणकुलं समाविशन् प्रविशन् तेषां शीलं प्रायश्चित्तपूर्वकं पुनरुपनयनाद्याचाररूपमरोचयन् पूर्ववुर्वासनयाऽप्रियं पश्यन् वानरतुल्यान् भ्रष्टसदाचारान् शूद्रप्रायानुपैति तज्जातिवासेन वानरजातिक्रीडया स्त्रिया मिथुनीभूय रहोभाषणापूर्वकपरस्परमुखनिरीक्षणेन विस्मृतः अवधिर्जीवनावधिर्मरणकालो येन सः ॥ १७ ॥

द्रुमतुल्येषु केवलदृष्टार्थेषु गृहेषु रंस्यन् क्रीडिस्यन् व्यवायेन मैथुनेच्छया दीनः कृपणः सुतेषु दारेषु वत्सलः एवं स्वस्य यद्बन्धनं प्राप्तं तस्मिन् विवशः परिहर्तुमशक्तो भवति क्वचित्प्रमादान्मृत्युभयाद्गिरिकन्दरवद्भयानके रोगादिदुःखे वर्त्तमानः दूरस्थराजतुल्यमृत्योर्भीतः सन् वल्लीं वल्लीतुल्यां प्राचीनवासनामवलम्ब्यावस्थितो भवति ॥ १८ ॥

ततः आपदः दुःखात् कथंचिदतिप्रयासेन विमुक्तः पुनश्च सार्थं वर्णाश्रमनिष्ठं जनं प्रविशति यथा पूर्वं प्रवृत्तिमार्गे रमते हे अरिन्दम! अस्मिन् संसाराध्वन्यजया भगवन्मायया निवेशितो जनः भ्रमन्नद्यापि पारं न याति ॥ १९ ॥

तस्मात् हे रहूगण! त्वमपि परित्यक्तः भूतदण्डो येन कृतं भूतेषु मैत्रं येन असज्जितः विषयेष्वनभिनिवेशितः आत्मा येन तथाभूतः सन् हरिसेवया निशितः सेवाऽत्र वर्णाश्रमधर्मैर्भगवदाराधनरूपा तया निशितं ज्ञानं ज्ञानं भगवदुपासनात्मकं तदेवासिः खड्गस्तमादाय प्रकृतितरुच्छेदनायेति भावः यथा "अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा,, इति अस्याध्वनः पारं वैष्णवं पदं प्रति अतितर अध्वनः पारमिति ज्ञात्वा असेर्विशेषणं वा संसाराध्वनो निस्तरणोपायभूतज्ञानासिमादाय संसारमुक्तो भवेत्यर्थः ॥ २० ॥

एवमुपदिष्टतत्त्वत्रययाथात्म्यबन्धमोक्षहेतुः संसारासारत्वोपदेशेन उत्पन्नवैराग्यो रहूगणः स्वात्मनः कृतार्थतामाविः कुर्वन् तत्सङ्गतिं तदुक्तीश्चाभिनन्दन्नमस्करोति त्रिभिः श्लोकैः। अहो इति। अहो नृजन्म मनुष्यजन्म सुशोभनं परममुष्मिन्परलोकेऽपरैर्देवादिजन्मभिरपि किं प्रयोजनं येषु देवादिजन्मसु हृषीकेशस्य भगवतो यशसा कृतः शोधित आत्मा चित्तं येषां तेषां महात्मनां त्वादृशानां समागमः प्रचुरो न भवति भागवतसङ्गविरहितैर्देवादिजन्मभिरपि किं व्यर्थान्येव तानीत्यर्थः ॥ २१ ॥

निरन्तरं त्वादृशानामुपासितयोश्चरणाब्जयो रेणुभिर्हतमंहः पापं यस्य तस्याधोक्षजेऽमला भक्तिर्भवतीति नैवाद्भुतं कुतः यस्य तव मौहूर्तिकान्मुहूर्तमात्रभवात्समागममात्रान्मे दुस्तर्केण बद्धमूलोऽविवेकोऽपहतः विनष्टोऽभवत् ॥ २२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अजा कथङ्कारमज्ञानमुत्पादयतीति तत्राह। अन्योऽन्येनि। अन्योऽन्यवित्तव्यतिषङ्गः परस्परद्रव्यदानादानसम्बन्धस्तेन वृद्धो वैरानुबन्धः वैरपरम्परा यस्य स तथा मिथोऽधिवहन् कुटुम्बपोषणं कुर्वन् अध्वनि विहरन् क्रीडन्नुरुणा कृच्छ्रेणाप्तं यद्वित्तं तस्य बाधोपसर्गैर्नाशलक्षणोपद्रवैर्विपन्नो विपत्ति गतः ॥ ० ॥

स एवंविधस्तत्र तत्र मनुष्यादिजन्मानि तांस्तान्विपन्नान्मृतानापदङ्गतान्वा पित्रादीन् स्वदेहान् वा विहाय जातं जातमभिन वं (१) परिगृह्याद्याप्यावर्तेत इत्यन्वयः फलितमाह। न कश्चिदिति। हे वीर! संसाराध्वनः पारं युज्यतेऽनेनेति योगो हरिस्तं नोपैतीत्यन्वयः अत्र करतलामलकवदपरोक्षीकृतश्रीनारायणस्वरूपत्वाद्भरतस्येदृशं ज्ञानं युक्तं तदुक्तम्।

ऋते हैहयवैन्यादीनार्षभस्येह कः समः।

यस्योपदेशात्सिन्धवीशो ददर्श कपिलं प्रभुम् ॥

इत्यतो नात्र शङ्का कार्येति ॥ ० ॥

"सोऽध्वनः पारमाप्नोति। योगी परं स्थानमुपैति चाद्यम्" इत्यादेः कश्चिदध्वनः पारं नोपैति इति सर्वनिषेधः कथं युक्तिमानित्याशङ्क्य भक्तिहीनपुरुषविषयं मयोक्तमतोऽन्यत्तु द्विषयं (२) ॥ नायं दिग्जयवत्साध्य इति भावनाह। मनस्विन इति। मनस्विनोऽनलम्बुद्धयो राजानः निर्जितदिग्गजेन्द्रा इत्यनेनानलम्बुद्धित्वं स्पष्टयति। किमनेनेति तत्राह। ममेति। भुवि भूमिविषये ममेयं महीति दुराग्रहग्राहग्रस्तबुद्धित्वेन मिथो बद्धवैरा अत एव मृधे शयीरन् शत्रुशरशीर्णशरीराः पश्चात्त्वमेवाश्नन्ति न तु महीं मुञ्चन्तीत्यर्थः एते तत्र व्रजन्ति चेत्को व्रजतीति तत्राह। यन्न्यस्तदण्ड इति। न्यस्तदण्डो वागादिनिमित्तहिंसारहितो गतवैरः योग्यतानुसारेण निरस्तभूतवैरः पुरुषो हरेर्यत्पदमभियाति तदित्यन्वयः ॥ ० ॥

एवमुपवर्णितसंसारतरून्मूलनमसुकरमिति न मन्तव्यं यतो भगवत्सेवा निशितज्ञानासिमाददानस्य तव सुशकमित्याह। रहूगणेति। "रहत्यागे" "गणसङ्ख्याने,, इति संसारं रहयन् गणो ज्ञानं यस्य स तथा तस्य सम्बुद्धिः हे रहूगणेति "वह प्रापणे" इत्य-

(१) शरीरं।
(२) भक्तविषयं त्वन्यत्।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इमादुत्पन्नत्वाद्धिशब्दवृवदयं शब्दः संसारातिक्रान्तपारे हरिमुद्दिश्य संसारनदीं तरेत्यन्वयः लेङ्गा पतति कुंड्डणाचेति बदुपपत्तेः पूर्वोक्तैव योजना ॥ २० ॥

सर्वेष्वपि जन्मसु नृजन्मैव श्रेयःसाधनमन्यानि भोगनिमित्तानीत्यभिप्रेत्याह । अहो इति । ननु सर्वस्मात् स्वर्गे जननं शोभनं न किं तत्राह । किं जन्मभिरिति । कं गुणं निरीक्ष्याविष्यत इति । तत्राह । अमुष्मिन्निति । अमुष्मिन्स्वर्गे हृषीकेशस्य यशसा कृतः शिक्षितः आत्मान्तःकरणं येषां ते तथा तेषां महात्मनां वो युष्माकं सङ्गमो न प्रचुर इति यस्मात्तस्मात् ॥ २१ ॥

नन्वस्मत्समागमेन तव किं फलमभूदिति तत्राह । नहीति । मे अधोक्षजेऽमलाभक्तिरभूदित्येतदद्भुतं नहीत्यन्वयः हिशब्दे नानुभाविकार्थमाह । कुत एतदिति । तत्राह । मौहूर्तिकादिति । यस्य तव मौहूर्तिकान्मुहूर्तकालभवात् समागमान्मे अविवेकोऽपहृतो नष्ट इत्ययमर्थो ममानुभाविक इत्यर्थः अस्मद्दत्तधनोपजीवनेनास्मच्छिक्षायोग्या एत इति दुस्तर्कः दुष्टा युक्तिर्मूलं यस्य स तथा दुस्तर्कं मूलयति प्रतिष्ठापयतीति वा "मूलप्रतिष्ठायाम्" इति धातुः ॥ २२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तैर्वञ्चितस्तत्र फलाभावं ज्ञात्वा हंसानां ब्राह्मणानां कुलं प्रविशन् तेषां शीलं प्रायश्चित्तपूर्वकं पुनरुपनयनाद्याचारमरोचयन् स्वानभीप्सितं जानन् वानरतुल्यान् भ्रष्टाचारान् शूद्रप्रायान् लिङ्गिन उपैति तज्जातौ रासेन भोजनपानस्त्रीसङ्गादिस्वाच्छन्द्येन परस्परमुखोद्वीक्षणेन विस्मृतो जीविताવधिर्मरणकालो येन सः ॥ १७ ॥

कश्चिदन्यः सार्थो द्रुमतुल्येषु केवलदृष्टार्थेषु गृहे व्यवायदीनः सुरतेच्छुत्वात् स्त्रिया पादेन ताड्यमानः एवं स्वस्य यद्बन्धनं प्राप्तं तस्मिन् विवशः परिहर्त्तुमशक्तः क्वचन् वने इति पाठः गिरिकन्दरवदति भयानकरोगादिषु दुःखे पतन् कन्दरस्थगजतुल्यान्मृत्योर्भीतः सन् वल्लीतुल्यं प्राचीनकर्मावलम्ब्यावस्थितो भवति ॥ १८ ॥

पुनश्चेति । यथा पूर्वं प्रवृत्तिमार्गे रमते न वेद न परमेश्वरं जानाति ॥ १९ ॥

त्वमप्यध्वनि निवेशित इत्यन्वयः । अतोऽस्याध्वनः पारमतितर याहि ॥ २० ॥

कथमहमकस्मादेवं कृतार्थोऽभूवमिति साश्चर्यं सवितर्कमाह । अखिलजन्मसु मध्ये अहोऽद्भुतेऽस्मिन् मर्त्यलोके नृजन्मैव शोभनममुत्र स्वर्गे परं श्रेष्ठं येऽप्यस्तैर्देवादिजन्मभिः किं यत्रेषु वो महात्मनां समागमो न सम्भवेत् कीदृशानां हृषीकेशस्य स्वभक्तसर्वेन्द्रियाकर्षकस्य हरेर्यशोभिरेव कृता निर्मिता आत्मानो देहमनोबुद्धिप्रयत्नजीवात्मानो येषाम् ॥ २१ ॥

ननु प्रचुर इत्युक्त्या किं स्वल्पसङ्गस्यानर्थकत्वं ब्रूषे मैवमत्यौत्सुक्ययान्वित एव तथा ब्रवीमीत्याह । नहीति । ब्रह्मेन्द्रादिभिरपि दुर्लभा भगवत्यमला भक्तिर्युष्मच्चरणधूलिप्राप्तिमात्रेणैव भवतीत्येतदपि नाश्चर्यमाश्चर्यं खल्वेतदेव यन्मद्विधानां ज्ञानलवदुर्विदग्धानामतिकूटयुक्तिविप्लुतधियां चेतः परावृत्तभक्तियोगोन्मुखीकरणं तच्च मौहूर्त्तिकादेव समागमाद् यद्यभूत्तर्हि प्रचुरस्य समागमस्य माहात्म्यं को वक्तुं क्षमतामिति तत्र मया स्वौत्सुक्यमेव व्यञ्जितमिति भावः ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हंससमूहस्य सदृशं सारग्राहिभगवज्जनसमूहम् वानरान् तत्तुल्यान् दुराचारान् हरिविमुखान् ॥ १७ ॥

द्रुमेषु द्रुमवद्दृष्टार्थेषु गृहेषु रंस्यन् विहरन् स्वबन्धने निर्हर्तव्ये विवशः गिरिकन्दरे तद्वन्मरणान्तभयदे रोगादौ पतन् गिरिकन्दरसंबन्धी गजतुल्यान्मृत्योः भीतः सन् वल्लीवत् देहधारकं कर्मावलम्ब्य आस्थितो भवति ॥ १८ ॥

अतः आपदः कथञ्चिद्विमुक्तः पुनः सार्थे त्रैवर्गिकं जनं प्रविशति यथा पूर्वं प्रवृत्तिमार्गे रमते मायया संसाराध्वनि निवेशितोऽस्मीति न जानाति ॥ १९ ॥

हे रहूगण ! त्वमपि सन्यस्तदण्डः सायन् त्यक्तभूतद्रोहः कृतं प्राणिषु मैत्रं येन सः असज्जितः विषयेषु अनभिनिवेशित आत्मा मनो येन सः हरिभक्तिविरोध्यज्ञानद्रुमच्छेदनाय ज्ञानासिमादाय हरिसेवया आसितं कृष्णं प्रति अस्याध्वनः पारमतितर भवाटवीमतिलङ्घ्य कृष्णं व्रजेत्यर्थः ॥ २० ॥

अखिलजन्मसु नृजन्मैव शोभनं न परं श्रेष्ठं येऽप्यस्तैरपि अमुष्मिन् स्वर्गे देवादिजन्मभिः किं न किमपि हृषीकेशयशसा कृतः शोधितः आत्मा मनो यैस्तेषां वो युष्माकं महात्मनां यत्र स्वर्गे समागमः प्रचुरो न भवति तत्र महात्मसु श्रीनारदादिषु विचरत्स्वपि तत्रत्यस्वर्गसम्पदा विमोहितमनसो रुचिपूर्वकं प्रचुरं सङ्गं न कुर्वन्तीति भावः ॥ २१ ॥

यथेष्टमुपासितैस्त्वच्चरणाब्जरेणुभिर्हतमंहो यस्य तस्य अधोक्षजे निर्मला भक्तिर्भवतीति नहि अद्भुतम् यस्य तव मुहूर्तमात्रभवात्समागममात्रादपि दुस्तर्कः अब्रह्मात्मकविश्ववादितर्कः मूलं यस्य स मे मम अविवेकः अपहृतः ॥ २२ ॥

भाषा टीका ।

उन बकादिकों (पाखंडियों) से जब ठगा जाता है तब हंसों (ब्राह्मणों) के समूह में जाता है फिर उनकी चाल आचारादिक जब अच्छे नहीं लगते हैं तब बंदरों (शूद्रों) के पास जाता है उहां उनकी क्रीडा से आपसे मुखके स्त्री मुखके देखने से अपने मरण के काल को भूल जाता है ॥ १७ ॥

पेडों में (केवल लौकिक सुखों) में क्रीडा करता हुआ पुत्र स्त्री इन पर मोह करता है मैथुन के वास्ते दुःखित रहता है जब कभी बंधन होजावे तब छूटनेमें असमर्थ

नमो महद्भ्योऽस्तु नमः शिशुभ्यो नमो युवभ्यो नम आवटुभ्यः ।
ये ब्राह्मणा गामवधूतलिङ्गाश्चरन्ति तेभ्यः शिवमस्तु राज्ञाम् ॥ २३ ॥

श्रीशुक उवाच ।

इत्येवमुत्तरामातः ! स वै ब्रह्मर्षिसुतः सिन्धुपतय आत्मसतत्त्वं विगणयतः परानुभावः परमकारुणिकतयोपदिश्य रहूगणेन सकरुणमभिवन्दितचरण आपूर्णार्णव इव निभृतकरणोर्म्याशयो धरणिमिमां विचचार ॥ २४ ॥

सौवीरपतिरपि सुजनसमवगतपरमात्मसतत्त्व आत्मन्यविद्याऽध्यारोपितां च देहात्ममतिं विससर्ज एवं हि नृप ! भगवदाश्रिताश्रितानुभावः ॥ २५ ॥

राजोवाच ।

यो ह वा इह बहुविदा महाभागवत ! त्वयाऽभिहितः परोक्षेण वचसा जीवलोकभवाध्वा स ह्यार्यमनीषया कल्पितविषयो नाञ्जसाऽव्युत्पन्नलोकसमधिगमः अथ तदेवैतद्दुरवगमं समवेतानुकल्पेन निर्दिश्यतामिति ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां भवाटव्युपवर्णनं नाम
त्रयोदशोऽध्यायः ॥ १३ ॥

भाषाटीका।

रहता है कभी असावधानता से पर्वत की कंदरों (रोगों) में पडजाता है तब उहां के हाथी (मृत्यु) से डरकर लता (निजकर्म) को आश्रय करता है ॥ १८ ॥

हे राजन् ! इस आपत्ति से जब कभी वह छूटता है तो फिर उसी समूह (प्रवृत्तिमार्ग) में पैठता है ऐसे इस मार्गमें माया के प्रवेश करने से घूमता हुआ पुरुष आज पर्यन्त कोई अपने परम पुरुषार्थ मोक्ष को नहीं जानता है ॥ १९ ॥

हे रहूगण ! तुम भी इसी मार्ग में प्रविष्ट हो सो अब तुम सब प्राणि मात्र से मित्रता करके सब से बैर भाव को छोड कर विषयों में आसक्ति न करके श्रीहरि सेवा करने से ज्ञान रूप खड्ग को लेकर इस वन को काटकर इस भवाटवी मार्ग के पार को तरजाओ ॥ २० ॥

राजा रहूगण बोले अहो मनुष्य जन्म सब जन्मों से अच्छा है दूसरे देवादि जन्मों से क्या प्रयोजन है जिस जन्म में श्रीनारायण के यश में चित्त लगाने वाले आपसरीके महात्माजनों का बहुत समागम नहीं होता है ॥ २१ ॥

अब आपके चरण रजसे पाप नष्ट होजाने से श्रीनारायण के चरणों में मेरी भक्ति होना कुछ आश्चर्य नहीं है क्योंकि जिन आपके मुहूर्त मात्र के समागम होने से बडी युक्तियों से बधी जड वाला मेरा अविवेक नष्ट होगया है ॥ २२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ब्रह्मविदः केन रूपेण चरन्तीत्यज्ञानात्सर्वान्नमस्यति नम इति । ये बटवः क्रीडारतत्वादज्ञेयधैर्यास्तानप्यभिव्याप्य सर्वेभ्यो नम इत्यर्थः । स्वदृष्टान्तेन राज्ञां महदवज्ञां सम्भाव्याह । राज्ञां शिवमस्त्विति ॥ २३ ॥

उत्तरा माता यस्य हे उत्तरामातः ! विगणयतो न गणयतः अवमन्तर्य्यपि परमकरुणाकरत्वेन सिन्धुपतये आत्मतत्त्वमुपदिश्य । निभृताः शान्ताः करणानामूर्मयो यस्मिन् स आशयो यस्य ॥ २४ ॥

सुजनात्तस्मात्सम्यगवगतं परमात्मसतत्त्वं येन तथाभूतः संस्तदानीमेव देहे आत्ममतिं च विससर्ज हे नृप ! भगवदाश्रितो भरतस्तदाश्रितो रहूगणो यस्तस्यानुभावः सद्यो देहाहङ्कारत्यागः ॥ २५ ॥

परोक्षेण वणिक्सार्थरूपकेण आर्याणां विवेकिनां मनीषयैव दस्युस्थानीयानीन्द्रियाणि गोमायुस्थानीयान्यपत्यादीनीत्येवं कल्पितविषयः अव्युत्पन्नस्य तु लोकस्य जनस्य सम्यगधि-

श्रीधरस्वामिकृतभावार्थदीपिका ।

गमो न भवति । अथ अतस्तदेतदेव भवाध्वरूपं समवेतानुकल्पेन प्रस्तुते तत्तदनुरूपार्थोपकल्पनेन ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ज्ञानिनः केन रूपेण चरन्तीत्यज्ञानात्सर्वान्नमस्करोति । नम इति । महद्भ्यो नमः तत्रापि शिशुरूपेभ्यो नमः ये युवानस्त्वादृशास्तेभ्योऽपि नमः आबटुभ्यः वटुपर्यन्तेभ्यः वटुर्माणवकः वटुवत्स्वमाहात्म्यानाविष्करणशीलपर्यन्तेभ्यः इत्यर्थः ज्ञानिनो हि स्वमाहात्म्यानाविष्कारेण तिष्ठन्ति "तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्„ इति श्रुतेः पाण्डित्यं नाम ज्ञाननिष्ठां निर्विद्य बाल्येन तिष्ठासेदित्यर्थः ये त्वादृशा ब्राह्मणा अवधूतवेषाः गां भूमिं चरन्ति तेभ्यः सकाशाद्राज्ञां मादृशानां कृतागसां शिवमस्तु महतां निग्रहो माभूत् ॥ २३ ॥

सम्वादमुपसंहरति शुकः हे उत्तरामातः ! उत्तरा माता यस्य स उत्तरामाता परीक्षित्तस्येदं संबोधनमुत्तरामातरिति अविगणयत न विगणयत इत्यविगणयन् तस्मै अवमानं कुर्वाणाय सिन्धुसौवीरपतये रहूगणायाविगणितः परिच्छेत्तुमशक्यः परमानुभावः प्रभावो यस्य स वै ब्रह्मर्षिसुतः परमकारुणिकत्वेन हेतुना आत्मनस्तत्त्वं प्रकृतिविलक्षणब्रह्मात्मकत्वविशुद्धज्ञानानन्दत्वप्रकृतशान्तत्वादियाथात्म्यमुपदिश्य सकरुणं सस्नेहं यथा भवति तथा रहूगणेनाभिवन्दितौ चरणौ पादौ यस्य सः आसमन्तात्पूर्णः समुद्र इव निभृतानि शान्तानि करणानि इन्द्रियाणि ऊर्मयः अशनायादयः आशयोऽन्तःकरणं वासना वा यस्य सः इमां धरणिं भूमिं विचचार ॥ २४ ॥

सौवीरपतिः रहूगणोऽपि सुजनाद्ब्रह्मर्षिसुतात्सम्यगवगतं परमात्मनस्तत्त्वं याथात्म्यं येन तथाभूतः सन् तदानीमेवात्मन्यविद्ययाज्ञानेनारोपितां देहात्माभिमतिं विससर्ज जहौ हे नृप ! भगवदाश्रिता भागवतास्तानाश्रिता भगवद्दासानुदासास्तेषां प्रभाव एवंविधो हि भवतीत्यर्थः ॥ २५ ॥

एवं तत्सम्वादे उपवर्णिते वणिक्सार्थाध्वादिरूपेण प्रवृत्तानां परोक्षरूपाणामुक्तीनामाशयजिज्ञासयाह राजा परीक्षिच्छुकं प्रति य इति । हे महाभागवत ! शुक ! बहुविदा बहुज्ञेन त्वया यो जीवलोकस्य भवाध्वा परोक्षरूपेणाभिहितः कथितः स हि यस्मादार्याणां विवेकिनां मनीषया बुद्ध्या एव दस्युस्थानीन्द्रियाणि गोमायुरूपाणि कन्यपत्यादीनीत्येवं कल्पितः विषयो ज्ञानं यस्य सः कल्पितपदार्थत्वात् अतोऽज्ञसा सुखेन व्युत्पन्ना विवेकिनो लोकास्तैः समधिगम्यः नत्वव्युत्पन्नमादृशसमधिगम्यः अथ तस्मात् दुरधिगमं दुःखेनाध्यवगन्तुमशक्यमेतत्परोक्षरूपमुक्तिजातं समवेतानुकल्पेन प्रकृतोपयुक्तार्थसमवेतशब्दप्रयोगेण निर्दिश्यतां व्याख्यायतां शब्दार्थयोरपृथक्सिद्धत्वाभिप्रायेण समवेतशब्दः प्रयुक्तः । यद्वा एतत्प्रसिद्धाध्वाख्येन रूपितं संसाराध्वस्वरूपं समवेतानुकल्पेन प्रसिद्धा उत्पत्त्यध्वानि समवेताः समव-

स्थिता ये दस्युगोमायुप्रभृतयःताननुसृत्य तद्धर्मसाम्येन कल्पाः रूप्यास्तैर्युक्तत्वेन निर्दिश्यतां कथ्यतामित्यर्थः ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अतिप्रशंसयास्मानपहससि त्वमित्याशङ्क्यापराधं क्षमापयन्निव नमस्करोति । नम इति । आबटुभ्यः बटुपर्यन्तं गां भूमिं राजभ्य इति चतुर्थीमप्रयुज्य राज्ञामित्यनया षष्ठ्यात्मन एवाशिषमाकाङ्क्षत इति ॥ २३ ॥

रहूगणस्य समग्रानुग्रहं कृत्वा ब्रह्मर्षिसुतेन परं किमकारीति तत्राह । इतीति । इति सम्प्राप्य परमात्मसतत्त्व परमात्मनो निर्दोषस्वरूपमविगणितो सङ्ख्यातः परमानुभावो यस्य स तथा निभृतकरणोर्म्याशयः स्तिमितेन्द्रियाख्याभिप्रायः । यद्वा निश्चलेन्द्रियाख्यतरङ्गस्थानः स्ववशीभूतेन्द्रियतरङ्ग इत्यर्थः "स्थानेऽभिप्राय आशय" इति ॥ २४ ॥

सुजनाज्ज्ञानिजनपूजितजन्मनो ब्राह्मणात्समवगतपरमात्मसतत्त्वः सम्यक् ज्ञातपरमात्मस्वरूपः आत्मनि स्वस्मिन् परमात्मविषये वाऽविद्यया अज्ञानेन भगवद्भक्तानामपीदृशमाहात्म्यं किं पुनः श्रीनारायणस्येत्युपसंहारमुखेन नृपमभिमुखीकरोति । एवमिति २५॥

(१) माहात्म्योपलक्षणकीर्तिग्रथितान् श्लोकानित्यर्थः आर्षभस्य ऋषभपुत्रस्य भरतस्यानुवर्त्म लोकशास्त्रयोरनुकूलमार्गम् ॥ ० ॥

हृदिस्पृशं हृदयङ्गमं मलवत् विष्ठावत् ॥ ० ॥

हरिमाहात्म्यप्रकटनार्थं पुनरुक्तं करोति । यो दुस्त्यजानिति । एतत्सर्वं नैच्छदिति यत्तदुचितं तथाहि मधुद्विषो हरेः सेवायामनुरक्तधियां महतामभवो मोक्षोऽपि फल्गुः अल्प आदरणीयो न भवतीत्यर्थः सेवाया अलंबुद्धगोचरत्वात् अत्र तात्पर्यार्थस्तु "ऋते हैहयवैण्याकीन्" इत्यादिप्रमाणेन पूर्वोक्त इति ॥ ० ॥

यज्ञाय इज्याय धर्मपतये सकलैरनुष्ठीयमानपुण्यस्वामिने, विधौ कर्मणि नैपुणाय कुशलबुद्ध्युपेताय योगाय कर्मकरणोपायज्ञाय साङ्ख्यशिरसे उत्तमज्ञानस्वरूपाय, शिरसः पूर्वनिपातः

---

(१) तस्येमान् श्लोकान् गायन्ति ।

आर्षभस्येह राजर्षेर्मनसापि महात्मनः ।
नानुवर्त्मार्हति नृपो मक्षिकेव गरुत्मतः ॥ ० ॥
यो दुस्त्यजान् दारसुतान् सुहृद्राज्यं हृदिस्पृशः ।
जहौ युवैव मलवदुत्तमश्लोकलालसः ॥ ० ॥

यो दुस्त्यजान् क्षितिसुतस्वजनार्थदारान् प्रार्थ्यां श्रियं सुरवरैः सदयावलोकैः । नैच्छन्नृपस्तदुचितं महतां मधुद्विट्सेवानुरक्तमनसामभवोऽपि फल्गुः ॥ ० ॥

यज्ञायधर्मपतयेविधिनैपुणाययोगायसांख्यशिरसेप्रकृतीश्वराय । नारायणायहरयेनमइत्युदारंहास्यन्मृगत्वमपि यः समुदाजहार ॥०॥

इदं भागवतसभाजितावदातगुणकर्मणोराजर्षेर्भरतस्यानुचरितं स्वस्त्ययनमायुष्यंधन्यं यशस्यं स्वर्ग्यमापवर्ग्यंवानुश्रृणोत्याख्यास्यत्यभिनन्दति च सर्वाएवाशिषआत्मनआशास्ते नकाञ्चनपरतइति ॥ ० ॥

(२) एते श्लोका अग्रिमाध्यायान्तस्थाअपि श्रीविजयध्वजतीर्थमते अत्रैवमूलेवर्तन्ते ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कृत्वा सांख्यपदस्य ज्ञानार्थत्वेनायमर्थः सिद्ध्यति अस्येश्वरत्वं स्वत एव न तु कृत्रिमं रुद्रादेरिवेत्यतः प्रकृतीश्वराय लक्ष्मीपतय इति वा नारायणाय हरये नम इति मन्त्रद्वयसूचनाय प्रसिद्धनामोपादानं कृतमपरोक्षज्ञानिनो भरतस्य मृगत्वं घटितवानित्यतो वा योगाय समुदाजहार उत्ससर्ज ॥ ० ॥

आत्मन एव सर्वा आशिष आशास्ते प्राप्तुमिच्छति प्राप्नोति चेति । हिशब्दश्चार्थे इतिशब्दो भरताख्यानसमाप्त्यर्थ इति ॥ ० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वटवः क्रीडारतत्वादश्रद्धेयब्रह्मविद इत्यर्थः ॥ २३ ॥

उत्तरामातरिति विसर्गान्तपाठ आर्षप्रयोगो मन्तव्यः । अहेत्पुत्रार्थे समासान्तविधौ मातुर्मातजादेशविधानात् ततोऽन्यत्र च कप्प्रत्ययविधानात् ॥ २४–२५ ॥

इति राजोवाचेत्यन्वयः ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

हन्त हन्त शिबिकां वहंस्तत्र भवान् त्वं यदि नाज्ञापयिष्यस्तदा ममापराधिनः का गतिरभविष्यदिति सभयं प्रणमति । नम इति । आबटुभ्यः ये वटवः क्रीडारतत्वादश्रद्धेयमहिमानस्तानप्यभिव्याप्य स्वदृष्टान्तेन राज्ञां महदपराधं सम्भाव्याह । राज्ञां शिवमस्त्विति ॥ २३ ॥

हन्त हन्त महाभूरिभाग एव रहूगणो यस्माद्ब्रह्मतेजसि शिबिकावाहनादपराद्धोऽपि तदनुग्रहामृतवृष्ट्यभिषिक्तः कृतार्थी बभूव अहमतिमन्दभाग्यो विप्रगले सर्पार्पणापराधात्तदपराधात्तमापन्नात्सदभिशापविषदग्धो न जाने किमन्धन्तमो यास्यामीति विषीदन्तं राजानमाश्वासयति । इत्येवमिति । उत्तरा माता यस्येति भो राजन् ! त्वन्मातुर्गर्भं प्रविश्य ब्रह्मतेजसः सकाशात् भगवान् स्वयमेव त्वां ररक्ष त्वं दर्शयामास च पुनरपि साम्प्रतं ब्रह्मतेजसो रक्षितुं मामेतांश्च नारदादिमहामुनीन् प्रेर्य त्वदन्तिकमानीय एतेषामपारकृपामृतेन त्वामभिषिच्य भागवतामृतं मद्द्वारा पाययन् स एव प्रभुर्ब्रह्मतेजोऽपि व्यर्थीचकार इति रहूगणात्तस्माद्भरताच्च मत्तश्च एतेभ्यो महामुनिभ्यश्च त्वदीयं सौभाग्यमतिमहत्तमं व्यञ्जयामास तदपि किं विषीदसीति भावः विगणयतः तिरस्कुर्वतोऽपि परोऽनुभावो यस्मात् सः । सिन्धुपतये तस्मै आत्मतत्त्वमुपदिश्य सकरुणं सखेदं । निभृताः शान्ताः करणानामूर्मयो यस्मिन् स आशयो यस्य सः ॥ २४ ॥

सुजनात् श्रीमद्भरतात् आत्मनि स्वस्मिन् या अविद्या अनादित एव प्रवृत्ता तया अध्यारोपितां देहे आत्ममतिमात्मबुद्धिं भगवदाश्रितो भरतस्तदाश्रितो रहूगणः ॥ २५ ॥

आर्यस्यातिविदुष एव मनीषिकया उत्तमबुद्ध्या कल्पिता विषया दस्युस्थानीयेन्द्रियगोमायुस्थानीयापत्यादयो यस्य सः । दुरधिगमं दार्ष्टान्तिकानामनुक्तत्वात् समवेतेन समुचितेन अनुकल्पेन दार्ष्टान्तिकवाचकशब्देन ॥ २६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
त्रयोदशः पञ्चमस्य सङ्गतः सङ्गतः सताम् ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

महान्तोऽनेकैः रूपैर्विचरन्ति अतः सर्वान्नमस्यति । नम इति ॥ २३ ॥

उत्तरा माता यस्य हे उत्तरामातः ! विगणयतः अपराधिनोऽपि परमकारुणिकतया तस्मै कृतापराधायापि सिन्धुपतये आत्मसतत्त्वं परमात्मतत्त्वमुपदिश्य रहूगणेन सकरुणं यथा भवति तथा वन्दितचरणः निभृताः शान्ताः करणानामूर्मयो यस्मिन् स आशयो मनो यस्य स महीं विचचार ॥ २४ ॥

सुजनात्तस्मादेव समवगतपरमात्मसतत्त्वं येन सः अविद्यया ज्ञानेन आत्मनि अध्यारोपितां देह एवात्मेत्येवं कल्पिताम् भगवदाश्रितो मुनिस्तदाश्रितो रहूगणस्तस्यानुभावः तत्त्वग्रहणपूर्वकदेहात्ममतित्यागित्वम् ॥ २५ ॥

हे महाभागवत ! बहुविदा सर्वज्ञेन त्वया यो जीवलोकभवाध्वा परोक्षेण वणिक्सार्थकरूपेण अभिहितः कथितः स आर्याणां विवेकिनां मनीषयैव षट् दस्युस्थानीयानीन्द्रियाणि गोमायुस्थानीयान्यपत्यादीनीत्येवं कल्पितविषयः अव्युत्पन्नस्य लोकस्य जनस्य सम्यगधिगमः सुष्ठुधिगम्यो न भवति अथ अतः तदेतदेव दुरवगमं दुःखेनाप्यवगन्तुमशक्यं संसाराध्वस्वरूपं समवेतानुकल्पेन समवेते वर्णनीये इन्द्रियादौ दस्युत्वादिकल्पेन निर्दिश्यताम् ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
त्रयोदशाध्यायार्थप्रकाशः ॥ १३ ॥

भाषाटीका ।

वृद्धों को नमस्कार है बालकों को नमस्कार है युवाओं को नमस्कार है ब्रह्मचारियों से लेकर सबको नमस्कार है जो ब्राह्मण अवधूत बेषसे पृथिवी में घूमते हैं उनको नमस्कार है जिससे कि सब राजों का कल्याण होवै ॥ २३ ॥

श्रीशुकदेवजी बोले हे उत्तरा के पुत्र परीक्षित् ! अपना अपमान करने वाले उस सिंधुपति रहूगण राजाको भी ब्रह्मर्षि पुत्र भरतजीने परमदयालु होने से इस प्रकार के आत्मतत्व का उपदेश किया फिर रहूगण ने बडी दीनता से उनके चरण में वन्दना की तब बडे प्रभाव वाले समुद्र सरीके ज्ञानसे पूर्ण सब इन्द्रियों की लहर जिसकी शांत हो गई हैं ऐसे अन्तःकरण वाले वह भरतजी इस पृथिवी में फिर विचरने लगे ॥ २४ ॥

भाषा टीका ।

सौवीर देशके राजा रहूगणभी सत्पुरुषसे परमतत्त्व के प्राप्तहोनेसे अज्ञानसे आत्मा में आरोपित जो देहात्मबुद्धि तिसको छोडते भये हे राजन्! परीक्षित्! इस प्रकार का भगवद्भक्त के आश्रय करनेवाले राजाका प्रभाव होगया ॥ २५ ॥

राजा परीक्षित् जी बोले हे महाभागवत! इहांपर वडे ज्ञानी आपने वडे बुद्धिमानों के विषय कल्पना के योग्य जीवों का भवाटवीमार्ग में छिपे हुये वचन से कथन किया है तिसको अनायास से अल्पज्ञ लोग नहीं जान सकते हैं तिस हेतु-से इस कठिन वचन को समझने लायक व्याख्यान से आप कहिये ॥ २६ ॥

इति श्रीभागवत पञ्चमस्कन्ध त्रयोदश अध्यायका भाषानुवाद लक्ष्मणाचार्यकृत समाप्त ॥ १३ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे त्रयोदशोऽध्यायः समाप्तः ॥ १३ ॥

॥ चतुर्दशोऽध्यायः ॥

—:०:—

॥ सहोवाच ॥

य एष देहात्ममानिनां सत्त्वादिगुणविशेषविकल्पितकुशलाकुशलसमवहारविनिर्मितविविधदेहावलिभिर्वियोगसंयोगाद्यनादिसंसारानुभवस्य द्वारभूतेन षडिन्द्रियवर्गेण तस्मिन्दुर्गाध्ववदसुगमेऽध्वन्यापतित ईश्वरस्य भगवतो विष्णोर्वशवर्तिन्या मायया जीवलोकोऽयं यथा वणिक्सार्थोऽर्थपरः स्वदेहनिष्पादितकर्मानुभवः श्मशानवदशिवतमायां संसाराटव्यां गतो नाद्यापि विफलबहुप्रतियोगेहस्तत्तापोपशमनीं हरिगुरुचरणारविन्दमधुकरानुपदवीमवरुन्धे यस्यामुहवा एते षडिन्द्रियनामानः कर्मणा दस्यव एव ते ॥ १ ॥

तद्यथा पुरुषस्य धनं यत्किञ्चिद्धर्मौपयिकं बहुकृच्छ्राधिगतं साक्षात्परमपुरुषाराधनलक्षणो योऽसौ धर्मस्तं तु साम्पराय उदाहरन्ति तद्धर्म्यं धनं दर्शनस्पर्शनश्रवणास्वादनावघ्राणसङ्कल्पव्यवसायगृहग्राम्योपभोगेन कुनाथस्याजितात्मनो यथा सार्थस्य तथा जितात्मनो विलुम्पन्ति ॥ २ ॥

अथ च यत्र कौटुम्बिका दारापत्यादयो नाम्ना कर्मणा वृकसृगाला एवानिच्छतोऽपि कदर्यस्य कुटुम्बिन उरणकवत्संरक्ष्यमाणं मिषतोऽपि हरन्ति ॥ ३ ॥

यथा ह्यनुवत्सरं कृष्यमाणमप्यदग्धबीजं क्षेत्रं पुनरेवावपनकाले गुल्मतृणवीरुद्भिर्गह्वरमिव भवत्येवमेव गृहाश्रमः कर्मक्षेत्रं यस्मिन्न हि कर्माण्युत्सीदन्ति यदयं कामकरण्ड एष आवसथः ॥ ४ ॥

तत्र गतो दंशमशकसमापसदैर्मनुजैः शलभशकुन्ततस्करमूषकादिभिरुपरुद्ध्यमानबहिःप्राणः क्वचित्परिवर्तमानोऽस्मिन्नध्वन्यविद्याकामकर्मभिरुपरक्तमनसाऽनुपपन्नार्थं नरलोकं गन्धर्वनगरमुपपन्नमिति मिथ्यादृष्टिरनुपश्यति ॥ ५ ॥

तत्र च क्वचिदातपोदकनिभान्विषयानुपधावति पानभोजनव्यवायादिव्यसनलोलुपः ॥ ६ ॥

क्वचिच्चाशेषदोषनिषदनं पुरीषविशेषं तद्वर्णगुणनिर्मितमतिः सुवर्णमुपादित्सत्यग्निकामकातर इवोल्मुकपिशाचम् ॥ ७ ॥

अथ कदाचिन्निवासपानीयद्रविणाद्यनेकात्मोपजीवनाभिनिवेश एतस्यां संसाराटव्यामितस्ततः परिधावति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्दशे भवारण्यरूपकव्याकृतिः कृता ।
प्रस्तुते तस्य गोमायुमशकाद्यर्थकल्पनम् ॥ १ ॥

यः परीक्षिता पृष्टः स श्रीशुक उवाच हेति सूतोक्तिः । दुरत्ययेऽध्वन्यजया निवेशित इति यदुक्तं तदेव निवेशनप्रकारकथनेन प्रपञ्चयति । य एष प्रसिद्धो जीवलोकोऽयं विष्णोर्मायया सुगमेऽध्वन्यापतितो भवाटवीं गतः सन् हरिरूपस्य गुरोश्चरणारविन्दे ये मधुकराः सेवकास्तेषामनुपदवीं तैरनुष्ठितं भक्तिमार्गमद्यापि नावरुन्धे न संप्राप्नोतीत्यन्वयः । मायायाः स्वकार्यद्वारेण संसारमार्गे पातहेतुत्वमाह । देहात्ममानिनां सत्त्वादिगुणविशेषैर्विकल्पितानि विभक्तानि यानि कुशलाकुशलविमिश्रकर्माणि तैर्विनिर्मिताभिर्विविधदेहावलिभिर्वियोगसंयोगादिर्योऽनादिः संसारस्तदनुभवस्य द्वारभूतेन षडिन्द्रियवर्गेण तस्मिन् संसाररूपे दुर्गमार्गवदसुगमेऽध्वन्यापतितो यथा वणिजां सार्थः समूहोऽर्थार्जनपरः स्वदेहनिष्पादितानां कर्मणां फलद्वारेणानुभवो यस्य विफलाश्च बहुप्रतियोगा बहुविघ्नाश्च ईहाश्चेष्टा

श्रीधरस्वामिकृतभावार्थदीपिका ।

यस्य सः । तस्यां संसाराटव्यां ये तापास्तेषामुपशमनीं नाशनीम् । यस्यामित्यादि व्याचष्टे । यस्यां भवाटव्याम् ॥ १ ॥

दस्युतुल्यं तेषां कर्म दर्शयति । तद्यथेति । धर्मौपयिकं धर्मकारणम् । तमेव स्वाभिप्रेतं धर्ममाह । साक्षादिति । तं तु साम्पराये परलोकार्थमुदाहरन्ति तद्धर्म्यं धर्माहं धनं दर्शनाद्याः पञ्चज्ञानेन्द्रियाणां वृत्तयः सङ्कल्पव्यवसायावन्तःकरणस्य एतैर्गृहे यो ग्राम्य उपभोगस्तेन कुनाथस्य कुबुद्धेरजितात्मनो विलुम्पन्ति यथा चोराः कुपालकस्यानवहितात्मनः सार्थस्य धनं हरन्ति तद्वत् ॥ २ ॥

गोमायवो यत्रेत्येतद्व्याचष्टे । अथ चेत्यर्थान्तरोपन्यासे । कर्मणा ते तु वृकाः सृगालाश्च कदर्यस्यातिलुब्धस्य ॥ ३ ॥

प्रभूतवीरुत्तृणगुल्मगह्वरइत्येतद्व्याचष्टे । यथाहीति । न दग्धानि बीजानि यस्मिन् यद्यस्माद्योऽयमावसथ आश्रम एव कामानां करण्डः यथा कर्पूरभाजने कर्पूरक्षयेऽपि परिमलो न क्षीयते एवमत्र वासनानामक्षीणत्वान्न कर्माण्युत्सीदन्तीत्यर्थः ॥ ४ ॥

दंशमशकतुल्यैरपसदैर्नीचैः शलभादिभिश्चोपरुध्यमानः पीड्यमानो बहिःप्राणो वित्तं यस्य तथाविधोऽध्यस्मिन्नध्वनि परिभ्रमन्नविद्यादिभिरुपरक्तेन मनसा गन्धर्वपुरतुल्यमघटमानं नरलोकं सत्यतया मिथ्यादृष्टिरनुपश्यति ॥ ५ ॥

प्रपश्यतीति प्रशब्दसूचितमर्थान्तरं दर्शयति । तत्र च गन्धर्वपुरे क्वचिदातपोदकं मृगतृष्णाजलं तत्तुल्यान्विषयानुपधावतीति ॥ ६ ॥

क्वचित्कश्चिच्चाशुरयोल्मुकग्रहमित्येतद्व्याचष्टे । क्वचिच्चाशेषायां दोषायां निषदनं स्थानं पुरीषविशेषमग्नेर्विष्ठा तस्य पुरीषस्येव लोहितो वर्णो यस्य रजोगुणस्य तेन निर्मिता तद्धिया मतिर्यस्य स सुवर्णमुपादातुमिच्छति अग्निकामेन कातरः परवश उल्मुकसदृशं पिशाचमिव शीतातुरो ह्यरण्येऽग्निवज्ज्वलयमानं ततस्ततो धावन्तमुल्मुकपिशाचमग्निबुद्ध्याऽनुधावति नतु तं प्राप्नोति कथञ्चित्प्राप्तश्चेत्तर्हि तेन भक्षितः सन् म्रियते एवं सुवर्णमनुधावन्नपीत्यर्थः ॥ ७ ॥

निवासतोयद्रविणेत्येतद्व्याचष्टे । अथेति । निवासादिष्वनेकेष्वात्मन उपजीव्येष्वभिनिवेशो यस्य ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमापृष्टः शुकः समवेतानुकल्पेन निर्दिशंस्तावद्दुरत्यय इति श्लोकं व्याचष्टे । य इति । य एष जीवलोकः ईश्वरस्य भगवतो विष्णोर्वशवर्तिन्याऽधीनया माययाऽतिदुर्गाध्वनि असुगमे संसाराध्वनि कर्ममार्गे आपतितो मायायाः स्वकार्यद्वारेण संसारमार्गपातहेतुत्वमाह । देहात्माभिमानिनां सत्त्वरजस्तमोभिर्गुणैर्विशेषेण कल्पितानि विभक्तानि सात्त्विकराजसतामसभेदभिन्नानि यानि कुशलानि सुखसाधनानि सात्त्विकानि अकुशलानि दुःखसाधनानि राजसानि मिश्राणि प्रमादालस्यादिसाधनानि रजस्तमोमूलानि कर्माणि तैर्विनिर्मिताभिरापादिताभिर्विविधदेहावलिभिः ।

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधोगच्छन्ति तामसाः ।
आत्यन्तिकेन सत्त्वेन दिवं देवाः प्रपेदिरे ।

भर्गं रजः स्वभावेन इत्याद्युक्तरीत्या नियतदेशवृत्तिदेवमनुष्यासुरादिदेहपङ्क्तिभिर्यौ वियोगसंयोगौ देहवियोगतत्संयोगौ आदिशब्देन बाल्ययौवनस्थविरादिभावसङ्ग्रहः एतद्रूपोऽनादिः संसारस्तदनुभवस्य द्वारभूतेन षडिन्द्रियवर्गेण स एतस्मिन् दुर्गाध्वन्यसुगमे संसाराध्वनि कर्ममार्गे आपतितः यथा वणिजां सार्थः समूहोऽर्थार्जनपरः तथा स्वदेहनिष्पादितानां पूर्वोक्तानां कर्मणां फलद्वारेणानुभवो यस्य विफलाश्च बहुलप्रतियोगा बहुविघ्नोपहता ईहाश्चेष्टा यस्य सः श्मशानवदमङ्गलरूपायां संसाराटव्यां गतोऽद्यापि तस्यां संसाराटव्यां ये तापा आध्यात्मिकादयस्तेषां शमनीं हरिरेव गुरुस्तस्य हरिगुरोश्चरणारविन्दे ये मधुकरा भ्रमरतुल्या भक्तास्तेषामनुपदवीं तैरनुष्ठितं भक्तिमार्गं नावरुन्धे न प्राप्नोति ॥ १ ॥

यस्यामित्यादिश्लोकं व्याचष्टे । यस्यामुहवेति । यस्यां संसाराटव्यां ये षडिन्द्रियनामान एते कर्मणा दस्यव एव दस्युव्यापारेण दस्युत्वेन पूर्वं निरूपिता इत्यर्थः इन्द्रियनामानः इत्यनेन केवलं नामभेद एव कर्मणा ते दस्यव एवेत्युक्तं दस्यूनामिन्द्रियाणां च धनापहारित्वरूपं कर्म तुल्यमिति दृष्टान्तदार्ष्टान्तिकभावेन दर्शयति । यथेति । यथास्य पुरुषस्यानवहितात्मनः सार्थस्य वणिजादेः धनं बहुकृच्छ्रेणातिदुःखेनार्जितं धर्मौपयिकं धर्मोपयोगार्हं धनस्य धर्म एवोपयोगः सफलो नतु काम इत्यभिप्रायेण धर्मौपयिकमित्युक्तं तथाचोक्तं प्रथमे ।

धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते ।
नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः ॥

इत्येवंविधं यत्किञ्चिद्धनं यथा दस्यवश्चोरा अपहरन्त्येवमस्य पुरुषस्य यो भगवदाराधनरूपो धर्मस्तं साम्परायिकं परलोकहितं धनमित्युदाहरन्ति तद्धर्म्यं धर्माद्वर्णाश्रमादिधर्मादनपेतं धर्म्यं वर्णाश्रमादिधर्मयुक्तमित्यर्थः । धनं भगवदाराधनात्मकं धनं इन्द्रियाण्यपि दर्शनादिभिः पञ्चभिर्ज्ञानेन्द्रियवृत्तिभिः सङ्कल्पव्यवसायाभ्यामन्तःकरणवृत्तिभ्यां चेत्येतैर्यो गृहेषु ग्राम्यः सांसारिक उपभोगस्तेन कुनाथस्य कुबुद्धेरत एवाजितात्मनः अजितेन्द्रियस्यास्य पुरुषस्य सम्बन्धि विलुम्पन्ति अपहरन्ति ॥२॥

गोमायवो यत्रेति एतद्व्याचष्टे । अथ चेत्यर्थान्तरोपन्यासे नाम्ना दारापत्यादयः कर्मणा तु वृकाः शृगालाश्च एते इत्यर्थः वृकशृगालसाधर्म्यमेवाह । अनिच्छत इति । कुटुम्बिनः गृहाश्रमिणः कदर्यस्यातिलुब्धस्यानिच्छतोऽपि आत्मापहारमिति शेषः बलादिति भावः मिषतः पश्यतः सतः संरक्ष्यमाणमुरणमिव हरन्ति स्वशेषत्वेन कुर्वन्तस्तत्स्वरूपं भगवच्छेषत्वैकरूपमपहरन्तीत्यर्थः ॥ ३ ॥

प्रभूतवीरुत्तृणगुल्मगह्वर इत्येतद्व्याख्यातुं तावद्गृहाश्रमस्य प्रसिद्धक्षेत्रतुल्यतामाह । यथाहीति । अनुवत्सरं प्रतिवत्सरं कृष्यमाणं वृक्षच्छेदपूर्वकं कर्षणेन संस्कृतमपि क्षेत्रमदग्धबीजं न दग्धानि बीजानि द्रुममूलानि यस्मिन् तथाभूतं सत्पुनरावपनकाले बीजावापकाले यथा गुल्मादिभिर्गह्वरमेव अवलयं गृहाश्रमरूपं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कर्मक्षेत्रमपि प्रसिद्धक्षेत्रतुल्यं कुतः हि यस्मात् यस्मिन् गृहाश्रमे कर्माणि नोत्सीदन्ति न मूलतो नश्यन्ति कुतो यद्धि यस्माद्यमावसथः गृहं कामकरण्डः कामानां करण्डः यथा कर्पूरभाजने कर्पूरक्षयेऽपि परिमलो न हीयते एवमत्र कर्मनाशेऽपि तद्वासनानामक्षीणत्वात्कामानां पेटिकेत्यर्थः तत्रैवंभूते कर्मक्षेत्रे गृहाश्रमे पतितः दंशमशकतुल्यैरपसदैर्नीचैरुपद्रुत इति शेषः शलभादिभिरुपरुध्यमानः पीड्यमानः बहिःप्राणः धनधान्यादिरूपो यस्य शलभादिभिरपहृतसस्यधान्यधनवान् भवतीत्यर्थः प्राणवत्प्रियत्वाद्बाह्यत्वाच्च धनस्य बहिःप्राण इत्युक्तम् ॥ ४ ॥

कचिच्च गन्धर्वपुरमित्युत्तरार्द्धं व्याचष्टे । कचिदस्मिन्संसाराध्वनि परिवर्त्तमानः भ्राम्यन्नविद्यादिभिः यदुपरक्तं तेन मनसा तत्राविद्याऽहंममाभिमानकामविषयाभिलाषः कर्म पुण्यापुण्यकर्मवासनाः नरलोकं स्वशरीरं पुत्रादिशरीरं गन्धर्वनगरवदनुपपन्नार्थमनुपपन्नमित्यर्थः नित्यत्वरूपं वस्तु यस्य तं मिथ्यादृष्टिरनित्ये नित्यत्वरूपमिथ्याभ्रमयुक्तः उपपन्नार्थं नित्यं पश्यतीत्यर्थः ॥ ५ ॥

प्रपश्यतीति प्रशब्दसूचितमर्थान्तरमाह । तत्रेति । तत्र तत्र गन्धर्वपुरे कचिदातपोदकं मृगतृष्णाजलं तत्तुल्यान्विषयान्पानादिषु लोलुपतयासक्तः सन्नुपधावत्यन्वेषयतीत्यर्थः ॥ ६ ॥

चतुर्थपादं व्याचष्टे । कचिच्चेति । कचिच्चाशेषाणां दोषाणां निषदनं स्थानं पुरीषविशेषमग्नेर्विष्ठांतस्य पुरीषस्येव लोहितो वर्णो यस्य रजोगुणस्य तेन निर्मिता पुरीषविषया मतिर्यस्य सः सुवर्णमुपादातुमिच्छति सुवर्णस्याग्नेः पुरीषत्वं च वितलवर्णनगद्ये चित्रभानुर्मातरिश्वना समीध्यमान ओजसा पिबति तन्निष्ठ्यूतं हाटकाख्यं सुवर्णमिति वक्ष्यति तत्र दृष्टान्तः अग्निकामेन कातरः परवशः उल्मुकसदृशं पिशाचमिवेति शीतातुरो ह्यरण्येऽग्निमिव जाज्वल्यमानं ततस्ततो धावन्तमुल्मुकपिशाचमग्निबुद्ध्यानुधावति न तु तंप्राप्नोति कथञ्चित् प्राप्तश्चेत्तेन भर्जितः सन् म्रियते एवं सुवर्णमनुधावन्नपीत्यर्थः ॥ ७ ॥

निवासतोयेति व्याचष्टे । अथेति । निवासादिषु अनेकेष्वात्मन उपजीव्येष्वभिनिवेशो यस्य तथाभूतस्ततोऽस्यां संसाराटव्यां परिधावति ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

(१)अत्र पूर्वाध्यायोक्तमेव प्रश्नपूर्वकं कथयति । यो ह वा इत्यादिना । बहुपूर्णतायामिति हरेः पूर्णतां वेत्तीति बहुवित्तेन सार्वज्ञ्यं चेदमेव पारोक्ष्येण परोक्षविषयेण वाचो व्यङ्ग्यभङ्ग्या जीवलोकस्य जीवराशेः भवाध्वा संसारमार्गः आर्यमनीषया पण्डितबुद्ध्या कल्पितविषयः निर्णीतार्थः अव्युत्पन्नेन शब्दव्यङ्ग्यार्थपरिज्ञानशून्येन लोकेन जनेन मुख्यतः समधिगतो न भवतीति नाञ्जसा व्युत्पन्नलोकसमधिगतः "परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विष" इति श्रुत्यर्थं हवा इत्यनेनाह । एतदेवाह । अथेति । अथ तस्मात्समवेतानुकूल्येन उक्तशब्दार्थवाच्यवाचकरूपेण समवेतं यथा ज्ञातुं योग्यं तथानुकूल्येन पुनः कथनेनेति वा ॥ ० ॥

एवं परीक्षिता पृष्टः श्रीशुकमुनिः किमुवाचेति शौनकप्रश्नं हृदि कृत्वा उवाच (१) सूत इति । सूतः किमुवाचेति तत्राह । सहोवाचेति । स श्रीशुकः राजप्रश्नपरिहाराय यदुवाच अहमपि त्वत्प्रश्नपरिहारार्थं वच्मीत्येतमर्थं हेत्यनेन सूचयति । दुरत्ययेऽध्वनीत्यस्याभिप्रायं कथयति । य इति । य एष प्रसिद्धो जीवोऽसुगमे दुर्गमेऽध्वन्यापतित इत्यन्वयः अजयेत्यस्य विवरणं माययेति कस्येयमित्याशङ्कानिवृत्तये ईश्वरस्येति आच्छाद्य विक्षिपति स्फुरदात्मतत्त्वमित्यद्वैतमतनिरासायोक्तं वशवर्त्तिन्येति माया कथङ्कारं पातयतीत्यत्रोपपत्तिं दर्शयति । देहेति । देहात्ममानिनां देह एवात्मेति मन्यमानानां सम्बन्धिभिः सत्त्वादिगुणविशेषैर्विकल्पितानि विभक्तानि यानि कुशलाकुशलमिश्राणि कर्माणि तैर्निमित्ताभिर्विविधाभिर्देहावलिभिरुपलक्षितस्तासां संयोगादिलक्षणोऽनादिःसंसारो यस्तदनुभवस्य द्वारभूतेन श्रोत्रादिषडिन्द्रियवर्गेण द्वारेण माययाऽध्वन्यापतित इत्यर्थः समवहारो मिश्रं स्वदेहनिष्पादितकर्मेत्यनेन रजस्तमः सत्त्वेति व्याख्यातं न शर्म विन्दतीत्यस्यार्थमाह । नाद्यापीति । हरिगुरुचरणारविन्दयोर्मधुकर इव निरन्तरसेवकाः ये तेषामनुपदवीमनुगमनयोग्यमार्गं सेवालक्षणां नाद्याप्यवरुन्ध इत्यन्वयः विफलाश्च बहवश्च योगा उद्योगा ये तन्निमित्ततः सहस्रशो हृत्तापास्तेषामुपशमनीं नाशकरीम् । यस्यामिमे षडित्यस्यार्थं दर्शयति । यस्यामुहवेति ॥ १ ॥

कुनाथस्य तद्धर्म्यं धर्मसाधनं विलुम्पन्तीत्यन्वयः धर्मौपयिकं धर्मसाधनयोग्यं साम्परायिकं मोक्षोपयोगि । एतदेवाह । यत्परमेति कथं विलुम्पन्ति दर्शनेति सङ्कल्पो मनोरथः दर्शनादीनां समवायेन नित्यसम्बधेन गृहे ग्राम्योपभोगो यस्तेन ॥ २ ॥

गोमायवो यत्रेत्यस्यार्थमाह । अथेति ॥ ३ ॥

प्रभूतवीरुत्तृणेत्यस्यार्थमाह । यथा ह्यनुवत्सरमिति । आवपनकाले बीजप्रक्षेपसमये य एष आवसथोऽपक्कानां कामानां करण्डः करिदन्तनिर्मितपात्रविशेषः तत्रावसथे कचिच्च गन्धर्वपुरमित्यस्यार्थमाह । कचित्परिवर्त्तमान इति ॥ ४—६ ॥

कचित्कचिच्चासुहरोल्मुकग्रहमित्यस्यार्थमाह । कचिच्चेति । अशेषदोषाणां निषदनं स्थानं (२) पुरुषविशेषं देहलक्षणं पुरुषाकारविशिष्टस्य तस्य देहस्य वर्णगुणः कान्तिगुणस्तेन उल्मुकपिशाचमुपादित्सति सुवर्णमिव पुरुषविशेषमुल्मुकपिशाचमुपादित्सतीति वा अग्निकामवत्कातरः अशेषदोषाणां पात्रीभूतं पुरुषविशेषाकारमुल्मुकपिशाचमग्निवज्जाज्वल्यमानं दृष्टान्तिकमुपागम्य सुवर्णबुद्ध्योपादातुमिच्छति शीतार्त्तोऽग्निमिव द्रष्टुं दुःसहं शीतं स्यात्तदैव मुक्तिरिति भावः पुरुषविशेषं स्त्रियाख्यं प्राप्य भोगार्थं सुवर्णं स्वीकरोति अग्निसेवाकाम उल्मुकपिशाचमिवेति वा ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तद्यथेति । तद्दस्युत्वं गद्यत्रयेण दृश्यत इत्यर्थः बहुकृच्छ्राधिगतं यत्किञ्चित् पुरुषधनं वर्त्तते तस्माद्धाद्धर्मौपयिकं भवति कोऽसौ धर्मस्तत्राह । साक्षात् परमेवेति ॥ १—६ ॥

पुरीषविशेषं सुवर्णमुपादित्सतीत्यनेनाग्निकामेति दृष्टान्तेन च सुवर्णान्तरं याथार्थ्यं दर्शयति । तच्च श्रीभगवद्भूषणादिमयं ज्ञेयं साक्षाद्धर्मौपयिकमित्याद्युक्तत्वात् ॥ ७—८ ॥

---

(१) अत्रश्रीविजयध्वजतीर्थमते पूर्वाध्यायान्तस्थो यो हवा इति श्लोकःस्थितस्तस्येयं टीका ।

(१) एतन्मतेऽत्र सूतउवाचेतिवर्तते तदनुसारेणाह ।

(२) पुरुषविशेषमित्येतन्मतेमूले ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

दस्युक्रोष्टुप्रभृतिभिरुक्तैः सह चतुर्दश ।
ईहेन्द्रियकुटुम्बाद्यास्तद्दार्ष्टान्ता निरूपिताः ॥

स श्रीशुको ह स्पष्टमुवाच स एष प्रसिद्धो जीवलोकः संसाराटव्यां गतः सन्नद्यापि हरिरूपस्य गुरोश्चरणारविन्दे ये मधुकरा गुरुभजनासक्ता इत्यर्थः । तेषामनुकूलां पदवीं नावरुन्धे न प्राप्नोतीत्यन्वयः । तेन श्रीगुरुचरणाश्रयं विना संसाराटव्यां भ्रमणमेवेति भावः । कीदृशः देहात्ममानिनामध्वन्यापतितः दुर्गाध्ववत् प्रसिद्धदुर्गमार्गे इव सत्त्वादिगुणविशेषैर्विकल्पितानि विभक्तानि यानि कुशलाकुशलविमिश्रकर्माणि तैर्विनिर्मिताभिर्विविधदेहावलिभिर्वियोगसंयोगतदुत्थसुखदुःखरूपस्यानादेः संसारस्य योऽनुभवस्तस्य । ननु जीवसंसारस्य मायाकृतत्वान्मायादेवीमेव जीवः प्रपद्यतां सैव प्रसन्ना तं बन्धान्मोचयिष्यति किं हरिगुरुचरणप्रपत्त्या तत्राह । विष्णोर्वशवर्त्तिन्या माययेति । संसारमोचने न तस्याः स्वातन्त्र्यमिति भावः । यदुक्तम् ।

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।

इति गीतायामत्र श्लोके एवकारेण समुच्चयपक्षोऽपि निरस्तीकृतः विफलाश्च बहुविप्रतियोगा बहुविघ्नाश्च ईहाः चेष्टा यस्य सः ॥ १ ॥

यस्यामिमे इति व्याचष्टे । यस्यामुहेति । यथा पुरुषस्य बहुकृच्छ्राधिगतं धर्मोपयोगि धनं दस्यवो विलुम्पन्ति तत्तथा इन्द्रियनामानः षडेते कर्मणा स्वस्वव्यापारेण दर्शनादिना अजितात्मनो जनस्य धनं विलुम्पन्तीत्यन्वयः । तत्पदस्य वैयर्थ्याभावाय व्यवहितान्वयः षोढव्यः । धनमेव किमित्यपेक्षायामाह । साध्वादिति । साम्पराये परलोकार्थे तद्धर्मे भगवत्सेवार्हमित्यर्थः । सङ्कल्पो मनसः समवसायो व्यवसायः स च बुद्धेर्व्यापारः । यथा कुनाथस्य कुनायकस्य अजितात्मनः अवशीकृतात्मीयलोकस्य वणिक्सार्थस्य चौरा हरन्ति तथा ॥ २ ॥

गोमायवो यत्रेत्येतद्व्याचष्टे । अथचेति । अपहरतश्चेत्यर्थः । संरक्ष्यमाणा अन्नवस्त्रादिभिस्त्वया वयमवश्यं पाल्या एव भवामेति न्यायमिषेण अपहरन्तीत्यस्य कर्मपदं पूर्वोक्तं स्वार्थिकमन्नगुडघृतादिसम्पुटं ज्ञेयम् । अत्र दस्यूनां गोमायूनाञ्च दुर्वारत्वस्याधिक्यन्यूनत्वाभ्यां भेदो ज्ञेयः ॥ ३ ॥

प्रभूतवीरुत्तृणगुल्मगह्वर इत्येतद्व्याचष्टे । यथेति । एष आवसथः आश्रमो यद्यस्मात् कामानां करण्ड इति । यथा हिङ्गुक्षयेऽपि गन्धो न क्षीयते एवमत्र वासनानामक्षीणत्वात् न कर्मायुरुत्सीदन्तीत्यर्थः ॥ ४ ॥

कठोरदंशैरित्येतद्व्याचष्टे । अत्रेति । अपसदैर्नीचैरुपरुध्यमानः पीड्यमानो बहिःप्राणो वित्तं यस्य सः । कचिच्च गन्धर्वपुरं प्रपश्यतीत्येतद्व्याचष्टे । कचिदिति । परिवर्त्तमानः परावृत्य परामृशन् उपरक्तं यन्मनस्तेन न उपपन्नोऽर्थो वित्तं यतस्तं नरलोकं वञ्चकनृपादिकं पश्यति ततश्च तदुपासनया वाञ्छितवित्तादिकमुपपन्नमिति गन्धर्वनगरमिव तमनुपश्यति । कचिच्च गन्धर्वपुरं प्रपश्यतीत्येतदुपलक्षितमर्थान्तरं दर्शयति । आतपोदकं मृगतृष्णाजलं तत्तुल्यान् विषयाननुपधावति ॥ ५—६ ॥

कचिच्चाशुरयोल्मुकग्रहमित्येतद्व्याचष्टे । कचिच्चेति । कचित् पुरीषविशेषमग्नेर्विष्ठां तस्य पुरीषस्येव लोहितो वर्णो यस्य रजोगुणस्य तेन निर्मिता तद्विषया मतिर्यस्य सः । सुवर्णमिति परकीयद्रव्यमात्रस्योपलक्षणमादातुमिच्छति नरके पतितुमिच्छति इति भावः । शीतादित्राणार्थमरण्ये भ्रमन्नग्निकामेन कातरो यथा उल्मुकतुल्यं पिशाचमग्निबुद्ध्या धावति मर्तुमिति भावः ॥ ७ ॥

निवासतोयद्रविणात्मबुद्धिरित्येतद्व्याचष्टे । अथेति ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

समवेतानुकल्पेन निर्दिश्यतामित्यनेन प्रार्थितो यः स चतुर्दशेनाध्यायेन उवाचेति सूक्तोक्तिः । दुरत्ययेऽध्वन्यजया निवेशित इति यदुक्तं तद्व्याचष्टे । य एषः प्रसिद्धो वणिक्सार्थोऽर्थपरः अर्थेन हेतुभूतेन अध्वनि दुर्गाध्वन्यापतितो भवति यथा तथा अयमिति जीवलोकः भगवतो वशवर्तिन्या मायया हेतुभूतया श्मशानवदशिवतमायां संसाराटव्यां गतः प्रविष्टः तस्यां संसाराटव्यामाध्यात्मिकाद्यस्तापास्तेषामुपशमनीं हरिरेव गुरुस्तस्य चरणारविन्दे ये मधुकराः सेवकास्तेषां पदवीं हरिभक्तिद्वारा हरिप्राप्तिरूपामद्यापि नावरुन्धे न प्राप्नोति कथम्भूतः जीवलोकः देहात्ममानिनां सत्त्वादिगुणैर्विशेषेण विकल्पितानि विभक्तानि यानि कुशलाकुशलमिश्राणि कर्माणि तैः ।

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ।

इति श्रीमुखोक्तरीत्या विनिर्मिताभिर्विविधदेवमनुष्यादिदेहावलिभिर्वियोगसंयोगादिर्योऽनादिसंसारस्तदनुभवस्य द्वारभूतेन षडिन्द्रियवर्गेण दुर्गाध्ववदसुगमे संसाराटव्यन्तर्गते त्रिवर्गमार्गे पतितः पुनः कथम्भूतः स्वदेहनिष्पादितानां कर्मणां फलद्वारेणानुभवो यस्य सः पुनः कथम्भूतः विफलाश्च बहुप्रतियोगाः बहुविघ्नाश्चेष्टा यस्य सः ॥ १ ॥

यस्यामित्यादि व्याचष्टे । ते लोके प्रसिद्धाः दस्यवः पुरुषस्य अजितात्मनः असंयतचित्तस्य कुनाथस्य कुबुद्धेः बहुकृच्छ्राधिगतं धर्मौपयिकं धर्मकारणं यत्किञ्चिद्धनं भवेत्तद्यथा विलुम्पति तथा अजितात्मनः साक्षात्परमपुरुषाराधनलक्षणो यः साक्षाद्धर्मः तं तु साम्पराये मुक्तौ साध्ये साधनतया उदाहरन्ति तद्धर्मे स्वाश्रमधर्मादनपेतं धनं तस्यां भवाटव्यामेते षडिन्द्रियनामानः कर्मणा दस्यव एव दर्शनादिभिर्यो गृहे ग्राम्योपभोगस्तेन विलुम्पन्ति ॥ २ ॥

गोमायवो यत्र हरन्ति सार्थकमित्येतद्व्याचष्टे । नाम्ना दारादयः कर्मणा तु वृकादयः कदर्यस्य अतिलुब्धस्य ॥ ३ ॥

प्रभूतवीरुत्तृणगुल्मगह्वरे कठोरदंशैर्मशकैरुपद्रुतः कचित्तु गन्धर्वपुरं प्रपश्यतीत्येतद्व्याचष्टे । अनुवत्सरं प्रतिवत्सरं न दग्धानि गुल्मतृणादिबीजानि यस्मिन् यद्यस्मात् योयमावसथः आश्रमः एष कामानां करण्डो भाजनविशेषः यथा कर्पूरभाजने कर्पूरक्षयेऽपि परिमलो न क्षीयते एवमत्र वासनानामक्षीणत्वात् कर्मायुरुत्सीदन्तीति भावः ॥ ४ ॥

तत्र गृहाश्रमे गतः पतितः दंशमशकसमाश्च ते अपसदा अनाचाराश्च तैर्मनुजैः शलभादिभिश्च कचिदुपरुध्यमानः पीड्यमानो बहिःप्राणः धनधान्यादिरूपो यस्य स तथाभूतोऽपि

क्वचिच्च वात्यौपम्यया प्रमदयाऽऽरोहमारोपितस्तत्कालरजसा रजनीभूता इवासाधुमर्यादो रजस्वलाक्षोऽपि दिग्देवता अतिरजस्वलमतिर्न विजानाति ॥ ९ ॥

क्वचित्सकृदवगतविषयवैतथ्यः स्वयं पराभिध्यानेन विभ्रंशितस्मृतिस्तयैव मरीचितोयप्रायांस्तानेवाभिधावति ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अस्मिन्नध्वनि परिभ्रमन् अविद्यया देहगेहादिषु अहंममाभिमानेन विषयाभिलाषेण कर्मणा कर्मविवित्सया च उपरक्तेन मनसा गन्धर्वनगरं तत्तुल्यं नरलोकं नरभोग्यं देहगेहादिकमनुपपन्नार्थं न उपपन्नो न भोक्तृनित्यतामुपगतोऽर्थः स्वरूपं यस्य तमनित्यमित्यर्थः तथाप्युपपन्नं भोक्तृनित्यतामुपगतमित्येवं मिथ्यादृष्टिः अनित्ये नित्यत्वदृष्टिः अनुपश्यति अपश्यतीति अप्रशब्देन सूचितमर्थान्तरमाह । तत्र च गन्धर्वनगरे कचिदातपोदकनिभान् मृगतृष्णाजलसदृशान् विषयान् पानादिलालुपः सन् उपधावति ॥ ५ ॥ ६ ॥

कचित्कचिच्चाशुरयोल्मुकग्रहमित्येतद्व्याचष्टे । पुरीषविशेषमग्निमलं तद्वर्णेन सुवर्णवर्णेन लोहितवर्णेन रजोगुणेन निर्मिता सुवर्णमादातुं प्रवर्त्तिता मतिर्यस्य सः सुवर्णमुपादातुमिच्छति उल्मुकसदृशं पिशाचमग्निकामेन कातरः परवश इव उल्मुकपिशाचः उपधावतापि न लभ्यः कथञ्चिल्लब्धस्तु नाशहेतुर्भवति तद्वत्सुवर्णमिति भावः ॥ ७ ॥

निवासतोयद्रविणेत्येतद्व्याचष्टे । निवासादिष्वनेकेषु आत्मनः स्वस्योपजीवनेष्वभिनिवेशो यस्य सः एतस्यां भवाटव्यां परिधावति परिभ्रमति ॥ ८ ॥

भाषाटीका ।

यह श्रीशुकदेवजी बोले पहिले अध्याय का खुलासा अर्थ यह है कि जैसे यह जीवलोक भगवान् ईश्वर विष्णु की वशवर्तिनी मायासे मोहित सुखार्थी अपने देहसे अर्जन किये जो कर्म तिनका अनुभव करनेवाला है उसकी बहुत विघ्नोंवाली चेष्टा हैं देहात्ममानी पुरुषों के मोह करनेवाले जो सत्वादि गुण विशेष तिनसे जो भले बुरे मिश्रकर्म तिनसे प्राप्त जो देवादिक योनि तिनका जो संयोगवियोगरूप अनादि संसार तिसके अनुभव का द्वारभूत जो छै इन्द्रियों का समूह तिससे बडे दुर्गम संसारमार्गमें पडा हुआ वह जीव आजपर्यन्त भी उसके तापों की नाश करनेवाला जो श्रीहरि गुरुचरणारविन्दके मधुकर (भक्तों) का मार्ग तिसको नहीं ग्रहण करता है जिसमें ये छै इन्द्रिय नामा वाले हैं सो कर्म से चोर हैं ॥ १ ॥

तिसी प्रकार दुर्बुद्धिवाले पुरुष का साक्षाद्धर्म का उपयोगी जो धन बहुत कष्टसे प्राप्त हुआ साक्षात् परमपुरुष भगवान् का आराधनरूप जो धर्म है तिसीको परलोक में कथन कहते हैं उस धर्म के उपयोगी जो धन निसको दर्शन स्पर्श श्रवण आस्वादन आघ्राण सङ्कल्प निश्चय इनों से जो गृहोंका ग्राम्यधर्म तिसके द्वारा खोटे नायकवाले सार्थ सरीके अजितेन्द्रिय पुरुष के धनको इन्द्रिय चोर सरीके लूटते हैं ॥ २ ॥

औरभी जिस संसार मार्ग में कुटुम्ब के नाम से जो स्त्री पुत्रादिक हैं कर्मसे वे केवल भेडिया श्यालशरीके मालिक के न देने परभी अति लोभी कुटुम्बी के रक्षा करने पर भी उसके देखते ही भेडको जैसे भेडिया लेजाता है तैसे धनको हरलेते हैं ॥ ३ ॥

जैसे प्रतिवर्ष खोदने परभी बीज जिस में नहीं दग्ध होते हैं वह खेत फिरभी वोते समय में गुल्म तृण वीरुधों से गहनसरीका होजाता है तैसेही यह गृहाश्रम कर्मों का खेत है जिस में कि कर्म कभी नष्ट नहीं होते हैं क्योंकि यह घर कामनाओंकी पूरी एक पिटारी है ॥ ४ ॥

तिस गृह में डांस मच्छर के तुल्य नीच पुरुषों से टीडी चिडिया चोर मूषा इत्यादि को से बाहिर के प्राण सरीका धन उसका नष्ट होजाता है कभी इसी मार्गमें घूमता हुआ अविद्याकामना वाले कर्मों से युक्त जो मन तिससे गन्धर्वनगरसरीके अस्थिर इस नरलोक को अपनी अज्ञान दृष्टि होने से सत्यसरीका देखता है ॥ ५ ॥

तहांपर कभी खाने पीते मैथुनादि विषयोंमें लोभी होकर मृगतृष्णा सरीके झूंठे विषयों पर दौडता है ॥ ६ ॥

कर्मों से पूर्ण दोषों का स्थान अग्नीका विष्ठा जो सुवर्ण तिसको रजोगुणी बुद्धिसे जैसे अग्नि को चाहनेवाला अगियावेताल को पकडता है तैसेही पराये सुवर्ण को ग्रहण करने चाहता है ॥ ७ ॥

तदनन्तर कभी निवास स्थान जल धन आदिक अनेक उपयोगी पदार्थों में अभिनिवेश करता हुआ इस संसार वनमें इधर उधर दौडता है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कचिच्च वात्योत्थितेत्येतद्व्याचष्टे । कचिच्चेति । आरोहमङ्कम् तस्मिन्काले यद्रजो रागस्तेन स्वदृष्ट्यावरकेण रजन्यां रात्रौ भूता इव । ह्रस्वपाठे रजनीभूतस्तमोमय इवातीव रजसाच्छन्नमतिरत एव रजोव्याप्तचक्षुरिव दिक्षु स्थिता मर्यादातिक्रमसाक्षिभूता देवता न जानाति ॥ ९ ॥

अनुपादेयमेवोपादेयतया गृह्णातीति प्रक्रमसाजात्यादुत्तरश्लोकचतुर्थपादं प्रथमं व्याचष्टे । कचित्सकृदिति । कचिदातपोदकनिभानित्यत्र मिथ्याविषयेषु लम्पटत्वमुक्तं निवासतोयेत्यत्र तदर्जनप्रयास उक्तः अत्र तु बाधितेष्वपि पुनः प्रवृत्तिरुच्यते

क्वचिदुलूकझिल्लीस्वनवदतिपरुषरभसाटोपं प्रत्यक्षमपरोक्षं वा रिपुराजकुलनिर्भर्त्सितेनातिव्यथितकर्णमूलहृदयः ॥ ११ ॥

स यदा दुग्धपूर्वसुकृतस्तदा कारस्करकाकतुण्डाद्यपुण्यद्रुमलताविषोदपानवदुभयार्थशून्यद्रविणान् जीवन्मृतान् स्वयं जीवन्म्रियमाण उपधावति ॥ १२ ॥

एकदाऽसत्प्रसङ्गान्निकृतमतिर्व्युदकस्रोतःस्खलनवदुभयतोऽपि दुःखदं पाखण्डमभियाति ॥ १३ ॥

यदा तु परबाधयाऽन्ध आत्मने नोपनमति तदा हि पितृपुत्रबर्हिष्मतः पितृपुत्रान्वा स खलु भक्षयति ॥ १४ ॥

क्वचिदासाद्य दाववत्प्रियार्थविधुरमसुखोदर्कं शोकाग्निना दह्यमानो भृशं निर्वेदमुपगच्छति ॥१५॥

क्वचित्कालविषमितराजकुलरक्षसाऽपहृतप्रियतमधनासुः प्रमृतक इव विगतजीवलक्षण आस्ते॥१६॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इत्यपौनरुक्त्यम् स्वयमेव सकृदवगतं विषयाणां वैतथ्यं विफलत्वं येन पराभिध्यानेन देहाभिनिवेशेन विभ्रंशिता स्मृतिर्यस्य तयैव विभ्रंशितया स्मृत्या स्मृतिभ्रंशादेवेत्यर्थः ॥ १० ॥

अदृश्यझिल्लीस्वनेत्येतद्व्याचष्टे । क्वचिदुलूकेति । अतिपरुषो रभस उत्साहस्तेनाटोपः । संभ्रमो यथा भवत्येवं रिपूणां राजकुलस्य च निर्भर्त्सितेनातिव्यथितं कर्णमूलं हृदयं च यस्य ॥ ११ ॥

अपुण्यवृक्षानित्येतद्व्याचष्टे । स यदेति । दुग्धमुपभुक्तं पूर्वसुकृतं येन तदा कारस्करो विषतिन्दुस्तत्प्रमुखा येऽपुण्यद्रुमास्तथाविधा लताश्च विषोदपानाश्च विषकूपास्तत्तुल्यान् दृष्टादृष्टप्रयोजनशून्यधनान् ॥ १२ ॥

क्वचिद्वितोयाः सरित इत्येतद्व्याचष्टे । एकदा क्वचिदसतां प्रसङ्गान्निकृता वञ्चिता मतिर्यस्य सः निरुदकनदीगर्तपाते यथा सद्यः शिरः स्फुटति पश्चादपि तद्वेदनानुवर्तते एवमिह परत्र च दुःखदम् ॥ १३ ॥

परस्परं चालषते निरन्ध इत्येतद्व्याचष्टे । यदा त्विति । अन्धोऽन्नं नोपनमति नोपतिष्ठति । पितृपुत्राणां बर्हिः कुशस्तद्वतः पितुः पुत्राणां वा कुशादितृणमात्रमपि येषु पश्यति तान् भक्षयति बाधत इत्यर्थः पितृपुत्रबर्हिष्ठानिति तु पाठः सुगमः ॥ १४ ॥

आसाद्य दावमित्येतद्व्याचष्टे । क्वचिदासाद्येति ॥ १५ ॥

क च यक्षैर्हृतासुरित्येतद्व्याचष्टे । क्वचित्कालेन विषमितं प्रतिकूलतां नीतं यद्राजकुलं तदेव रक्षस्तेनापहृताः प्रियतमधनरूपा असवो यस्य विगतानि जीवलक्षणानि हर्षादीनि यस्य शूरैर्हृतस्व इत्यप्यनेनैव व्याख्यातम् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

क्वचिच्च वात्येत्यादि व्याचष्टे । क्वचिच्चेति । वात्योपम्यया चक्रवाततुल्यया प्रमदया स्त्रिया यथा वात्या रजःप्रक्षेपेणान्धीकरोत्येवं रजोगुणोत्कर्षकत्वेनान्धतामापादयन्ती तत्तुल्या प्रमदेति भावः आरोहमङ्कमारोपितः आरूढस्तस्मिन् काले यद्रजो रागस्तेन कथंभूतेन रजनीभूतेन रात्रिवदप्रकाशकेनाज्ञातवर्णेनेत्यर्थः रजनीभूतइवेत्यपि पाठः तत्र तमोमय इवेत्यर्थः दीर्घपाठे रजन्यां रात्रौ भूता इवेत्यर्थः अतिरजस्वलमतिरतीव रजसाच्छन्नमतिरत एवासाधुमर्यादः अतो रजोव्याप्तचक्षुरिव दिक्षु स्थिता मर्यादातिक्रमसाक्षीभूता देवता न जानात्यनुपादेयमेवोपादेयतया गृह्णाति॥९॥

प्रक्रमसजात्यादुत्तरश्लोकचतुर्थपादं व्याचष्टे । क्वचिदिति । कदाचित्सकृदवगतं विषयेषु शब्दादिषु वैतथ्यं वैयर्थ्यं पुरुषार्थशून्यत्वं येन तथा भूतोऽपि पराभिध्यानेन देहचिन्तया विभ्रंशितस्मृतिर्विभ्रंशिता स्मृतिरात्मविषया यस्य तयैव विभ्रंशितस्मृत्या मरीचितोयप्रायान् मरीचितोयतुल्यान् स्वयमपुरुषार्थरूपत्वेऽपि तत्त्वेनावभासमानान् तानेव विषयानभिधावति ॥ १० ॥

पूर्वार्धं व्याचष्टे । क्वचिदुलूकेति। उलूकझिल्ल्योः घूककीटविशेषयोर्ध्वनिवदतिपरुषो रभस उत्साहस्तेनाटोपः सम्भ्रमः यथा भवत्येवं रिपूणां राजकुलस्य च निर्भर्त्सितेनात्यन्तं व्यथितं कर्णमूलं हृदयं च यस्य तथाभूत आस्ते तत्र प्रत्यक्षाप्रियवाक्यमुलूकस्थानीयं राजकुलं परोक्षाप्रियवाक्यकृत् झिल्लीस्थानीयं रिपुकुलं विवक्षितम् ॥ ११ ॥

स इति । यथा दुग्धपूर्वसुकृतः अपूर्णपूर्वसुकृतहीन इत्यर्थः तथा कारस्करो विषतिन्दुः तत्प्रमुखा येऽपुण्यद्रुमाः तथाविधा लताश्च विषोदपाना विषकूपाश्च तत्तुल्यानुभयार्थशून्यद्रविणान् दृष्टादृष्टप्रयोजनशून्यानि द्रविणानि धनानि येषां तान् येषां द्रविणं कीर्त्यर्थं दृष्टार्थं च न भवति ते उभयार्थशून्यद्रविणा अत एव जीवन्मृतान्स्वयंजीवन्नपि म्रियमाणः मृतप्रायः जीवन्मृतः उपधावति ॥ १२ ॥

क्वचिद्वितोयाः सरित इत्येतद्व्याचष्टे । एकदेति । कदाचिदसतां वेददेवब्राह्मणविदूषकाणां प्रसङ्गात्सङ्गान्निकृता वञ्चिता मतिर्यस्य सः व्युदकस्रोतःस्खलनवन्निरुदकनदीपतनवत् यथा निर्जलनदीगर्ते पतितस्य न पिपासाशामकजललाभः प्रत्युत शिरःस्फुटनं च सद्यो भवति पश्चादपि तद्वेदनानुवर्तते एवमुभयत इह परलोके च दुःखदं पाषण्डं पाषण्डाचारमभियाति प्राप्नोति स्वीकरोति । यद्वा पाषण्डकुलं प्राप्नोति तत्र जायत इत्यर्थः ॥ १३ ॥

परस्परं चालषते निरन्न इत्येतद्व्याचष्टे । यदेति । यदा तु परपीडया

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अन्ध अन्नमात्मने स्वस्मै नोपनमति नोपतिष्ठते परपीडयाऽप्यन्नं न लभत इत्यर्थः तथा पितृपुत्रबर्हिष्ठान् पितृपुत्रादीनां बर्हिः कुशः तद्वतः पितृपुत्राणां कुशादितृणमात्रमपि येषु पश्यति तान् स भक्षयति बाधत इत्यर्थः ॥ १४ ॥

आसाद्य दावमित्येतद्व्याचष्टे । कचिदिति । कदाचिद्दावाग्नितुल्यं प्रियार्थविधुरं भोग्यपदार्थरहितमसुखोदर्कं दुःखपरम्परायुक्तं गृहं प्राप्य शोकाग्निना इष्टालाभादिष्टनिवृत्तिजदुःखेन भृशं दह्यमानः पीड्यमानो निर्वेदं मोहं मया सुकृतं न कृतमतो दुर्भगो मन्दभाग्योऽहमित्येवमुपगच्छति ॥ १५ ॥

कच यच्चैर्हृतासुरित्येतद्व्याचष्टे । कचित्कालेन विषमितं प्रतिकूलतां प्राप्तं यद्राजकुलं तदेव रक्षस्तेनापहृताः प्रियतमधनरूपा असवः प्राणा यस्य विगतानि जीवलक्षणानि हर्षादीनि यस्य अत एव मृतक इवास्तेऽवतिष्ठति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

निवासतोयादित्यस्यार्थमाह । अथेति । गृहाद्यनेकस्वरूपेष्वेकमन्तरेणापि जीवनं नास्तीति दुराग्रहवान् कचिच्च वात्योत्थितेत्यस्यार्थमाह । कचिच्च वात्येति । आरोहमङ्कं तत्कालरजसा विषयस्नेहासमयरागेण ॥ ९ ॥

अदृश्य (१) झिल्लीत्यस्यार्थमाह । कचिदुलूकेति । आटोपः सम्भ्रमः ॥ १० ॥

अपुण्यवृक्षानित्यस्यार्थमाह । स यदेति ॥ ११ ॥

मरीचितोयान्यभिधावतीत्यस्यार्थमाह । कचित्सकृदिति ॥१२॥

कचिद्वितोयाः सरित इत्येतद्विवृणोति । एकदेति । उभयत इह परत्रापि व्युदस्रोतस्स्खलनवत् मृगतृष्णिकाजलप्रवाहवत् ॥१३॥

परस्परं स्वादयत इत्येतत्प्रतिवक्ति । यदा त्विति । भक्षयति पीडयति ॥ १४ ॥

आसाद्य दावमित्यस्यार्थमाह । कचिद्दासाद्येति ॥ १५ ॥

कचित्कालेत्यादिना कच यक्षैरिति विवृतं परैर्हृतस्व इत्येतद्रूपेनेन व्याख्यातम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

प्रथम पाठे रजन्यां ये भूतास्तत्तुल्यक्रिय इत्यर्थः इवेन समासात् ॥ ९—२९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कचिच्च वात्योत्थितेत्येतद्व्याचष्टे । वात्यया सहौपम्यमुपमा यस्यास्तया आरोहमङ्कं तस्मिन् काले यद्रजः रजस्तुल्यः कामवेगस्तेन स्वदृष्ट्याच्छादकेन स्पष्टा अपि दिग्देवता वह्निसूर्याद्या रजनीभूता अदृश्या इव रजस्वलाक्षोऽन्ध इव रजस्वलमतिः कामान्धीकृतमतिः पश्यन्तीरपि ताः न जानाति रजनीभूत इति पाठे तमोमयः ॥ ९ ॥

अत्र कचित् क्रमेण कचित् क्रमोल्लङ्घनेन कचित् पौनरुक्त्येनापि व्याख्यानं नावगणनीयं न हि महाटव्याः सर्व एव पन्था ऋजूकर्त्तुं शक्य इति अत्र स्वप्रौढिमपहाय यथास्थितमेव व्याख्यायते । मरीचितोयान्यभिधावति कचिदित्येतद्व्याचष्टे । कचिदिति । सकृदेकवारमवगतं विषयाणां वैतथ्यं नैष्फल्यं येन स तदपि तानेव विषयान् मरीचितोयप्रायान् पुनः पुनरभिधावति पराभिध्यानेन देहाभिनिवेशेन विभ्रंशिता स्मृतिर्यस्य सः । तयैव विभ्रंशितया स्मृत्या स्मृतिभ्रंशादेवेत्यर्थः ॥ १० ॥

अदृश्यझिल्लीस्वनेत्येतद्व्याचष्टे । कचिदुलूकेति । अतिपरुषो रभस उत्साहस्तेनाटोपः सम्भ्रमो यत्र तद्यथा स्यात्तथा निर्भर्त्सनेन ॥ ११ ॥

अपुण्यवृक्षानित्येतद्व्याचष्टे । स यदेति । दुग्धमुपभुक्तं पूर्वसुकृतं येन सः कारस्करो विषतिन्दुकः तत्प्रमुखा येऽपुण्यद्रुमास्तथाविधा लताश्च विषकूपास्तत्तुल्यान् दृष्टादृष्टप्रयोजनशून्यधनान् ॥१२॥

कचिद्वितोयाः सरित इत्येतद्व्याचष्टे । एकदा असतां प्रसङ्गाङ्किकृता वञ्चिता मतिर्यस्य सः निरुदकनदीगर्तपाते यथा सद्यः शिरः स्फुटति पश्चादपि वेदनानुवर्त्तते एवमिह च परत्र च दुःखदम् ॥ १३ ॥

परस्परञ्चालपते निरन्न इत्येतद्व्याचष्टे । परबाधया परपीडनप्रद्यापि जीविकया अन्धः अन्नं नोपनमति नोपतिष्ठति पितुः पुत्राणां वा कुशादितृणमात्रमपि येषु पश्यति तान् भक्षयति राजद्वारात् पदातिकानानीय पीडयति ॥ १४ ॥

आसाद्य दावमित्येतद्व्याचष्टे । कचिद्दासाद्येति ॥ १५ ॥

कच यच्चैर्हृतासुरित्येतद्व्याचष्टे । कचित्कालेति । विगतानि जीवनलक्षणानि हर्षादीनि यस्य सः शोकमूर्च्छितो वा ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कचिच्च वात्योत्थितेत्येतद्व्याचष्टे ॥ तत्कालरजसा तात्कालिकेन रागेण रजनीभूतस्तमोमय इव अतिरजस्वलमतिः अतीवरजोव्याप्तबुद्धिः असाधुमर्यादः दिग्देवताः दिक्षु स्थिता मर्यादातिक्रमसाक्षिदेवता न जानाति यथा वात्योत्थितरजसाच्छन्ननेत्रो दिशो न जानाति तद्वत् ॥ ९ ॥

अदृश्यझिल्लीत्युत्तरश्लोकस्य मरीचितोयान्यभिधावति कचिदिति चतुर्थपादं स्त्रीविषयप्रसङ्गात्प्रथमं व्याचष्टे । कचित्स्वयमेव सकृदवगतं विषयेषु स्त्र्यादिमधुरशब्दमृदुस्पर्शादिषु वैतथ्यं वैपरीत्यममङ्गलत्वं येन तथाविधोऽपि पराभिध्यानेन स्त्र्यादिध्यानेन विभ्रंशिता स्मृतिर्यस्य सः दुःखोदर्केषु अमङ्गलेषु विषयेषु पुनः सुखबुद्धिस्तथैव विभ्रंशितया स्मृत्या स्मृतिभ्रंशादेव मरीचितोयतुल्यान् तानेव विषयानभिधावति ॥ १० ॥

अदृश्यझिल्लीस्वनेत्येतद्व्याचष्टे । उलूकझिल्लयोः स्वनवदतिपरुषो रभसः उत्साहस्तेनाटोपः सङ्ग्रामो यथा स्यात्तथा रिपूणां राजकुलस्य च निर्भर्त्सितेनातिव्यथितं कर्णमूलं हृदयं च यस्य सः तथाभूतो भवति ॥ ११ ॥

अपुण्यवृक्षान् श्रयत इत्येतद्व्याचष्टे । स यदेति । स भवाटव्यां प्रविष्टः यदा दुग्धमुपभुक्तं पूर्वसुकृतं येन सः अवशिष्टेन दुष्कृतेन प्रवर्त्तितः कारस्करो विषतिन्दुस्तदादयो ये ऽपुण्यद्रुमाः तादृश्यो लताश्च विषोदपानाः विषकूपाश्च तत्सदृशान् दृष्टादृष्टप्रयोजनवर्जितवित्तानुपधावति ॥ १२ ॥

कचिद्वितोयाः सरितोऽभियातीतेतद्व्याचष्टे । एकदेति । एकदा कचित् असतां वेदबाह्यानां पाखण्डिनां सङ्गाङ्किकृता वञ्चिता मतिर्यस्य सः व्युदकस्रोतःस्खलनवत् यथा निर्जलनदीगर्ते न जललाभः प्रत्युत सद्यः शिरः स्फुटति पश्चादपि तद्वेदनानुव-

(१) अत्र श्रीधरस्वामिपाठापेक्षयापरश्लोकद्वयक्रमवैपरीत्यं विद्यते

कदाचिन्मनोरथोपगतपितृपितामहाद्यसत्सदिति स्वप्ननिर्वृतिलक्षणमनुभवति ॥ १७ ॥

क्वचिद्गृहाश्रमकर्मचोदनाऽतिभरगिरिमारुरुक्षमाणो लोकव्यसनकर्षितमनाः कण्टकशर्कराक्षेत्रं प्रविशन्निव सीदति ॥ १८ ॥

क्वचिच्च दुःसहेन कायाभ्यन्तरवह्निना गृहीतसारः स्वकुटुम्बाय क्रुध्यति ॥ १९ ॥

स एव पुनर्निद्राजगरगृहीतोऽन्धे तमसि मग्नः शून्यारण्य इव शेते नान्यत्किञ्चन वेद शव इवापविद्धः ॥ २० ॥

कदाचिद्भग्नमानदंष्ट्रो दुर्जनदन्दशूकैरलब्धनिद्राक्षणो व्यथितहृदयेनानुक्षीयमाणविज्ञानोऽन्धकूपेऽन्धवत्पतति ॥ २१ ॥

कर्हि स्म चित्काममधुलवान्विचिन्वन्यदा परदारपरद्रव्याण्यवरुन्धानो राज्ञा स्वामिभिर्वा निहतः पतत्यपारे निरये ॥ २२ ॥

अथ च तस्मादुभयथाऽपि हि कर्मास्मिन्नात्मनः संसारावपनमुदाहरन्ति ॥ २३ ॥

मुक्तस्ततो यदि बन्धाद्देवदत्त उपाच्छिनत्ति तस्मादपि विष्णुमित्र इत्यनवस्थितिः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तेन तथेह परलोके च दुःखदं पाखण्डं पाखण्डिनां मार्गमभियाति ॥ १३ ॥

परस्परं चालयते निरन्ध इत्येतद्व्याचष्टे। यदा तु परबाधयापि अन्धः अन्नं नोपनमति नोपतिष्ठति तदा पितृपुत्रसम्बन्धिबर्हिः कुशास्तन्मात्रयुक्तानपि पितॄन् पुत्रांश्च भक्षयति पीडयतीत्यर्थः ॥ १४ ॥

आसाद्य दावमित्येतद्व्याचष्टे। प्रियार्थविधुरमनुकूलार्थरहितम् ॥ १५ ॥

क्वच यक्षैर्हृतासुरित्येतद्व्याचष्टे। कश्चिदिति। कालेन विषमितं प्रतिकूलतां नीतं यद्राजकुलं तदेव रक्षस्तेनापहृता प्रियतमाः धनासवः धनात्मकाः असवो यस्य सः विगतानि विनष्टानि जीवलक्षणानि हर्षादीनि यस्य सः मृतक इवास्ते अनेनैव यक्षैर्हृतस्व इत्यपि व्याख्यातम् ॥ १६ ॥

भाषाटीका।

कहींपर पवनचक्रसरी की स्त्री जब उसको अपने अङ्कपर रखलेती है तब तिस समय के कामवेग से अन्धासा होकर साधु मर्यादा को छोडकर अत्यन्त बुद्धि के नष्ट होजाने से सब दिशों की कर्म साक्षी देवतों को नहीं देखता है ॥ ६ ॥

कहींपर एक एक वखत विषयों की अनित्यता जानने पर भी फिर आपही शरीर अभिमान से मतिके भ्रष्ट होने से उसी भ्रष्टमति से उन्हीं मृगतृष्णा सरीके विषयोंपर दौडता है ॥ १० ॥

कहींपर झिंगारी घुग्घू सरीके अति कठिन प्रत्यक्ष से अथवा अप्रत्यक्ष से शब्दों को सुनाकर अति सम्भ्रम को प्राप्त करादेने वाले शत्रु या राजपुरुषों के भर्त्सनों युक्त शब्दों को सुनकर कानों की तथा हृदय की पीडा को भोगता है ॥ ११ ॥

जब उसके पूर्व सुकृत सब नष्ट होजाते हैं तब कारस्कर काकतुण्ड नाम के कोई खोटे वृक्ष खोटी लता विषैले जलके कुआ जैसे खोटे हैं तैसे इस लोक परलोक दोनों लोक के प्रयोजन से रहित धनी जो कि जीतेही में मरे सरीके हैं उनके पास आप भी जीते ही मरा हुआ सरीका जाता है ॥ १२ ॥

कोई एक वखत असत्पुरुषों के संग से मोहित मति होने से बिना जल की नदी में गिरे सरीका होकर दोनों लोक में दुःखदायक पाखण्ड मत में चला जाता है ॥ १३ ॥

जब दूसरे की या काल की बाधा से अपने को अन्न नहीं मिलता है तब पिता अथवा पिता के पुत्रों की वस्तु की इच्छा से उनको पीडा देता है ॥ १४ ॥

कभी जंगल की अग्नि सरी के घरको प्राप्त होकर जिसमें कि प्रियवस्तु नहीं हैं पीछे भी सुख नहीं होता है तिसको देखकर शोकाग्निसे जलकर बडे दुःख को प्राप्त होताहै ॥ १५ ॥

कभी काल के विपरीत होने से कुपित जो राजकुल सोई राक्षस सरीके होते हैं वे जब इसके अतिप्रिय धनरूप प्राणको हर लेते हैं तब जीवित चेष्टा से रहित मृतक सरीका होरहता है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

क्वचिच्च गन्धर्वपुरं प्रविष्ट इत्येतद्व्याचष्टे। कदाचिन्मनोरथप्राप्त पित्राद्यसदेव सदिति मत्वा पूर्वं गन्धर्वपुरवद्घटमानदर्शनं मुक्तमिदानीं तन्निमित्तसुखासक्तिरुच्यत इति भेदः ॥ १७ ॥

चलन् क्वचिदित्येतद्व्याचष्टे। क्वचिद्गृहाश्रमे याः कर्मचोदनास्तासामतिभरोऽतिविस्तारः स एव गिरिस्तमारुरुक्षमाणः गन्तुमिच्छन् ॥ १८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

पदेपदेऽभ्यन्तरवह्निनेति व्याचष्टे। कचिच्च दुःसहेनेति ॥ १९ ॥
कचिन्निगीर्णं इत्येतद्व्याचष्टे। स एवेति ॥ २० ॥

दष्टः स्म शेते इति व्याचष्टे। कदाचिदिति। मानो गर्व एव दंष्ट्रा परपीडाकरत्वात् भग्ना मानदंष्ट्रा यस्य अत एव न लब्धो निद्रायाः क्षणोऽपि येन ॥ २१ ॥

कर्हिस्मचित्क्षुद्ररसानित्येतद्व्याचष्टे। कर्हिस्मचित्काममधुलवानिति। यदा निहतो भवति तदा सद्य एव निरये पतति ॥ २२ ॥

प्रसङ्गात्प्रवृत्तस्य कर्मणः संसारहेतुत्वं स्फुटयति। अथ चेति। यस्मादेवं तस्मात् अथ अनन्तरमेव उभयथा इह च परत्र च अस्मिन्प्रवृत्तिमार्गे संसारस्यावपनं जन्मक्षेत्रं कर्मोदाहरन्ति ॥ २३ ॥

तत्रातिकृच्छ्रं प्रतिलब्धमान इत्येतद्व्याचष्टे। मुक्त इति। यदि बन्धान्मुक्तो भवति तर्हि ततः सकाशादन्यो हरति तस्मादप्यन्यः नत्वसौ भोक्तुं लभत इत्यर्थः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

अनेनैव शूरैर्हृतस्व इत्युत्तरश्लोकपूर्वार्द्धं व्याख्यातप्रायमित्यभिप्रेत्य तदुत्तरार्द्धं व्याचष्टे। कदाचिदिति। कचिदसत्कालान्तरानवस्थायित्वेन पुरुषान्तराननुभाव्यत्वेन चासत्स्वप्नद्रष्ट्रैकानुभाव्यं तत्कालमात्रावसायि चेति यावत् मनोरथेन मनोव्यापारेण सङ्कल्पविकल्पात्मकेन उपगतं प्राप्तं स्वप्रदष्टकर्मानुसारिसङ्कल्पविकल्पात्मकमनोरथानुसारिभगवत्सृष्ट्या प्राप्तमित्यर्थः ईदृशं पितृपुत्रादिसदिति मन्वान इति शेषः कालान्तरावस्थायिपुरुषान्तरानुभाव्यजाग्रद्वस्तुतुल्यमतिरित्यर्थः स्वप्ननिर्वृत्तिं स्वप्नपितृपुत्रादिसुखं क्षणमात्रमनुभवति स्वप्नस्य गन्धर्वनगरतुल्यत्वं च तद्वत्तत्कालमात्रावस्थायित्वेनान्यानुभाव्यत्वेन चात्र विवक्षितम्। गन्धर्वा हि कचिन्नियतं चिरं न वसन्ति कचित् क्षणमवस्थितवन्तोऽपि न परैर्दृश्यन्ते ततस्तेषां निवासस्थानापरपर्यायं नगरं न कालान्तरावस्थायीतरपुरुषानुभाव्यं चेति वदन्ति च ॥ १७ ॥

चलन्कचिदित्यस्य पूर्वार्द्धं व्याचष्टे। कचिदिति। कदाचिद्गृहाश्रमे याः कर्मणां चोदना विधयस्तासामतिभरो विस्तारः स एव गिरिस्तमारुरुक्षमाणः आरोढुमिच्छन् तदन्तं गन्तुमिच्छन् बहुदिवसानि शरीरायासयज्ञादिकर्माण्यारभ्य यावत्समाप्तिकर्त्तुकामस्तावत् तैः किङ्कैर्लौकिकवैदिकव्यसनैर्दुःखैरन्तरायभूतैः पुत्रवित्तापत्यादिभिः कर्षितमनाः पीडितचित्तः कण्टकशर्कराक्षेत्रं प्रविशन्निव पर्वतमारुरुक्षन्मध्ये कण्टकैः शर्करादिभिः सूक्ष्मपाषाणैश्चाकीर्णं क्षेत्रं प्रविष्ट इव सीदति खिद्यति ॥ १८ ॥

उत्तरार्द्धं व्याचष्टे। कचिच्चेति। कदाचित् दुःसहेन सोढुमशक्येन कायाभ्यन्तरवह्निना शरीरमध्यपरिवर्तिजाठराग्निना गृहीतसारः गृहीतबलः कार्श्यं प्राप्तः स्वकुटुम्बाय भार्यायै क्रुध्यति ॥ १९ ॥

कचिन्निगीर्णं इत्यस्य पूर्वार्द्धं व्याचष्टे। स एवेति। स एव संसाराध्वनि भ्राम्यमाण एव। यद्वा कुटुम्बाय क्रुध्यन्नेव निद्राव्याजगरस्तेन गृहीतः अन्धे तमसि अन्धयतीत्यन्धं स्वपराप्रकाशं तमः अज्ञानं तस्मिन्मग्नः शून्यारण्ये निर्जनेऽरण्य इव शेतेऽन्यत् किञ्चिदपि न वेद किं त्वहमित्येतावन्मात्रमवभासते न तु ब्राह्मणत्वादिबाह्याकारं जानाति तात्कालिकमस्य देहं लक्षयति अपविद्धः शवः दूरतः परिहृतः शव इवेति ॥ २० ॥

तस्यैवोत्तरार्द्धं व्याचष्टे। कदाचिदिति। कचित् दुर्जना एव दन्दशूकाः सर्पादयो दशत्स्वभावास्तैर्भग्नो मानो गर्वः स एव दंष्ट्रा यस्यात एवालब्धो निद्रायाः क्षणो येन व्यथितं दुःखितं यद्धृदयं तेन क्षीयमाणं सङ्कोच्यमानं विज्ञानं यस्य सः अन्धवदन्धकूपे महति दुःखे पततीत्यर्थः ॥ २१ ॥

कर्हिस्मचित् क्षुद्ररसानिति श्लोकं व्याचष्टे। कर्हिचित्स्मेति। कामो विषयोपभोगस्तेन ये मधुलवाः सुखलेषास्तान्विचिन्वन्नन्वेषयन्यदा परदारान् परद्रविणानि चावरुन्धानः स्वीकर्तुमारभमाणः राज्ञा स्वामिभिः परैर्वा निहतो भवति तदाऽपारे निरये नरकप्रायकारागृहे निपतति, राजादिभिर्निहतः कारागृहादिबद्धो भवतीत्यर्थः ॥ २२ ॥

मुक्तस्तु बन्धादित्युक्तेः प्रसङ्गात्प्रवृत्तस्य कर्मणः संसारहेतुत्वं स्फुटयति। अथचेति। यस्मादेवं तस्मादथानन्तरमेव उभयथा इह परत्रास्मिन्प्रवृत्तिमार्गे संसारस्यावपनं जन्म क्षेत्रं कर्मोदाहरन्ति ॥ २३ ॥

तत्रापि कृच्छ्रात्प्रतिलब्धमान इत्येतद्व्याचष्टे। मुक्त इति। यदि बन्धान्मुक्तो भवति तर्हि ततः सकाशाद्द्रवदत्त अन्यउपाच्छिनत्ति अहरति तस्मादपि विष्णुमित्रोऽन्यो हरति इत्यनवस्थितिः नत्वसौ भोक्तुं लभत इत्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

कचिच्च गन्धर्वपुरमित्येतद्व्याख्याति। कदाचिन्मनोरथेत्यादिना ॥ १७ ॥

कचिद्गृहाश्रमेत्यादिना चलन् कचिदित्येतद्विव्रियते। गृहाश्रमचोदितकर्माण्येवातिभारा गिरयस्तानारुरुक्षन् ॥ १८ ॥

पदेपदेऽभ्यन्तरवह्निनेत्येतद्व्याख्यातम्। कचिच्च दुःसहेनेत्यादिना गृहीतसारः गतधैर्यः ॥ १९ ॥

कचिन्निगीर्णं इत्येतद्व्याचष्टे। स एवेत्यादिना। दष्टः स्म शेते इत्येतद्व्याख्याति। कचिद्भग्नमना इत्यादिना निद्राक्षणः निद्रालक्षणावसरः ॥ २०—२१ ॥

कर्हिस्मचिदित्यस्यार्थं दर्शयति। कर्हिस्मचित्कामेत्यादिना। काममधुलवानिति पाठे काम्यन्त इति कामा विषयास्त एव मधुलवा मकरन्दलेशास्तानित्यर्थः ॥ २२ ॥

तत्रापि कृच्छ्रादित्यस्याभिप्रायमाह। अथ चेति ॥ २३ ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

कचिच्च गन्धर्वपुरं प्रविष्ट इत्येतद्व्याचष्टे। कदाचिदिति। मनोरथप्राप्तं पित्रादिकमसत् मृतमपि सत् पुनः परलोकादागतमिति मत्वा स्वप्ने इव निर्वृतिम् ॥ १७ ॥

चलन् कचिदित्येतद्व्याचष्टे। कचिद्गृहाश्रमे याः कर्मचोदनास्ताभिः प्राप्तो योऽतिभरोऽश्वमेधादिर्विवाहादिर्वा स एव गिरिस्तमारुरुक्षन् तदन्तं गन्तुमिच्छन् लोकानां प्रतिवेशिजनानां

क्वचिच्च शीतवाताद्यनेकाधिदैविकभौतिकात्मीयानां दशानां प्रतिनिवारणेऽकल्पो दुरन्तचिन्तया विषण्ण आस्ते ॥ २५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

व्यसनं तादृशवृहत्कर्माशक्तिस्तेन कर्षितमनाः । एते स्वप्रतिष्ठार्थं वृहत्कर्म कुर्वन्ति अहं कथं न करोमीति विक्षुब्धचित्तः ॥ १८ ॥

पदेपदेऽभ्यन्तरवह्निनेत्येतद्व्याचष्टे । क्वचिद्दुःसहेनेति । गृहीतसारः दग्धधैर्यः ॥ १९ ॥

क्वचिन्निगीर्ण इत्येतद्व्याचष्टे । स एवेति । अपविद्धः स्वजनैस्त्यक्तः ॥ २० ॥

दष्टः स्म शेते इति व्याचष्टे । कदाचिद्भग्नेति ॥ २१ ॥

कर्हिस्मचित् क्षुद्ररसानित्येतद्व्याचष्टे । कर्हिस्मचित् कामेति ॥२२॥

अथ चेति यस्मादेवं तस्मादुभयथापि पापप्रकारेण पुण्यप्रकारेण च कर्म अस्मिन् जगति ॥ २३ ॥

तत्रातिकृच्छ्रं प्रतिलब्धमान इत्येतद्व्याचष्टे । मुक्त इति। बन्धात् तत्स्वामिदत्तबन्धप्रहारादेर्यदि द्रव्यातिव्ययेन मुक्तः सन् तद्द्वारान् सम्भोक्तुं प्राप्नोति तदा देवदत्तः अन्यः कश्चिल्लम्पटः तत आच्छिद्य भुङ्क्ते तस्मादप्यन्य इति न कोऽपि प्रकामं भोक्तुं लभते ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कचिच्च गन्धर्वपुरं प्रविष्ट इत्येतद्व्याचष्टे । कदाचिदिति । मनोरथेन मनोव्यापारेण सङ्कल्पेनोपगतं नित्यं मनसि नरिवस्यादिकमस्तीत्येवं वर्तमानमित्यन्यथाभूतं यत् पितृपितामहादिसत्सुखकरं तद्विपरीतमसदपि सत्सुखकरमिति मन्वेति शेषः स्वप्ननिर्वृत्तिलक्षणं स्वप्नवन्निर्वृत्तिः सुखं यस्मात्तथाभूतम् ॥ १७ ॥

खलन् कचित्कण्टकशर्कराङ्घ्रिरित्येतद्व्याचष्टे । क्वचिदिति । गृहाश्रमे याः कर्मचोदनास्तासामतिभरोऽतिविस्तारः स एव गिरिस्तमारुरुक्षमाणः तदन्तङ्गन्तुमिच्छन् लोकव्यसनैः क्षुद्रैर्लौकिकैः कार्यैः कर्शितं मनो यस्य सः कण्टकशर्कराक्षेत्रं प्रविशन् नगमारुरुक्षुर्यथा सीदति तद्वत्सीदति ॥ १८ ॥

पदेपदेऽभ्यन्तरवह्निनेति व्याचष्टे । क्वचिद्दुःसहेन सोढुमशक्येन कायाभ्यन्तरक्रोधाग्निना गृहीतः भस्मीकृतः सारो धैर्यं यस्य सः ॥ १९ ॥

क्वचिन्निगीर्ण इत्येतद्व्याचष्टे । स एवेति ॥ २० ॥

दष्टः स्म शेते क्व च दन्दशूकैरित्येतद्व्याचष्टे । कदाचिदिति । मानो गर्वः एव दंष्ट्रा परपीडाकरत्वात् भग्ना मानदंष्ट्रा यस्य सः अत एव न लब्धो निद्राक्षणो येन सः अन्धकूपे दुःखरूपे गर्ते पतति यथान्धकूपेऽन्धः ॥ २१ ॥

कर्हिस्मचित्क्षुद्ररसानित्येतद्व्याचष्टे । कर्हिस्मचिदिति । कामो विषयोपभोगस्तेन ये मधुलवाः सुखलवास्तान् विचिन्वन् परदारादीन् अवरुन्धानः स्वीकुर्वाणः यदा तत्स्वामिभिः राज्ञा वा निहतो भवति तदापारे निरये कारागृहादौ पतति ॥ २२ ॥

प्रसङ्गात्प्रवृत्तं कर्म संसारहेतुरित्याह । अथेति । अस्मिन् भवाध्वनि प्रवृत्तिमार्गे उभयत्र इह च परं च संसारावपनं जन्मक्षेत्रं कर्मोदाहरन्ति ॥ २३ ॥

तत्रातिकृच्छ्रं प्रतिलब्धमान इत्येतद्व्याचष्टे । मुक्त इति । यदि मुक्तः कारागृहादितो मुक्तो भवति तर्हि ततः सकाशात् देवदत्तस्तस्माद्विष्णुमित्र उपाच्छिनत्ति इत्यनवस्थितिर्भवति नात्वसौ भोक्तुं लभते इत्यर्थः ॥ २४ ॥

भाषाटीका ।

कभी मनोरथ से आये हुये पिता पितामहादिकों को देखकर मरे हुओं को भी सच्चे आये सरी के मानकर स्वप्न सरी का सुख भोगता है ॥ १७ ॥

कभी गृहस्थाश्रम के कर्मों के विधि के भाररूप पर्वतपर चढने चांहता है तब लौकिक विषयोंकी इच्छासे दुःखित होकर जैसे कांटे कङ्कडोंके खेत में पैठने से होवै तैसे दुःखित होता है ॥ १८ ॥

कहीं तो अतिकठिन पेटकी क्षुधा अग्नि से धैर्य के नष्ट होजाने से अपने कुटुम्ब के मनुष्योंपर कोप करता है ॥ १९ ॥

सो पुरुष निद्रारूपी अजगर से पकड लिया जाता है तब अज्ञानरूप अंधेरे में डूबजाता है शून्य जैसे अरण्य में तैसे सोता है मुरदा सरीका डारा हुआ कुछ नहीं जानता है ॥ २० ॥

कभी मान रूप दान्त के टूटने से दुर्जनरूपी सर्पों से निद्रा के समय को नहीं पाता है तो दुःखित मनसे ज्ञान के क्षीण होने से सूखे कुआ से महा मोह में पडता है ॥ २१ ॥

कभी कामनाओं के मीठे कणिकाओं को ढूंढता हुआ जब दूसरे की स्त्री दूसरे के धन को लेने चांहता है तब राजा के अथवा उसके मालिक के मारने से नरक में वा कैद में पडाता है ॥ २२ ॥

इसी हेतु से पुण्य पाप दोनों प्रकार का कर्म इस संसार में आत्मा के जन्म मरण का हेतु हैं ऐसा वेद कहते हैं ॥ २३ ॥

उस राजादिबन्धन से यदि छूटता है तो उसी स्त्री या धनकों देवदत्त जवरदस्त लेजाता है उससें भी बली विष्णुमित्र लेजाता है इस प्रकार कोई ठीक नहीं सुख भोगने का होता है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कचिच्च शीतातपेत्येतद्व्याचष्टे । कचिच्चेति । शीतादयोऽनेका आधिदैविकाद्या या दशा दुःखावस्थास्तासाम् ॥ २५ ॥

क्वचिन्मिथो व्यवहरन् यत्किञ्चिद्धनमन्येभ्यो वा काकिणिकामात्रमप्यपहरन् यत्किञ्चिद्वा विद्वेषमेति वित्तशाठ्यात् ॥ २६ ॥

अध्वन्यमुष्मिन्निम उपसर्गास्तथा सुखदुःखरागद्वेषभयाभिमानप्रमादोन्मादशोकमोहलोभमात्सर्ये-र्ष्याऽवमानक्षुत्पिपासाधिव्याधिजन्मजरामरणादयः ॥ २७ ॥

क्वापि देवमायया स्त्रिया भुजलतोपगूढः प्रस्कन्नविवेकविज्ञानो यद्विहारगृहारम्भाकुलहृदयस्तदा-श्रयावसक्तसुतदुहितृकलत्रभाषितावलोकविचेष्टितापहृतहृदय आत्मानमजितात्माऽपारेऽन्धे तमसि प्रहि-णोति ॥ २८ ॥

कदाचिदीश्वरस्य भगवतो विष्णोश्चक्रात्परमाण्वादिद्विपरार्द्धापवर्गकालोपलक्षणात्परिवर्तितेन वयसा रंहसा हरत आब्रह्मतृणस्तम्बादीनां भूतानामनिमिषतो मिषतां वित्रस्तहृदयस्तमेवेश्वरं काल-चक्रनिजायुधं साक्षाद्भगवन्तं यज्ञपुरुषमनादृत्य पाखण्डदेवताः कङ्कगृध्रबकवटप्राया आर्यसमयपरिहृताः साङ्केत्येनाभिधत्ते ॥ २९ ॥

यदा पाखण्डिभिरात्मवञ्चितैस्तैरुरुवञ्चितो ब्रह्मकुलं समावसंस्तेषां शीलमुपनयनादिश्रौतस्मार्तक-र्मानुष्ठानेन भगवतो यज्ञपुरुषस्याराधनमेव तदरोचयञ्छूद्रकुलं भजते निगमाचारेऽशुद्धितो यस्य मिथु-नीभावः कुटुम्बभरणं यथा वानरजातेः ॥ ३० ॥

तत्रापि निरवरोधः स्वैरेण विहरन्नतिकृपणबुद्धिरन्योऽन्यमुखनिरीक्षणादिना ग्राम्यकर्मणैव विस्मृत-कालावधिः ॥ ३१ ॥

क्वचिद्द्रुमवदैहिकार्थेषु गृहेषु रंस्यन् यथा वानरः सुतदारवत्सलो व्यवायक्षणः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

क्वचिन्मिथ इत्येतद्व्याचष्टे । क्वचिन्मिथो यत्किञ्चिद्धनं व्यवहर-न्काकिणिकामात्रं विंशतिकपर्दकमात्रं ततोऽपि न्यूनं वा यत्कि-ञ्चिदपहरन्विद्वेषमेति ॥ २६ ॥

अध्वन्यमुष्मिन्नुरुकृच्छ्रवित्तबाधोपसर्गैरित्युक्तानुपसर्गान्प्रपञ्च-यति । अध्वन्यमुष्मिन्निमे उरुकृच्छ्रवित्तबाधादयस्तथा सुख-दुःखादयश्च ॥ २७ ॥

व्युत्क्रमैः पुनरुक्तैश्च नानापाठैरतः परम् ।
दुर्गतोऽपि भवाध्वायं सम्प्रदायेन तीर्यते ॥

तत्र प्रसजति क्वापीत्यादिना सिंहावलोकनन्यायेनोक्तमर्थमप-कृष्य क्रमेण व्याचष्टे । क्वापि देवमाययेति । प्रस्कन्नमपगतं विवेकविज्ञानं यस्य यस्याः स्त्रिया विहारगृहं क्रीडागृहं तदारम्भे आकुलं हृदयं यस्य अनेन प्रसजतीति व्याख्यातं तदाश्रयेत्यादि व्याचष्टे । तस्या आश्रयेऽवसक्ताः संलग्नाः सुता दुहितरश्च कलत्रं च सैव स्त्री तेषां भाषितादिभिरपहृतं हृदयं यस्य प्रहिणोति प्रक्षिपति ॥ २८ ॥

क्वचित्कदाचिद्धरिचक्रतस्त्रसन्नित्येतद्व्याचष्टे । कदाचिदीश्वर-स्येति । परमाण्वादिः द्विपरार्धोऽपवर्गोऽन्तः तदेवोपलक्षणं यस्य तस्मात् कालोपलक्षणादिति पृथक्पदत्वेन पाठे कालस्वरूपादि-त्यर्थः रंहसा शीघ्रेण परिवर्तितेन परिभ्रमणेन वयसा बाल्या-दिक्रमेण ब्रह्माणमभिव्याप्य तृणस्तम्बादीनि भूतानि हरतश्च-क्रतः सकाशाद्वित्रस्तहृदयः सन् पाखण्डदेवता आभिमुख्येन धत्त इत्यन्वयः । अनिमिषतो निमेषमकुर्वतः अप्रमत्तादित्यर्थः । मिषतां प्रतिकर्तुमशक्तानामित्यर्थः कर्मणि षष्ठ्यः कालचक्रं निजं नित्य-मायुधं यस्य साङ्केत्येन मूलप्रमाणशून्येन पाखण्डागमेन ॥ २९ ॥

तैर्वञ्चित इत्येतद्व्याचष्टे । यदा त्विति । आत्मना वञ्चितैरुरु अधिकं वञ्चितः सन् तेषां ब्राह्मणानां यच्छीलमुपनयनादि तदरोचयन् शूद्रवद्वर्तते । निगमोक्ताचारे अशुद्धितः स्वस्य शुद्ध्यभावात् यस्य शूद्रस्य केवलं मिथुनीभावः कुटुम्बभरणं च व्यापारो नाग्निहोत्रादिः ॥ ३० ॥

तज्जातिरासेनेत्यादि व्याचष्टे । तत्रापि निरवरोधः प्रतिबन्ध-रहितः स्वैरेण स्वेच्छया क्रीडन्विस्मृतमृत्युकालः सन् ॥ ३१ ॥

द्रुमेषु रंस्यन्नित्येतद्व्याचष्टे । क्वचिद्द्रुमवदिति । व्यवायक्षणो मैथुनोत्सवो भवति ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

क्वचिच्च शीतातपेत्येतद्व्याचष्टे । क्वचिच्चेति । शीतादयोऽनेका-धिदैविकानां भौतिकानामात्मनां च दशा दुःखावस्था आधिदैविका आधिभौतिका आध्यात्मिकास्तापा इत्यर्थस्तासां दशानां प्रति-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

निवारणाय प्रतिक्रियायै अकल्पोऽसमर्थः प्रतिक्रियां कर्तुमसमर्थः अत एव विषयिणः दुःखितः अपारचिन्तायुक्त आस्ते ॥ २५ ॥

कश्चिन्मिथ इत्येतद्व्याचष्टे । कदाचित्परस्परं व्यवहरन् यत्किञ्चिद्धनमन्येभ्यः सकाशात् काकिणिकामात्रं विंशतिकपर्दमात्रं ततोऽपि न्यूनं वा यत्किञ्चिदपहरन् वित्तशाठ्येन धनलोभेन विद्वेषं प्राप्नोति ॥ २६ ॥

(१) कश्चित्क्वचित् क्षीणधन इत्येतद्व्याचष्टे । कश्चित्क्षीणं धनं यस्यात एव शय्यासननिवासादिभिरुपभोगैर्भोगोपकरणैर्विहीनः रहितः उपभोगशब्दो भोग्योपलक्षकः क्वचित् यदैवमविभो भवति तदा यावदप्रतिलब्धमनोरथः अप्राप्तसमीहितः तावत्परस्वादानेऽन्यदीयधनग्रहणे व्यवसितमतिः केनापि परवञ्चनोपायेन तदीयं धनं ग्रहीतव्यमिति निश्चययुक्तः ततः परधनादिग्रहणोद्योगादपमानादीनि प्राप्नोति ॥ २७ ॥

अन्योऽन्यवित्तेति व्याचष्टे । एवं परस्परं वित्तस्य भाषाबन्धनस्य धनस्य व्यतिषङ्गेण व्यत्यासेन निबद्धारूढमूलं यद्वैरं तदनुबन्धोऽप्रियकारित्वादिरूपश्च यस्यैवम्भूतोऽपि पूर्ववासनया जात्यभिमानप्रयुक्तया पूर्ववासनया मिथ उद्वहतः विवाहं कुर्वाणांस्तानेव वैरविषयानेवोद्वहति । वैरविषयैरेव साजात्याभिमानेन विवाहादिक्रियया सम्बध्नातीत्यर्थः ॥ २८ ॥

एतस्मिन् संसाराध्वन्येवमुक्तविधैर्नानाविधैः क्लेशैरुपसर्गैर्बध्यमानः सुखदुःखरागद्वेषादिभिश्च वितते विस्तृतेऽनन्तक्लेशोपसर्गयुक्ते इत्यर्थः आपन्न आपदं प्राप्तस्तत्र यो यं विपन्नः विपत्तिं प्राप्तः मृत इति यावत्तं तं विपन्नं पित्रादिरूपं विसृज्य जातं जातं पुत्रादिरूपमुपादाय...अभिमतिं कृत्वा पुनर्जातविपत्तौ शोचन् तेन मुह्यन्खिद्यन्प्ररुदन् तत्र शोको मानसी व्यथा खेदो वाचिकी दैन्योक्तिरूपा प्ररोदः कायिकी अश्रुविमोचनादिरूपा जातान्पुनरन्यस्य जनने संहृष्यन् हाहादिभिरुच्चैर्ध्वनिं कुर्वन् बिभ्यत् जातादीनामागामिदुःखसम्भावनानिमित्तप्रतिकूलज्ञानप्रयुक्तः कदाचिज्जातादीनां गुणान् गायन्मुह्यमानः खेदं मोहं प्राप्तस्तेन साधुना कर्मणा वर्जितः नह्यमान इति पाठे बध्यमानः अद्यापि जीवसमूहः आरब्ध उपक्रान्तयोगः संसाराध्वनः पारं इतोऽस्मात्संसाराध्वनः सकाशात्तदध्वनः पारं प्रति नैवावर्तते नायाति न प्राप्नोतीत्यर्थः किं तदध्वनः पारं यत्प्राप्तिनावर्तते तत्राह । यदिदं योगानुशासनं नाम योगानुशासनमिति प्रसिद्धं तत्संसाराध्वनः पारमुपदिशन्ति तत्त्वविद इति शेषः योगस्याध्यात्मयोगकर्मयोगानुगृहीतभगवद्भक्तियोगस्यानुशासनं विविच्य ज्ञानं शिक्षणं वा तदनुष्ठानमिति यावत्तदेव संसाराध्वनः पारमित्यर्थः ॥ २९ ॥

मनस्विनो निर्जितेति श्लोकं व्याचष्टे । न वा इति । उपशम एव शीलं येषामुपरतः निगृहीतः आत्मा मनो यैस्ते मुनयो मननशीला न्यस्तदण्डाः निवृत्तभूतद्रोहाः सर्वभूतसुहृदः सन्त इत्यर्थः यच्छन्तमं निरतिशयसुखरूपं परमात्मप्राप्त्युपायं योगानुशासनमुपतिष्ठन्ति प्राप्नुवन्ति तच्छन्तमं निर्जितदिग्गजेन्द्रा अमनस्विनः अनिर्जितान्तःकरणा राजर्षयो नैवावरुन्धन्ते न प्राप्नुवन्ति नैव च व्रजन्ति उपायानुष्ठानपूर्वकमुपेयं न यान्ति किन्निवयं पृथिवी ममेत्यभिमानेनैव प्रकृतवैरानुबन्धाः मृधे युद्धे शयीरन् कथं ममाभिमानविषयभूता तत्राह । यां पृथिवीं विसृज्य क्षयमुपसंहृता इत्यर्थः सिंहावलोकन्यायेन बाधोपसर्गैरित्यत्राभिप्रेतमुपसर्गशब्दार्थमाह । अध्वनीति । अस्मिन्नध्वनि संसाराध्वनि इमे स्वर्गादयः उपसर्गा इत्यर्थः ॥ ३० ॥

प्रसज्जतीत्येतद्व्याचष्टे । कापीति । स्त्रीवेषया देवमायया भगवन्मायया कया भुजलताऽप्युपगूढः आलिङ्गितः प्रस्कन्नं गतं विवेकात्मविज्ञानं यस्य । यद्वा । विवेको देहविलक्षणात्मविवेकः विज्ञानं भगवदुपासनात्मकं तद्रहितः यस्याः स्त्रिया विहारगृहं क्रीडागृहं तदारम्भे आकुलं हृदयं यस्य तस्मिन्नाश्रमे वनिताविहारगृहे आसक्ताः प्रसक्ताः सुतादयस्तेषां भाषितादिभिरपहृतं हृदयं यस्य अत एवाजितेन्द्रियः अन्धे तमसि दुःखे नरके आत्मानं प्रहिणोति प्रक्षिपति ॥ ३१ ॥

पूर्वार्द्धं व्याख्यातमथोत्तरार्द्धं व्याचष्टे । कदाचिदिति । परमाण्वादिः परार्द्धेऽपवर्गोऽन्तः स एवोपलक्षणं यस्य कालोपलक्षणादिति पाठे तु पारमाण्वादिपरार्द्धापवर्गरूपं यत्कालस्योपलक्षणमुपलक्ष्यत इत्युपलक्षणं स्वरूपं तस्मादित्यर्थः रंहसा शीघ्रेण परिवर्त्तितेन परिभ्रमणेन वयसा बाल्यादिक्रमेण ब्रह्मणमभिव्याप्य तृणस्तम्बादिभूतानां काल्यमानानां लवादिरूपेण गण्यमानायुषामित्यर्थः मिषतां पश्यतामनिमिषतः निमेषमकुर्वत अप्रमत्तादिति वा हरतः आयुरिति द्वितीयान्तस्य शेषः अनिमिषतः अकाल्यमानाच्चिद्धाङ्काल्यमानाद्वा ... विचित्रवृत्तयोऽन्तः वित्रस्तहृदयो मरणमाशङ्कमान इति यावत् अमरत्वाय पाखण्डदेवताः साङ्केत्येनाभिमुख्येन भक्ते किं कृत्वा कालचक्रं निजं क्षीयमायुधं यस्य तमेव साक्षाद्भगवन्तं यज्ञपुरुषमनादृत्य पाखण्डदेवताः कथम्भूताः कङ्कगृध्रबकप्रायाः विश्वसन्त्योऽपि वञ्चयन्त्यः आर्याणां वैदिकानां समयात्सिद्धान्तादबहिः कृताः साङ्केत्येनेत्यनेन पाखण्डदेवताराधनं पाखण्डसङ्केतनिबन्धनं न तु वैधमित्युक्तम् ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

क्वचिच्च शीतातपेत्येतद्विवृणोति । क्वचिच्च शीतातपेत्यादिना ॥ २५ ॥

कश्चिन्मिथो विपणत्रित्येतद्विवृणोति । कश्चिन्मिथ इत्यादिना । विपणिकः वणिक् ॥ २६ ॥

(१) कश्चित्क्षीणधन इत्यस्यार्थमाह । कश्चिदित्यादिना ॥ २७ ॥

अन्योन्यवित्तेत्यस्यार्थमाह । एवं वित्तेति ॥ २८ ॥

यत आरब्धो नरलोकसार्थस्तमीश्वरमध्वनः पारमुपदिशन्ति विद्वांसः ॥ २९ ॥

के ते गच्छन्तीति तत्राह । यदिदमिति । योगमनुशास्तीति योगानुशासनमेतद्ब्रह्म शन्तमं सुखतममुपशमशीला मुनयः उपतिष्ठन्ति प्राप्नुवन्तीत्यन्वयः ॥ ३० ॥

प्रसज्जतीत्यस्यार्थमाह । कापि देवमाययेति । प्रस्कन्नविवेकविज्ञानः नष्टविवेकविज्ञानस्तस्याः स्त्रियाः विहारार्थं गृहोपक्रमात्

(१) अत्रत्यं मूलं तु श्रीधरीयपाठक्रमेण पञ्चत्रिंशश्लोकानन्तरमेकोनचत्वारिंशपर्यन्तमस्ति तदनन्तरमष्टाविंशत्येकोनत्रिंशत्पद्ययोर्व्याख्यानम् ।

(१) श्रीवीरराघवव्याख्यानधृतदिग्दर्शिवदत्रापि श्लोकक्रमो ज्ञेयः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुतादीनां कलभाषितैरवलोकैर्विचेष्टितैश्चापहृतं हृदयं यस्य स तथा आत्मानमन्धे तमसि प्रहिणोति गमयति "हि गतौ" इति धातुः ॥ ३१ ॥

क्वचित्कदाचिद्धरिचक्रत इत्येतद्व्याख्याति । कदाचिदिति । कदाचित्कस्यांचिदवस्थायामीश्वरस्य चक्राद्वित्रस्तहृदयस्तमीश्वरमनादृत्य पाखण्डदेवताः साकल्येनाभिधत्ते भजतीत्यन्वयः परमाणुद्विपरार्द्धापवर्गकाल उपलक्ष्यतेऽनेनेति । तथोक्तम् । तेन परिवर्तनेन परिभ्रमणेन मिषतां जीवानां वयः आयुर्लक्षणं हरतश्चक्रादपवर्गोऽवसानं परमाणुकाल आदिर्यस्य स तथा द्विपरार्द्धस्यापवर्गोऽवसानं यस्य स तथा केषां मिषतामाब्रह्मस्तम्बादीनां ब्रह्माणमवधीकृत्य स्तम्बमुपक्रम्य वर्तमानानां कालचक्रं निजायुधं यस्य स तथा तम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

निगमाचारे या शुद्धिस्तदकरणादित्यर्थः ॥ ३०—३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

क्वचिच्च शीतातपेत्येतद्व्याचष्टे । क्वचिच्च शीतेति । दशानां दुःखावस्थानाम् ॥ २५ ॥

क्वचिन्मिथ इत्येतद्व्याचष्टे । क्वचिन्मिथ इति । यत्किञ्चिदपि धनं मिथो वाणिज्यादौ व्यवहरन् वा काकिणिका विंशतिकपर्दिकास्तन्मात्रं यत्किञ्चित्ततोऽपि न्यूनं च अन्येभ्योऽपहरन् वा विद्वेषमेति ॥ २६ ॥

अध्वन्यमुष्मिन्नुरुकृच्छ्रेति व्याचष्टे । अध्वन्यमुष्मिन्निम इति ॥ २७ ॥

प्रसज्जति क्वापीति व्याचष्टे । क्वापीति । देवमायारूपया स्त्रिया कस्याः भुजलताभ्यामुपगूढः सन् लुप्तविवेकविज्ञानो भवति । यस्या स्त्रियाः केलिगृहारम्भे आकुलहृदयो भवेत्तस्या एव आश्रयेऽवसक्ताः संलग्नाः सुता दुहितरश्च कलत्रं तत्सुतवधूः सा च तेषां भाषितादिभिरपहृतं हृदयं यस्य सः ॥ २८ ॥

क्वचित् कदाचिद्धरिचक्रतस्त्रसन्नित्येतद्व्याचष्टे । कदाचिदीश्वरस्येति । चक्रात् परित्रस्तहृदयः पाखण्डदेवताः साङ्केत्येन कल्पितेन पाखण्डागमेन अभिधत्ते उपास्यतया व्याचष्ट इत्यन्वयः परमाण्वादिर्द्विपरार्द्धापवर्गोऽन्तो यस्य तेन कालेनैव उप आधिक्येन लक्षणं यस्य तस्मात् द्विपरार्द्धापवर्गात् कालोपलक्षणादिति पाठे कालस्वरूपादित्यर्थः । कीदृशात् परिवर्त्तितेन वयसा बाल्यादिना रंहसा अतिशैघ्र्येण ब्रह्मादीनामप्यनिमिषतामपश्यतां व्यवहारे प्रमत्तानां भूतानामिति कर्मणि षष्ठ्यः भूतानि हरत इत्यर्थः । यद्वा । आयुरित्यध्याहार्य तेषामायुर्हरतः अनिमिषतः निमेषमप्यकुर्वतः अप्रमत्तादित्यर्थः । आर्य्यसमयपरिहृताः शिष्टाचाररहिताः ॥ २९ ॥

तैर्वञ्चित इत्येतद्व्याचष्टे । यदा त्विति । आत्मनैव वञ्चितैः स्वकल्पितकुपथगामित्वात् तैरुरुवञ्चितः कल्पितकिञ्चिन्मात्रापराधमिषेण धनाद्यपहृत्य स्वगणाग्निः सारितः निगमोक्ताचारमध्ये या अशुद्धिरुच्यते तयैव यस्य मिथुनीभावः विधवायास्त्यक्तधवाया वा मूल्यादिप्रदानेन परिणयः ॥ ३० ॥

तज्जातिरासेनेत्येतद्व्याचष्टे । तत्रापि निरवरोधः धर्ममर्यादाभिरनवरुध्यमानः विस्मृतमृत्युकालः सन् विहरन् भवति ॥ ३१ ॥

द्रुमेषु रंस्यन्निति व्याचष्टे । क्वचिद्द्रुमेति । रंस्यन् रममाणः व्यवायक्षणः स्त्रीसङ्गलब्धोत्सवः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

क्वचिच्च शीतातपेत्येतद्व्याचष्टे । क्वचिच्चेति । शीतादीनामनेकानामाधिदैविकभौतिकानामात्मीयानां दशानां दुःखावस्थानाम् ॥ २५ ॥

क्वचिच्च मिथ इत्येतद्व्याचष्टे । क्विचिन्मिथः यत्किञ्चिद्धनं व्यवहरन् अन्येभ्यो वित्तशाठ्यात् धनलोभात् काकिणिकामात्रं विंशतिकपर्दिकामात्रं ततोऽपि न्यूनं वा यत्किञ्चिदपहरन् विद्वेषमेति प्राप्नोति २६ ॥

अध्वन्यमुष्मिन्नुरुकृच्छ्रवित्तबाधोपसर्गैरित्युक्तानुपसर्गान् प्रपञ्चयति । अध्वनीति । अमुष्मिन् अध्वनि संसारमार्गे इमे उरुकृच्छ्रवित्तबाधादयस्तथा सुखदुःखादय उपसर्गाः अत्र व्युत्क्रमोक्तिर्मुनेर्जीवोपसर्गसंस्मरणजन्यकारुण्याविष्टत्वं पुनरुक्तिश्च परोपकारेऽनलसत्वमधिकोक्तिश्च सर्वज्ञत्वं द्योतयति ॥ २७ ॥

प्रसज्जतीत्येतद्व्याचष्टे । क्वापीति । स्त्रीरूपया देवमायया भुजलताभ्यामुपगूढः प्रस्कन्नमपगतं कार्याकार्यविवेकसहितं भगवद्विषयकं विज्ञानं यस्य सः यद्विहारगृहारम्भे यस्याः क्रीडागृहारम्भे आकुलं हृदयं यस्य सः तस्याः आश्रमे क्रीडागृहे अवसक्ताः उपश्रिताः सुताश्च दुहितरश्च कलत्राणि सुतादिभार्यास्तेषां भाषितादिभिरपहृतं हृदयं यस्य सः अन्धे तमसि नरके आत्मानं प्रहिणोति प्रक्षिपति ॥ २८ ॥

क्वचित्कदाचिद्धरिचक्रतस्त्रसन्नित्येतद्व्याचष्टे । कदाचिदिति । परमाण्वादिद्विपरार्द्धापवर्गात् परमाण्वादिद्विपरार्द्धान्तात् कालोपलक्षणात् कालस्वरूपात् रंहसा शीघ्रेण परिवर्त्तितेन परिभ्रमणेन वयसा बाल्यादिक्रमेण आब्रह्मतृणस्तम्बादीनामित्याद्याः षष्ठ्यः कर्मणि आब्रह्मतृणस्तम्बादीनि भूतानि हरतः संहरतः विष्णोश्चक्राद्वित्रस्तहृदयः भगवन्तमनादृत्य पाखण्डदेवताः साङ्केत्येन पाखण्डागमेन अभिधत्ते इत्यन्वयः अनिमिषतः निमेषमकुर्वतः अप्रमत्तात् कथम्भूतानां मिषतां प्रतिकर्तुमशक्यानाम् कथम्भूताः कङ्कादिप्रायाः वञ्चनपराः आर्याणां वैदिकानां समयात्सिद्धान्तात्परिहृताः बहिष्कृताः ॥ २९ ॥

तैर्वञ्चित इत्येतद्व्याचष्टे । आत्मा स्वात्मा वञ्चितः स्वेच्छाचारेण नरकार्हः कृतः यैस्तैरुरु अधिकं वञ्चितः सन् ब्रह्मकुलं समावसंस्तेषां ब्राह्मणानां यत् शीलमुपनयनादिश्रौतस्मार्त्तकर्मानुष्ठानेन यज्ञपुरुषाराधनमेव तदरोचयन् शूद्रकुलं भजते निगमाचारे अशुद्धितः स्वस्य शुद्ध्यभावात् यस्य शूद्रस्य केवलं मिथुनीभावः कुटुम्बभरणं च व्यापारः नाग्निहोत्रादि ॥ ३० ॥

तज्जातिरासेन सुनिर्वृत्तेन्द्रिय इत्येतद्व्याचष्टे । तत्रापि शूद्रकुलसङ्गतावपि निरवरोधः निरस्तप्रतिबन्धः निरङ्कुश इत्यर्थः

एवमध्वन्यवरुन्धानो मृत्युगजभयात्तमसि गिरिकन्दरप्राये ॥ ३३ ॥

कचिच्छीतवाताद्यनेकदैविकभौतिकात्मीयानां दुःखानां प्रतिनिवारणेऽकल्पो दुरन्तविषयविषण्ण आस्ते ॥ ३४ ॥

कचिन्मिथो व्यवहरन्यत्किञ्चिद्धनमुपयाति वित्तशाठ्येन ॥ ३५ ॥

कचित्क्षीणधनः शय्यासनाशनाद्युपभोगविहीनो यावदप्रतिलब्धमनोरथोपगतादानेऽवसितमतिस्ततस्ततोऽवमानादीनि जनादभिलभते ॥ ३६ ॥

एवं वित्तव्यतिषङ्गविवृद्धवैरानुबन्धोऽपि पूर्ववासनया मिथ उद्वहत्यथापवहति ॥ ३७ ॥

एतस्मिन्संसाराध्वनि नानाक्लेशोपसर्गबाधित आपन्नविपन्नो यत्र यस्तमुहवावेतरस्तत्र विसृज्य जातंजातमुपादाय शोचन्मुह्यन्बिभ्यद्विवदन्क्रन्दन्संहृष्यन्गायन्नह्यमानः साधुवर्जितो नैवावर्ततेऽद्यापि यत आरब्ध एष नरलोकसार्थोऽयमध्वनः पारमुपदिशन्ति ॥ ३८ ॥

यदिदं योगानुशासनं न वा एतदवरुन्धते यन्न्यस्तदण्डा मुनय उपशमशीला उपरतात्मानः समवगच्छन्ति ॥ ३९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

स्वैरेण स्वेच्छया विहरन् विस्मृतः कालावधिरायुषोऽवसानं येन स आस्ते ॥ ३१ ॥

द्रुमेषु रंस्यन्नित्येतद्व्याचष्टे। कचिद्द्रुमवदिति। व्यवाये मैथुने क्षणः उत्सवो यस्य सः ॥ ३२ ॥

भाषाटीका।

कहीं पर शीत पवन आदि अनेक आधिदैविक आधिभौतिक आदि अपनी दशाओं के निवारण में असमर्थ होकर बड़ी भारी चिन्ता से खिन्न होरहता है ॥ २५ ॥

कभी आपस में व्यवहार करने में अथवा और से कौडी-मात्रभी धन किसी से हरता है तो धनकी शठता से अथवा और किसी बातसे वैरको प्राप्त होजाता है ॥ २६ ॥

इस मार्गमें ये सब उपद्रव हैं जैसे कि सुख दुःख रागद्वेष भय अभिमान प्रमाद उन्माद शोक मोह लोभ मात्सर्य ईर्ष्या अपमान क्षुधा प्यास मनके दुःखशरीरके दुःख जन्म बुढाई मरण आदिक ॥ २७ ॥

कहींपर देव की माया स्त्री के भुजारूप लता से लिपटा हुआ विवेक विज्ञान से नष्ट होजाता है जिस स्त्री के विहार-घरके बनाने में इसका हृदय व्याकुल होजाता है फिर उस के आश्रय मे लगे जो पुत्र पुत्री पुत्रवधू इनके भाषण अव-लोकन चेष्टाओं से उसका हृदय मोहित होजाता है तब मन-के न जीतने से आपको नरक में डालता है ॥ २८ ॥

कभी ईश्वर भगवान् विष्णुका परमाणु से लेकर द्विप-रार्ध पर्यन्तरूप काल चक्र ब्रह्मासे लेकर तृणपर्यन्त सबकी आयु को बाल्यादि अवस्थाओं से हरने वाला सर्वदा घूमने वाला सब के देखते ही हर लेने वाला जो काल तिस के डरसे हृदय के कांपने से कालचक्र को अपने आयुध करने वाले उन्हीं भगवान् ईश्वर यज्ञपुरुष को अनादर करके कंक गृध्रबकवट के तुल्य जो पाखण्डदेवता तिन्होंको जो कि उत्तम मार्गसे परित्यक्त हैं तिनको सङ्केत के ग्रन्थो से मानने लगता है ॥ २९ ॥

जब उन पाखण्डियों को आप धन नहीं दे सकता है और वह फिर इसको भुलाकर कुछ नहीं देते हैं तब ब्राह्मणों के समूह मे वास करता है तब उनका जो आचार यज्ञोपवीतादि श्रौतस्मर्त कर्म का अनुष्ठान भगवान् यज्ञपुरुष का आराधन तिससबको जब अच्छा नहीं मानता है तब शूद्रों-को भजता है जिनका कि स्वयं अशुद्ध होने से वेद कर्म में अधिकार नहीं है केवल स्त्री पुरुष के साथ मैथुन और वानरजाति के तुल्य कुटम्बका पोषणमात्र होता है ॥ ३० ॥

तहांपर भी अपनी इच्छासे विहारकरने में अतिक्षुद्रबुद्धिहो-नेसे आपसमें स्त्रीपुत्रादिको के मुखदेखनेमें कुत्सित भोगोंमें मृत्यु-को भूलजाताहै ॥ ३१ ॥

कभी वृक्ष सरीके इस लोकके भोगोंमें रमण करता हुआ जैसे बन्दर होवै तैसे स्त्री पुत्रोंपर प्रेम करके मैथुन के कार्य में समयको बिताता है ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

कचित्प्रमादादित्येतद्व्याचष्टे। एवमध्वनि सुखदुःखाद्यवरुन्धानो गिरिकन्दरप्राये तमसि रोगाद्यापदि पततीति शेषः ॥ ३३ ॥

कचिच्छीतवातेत्यादिपूर्वस्मादधिकोक्तिः। रोगाद्यापदि पतितः सन् शीतादिभिः छिद्यमानआस्त इत्यर्थः ॥ ३४ ॥

यदपि दिगिभजयिनो यज्विनो ये वै राजर्षयः किन्तु परं मृधे शयीरन्नस्यामेव ममेयमिति कृतवैरानुबन्धां यां विसृज्य स्वयमुपसंहृताः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवं सिंहावलोकनन्यायेनोक्तमर्थं यथास्थानमपकृष्य व्याख्याय क्रमस्थमनुवर्तयितुं पूर्वोक्तमेवानुवदति । क्वचिन्मिथ इति । वित्तशाठ्येन कदाचिद्यत्किञ्चिद्धनमुपयाति ॥ ३५ ॥

क्वचित्क्वचित्क्षीणधनस्त्विति व्याचष्टे । क्वचित्क्षीणधन इति । अप्रतिलब्धं यन्मनोरथेनोपगतं वाञ्छितं तस्यादाने स्वीकारे निश्चितमतिः सन् ॥ ३६ ॥

अन्योऽन्यवित्तव्यतिषङ्गेणेत्येतद्व्याचष्टे । एवं वित्तव्यतिषङ्गेति । अपवहति त्यजति ॥ ३७ ॥

अध्वन्यमुष्मिन्नित्यादि व्याचष्टे । एतस्मिन्निति । आपन्नमापदं प्राप्तः विपन्नो विनष्टो वा यत्र यस्तमितरस्तत्रैव विसृज्य । नह्यमानो बध्यमानः साधुवर्जितः साधुव्यतिरिक्तः ॥ ३८ ॥

अनावृत्तौ हेतुमाह । यदिदमिति ॥ ३९ ॥

मनस्विन इत्यादि व्याचष्टे । यदपीति । ये वै राजर्षयस्तेऽपि नावरुन्धन्ते किन्तु परं केवलं मृधे शयीरन् ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

(१) यदा त्विति । आत्मा वञ्चितो यैस्तैरुपवाञ्चितः सन् ब्रह्मकुलं प्रविष्टस्तेषां ब्राह्मणानां शीलमिति प्रतीकोपादानं तैर्वञ्चित इत्येतद्व्याचष्टे उपनयनादीत्याराधनमेवेत्यन्तेन अरोचयन्नभिमन्यमानः उपैति वानरानित्यस्य व्याख्यानं शूद्रकुलं भजत इति तदुपपादयति । निगमोक्ते आचारेऽपरिशुद्धितः स्वस्य शुद्ध्यभावात् यस्य शूद्रकुलस्य मिथुनीभावः कुटुम्बवर्द्धनं केवलदेहव्यापारश्चेत्येवं केवलग्राम्यसुखमेव नादृष्टं यथा वानरजातेरिति तत्र दृष्टान्तः ॥ ३३ ॥

तज्जातिरासेनेत्येतद्व्याचष्टे । तत्रापीति । शूद्रकुलेऽपि निरवरोधः प्रतिबन्धरहितः स्वैरेण स्वेच्छया युक्तदेशकालप्रतीक्षामन्तरेण क्रीडयातिकृपणोऽत्यन्तं व्याकुला बुद्धिर्यस्य योषित्पुरुषयोः परस्परमुखनिरीक्षणादिरूपेण ग्राम्यकर्मणैव विस्मृतः कालावधिरायुषोऽवसानं यस्य स आस्ते ॥ ३४ ॥

द्रुमेषु रंस्यन्नित्येतद्व्याचष्टे । क्वचिदिति । वृक्षवत्केवलमैहिकसुखप्रयोजनकेषु गृहेषु द्रुमादिवत्केवलमिहैव युज्यन्ते न परत्रेति भावः । यद्वा । द्रुमवद्द्रुम इव यथा वानरः सुतदारवत्सलो मैथुनमेव क्षणा उत्सवो यस्य तथाभूतो भवत्येवमयमपि केवलमैहिकार्थेषु गृहेषु रंस्यन् सुतदारवत्सलो व्यवायक्षणः स्वबन्धने विवशो भवतीत्यर्थः ॥ ३५ ॥

क्वचित्प्रमादादित्येतद्व्याचष्टे । एवमिति । संसाराध्वनि सुखदुःखाद्यवरुन्धानः अनुभवमानः मृत्युरेव गजस्तस्य भयाद्गिरिकन्दरतुल्ये तमसि रोगाद्यापदि पतन् ततः पुनरप्येवं जीवनहेतुभूतां कर्मरूपां वल्लीमवलम्ब्य ततः आपदः रोगाद्युपद्रवरूपात्कस्मात्केनापि प्रयासेन विमुक्तः पुनरप्येवमुक्तरीत्या संसाराध्वनि वर्त्तमानो नरलोकसार्थं नरशरीरजीवसमूहमुपयातीत्येवमुपरि गतोऽपि लोकान्तरेषु विद्यमानां देवादिसमूहोऽपि संसाराध्वन्यटतीत्यर्थः तथाचोक्तं "ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मृत्युलोकं विशन्ति" इति ॥ ३९—४१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

(१)तैर्वञ्चित इत्येतद्व्याचष्टे । यदा तु ताभिरिति । यज्ञपुरुषाराधनं तेषां शीलं यत्तदरोचयन् अपथ्यं मन्वानः अनिगमपरिशुद्धं वेदशुद्धिरहितं यस्य शूद्रकुलस्य मिथुनीभावः कुटुम्बभरणं नान्यदिति शेषः निरवरोधः भार्यारहितः अनिवारणः इति वा ॥ ३३ ॥

द्रुमेषु रंस्यन्नित्यस्यार्थं दर्शयति । क्वचिद्द्रुमवदिति । व्यवाये ग्राम्यरतिस्तदर्थमेव क्षणः कालो यस्य स तथा ॥ ३४ ॥

क्वचित्प्रमादादित्येतद्व्याकरोति । एवमध्वन्यवरुन्धान इति ततः कथञ्चिदिति इदं विवृणोति कर्मवल्लीमिति ॥ ३५ ॥

बिभ्यत् भयमापन्नः मनस्विन इत्येतद्व्याचष्टे । यदपीति ॥ ३६ ॥

(२) बाधोपसर्गैरित्यनोक्तानुपसर्गानाह । यस्यामिति ॥ ३७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

गिरिकन्दरप्राये तमसि रोगाद्या यदि अपतन् मृत्युगजभयाद्वल्लीतुल्यप्राचीनकर्मावलम्ब्य स्थितो भवतीति शेषः ॥ ३३-४५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

क्वचित् प्रमादादित्येतद्व्याचष्टे । एवमध्ववीति । मृत्युभयात् तमसि महारोगाद्युपशमार्थं कुकर्मणि अवरुन्धानः आत्मानमवरुणद्धि ॥ ३३ ॥

क्वचिच्च शीतातपेत्येतद्व्याचष्टे । क्वचिच्छीतवातेति ॥ ३४ ॥

क्वचिन्मिथ इति व्याचष्टे । क्वचिन्मिथ इति ॥ ३५ ॥

क्वचित् क्वचित् क्षीणधन इत्येतद्व्याचष्टे । क्वचित् क्वचित् क्षीणधन इति । यन्मनोरथेनोपगतं वाञ्छितं धनादि तस्यादाने स्वीकारे निश्चितमतिः सन् ॥ ३६ ॥

अन्योऽन्यवित्तव्यतिषङ्गेत्येतद्व्याचष्टे । एवमिति । अथापवहति पुनरुद्वाहं त्यजति च ॥ ३७ ॥

अध्वन्यमुष्मिन्नित्यादि व्याचष्टे । एतस्मिन्निति । आपन्न आपदं प्राप्तः विपन्नो मृतः साधुवर्जित इति । वैष्णवसङ्गे सति तरतीति भावः यतश्च परमेश्वरात् तमेव परमेश्वरं पारं पारप्रापकं तत्र साधुसङ्ग एव हेतुरित्यर्थः ॥ ३८ ॥

अनावृत्तौ हेतुमाह । यदिदमिति । समवगच्छन्ति प्राप्नुवन्ति ॥ ३९ ॥

मनस्विन इति एतद्व्याचष्टे । यदपि यद्यपि तदपि अस्यां

---

(१) अत्र श्रीधरस्वामिपाठक्रमेण त्रिंशत आरभ्य त्रयस्त्रिंशत्पर्यन्तपाठस्य व्याख्यानम् अन्ये श्लोकास्तु पूर्वं व्याख्याता एव ।

(१) अत्रापि श्रीवीरराघववद्वैपरीत्यं वर्तते

(२) अन्यथा अन्ये श्लोकास्तुपूर्वाध्याये गताः

कर्मवल्लीमवलम्ब्य तत आपदः कथञ्चिन्नरकाद्विमुक्तः पुनरप्येवं संसाराध्वनि वर्तमानो नरलोकसार्थमुपयाति एवमुपरि गतोऽपि ॥ ४१ ॥

॥ तस्येदमुपगायन्ति ॥

आर्षभस्येह राजर्षेर्मनसाऽपि महात्मनः ।
नानुवर्त्मार्हति नृपो मक्षिकेव गरुत्मतः ॥ ४२ ॥

यो दुस्त्यजान् दारसुतान् सुहृद्राज्यं हृदिस्पृशः ।
जहौ युवैव मलवदुत्तमश्लोकलालसः ॥ ४३ ॥

यो दुस्त्यजान् क्षितिसुतस्वजनार्थदारान् प्रार्थ्यां श्रियं सुरवरैः सदयावलोकाम् ।
नैच्छन्नृपस्तदुचितं महतां मधुद्विट्सेवानुरक्तमनसामभवोऽपि फल्गुः ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पृथिव्यां शरीरन्तु कीदृश्यां ममेयमिति कृतो वैरानुबन्धो यस्यां तस्याम् इमां विसृज्य स्वयमेव संहृताः मृताः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कचित्प्रमादादित्येतद्व्याचष्टे । एवमध्वनीति प्रसमर्थः ॥ ३३ ॥ ॥ ३४ ॥

यत्किञ्चिद्धनमुपयाति परेभ्य इति शेषः ॥ ३५ ॥

कचित्कचित्क्षीणधन इत्येतद्व्याचष्टे । कचित्क्षीणधन इति । अप्रतिलब्धमप्राप्तं यन्मनोरथेनोपगतं वाञ्छितं तस्यादाने सम्पाकृते ॥ ३६ ॥

अन्योऽन्यवित्तव्यतिषङ्गेत्येतद्व्याचष्टे । एवं वित्तेति । तथापि वित्तमुद्वहति गृह्णाति अपवहति अर्पयति ॥ ३७ ॥

अनन्वयमुष्मिन्नित्यादि व्याचष्टे । एतस्मिन्निति । आपन्नविपन्नः आपद्ग्रस्तो मृतो वा यस्तामितरः विसृज्य जातं जातं पुत्रादिकमुपादाय मंद्यमानः बध्यमानः यतः ब्रह्मणो भगवतः सकाशादारब्धः संसाराध्वा तमध्वनः पारमवधिभूतं संसारहेतुं भगवन्तं साधुवर्जितः साधुजनभिन्नः एष नित्यबद्धजीवसमूहरूपः नरलोकसार्थः नैवावर्तते नैव प्राप्नोति इत्युपदिशन्ति तत्त्वज्ञाः ॥ ३८ ॥

योगानुशासनं भगवत्प्राप्तिसाधनभूतज्ञानभक्त्युपदेशमपि न गृह्णन्तीत्याह । यदिति । यत् यस्य ब्रह्मणो भगवतः ॥ ३९ ॥

मनस्विन इत्यादि व्याचष्टे । यदपीति ॥ ४० ॥

भाषाटीका ।

इस प्रकार से इस प्रवृत्तिमार्ग में दुःखों को भोगता हुआ पर्वत कन्दरा सरी के संसार में पड़कर मृत्युरूपी हाथी से डरता रहता है ॥ ३३ ॥

कहींपर शीतपवन आदि अनेक दैविक भौतिक आध्यात्मिक दुःखों के निवारण में असमर्थ होने से दुःखित होकर रहता है ॥ ३४ ॥

कहींपर आपस में व्यवहार करने में कुछ धन को प्राप्त होता है सोभी धन की वञ्चना करने से ॥ ३५ ॥

कभी धन के क्षय होजाने से शयन आसन भोजन आदि भोगों से हीन होता है तब जबतक मनोरथ नहीं मिलता है तबतक उस के यत्न में बुद्धि रखता है तब तहां तहां मनुष्यों से अपमानादिकों को प्राप्त होता है ॥ ३६ ॥

इस प्रकार धन के अदले बदले में वैर के बढ़ने से भी फिरभी पूर्व की वासना से विवाहादि सम्बन्ध करता है फिर कभी छोड़ताभी है ॥ ३७ ॥

इस संसार मार्गमें नानाप्रकार के क्लेशों विघ्नों से बाधित होने से जो जहां मरे वा दुखीहो तिसको छोड़कर पैदा होनेवाले को लेकर शोचता हुआ मोहित होताहुआ डरता हुआ विवाद करता हुआ रोता हुआ हर्षित होता हुआ गाता हुआ बंधाहुआ सत्पुरुष से वर्जित ऐसा यह नरलोक समूह जब से आरम्भ हुआ है तब से अभीतक उधर को नहीं लौटा है कि जिस परमात्मा को संसार का पार कहते हैं ॥ ३८ ॥

जो योग भक्तियोगगम्य जिस को सन्यासी मुनि शान्तस्वभाव निवृत्तमानवाले जाते हैं तिस को नहीं प्राप्त होता है ॥ ३९ ॥

जोभी बड़े दिग्गजों को जीतनेवाले राजर्षि वेभी इसी पृथिवी में मेरी ऐसा वैरकर के स्वयं काल के मारे संग्राम में सोजाता हैं पृथिवी को छोड़जातेहैं परन्तु उसपद को नहींजा सकते हैं ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रसजतीत्यादिगिरिकन्दर इत्यन्तमपकृष्य व्याख्यातं ग्रन्थमतिक्रम्य वल्लीं गृहीत्वेत्यादि ग्रन्थं व्याचष्टे । कर्मवल्लीमिति । एवमुपरि स्वर्गं गतोऽपि नरलोकसार्थमेवोपयाति ॥ ४१ ॥

तदेवं भरतोक्तिं व्याख्याय तच्चरितसंग्रहश्लोकानाह । तस्येदं कर्म श्लोकैरुपगायन्ति आर्षभस्य ऋषभपुत्रस्य अन्यो नृपोऽनुवर्त्म नार्हति वर्त्मानुगन्तुं न शक्नोति ॥ ४२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्र हेतुमाह । य इति । सुहृद्राज्ययोर्द्वन्द्वैक्यम् । यो दुस्त्यजान्दारादीन्विष्ठामिव जहौ तस्यार्षभस्येति सम्बन्धः दुस्त्यजत्वे हेतुः हृदि स्पृशो मनोज्ञान् त्यागे हेतुः उत्तमश्लोके लालसा लम्पटत्वं यस्य ॥ ४३ ॥

तस्यैवं विषयत्यागो न चित्रमित्याह । य एवं भूतोऽसौ नृपः स क्षित्यादीन्नैच्छदिति यत्तदुचितम् सदयावलोकां भरतस्य दया यथा भवत्येवमवलोको यस्या इति परिजनावलोकः श्रियामुपचर्यते यतो मधुद्विषः सेवायामनुरक्तं मनो येषां तेषां महतामभवो मोक्षोऽपि फल्गुस्तुच्छ एव ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं पारोक्ष्यरूपमवधूनवचो व्याख्याय तन्माहात्म्यप्रतिपादकान् श्लोकानवतारयति । तस्येदं माहात्म्यमार्षभस्य ऋषभपुत्रस्य महात्मनो महानुभावस्य राजर्षेर्वर्त्म मार्गं मनसाप्यनु अन्वसर्तुमन्यो नृपो नार्हति यथा गरुडस्य गतिं मक्षिकेत्यर्थः ॥ ४२ ॥

तत्रैव हेतुमाह । स आर्षभो राजर्षिः स्वाधीनः स्ववशः मनोज्ञानत एव दुस्त्यजान् दुःखेनापि त्यक्तुमशक्यान् पुत्रान् सुहृद्राज्ययोर्द्वन्द्वैक्यं युवैव सन्मलवद्विष्ठामिव जहावत्याक्षीत् त्यागे हेतुमाह । उत्तमश्लोके भगवति लालसः लम्पटः आसक्तचित्त इति यावत् ॥ ४३ ॥

न केवलमत्याक्षीदेवापि तु नैच्छदित्याह । य इति । यो नृप आर्षभः दुस्त्यजान् क्षित्यादीन् क्षितिर्भारतं वर्षं सुताः पुत्रा अर्थो धनं दाराः स्त्रियः इमान् सुरवरैरिन्द्रादिभिश्च प्रार्थ्यां श्रियं सम्पदं कथम्भूतां सदयावलोकां सदयया युक्तः अवलोको राज्ञो यस्यां तां राज्ञो दयया युक्तोऽवलोको मयि प्रसरत्विति प्रार्थयमानामिति भावः नैच्छत् क्षित्यादिषु रागमपि नाकरोदित्यर्थः नैतच्चित्रं किन्तु युक्तं चैतदित्याह । तदुचितमिति । कुतः यतो मधुद्विषः सेवायामनुरक्तमनसां महतामभवो मोक्षोऽपि फल्गुरल्पः भगवत्सेवापेक्षया मोक्षोऽप्यल्प इत्यर्थः ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वल्लीं गृहीत्वेत्यादि अवशिष्टं ग्रन्थं व्याचष्टे । कर्मवल्लीमवलम्ब्येति । एवमुपरि गतोऽपि स्वर्गी जनोऽपि संसाराध्वनि वर्त्तमानः ॥ ४१ ॥

भरतोपाख्यानमुपसंहृत्य तन्महिमानि प्राचां सम्मतिमाह । तस्य इदं कर्म आर्षभस्य ऋषभपुत्रस्य अनुवर्त्म वर्त्मानुगन्तुं नार्हति योग्यताभावादिति भावः । मनसा मनोरथेनापि किमुत कर्मणा ॥ ४२ ॥

तस्य प्रेमानुभावमाह । य इत्यस्योत्तरवाक्यगतत्वाच्च तत्पदापेक्षा मीलितं यदभिरामताभिक इतिवद्दुस्त्यजत्वे हेतुः । हृदि स्पृशः मनोहरान् सुहृद्राज्ययोर्द्वन्द्वैक्यं युवैवेति वार्द्धक्यत्यागिभ्यः प्रियव्रतादिभ्योऽप्युत्कर्षः । मलवदिति । यथा मलस्य त्याग एव निर्वृतिः त्यागाभावे कष्टं त्यक्तस्य तस्य स्मरणेऽपि निष्ठीवनोद्गमस्तथैवेति त्यागेऽप्यन्येभ्यो वैलक्षण्यादुत्कर्षः तत्र हेतुः उत्तमः सर्वोत्कृष्टः रूपगुणलीलामाधुर्यैश्वर्यस्य सम्बन्धी श्लोको यशो यस्य तस्मिन् लालसः दर्शनाद्यौत्सुक्यं यस्य सः । तेन भगवत्सौन्दर्याद्यनाविष्टसर्वेन्द्रियाणां विरक्तानां दारादयो न मलतुल्या भवन्तीति भरतस्योत्तमभक्तत्वं ध्वनितम् ॥ ४३ ॥

उक्तमेवार्थमुल्लासेन पुनरपि स्पष्टीकृत्याह । य इति । सदयावलोकां भरतस्य दया यथा भवत्येवमवलोको यस्या इति परिजनावलोकः श्रियामुपचर्यत इति श्रीस्वामिचरणाः । यद्वा भरतो वैराग्यार्थं शारीरकष्टं मा स्वीकरोतु मया लाल्यमानो गृह एव तिष्ठत्विति सदयोऽवलोको यस्यास्तामभवो मोक्षोऽपि फल्गुस्तुच्छस्तत्रापि विरज्यन्तीत्यर्थः ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वल्लीं गृहीत्वेत्यादिग्रन्थं व्याचष्टे । कर्मवल्लीमिति । एवमुपरि स्वर्गं गतोऽपि नरलोकसार्थमेवोपयाति ॥ ४१ ॥

इत्थं भरतोक्तिं व्याख्याय तच्चरितसङ्ग्रहश्लोकान् पूर्वसिद्धान् दर्शयन् तदुपाख्यानमुपसंहरति । तस्येति । तस्य भरतस्येदं कर्म श्लोकैरुपगायन्ति आर्षभस्य ऋषभपुत्रस्य अनुवर्त्म नार्हति अनुष्ठितं पारमहंस्यं मार्गमनुष्ठातुं न शक्नोति ॥ ४२ ॥

यो दुस्त्यजान् हृदिस्पृशः मनोज्ञान् मलवज्जहौ तस्यार्षभस्येति सम्बन्धः ॥ ४३ ॥

सदये दयानिधौ भरते अवलोको यस्यास्तां च यो नृपः नैच्छत्तदुचितमेव यस्मान्मधुद्विषः सेवायां मनो येषां तेषामभवो मोक्षोऽपि फल्गुरल्पः ॥ ४४ ॥

भाषा टीका ।

दुःख में या नरक में पडाहुआ प्राचीन कर्मरूपी लता को आश्रय करके रहना है किसीप्रकार से उस आफत में से या नरक में से छूटै तौभी फिरभी इसी संसार मार्ग में प्रवृत्त होता है इसी प्रकार से स्वर्ग में जानेवाले कोभी होता है ॥ ४१ ॥

उन भरतजी के इस माहात्म्य को श्रेष्ठलोग गान करते हैं ऋषभजी के पुत्र राजर्षि महात्मा भरतजी के मार्गको मनसेभी कोइ राजा प्राप्त नहीं होसकताहै जैसे गरुडजी के आगे मक्खी होवै ॥ ४२ ॥

जिननें युवाही अवस्था में दुस्त्यज जो स्त्री पुत्रादि हृदय के अत्यन्त प्रिय सुहृद राज्य इन सबोंको भगवान् की लालसासे मल मूत्र के तुल्य त्यागदिया ॥ ४३ ॥

जिनने अति दुस्त्यज पृथिवी पुत्र स्वजन धन स्त्री तथा देवतोंकेभी प्रार्थना करने योग्य दया सहित देखनेयोग्य जो राज्यलक्ष्मी उस को नहीं चाहा सो बात उनको उचितही है

यज्ञाय धर्मपतये विधिनैपुणाय योगाय सांख्यशिरसे प्रकृतीश्वराय ।
नारायणाय हरये नम इत्युदारं हास्यन् मृगत्वमपि यः समुदाजहार ॥ ४५ ॥

य इदं भागवतसभाजितावदातगुणकर्मणो राजर्षेर्भरतस्यानुचरितं स्वस्त्ययनमायुष्यं धन्यं यशस्यं स्वर्ग्यापवर्ग्यं वाऽनुशृणोत्याख्यास्यत्यभिनन्दति च सर्वा एवाशिष आत्मन आशास्ते न काञ्चन परत इति ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां-
संहितायां वैयासिक्यां भरतोपाख्यानंनाम
चतुर्दशोऽध्यायः ॥ १४ ॥

भाषाटीका ।

क्योंकि भगवान् की सेवा में निरत महापुरुषों को तो मोक्ष भी तुच्छ होता है तो फिर और क्या है ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य सेवानुरागमेवाह । यज्ञायेति । यज्ञरूपाय धर्मपतये यज्ञादिफलदात्रे विधौ नैपुण्यं यस्य तस्मै धर्मानुष्ठात्रे योगोऽष्टाङ्गस्तस्मै सांख्यं ज्ञानं तच्छिरः प्रधानं फलं यस्य तस्मै योगाय प्रकृतीश्वराय मायानियन्त्रे अत एव नारं जीवसमूहः सोऽयनमाश्रयो यस्य सर्वजीवनियन्त्रे । एवं कर्मज्ञानदेवताकाण्डैः प्रतिपादिताय हरये नम इत्युदारमुच्चैः सम्यगुच्चारितवान् मृगत्वं मृगदेहमपि हास्यन् त्यक्ष्यन् य एवम्भूतस्तस्य तदुचितमिति वा तस्यानुवर्त्म नार्हतीति वा सम्बन्धः ॥ ४५ ॥

भरतचरितश्रवणादिफलमाह । य इदमिति । भागवतैः सभाजिता अवदाताः शुद्धाः गुणाः कर्माणि च यस्य तस्य भरतस्यानुचरितं योऽनुशृणोति स आत्मन एव सकाशात् सर्वा आशिष आशास्ते स्वत एव प्राप्नोति न तु काञ्चिदपि परस्मादपेक्षत इत्यर्थः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीधर-
स्वामिकृतभावार्थदीपिकायाम्
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्य मधुच्छिद्सेवानुरागातिशयमेवाह । यज्ञायेति । यज्ञानां भोक्त्रे प्रभवे च धर्मपतये ऽवतारैर्वर्णाश्रमधर्माणां गोप्त्रे विधिनैपुणाय धर्मानुवर्त्तिनां रक्षाविधौ नैपुण्ययुक्ताय साङ्ख्यमात्मानात्मविवेकात्मकोऽध्यात्मयोगः स एव शिरः शिरोवत्प्रधानाङ्गं यस्य तस्मै योगाय ।विवेकादिसाधनसप्तकानुगृहीतभक्तियोगगम्याय योगशब्दस्तद्गम्ये औपचारिकः प्रकृतीश्वराय मायानियन्त्रे नारं जीवसमूहः अयनमाश्रयो यस्य तस्मै अनेन चिच्छरीरकत्वमुक्तं हरये आश्रितबन्धहराय नम इत्युदारं भृशमुदाजहार उदाहृतवान् किं कर्तुमिच्छन् मृगत्वं हरिणशरीरमपि हास्यन् हातुमिच्छन् अत्र मृगत्वं हास्यन् समुदाजहारेति हासोदाहरणयोर्यौगपद्यं प्रतीयते तथापि मृगजन्मनो वैकल्यदशायां समुदाहरणमत्र विवक्षितमन्यथा चरमदशायामुक्तनामग्रहणे तद्देहावसाने मुक्तेरस्मिन् प्रबन्धे बहुषु श्लोकेषु कत्वेन पूर्वापरग्रन्थविरोधापत्तेः उदाहरणं चात्राव्यक्तोच्चारणं विवक्षितं मृगजन्मनस्तस्य व्यक्तोच्चारणासम्भवादन्यथा साङ्गभक्तियोगोपसंहारापत्त्या जन्मान्तरविलम्बायोगापत्तेः ॥ ४५ ॥

एतद्भरतचरितश्रवणादिफलमाह । य इदमिति । भागवतैः सभाजिताः संस्तुता अवदाताः शुद्धा गुणा अक्रोधादयः कर्माणि भूतहिताचरणादिरूपाणि च यस्य तस्य राजर्षेर्भरतस्यानुचरितं यशस्यं स्वस्त्ययनं मङ्गलावहमायुष्करं धन्यं धनप्रापकं स्वर्ग्यं स्वर्गसाधनमापवर्ग्यं मुक्तिसाधनं च योऽनुशृणोत्याख्यास्यति कथयति चाभिनन्दति अनुमोदते च स आत्मनः स्वत एव सर्वा आशिषः समीहितान्याशास्ते प्राप्नोति न तु काञ्चिदाशिषं परस्मादपेक्षते इत्यर्थः चरित्रस्य स्वस्त्ययनादिकं च न स्वरूपेणापि तु श्रवणादिविषयत्वेनेति ख्यापनाय शृणोत्याख्यास्यतीत्युक्तं न केवलं स्वस्त्ययनादिकमेवास्य फलमपि त्वनुक्तमन्यत्सर्वमपीत्यभिप्रायेणोक्तं सर्वा ह्येवाशिष आत्मन आशास्ते इत्यादि ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

यज्ञायेति । धर्मरूपाय तत्पालकाय तत्प्रवर्त्तकाय ज्ञानसाधनरूपाय ज्ञानरूपाय मायानियन्त्रे सर्वजगदाश्रयाय ततोऽपि पराय हरये मनोहराय दास्येनात्मानं समर्पयामीत्यर्थः ॥४६॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यज्ञायेति त्रिभिः पादैः क्रमेण कर्मज्ञानभक्तिमार्गाणां यथोत्तरमुत्कर्षो व्यञ्जितः । विधेयैर्यज्ञविधैर्नैपुण्यं यस्मात्तस्मै हास्यन् त्यक्ष्यन् तेन मरणकाले न उदाजहार तथासति जहदित्युच्येत भगवतैव स्वभक्त्युद्रेकार्थं पुनर्जनयिष्यमाणत्वादिति भावः ॥ ४५ ॥

भागवतैः श्रीभागवतेऽस्मिन् शास्त्रे वा सभाजिताः स्तुता अवदाताः शुद्धा गुणाः कर्माणि यस्य । आत्मन एवेति सर्ववाञ्छितानि तस्यानायासेनैव स्वतः प्राप्तानि भवन्तीत्यर्थः ॥ ४६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
चतुर्दशः पञ्चमस्य सङ्गतः सङ्गतः सताम् ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्य भगवत्सेवानुरागं स्फुटयति । यज्ञाय "यज्ञो वै विष्णुः"-इति श्रुतेः धर्मपतये धर्मगोप्त्रे विधेर्भक्त्या: नैपुण्यं यस्य तस्मै युज्यते भक्तैः स्वानुकूल्ये प्रवर्त्यते इति योगस्तस्मै भक्तवश्याय सम्यक् ख्यायन्ते प्रकथ्यन्ते तत्त्वान्यनया इति संख्या अध्यात्मविद्या तयावधारणीयानि चिदचिद्ब्रह्माख्यानि तत्त्वानि सांख्यानि तेषु शिरःप्रधानं ब्रह्म तस्मै सांख्यशिरसे प्रकृत्योः परापरयोः चेतनाचेतनरूपयोरीश्वराय नारस्य जीवसमूहस्यायनाय स्थितिप्रवृत्तिप्रदाय हरये भक्तक्लेशहारिणे नमः इत्युदारं परममङ्गलं वेदवेद्यत्वयज्ञमूर्त्तित्वधर्मगोप्तृत्वब्रह्मादिनैपुण्यहेतुत्वभक्तवश्यत्वसर्वेतत्त्वप्रधानत्वादि भगवद्गुणविषयकवाक्यं मृगत्वं मृगभावं हास्यन् त्यक्ष्यन् यः समुदाजहार सम्यगुच्चारितवान् तस्यानुवर्त्म नार्हतीति सम्बन्धः ॥ ४५ ॥

भरतचरितश्रवणादिफलमाह । य इति । भागवतैः सभाजिताः संस्तुता अवदाताः शुद्धाः गुणाः कर्माणि च यस्य तस्य राजर्षेर्भरतस्य अनुचरितं योऽनुशृणोति आख्यास्यति अभिनन्दति च स आत्मनः सकाशात् सर्वा आशिषः पुरुषार्थान् आशास्ते प्राप्नोति नतु काञ्चन काञ्चिदपि परत अपेक्षते ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
चतुर्दशाध्यायार्थप्रकाशः ॥ १४ ॥

भाषाटीका ।

जिन भरतजीनें यज्ञभगवान् धर्मपति विधिमें निपुण योगलभ्य सांख्य प्रतिपाद्य प्रकृतिके ईश्वर नारायण हरि इन के अर्थ नमस्कार है इसप्रकार से कहकर मृगशरीरका त्यागकिया है उनके चरित्रको कौन राजा पा सकता है ॥ ४५ ॥

भागवतजनों से पूजनीय निर्मल गुण कर्म वाले राजर्षि भरतजी के कल्याण आयु धन यश स्वर्ग मोक्ष देने वाले चरित्र को जो सुने कहै प्रशंसा करै उसको आपही सब संपत्ति मिलती है दूसरे से नहीं चाहना पडती है ॥ ४६ ॥

इति श्रीभागवत पञ्चमस्कन्ध चतुर्दश अध्यायका
भाषानुवाद लक्ष्मणाचार्यकृत
समाप्त ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे चतुर्दशोऽध्यायः समाप्तः ॥ १४ ॥

॥ पञ्चदशोऽध्यायः ॥

—————:०:—————

॥ श्रीशुक उवाच ॥

भरतस्यात्मजः सुमतिर्नामाभिहितो यमुह वाव केचित्पाखण्डिन ऋषभपदवीमनुवर्तमानं चानार्या अवेदसमाम्नातां देवतां स्वमनीषया पापीयस्या कलौ कल्पयिष्यन्ति ॥ १ ॥

तस्माद्वृद्धसेनायां देवताजिन्नाम पुत्रोऽभवत् ॥ २ ॥

अथासुर्यां तत्तनयो देवद्युम्नस्ततो धेनुमत्यां सुतः परमेष्ठी तस्य सुवर्चलायां प्रतीह उपजातः॥३॥

य आत्मविद्यामाख्याय स्वयं संशुद्धो महापुरुषमनुसस्मार ॥ ४ ॥

प्रतीहात्सुवर्चलायां प्रतिहर्त्रादयस्त्रय आसन्निज्याकोविदाः सूनवः प्रतिहर्तुः स्तुत्यामजभूमानावजनिषाताम् ॥ ५ ॥

भूम्न ऋषिकुल्यायामुद्गीथस्ततः प्रस्तावो देवकुल्यायां प्रस्तावान्नियुत्सायां हृदयज आसीद्विभुर्विभो रत्यां च पृथुषेणस्तस्मान्नक्त आकूत्यां जज्ञे नक्ताद्द्रुतिपुत्रो गयो राजर्षिप्रवर उदारश्रवा अजायत साक्षाद्भगवतो विष्णोर्जगद्रिरक्षिषया गृहीतसत्त्वस्य कलात्मवत्त्वादिलक्षणेन महापुरुषतां प्राप्तः॥६॥

स वै स्वधर्मेण प्रजापालनपोषणप्रीणनोपलालनानुशासनलक्षणेनेज्यादिना च भगवति महापुरुषे परावरे ब्रह्मणि सर्वात्मनाऽर्पितपरमार्थलक्षणेन ब्रह्मविच्चरणानुसेवयापादितभगवद्भक्तियोगेन चाभीक्ष्णशः परिभावितातिशुद्धमतिरुपरतानात्म्य आत्मनि स्वयमुपलभ्यमानब्रह्मात्मानुभवोऽपि निरभिमान एवावनिमजूगुपत् ॥ ७ ॥

तस्येमां गाथां पाण्डवेय ! पुराविद उपगायन्ति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवमष्टभिरध्यायैर्भरतस्योक्तमीहितम् ।

ततः पञ्चदशे तस्य कीर्त्यन्ते वंशजा नृपाः ॥ १ ॥

ऋषभपदवीं जीवन्मुक्तमार्गमनुवर्तमानं यं दृष्ट्वेति शेषः । यद्वा यं सुमतिमवेदसमाम्नातां देवतां कल्पयिष्यन्ति बुद्धोऽयं साक्षादवतीर्ण इति मंस्यन्त इत्यर्थः ॥ १ ॥ २ ॥

तत्तनयो देवताजितः पुत्रः ॥ ३ ॥

आत्मविद्यां बहुभ्य आख्याय व्याख्यानेनैव स्वयं संशुद्धोऽनुसस्मारापरोक्षतयाऽनुभूतवान् ॥ ४ ॥

प्रतिहर्ता प्रस्तोता उद्गातेति त्रयो यज्ञनिपुणाः सूनव आसन् अजनिषातां जातौ ॥ ५ ॥

हृदयजः पुत्रः जगतो रिरक्षिषया रक्षितुमिच्छया गृहीतं सत्त्वं येन तस्य विष्णोः कलांशः सन् ॥ ६ ॥

महापुरुषत्वमेवाह । स वै इति । धर्मस्तस्य द्विविधः अभिषिक्तत्वात्प्रजापालनादिरेकः गृहस्थत्वादिज्यादिश्चापरः द्विविधोऽपि भगवति सर्वात्मनार्पितः सन् परमार्थलक्षणस्तेन परिभाविता संस्कृतातिशुद्धा मतिर्यस्य अत एवोपरतमनात्म्यं देहाद्यहंभावो यस्मिंस्तस्मिन्नात्मनि चित्ते स्वयमेवोपलभ्यमाने ब्रह्मयात्मानुभवो यस्य तादृशोऽपि निरभिमान एवावनिमजूगुपत्पालयामास ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं भरतचरित्रमुपवर्ण्य तत्सन्ततिमुपवर्णयति श्रीशुकः । भरतस्य सुमतिर्नामाभिहितः व्यवहृतः यं सुमतिमृषभस्य पदवीं योगचर्यारूपामनुवर्तमानमवलोक्य केचित्पाखण्डिनोऽनार्याः कलौ पापीयस्या स्वमनीषया अवेदसमाम्नातामवेदोक्तां बौद्धदेवतामिति यावत् कल्पयिष्यन्ति बुद्ध एव साक्षात्सुमतिरूपेणावतीर्ण इति स्वकुमनीषया पश्यन्तीत्यर्थः ॥ १ ॥

तस्मात्सुमतेः वृद्धसेनायां भार्यायां देवताजिन्नामा पुत्र उत्पन्न आसुर्यां देवताजिद्भार्यायां तत्तनयः देवताजित्पुत्रः देवद्युम्नो नाम्ना भवत्ततो देवद्युम्नात्तद्भार्यायां धेनुमत्यां परमेष्ठीनाम सुतो जातः तस्य परमेष्ठिनस्तद्भार्यायां सुवर्चलायां प्रतीहाख्यः पुत्र उपजातः यः प्रतीहः बहुभ्यः आत्मविद्यामाख्याय उपदिश्या-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ध्यानेनैव स्वयं संशुद्धः निर्मलान्तःकरणः परमपुरुषमुपासितवान् अनुस्मृतिरत्र प्रत्यक्षतापन्नमुपासनं विवक्षितं भवति ॥२-४॥

प्रतीहात्सुवर्चलायां जातात्प्रतिहर्त्रादयः प्रतिहर्ता प्रस्तोता उद्गातेति । त्रयोऽपीज्याकोविदा यज्ञनिपुणाः सूनवः पुत्रा आसन् तत्र प्रतिहर्त्तुः स्तुत्यां भार्यायामजभूमानावजो भूमेति च द्वौ पुत्रावजनिषाताम् उद्भूतां भूम्नोऽजानुजाद्दर्षिकुल्यायां भार्यायां उद्गीथाख्यः पुत्रः तत उद्गीथाद्देवकुल्यायां भार्यायां प्रस्ताराख्यः पुत्रः प्रस्ताराद्विप्रकुल्यायां भार्यायां विभुर्नाम हृदयजः पुत्र आसीद्विभो रत्यां भार्यायां प्रथुसेनाख्यः पुत्रः तस्मात्पृथुसेनादाकूत्यां भार्यायां नक्तोनाम जज्ञे ततः नक्ताद्गयो नाम कृतिपुत्रः कृतौ नक्तस्य भार्यायां पुत्र आसीदित्यर्थः गयं विशिनष्टि । राजर्षीणां मध्ये श्रेष्ठः उदारश्रवा विपुलकीर्त्तिर्जगतो रिरक्षयिषया रक्षितुमिच्छया गृहीतसत्त्वस्य उपात्तशुद्धसत्त्वमूर्तेर्भगवतो विष्णोः कला अंशभूतः सन्नात्मवत्त्वं प्रशस्तमनस्कत्वं तत्प्रभृतिना लक्षणेन गुणेन लक्ष्यतेऽनेनेति लक्षणो धर्मः महापुरुषत्वं प्राप्तः ॥ ५ ॥ ६ ॥

महापुरुषत्वमेवाह । स वा इति । स वै गयः प्रजापरिपालनादिरूपेण स्वधर्मेण स्ववर्णधर्मेण तत्र पालनं भयात् पोषणमन्नपानादिना प्रीणनमर्थितप्रदानेन उपलालनं सुतवत् श्लाघनमनुशासनं कुमार्गान्निवारणं तथा इज्यादिना पञ्चमहायज्ञादिना स्वाश्रमधर्मेण च इज्याशब्दः पञ्चमहायज्ञपरः आदिशब्दो विवेकविमोकादीनामपि संग्राहकः चशब्द आत्मयाथात्म्यज्ञानयोगसमुच्चायकः इत्यादिकमाश्रमधर्मं विशिनष्टि । भगवति ब्रह्मणि परावरे महापुरुषे सर्वात्मना समर्पितपरमार्थलक्षणेनेति भगवति ब्रह्मणीति भगवद्ब्रह्मशब्दयोरेकविषयत्वमुक्तं भगवत्त्वं परावरत्वे हेतुः परे ब्रह्मादयोऽवरेऽवमा यस्मात्स परावरः तस्मिन् "यथा क्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति,,इति तत्क्रतुन्यायेनोपासितुर्महापुरुषत्वापादकं भगवदसाधारणमुपास्यं महापुरुषत्वमुक्तं महापुरुष इति सर्वात्मना सर्वप्रकारेण करणत्रयेणार्पितं समर्पितं परमार्थलक्षणं यत्फलस्वरूपं यस्मिंस्तेन अनभिसंहितफलत्वेनेत्यर्थः भगवत्परमार्थोऽभिलषितोऽर्थः फलमिति यावत् तल्लक्ष्यते येन सङ्केतार्पितः परमार्थलक्षणः सङ्गो यस्येति ममेदं कर्म न भवतीति तदित्युक्तसङ्गेनेति वार्थः ब्रह्मविश्वरणानुसेवयापादितभगवद्भक्तियोगेनेत्यस्य तत्रायमर्थः अर्पितपरमार्थलक्षणेन ओमित्यात्मानं युञ्जीतेत्युक्तविधात्मसमर्पणरूपशरणागतियोगाङ्गविशिष्टेनेति "तमेव शरणं गच्छ सर्वभावेन भारत ! मामेकं शरणं व्रज" इति भक्त्यङ्गतया शरणागते कर्तव्यताभिधानात् ब्रह्मविश्वरणानुसेवयापादितभगवद्भक्तियोगेनेत्यनेन भगवद्भक्तियोगोत्पत्तिःसत्सेवायत्तेत्युक्तं ब्रह्मविश्वरणानुसेवयेत्यनेन "देवमिवाचार्यमुपासीत आचार्यवान् पुरुषो वेद तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" इत्यादिश्रुतिविहिताचार्यसम्बन्धोऽस्याभिहितः ब्रह्मविदित्यनेनाचार्यलक्षणयुक्तगुरुसमाश्रयणमस्य सूच्यते स्वधर्मेणेत्यादिना ज्ञानकर्मयोगानुगृहीतेन न्यासयोगाङ्गकेन भक्तियोगेनेत्युक्तं भवति उक्तविधेन भगवद्भक्तियोगेनाभीक्ष्णशः पुनः पुनः परिभाविता विशोधितात एव विशुद्धामतिर्यस्य सः अत एव उपरतमनात्म्यं देहात्मभ्रमो यस्य स निवृत्तदेहात्मभ्रम इत्यर्थः आत्मेतरशरीरमनात्मा एवम्भूते स्वात्मनि उपलभ्यमानमन्तरात्मतया साक्षात्क्रियमाणं ब्रह्म तदेवात्मा परमात्मा तस्यानुभवो यस्य सः । यद्वा स्वान्तरात्मभूतब्रह्मैव परमात्मा तस्यानुभव उपलभ्यते येन तथोक्तः य आत्मनि तिष्ठन्निति प्रकारेण जीवात्मन्यवस्थितं परमात्मानमुपलभ्यमानमित्यर्थः एवम्भूतोऽपि निरभिमान एव देहात्मभ्रमस्वतन्त्रात्मरहित एव इमां भूमिमजूगुपत् अरक्षत् इत्यर्थः ॥ ७ ॥

गयस्य माहात्म्यप्रतिपादिकां गाथामवतारयति । तस्येति । हे पाण्डवेय ! पुराविदः पूर्वकालिकवृत्तान्ताभिज्ञाः तस्य गयस्येमां माहात्म्यसूचिकां गाथामुपगायन्ति ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

राजसन्ततौ विशिष्टराजज्ञानं भगवन्माहात्म्यज्ञानोपयोगीत्यतस्तज्ज्ञानायावशिष्टवंश्याननुक्रामत्यस्मिन्नध्याये। यमुहवावोति। उहवा वेति चतुर्भिर्निपातैर्वैदिकमतस्य वैभाषिकादिचतुर्द्धा भेदः सूच्यते अवेदो वेदविरुद्धः आगमस्तत्र प्रतिपादितां पद्मावतीत्यादिना मवतीम् ॥ १ ॥ २ ॥

तस्य देवपादेस्तनयः ॥ ३ ॥ ४ ॥ ५ ॥

हृदयज औरसपुत्रः अभिरक्षया जगद्रक्षाकारणेन गृहीतसत्त्वगुणस्य कलाया अंशस्य आत्मवत्ता मूर्त्तदेहवत्त्वेन प्रकाशमानं तस्याभिलक्षणेन विग्रहवत्कलांशेन करचरणादिचक्रचिन्हेन संवर्णीयमानत्वाद्गयः ॥ ६ ॥

स्वधर्मेणावनिमजूगुपद्दै इत्यन्वयः स्वधर्मेणेत्येतत्स्पष्टयति । प्रजापालनेति । सर्वात्मनेत्यादि च स्वधर्मेणेत्यस्य विशेषणं निर्व्याजेन सर्वसमर्पणाख्यचिन्हेन ब्रह्मविदां चरणनिरन्तरनिषेवया भक्तिसाधनमेतत् परिभावितं वशीकृतमत एव विशुद्धं सत्त्वमन्तःकरणं यस्य स तथा उपरतं निवृत्तमनात्म्यं देहधर्मो यस्मिंस्तथा तस्मिन् स्वात्मनि स्वहृदये उपलभ्यमानः अपरोक्षीक्रियमाणो ब्रह्मानुभावो यस्य स तथा अपीत्यनेन राज्यपालनं सम्भावितं न भवति तथापीत्यर्थं द्योतयति निरभिमान इत्यनेनानुपपत्तिं परिहरति ॥ ७ ॥

तस्येमां गाथामित्यनेन गीयमानत्वाद्गयेति शब्दार्थं सूचयति पुराविदः पुराणज्ञाः गाथां विषमाक्षरगुरुपादोपेतां तथोदाहरन्ति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कल्पयिष्यन्ति । अत्रामर्ष एव लट् ननु भविष्यति । तस्य कलेर्भूतत्वात् । तथा च सूत्रं "अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि" इति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

सवै इति । उपलभ्यमाने ब्रह्मण्यात्मानुभवोऽप्यजूगुपदित्यन्वयः तथापि गोपने हेतुः निरभिमान एव सन्निति ॥ ७—१२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अथ पञ्चदशे राज्ञो गयस्य महिमोच्यते ।
यः प्रियव्रतवंश्यानामन्त्योऽस्य विरजस्य च ॥

गयं नृपः कः प्रतियाति कर्मभिर्यज्वाऽभिमानी बहुविद्धर्मगोप्ता ।
समागतश्रीः सदसस्पतिः सतां सत्सेवकोऽन्यो भगवत्कलामृते ॥ ९ ॥
यमभ्यषिञ्चन् परया मुदा सतीः सत्याशिषो दक्षकन्याः सरिद्भिः ।
यस्य प्रजानां दुदुहे धराशिषो निराशिषो गुणवत्सस्नुतोधाः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कलौ तस्य चरितं श्रुत्वा तादृशाचारवन्तोऽस्माकं सुमतिरेव देवता यथा बुद्ध इति बौद्धसम्प्रदायाद्भिच्छिद्य कल्पयिष्यन्ति ॥ १—३ ॥

अनुसस्मार अनुबभूव प्राप वा ॥ ४ ॥

प्रतिहर्ता प्रस्तोता उद्गातेति त्रयः यज्ञनिपुणाः सूनव आसन् ॥ ५ ॥

इदंयजः पुत्रः कला अंशांशः ॥ ६ ॥

पालनं विपत्तविमर्द्दनादिना पोषणं वृत्तिदानादिना अर्पितः सन् परमार्थलक्षणो भवति यः स्वधर्मस्तेन परि सर्वतो भावेन भाविता भावयुक्तीकृता विशुद्धा मतिर्यस्य सः । उपरतमनात्म्यं देहाद्यहंभावो यस्य सः ॥ ७—८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भरतवंश्या नृपाः कीर्त्यन्ते । भरतस्यात्मजेति पञ्चदशेनाध्यायेन । यं सुमतिम् अवेदसमाम्नातां बुद्ध पदवायसदलीयाः इत्येवं बुद्धरूपां देवतां कल्पयिष्यन्ति ॥ १ ॥ २ ॥

तत्तस्य देवताजितः ॥ ३ ॥

आख्याय व्याख्याय तदधिकारिभ्यः ॥ ४ ॥

प्रतिहर्ता प्रस्तोता उद्गातेति त्रयः अजानिषातां जातौ ॥ ५ ॥

कला अंशः ॥ ६ ॥

प्रजापालनादिलक्षणेनेज्या यज्ञस्तदादिना ब्रह्मविच्चरणानुसेवया च विशेषतया सम्पादितभगवद्भक्तियोगेन कथम्भूतेन परं ब्रह्मादयोऽपि अवरे यस्मात्तस्मिन् सर्वात्मना अर्पितपरमार्थलक्षणेन निवेदितपरमप्रयोजनरूपेण परिभाविताऽतो विशुद्धा मतिर्यस्य सः अतः आत्मनि मनसि स्वयमेवोपलभ्यमाने ब्रह्मणि अविनि आत्मनः अंशस्य स्वस्य अनुभवो यस्य स तथाभूतोऽपि निरभिमानः एव अवनीमजूगुपत् ॥ ७ ॥ ८ ॥

भाषाटीका ।

श्रीशुकदेवजी बोले भरतजी के पुत्र सुमति कहे हैं जिनको कोई पाखण्डी लोग ऋषभजी के मार्ग में चलते जानकर स्वयं आप कुबुद्धि होने से अपनी पापी बुद्धि से कलियुग में वेदों से बाह्य देवता मूर्ति कल्पना करेंगे ॥ १ ॥

उस सुमति से वृद्धसेना भार्या में देवताजित्नाम का पुत्र भया ॥ २ ॥

तदनन्तर देवताजित्की आसुरी नाम भार्या में देवद्युम्न पुत्र भया तिस देवद्युम्न से धेनुमती भार्या में परमेष्ठी पुत्र भया उस परमेष्ठी से सुवर्चला भार्या में प्रतीह नाम का पुत्र भया ॥ ३ ॥

जिस प्रतीह ने बहुतों को आत्मविद्या का उपदेश किया फिर स्वयं शुद्ध होकर महापुरुष का स्मरण करने लगा ॥ ४ ॥

प्रतीह से सुवर्चला में प्रतिहर्त्रादिक तीन पुत्र यज्ञ में बड़े निपुण भये प्रतिहर्ता से स्तुति भार्या में अज भूमा दो पुत्र भये ॥ ५ ॥

भूमासे ऋषिकुल्या में उद्गीथ भया उद्गीथ से देवकुल्या मे प्रस्ताव पुत्र भया प्रस्ताव से नियुत्सा में विभु पुत्र भया विभुसे रति मे पृथुसेन भया पृथुसेनसे आकुती मे नक्तपुत्र भया नक्तसे द्रुति मे गय नाम के पुत्र भये वे राजर्षियों में श्रेष्ठ हैं उदारयश वाले हैं जगत्की रक्षा करने के लिये सत्त्वगुण को धारण करने वाले साक्षात् भगवान् के अंशावतार हैं सो आत्म ज्ञानी होकर महापुरुषता को प्राप्त भये ॥ ६ ॥

सो गय महाराज अपने धर्म से प्रजों का पालन पोषण प्रीणन उपलालन अनुशासन रूप धर्म से और यज्ञादि से स्थूल सूक्ष्म रूप महा पुरुष परब्रह्म सर्वान्तर्यामी परमार्थस्वरूप भगवान् मे सब कर्मों को अर्पण करके ब्रह्मज्ञानियों का चरण सेवन करके प्राप्त भया जो भगवद्भक्ति योग तिससे निरन्तर बुद्धिके शुद्ध होने से देहादि वस्तु रहित केवल आत्मा में अपने ब्रह्मानुभवको प्राप्त होकर भी निरभिमान से इस पृथिवी को पालन करते थे ॥ ७ ॥

हे पांडवेय ! परीक्षित जी ! उन गय महाराज की इस स्तुति को प्राचीन कथा के जानने वाले गान करते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कर्मभिर्गयं कः प्रतियात्यनुकरोति न कोऽपि । अत्र हेतुः । यज्वादिरूपी भगवत्कलां गयमृतेऽन्यः क इत्यनुषङ्गः । अभिमानी सर्वतो मानास्पदं मनस्वीति वा समागता सम्प्राप्ता श्रीर्येन यमिति वा सतां सदसः सभायाः पतिः सतां सेवकः । यद्वा । यज्वादिरूपोऽपि भगवत्कलामृते गयं कोऽन्यः प्रतियातीत्यन्वयः ॥ ९ ॥

सतीः सत्यः सत्या आशिषो यासां ताः दक्षकन्याः श्रद्धा-मैत्रीदयेत्याद्याः निराशिषोऽपि यस्य प्रजानामाशिषः कामान् धरा दुदुहे तस्य गुणा एव वत्सस्तेन स्नुतमूधो यस्याः पृथिव्याः यज्ञाद्यानां तं गयं कः प्रतियातीति सम्बन्धः ॥ १० ॥

छन्दांस्यकामस्य च यस्य कामान् दुदूहुराजह्रुरथो बलिं नृपाः ।
प्रत्यञ्चिता युधि धर्मेण विप्रा यदाशिषां षष्ठमंशं परेत्य ॥ ११ ॥
यस्याध्वरे भगवानध्वरात्मा मघोनि माद्यत्युरुसोमपीथे ।
श्रद्धाविशुद्धाचलभक्तियोगसमर्पितेज्याफलमाजहार ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

छन्दांसि वेदास्तद्विहितकर्माणि च दुदूहुर्दुदुहुः युधि प्रत्यञ्चिता बाणैः प्रतिपूजिता नृपा यस्य बलिमाजह्रुरर्पयामासुः । धर्मेण पालनेन दक्षिणादिभिश्च यदा प्रत्यञ्चिता विप्रास्तदा परेत्य लोकान्तरे आशिषां धर्मफलानां षष्ठमंशमाजह्रुः । "पुण्यषड्भागमादत्ते न्यायेन परिपालयन्" इति स्मृतेः ॥ ११ ॥

उरुसोमपीथे बहुसोमपानेऽध्वरे मघोनि इन्द्रे माद्यति मदं प्राप्नुवति सति श्रद्धया विशुद्धो योऽचलो भक्तियोगस्तेन समर्पितमिज्याफलमाजहार । अर्हणामिव प्रत्यक्षतः स्वीकृतवानित्यर्थः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गाथामेवाह । गयमिति पञ्चभिः । गयं नृपं कः पुमान् कर्मभिः प्रतियाति तत्सजातीयकर्मभिः कोऽपि पुमान्नानुकर्तुं शक्नोतीत्यर्थः तत्कृतं कर्म पुनरन्यः कर्तुं न प्रभवतीति यावत् तत्र हेतुं वदन्प्रतियानाशक्यधर्मवत्तामाह । यज्वा यावच्छ्रुतिविहितयज्ञानुष्ठाता अभितो मानी सन् मानास्पदः बहुशः वर्णाश्रमधर्माणां गोप्ता समागता सम्प्राप्ता श्रीः सम्पद्येन यस्मिन्निति वा सप्तमी सदसः सभायाः पतिः सतां सेवकश्चान्यो भगवत्कलां गयमृते यं विना यज्वादिगुणाश्रयः कोऽपि नास्तीत्यर्थः । यद्वा । यज्वत्वादिगुणविशिष्टोऽपि भगवत्कलां गयमृते कोऽन्यः प्रतियातीत्यन्वयः अस्मिन् पक्षे भगवत्कलात्वमेव प्रतियानशक्तो धर्मः ॥ ९ ॥

सतीः सत्यः सत्या आशिषो यासां ताः दक्षकन्याः श्रद्धामैत्रीदयाकीर्तिश्रीस्मृतिमेधाधृतितितिक्षाक्षमाद्याः सरिद्भिः स्वतेजोभिः समभ्यषिञ्चन् श्रेष्ठमकुर्वन् यस्य गयस्य निराशिषः निष्कामस्य प्रजानामाशिषः कामान् धरा दुदुहे धरा कथम्भूता तस्य गुणा एव वत्सास्तैः स्नुतमूधो यस्याः सा ॥ १० ॥

छन्दांसि च यस्य कामान्दुदुहुः नृपा युधि युद्धे प्रत्यञ्चिताः बाणैः प्रतिपूजिता बलिमाजह्रुरर्पयामासुः तथा धर्मेण धर्मपरिपालनेन दक्षिणादिभिश्च प्रत्यञ्चिता विप्राः परेत्य लोकान्तरे आशिषां धर्मफलानां षष्ठमंशमाजह्रुः "पुण्यात्षड्भागमादत्ते राजा न्यायेन पालयन्" इति स्मृतेः ॥ ११ ॥

यस्य गयस्याध्वरे यज्ञे गयकर्तृके यज्ञ इत्यर्थः मघोनीन्द्रे उरुः सोमपीथः यस्य तस्मिन् बहुसोमपानेऽत एव माद्यति मदं प्राप्नुवति सति उरुसोमपीथे इत्यध्वरस्य विशेषणं वा अध्वरात्मा यज्ञशरीरकः स भगवान् श्रद्धया विशुद्धो निष्कपटो योऽचलोऽन्तरायानुपहतो भक्तियोगस्तेन समर्पितमिज्याफलमाजहार भक्तियोगोपपादितं प्रीतिरूपमिज्याफलमर्हणामिव प्रत्यक्षतः स्वीकृतवानित्यर्थः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गयमित्यादिना अन्यः कः कर्मभिः गयं नृपं प्रतियाति प्रतिनिधिर्भवति कीदृशः यज्वेत्यादिगुणकर्मवान् सतां सदसस्पतिः कोऽपि नास्तीति नेत्याह । भगवत्कलामिति । भगवतां ज्ञानभक्त्या भाग्यवतां कर्मदेवानां कलामङ्गमेकमन्तरेण तदुक्तम् "प्रियव्रतो गयश्चैव कर्मदेवसमौ गुणैः" इति ॥ ॥ ९ ॥

सतीः सत्यः दक्षकन्याः कीर्तिः श्रीर्वाक् स्मृतिर्मेधा धृतिः क्षमेत्याद्याः स्वयंगुणवत्त्वेन स्नुतमूधो यस्याः सा तथा सा धरा गयस्य राज्ञः सतीनां प्रजानां यथेप्सिताः आशिषो दुदुहे वा इत्यनेन सकलजगद्वशीकरणशक्तिसमुद्रश्रीपुरुषोत्तममन्त्रसिद्धो गय इति सूच्यते ॥ १० ॥

वेदा अपि तदुक्तफलानिच्छत्वेऽपि सर्वाभीष्टान् दुदुहुरित्याह । छन्दांसीति । नृपान्विशिनष्टि । प्रत्याहृता इति । युद्धे पराजिता इत्यर्थः विप्रा धर्मे प्रत्याहृता धर्माभिमुखीकृताः प्रजाश्च यस्याशिषो धनलक्षणाः षष्ठमंशमाजह्रुरित्यन्वयः । अनुष्ठितपुण्यलक्षणाशिषो वा ॥ ११ ॥

उरुसोमपीथे बहुसोमपानेऽध्वरस्य सारमादत्ते कर्तृभ्यः फलं ददाति चेत्यध्वरात्मा मघोनि देवेन्द्रे माद्यति मदं गच्छति सति श्रद्धया विशुद्धो योऽचलो भक्तियोगस्तेन समर्पितमिज्याफलं यागादिपूजालक्षणकर्मफलमाजहार ददौ ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रतियाति अनुकरोति । अभिमानी सर्वतो मानास्पदं मनस्वीति वा सतां यत् सदस्तस्य पतिः भगवदंशं विना कोऽन्यो यज्वादिरूपोऽपि गयं प्रतियातीत्यन्वयः ॥ ९ ॥

सतीः सत्यः दक्षकन्याः श्रद्धामैत्रीदयाद्याः सत्याशिषः श्रद्धामैत्रीदयाद्यास्ते सन्त्विति सत्या आशिषो यासां ताः । निराशिषो निष्कामस्यापि यस्य प्रजानामाशिषो धरा दुदुहे । गुणा एव वत्सः तेन स्नुतमूधो यस्याः सा ॥ १० ॥

युधि प्रत्यञ्चिताः बाणैः प्रतिपूजिता नृपा बलिमाजह्रुः धर्मेण दक्षिणादिभिः प्रत्यञ्चिता विप्रा यदस्मै परेत्य लोकान्तरे आशिषां स्वाचरितधर्मफलानां षष्ठमंशमाजह्रुः । "पुण्यषड्भागमादत्ते न्यायेन परिपालयन्" इति स्मृतेः ॥ ११ ॥

यत्प्रीणनाद्बर्हिषि देवतिर्यङ्मनुष्यवीरुत्तृणमाविरिञ्च्यात् ।
प्रीयेत सद्यः स ह विश्वजीवः प्रीतः स्वयं प्रीतिमगाद्गयस्य ॥ १३ ॥

गयाद्गयन्त्यां चित्ररथः सुगतिरवरोधन इति त्रयः पुत्रा बभूवुश्चित्ररथादूर्णायां सम्राडजनिष्ट ॥ १४ ॥

तत उत्कलायां मरीचिर्मरीचेर्विन्दुमत्यां विन्दुमानुदपद्यत तस्मात् सरघायां मधुनामाऽभवन् मधोः सुमनसि वीरव्रतस्ततो भोजायां मन्थुप्रमन्थू जज्ञाते । मन्थोः सत्यायां भौवनस्ततो दूषणायां त्वष्टाऽजनिष्ट त्वष्टुर्विरोचनायां विरजो विरजस्य शतजित्प्रवरं पुत्रशतं कन्या च विषूच्यां किल जातम् ॥ १५ ॥

तत्रायं श्लोकः ।

प्रैयव्रतं वंशमिमं विरजश्चरमोद्भवः ।
अकरोदत्यलं कीर्त्या विष्णुः सुरगणं यथा ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां प्रियव्रतवंशानुकीर्तनं नाम
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

उरु सोमपीथे बहुसोमपानेऽध्वरे मघोनि इन्द्रे माद्यति सति आजहार अर्हणामिव प्रत्यक्षतः स्वीचकार ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवत्कलामृते यज्वादिरूपः कः नृपः गयं प्रतियाति अनुकरोति न कोऽपीत्यर्थः समागता संप्राप्ता श्रीर्ये तथाभूतोऽपि सतां सदसः सभायाः पतिः सतां सेवकोऽपि ॥ ९ ॥

सत्या आशिषो यासां ताः सतीः सत्यः दक्षकन्याः श्रद्धामैत्रीदयाकीर्तिस्मृतिमेधाद्याः सरिद्भिः सह यं मुदा अभ्यषिञ्चन् निराशिषः निष्कामस्यापि यस्य प्रजानामाशिषः कामान् गुणाः गयगुणाः एव वत्सास्तैः स्नुतमूधो यस्याः सा धरा दुदुहे तं कः प्रतियातीति सम्बन्धः ॥ १० ॥

यस्याकामस्यापि छन्दांसि वेदाः कामान् दुदुहुः अर्पयामासुः युधि प्रत्यञ्चिताः धर्मयुक्तेन पूजिताः यस्य बलिमाजह्रुः विप्राः यदा दानमानैः प्रत्यञ्चिताः तदा परेत्य लोकान्तरे आशिषां स्वपुण्यकर्मफलानां षष्ठमंशमाजह्रुः "पुण्यात्षड्भागमादत्से न्यायेन परिपालयन्" इतिस्मृतेः । यस्य गयस्य उरुसोमपीथे बहुसोमपाने अध्वरे यज्ञे मघोनि इन्द्रे माद्यति मदाविष्टे सति अध्वरस्य आत्मा आश्रयः स्वामी "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" इति श्रीमुखवचनात् श्रद्धया विशुद्धो निर्मलोऽचलो दृढो यो भक्तियोगस्तेन समर्पितमिज्याफलमाजहार साक्षादाविर्भूय महतादरेण गृहीतवान् ॥ ११ ॥ १२ ॥

भाषाटीका ।

यज्ञ करनेवाला होवै बडा मानीहोवै शास्त्रज्ञहोवै धर्मरक्षक होवै सब सम्पत्ति को प्राप्त होवै सभापति होवै सत्पुरुषोंका सेवकहोवै तौभी कौन ऐसा राजा है जोकि भगवान् के अंशावतार के विना गय महाराजकी तुल्यता को कर्मोंसे करसके ॥ ९ ॥

सत्य सम्पत्तिवाली सती दक्षकन्या श्रद्धा मैत्री आदिकों ने परम आनन्द से नदियों के जलों से जिनका अभिषेक किया है जिन गय महाराज के निष्काम होनेपरभी उनके प्रजाओं के मनोरथों को गुणरूपी वछरासे पिह्वाकर पृथिवी ने पूरण करदिये ॥ १० ॥

जिन राजाके निष्काम होने परभी वेदोंने सब मनोरथ पूरण करदिये और सबराजों ने युद्ध में सन्तुष्ट होकर भेट दे दिया और धर्म से प्रजापालन होनेसे ब्राह्मणादि प्रजोंने परलोक में धर्मका छठमां अंश दिया ॥ ११ ॥

जिनके यज्ञमें वडे सोमके पान करने से इन्द्रके मद होनेपर यज्ञमूर्ति विष्णु भगवान् ने श्रद्धा से विशुद्ध अचल भक्ति भाव से अर्पणकरे हुये यज्ञफल को साक्षात् ग्रहण किया ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यस्य भगवतः प्रीणनात् देवादीनां तृप्तिरेकश्रम । तत्सद्यः प्रीयेत प्रीतिं गच्छेत् स विश्वजीवः सर्वान्तर्यामी स्वयं प्रीतरूप

श्रीधरस्वामिकृतभावार्थदीपिका ।

एव बर्हिषि यज्ञ गयस्य ह स्फुटं प्रीतिमगात्तृप्तोऽस्मीति प्रत्यक्ष प्रीतिमाविष्कृतवानित्यर्थः ॥ १३ ॥ १४ ॥

सुमनसि स्त्रियाम् ॥ १५ ॥

कीर्त्या अतिशयेनालमकरोद्भूषितवान् ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम्

पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेव प्रपञ्चयति । बर्हिषि यज्ञे यत्प्रीणानाद्यस्य भगवतः प्रीणानादाचतुर्मुखं देवादि सद्यः प्रीयेत प्रीतं भवेत् देवादीनां कुतः हि यस्मात्स विश्वजीवः विश्वं जीवयतीति विश्वजीवः विश्वस्य प्राणभूतः एवम्भूतो भगवान् स्वयं प्रीतः निरतिशयप्रीतिविशिष्टः गयस्य प्रीतिमगात्प्राप्तः गयस्य प्रीतिविषयोऽभूदित्यर्थः अदादिति पाठे स्वयं गयविषयकनिरतिशयप्रीतियुक्तो भगवान् तस्यापि स्वविषयां प्रीतिं प्रीत्यात्मिकां बुद्धिमदादित्यर्थः

प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥
अदान्मे ज्ञानमैश्वर्यं स्वस्मिन् भावं च केशवः ।

इत्यादि वचनजातार्थोऽत्रानुसन्धेयः ॥ १३ ॥

एवं गयस्य महापुरुषतामुपपाद्य प्रस्तुतां सन्ततिमाह । गयादिति । गयाज्जयन्त्यां भार्यायां चित्ररथादयः त्रयः पुत्रा बभूवुस्तेषां मध्ये चित्ररथादूर्णायां भार्यायां सम्राडाख्यः पुत्रोऽजनिष्ट उत्पन्नस्ततः सम्राजः उत्कलायां भार्यायां मरीचिः मरीचेर्बिन्दुमत्यां बिन्दुमान्पुत्र उत्पन्नः तस्माद्बिन्दुमतः सुघेणायां भार्यायां मधुर्नामात्मजोऽभवत् मधोः सुमनसि भार्यायां त्वष्टा नाम पुत्रो जातः ततस्त्वष्टुर्विरोचनायां भार्यायां विरजोऽजायत जातः विरजस्य विरजाद्विषूच्यां भार्यायां शतजित्प्रवरो मुख्यो यस्य तत्पुत्राणां शतं जातं कन्या च जाता किलेति प्रसिद्धौ ॥ १४-१५ ॥

प्रियव्रतसन्तानमुपसंहरति । तत्रेति । तत्र प्रियव्रतसन्तानविषयेऽयं श्लोकः पठ्यते इति शेषः चरमोद्भवः चरमस्य पुत्रशतस्य शतजिदादेः उद्भवः उद्भवत्यस्मादित्युद्भवः जनको विरजः इममुक्तं प्रैयव्रतं वंशं कीर्त्याऽलमकरोदलङ्कृतवान् यथा विष्णुरुपेन्द्रः सुरगणमिन्द्रादिदेवतावर्गमिति ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां

पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यस्य हरेः प्रीणनाज्जगत्प्रीयेत प्रीतं स्यात् स्वयं स्वतः प्रीतः ॥ १३ ॥ १४ ॥

शतजिन्नामपुत्रः प्रवरो ज्येष्ठो यस्मात्तच्छतजित्प्रवरम् ॥ १५ ॥

अत्यलमतीवालमकरोत् ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विश्वजीवः सर्वजीवनहेतुः । स्वयं प्रीतः सुखरूपोऽपि ॥ १३-१६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यस्य भगवतः प्रीणनात् देवादिकं प्रीयेत स विश्वजीवैः सहित एव स्वयं प्रीतिरूपः सन् तृप्तोऽस्मीति प्रीतिमाविश्चकार ॥ १३—१६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमेऽयं पञ्चदशः सङ्गतः सङ्गतः सताम् ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यस्य भगवतः प्रीणनात् प्रसन्नतोत्पादनात् आविरञ्च्यात् विरञ्चिमभिव्याप्य देवादि सद्यः प्रीयेत प्रसन्नं भवेत् स विश्वजीवः सर्वान्तर्यामी स्वयं प्रीतः स्वभावतः प्रीतिरूप एव बर्हिषि यज्ञे गयस्य ह स्फुटं प्रीतिमगात् प्राप्तः गयं प्रति प्रसन्नोऽभूदित्यर्थः ॥ १३ ॥ १४ ॥

सुमनसि भार्यायाम् ॥ १५ ॥

विरजः प्रैयव्रतं वंशं कीर्त्या अतिशयेनालमकरोद्भूषितवान् विष्णुर्वामनः ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

पञ्चदशोऽध्यायः ॥ १५ ॥

भाषा टीका ।

जिन विष्णु भगवान् के तृप्त होने से यज्ञमें ब्रह्मा से लेकर देवतिर्यङ् मनुष्य लता तृण पर्यन्त शीघ्र तृप्तहोजाते हैं वो विश्वके पालन करने वाले भगवान् गयं महाराज के यज्ञ में प्रसन्न होगये ॥ १३ ॥

भाषाटीका।

गय से गयन्ती में चित्ररथ सुगति अवरोधन तीन पुत्र भये चित्ररथ से ऊर्णा में सम्राट् पुत्र पैदा भया ॥ १४ ॥

सम्राट् से उत्कला में मरीचि पुत्र भया मरीचि से विन्दुमती में विन्दुमान् उत्पन्नभया विन्दुमान् से सरघा में मधुनामक भया मधुसे सुमना में वीरव्रत भया वीरव्रत से भोजा में मन्थु प्रमंथु दोभये मन्थु से सत्यामे भौवन भया भौवनसे दूषणा मे त्वष्टा भया त्वष्टासे विरोचना मे विरज भया विरजके विषूची में सौ पुत्र भये तिनमे बडा शतजित् भया ॥ १५ ॥

तिस विषय में यह श्लोकहै वंशके अन्त मे पैदा होने वाले विरजने प्रियव्रतके वंशको कीर्ति से ऐसा शोभित किया जैसे वामन भगवान् विराजमान होकर देवगणों को शोभित करते थे ॥ १६ ॥

इति श्रीमद्भागवत पञ्चमस्कन्ध पञ्चदशाध्यायका भाषानुवाद लक्ष्मणाचार्यकृत समाप्त ॥ १५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पञ्चदशोऽध्यायः समाप्तः ॥ १५ ॥

॥ षोडशोऽध्यायः ॥

———:o:———

राजोवाच ।

उक्तस्त्वया भूमण्डलायामविशेषो यावदादित्यस्तपति यत्र चासौ ज्योतिषां गणैश्चन्द्रमा वा सह दृश्यते ॥ १ ॥

तत्रापि प्रियव्रतरथचरणपरिखातैः सप्तभिः सप्त सिन्धव उपक्लृप्ता यत एतस्याः सप्तद्वीपविशेष-विकल्पस्त्वया भगवन्! खलु सूचित एतदेवाखिलमहं मानतो लक्षणतश्च सर्वं विजिज्ञासामि ॥ २ ॥

भगवतो गुणमये स्थूलरूप आवेशितं मनो ह्यगुणेऽपि सूक्ष्मतम आत्मज्योतिषि परे ब्रह्मणि भगवति वासुदेवाख्ये क्षममावेशितुं तदुहैतद्गुरोऽर्हस्यनुवर्णयितुमिति ॥ ३ ॥

ऋषिरुवाच ।

न वै महाराज! भगवतो मायागुणविभूतेः काष्ठां मनसा वचसा वाधिगन्तुमलं विबुधायुषापि पुरुष-स्तस्मात्प्राधान्येनैव भूगोलकविशेषं नामरूपमानलक्षणतो व्याख्यास्यामः ॥ ४ ॥

यो वाऽयं द्वीपः कुवलयकमलकोशाभ्यन्तरकोशो नियुतयोजनविशालः समवर्तुलो यथा पुष्कर-पत्रम् ॥ ५ ॥

यस्मिन्नव वर्षाणि नवयोजनसहस्रायामान्यष्टभिर्मर्यादागिरिभिः सुविभक्तानि भवन्ति ॥ ६ ॥

एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजो मेरु-र्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्द्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोडशसहस्रं तावतान्तर्भूम्यां प्रविष्टः ॥ ७ ॥

उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रपृथव एकैकशः पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पूर्वोक्तद्वीपसिन्ध्वादिमानचिह्नस्वरूपतः ।
स्पष्टं प्रवक्तुमारब्धा पञ्चाध्यायी ततः परम् ॥ १ ॥
षोडशेऽधस्तथा चोर्ध्वं परितः सन्निवेशतः ।
मेरोः स्थितिर्मही कञ्जकर्णिका चोपवर्ण्यते ॥ २ ॥
प्रियव्रतचरित्रोक्तावुक्ता द्वीपादिकल्पना ।
तद्विशेषविजिज्ञासुः कथान्ते परिपृच्छति ॥ ३ ॥

उक्त इति । किं पर्यन्तमुक्तस्तदाह । यावदादित्यस्तपति यत्र चासौ शुक्लकृष्णपक्षयोर्नक्षत्रगणैः सह चन्द्रमा वा दृश्यते तावत् ॥ १ ॥

यतो येभ्यः सिन्धुभ्यः एतस्या भुवः सूचितः संक्षेपतो दर्शितः ॥ २ ॥

जिज्ञासायाः फलमाह । भगवत इति ॥ ३ ॥

या मायागुणविभूतिस्तस्याः काष्ठामन्तं रूपं संनिवेशः लक्षणं चिह्नम् ॥ ४ ॥

कुवलयं भूमण्डलं तदेव कमलं तस्य कोशाः सप्तद्वीपास्ते-ष्वभ्यन्तरकोशः प्रथमो जम्बूद्वीपो नियुतयोजनविशालो लक्ष-योजनविस्तीर्णः ॥ ५ ॥

नवयोजनसहस्रमायामो येषामायामोऽत्र विस्तारः एतच्च भद्राश्वकेतुमालव्यतिरेकेण द्रष्टव्यम् । तयोश्चतुस्त्रिंशद्योजनसह-स्रायामत्वात् केचित्तु नीलनिषधयोः संलग्नाग्रयोः समुद्रप्रवेश-मङ्गीकृत्य तयोरपि सङ्कुचितत्वेन नवसहस्रायामत्वं सम्पादयन्ति संनिवेशश्च वायुनोक्तः ।

धनुर्वत्संस्थिते ज्ञेये द्वे वर्षे दक्षिणोत्तरे ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

दीर्घाणि तत्र चत्वारि चतुरस्रमिलावृतम् ॥

इति ॥ ६ ॥

नाभ्यां मध्ये द्वीपस्यायामो लक्षयोजनप्रमाणं तावान् समुन्नाहः उच्छ्रायो यस्य मूले षोडशयोजनसहस्रं विततः तावता षोडशयोजनसहस्रमानेन चतुरशीतियोजनसहस्रमानेन च बहिर्दृश्यते एवं लक्षयोजनोन्नाहः ॥ ७ ॥

उत्तरोत्तरेणेलावृतमिलावृतस्योत्तरोत्तरतः क्रमेण नीलादयस्त्रयो मर्यादागिरयः प्रागायताः पूर्वतो दीर्घाः क्षारोद एवावधिर्येषां द्विसहस्रयोजनविस्तीर्णाः दशांशादीषदधिको योऽशस्तेन दैर्घ्य एव ह्रसन्ति नतूच्चत्वे पृथुत्वे वा यथोक्तं विष्णुपुराणे "लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथा परे" इति एतच्च स्थूलदृष्ट्यैवोक्तं तयोरपि यथावन्मध्यमत्वाभावेन लक्षप्रमाणत्वाभावात् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं श्रुतप्रियव्रतसंतानतच्चरित्रो राजा प्रियव्रतचरित्रे संग्रहेणाभिहितायां द्वीपादिकल्पनायां विशेषं कथान्ते उक्तानुवादपूर्वकं पृच्छति । उक्त इति । भूमण्डलस्यायामविशेषः दैर्घ्यविशेषः विशालतेति यावत् उक्तः किंपर्यन्त उक्तस्तदाह । यावदादित्यस्तपति यत्र चासौ शुक्लकृष्णपक्षयोर्नक्षत्रगणैः सह चन्द्रमा वा दृश्यते किंपर्यन्तमादित्यस्तपति चन्द्रमा वा दृश्यते तत्राह । यत्र भूमण्डलविस्तारे एतस्या भुवः सप्तद्वीपानां जम्ब्वादीनां ये विशेषाः नाममानलक्षणादयस्तेषां विकल्पः भेदो भगवन् ! त्वया सूचितः संग्रहेणोक्तः एतदेव भूमण्डलमखिलं मानतो लक्षणतश्चकारान्नामतश्चाहं सर्वं विस्तरतो विजिज्ञासामि ज्ञातुमिच्छामि किं तज्जिज्ञासयेत्यत्राह । भगवत इति । गुणमये सत्त्वादिगुणपरिणामरूपे भगवतः स्थूलरूपे आवेशितं मनः हि यस्मादगुणे सत्त्वादिगुणरहितेऽप्राकृत इति यावत् सूक्ष्मतमेऽङ्गुष्ठप्रमिते शुद्धसत्त्वमये रूपे तथात्मज्योतिषि स्वयं प्रकाशे परमात्मस्वरूपे ब्रह्मणि भगवद्वासुदेवादिशब्दवाच्ये आवेशितुमासक्तं क्षममलम् भवेदतो जिज्ञासामि ततो मम जिज्ञासुत्वाद्धे गुरो ! एतद्भूमण्डलमानलक्षणादिभिरनुवर्णितुमर्हसि ॥ १—३ ॥

इत्यापृष्टो बादरायणिस्तावद्भगवद्विभूतेरनन्तत्वात्कार्त्स्न्येन वाङ्मनसयोरविषयतां वदन्मानादिभिर्भूमण्डलवर्णनं प्रतिजानीते । नवा इति । हे महाराज ! भगवतो मायागुणानां विभूतिः सत्त्वादिगुणपरिणामानन्तब्रह्माण्डात्मिका लीलाविभूतिस्तस्याः स्थानविशेषाणां विभूत्यन्तर्गतलोकानामित्यर्थः काष्ठामन्तं नामरूपतः नामरूपाभ्यां मनसा वचसा वाऽधिगन्तुं ज्ञातुं वक्तुं च पुरुषायुष्येणापि पुरुषो नालं न प्रभुः स्थानविशेषाणामानन्त्यादिति भावः तस्मात् कार्त्स्न्येन वाङ्मनसाविषयत्वात्प्राधान्येन भूगोलस्य विशेषमवान्तरभेदं नाममानलक्षणैः व्याख्यास्यामः प्रकटयिष्याम इति ॥ ४ ॥

तदेवाह । यो वा इति । प्रसिद्धोऽयं द्वीपो जम्बूद्वीपः कुवलयं भूमण्डलं तदेव कमलं तस्य कोशाः सप्तद्वीपाः तेष्वभ्यन्तरः अन्तरवर्ती कोशः जम्बूद्वीप इत्यर्थः स नियुतयोजनविशालः लक्षयोजनविस्तीर्णः समवर्तुलः समो वर्तुलश्च वर्तुलत्वेन कोणाभावात्सर्वतः समपरिमाण इत्यर्थः यथा पुष्करस्य पत्रं कमलपलाशं समवर्तुलं तथेति यस्मिन् जम्बूद्वीपे वर्षाणि प्रत्येकं नवयोजनसहस्रमायामो येषां तानि आयामोऽत्र विस्तार एतच्च भद्राश्वकेतुमालव्यतिरेकेण द्रष्टव्यं तत्सन्निवेशश्चान्यत्रोक्तः "धनुर्वत्संस्थिते ज्ञेये द्वे वर्षे दक्षिणोत्तरे । दीर्घाणि तत्र चत्वारि चतुरस्रमिलावृतम्,,इत्यादिना अष्टभिः समर्पितैः नीलश्वेतशृङ्गवन्निषधहेमकूटहिमालयमाल्यवद्गन्धमादनाख्यैः सुष्ठु विभक्तानि असङ्कीर्णानि भवन्ति वर्तन्ते तेषां नवानां वर्षाणां मध्ये इलावृतं नाम वर्षमभ्यन्तरमन्तर्विद्यते इत्यर्थः यस्य जम्बूद्वीपस्य इलावृतवर्षस्य वा नाभ्यां मध्येऽवस्थितः सौवर्णः सुवर्णमयः कुलगिरीणां राजा मेरुः द्वीपस्य जम्ब्वाख्यस्यायामो विस्तारः लक्षयोजनप्रमाणस्तावत्समुन्नाहः उच्छ्रायो यस्य तथाभूतः कुवलयं भूमण्डलमेव कमलं तस्य कर्णिकाभूत इव स्थितः तस्य मेरोर्मूर्द्धा उपरिभागः द्वात्रिंशत्सहस्रयोजनविस्तीर्णः मूले षोडशसाहस्राणां योजनानां यस्य सः सुमेरुरिति विशेष्यानुषङ्गः योजनमिति नपुंसकपाठे तस्य मेरोर्मूले षोडशसहस्राणां योजनानां समाहारः षोडशसहस्रयोजनं परिमाणं वेदितव्यमित्यर्थः पात्रादित्वात्स्त्रीत्वाभावः तावता षोडशसहस्रमानेन भूम्यामन्तःप्रविष्टः एवं लक्षयोजनोन्नाहः सुमेरुरिति फलितम् ॥ ५ ॥ ६ ॥ ७ ॥

उत्तरेणेलावृतम् इलावृतवर्षस्योत्तरोत्तरं क्रमेण नीलश्वेतशृङ्गवत्संज्ञका रम्यकादीनां त्रयाणां वर्षाणां मर्यादागिरयः सीमापर्वताः प्रागायताः पूर्वतो दीर्घाः उभयतः पूर्वपश्चिमयोः क्षारोदो लवणसमुद्र एवावधिर्येषां ते लवणोदधिपर्यन्ता इत्यर्थः द्विसहस्रयोजनविस्तीर्णाः दशांशादधिको योऽशस्तेन दैर्घ्य एव ह्रसन्ति न तूच्चत्वपृथुत्वयोः नीलादिषु त्रिषु पूर्वपूर्वापेक्षया उत्तरोत्तरस्य दैर्घ्यं दशांशादधिकांशेन न्यूनमित्यर्थः द्वीपस्य मण्डलाकारत्वादिति भावः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भूवलयतद्विशेषज्ञानं श्रीनारायणमहिमोपलक्षणत्वात्तदावश्यकं मोक्षोपयोगीत्यतस्तत्परिमाणादि वर्णयति । पञ्चस्वध्यायेषु । तत्र परीक्षिद्विशेषतोऽपि ज्ञातुमुक्तानुवादपूर्वकं श्रीशुकं पृच्छति । इत्युक्त इति । आदित्यो यावत्पर्यन्तं तपत्यसौ चद्रमाश्च यत्र ज्योतिषा नक्षत्राणां गणैः सह दृश्यते त्वया भूमण्डलायामविशेषस्तावानित्युक्तः ॥ १ ॥

तत्र भूमण्डलेऽपि प्रियव्रतेत्यनेन यो वा इहेत्येतदनुवदति । यत एतस्या इत्यनेन । यत एवं कृता इत्येतदनुवदति अयमाशयः प्रियव्रतस्य रथचरणनेमिनैशित्यपरिखाताः सप्त सिन्धव आसन्यास्तस्य रथचरणनिशितपर्यन्तसीतोत्थितपर्यस्तमृत्तिकाघनपङ्कवस्तत्परिखापर्यवान्तरप्रदेशवर्तिन्यस्ताः सप्त द्वीपा आसन् तेषां नामानि कथितानीति सूचित इत्यनेन विशेषो नोक्त इति ततः किं तत्राह । एतदिति । खिलमुर्वरितं यथा न भवति तथा निखिलमन्तराले एतदुपयोग्येव नान्यदित्यर्थे एवशब्दः मानं परिमाणं लक्षणं वर्तुलचतुरस्राकारादि न केवलमिदमेव किन्तु यत्सप्तसागरादिभ्यः परस्तात्काञ्चनभूम्यादिकं तदपि न केवलं तावतालमपि तु तत्रापि विद्यमानं सर्वमनुवर्णीकृत्यैतदभिप्रायेण पुनश्च सर्वशब्दप्रयोग इत्यर्थः जिज्ञास्याभीत्यनेन ज्ञानेच्छैव न तु विचार इत्यतः परस्मपदप्रयोगः अहमित्यनेना-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

न्येषां प्रयोजनसद्भावेऽपि ममातीव प्रयोजनमिति सूचयति । अन्यथा जिज्ञास्यामीति सामान्योक्त्यसम्भवात् ॥ २ ॥

किं तदतीव प्रयोजनमिति विवृत्य दर्शयति । भगवत इति । इतः पूर्वं गुणमये सत्त्वादिगुणविरचिते स्थूलरूपे पातालाद्यचेतनावयवविशिष्टे आवेशितं निधायाभ्यस्तं विशेषस्मरणसमर्थं हि यत्तन्मनोऽगुणेऽपि सत्त्वादिगुणप्रवृत्तिशून्येऽपि सच्चिदानन्दाकारे अत एव सूक्ष्मे अनुग्रहमन्तरेणादृश्ये तर्हि किं तमोरूपं नेत्याह । आत्मज्योतिषि स्वयंप्रकाशे किंनाम्नि परे ब्रह्मणि परब्रह्मसंज्ञे भगवति ऐश्वर्यादिगुणपूर्णे वैदिकमन्तरेण लौकिकं नाम किं तत्राह । वासुदेवाख्ये अनेनात्र किंवदन्तीप्रमाणमिति सूचितमावेशितुं क्षमं समर्थं तदेतदेव हेत्यनेनान्यत्र "नापृष्टः कस्यचिद्ब्रूयात्" इत्यनपेक्षामाह ॥ ३ ॥

मायागुणविभूतेः प्रकृतिगुणप्रवृत्तये यद्विविधं भवनं बहुरूपग्रहणं यस्य स तथा तस्य महिमागुणविभूतेर्वा काष्ठामवसानं पूर्तिलक्षणां विबुधायुषेण द्विपरार्द्धलक्षणेन ॥ ४ ॥

यो जम्ब्वाख्यः पूर्वपश्चिमाभ्यां दक्षिणोत्तराभ्यां पार्श्वाभ्यां सामुद्रं जलं पिबतीति द्वीपः तद (१) भावे तरणिकिरणसन्तापेन घनीभावं मुक्त्वा परमाण्ववशेषेण द्वीपस्थितजनस्याधाराभावेन जलमज्जनेन सर्वनाशप्रसङ्गः स्याद्दीर्घः निपातनात्साधुरिति सोऽयं नियुतयोजनविशाल एकादशस्थानादिसंख्याक्रमेण नियुतसंख्यायाः लक्षसंख्यात्वं ज्ञायते तेन लक्षयोजनेन विस्तार इति परिमाणमुक्तं भवति शृङ्गग्राहिकयैव तत्प्रकारं ज्ञापयति कुवलयं भूमण्डलं तदेव कमलं तस्य कोशस्येतरद्वीपलक्षणस्याभ्यन्तरकोशोऽन्तःस्थितकोशवद्वर्त्तमानः लक्षणमाह । समवर्तुलः अत्र दृष्टान्तमाह । यथा पुष्करपत्रम् अन्तरकोशदलान्यन्तराले विरलानि भवन्ति न तथा पुष्करपत्रमेकत्वेन विच्छेदाभावादित्यरुच्या पद्मपत्रोदाहरणं वा इत्यनेनेदमेव मानादिकं नान्यत्रोक्तमिति विशदयति ॥ ५ ॥

यस्मिन्द्वीपे ॥ ६ ॥

येषां वर्षाणां यस्येलावृतस्य नाभिस्थाने मध्य इत्यर्थः जम्बूद्वीपस्य यावान् लक्षयोजनपरिमित आयामस्तावान् समुन्नाह उच्छ्रायो यस्य स तथा लक्षयोजन उच्छ्रित इत्यर्थः मानमुक्त्वा लक्षणमाह । कर्णिकाभूत इति । भूमण्डललक्षणपद्मस्य कर्णिकास्थानीयः ननु नियुतयोजनविशालो द्वीपो द्वीपान्यामसमुन्नाह इत्येतत्कथं विरुद्धं स्यात् "चतुराशीति साहस्रयोजनानां समुच्छ्रय" इति पराशरवचनं जागर्तीति चेन्न तद्विदृगिति श्रेयन वाच्यं न च तत्कथ्यते "पश्यन्तोऽपि न जानन्ति मेरो रूपं विपश्चित" इति वचनात् पराशरस्यान्यथाज्ञानसम्भवादिन्द्रस्तु वर्तुलाकारं पद्मकोशं बृहस्पतिरितीन्द्रादीनामप्यज्ञानकथनाच्च "ऋषिर्विकावर्णी स्यात्" इतिवचनाद्भगवत्प्रसादापक्षानपराशरवचनस्यान्यथा ज्ञानमूलत्वमप्रमाणमिति साहसमिति चेन्न प्रामाणिकत्वात्पराशरमानमन्तरेणान्येषां तत्र तथाज्ञानदर्शनाच्च नन्वेवं निरासलक्षणधर्ममन्तरेणैकवाक्यत्वाङ्गीकारे महाप्रहर्षः स्यादिति चेन्न नैवं तर्हि शृणु प्रविष्टः षोडशाधस्ताविति योजनाप्रमाणात् ननु तावतान्तर्भूम्यां प्रविष्ट इति मेरोर्लक्षयोजनोच्छ्रायादधिकपरिमाणोक्तेरिति चेन्न भूमिप्रविष्टरूपेण सह लक्षयोजनोच्छ्रायोपपत्तेः

(१) जलपानाभावे ।

वचनलाघवाय मूले षोडशसहस्र इति प्रस्तावे तावतेत्युक्तत्वात् दूरस्थग्रहणानुपपत्तिपरिहारोपपत्तेः किञ्च चतुराशीतीत्यत्र चतुरशीतीति वक्तव्ये आकारग्रहणात् कश्चिद्विशेषोऽस्तीति ज्ञायते स भागवतोक्त एव ग्राह्यः न ज्ञानापारवारिधेर्व्यासस्य वचनस्यान्यथात्वं शक्याशङ्कं तथाच भागवतोक्तप्रकारेण भुवनकोशादिकं ग्राह्यं तथाचोक्तम् ।

> यथा भागवते तूक्तं भौवनं कोशलक्षणम् ।
> तस्याविरोधतो योज्यं सर्वग्रन्थान्तरस्थितम् ॥
> मण्डोदे पूरणं चैव व्यत्यासं क्षीरसागरे ।
> राहुसोमरवीणाञ्च मण्डलाद्द्विगुणोक्तिताम् ॥
> विनैव सर्वमुन्नेयं योजनाभेदतोऽत्र त्विति ॥ ७ ॥

इलावृतारवखण्डादुत्तरोत्तरेण शृङ्गैः पूर्वस्यां दिशि भुग्नाववस्थिताः प्रागायताः द्विसहस्रपृथवः द्विसहस्रयोजनविस्ताराः दैर्घ्य एव ह्रसन्ति नोर्ध्वपृथुत्वे ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भगवतो गुणमयमित्यादौ भगवत्त्वन्तु गुणातीतमित्याायातम् ॥ १—४ ॥

नियुतशब्दोऽत्र दशलक्षवाचकोऽपि कथञ्चिदेकलक्षं वक्ति तत् सन्निहितत्वात् ॥ ५ ॥

टीका दर्शिता मतभेदाः सृष्टिभेदेन ज्ञेयाः ॥ ६—२९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

> जम्बूद्वीपस्य वर्षाणां शैलानां मध्यवर्त्तिनः ।
> सुमेरोश्च प्रमाणं यत् षोडशे तन्निगद्यते ।

प्रियव्रतचरिते श्रुतस्य द्वीपसमुद्रादेः प्रमाणादिकं तत् कथाप्रकरणान्ते पृच्छति । उक्त इति । तपति प्रकाशयति तत्पर्यन्त इत्यर्थः यत्र यत्र चन्द्रमा दृश्यते तावत्पर्यन्तश्च तत्रापि तन्मध्य इत्यर्थः ॥ १ ॥

यतः सिन्धुभ्यः । एतस्या भुवः सप्तद्वीपानां ये विशेषास्तेषां विकल्पो भेदः प्रभेदः एतत् सिन्धुद्वीपादिकम् ॥ २ ॥

जिज्ञासायाः फलमाह । भगवत इति । अत्र मयेति कर्तृपदानुक्त्या तत्रस्थानां भक्तिमिश्रयोगवतां मनोनिवेशानुरोधेनैव मयैतत् पृच्छ्यते मम तु त्वन्मुखकमलस्यन्दमानभगवत्कथारूपमकरन्दस्य कर्णाभ्यां पानमेव भगवत्प्राप्तिसाधनमिति द्योतितं किञ्च इह भगवतो गुणमये स्थूलरूप इति भेदबोधिकया षष्ठ्या अगुणे भगवतीत्यभेदबोधकेन सामानाधिकरण्येन च भगवत्त्वस्य गुणातीतत्वं बोधितम् । गुरो इति तव सर्वमुनिजनगुरुत्वादवश्यवक्तव्यमेवैतदिति भावः ॥ ३ ॥

काष्ठामन्तं रूपं सन्निवेशः । लक्षणं चिह्नम् ॥ ४ ॥

वै निश्चयेन कुवलयं भूमण्डलं तदेव कमलं तस्य कोशमण्डलतया स्थिताः सप्तद्वीपास्तेष्वभ्यन्तरः कोशो योऽयं इत्थंमानो जम्बूद्वीपः स नियुतयोजनविशालः लक्षयोजनविस्तीर्णः ॥ ५ ॥

नवयोजनसहस्रमायामो येषां आयामोऽत्र विस्तारः अष्टभिर्हिमालयादिभिः सन्निवेशस्तु वायुनोक्तः ।

> धनुर्वत्संस्थिते ज्ञेये द्वे वर्षे दक्षिणोत्तरे ।
> दीर्घाणि तत्र चत्वारि चतुरस्रमिलावृतम् इति ॥

एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयोऽयुतयोजनोत्सेधा हरिवर्षकिम्पुरुषभारतानां यथा संख्यम् ॥ ९ ॥

तथैवेलावृतमपरेण पूर्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

दक्षिणोत्तरे भारतोत्तरकुरुवर्षे चत्वारि किम्पुरुषहरि- वर्षरम्यकहिरण्मयानि वर्षाणि नीलनिषधयोस्तिरश्चीनीभूय समुद्रप्रविष्टयोः संलग्नत्वमङ्गीकृत्य भद्राश्वकेतुमालयोरपि धनुराकारत्वम् । अतस्तयोर्दैर्घ्यतो एव मध्ये सङ्कुचितत्वेन नवसहस्रायामत्वम् । इलावृतस्य तु मेरोः सकाशात् चतुर्दिक्षु नवसहस्रायामत्वं सम्भवेत् वस्तुतस्त्विलावृतभद्राश्वकेतुमालानां चतुस्त्रिंशत्सहस्रायामत्वं ज्ञेयम् ॥ ६ ॥

नाभ्यां मध्ये द्वीपस्यायामो लक्षयोजनप्रमाणः । तावान् समुन्नाह उच्छ्रायो यस्य सः षोडशसहस्रं वितत इति शेषः तावता षोडशसहस्रमानेन । अतश्चतुरशीतिसहस्रयोजनोच्छ्रितो भूमितो दृश्यते ॥ ७ ॥

उत्तरोत्तरेण इलावृतम् इलावृतस्योत्तरत्र उभयतः पूर्वपश्चिमदिशोः पृथुर्विस्तारः एकैकस्मादिति नीलः किञ्चिन्न्यूनलक्षयोजनो दैर्घ्येण तस्मात् श्वेतः शृङ्गवांश्च दशांशादीषदधिको योऽशस्तेन ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रियव्रतचरित्रवर्णने संक्षेपेण द्वीपादिकं श्रुत्वा तद्विस्तरं श्रोतुं पृच्छति । उक्त इति । ज्योतिषां गणैः सह असौ चन्द्रमा दृश्यते ॥ १ ॥

यतो येभ्यः सिन्धुभ्यः ॥ २ ॥

जिज्ञासाप्रयोजनमाह । भगवत इति । गुणमये स्थूलरूपे विराजि आवेशितं मनोऽगुणे प्राकृतगुणरहिते अप्राकृते रूपे तथा आत्मज्योतिषि प्राकृताप्राकृतविग्रहवति आवेशितुं क्षमं स्यात् ॥ ३ ॥

मायागुणविभूतिः भूगोलादिरूपा तस्याः स्थानविशेषाणां काष्ठामन्तम् ॥ ४ ॥

अयं प्रसिद्धो यो जम्बूद्वीपः सः कुवलयं भूमण्डलं तदेव कमलं तस्य कोशेषु सप्तद्वीपेषु अभ्यन्तरः कोशो नियुतयोजनविशालः लक्षयोजनविस्तीर्णः ॥ ५ ॥

यस्मिन् जम्बूद्वीपे प्रत्येकं नवयोजनसहस्रमायामो येषां तानि नव वर्षाणि भवन्ति आयामशब्दोऽत्र विस्तारपरः एतच्च छिन्न्यायेन बहुत्वेव द्रष्टव्यं तन्मध्यगतस्य सप्तमस्य वर्षत्रयात्मकस्य चतुस्त्रिंशद्योजनविस्तारयुक्तत्वं षण्णां वर्षाणां मर्यादागिरिसहितानां षड्‌विंशयोजनविस्तारयुक्तत्वमेवं लक्षयोजनानि भवन्ति सन्निवेशस्तु वायुनोक्तः ।

धनुर्वत्संस्थिते ज्ञेये द्वे वर्षे दक्षिणोत्तरे ।

दीर्घाणि तत्र चत्वारि चतुरस्रमिलावृतम् इति ॥ ६ ॥

यस्य इलावृतस्य नाभ्यां मध्ये मेरुरवस्थितः द्वीपस्य जम्बूद्वीपस्यायामो लक्षयोजनविस्तारः तावत्समुन्नाह उच्छ्रायो यस्य सः तावता षोडशसहस्रयोजनमानेन ॥ ७ ॥

उत्तरोत्तरेणेलावृतमिलावृतस्योत्तरोत्तरतः ॥ ८ ॥

भाषा टीका ।

महाराज ! परीक्षितजी बोले आपने भूमण्डल का विस्तार कहा जहां पर्यन्त सूर्यनारायण प्रकाश करते हैं और नक्षत्रादिकों के सहित जहां चन्द्रमा दीखता है ॥ १ ॥

तहांपरभी प्रियव्रतके रथ के पहियों से सात समुद्र कल्पित भये हैं जिससे इस पृथिवी के सातद्वीपों के विशेष का भेद भगवन् ! आपने सूचित किया है इसको हम प्रमाणसे और लक्षण से सब जानना चाहते हैं ॥ २ ॥

हे गुरो ! गुणमय भगवान् के इस स्थूलरूप में प्रवेश किया जो मन है सोई मन सूक्ष्मतम आत्मज्योति परब्रह्म भगवान् वासुदेव मेंभी प्रवेश करा जासका है इस हेतुसे आप इसवात को वर्णन कीजिये ॥ ३ ॥

ऋषि श्रीशुकदेवजी बोले हे महाराज ! मायागुण विभूति वाले भगवान् के अन्त को मनसे या वचनसे जानने को देवताओं के आयु से भी कोई समर्थ नहीं है तिस हेतु से प्रधानता से भूगोल विशेषको नामरूप प्रमाण लक्षणसे हम कहेंगे ॥ ४ ॥

जो यह जम्बूद्वीप है सो कमल रूपी पृथिवी के कली सरीके सात द्वीपों के मध्यमे कली सरीका है सो लक्षयोजन का चौडा है चारों तरफ से गोल है जैसे कमल का पत्र होता है ॥ ५ ॥

जिस द्वीप मे नौ वर्ष हैं सब नौ नौ हजार योजन के विस्तार वाले हैं आठ मर्यादा के पर्वतों से अलग विभाग किये गये हैं ॥ ६ ॥

इन वर्षों के मध्यमे इलावृत नामक बीच का वर्ष है जिसके नाभिमे स्थित चारों ओर से सुवर्णमय सब पर्वतों का राजा जम्बूद्वीप के विस्तारके बरोबर ऊंचा पृथिवी कमलका कर्णिका रूप मेरुपर्वत है शिखरपर बत्तीसहजार योजन चौडा है पृथिवीपर जडमे सोला हजार चौडा है सोला ही हजार योजन जमीन के भीतर पैठा है ॥ ७ ॥

उस सुमेरुके उत्तर मे इलावृत वर्षके आगे नील श्वेत शृङ्गवान् ये तीन पर्वत हैं सो रम्यक हिरण्मय कुरु इन वर्षों के मर्यादा सीमाके पर्वत हैं सो पूर्व पश्चिम दोनो क्षार समुद्र पर्यन्त लम्बे हैं दो हजार योजन चौडे हैं परन्तु पहिले पर्वत से दूसरा तीसरा लम्बाई मे दशमा अंशमे से एक हिस्सा कम हैं ऊंचे तो सब दश हजार योजन के हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अयुतयोजन उत्सेध उच्छ्रायो येषाम् अयं चोत्सेधो नीलादीनामपि द्रष्टव्यः नीलादिपृथुत्वं चैषामपि द्रष्टव्यं यथासंख्यं मर्यादागिरय इति शेषः ॥ ९ ॥

मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टम्भगिरय उपक्लृप्ताः ॥ ११ ॥

चतुर्ष्वेतेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपप्रवराः पर्वतकेतव इवाधिसहस्रयोजनोन्नाहास्तावद्विटपविततयः शतयोजनपरिणाहाः ॥ १२ ॥

ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजला यदुपस्पर्शिन उपदेवगणा योगैश्वर्याणि स्वाभाविकानि भरतर्षभ ! धारयन्ति ॥ १३ ॥

देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति ॥ १४ ॥

येष्वमरपरिवृढाः सह सुरललनाललामयूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरन्ति ॥ १५ ॥

मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतशिरसो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि पतन्ति ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

माल्यवद्गन्धमादनौ ... नीलनिषधायतौ उत्तरतो नीलपर्यन्तं दक्षिणतो निषधपर्यन्तं च दीर्घौ पृथक्चतुर्विस्तीर्णौ भवतः तावेव केतुमालभद्राश्वयोर्वर्षयोः सीमानं कुर्वाते नन्वेवं सति पूर्वापररेखायामिलावृतवेष्टितो मेरुर्मध्ये ततः पूर्वापरतो गिरिद्वयं वर्षद्वयं च नातः किञ्चिदस्ति दक्षिणोत्तररेखायां तु तथैवेलावृतवेष्टितो मध्ये मेरुरुभयतस्त्रीणि वर्षाणि गिरयश्च षट् तत्कथं सर्वतो लक्षप्रमाणत्वं जम्बूद्वीपस्य । उच्यते मेरोः षोडशसहस्राणि सर्वतः स्थितत्वादिलावृतस्याष्टादश अन्येषां षण्णां चतुष्पञ्चाशत् गिरीणां षण्णां द्वादशेत्येवं दक्षिणोत्तररेखायां तावल्लक्षं पूर्वापररेखायामपि सुमेरोरिलावृतस्य चतुस्त्रिंशत् गिर्योश्चत्वारि शेषाणि द्विषष्टिसहस्राणि पूर्वापरवर्षयोरासमुद्रं दैर्घ्यं द्रष्टव्यमतो न विरोधः ॥ १० ॥

अयुतयोजनप्रमाणौ विस्तारोन्नाहौ येषां विस्तीर्णमूर्ध्नो मेरोरवष्टम्भत्वात्पूर्वपश्चिमौ गिरी दक्षिणोत्तरविस्तारौ दक्षिणोत्तरौ च पूर्वापरविस्तारौ द्रष्टव्यौ सर्वतो दशयोजनसहस्रविस्ताराङ्गीकारे त्विलावृतलोपात्पूर्वोक्तेलावृतमुपप्लावयतीत्यादिविरोधः स्यात् ॥ ११ ॥

अधिसहस्रमेकादशशतानि उन्नाहो येषां तावत्प्रमाणा विटपविततिर्येषां शतयोजनं परिणाहो विस्तारो येषाम् ॥ १२ ॥

यदुपस्पर्शिनो यत्सेविनः ॥ १३—१४ ॥

ललामो भूषणं सुरललनानां भूषणभूताः श्रेष्ठा याः स्त्रियस्तासां यूथस्य पतयः सह सम्भूय येषु विहरन्ति ॥ १५ ॥

एकादशशतयोजनमुत्तुङ्गो यो देवचूतस्तस्य शिरसः सकाशात् फलप्रमाणमुक्तं वायुपुराणे ।

अरत्नीनां शतान्यष्टावेकषष्ट्यधिकानि च ।
फलप्रमाणमाख्यातमृषिभिस्तत्त्वदर्शिभिः ।

इति ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं दक्षिणेनेलावृतमिलावृतवर्षस्य दक्षिणतः निषधादयस्त्रयः पर्वताः क्रमेण नीलादिभिः समपरिमाणा अयुतयोजनं उत्सेध उच्छ्रायो येषां ते अयं चोत्सेधो नीलादीनामपि द्रष्टव्यः नीलादिषु पृथुत्वं चैषामिति द्रष्टव्यं हरिवर्षादीनां त्रयाणां यथासङ्ख्य मर्यादागिरयः ॥ ९ ॥

तथेलावृतमपरेणेलावृतस्यापरेण पश्चात्पूर्वेण पुरस्ताच्च माल्यवद्गन्धमादनावपरेण माल्यवान् पूर्वेण गन्धमादनः इत्येतौ पर्वतौ क्रमेणानीलनिषधायतौ उत्तरतो नीलपर्यन्तं दक्षिणतो निषधपर्यन्तं च दीर्घौ नीलनिषधपर्यन्तोत्तरदक्षिणावित्यर्थः तावेव द्विसहस्रपृथू विस्तीर्णौ इत्यर्थः । तावेव केतुमालभद्राश्वयोर्वर्षयोः सीमानं मर्यादां विदधाते कुरुतः नन्वेवं सति पूर्वापररेखायामिलावृतवेष्टितो मेरुर्मध्ये ततः पूर्वापरतो गिरिद्वयं वर्षद्वयं च नातः किञ्चिदस्ति दक्षिणोत्तरदिशायां च तथैवेलावृतवेष्टितो मेरुर्मध्ये उभयतस्त्रीणि वर्षाणि गिरयश्च तत्कथं सर्वतो लक्षप्रमाणत्वं जम्बूद्वीपस्य । उच्यते मेरोः षोडशसहस्राणि सर्वतः स्थितत्वादिलावृतस्याऽष्टादश अन्येषां षण्णां वर्षाणां चतुष्पञ्चाशद्गिरीणां द्वादश चेत्येवं दक्षिणोत्तरदिशि तावल्लक्षं पूर्वापररेखायामपि सुमेरोरिलावृतस्य चतुस्त्रिंशत् गिर्योश्चत्वारि शेषाणि द्विषष्टिसहस्राणि केतुमालभद्राश्वयोरित्येवं लक्षं सर्वतः स्थितत्वादिलावृतस्याष्टादश पूर्वापरवर्षयोरासमुद्रं दैर्घ्यं द्रष्टव्यं नातो विरोधः ॥ १० ॥

मन्दरादयश्चत्वारो गिरयः प्रागादिक्रमेण मेरोश्चतुर्दिशमवष्टम्भगिरयः मेखला इव अवष्टम्भन्ति प्रतिबध्नन्तीत्यवष्टम्भास्ते च ते उपक्लृप्ताः विन्यस्ताः कथम्भूता अयुतयोजनौ प्रमाणौ विस्तारोच्छ्रायौ येषां तथाभूताश्चतुर्ष्वेतेषु मन्दरादिषु क्रमेणाम्रजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपश्रेष्ठाः पर्वतानां केतवो ध्वजा इवाधिसहस्रमेकादशशतान्युन्नाहो येषां तावत्प्रमाणानां विटपानां शाखानां विततिर्येषां शतयोजनपरिणाहो विस्तारो येषां ते

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उपक्लृप्ता इत्यनुषङ्गः ॥ ११ ॥ १२ ॥

तथा चत्वारो ह्रदाश्च क्रमेण क्षीरमध्विक्षुरसशुद्धजलात्मकाः सन्ति तानेव विशिनष्टि । यदुपस्पर्शिनः तज्जलस्पर्शिनः सिद्धादयः स्वाभाविकान्यष्ट महैश्वर्याणि हे राजन् ! धारयन्ति ॥ १३ ॥

देवोद्यानानि देववनानि क्रमेण नन्दनादीनि भवन्ति तान्येव विशिनष्टि । येषु देवोद्यानेषु सुरललनानां सुरस्त्रीणां ललाम भूषणं तद्वत्स्थिताः सुरवनितानां श्रेष्ठा इत्यर्थः तासां यूथस्य पतयः ताभिः सह सम्भूय उपदेवगणैः उपगीयमानः महिमा येषां ते विहरन्ति देवानां क्रीडास्थानानीत्यर्थः ॥ १४ ॥ १५ ॥

चूतादिप्रभवा नदीराह । मन्दरेति । मन्दरशिखरस्याधस्तात्प्रदेशे एकादशशतयोजनमुत्तुङ्ग उन्नतो यो देवचूतः तस्य शिरसः सकाशाद्गिरिशिखरवत्स्थूलानि फलानि फलप्रमाणमुक्तं वायुपुराणे ।

> अरत्नीनां शतान्यष्टौ एकषष्ट्यधिकानि च ।
> फलप्रमाणमाख्यातमृषिभिस्तत्त्वदर्शिभिः इति ॥

अमृतकल्पानि अमृततुल्यानि फलन्ति फलानि फलन्तीति गौर्गच्छतीतिवत् कुरर्थविशेषणत्वाद्धात्वर्थस्याविवक्षा बोध्या ग्राहकाभावात्पक्वानि भवन्तीत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एवमिलावृताद्दक्षिणेन निषधादयः यथा नीलादयो दैर्घ्येण ह्रसन्ति तथा निषधादयोऽपि अत्रायं विशेषः नीलनिषधौ लक्षप्रमाणावन्ये दशांशहीनाः । तदुक्तम् । "लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथापरे" इति वैष्णवे ।

> जम्बूद्वीपप्रमाणेन निषधः परिकीर्तितः ।
> तस्माच्च दशभागेन हेमकूटः प्रतीयते

इति वाराहे यथासङ्ख्यं मर्यादागिरय इति शेषः ॥ ९ ॥

तथैवेलावृतमिति । यथेलावृतादुत्तरदक्षिणतो नीलनिषधादयस्तथेलावृतस्यापरेण पश्चिमेन पूर्वेण च माल्यवद्गन्धमादनौ यथासङ्ख्यं स्त इति शेषः आनीलनिषधायतौ नीलनिषधपर्यन्तविस्तारौ तत्संबद्धावित्यर्थः सीमानमवधिम् ॥ १० ॥

अवष्टम्भगिरयः पीठस्थानीयपर्वताः ॥ ११ ॥

एतेषु मन्दरादिषु पर्वतकेतवः मन्दरादिपर्वतानां ध्वजा इव स्थिताः अधिसहस्रयोजनोन्नाहाः सहस्रादधिकैकशतयोजनोच्छ्रायाः तदुक्तम् "एकादशशतायामाः पादपा गिरिकेतव" इति अत्रायामशब्देनोच्छ्राय उच्यते तावद्विटपविततयः यावदुच्छ्राययोजनसंख्यानं तावत्संख्याकशाखाविस्ताराः शतयोजनपरिणाहाः परितः शतयोजनस्थूलाः ॥ १२ ॥ १३ ॥

देवोद्यानानि देवानां क्रीडायोग्यस्थानानि अमरललनानां सुरस्त्रीणां मध्ये या ललामभूताः श्रेष्ठास्तासां यूथस्य पतयो याः स्त्रियस्ताभिः सहिताः सहामरललनाललामयूथपतयः अमरपरिवृढा देवश्रेष्ठाः ॥ १४ ॥ १५ ॥

मन्दरोत्सङ्गे मन्दरपर्वतस्याङ्कस्थानीये तटे देवोपभोगयोग्यत्वाद्देवचूतस्तस्य शिरसोऽग्रदेशात् ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अयुतयोजन उत्सेध उच्छ्रायो येषाम् । अयञ्चोत्सेधो नीलादीनामपि द्रष्टव्यः । नीलादिवत् पृथुत्वं चैषां द्रष्टव्यम् । यथासंख्यं मर्यादागिरय इति शेषः ॥ ९ ॥

अपरेण पश्चिमस्यां दिशि पूर्वेण पूर्वस्यां दिशि आनीलनिषधायतौ उत्तरतो नीलपर्यन्तं दक्षिणतो निषधपर्यन्तमायतौ दीर्घौ । चतुस्त्रिंशत्सहस्रायामावित्यर्थः । एवञ्च दक्षिणोत्तररेखायां भारतकिंपुरुषहरिवर्षाणां त्रयाणां सप्तविंशतिः सहस्राणि हिमालयहेमकूटनिषधानां षट्सहस्राणि । सुमेरोरिलावृतस्य च चतुस्त्रिंशत् रम्यकहिरण्मयकुरूणां सप्तविंशतिः नीलश्वेतशृङ्गवतां गिरीणां षडित्येवं लक्षयोजनप्रमाणः पूर्वपश्चिमरेखायां भद्राश्वस्य एकत्रिंशत् सुमेरोरिलावृतस्य चतुस्त्रिंशत् केतुमालस्यैकत्रिंशत् गन्धमादनमाल्यवतोश्चत्वारीत्येवं लक्षयोजनप्रमाणो जम्बूद्वीपोऽवगमितः ॥ १० ॥

अयुतयोजनप्रमाणौ विस्तारोन्नाहौ येषां ते विस्तीर्णमूर्ध्नो मेरोरवष्टम्भत्वात् पूर्वपश्चिमौ गिरी दक्षिणोत्तरविस्तारौ दक्षिणोत्तरौ च पूर्वापरविस्तारौ ज्ञेयौ । विस्तारोऽत्र दैर्घ्यं सर्वतो दशयोजनसहस्राङ्गीकारे त्विलावृतलोपात् पूर्वेणेलावृतमुपल्लावयतीत्यादिविरोधः स्यात् चतुर्दिशं चतस्रो दिशोऽभिव्याप्य चतुर्दिक्ष्वित्यर्थः ॥ ११ ॥

अधिसहस्रम् एकादशशतान्युन्नाहो येषां तावत्प्रमाणा विटपविततिर्येषां शतयोजनं परिणाहो विस्तारो येषाम् ॥ १२ ॥ १३ ॥ १४ ॥

परिवृढाः श्रेष्ठा ललामो भूषणम् ॥ १५ ॥

> फलानीति फलप्रमाणमुक्तं वायुपुराणे ।
> अरत्नीनां शतान्यष्टावेकषष्ट्यधिकानि च ।
> फलप्रमाणमाख्यातमृषिभिस्तत्त्वदर्शिभिः इति ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं नीलादिवत् द्विसहस्रपृथवः निषधादयः हरिवर्षादीनां यथासङ्ख्यं मर्यादागिरयः इत्यन्वयः अयुतयोजन उत्सेधः उच्छ्रायो येषां नीलादयोऽपि अयुतयोजनोत्सेधा इति ज्ञेयम् ॥ ९ ॥

द्विसहस्रं पप्रथतुः विस्तीर्णौ भवतः विदधाते कुर्वाते ॥ १० ॥

किञ्च मन्दरादयश्चत्वारो गिरयः पूर्वादिक्रमेण मेरोश्चतुर्दिशमवष्टम्भगिरयः उपक्लृप्ता विन्यस्ताः अयुतयोजनप्रमाणौ विस्तारोन्नाहौ येषां तत्र मन्दरः पूर्वदिशि विन्यस्तः दक्षिणोत्तरविस्तारस्तद्वदन्येषामपि विस्तारो ज्ञेयो न तु सर्वतः अत इलावृतलोपो न भवति ॥ ११ ॥

शतयोजनं परिणाहो विस्तारो येषामधिसहस्रं शताधिकसहस्रमुन्नाहः उच्छ्रायो येषां तावत्प्रमाणा अधिसहस्रप्रमाणा विटपविततिर्येषाम् ॥ १२ ॥

ह्रदा उपक्लृप्ता इति शेषः ॥ १३ ॥ १४ ॥

सुरललनानां ललामभूताः भूषणभूताः याः स्त्रियस्तासां यूथस्य पतयः अमरपरिवृढाः देवश्रेष्ठाः सह सम्भूय विहरन्ति ॥ १५ ॥ १६ ॥

तेषां विशीर्यमाणानामतिमधुरसुरभिसुगन्धिबहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्वेणेलावृतमुपप्लावयति ॥ १७ ॥

यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगन्धवातो दशयोजनं समन्तादनुवासयति ॥ १८ ॥

एवं जम्बूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जम्बूनाम नदी मेरुमन्दरशिखरादयुतयोजनादवनितले निपतन्ती दक्षिणेनात्मानं यावदिलावृतमुपस्यन्दयति ॥ १९ ॥

तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदाऽमरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति ॥ २० ॥

यदुहवाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेण खलु धारयन्ति ॥ २१ ॥

यस्तु महाकदम्बः सुपार्श्वनिरूढो यास्तस्य कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः पञ्च मधुधाराः सुपार्श्वशिखरात्पतन्त्योऽपरेणात्मानमिलावृतमनुमोदयन्ति ॥ २२ ॥

या ह्युपयुञ्जानानां मुखनिर्वासितो वायुः समन्ताच्छतयोजनमनुवासयति ॥ २३ ॥

एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कन्धेभ्यो नीचीनाः पयोदधिमधुघृतगुडान्नाद्यम्बरशय्यासनाभरणादयः सर्व एव कामदुघा नदाः कुमुदाग्रात्पतन्तस्तमुत्तरेणेलावृतमुपयोजयन्ति ॥ २४ ॥

भाषाटीका ।

इलावृत वर्षके दक्षिणकी ओर निषध हेमकूट हिमालय ए तीन पर्वत पूर्व पश्चिम में खारीसमुद्र तक लम्बे हैं दशहजार योजन ऊंचे हैं दो हजार योजन चौडे हैं क्रमसे हरिवर्ष भारत वर्षों के मर्यादा करते हैं ॥ ९ ॥

तैसेही इलावृत वर्षके पूर्व तरफ माल्यवान् पश्चिम तरफ गन्ध मादन ए दोनों पर्वत नील तथा निषध पर्वतसे लगेहुये हैं दो हजार योजन चौडे हैं केतुमाल भद्राश्व दोनों वर्षोंके सीमा करते हैं ॥ १० ॥

मन्दर मेरुमन्दर सुपार्श्व कुमुद ये चारों दशहजार योजनके ऊंचे मेरुके चारों तरफ मेरुके सहारे के वास्ते रक्खे पर्वत हैं ॥ ११ ॥

इन चारों पर्वतों के ऊपर पर्वतों के ध्वजा सरीके बडे भारी एक हजार एकसौ योजन ऊंचे उतनेही दूर उनकी शाखा हैं सौ योजन मोटे हैं ऐसे आम जामुन कदम्ब वट के चार पेड हैं ॥ १२ ॥

हे भारतश्रेष्ठ परीक्षित् ! उन चारों पर्वतोंपर दूध मधु इक्षु रस मीठे जलके चार हौद हैं जिनके स्नान पानादिक से वहांके उपदेवतागण स्वभावसिद्ध योग ऐश्वर्यों को धारण करते हैं ॥ १३ ॥

नन्दन चैत्र रथ वैभ्राजक सर्वतोभद्र नाम के चार देवतोंके विहार के वनभी उन चारों पर्वतोंपर हैं ॥ १४ ॥

जिन वनों में उत्तम देवगण देवस्त्रियों को साथ मे लेकर उपदेवगणों के किये अपनी महिमाके गान को सुनते हुये विहार करते हैं ॥ १५ ॥

मन्दराचलके ग्यारा हजार ऊंचे आम्र वृक्ष के ऊपर सें पर्वतों के शिखर सरीके वडे अमृत से मीठे आम के फल गिरते हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतिमधुरश्चासौ स्वतः सुरभिश्च सुगन्धिश्च नचान्येषां गन्धैरधिवासितः बहुलश्चारुणश्च रसः स एव उदमुदकं तेन ॥ १७ ॥

यदुपजोषणात् यस्य रसस्य सेवनात् ॥ १८ ॥

अनस्थिप्रायाणामतिसूक्ष्मबीजानां यत्र निपतति ततश्चारभ्य आत्मनो दक्षिणतः सर्वमिलावृतं व्याप्य वहतीत्यर्थः ॥ १९ ॥

तावत् सर्वतः रोधसोस्तटयोः ॥ २०—२१ ॥

आयामोऽत्र व्यामः स च "व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम्" इत्युक्तलक्षणः पञ्च व्यामाः परिणाहः स्थौल्यं यासामित्यर्थः । केचित्तु पञ्चव्यामपरिणाहा इत्येवं पठन्ति ॥ २२ ॥ २३ ॥

नीचीना अधोमुखाः ॥ २४—२६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तेषां फलानां विशीर्णानामधःपातेन भिद्यमानानामतीव मधुरश्चासौ स्वतः सुरभिश्च सुगन्धिश्च न चान्येषां गन्धैरधिवासित इति उपरिष्टात् बहुलश्चारुणश्च रसः स एवोदकं तेनारुणोदानामाख्या-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

देति प्रसिद्धा नदी मन्दरशिखरान्निपतन्त्यधोऽधःस्पन्दमाना पूर्वेणेलावृतमिलावृतवर्षस्य पूर्वं प्रदेशमुपप्लावयति सिञ्चति आत्मानमुपस्पन्दयतीत्यर्थः ॥ १७ ॥

अरुणोदां नदीं विशिनष्टि । यदिति । यस्या अरुणोदाया उपजोषणाद्धिसेवनाद्भवान्या अनुचरीणां पुण्यजनानां यातुधानानां या वध्वः तासामवयवसंस्पर्शेन सुगन्धसुरभिर्वातो वायुः समन्तात्सर्वतो दिशं दशयोजनमनुवासयति सुरभीकरोति ॥ १८ ॥

एवं जम्बूफलानां मेरुमन्दरोत्सङ्गनिरूढजम्बूफलानामत्युच्चात्मेरुमन्दरात् यो निपातस्तेन विशीर्णानां भिन्नानामनस्थिप्रायाणामतिसूक्ष्मबीजानामिभकायनिभानां गजशरीरसदृशानां रसेन जम्बूनदीतिप्रसिद्धा मेरुमन्दरस्य शिखराद्युतयोजनोच्छ्रायाद्भूतले निपतन्ती दक्षिणेनेलावृतमिलावृतस्य दक्षिणभागं यावदिलावृतमात्मानमुपस्यन्दयति इलावृतस्य दक्षिणं भागं प्राप्य वहतीत्यर्थः ॥ १९ ॥

यावदिलावृतमुपस्यन्दयति तावत्पर्यन्तमुभयोरपि रोधसोः तटयोर्या मृत्तिका तद्रसेन तस्या नद्या रसेनानुविध्यमाना संयुज्यमाना वाय्वर्कसंयोगतो यो विपाकः परिणामस्तेन जाम्बूनदं नाम सुवर्णं सदा निरन्तरममरलोकानामाभरणोपयोगि भवति एतदेवाह । यदुसुवर्णं विबुधादयो युवतिभिः सह मुकुटाद्याभरणरूपेण धारयन्ति ॥ २० ॥ २१ ॥

यस्त्विति । सुपार्श्वस्य पर्वतस्य यः पश्चिमो भागस्तत्र निरूढो यो महाकदम्बस्तस्य कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः सकरयोर्बाह्वोः यत्तिर्यगन्तरं तदत्रायामः पञ्चायामः परिणाहः स्थौल्यं यासां ताः पञ्च मधुधाराः सुपार्श्वशिखरात्पतन्त्यः अपरेणेलावृतस्य पश्चिमं भागं प्रत्यात्मानमनुमोदयन्ति सुरभीकुर्वन्ति स्पन्दन्त इत्यर्थः धारा विशिनष्टि । यास्त्विति । उपयुञ्जानानां धारा उपभुञ्जानानां यो मुखनिर्वासितो मुखगन्धेन निर्वासितः नितरां सुरभीकृतो वायुः समन्ताच्छतयोजनं सुरभीकरोति निरतिशयसौरभ्ययुक्ता धारा इत्यर्थः ॥२२-२३॥

एवं कुमुदपर्वते निरूढो यः शतवल्श इति प्रसिद्धो वटस्तस्य स्कन्धेभ्यो विनिर्गताः पयोदधिमधुघृतगुडान्नाद्यम्बरशय्यासनाभरणादीनि गुडान्नादीनि भक्ष्याणि अम्बराणि धार्याणि शय्यासनादीनि भोगस्थानानि आभरणानि च दुहन्तीति दुधाः स व नदाः कुमुदस्यपर्वतस्याग्रात्पतन्तस्तमुत्तरेणेलावृतमिलावृतस्योत्तरभागमुपजोषयन्ति प्रीणयन्ति इलावृतस्योत्तरभागस्थान् लोकान् सुखयन्तीत्यर्थः एतदेवाह । यान्नदानुपजुषाणानां सेवमानानां प्रजानां वल्यादयः तापविशेषा न भवन्ति किन्तु यावज्जीवं निरतिशयं सर्वोत्कृष्टं सुखमेव भवति वलिस्त्वग्गतो विकारः पलितं केशगतक्लमः श्रमः आमयो रोगः उपसर्गाः सुखदुःखरागद्वेषभयाभिमानप्रमादोन्मादशोकमोहलोभमदमात्सर्यादयः प्रागुक्ता ज्ञेया इत्यर्थः ॥ २४ ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तेषां फलानामतिमधुरादिलक्षणेन रसोदेन रसाख्यजलेन पूर्वेणेलावृतमिलावृतवर्षस्य पूर्वप्रदेशमुपधा (१) वतीति केचित्तत्र "धावु गतिशुद्ध्योः" इति धातोः शुद्धं करोतीत्यर्थः स्वजलप्रवाहेणेति शेषः ॥ १७ ॥

उपजोषणान्निषेवणात् अनुचरीणां दासीनामनुवासयति सौरभ्ययुक्तं करोति ॥ १८ ॥

अनस्थिप्रायाणां बहुलमन्तर्बीजानामिभकायनिभानामिति । बुद्ध्यारोहार्थमुक्तं ननु तावत्परिमाणनिश्चयेन

अरत्नीनां शतान्यष्टाविकर्षष्ट्यधिकानि च ।
फलप्रमाणमाख्यातमृषिभिस्तत्त्वदर्शिभिः ॥

इति वायुपुराणवचनात् तत्प्रमाणमवगन्तव्यमयुतयोजनादिति । शिखरस्यैव तावत्त्वं न किन्तु शिखरादवनितलान्तरालप्रदेशस्य तावत्त्वमित्यवगन्तव्यमिलावृतमात्मानं दक्षिणेन दिग्भागेन यावदुपस्पन्दयति तावत्स्थलमुभयोरोधसोस्तीरयोर्जम्बूफलरसेनानुविध्यमाना प्रतिहन्यमाना या मृत्तिका सा जाम्बूनदं नाम सुवर्णं भवतीत्यन्वयः तत्र हेतुर्वाय्वर्केति ॥ १९ ॥ २० ॥ २१ ॥

कोटरेभ्यः वृक्षविवरेभ्यः "व्यामो हस्तावधिः स्मृतः" इति हलायुधः अपरेण पश्चिमेन ॥ २२ ॥

मुखनिर्वासितः मुखनिर्गतः ॥ २३ ॥

इलावृतस्थजनानुपभोजयन्ति ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

स्वतः सुरभिश्चान्येषां गन्धैरधिवासितश्च ॥ १७—१८ ॥

अनस्थिप्रायाणामतिसूक्ष्मबीजानां दक्षिणेन दक्षिणस्यां दिशि यावदिलावृतं तावदात्मानं वर्द्धयन्तीति शेषः । नवयोजनसहस्रपर्यन्तं निःसृत्येत्यर्थः ॥ १९ ॥

तावत् पर्यन्तमेव उभयोरेव रोधसोस्तटयोरनुविध्यमाना युज्यमाना या मृत्तिकास्ताः सुवर्णं भवति ॥ २०—२१ ॥

आयामोऽत्र व्यामः स च व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरमित्युक्तलक्षणः पञ्चभिर्व्यामैः परिमितः परिणाहः स्थौल्यं यासां ताः । केचित्तु पञ्चव्यामपरिणाहा इति पठन्ति अनुमोदयन्ति तत्र लोकप्रशंसाभिरात्मानं हर्षयन्ति ॥ २२—२३ ॥

शतवल्शः शतस्कन्धः नीचीनाः अधोमुखाः ॥ २४—२८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तेषां फलानामतिमधुरश्चासौ सुरभिश्च सुगन्धिश्च गन्धान्तरानधिवासितः बहुलश्चारुणश्च रसः स एवोदमुदकं तेन हेतुनाऽरुणोदा नाम प्रसिद्धा नदी ॥ १७ ॥

यदस्य रसस्योपजोषणात्सेवनात् ॥ १८ ॥

अनस्थिप्रायाणामनष्टिप्रायाणाम् ॥ १९ ॥

तावत्सर्वतः ॥ २०—२३ ॥

स्कन्धेभ्यो नीचीनाः अधः पतन्तः काम्यन्ते इति कामाः पदार्थास्तान् दुहन्तीति तथाभूताः के कामा इत्याकाङ्क्षायामाह । पय इति ॥ २४ ॥

भाषाटीका ।

उन आम फलों के गिरकर फटजाने से अत्यन्त मधुर सुरभि सुगन्धवाले लाल रस के जल से भई अरुणोदा नाम की नदी मन्दराचल पर्वत के शिखर से गिरती हुई पूर्वकी ओर इलावृतवर्षके मध्य में बहती है ॥ १७ ॥

---

(१) पाठान्तरम् ।

यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गन्ध्यजरामयमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवन्ति यावज्जीवं सुखं निरतिशयमेव ॥ २५ ॥

कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिशिरपतङ्गरुचकनिषधशिनीवासकपिलशङ्खवैदूर्यजारुधिहंसर्षभनागकालञ्जरनारदादयो विंशतिगिरयो मेरोः कर्णिकाया इव केसरभूता मूलदेशे परित उपक्लृप्ताः ॥ २६ ॥

जठरदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवतः एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतावेवमुत्तरतस्त्रिशृङ्गमकरावष्टभिरेतैः परिस्तृतोऽग्निरिव परितश्चकास्ति काञ्चनगिरिः ॥ २७ ॥

मेरोर्मूर्धनि भगवत आत्मयोनेर्मध्यत उपक्लृप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति ॥ २८ ॥

तामनु परितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपक्लृप्ताः ॥ २९ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां भुवनकोशवर्णनं नाम
षोडशोऽध्यायः ॥ १६ ॥

भाषाटीका ।

जिस नदी के जल के सेवन से पार्वतीजी की दासी यक्षोंकी स्त्रीजनों के शरीर का सुगन्धित पवन चारोंओर से दश योजन तक देश को सुगन्धित करता है ॥ १८ ॥

इसीप्रकार से बडे ऊंचे से गिरने से फटे हुये विना गुठली प्राय हाथी के शरीर के बरोबर जामुन फलों के रस से भई जम्बू नाम की नदी दश हजार योजन ऊंचे मेरु मन्दर पर्वत के शिखर से पृथिवीपर गिरतीहुई दक्षिण के तरफ इलावृत वर्ष में बहती है ॥ १९ ॥

तिस नदी के दोनों किनारों में जो मृत्तिका है उस नदी के जलसे भीगीहुई सूर्य पवन दोनों के संयोग से पकजाती है तब देवतों के भूषण पहरनेलायक जाम्बूनद नाम का सुवर्णरूप होजाती है ॥ २० ॥

जिस सुवर्ण को देवादिक अपनी स्त्रियोंके सहित मुकुट कङ्कण कटि सूत्रादि भूषण बनाकर धारण करते हैं ॥ २१ ॥

सुपार्श्व पर्वतपर जमा जो महाकदम्ब का पेड उसके खोंतरों से निकली पांच पुरुषमात्र चौडी पांच मधुकी धारा सुपार्श्व पर्वत के शिखर से गिरतीहुई हैं सो पश्चिम की तरफ इलावृत में बहती हैं ॥ २२ ॥

जिन नदियोंके सेवन करनेवाले जनों के मुखसे निकला पवन चारों ओर सौ योजन देश को सुगन्धित करता है ॥ २३ ॥

इसी प्रकारसे कुमुद पर्वतपर जमा जो शतवल्श नाम का बड है तिसके मध्य स्कन्धों से नीचे मुखवाले सब मनोरथों के देनेवाले दूध दही मधु घृत गुड अन्नादि वस्त्रादि शय्या आसन आभरण इनके बहानेवाले पांच नद कुमुद के ऊपर से गिरकर उत्तरकी तरफ इलावृत में बहते हैं ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्विंशु मेरुमूलाद्योजनसहस्रं त्यक्त्वाग्रे परितः परिधय इव जठरदेवकूटादयस्तिष्ठन्ति अतोऽष्टादशयोजनसहस्रं प्रमाणमत्रोक्तम् ।

> वैष्णवादिपुराणेषु परिमाणादि यत्पुनः ।
> अन्यथा वर्णितं तत्तु कल्पभेदाद्यपेक्षया ॥

द्विसहस्रं पृथू च तुङ्गौ च ॥ २७ ॥ २८ ॥

यथादिशं प्राच्यादिदिक्षु यथारूपमिन्द्रादिवर्णानतिक्रमेण तुरीयमानेन सार्धद्विसहस्रप्रमाणेन । नामानि पुराणान्तराज्ज्ञातव्यानि यथोक्तम् ।

> मेरौ नव पुराणि स्युर्मनोवत्यमरावती ।
> तेजोवती संयमनी तथा कृष्णाङ्गना परा ॥
> श्रद्धावती गन्धवती तथा चान्या महोदया ।
> यशोवती च ब्रह्मेन्द्रवह्न्यादीनां यथाक्रमम् ॥

इति ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कुरङ्गेति । कुरङ्गादयः पर्वताः कुवलयकमलकर्णिकाभूतस्य मेरोर्मूलदेशे केसरभूता इव परित उपक्लृप्ताः विन्यस्ता भान्तीति शेषः ॥ २६ ॥

तथा मेरुं पूर्वेण मेरोः पुरस्तान्मेरुमूलाद्योजनसहस्रं त्यक्त्वा जठरदेवकूटौ पर्वतावष्टादशयोजनसहस्रदीर्घौ द्विसहस्रयोजनपृथुतुङ्गौ च भवतः एवं मेरोरपरभागे पवनपारियात्रौ जठरदेवकूटाभ्यां तुल्यायामपृथुतुङ्गौ भवतः तथा मेरोर्दक्षिणतः कैलासकरवीरौ प्रागायतौ पूर्वेतो दीर्घौ एवमुत्तरतस्त्रिशृङ्गमकरौ भवतः एभिः परिस्तृतोऽग्निरिवाष्टभिरेतैर्जठरादिभिः काञ्चनगिरिर्मेरुः परितश्चकास्ति द्योतते ॥ २७ ॥

मेरोमूर्द्धन्युपरिभागे मध्यतः मध्यप्रदेशे उपक्लृप्तां भगवतः आत्मयोनेश्चतुर्मुखस्य पुरीमयुतयोजनविस्तारां समचतुरस्रां शातकौम्भीति प्रसिद्धां च वदन्ति तां शातकौम्भीं पुरीमनुसृत्य मेरोः परितोऽष्टदिक्षु यथादिशं पूर्वादिदिग्गमनतिक्रममाणानामिन्द्रादीनां लोकपालानामष्टौ पुरः अमरावतीतेजोवतीसंयमनीकृष्णाङ्गनाश्रद्धावतीगन्धवतीमहोदयायशोवतीसंज्ञाः तुरीयमानेन अयुतस्य तुरीयभागेन उपक्लृप्ताः सार्द्धद्विशतसहस्रयोजनविशालाः कल्पिता इत्यर्थः ॥ २८ ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उपसर्गो भूताद्युपद्रवः ॥ २५ ॥

कुरङ्गकुररादिपर्वताः मेरोर्मूलदेशे परित उपक्लृप्ताः मेर्वाख्यपद्मकर्णिकायाः केसरा इव स्थिताः ॥ २६ ॥

अष्टादशयोजनसहस्रे दूरप्रदेशे मन्दरगिरिपूर्वभागे जठरदेवकूटौ स्थितौ भवतः उदगायतौ उत्तरदीर्घौ मेरुपूर्वतः इलावृतमेर्वोर्मध्ये अष्टादशयोजनसहस्रे इति स एवार्थो योजनाभेद इति वा एवमपरेण एवं मेरोः पश्चिमभागस्थितसुपार्श्वगिरेः पश्चिमभागे इलावृतमेर्वोर्मध्ये अष्टादशयोजनसहस्रे दूरे पवनपारियात्रौ गिरी तिष्ठतः तावप्युदगायतौ एवं मेरोर्दक्षिणतः कैलासकरवीरौ मेरुमन्दरगिरेरपि बहिर्भागे स्थितौ पूर्वपश्चिमायतौ एवं मेरोरुत्तरभागे कुमुदपर्वतादपि बहिर्भागे शृङ्गमकरौ नाम गिरी आस्ताम् अष्टादशयोजनानां सहस्रमिति सर्वत्र योज्यं तावपि प्रागायतौ द्विसहस्रपृथुतुङ्गत्वं च सर्वत्र समं यथा एभिः परिस्तृतोऽग्निस्तथैवैतैरष्टभिः पर्वतैः परितः परिस्तृतोऽलङ्कृतश्चकास्ति काञ्चनगिरिरित्यर्थः एवमुक्तगिरिषु प्रागायतत्वादिकं लक्षणं द्विसहस्रपृथुत्तुङ्गमानमवगन्तव्यम् ॥२७॥

मेरोर्मूर्द्धनि द्वात्रिंशत्सहस्रयोजनविततें तस्य मेरोर्मूर्ध्नो मध्ये आत्मयोनेर्विरिञ्चस्य शतकोटिं नाम पुरीं वदन्ति शातकौम्भीं सुवर्णमयीम् ॥ २८ ॥

तुरीयभागेन विरिञ्चिपुर्याश्चतुर्थांशप्रमाणेन सार्धद्विसहस्रयोजनप्रमाणेनेत्यर्थः पुरः पुर्यः तामनुपरित इत्यस्य विवरणं यथादिशमिति ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

षोडशोऽध्यायः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यथादिशं प्राच्यादिदिक्षु । यथारूपमिन्द्रादिवर्णानतिक्रमेण तुरीयमानेन सार्द्धद्विसहस्रमानेन नामानि पुराणान्तराज्ज्ञातव्यानि । यथाक्रमम्

मेरौ नव पुराणि स्युर्मनोवत्यमरावती ।
तेजोवती संयमनी तथा कृष्णाङ्गना परा ।
श्रद्धावती गन्धवती तथा चान्या महोदया ।
यशोवती च ब्रह्मेन्द्रवन्ह्यादीनां यथा क्रमम् ।

इति ॥ २९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमे षोडशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥१६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वलिस्त्वक्सङ्कोचः पलितं केशधावल्यं क्लमः कायेषु श्रमः वल्यादिभिर्ये उपसर्गास्तदादयस्तापविशेषाः न कदाचिद्भवन्ति ॥ २५ ॥ २६ ॥

एतैः परिश्रितः आवृतः अग्निरिव चकास्ति ॥ २७ ॥

मध्यतः मध्यप्रदेशे ॥ २८ ॥

तां पुरीमनु अनुसृत्य परितः यथादिशं पूर्वादिदिशमनतिक्रम्य यथारूपमिन्द्रादिवर्णानतिक्रमेण तुरीयमानेन सार्द्धद्विसहस्रप्रमाणेनाष्टौ पुरः उपक्लृप्ताः पुराणां नामानि पुराणान्तराज्ज्ञातव्यानि ।

मेरौ नव पुराणि स्युर्मनोवत्यमरावती ।
तेजोवती संयमनी तथा कृष्णाङ्गना परा ।
श्रद्धावती गन्धवती तथा चान्या महोदया ।
यशोवतीव च ब्रह्मेन्द्रवन्ह्यादीनां यथाक्रमम् ।

इति ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

षोडशाध्यायार्थप्रकाशः ॥ १६ ॥

भाषाटीका

नदोंके जिन पदार्थोंके सेवन करने वाले पुरुषों के कभी भी वृद्धपना ग्लानि पसीना दुर्गन्धी केशों का पकना रोग मरण शीत उष्ण कुरूपता आदि उपद्रव ताप नहीं होते हैं सदाकाल अत्यन्त सुखही रहता है ॥ २५ ॥

कुरङ्ग कुरर कुसुम्भ वैकङ्क त्रिकूट शिशिर पितङ्ग रुचक निषध सिनीवास कपिल शङ्ख वैदूर्य जारुधि हंस ऋषभ नाग कालञ्जर नारद आदि बीस पर्वत मेरुके कर्णिका के केसरसरी के मूलदेश मे चारों और से कल्पित हैं ॥ २६ ॥

जठर देवकूट ए दोनों पर्वत मेरुके पूर्व तरफ अठारा हजार योजन उत्तर दक्षिणकी ओर लम्बे हैं दो हजार योजन मोटे तथा ऊंचे हैं इसी प्रकार पश्चिम के तरफ पवन पारियात्र दोनों पर्वत हैं दक्षिण मे कैलास करवीर दोनों पूर्व पश्चिम में लगे हैं ऐसे ही उत्तर मे त्रिश्टङ्ग मकर दो पर्वत हैं इन आठ पर्वतों से चारों ओर से वेष्टित सुवर्ण का मेरुपर्वत अग्नि के तुल्य प्रकाश मान है ॥ २७ ॥

मेरु के शिखर पर बीच में भगवान् आत्मयोनि ब्रह्माकी कल्पना की हुई अयुत हजार योजन विस्तार वाली सुवर्ण की पुरी चारों ओरसे बरोबर मनोवती नामकी है ऐसा महात्माजन कहते हैं ॥ २८ ॥

तिस पुरी के पीछे चारों ओर आठ लोकपालों की अपनी दिशा के नियम से यथायोग्य ब्रह्मपुरी के चतुर्थांश भाग विस्तार में आठ पुरी कल्पित हैं ॥ २९ ॥

इति श्रीमद्भागवत पञ्चमस्कन्ध षोडश अध्याय
का भाषानुवाद लक्ष्मणाचार्यकृत
समाप्त ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे षोडशोऽध्यायः समाप्तः ॥ १६ ॥

———○:०:○———

॥ सप्तदशोऽध्यायः ॥

———:०:———

श्रीशुक उवाच ।

तत्र भगवतः साक्षाद्यज्ञलिङ्गस्य विष्णोर्विक्रमतो वामपादाङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहविवरेणान्तःप्रविष्टा या बाह्यजलधारा तच्चरणपङ्कजावनेजनारुणकिञ्जल्कोपरञ्जिताखिलजगदघमलापहोपस्पर्शनाऽमला साक्षाद्भगवत्पदीत्यनुपलक्षितवचोऽभिधीयमानातिमहता कालेन युगसहस्रोपलक्षणेन दिवो मूर्द्धन्यवततार यत्तद्विष्णुपदमाहुः ॥ १ ॥

यत्र ह वाव वीरव्रत औत्तानपादिः परमभागवतोऽस्मत्कुलदेवताचरणारविन्दोदकमिति यामनुसवनमुत्कृष्यमाणभगवद्भक्तियोगेन दृढं क्लिद्यमानान्तर्हृदय औत्कण्ठ्यविवशामीलितलोचनयुगलकुड्मलविगलितामलबाष्पकलयाऽभिव्यज्यमानरोमपुलककुलकोऽधुनापि परमादरेण शिरसा बिभर्ति ॥ २ ॥

ततः सप्तऋषयस्तत्प्रभावाभिज्ञा यां ननु तपस आत्यन्तिकी सिद्धिरेतावती भगवति सर्वात्मनि वासुदेवेऽनुपरतभक्तियोगलाभेनैवोपेक्षितान्यार्थात्मगतयो मुक्तिमिवागतां मुमुक्षव इव सबहुमानमद्यापि जटाजूटैरुद्वहन्ति ॥ ३ ॥

ततोऽनेकसहस्रकोटिविमानानीकसङ्कुलदेवयानेनावतरन्तीन्दुमण्डलमावार्य ब्रह्मसदने निपतति ॥ ४ ॥

तत्र चतुर्द्धा भिद्यमाना चतुर्भिर्नामभिश्चतुर्दिशमभिस्पन्दन्ती नदनदीपतिमेवाभिनिविशति सीताऽलकनन्दा चक्षुर्भद्रेति ॥ ५ ॥

सीता तु ब्रह्मसदनात्केसराचलादिगिरिशिखरेभ्योऽधोऽधः प्रस्रवन्ती गन्धमादनमूर्द्धसु पतित्वान्तरेण भद्राश्ववर्षं प्राच्यां दिशि क्षारसमुद्रमभिप्रविशति ॥ ६ ॥

एवं माल्यवच्छिखरान्निष्पतन्ती ततोऽनुपरतवेगा केतुमालमभिचक्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति ॥ ७ ॥

भद्रा चोत्तरतो मेरुशिरसो निपतिता गिरिशिखराद्गिरिशिखरमतिहाय शृङ्गवतः शृङ्गादवस्यन्दमाना उत्तरांस्तु कुरूनभित उदीच्यां दिशि जलधिमभिप्रविशति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततः सप्तदशे गङ्गागमनं तच्चतुर्दिशम् ।
इलावृते च रुद्रेण सङ्कर्षणनिषेवणम् ॥ १ ॥

यज्ञलिङ्गस्य यज्ञैर्यज्ञे लिङ्गं त्रिविक्रममूर्तिर्यस्य विक्रमतो दक्षिणेन पदा भुवं क्रान्त्वा वामपदमुत्क्षिपतो वामपादाङ्गुष्ठनखेन निर्भिन्नमूर्ध्वमुपरिभागो यस्याण्डकटाहस्य तस्य विवरेणान्तः प्रविष्टा या बाह्यजलधारा सा दिवो मूर्धन्यवततारेत्यन्वयः तस्य यच्चरणपङ्कजं तस्यावनेजनेन क्षालनेनारुणं यद्रक्तं कुङ्कुमं तदेव किञ्जल्कास्तैरुपरञ्जिता अत एवाखिलस्य जगतोऽघमलापहमुपस्पर्शनं यस्यास्तथाप्यमला तन्मलसङ्गशून्या साक्षाद्भगवत्पदीति यदनुपलक्षितं जान्हवीभागीरथीत्याद्युपलक्षणान्तररहितं वचो नाम तेनाभिधीयमाना तस्मिन् समये भगवत्पदी नाम पश्चान्नामान्तराणि जातानीत्यर्थः कोऽसौ दिवो मूर्द्धा तमाह यदिति ॥ १ ॥

किं तद्विष्णुपदं तदाह । यत्रेति । वीरव्रतो दृढसङ्कल्पः अस्मत्कुलदेवताया हरेश्चरणारविन्दोदकमिति हेतोः परमादरेण बिभर्तीत्यन्वयः कथम्भूतः सन् प्रतिक्षणं वर्धमानेन भगवद्भक्तियोगेन दृढमत्यन्तं क्लिद्यमानमन्तर्हृदयं यस्य अत एवौत्कण्ठ्येन

श्रीधरस्वामिकृतभावार्थदीपिका ।

विवशमामीलितं यल्लोचनयुगलं तदेव कुड्मले ताभ्यां विगलितममलं वाष्पं तस्य कलया सहाभिव्यज्यमानं रोमपुलकानां कुलं यस्य ॥ २ ॥

ततः सप्तऋषयस्तस्या गङ्गायाः प्रभावाभिज्ञाः सन्तो यां जटाजूटैरुद्वहन्तीत्यन्वयः एतावत्येव नातोऽधिकास्तीत्यभिप्रायेणेत्यर्थः तत्र हेतुः भगवति सन्ततं भक्तियोगलाभेनैवोपेक्षिता अन्ये पुरुषार्था आत्मज्ञानं च यैः कामिव क इव धारयन्ति । प्रत्यक्षं मुक्तिमिव तामागतां मुमुक्षवो जना इव ते ॥ ३ ॥

ततोऽनेकसहस्रकोटीनां विमानानामनीकैः सङ्कुलेन देवयानेनाकाशमार्गेणावतरन्ती सप्तऋषिभ्योऽर्वागेव प्रायशः कर्मिणां गतिरिति ततोऽर्वागेव सङ्कुलत्वमुक्तम् आवार्य आप्लाव्य मेरुमूर्द्धस्थे ब्रह्मसदने निपतति ॥ ४ ॥

अभिस्पन्दन्ती अभितो गच्छन्ती ॥ ५ ॥

केसराचलानां मेरुसमानोच्छ्रायत्वात्प्रथमं तेषामादिशिखरेषु मुख्यशृङ्गेषु पतति ततस्तेभ्योऽधोऽधः प्रस्रवन्ती सती ॥ ६ ॥

माल्यवच्छिखरात्केतुमालाभिमुखं निष्पतन्ती चक्षुःसंज्ञा ॥७॥

गिरिशिखरादिति । कुमुदशिखरादुच्चलिता नीलशिखरं तत उच्चलिता श्वेतशिखरं तदप्यतिहाय शृङ्गवतः शृङ्गादधः स्रवन्ती ॥८॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं जम्बूद्वीपपर्वतवर्षतत्परिमाणादिकमभिधायाथ गङ्गागमनकथनपूर्वकमिलावृतादिवर्षेषु रुद्रादीनां संकर्षणादिभगवन्मूर्त्युपासनाप्रकारमुपद्वीपविन्यासं चाह । सप्तदशादिभिस्त्रिभिरध्यायैः । तत्र भगवत इति । प्रकृतस्य लिङ्गस्य यज्ञमूर्तेस्तत्र भगवतः पूज्यस्य विष्णोर्वामनरूपस्य विक्रमतस्त्रिलोकीं पादत्रयेण क्रममाणस्य सतः तस्य वामपादाङ्गुष्ठनखेन निर्भिन्नमूर्ध्वमुपरिभागो यस्य तस्याण्डकटाहस्य विवरेण रन्ध्रेणान्तःप्रविष्टा या बाह्यजलधारा सा तिमहता कालेन दिवो मूर्द्धन्यवततारेत्यन्वयः जलधारां विशिनष्टि । तस्य त्रिविक्रमस्य यच्चरणपङ्कजं तस्यावनेजनेन क्षालनेनारुणं कुङ्कुमं तदेव किञ्जल्कास्तैरुपरञ्जितात् एवाखिलस्य जगतोऽघं पापमेव मलं तदपहं निवर्तकमुपस्पर्शनं जलं यस्याः सा तत्र हेतुरमला स्वरूपतो दुरितनिरसनक्षमा यद्वा अखिलजगदघमलापहोपस्पर्शनात्यमला अन्तर्मलसङ्गशून्या साक्षाद्भगवत्पदीति यदनुपलक्षितं जान्हवी भागीरथीत्याद्युपलक्षणान्तररहितं यन्नो नामधेयं तेनाभिधीयमाना भूस्पर्शनात्पूर्वं जान्हव्यादिनामान्तररहिता तथा केवलं भगवत्पदीति नामधेयेनाभिधीयमानेत्यर्थः कोऽसौ दिवो मूर्द्धा यत्रावतीर्णा तत्राह । यत्रेति । यद्विष्णुपदमाहुस्तत्रेत्यर्थः ॥ १ ॥

किन्तद्विष्णुपदं तत्राह । यत्रेति । ध्रुवमण्डले इत्यर्थः यत्र दिवो मूर्द्धनि वीरव्रतः दृढसङ्कल्पः भागवतश्रेष्ठः औत्तानपादिः ध्रुवः अद्यमकुलदेवताया भगवतः चरणारविन्दोदकमिति हेतोः परमादरेण यां धारामनुसवनं त्रिकालं शिरसाऽद्यापि बिभर्त्तीत्यन्वयः यद्वा अनुसवनं प्रतिक्षणं वर्द्धमानो यो भगवद्भक्तियोगः तेन दृढमत्यन्तं क्लिद्यमानं आर्द्रीभवमानमन्तःकरणं यस्यातएवौत्कण्ठ्येन विवशमामीलितं च यल्लोचनयुगलं तदेव कुड्मले ताभ्यां विगलितममलं वाष्पं तस्य कलया सहाभिव्यज्यमानं रोमपुलकानां कुलं यस्य तथाभूतः सन्नित्यर्थः ॥ २ ॥

ततः सप्तर्षयः तस्या गङ्गायाः प्रभावाभिज्ञाः सन्तो नोऽस्माकं तपः सिद्धिफलमियं विष्णुपदी सैवैतावती इतोऽधिका नास्तीत्येवं मन्वाना अद्यापि बहुमानं जटा एव मुकुटानि तैरुद्वहन्तीत्यन्वयः तत्र दृष्टान्तः । मुमुक्षवो मुक्तिमिवागताम् इति । तत्र हेतुः सर्वात्मनि भगवति वासुदेवेऽविच्छिन्नभक्तियोगलाभेनैव उपेक्षिता अनादृता अन्यपुरुषार्था अर्थकामादय आत्मगतिः कैवल्यं च यैस्त इति सप्तर्षिविशेषणम् ॥ ३ ॥

ततोऽनेकसहस्रकोटीनां विमानानामनीकैः संघैः संकुलितेन देवयानेनाकाशमार्गेणावतरन्त्यधः प्रस्रवन्तीन्दुमण्डलमावार्याप्लाव्य मेरुमूर्द्धस्थे ब्रह्मसदने निपतति ॥ ४ ॥

तत्र चतुर्द्धा विभज्यमाना सीतादिसंज्ञाश्चतस्रो धारा भूत्वा सीतादिनामभिरभिधीयमाना चतुर्दिशं नदनदीपतिं समुद्रमेवाभिनिविशति समुद्रे प्रविशति "अभिनिविशश्च" इत्याधारस्य कर्मसंज्ञायाम् द्वितीया । नामान्याह । सीतेति ॥ ५ ॥

तत्र चतसृणां धाराणां मध्ये सीता प्राचीना धारा ब्रह्मसदनात्केसरादिशिखरेभ्यः केसराचलादीनि मेरुसमानोच्छ्रायत्वात्प्रथमं तेषामादिशिखरेषु मुख्यशृङ्गेषु पतति ततस्तेभ्योऽधोऽधः प्रस्रवन्ती गन्धमादनस्य मूर्द्धसुपरिभागे पतित्वान्तरेण भद्राश्ववर्षं भद्राश्ववर्षस्य मध्ये च स्यन्दमाना प्राच्यां दिशि क्षारसमुद्रं प्रविशति ॥ ६ ॥

तथा चक्षुःसंज्ञा प्रतीचीना धारा माल्यवच्छिखरे निपतित्वा ततोऽधः प्रस्रवन्ती अनुपरतः अप्रतिहतो वेगो यस्याः सा केतुमालं वर्षमभितो व्याप्य केतुमालस्य मध्ये स्रवन्तीत्यर्थः प्रतीच्यां दिशि सरितांपतिं समुद्रं प्रविशति आधारस्यैव कर्मत्वविवक्षयात्र द्वितीया एवमुत्तरत्राप्यभिनिविशश्चेत्यत्रोपसर्गसङ्घातपूर्वत्वस्यैव विवक्षितत्वात् ॥ ७ ॥

तथा भद्रासंज्ञा धारा उत्तरतो मेरुशिखरान्निपतन्ती गिरिशिखरात्कुमुदशिखरादुच्चलितोर्ध्वं गच्छन्ती नीलशिखरमुच्चलिता श्वेतपर्वतस्य शिखरमतिहायाश्शृङ्गवतः पर्वतस्य शृङ्गे पतित्वा ततोऽधः स्यन्दमाना उत्तरान् कुरूनभितो व्याप्य उदीच्यां दिशि लवणार्णवं प्रविशति ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अयत्नेन भागीरथीजलनिषेवया निर्मलान्तःकरणस्य पुंसो हरौ निरतिशयभक्तिः स्यादिति तन्महिमारम्भः तदवतारो निरूप्यतेऽस्मिन्नध्याये । तत्रेत्यादिना । या बाह्यजलधारा अण्डकटाहाद्बहिःस्थिता जलस्य निरन्तरसम्पातरूपा सा यत्तद्विष्णुपदं शिशुमारात्मनो हरेः स्थानमाहुः तत्र दिवोऽन्तरिक्षस्य मूर्द्धनि भुवर्लोके अवततार प्रकाशितस्वरूपाभूदित्यन्वयः स्वतोऽमला धवला तथाप्यरुणेत्याह । तच्चरणेति । यस्य हरेश्चरणारक्तपद्मयोरवनेजनेन प्रक्षालनेन चरणतलरजोमिश्रितत्वादरुणाकिञ्जल्करजसोपरञ्जिता रागीकृतेव अहिं तन्निषेविणां रागजनकत्वेन पापजवती स्यादित्यत उक्तमखिलेति अखिलजगतः पापमलापहमुपस्पर्शनं यस्याः सा तथा आचमनमात्रेण सर्वपापक्षय-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

करा किमुत स्नानादिनेत्यर्थः नामकीर्तनादपि दुरितहरा किमुत स्पर्शनादिनेति भावेनाह । साक्षादिति । अनुपलक्षितवचोभिरुपलक्षणरहितवचोभिर्वेदपुराणगतैः शालग्रामशिलाभिषेकजलस्य पादोदकत्वमिवौपचारिकं न भवतीत्यतः साक्षादनुपलक्षितेति पदद्वयं कल्पभेदाद्वामपादेति व्यत्यस्योक्तं नत्वेकस्मिन् कल्पइति तदुक्तं "वाराहे वामपादं च तदन्येषु च दक्षिणम् । पाद्मं कल्पेषु भगवानुज्जहार त्रिविक्रम" इति ॥ १ ॥

यत्र ध्रुवलोके ॥ २ ॥

ततो ध्रुवलोकात् उपेक्षिता अन्वार्था अन्यविषया आत्मगतियैस्ते तथा ॥ ३ ॥

ततः सप्तर्षिलोकात् देवयानेन मार्गेण इन्द्रादिपुरसम्बन्धेन ब्रह्मसदने मेरुमध्यस्थिते शतकोटिनाम्नि पुरे ॥ ४ ॥

तत्र ब्रह्मसदनाङ्गणे नदनदीपतिं समुद्रम् ॥ ५ ॥

चतुर्धा भिन्नाया गङ्गाया गतिभेदमाह । सीतेति । क्षाररससमुद्रं लवणसमुद्रम् ॥ ६ ॥ ७ ॥

मेरुशिरसो व्योम्ना निपतन्ती नीलगिरिशिखरे पतित्वा ततो नीलगिरिशिखरादाकाशेन श्वेतगिरिशिखरमवस्यन्दमाना पुनस्तदप्यतिहाय अतिक्रम्याकाशेन शृङ्गवतः शृङ्गं प्राप्ता ततोऽपि स्यन्दमानोत्तरकुरूनतिक्रम्य निषधस्य गिरेः बहूनि कूटानि शृङ्गाण्यतिक्रम्याकाशेन हेमकूटहिमाचलयोर्गिर्योर्मध्ये व्योम्ना पतन्ती कूटान्यतिक्रम्य ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

युगसहस्रेत्यत्र युगं नाम ज्योतिःशास्त्रीत्या पञ्चवर्षात्मकं ज्ञेयम् ॥ १—२ ॥

अद्यापि अवतारसमयानन्तरं सर्वदापीत्यर्थः ॥ ३—१३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

गङ्गानामागमं भूमौ भौमस्वर्गसुखं तथा ।
सङ्कर्षणस्य रुद्रेण सेवां सप्तदशोऽब्रवीत् ॥

सुमेरोः परितःकेसरादिशोभां वर्णयित्वा सर्वशोभाचूडामणिमतिदीर्घतरशाखाशिखरहीरकमुकुटविशेषायमाणां तन्मूर्ध्नि विराजमानां श्रीगङ्गां वर्णयंस्तत्प्रादुर्भावप्रकारमाह । तत्र वामनावतारसमये विक्रमतः दक्षिणेन पदा भुवं क्रान्त्वा वामपादमुत्क्षिपतः "त्रिसाम्यसदनादुरुकम्पयानम्"इति ब्रह्मोक्तौ तस्य प्रकृत्यावरणपर्यन्तव्याप्तिश्रवणात् बाह्या पृथिव्याद्यष्टावरणेभ्यो बहिर्भूता कारणार्णवसम्बन्धिनी चिन्मयी या जलधारा सा दिवो मूर्द्धनि ध्रुवलोकेऽवततारेत्यन्वयः । तच्चरणपङ्कजयोरवनेजने क्षालनसमये अरुणः चरणतलस्यारुणिमैव किञ्जल्कस्तेनोपरञ्जिताखिलजगदघमलापहमुपस्पर्शनं यस्यास्तथाप्यमला तन्मलसङ्गशून्या साक्षात् भगवत्पदीति यदनुपलक्षितं तस्मिन् काले भागीरथीजाह्नवीत्याद्युपलक्षणान्तररहितं वचो नाम तेनाभिधीयमाना यत् श्री द्दिवो मूर्द्धा तत् अधिक्रम॥ १ ॥

यत्र विष्णुपदे वीरव्रतो दृढसङ्कल्पः । उत्कृष्यमाणेन प्रतिक्षणमुत्कर्षं प्राप्नुवता भक्तियोगेन अत एवौत्कण्ठ्येन विवशमामीलितं यल्लोचनयुगलं तदेव कुड्मले ताभ्यां विगलितममलं बाष्पं तस्य कलया सह अभिव्यज्यमानं रोमपुलकानां कुलं यस्य सः ॥ २ ॥

एतावतीति । इतोऽधिकपरिमाणा सिद्धिः कापि नास्तीत्यर्थः भक्तियोगलाभेनैव उपेक्षिता अन्ये पुरुषार्था आत्मज्ञानं च यैरिति श्रीस्वामिचरणाः ॥ ३ ॥

देवयानेन आकाशमार्गेण सप्तर्षिभ्योऽर्वागेव प्रायशः कर्मिणां गतिरत एव ततोऽर्वागेव सङ्कुलत्वमुक्तम् । आवार्य आप्लाव्य मेरुमूर्द्धस्थे ब्रह्मसदने ॥ ४ ॥ ५ ॥

केसराचलानां मेरुसमानोच्छ्रायत्वात् प्रथमं तेषामधिशिखरेषु मुख्यशृङ्गेषु पतति ततस्तेभ्योऽधोऽधः प्रस्रवन्ती सती भद्राश्ववर्षस्य मध्ये पतित्वेति इलावृतमुल्लङ्घ्येत्यर्थः ॥ ६ ॥

केतुमालमभिलक्ष्य केसराचलात् तत्र पतित्वेत्यर्थः ॥ ७ ॥

गिरिशिखरादिति । केसराचलशिखरात्प्रस्खलिता नीलशिखरं ततः श्वेतशिखरं तदप्यतिक्रम्य शृङ्गादधः स्रवन्तीति इलावृतादिवर्षत्रयमुल्लङ्घ्येत्यर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीगङ्गावतरणमिलावृते श्रीसङ्कर्षणरुद्रयोः सेव्यसेवकसम्बन्धश्च वर्ण्यते । तत्रेति सप्तदशेनाध्यायेन । तत्र पुर्यां गङ्गा आगतेति शेषः एतदेव भगवत इत्यादिना ब्रह्मसदने निपततीत्यन्तेन प्रपञ्चयति । बलियज्ञे लिङ्गं त्रिविक्रममूर्तिर्यस्य साक्षाद्भगवतः विक्रमतः दक्षिणेन पदा भुवं क्रान्त्वा वामपादमुत्क्षिपतो वामपदाङ्गुष्ठनखेन निर्भिन्नमूर्ध्वमुपरिभागो यस्याण्डकटाहस्य तस्य विवरेण छिद्रेणान्तर्ब्रह्माण्डमध्ये प्रविष्टा या बाह्यजलधारा सातिमहता कालेन दिवो मूर्द्धन्यवततारेत्यन्वयः तस्य विष्णोर्यच्चरणपङ्कजं तस्यावनेजनेन क्षालनेनारुणं कुङ्कुमं तदेव किञ्जल्कास्तैरुपरञ्जिता अत एवाखिलजगतः अघं पापमेव मलं तदपहं तन्निनाशकमुपस्पर्शनं यस्याः सा तथाप्यमला साक्षाद्भगवत्पदीति यदनुपलक्षितं जाह्नवीभागीरथीत्याद्युपलक्षणान्तररहितं वचो नामधेयं तेनाभिधीयमाना तदानीं भगवत्पदीत्येकेनैव नामधेयेन सङ्कीर्त्यमानेत्यर्थः दिवो मूर्द्धानं दर्शयति । यदिति ॥ १ ॥

यत्र विष्णुपदे धीरे गरुडवाहने व्रतानि यस्य सः अस्मत्कुलदेवताचरणारविन्दजलमितिहेतोः यामनुसवनं त्रिकालं परमादरेण शिरसा बिभर्ति कथम्भूतः उत्कृष्यमाणेन भक्तियोगेन दृढं यथा तथा क्लिद्यमानमन्तर्हृदयं यस्य सः अत एवौत्कण्ठ्येन विवशमामीलितं यल्लोचनयुगलं तदेव कुड्मले ताभ्यां विगलितस्यामलबाष्पस्य कलया सहाभिव्यज्यमानरोमपुलकानां कुलकं यस्य स एवं विध इत्यर्थः ॥ २ ॥

ततस्तदनन्तरं ननु अहो तपसः आत्यन्तिकी निरतिशया सिद्धिः एतावती का इयं विष्णुपदी इति एवं तस्याः अक्षावाभिन्ना जटाजूटैरद्याप्युद्वहन्ति कथम्भूताः भगवत्स्वनुपरतभक्तियोगलाभेनैवोपेक्षिताः अन्यार्थात्मगतयः भक्तियोगेतरपुरुषार्थविषयकमनोवेगा यैस्ते ॥ ३ ॥

धुमण्डलमाप्लाव्य ब्रह्मसदने मेरुमूर्द्धस्थे ॥ ४ ॥ ५ ॥

तथैवालकनन्दा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरिकूटान्यतिक्रम्य हेमकूटाद्धैमकूटान्यतिरभसतररंहसा लुठयन्ती भारतमभिवर्षं दक्षिणस्यां दिशि जलधिमभिप्रविशति यस्यां स्नानार्थं चागच्छतः पुंसः पदे पदेऽश्वमेधराजसूयादीनां फलं न दुर्लभमिति ॥ ९ ॥

अन्ये च नदा नद्यश्च वर्षे वर्षे सन्ति बहुशो मेर्वादिगिरिदुहितरः शतशः ॥ १० ॥

तत्रापि भारतमेव वर्षं कर्मक्षेत्रमन्यान्यष्टवर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमानि स्वर्गपदानि व्यपदिशन्ति ॥ ११ ॥

एषु पुरुषाणामयुतपुरुषायुर्वर्षाणां देवकल्पानां नागायुतप्राणानां वज्रसंहननबलवयोमोदप्रमुदितमहासौरतमिथुनव्यवायापवर्गवर्षधृतैकगर्भकलत्राणां तत्र तु त्रेतायुगसमः कालो वर्तते ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

केसराचलाः केसरभूताः कुरङ्गादयः तेषां मेरुसमानोच्छ्रायत्वात्तदादयो येऽन्ये गिरयो मन्दरादयस्तेषां शिखरेभ्यः ॥ ६ ॥

एवं क्रमतो ब्रह्मसदनादधोऽधः प्रस्रवन्ती चक्षुःसंज्ञामाल्यवच्छिखरात्केतुमालाभिमुखं निष्पतन्ती प्रतीच्यां दिशि सरित्पतिं प्रविशति ॥ ७ ॥

भद्रा च गिरिशिखरादुत्स्खलिता श्वेतशिखरं तदप्यतिहाय शृङ्गवतः शृङ्गादवस्यन्दमाना अधःस्रवन्ती उत्तरान् कुरून् अभितः प्लाव्य लवणार्णवमभिप्रविशति ॥ ८ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले तिस मेरुपर साक्षात् यज्ञमूर्त्ति वामन भगवान् विष्णु के पराक्रम करने के समय दहिने पाद से पृथिवी को आक्रमण करके वामपाद को ऊपर की तरफ फेंकने से अंगुष्ठ के नखसे अण्ड कटाह के उपरि भाग के फूट जाने से कारणसमुद्र की जो छिद्र में पैठी हुई बाहिर की जल धारा तिस से प्रक्षालन करनेसे लाल भया जो कुंकुम जल सोई कमल केसर भये तिनो से संयुक्त सब प्राणियों के पापरूपी मलको नाश करने वाला है स्पर्श जिसका ऐसी स्वयं निर्मल साक्षात् भगवत्पदी इस शब्द से युक्त है उपलक्षणरहित नाम से कथन करने के योग्य जो गंगाजी सो बडे हजारों युगों से उपलक्षित काल से आकाश के ऊपर ध्रुव लोक में उतरी है जिस स्थान को विष्णु पद करके कहते हैं ॥ १ ॥

जहां पर परम भागवत दृढ सङ्कल्प वाले उत्तानपाद के पुत्र परमभागवत ध्रुवजी हमारे कुल देवता के चरण कमल का जलहै करके निरंतर बढते हुये भगवद्भक्ति योग से अत्यंत हृदय के आर्द्र होने से उत्कंठाके परवश होने से किञ्चित् दोनों लोचन कमल जिनके बंद होगये हैं तिनमें आसुओं की धारा गिरती है सब शरीर में रोमावली खडी होगई है सो ध्रुव जी अभी तक भी परम आदर से जिस गंगा को मस्तक से धारण करते हैं सो गङ्गा उतरी है ॥ २ ॥

तिसके नीचे श्रीगंगाजी के प्रभाव के जानने वाले सप्त ऋषि हैं निश्चित है कि तपस्या की सिद्धि इतनी ही है जो कि भगवान् वासुदेव सर्वात्मा के विषय निरंतर भक्ति योग के लाभ से उन सप्त ऋषियों ने और सब धर्म तथा ज्ञान मार्ग की भी उपेक्षा करके साक्षात् आई हुई मुक्ति सरीकी श्रीगङ्गाजी को मानकर मुमुक्षुसरीके स्वयं बडे आदर से अभी पर्यंत अपने जटों से श्रीगङ्गाजी को धारण किया हैं ॥ ३ ॥

फिर उस सप्तर्षि के स्थान से अनेक हजार विमानों के समूह से शोभित देवतों के मार्ग से उतरती हुई चन्द्रमण्डल को पवित्र करती हुई ब्रह्माजी के स्थान में आती हैं ॥ ४ ॥

तहांपर चार भाग होकर चार नामों से चार दिशों को जाती हुई चारों समुद्रों में प्रविष्ट होजाती हैं सीता अलकनन्दा चक्षु: भद्रा एनाम है ॥ ५ ॥

सीता तो ब्रह्मस्थान से केसराचलादि पर्वतों के शिखर से नीचे नीचे गिरतीहुई गन्ध मादन पर्वत के मस्तकों में गिरकर भद्राश्ववर्ष के मध्यमें होकर पूर्वदिशा में खारीसमुद्र में मिलती है ॥ ६ ॥

ऐसेही चक्षुनदी माल्यवान् पर्वत के शिखर से गिरतीहुई बडे वेग से चलकर केतु मालवर्ष में होकर पश्चिम दिशा से समुद्र में प्रविष्ट होती है ॥ ७ ॥

भद्रा नदी उत्तर की तरफ मेरु के शिखर से गिरकर एक पर्वत शिखर से दूसरे शिखर जातीहुई शृङ्गवान् पर्वत के शृङ्गसे चलती हुई उत्तर कुरू देशों में होकर उत्तर दिशा के समुद्र में प्रविष्ट होती है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतिरभसतररंहसा अस्खलिततीव्रतरवेगेन ॥ ९ ॥

बहुशो बहुविधाः । मेर्वादिगिरीणां दुहितरस्तत्प्रसूताः ॥ १० ॥

दिव्यभौमबिलभेदात्त्रिविधः स्वर्गः तत्र भौमस्वर्गस्य पदानि स्थानानि व्यपदिशन्ति ॥ ११ ॥

अयुतं पुरुषमानेन आयुर्वर्षाणि येषाम् वज्रवद्दृढं संहननं शरीरं तस्मिन् बलवयोमोदास्तैः प्रमुदितानि यानि महासौरतानि मिथुनानि तेषां व्यवायापवर्गे सम्भोगावसाने एकवर्षशेषे आयुषि धृत एको गर्भो यैस्तादृशानि कलत्राणि येषां त्रेतायुगसमः विषय-

यत्र ह देवपतयः स्वैः स्वैर्गणनायकैर्विहितमहार्हणाः सर्वर्तुकुसुमस्तबकफलकिसलयश्रिया नम्यमानविटपलताविटपिभिरुपशुम्भमानरुचिरकाननाश्रमायतनवर्षगिरिद्रोणीषु तथा चामलजलाशयेषु विकचविविधनववनरुहामोदमुदितराजहंसजलकुक्कुटकारण्डवसारसचक्रवाकादिभिर्मधुकरनिकराकृतिभिरुपकूजितेषु जलक्रीडादिभिर्विचित्रविनोदैः सुललितसुरसुन्दरीणां कामकलिलविलासहासलीलावलोकाकृष्टमनोदृष्टयः स्वैरं विहरन्ति ॥ १३ ॥

नवस्वपि वर्षेषु भगवान्नारायणो महापुरुषः पुरुषाणां तदनुग्रहायात्मतत्त्वव्यूहेनात्मनाद्यापि सन्निधीयते ॥ १४ ॥

इलावृते तु भगवान् भव एक एव पुमान्न ह्यन्यस्तत्रापरो निर्विशति भवान्याः शापनिमित्तज्ञो यत्प्रवेक्ष्यतः स्त्रीभावस्तत्पश्चाद्वक्ष्यामि ॥ १५ ॥

भवानीनाथैः स्त्रीगणार्बुदसहस्रैरवरुध्यमानो भगवतश्चतुर्मूर्तेर्महापुरुषस्य तुरीयां तामसीं मूर्तिं प्रकृतिमात्मनः सङ्कर्षणसंज्ञामात्मसमाधिरूपेण सन्निधाप्यैतदभिगृणान् भव उपधावति ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सुखोत्कर्षात् । कृतयुगे हि सर्वे ध्याननिष्ठाः । द्वापरादौ तु दुःखबहुलाः ॥ १२ ॥

यत्र ह येषु हि वर्षेषु देवपतयः स्वैः स्वैः सेवकगणेषु मुख्यैः कृतमहोपचाराः सन्तः स्वैरं विहरन्तीत्यन्वयः केषु स्थानेषु सर्वेषु ऋतुषु कुसुमस्तवकादीनां श्रिया समृद्ध्याऽत्यन्तं नम्यमाना विटपास्तदाश्रिता लताश्च येषु तैर्विटपिभिरुपशुम्भमानानि शोभमानानि रुचिराणि काननानि येषु तेष्वाश्रमायतनेषु वर्षगिरिद्रोणीषु च तथा अमलेषु जलाशयेषु विकचानि विकासीनि विविधानि नवानि च यानि वनरुहाणि नीरजानि तेषामामोदेन मुदितै राजहंसादिभिर्मधुकरनिकराणां चाकृतिभिर्जातिविशेषैरुपकूजितेषु कामेन कलितैः क्षुभितैर्विलासादिभिराकृष्टं मनो दृष्टिश्च येषां ते ॥ १३ ॥

नवस्वपि वर्षेषु ये पुरुषास्तेषां तदनुग्रहाय स चासौ वक्ष्यमाणोऽनुग्रहस्तदर्थमात्मतत्त्वव्यूहेन स्वमूर्तिसमूहेन सन्निधीयते सन्निहितो भवति ॥ १४ ॥

अपरोऽर्वाचीनः पश्चान्नवमस्कन्धे ॥ १५ ॥

भवानी नाथः स्वामिनी येषां तैः स्त्रीगणानामर्बुदसहस्रैरवरुध्यमानः सर्वतः सेव्यमानः आत्मनः प्रकृतिं कारणमात्मनि समाधिर्ध्यानं यस्य तेन रूपेण एतद्वक्ष्यमाणं मन्त्रादिकमभिगृणन् जपन् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नद्यैवालकनन्दासंज्ञा धारा मेरौ ब्रह्मसदनादविपतितः, स्रवन्ती बहूनि गिरिशिखराणयतिक्रम्य मध्यस्थपर्वतशिखराग्रपृष्ठेन हेमकूटहिमवत्कूटानि हेमकूटहिमवत्पर्वतयोः शृङ्गाण्यतिरभसतररंहसा विश्वालितवेगेन लुठन्ती भिन्दन्ती भारतं वर्षमभिव्याप्य दक्षिणस्यां दिशि समुद्रमनुप्रविशति अन्ये च नद्यः नद्यश्च अन्ये चान्याश्चान्ये "पुमान् स्त्रिया" इत्येकशेषः मेर्वादिगिरीणां दुहितरः तत्प्रसूता वर्षे शतशः सन्ति ॥ ९ । १० ॥

तत्रापि जम्बूद्वीपेऽपि भारतं वर्षमेव कर्मक्षेत्रं कर्मणां सुखदुःखनिमित्तानां पुण्यापुण्यरूपाणां क्षेत्रमनुष्ठानस्थानं व्यपदिशन्तीत्युत्तरेणान्वयः अन्यानि त्वष्टौ वर्षाणि स्वर्गिणां पुण्यकर्मणां पुण्यशेषस्य भुक्तावशिष्टस्य पुण्यकर्मण उपभोगस्थानान्यत एव भौमानि स्वर्गपदानि व्यपदिशन्ति न तु तानि पुण्यापुण्यकर्मक्षेत्राणीत्यर्थः नन्वत्र केवलेष्टापूर्तदत्तकर्मकारिणां धूमादिना पितृयानेन पथा चन्द्रमसं गतानां तत्र सुखानुभवक्षीणपुण्यकर्मणां पुनरत्रागमनं श्रुतं "यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्त इति सम्पतन्त्यनेन स्वर्गं लोकमिति संपातः कर्मोच्यते श्रुत्यन्तरं च ।

प्राप्यान्तं कर्मणस्तस्य यत्किं चेह करोत्ययम् ।
तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे

इति पुण्यापुण्यकर्मानुष्ठानायेत्यर्थः तत्कथं पुण्यशेषात्स्थानं कथं तेषां तद्भोगस्थानत्वम् । उच्यते तावदवश्यं भोगावशिष्टानामभुक्तफलानामकृतप्रायश्चित्तानां कर्मणां सद्भावो वक्तव्यः अन्यथेह कर्मनिमित्तस्य जन्मनोऽसम्भवात्पुनरवरोहणानुपपत्तेः तथा च श्रूयते "रमणीयचरणा रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं क्षत्रिययोनिं वैश्ययोनिं वा" इति स्मृतिरपि "वर्णाश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टतरजातिकुलरूपायुःश्रुतवित्तसुखमेधसो जन्म प्रतिपद्यन्ते" इति एवं च भुक्तावशिष्टेन पुण्येन कर्मणाऽतिशयविशिष्टभोगार्थं तद्देशेषूत्पत्तिः सम्भवतीति ॥ ११ ॥

तान्यष्टौ वर्षाणि वर्णयति । येष्विति । यत्र हेति च गद्यद्वयेन । येष्विति येष्वष्टसु वर्षेषु पुरुषाणां त्रेतायुगसमः कालो वर्तते सुखोत्कर्षात्त्रेतायुगसाम्यमुक्तं कृतयुगे हि सर्वे ध्याननिष्ठाः द्वापरादौ तु दुःखबहुलाः कथम्भूतानां देवतुल्यानां नागायुतबलानां पुरुषाणामयुतं पुरुषमानेनायुर्वर्षाणि येषां वज्रवद्दृढं संहननं शरीरं तस्मिन् बलवयोमोदस्तैः प्रमुदितानि यानि महान्ति सौरतानि येषां तानि मिथुनानि तेषां व्यवायापवर्गोऽन्तभोगावसाने एकवर्षावशिष्टे आयुषि धृत एको गर्भो यैस्तादृशानि कलत्राणि येषाम् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

यत्र वर्षे देवपतयः देवश्रेष्ठाः स्वैः स्वैः सेवकगणानां नायकैः विहितमहार्हणाः कृतमहोपचाराः सन्तः स्वैरं विहरन्तीत्यन्वयः एतेषु स्थानेषु सर्वेषु सत्सु कुसुमस्तबकादीनां श्रिया समृद्ध्यात्यन्तं नम्यमानाः प्रह्वीभूताः शाखा लताश्च येषां तैर्विटपिभिर्वृक्षैरुपशोभमानानि रुचिराणि काननानि येषु तेष्वाश्रमायतनेषु गिरिद्रोणीषु च तिर्यगन्तरान्तर्भूमिषु तथामलेषु जलाशयेषु च विकचानि विविधानि नवानि वनरुहाणि नीरजानि तेषामामोदेन प्रमुदितैः राजहंसादिभिर्मधुकराणां चाकृतिभिः जातिविशेषैरुपकूजितेषु सत्सु तेषु जलक्रीडायां ये विविधा विनोदास्तैः सुललितानामतिसुन्दरीणां सुरस्त्रीणां कामेन कलिलैः क्षुभितैः विलासादिभिराकृष्टं मनो दृष्टिश्च येषाम् एवम्भूताः सन्तः स्वेच्छापूर्वकं विहरन्तीत्यर्थः ॥ १३ ॥

इलावृतादिषु नवस्वपि वर्षेषु भगवान्नारायणः महापुरुषेण तत्तद्वर्षपतिना सेव्यमानः पुरुषाणां तत्तद्वर्षपुरुषाणां वक्ष्यमाणानुग्रहाय पुरुषाननुग्रहीतुमात्मतत्त्वव्यूहेनात्मना विगत ऊहस्तर्कः व्यूह आत्मतत्त्वस्य जीवतत्त्वस्य व्यूहो यस्मिंस्तेन जीवैर्दृष्टवस्तुसजातीयत्वेन चिन्तयितुमशक्येनात्मनेत्यर्थः। यद्वा। आत्मनः स्वात्मनः तत्त्वं तस्य भावस्तत्त्वं कल्याणगुणास्तेषां व्यूहः समूहो यस्य तेनात्मना समस्तकल्याणगुणविशिष्टेनात्मनेत्यर्थः नन्वात्मतत्त्वव्यूहेन सङ्कर्षणादिरूपेणेत्यर्थः हरिवर्षादिषूपास्यानां नरहर्यादिरूपाणां विभवत्वेन व्यूहत्वाभावात् नवस्वपि वर्षेष्वित्यनेन सह विरोधापत्तेः सन्निधीयते सन्निहितो भवतीत्यर्थः ॥ १४ ॥

तत्रेलावृतादिषु क्रमेणोपास्यमानरूपं तदुपासकं चाह। इलावृते वर्षे भगवान् भवो रुद्र एवैकः पुरुषो वसति नापरः पुरुषस्तत्र वसति तत्र हेतुः भवान्याः शापरूपं यन्निमित्तं स्त्रीत्वनिमित्तं तज्जानातीति तथा भवान्याः शापनिमित्तज्ञोऽपरः पुरुषस्तत्र न वसति यदि शापमजानन्नपि तत्र प्रविशति तर्हि स्त्रीत्वमाप्नोतीत्याह। यत्प्रविष्टस्य यत्रेलावृते प्रविष्टस्य स्त्रीभाव आपद्यते तत्र प्रविष्टस्य स्त्रीत्वनिमित्तं शापरूपं पश्चान्नवमस्कन्धे वक्ष्यामीत्यर्थः॥ १५॥

तत्र भवानी रुद्राणी नाथः स्वामिनी ईश्वरी येषां तैः स्त्रीणामर्बुदसहस्रैरवरुध्यमानः सेव्यमानः भवो रुद्रः भवानीनाथ इति पृथक्पदं भवविशेषणं वा अनेन भवानीसामीप्यं विवक्षितम् आत्मनः स्वस्य प्रकृतिं कारणभूतां चतुर्मूर्त्तेर्वासुदेवादिरूपेणावस्थितस्य भगवतो महापुरुषस्य सङ्कर्षणसंज्ञां तुरीयां मूर्त्तिरूपमित्यर्थः वासुदेवप्रद्युम्नानिरुद्धसङ्कर्षणक्रमविवक्षया तुरीयामित्युक्तं क्रमानादरणात् तामसीं तमोऽधिष्ठात्रीं तमःशब्देनात्र प्रधानं विवक्षितम् "तम आसीत्तमसा गूढमग्रे प्रकेतम् अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते" इति प्रयोगात् ज्ञानावरणाच्च तमसो नियन्त्रीमित्यर्थः आत्मनि चित्ते समाधिरेव रूपमाकारो यस्य तेन उपायेनेति शेषः सन्निधाप्य साक्षात्कृत्य एतद्वक्ष्यमाणं मन्त्रात्मकं वाक्यमनुगृणन् जपन्नुपधावति स्तौति भज इत्यादिभिरित्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

रभसतरः सम्भ्रमातिशयस्तस्य वेगेनोपर्यधःपाषाणादिखण्डेषु लुठन्ती स्खलित्वा परिवर्त्तमाना ॥ ९ ॥ १० ॥

नवानां वर्षाणां विशेषमाह। अत्रापीति। कर्मक्षेत्रं पुण्यपापलक्षणकर्माचरणस्थानं व्यपदिशन्ति अन्यान्यष्टवर्षाणि स्वर्गिणां पुण्यकर्मणा स्वर्गं प्राप्तानां तत्र स्थित्वा पुण्यफलभोगयोग्यानां स्वर्गप्राप्त्यवशिष्टपुण्यानुभवस्थानानि व्यपदिशन्तीत्यन्वयः किन्नामानीत्यत्राह। भौमानीति। भूमिसम्बन्धदुःखादिसंभिन्नस्थानानि ॥ ११ ॥

येषु वर्षेषु वसतां त्रेतायुगसमः कालो वर्तत इत्यन्वयः। नरवरावरोधे राजयोग्यगृहे मिथुनानां यो व्यवायः ग्राम्यधर्मलक्षणा रतिस्तस्यापवर्गे अवसाने धृत एकगर्भो यैस्तानि धृतैकगर्भाणि तानि च कलत्राणि येषां ते धृतैकगर्भकलत्रास्तेषां वज्रवद्दृढं संहननं शरीरं बलं वयश्च मोदश्च साधारणं सुखं प्रमुदितं प्रमोदः विशिष्टसुखं च येषां ते तथा महत्सौरतं निरन्तरसुरतक्रिया तस्यां निरताश्च वज्रसंहननबलवयोमोदप्रमुदिताश्च महासौरतनिरताश्च नरवरावरोधमिथुनव्यवायापवर्गधृतैकगर्भकलत्राश्च ते तथा तेषां बहुगर्भधारणो देहशैथिल्यात् कलत्रतारुण्यनाशात् सम्भोगानुपपत्तिभयात्तदवसाने सन्तत्यर्थमेकमेव गर्भं धारयन्तीति किंवदन्ती ॥ १२ ॥

यत्र येषु देवपतयः स्वैरं विहरन्ति किलेत्यन्वयः। केषु स्थानेष्विति तत्राह। उपशोभमानेत्यादिना। सर्वर्तुसमुद्भूतानां पुष्पस्तबकानां फलानां किसलयानां च श्रिया सम्पदा आनम्यमाना भृशं नमन्त्यो विटपलता येषां ते तथा ते च आविटपिनः भारतखण्डवृत्तविलक्षणा वृक्षा ये तैरुपशोभमानेषु रुचिरेषु काननलक्षणाश्रमेष्वायतनेषु वर्षभवगिरीणां द्रोणीषु पार्श्वद्वयोन्नतमध्यनिम्नलक्षणप्रस्थेषु अमलजलाशयेषु निर्मलसरस्सु विकचानां विविधानां वनरुहाणां पद्मानामामोदजन्यमदेन मुदितैः राजहंसादिभिः भृङ्गाणामारुतिभिः शब्दैरुपकूजितेषु शब्दितेषु सरोविशेषणमेतत् सुष्ठु शृङ्गारयुतसुरस्त्रीणां कामेन कलिलैर्विलासादिभिराकृष्टा मनोदृष्टयो येषां ते तथा मनांसि च दृष्टयश्च मनोदृष्टयः ॥ १३ ॥

न केवलं नववर्षस्थानां व्यवायादिक्रियया कालयापनमपि तु श्रीनारायणसपर्ययेति भावेनाह। नवस्विति। आत्मनः स्वस्य तत्त्वानामनारोपितरूपाणां व्यूहेन नवसङ्ख्याविशिष्टेन समूहेनाबाध्य सन्निध्याप्य पूज्यत इत्यर्थः वर्षस्थैः पुरुषैरिति शेषः ॥ १४॥

इलावृते तु विशेषोऽस्तीत्याह। इलावृत इति। तत्रेलावृतमारभ्य नववर्षसन्निहितरूपाणि तदुपासकांश्च क्रमेणात्यतोवाह। इलावृत इति ॥ १५ ॥

भवानी पार्वती नाथा येषां तानि तथा तैः अवरुध्यमानः परिव्रियमाणः वासुदेवादिचतुर्मूर्त्तेः तुरीयां चतुर्थांशभूतां तामसीं संहारकारणतमोगुणप्रवर्तनीमात्मनः स्वस्य भवस्य प्रकृतिं प्रकृष्टकारणभूतामात्मसमाधिरूपेण मनस एकाग्रताकारणेन उपधावत्युपास्ते ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

नवस्वपीत्यादिना। सर्वेषामवताराणां नित्यप्राकट्यं दर्शितम्। तत्र चात्मनेति। स्वरूपेणैव नतु प्रतिमारूपेणेत्यर्थः। प्रद्युम्नाविर्भावे गतिविलासादेरपि वर्णयिष्यमाणत्वात्। अद्यापि सन्निधीयत इति यथावसरं नित्यमेव ज्ञेयम् ॥ १४ ॥ १५ ॥

तामसीं तमोगुणप्रेरिकां प्रलयहेतुत्वात् ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तथैवेति वर्षत्रयमुल्लङ्घ्य गिरिशिखराद्गिरिशिखरे पतन्तीत्यर्थः । भारतमभिलक्ष्य पतितैवेति शेषः । अत्र द्वीपमध्यवर्त्तीनि बहूनि वर्षाणि उल्लङ्घ्योल्लङ्घ्यापि चलन्ती प्राच्यादिषु चतुर्षु समुद्रसमीपवर्त्तिष्वेव वर्षेषु कुलाचलादवरुह्य भूमौ यन्निपतति तत् खलु स्वपतिं समुद्रमभिलक्ष्य लज्जानम्रमुखी स्वमौद्धत्यं परिहरन्ती वेति ज्ञेयम् ॥ ६ ॥ १० ॥

दिव्यभौमविलभेदात्त्रिविधः स्वर्गः । तत्र भौमस्वर्गस्य पदानि स्थानानि ॥ ११ ॥

अयुतं पुरुषस्य मनुष्यस्य मानेन आयुर्वर्षाणि येषां दृढं संहननं शरीरं तस्मिन् बलवयोमोदास्तैः प्रमुदितानि यानि महासौरतानि मिथुनानि स्त्रीपुरुषयुगलानि तेषां व्यवायापवर्गे सम्भोगावसाने एकवर्षशेषे आयुषि धृतैकगर्भाणि कलत्राणि येषां तेषाम् । त्रेतायुगसम इति । विषयसुखोत्कर्षात् यतः कृतयुगे हि सर्वे ध्याननिष्ठाः द्वापरादौ दुःखबहुलाः॥१२॥

यत्र ह देवपतयः स्वैरं विहरन्तीत्यन्वयः । सर्वेष्वेव ऋतुषु कुसुमादीनां श्रिया समृद्ध्या अत्यन्तं नम्यमाना विटपाः येषां तैर्लताविटपिभिरुपशुम्भमानेषु शोभमानेषु रुचिरकाननादिषु तत्र वर्षगिरयो वर्षख्यातिकरपर्वता राजहंसादिभिर्मधुकरनिकराणाञ्च आकृतिभिर्जातिविशेषैरुपकूजितेषु अधिकरणे निष्ठा षष्ठ्यभावार्षः ॥ १३ ॥

पुरुषाणां तदनुग्रहाय स चासौ वक्ष्यमाणोऽनुग्रहश्चेति तस्मै तदर्थम् आत्मतत्त्वव्यूहेन स्वमूर्त्तिसमूहेन सन्निधीयते सन्निहितो भवति । अत्र उपास्यदेवतावर्षेषु भगवन्मूर्त्तयः प्रायः प्रतिमारूपा एव ज्ञेयाः । आविरासिर्भवेति प्रह्लादस्योपरिष्टादुक्तेः ॥१४॥

पञ्चमस्कन्धे ॥ १५ ॥

भवानी नाथा येषां तैः अवरुध्यमानः सर्वतः सेव्यमानः तामसीं तमःकार्यभूतस्य संहारस्य प्रवर्त्तयित्रीं वस्तुतस्तु तुरीयां तमोरजःसत्त्वेभ्योऽपि परां शुद्धचिन्मयीमित्यर्थः । न यस्य मायेत्यादिना त्रिभिर्विहीनामित्यादिना च तथा प्रतिपादयिष्यमाणत्वात् आत्मनः प्रकृतिमंशित्वात् कारणम् । आत्मनः समाधिध्यानं यत्र येन रूपेण आकारेण ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अतिरभसतररंहसा अस्खलिततीव्रतरवेगेन लुठन्ती भिन्दन्ती ॥ ६—१० ॥

कर्मक्षेत्रं भोगमोक्षसाधनानुष्ठानस्थानं दिव्यभौमविलभेदात्त्रिविधः स्वर्गस्तत्र भौमस्वर्गस्य पदानि स्थानानि व्यपदिशन्ति "पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इति कोशात् ॥ ११ ॥

एषु अष्टवर्षेषु पुरुषाणामयुतं पुरुषमानेन आयुर्येषां तेषां देवकल्पानां गजायुतबलानां वज्रवत्संहनने दृढे शरीरे ये बलवयोमोदास्तैः प्रमुदितानि यानि महासौरतमिथुनानि महासम्भोगयुक्तस्त्रीपुरुषयुगलानि तेषां व्यवायापवर्गे सम्भोगान्ते धृत एको गर्भो यैस्तानि कलत्राणि येषां तेषां त्रेतायुगसमः कालो वर्त्तते विषयसुखाधिक्यात् कृतयुगे पुरुषाणां ध्यानसुखं द्वापरादौ दुःखाधिक्यमतस्त्रेतासम इत्युक्तम् ॥१२॥

यत्र येषु अष्टवर्षेषु स्वैः स्वैर्गणनायकैर्विहितानि रचितानि महार्हणानि महापूजनानि येषां ते देवपतयः सर्वर्तुषु कुसुमस्तबकादीनां श्रिया समृद्ध्या आनम्यमानाः विटपाः शाखाः तदाश्रिता लताश्च येषु तैर्विटपिभिः उपशुम्भमानानि शोभमानानि रुचिरकाननानि येषु तेषु आश्रमायतनेषु वर्षगिरिद्रोणीषु च विचित्रविनोदैः स्वैरं विहरन्ति तथैव विविधानि नवानि च वनरुहाणि जलजानि तेषामामोदेन प्रमुदितैः राजहंसादिभिः मधुकरनिकराणां च आकृतिभिर्जातिविशेषैः उपकूजितेषु अमलजलाशयेषु जलक्रीडादिभिश्च स्वैरं विहरन्ति कथम्भूताः सुष्ठु ललितानां सुरसुन्दरीणां कामेन कलिलैः क्षुभितैर्विलासादिभिराकृष्टं मनो दृष्टिश्च येषां ते ॥ १३ ॥

पुरुषाणामुपासकानां सचासौ वक्ष्यमाणोऽनुग्रहस्तदर्थम् नवस्वपि वर्षेषु आत्मना स्वत एव कर्मकालयातायातसयेत्यर्थः आत्मतत्त्वस्य व्यूहः सङ्कर्षणादिमूर्त्तिसमूहस्तेन संनिधीयते संनिहितो भवति ॥ १४ ॥

परो भगवान् उपास्यः श्रीसङ्कर्षणः सङ्कर्षणापेक्षया अपरः उपासकरूपः भगवान् भवः एक एव पुमान् आस्ते अन्यो भवान्याः शापनिमित्तज्ञो न निर्विशति पञ्चमस्कन्धे ॥ १५ ॥

अवरुध्यमानः परिसेव्यमानः आत्मनः प्रकृतिं कारणभूतां तामसीं तमोऽधिष्ठात्रीमात्मनि समाधिध्यानं यस्य तेन रूपेण संनिधाप्य साक्षात्कृत्य एतद्वक्ष्यमाणं मन्त्रादिकमभिगृणन् जपन् उपधावति स्तौति ॥ १६ ॥

भाषाटीका ।

तैसेही अलक नन्दा ब्रह्मस्थान से दक्षिण की तरफ बहुतसे पर्वत शिखरों को लांघकर हेमकूट में आकर फिर बडे वेगसे हिमालय के शिखरों पर गिरती हुई दक्षिण दिशा में भारतवर्ष के मध्य में होकर समुद्र में प्रवेश करती है जिस अलकनन्दा भागीरथी गंगा में स्नान के पान के वास्ते जानेवाले पुरुष को एक पगमें अश्वमेध राजसूय आदि का फल कुछ दुर्लभ नहीं है ॥ ६ ॥

और भी नद नदी सब वर्षों में बहुत मेरु आदि पर्वतों की पुत्री सैकडों हैं ॥ १० ॥

तिनमें भी भारतवर्ष ही कर्म का स्थान है और आठ वर्ष तो स्वर्ग से गिरे जीवों के पुण्य शेष के भोगने के स्थान हैं पृथिवी के स्वर्ग हैं ऐसा वर्णन किया है ॥ ११ ॥

उन वर्षों में दश हजार वर्ष की पुरुषायुस अयुतवर्ष की आयु वाले पुरुष होते हैं देवतों के तुल्य हैं दश हजार हाथियों के बरोबर बल वाले वज्र सरीके शरीर वाले बल अवस्था आनंद प्रमोद महासौरत वाले जो स्त्री पुरुषों के जोडा तिनके मैथुन करने के अन्तमें एक वर्ष की अवस्था बाकी रहने पर पुत्रको धारणकरने वाली स्त्री होती हैं तहांपर त्रेतायुग के समान काल सदा रहता है ॥ १२ ॥

श्रीभगवानुवाच ।

ॐ नमो भगवते महापुरुषाय सर्वगुणसंख्यानायानन्तायाव्यक्ताय नम इति ॥ १७ ॥

भजे भजन्यारणपादपङ्कजं भगस्य कृत्स्नस्य परं परायणम् ।
भक्तेष्वलम्भावितभूतभावनं भवापहं त्वा भवभावमीश्वरम् ॥ १८ ॥

न यस्य मायागुणचित्तवृत्तिभिर्निरीक्षतो ह्यण्वपि दृष्टिरज्यते ।
ईशे यथा नोऽजितमन्युरंहसां कस्तं न मन्येत जिगीषुरात्मनः ॥ १९ ॥

असद्दृशो यः प्रतिभाति मायया क्षीबेव मध्वासवताम्रलोचनः ।
न नागवध्वोऽर्हण ईशिरे ह्रिया यत्पादयोः स्पर्शनधर्षितेन्द्रियाः ॥ २० ॥

भाषाटीका ।

जिन वर्षों में सब ऋतुओं में फूलों के गुच्छे फल पत्ता कोमल डालियों की शोभा से झुकी हुई शाखाओं में लिपटी लता वाले वृक्षों से शोभायमान सुन्दर वनवाले स्थानो मे वर्षों के मर्यादा वाले पर्वतों की कन्दरों मे निर्मल जल वाले खिले हुये नाना प्रकार के कमल वाले सरोवरों का जो सुगन्ध तिससे आनन्दित जो राजहंस जलमुरगा कारण्डव सारस चकवाचकवी आदि पक्षि भौंरा आदि शब्द कर रहे हैं उन सरोवरों मे जल क्रीडा के करने से नाना प्रकार के विनोदों से सुन्दर मनोहर जो देवस्त्री तिनका जगा हुआ जो कामदेव जिसमे उत्पन्न हुई क्रीडा और हासलीला से जो अवलोकन तिससे जिनका मन और दृष्टि मोहित होगई है ऐसे जो देवतों के पति अपने गण देवतों के श्रेष्ठों के द्वारा पूजित होकर इच्छा पूर्वक विहार करते हैं ॥ १३ ॥

सबही वर्षों में भगवान् महापुरुष नारायण भक्तपुरुषों के अनुग्रह के वास्ते आत्मगुण के समूह से मूर्ति धारण करके अभीभी विराजते हैं ॥ १४ ॥

इलावृत में तो भगवान् महादेवजी एकही पुरुष हैं दूसरा नहीं है भवानी के शापका कारण जानकर उहां दूसरा कोई नहीं जाता है जिस स्थानमें प्रवेश होने से स्त्री स्वरूप होजाता है इसका वृत्तान्त पीछे हम कहैंगे ॥ १५ ॥

पार्वतीजी जिनकी स्वामिनी हैं ऐसी दशहजार से अधिक स्त्रीजनों से सेवित होकर श्रीमहादेवजी चतुर्व्यूह मूर्त्तिवाले भगवान् महापुरुष नारायण की चौथी तामसी मूर्त्ति महादेव जी की कारणरूप संकर्षण नामक मूर्तिको आत्माकी समाधि लगाकर प्रसन्नकर के आगे के मन्त्रको कहते हुये स्तुति करते हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सर्वेषां गुणानां संख्यानं प्रकाशो यस्मात् स्वयं त्वव्यक्तायाप्रमेयाय ॥ १७ ॥

हे भजन्य भजनीय त्वां त्वा परेमश्वरं भज इत्यन्वयः अरणं शरणं पादपङ्कजं यस्य कृत्स्नस्य भगस्यैश्वर्यादिषाड्गुण्यस्य परमयनमाश्रयं भक्तेष्वलमत्यर्थं भावितं प्रकटितं भूतभावनं स्वरूपं येन भवापहं संसारहरम् भक्तेष्वित्यनुषङ्गः भवम्भावयतीति तथा तम् अर्थाद्भक्तेष्विति द्रष्टव्यम् ॥ १८ ॥

ईश्वरत्वमुपपादयंस्तामसत्वेन प्रसक्तमनादरं वारयति । न यस्येति । यस्य निरीक्षमाणस्यापि दृष्टिर्मायागुणैर्विषयैश्चित्तवृत्तिभिः कारणैश्चाण्वपीषदपि नाज्यते न लिप्यते । किमर्थं निरीक्षमाणस्य ईशे ईशनाय नियमनाय ईशनमीट् सम्पदादित्वात्क्विप् अत्र वैधर्म्ये दृष्टान्तः यथा अजितक्रोधवेगानां नोऽस्माकं दृष्टिरज्यते न तथेति । अत आत्मन इन्द्रियाणि जिगीषुर्जेतुमिच्छुर्मुमुक्षुस्तं को न मन्येत नाद्रियेत ॥ १९ ॥

ननु सुरामदाक्षयां मत्तस्य कुतो दृष्टिर्नाज्यते तत्राह । असती दृष्टिर्यस्य तस्य स्वमायया क्षीबा मत्त इव यो भयङ्करः प्रतिभाति मध्वासवाक्ष्यां ताम्रलोचन इव च । नागवधूविमोहनेन तथा प्रतिभानं युक्तमित्याह । नेति । पदार्चने यस्य पादयोः स्पर्शनेन धर्षितं मोहितमिन्द्रियं मनो यासां ता ह्रिया लज्जया भुजाद्यर्हणे न ईशिरे न शेकुः कस्तं न मन्येतेति पूर्वेणैवान्वयः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

जप्यमन्त्रमाह । ओं नम इति । ओमिति ब्रह्मणो निर्देशः "ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत" इति वचनात्स्वव्यतिरिक्तं चिदचिदात्मकं सर्वं जगन्नित्याविभूतिं च स्वशेषतया स्वभावेनैव स्वीकुर्वन्न इत्यर्थः भगवत इत्यनेन पूर्णषाड्गुण्यं विवक्षितं महापुरुषायेत्यनेन निखिलजगदुदयविभवलयलीलत्वमभिप्रेतं महापुरुषशब्दस्य "वेदाहमेतं पुरुषं महान्तम्" इति पुरुषसूक्तार्थप्रत्यभिज्ञापकत्वात् तत्र च तस्माद्विराडजायतेत्यादिना कृत्स्नजगत्कारणत्वप्रतिपादनात् अद्भ्यः सम्भूत इत्यनुवाकोऽप्यत्र प्रत्यभिज्ञायते तत्रापि महापुरुषशब्दश्रवणात् अद्भ्यः सम्भूत इत्यनुवाकस्य हिरण्यगर्भः समवर्तताग्र इत्यनेनाप्यैकार्थ्येन सहाद्भ्यः सम्भूतब्रह्मा गर्भः इत्यष्टावित्येकवाक्यत्वप्रतिपादनात् हिरण्यगर्भादिकारणत्वच्छायानुकारिणामपि वैदिकवाक्यानां महापुरुषपरत्वमवगतं सर्वगुणानां चेतनाचेतनयोरसम्भावितानां अनन्ता-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रक्षणत्वौपयिकानामाश्रयणसौकर्यापादकानामाश्रितकार्यापादकादीनां च सर्वज्ञत्वसर्वशक्तित्ववात्सल्यसौशील्यसौलभ्यज्ञानशक्तिपूर्त्तेः प्राप्त्यादीनां सङ्ख्यानं कथनं श्रुतिगणेन यस्मिंस्तस्मै अनेन "सर्वे वेदा यत्पदमामनन्ति" इति श्रुत्यर्थो विवक्षितः सर्वगुणानां संङ्ख्यानं च न परिच्छिन्नत्वेन क्रियते अपि त्वानन्त्येन स्वरूपतो गुणतश्चानन्त्याभिप्रायेणानन्तायेत्युक्तमनेनोपास्यत्वप्राप्यत्वादिकं च विवक्षितम् एवम्भूत तत्प्राप्त्युपायस्तदुपासनं तच्चरणावरणमेव नान्य इति पुरुषसूक्तार्थप्रत्यभिज्ञानादेव स्फोरितस्तत्र "तमेवं विद्वानमृत इह भवति नान्यः पन्था" इति वेदनातिरिक्तोपायान्तरनिषेधात् तदेव शब्दतो व्यञ्जयन्नाह । अव्यक्तायेति । व्यक्तैरिन्द्रियादिभिर्न व्यज्यते न गृह्यते इत्यव्यक्तः न चक्षुषा गृह्यते नापि वाचेत्यादिश्रुत्यर्थोऽनुसन्धेयः एवंभूताय नमः नतिर्नमस्कारोऽत्र तत्पूर्वकोपासनोपलक्षकः तदेव नमः मद्रक्षणोपाय इत्यर्थः ॥१७॥

तत्प्रतिरूपान् श्लोकानाह । भज इत्यादिना । ईश्वरं त्वां भज इत्यन्वयः तमीश्वरं विशिनष्टि । भजन्त्यारणपादपङ्कजं भजन्यं भजनीयमुपास्यमरणं प्राप्यं पादपङ्कजं यस्य तं अनीयर इकारलोप आर्षः भजन्येति पृथक् पदं सम्बुद्ध्यन्तं वा यद्वा भजनं कुर्वाणा भजनः भजनशब्दाद्भात्रसाधनात्तत्करोतीति णयन्तात् कृतटिलोपात्कर्तरि क्विप् तान् याति प्राप्नोति तेषां सन्निहितो भवति इति भजन्यइति व्युत्पाद्यते भजन्शब्देनान्ते कर्मण्युपपदे "आतोऽनुपसर्गे कः" ३ । २ । ३ । टिलोपस्य स्थानिवत्त्वान्न लोपः कृत्स्नस्य समग्रस्य भगस्यैश्वर्यादिवर्गस्य परं केवलं परायणमाश्रयं भक्तेष्वलमत्यर्थं भावितं प्रकटीकृतं भूतभावनं भूतानि भाव्यन्ते उत्पाद्यन्ते येन तत्तथा निखिलभूतकारणं स्वस्य रूपं येनेत्यर्थः यद्वा । भूतभावनं भूतानामभ्युदयहेतुं भक्तेषु भवापहं भवनाशनमित्यर्थः भवभावं संसारस्य प्रवर्तकं स्वसङ्कल्पायत्तजीवसम्बन्धिबन्धमोचकमित्यर्थः ॥ १८ ॥

एवमुपास्यत्वप्राप्यत्वषाड्गुण्यपूर्त्यभ्युदयहेतुत्वं बन्धमोक्षकारणत्वादिभिर्धर्मैश्चिदचिद्वैलक्षण्यमुक्तम् । तदेव वैधर्म्ये दृष्टान्तेन विशदयति । न यस्येति । यस्य निरीक्षतः सर्वं स्वतः पश्यतः ईशइति षष्ठ्यन्त मीश्वरस्येत्यर्थः दृष्टिर्ज्ञानं मायागुणचित्तवृत्तिभिः प्रकृतिगुणकार्यरागद्वेषादिचित्तवृत्तिभिरणवप्यल्पमपि नाज्यते नानुविद्ध्यते अजितमन्युरंहसामजितक्रोधवेगानां नोऽस्माकं यथेति वैधर्म्ये दृष्टान्तः ईशे इति पाठे ईशा ईशनं नियमनं तस्मै निरीक्षत इत्यन्वयः तमेवंभूतं भगवन्तमात्मन इन्द्रियाणि देहान् वा तदुपलक्षितं संसारं जिगीषुर्जेतुमिच्छुः कोनाम पुमान्नानुमन्येत नाद्रियेत सर्वोऽपि मुमुक्षुस्त्वां सेवत इत्यर्थः ॥ १९ ॥

रागद्वेषादिभिर्वृत्तिभिर्दृष्टिर्नाज्यते इत्युक्तं तत्कथं तामसत्वेन प्रतीयमानस्य रागादेरनुदय इत्याशङ्क्याह । असद्दृश इति । असद्दृशः अपरमार्थदृष्टेः असति देहे दृष्टिरात्मनोऽभिमानो यस्य तस्येति वा जनस्य माययाविद्ययाऽज्ञानेन मध्वासवः मादक आसवः मद्यं तेन मध्वासवाभ्यां वा ताम्रे रक्ते लोचने यस्य तथाभूतो यः क्षीवः मत्तः स इवेति प्रतिभाति यो भवान् क्षीवेवेत्यत्र सन्धिरार्षः परमार्थतस्तु शुद्धसत्त्वमयाप्राकृतस्वेच्छोपात्ताकर्मवश्यकल्याणविग्रह इत्यर्थः अत एव हि नागवध्वो नागानां स्त्रियः नागकन्यकाः यस्य अङ्घ्रि पादपद्मयोः स्पर्शनेन धर्षितं व्याकुलितमिन्द्रियं मनो यासां ताः कामातिपारवश्या वयं रागादिप्रतिभाः शुद्धसत्त्वमूर्तेः पादौ कथं स्प्रष्टुं प्रभवाम इति धर्षितेन्द्रियाः सत्यः अर्हणां पूजां न ईशिरे न समर्था बभूवुः निश्शङ्कं कर्तुमिति शेषः एवंभूतं को नानुमन्येतेति पूर्वेणान्वयः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ज्ञानादिसर्वगुणैः समभेदेन ख्याताय "विज्ञानमानन्दं ब्रह्म" इति श्रुत्यादिषु प्रख्याताय अनन्तायेत्यनेन शेषान्तःस्थितस्तन्नामा विष्णुस्तेन सह शिवेनोपास्यत इति ध्वनयति तदुक्तम् ।

> अनन्तान्तः स्थितो विष्णुरनन्तश्च सहामुना ।
> इज्यते गिरिशेनेश इलावृतगतेन तु

इति ननु यदि विष्णुना सह शेषोऽप्युपास्यते शिवेन तर्हि कथं भवापहमित्यादिगुणाः शेषे युज्यन्त इतीयमाशङ्का

> जीवव्यपेक्षया चैव तथान्तर्याम्यपेक्षया ।
> मिश्रास्तु स्तुतयो ज्ञेया विष्णोरन्यत्र केवलम् ॥

इत्यनेन परिहर्तव्येति ॥ १७ ॥

भजन्यं भजनीयं चारुणं च पादपङ्कजं यस्य स तथा तं हे भक्तेष्वलंभावित ! अत्यर्थं ध्यात ! वशीकृतेति वा नित्यतृप्ततया स्थितेति वा भवं संसारमपजहाति त्यजतीति भवापहः नित्यमुक्त इत्यर्थः भक्तसंसारं नाशयतीति वा तं भवस्य पुण्यलक्षणस्य भद्रस्य भव उत्पत्तिः यस्मात्स तथा तं कृत्स्नस्य भगस्य ऐश्वर्यादिगुणसामग्र्याः परम्परायणमत्युत्तमाश्रयं सर्वस्योपपादकमीश्वरमिति सर्वसमर्थनशीलम् । "स्थेशभासपिसकसोवरच्"३।२।१७५इतिताच्छील्यसूत्रात् अनेन शेषान्तर्यामिणो हरेः स्तुतिं ध्वनयति तथाहि भक्तेषु त्वत्सेवकेषु अलंभावितसपुण्यानुग्रहलक्षणवित्तत्वदुत्तमत्वात्त्वदन्तर्यामिणं भज निषेवस्व ईभजन्यारुणपादपङ्कजम् ईर्लक्ष्मीस्तया भजनीयरक्ततलाङ्घ्रिपद्मं कृत्स्नस्य भगस्य सौभाग्यस्य परम्पराया आश्रयमनेन ब्रह्मादिसकलचेतनराशिसमवेतसौभाग्यस्य परम्परायास्तारतम्योपेतायाः अयनमित्युक्तं भवति भूतभावनमतीतानागतवर्तमानजगज्जनकं भवति प्रभवत्युत्पद्यत इति भवो जगत्तस्यापहर्तारं संहर्तारं न केवलमुत्पादकं संहर्तारमपीत्यर्थः हरतेर्ष्टिलोपेनापहेतिरूपं साधु शिष्टं समम् "ईः स्मरः प्रोच्यते प्राज्ञैरीर्लक्ष्मी रुद्र उः स्मृत" इत्यभिधानम् ॥ १८ ॥

ननु जगदुत्पत्तौ वर्तमानस्य हरेः सकलभगाश्रयत्वं कथं घटते मायागुणसंपर्केणानीशत्वापत्तेरस्मदादिरिति तत्राह । नेति प्रकृतिगुणनिर्मितशब्दादिषु गतचित्तवृत्तिभिः सर्वं निरीक्षतो यस्य ते दृष्टि स्वरूपज्ञानं मायागुणचित्तवृत्तिभिः प्रकृतिगुणसंबद्धचित्तव्यापारैरणवपीषदपि नाज्यते न लिप्यते इष्टेर्गुणसंबन्धाभिभवो नास्तीत्यर्थः हिशब्द एवार्थे तत्र हेतुमाह । ईशा इति । 'ईश ऐश्वर्ये' इतिधातोर्निरुपपदादपि क्विप्प्रत्ययेन ईडिति शब्दरूपं सिध्यति तेनेश इति षष्ठी ईडचाद्दोषलेपनिवारणे निरतिशयेन समर्थत्वादित्यर्थः अत्र व्यतिरेकदृष्टान्तमाह । यथेति । अजितं मन्युरंहः क्रोधवेगो येस्ते तथा तेषां नोऽस्माकं ज्ञानं यथा अभिभूयते तथा नाज्यत इत्यर्थः आत्मन इति कृद्योगे षष्ठीतिवचनादात्मानं मनो जिगीषुः पुरुषः तं त्वां न मन्येत श्रोत्रादीन्द्रियेषु सन्निधाय शब्दादिषु प्रयोज्य तज्ज्ञानमुत्पाद्य सुखसंपादनेनात्यन्तोपकारकं त्वां कृतघ्नमन्तरेण रसज्ञः को न सेवेत सेवेतैवेत्यर्थः आत्मनः स्वरूपमिति वा । १९ ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सर्वान्तर्यामित्वेनातिनिकटवर्तिनो हरेः स्वरूपज्ञानं सम्यग्ज्ञानिन एव नान्यस्येत्याशयवानाह । असंदृश इति । यो मायया-च्छादकशक्त्यासंदृशः सम्यग्ज्ञानरहितस्य पुंसः वृक्षकोटरजन्यं मधु नारिकेरादिपुष्पजन्य आसवस्तयोरेकतरपानेन ताम्रे लोचने यस्य स तथा दुःशास्त्रश्रवणजनितान्यथाज्ञानलक्षणपरिणामविषयमाणमधुरसुरासेवानष्टज्ञानस्य स्वयमपि तादृशः क्षीबेव मत्त इति प्रतिभाति अत्र विभक्तिविपरिणामेनार्थकथनं द्रष्टव्यं मध्वासवताम्रविलोचनस्य मत्तस्यासंदृशः पुंसो मध्वासवताम्रविलोचनो मत्त इव प्रतिभाति दुष्टेन्द्रियस्य पुंसः स्थाणुः पुरुष इव यथा आभाति तथेति क्षीबेति प्रयोगस्तु छन्दोभङ्गभयाद्वैदिकत्वाद्वा दर्शित इति ज्ञातव्यम् "न संदृशे तिष्ठति रूपमस्य" इति श्रुतेः "विद्धवन्मुग्धवच्चैव केशवो वेदतार्तवत्" इति स्मृतेश्च इदानीं हेतुकथनव्याजेन मिश्रस्तुतिमाह । न नागेति । इन्द्रियधर्षणप्रवृत्तिमत्त्वान्मत्तत्वमिति अर्हणां पूजां कर्तुं नेशिरे इत्यन्वयः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

श्रीभावोऽयं दास्यभक्त्योपास्त इत्याह । श्रीभगवानुवाचेति । सङ्कर्षणस्यैव प्रथमपुरुषत्वात् । तद्रूपेणैव स्तौति । ओं नम इति ॥ १७ ॥

भक्तेषु निमित्तेषु अलमत्यर्थम् । भावितं कृतं भूतानां भावनं जननं पालनं वा येन तम् ॥ १८ ॥ १९ ॥

तत्र पातालस्थसङ्कर्षणे सन्दिह्य सिद्धान्तयति । असादिति । वस्तुतस्तु क्षीबत्वादिकं न सुराम्याभ्याम् नागपत्नीषु भयङ्करत्वेनास्फूर्त्तेर्दैपकतया सावधानत्वेन स्फूर्त्तेश्च । किन्तु चिदासवविशेषेणैव तासां प्रेममोहादित्याह । न नागवध्व इति ॥२०॥२१॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सर्वेषां गुणानां सङ्ख्यानं प्रकाशो यस्मात्तस्मै स्वयन्तु अव्यक्ताय अप्रमेयाय ॥ १७ ॥

नितरामासन्नमेव भरणं शरणं पादपङ्कजं यस्य तं भजे भजे इति हर्षात् द्विरुक्तम् । भगस्य षडैश्वर्यस्य । भक्तेषु अलमलङ्कारवद्वर्त्तमानम् भावितः सृष्टः ध्यानं कारितो वा भूतभावनो ब्रह्मा येन तं त्वा त्वां भवस्य मल्लक्षणदासस्य भावः प्रेमा यत्र तम् ॥ १८ ॥

अचिन्त्यमैश्वर्यं विवृणोति । न यस्येति । निरीक्षमाणस्यापि यस्य दृष्टिर्मायागुणवृत्तिभिर्मायागुणरूपाभिरिन्द्रियवृत्तिभिर्विषयैर्नज्यते न लिप्यते । किमर्थं निरीक्षमाणस्य ईशे ऐश्वर्याय ईशनमीट् सम्पदादित्वात् भावे क्विप् तस्मै वैधर्म्ये दृष्टान्तः यथा अजितक्रोधवेगानां नोऽस्माकं दृष्टिरज्यते न तथेति । आत्मनो जिगीषुरन्तःकरणानि वशीकर्तुमिच्छुः करत्वं न मन्येत नाद्रियेत ॥ १९ ॥

ननु मदिरामत्तस्य कुतो दृष्टिर्नाज्यते तत्राह । असंदृशः कुबुद्धीन् प्रति यो मायया क्षीबेव मत्त इव भाति । यथान्यः क्षीबा मध्वासवाभ्यां ताम्रलोचनः विवेकहीनो भवति तथैवेत्यर्थः । वस्तुतस्तु भवान्न तथाभूतः किन्तु नित्यानन्दसद्विवेकी इति भावः । सौन्दर्येण नारीगणमोहनतामाह । अर्हणे चरणपूजायां न ईशिरे न शेकुः स्पर्शक्षुभितेन्द्रियाः ह्रियेति अस्माकमन्तःक्षोभं सर्वज्ञत्वादयं जानातीत्यतः सम्प्रति कथं सेवेमहीति भावः ॥२०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

जप्यं मन्त्रमाह । ओमिति । सर्वेषां गुणानां सङ्ख्यानं यः सर्वज्ञ इत्यादिवेदकर्तृकं कथनं यस्मिन् तस्मै ॥ १७ ॥

स्तोत्रं दर्शयति । भजे इति । हे भजनीय ! अरणं शरणं पादपङ्कजं यस्य तम् । भगस्यैश्वर्यादिषाड्गुण्यस्य परमुत्कृष्टमयनमाश्रयम् । भावितम् आविष्कृतं भूतभावनं भूतकारणं रूपं येन तम् । भवापहं संसारघ्नम् । भवं मां भावयति उत्पादयतीति तं त्वां त्वां भजे ॥ १८ ॥

यथा नो मीलितनेत्राणामप्यस्माकं मायागुणेषु विषयेषु याश्चित्तवृत्तयस्ताभिः दृष्टिः अज्यते तत्र हेतुः अजितमन्युरंहसामिति । तथा यस्य तव भगवतस्तु ईशे ईशनाय जननियमनाय निरीक्षतोऽपि अण्वपि ईषदपि दृष्टिर्नाज्यते न लिप्यते तत्र हेतुः आत्मनः सर्वात्मन इति तं त्वां जिगीषुः संसारं जेतुमिच्छुः को न मन्येत उपास्यतया को नाद्रियेत ॥ १९ ॥

अज्ञस्य तु रागादियुक्त एव भवान्भातीत्याह । असदृदृश इति । असती स्वस्वरूपगुणादिज्ञानरहिता दृष्टिर्यस्य तस्य जनस्य मायया अविद्यया मध्वासवाभ्यां ताम्रे लोचने यस्य तथाभूतः क्षीबा मत्त इव यो भाति स्वभावत एवायमेवंविधाद्भुतरूप इत्यसदृक् न जानातीत्यर्थः । अत एव तथाविधं भगवतो रूपं सूचयति । नागवध्वः यस्य पादयोः स्पर्शनेन धर्षितमिन्द्रियं मनो यासां ताः ह्रिया लज्जया भुजाद्यर्हणे न ईशिरे न समर्था बभूवुः तं को न मन्येत इति पूर्वेणान्वयः ॥ २० ॥

भाषाटीका

आगभवान् महादेवजी बोले महापुरुष सर्व गुणों के प्रकाश करने वाले अनन्त अव्यक्त भगवान् के अर्थ नमस्कार है ॥१७॥ आपका चरण कमल भजने वालों का रक्षक है आप भजने के योग्यहो ऐश्वर्यादि छैगुणों के आप आश्रय हो भक्तों के वास्ते अतिशय करके आपने स्वरूप प्रकट किया है आप संसार के छुडाने वाले हो जगत्के पालने वाले हो ऐसे आपको हम भजते हैं ॥ १८ ॥

मायाके गुण चित्तकी वृत्तिसे देखतेभी जिनकी अणुमात्र दृष्टि लिप्त नहीं होय है जैसे हमलोग क्रोध के वेगको जीतने की सामर्थ्य नहीं रखते इस कारण हमको इस संसार सागर से बचना कठिन है आपही अपनी आत्माको जीतकर वशमें रखते हैं इस कारण जो अपनी आत्माको जीतकर मोक्ष की इच्छा करैतो वह कौन पुरुष आपका भजन न करै अर्थात् आपही का करै ॥ १९ ॥

अज्ञानी पुरुषों को आप मदमत्त के समान भयदायक मदिरा और आसव से लाल नेत्र किये मायाद्वारा प्रतीत होते हो कारण कि आपके चरणारविन्द के स्पर्श करने से कन्दर्पके वश

यमाहुरस्य स्थितिजन्मसंयमं त्रिभिर्विहीनं यमनन्तमृषयः ।
न वेद सिद्धार्थमिव क्वचित्स्थितं भूमण्डलं मूर्द्धसहस्रधामसु ॥ २१ ॥
यस्याद्य आसीद्गुणविग्रहो महान्विज्ञानधिष्ण्यो भगवानजः किल ।
यत्सम्भवोऽहं त्रिवृता स्वतेजसा वैकारिकं तामसमैन्द्रियं सृजे ॥ २२ ॥
एते वयं यस्य वशे महात्मनः स्थिताः शकुन्ता इव सूत्रयन्त्रिताः ।
महानहं वैकृततामसेन्द्रियाः सृजाम सर्वे यदनुग्रहादिदम् ॥ २३ ॥
यन्निर्मितां कर्ह्यपि कर्मपर्वणीं मायां जनोऽयं गुणसर्गमोहितः ।
न वेद निस्तारणयोगमञ्जसा तस्मै नमस्ते विलयोदयात्मने ॥ २४ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां सङ्कर्षणस्तोत्रकथनं नाम
सप्तदशोऽध्यायः ॥ १७ ॥

भाषाटीका ।

होने से लज्जित होकर नागोंकी स्त्रियां आपके पूजन में भी अस मर्थ होजाती हैं ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अस्य विश्वस्य स्थितिजन्मसंयमहेतुं यमाहुः । अत एव त्रिभिः स्थित्यादिभिर्विहीनमनन्तं च यमाहुः । ऋषयो मन्त्राः छन्दोऽनुरोधेन दीर्घपाठे ऋकारो देवमाता लक्ष्मीः सा च ऋषयश्चेत्यर्थः । अनन्तत्वं दर्शयति । मूर्द्धसहस्रमेव धामानि स्थानानि तेषु क्वचिदेकदेशस्थितं भूमण्डलं यो न वेद । सिद्धार्थं सर्षपमिव । तस्मै नम इति चतुर्थेनान्वयः ॥ २१ ॥

तत्र जन्महेतुत्वं महदादिद्वारेण प्रपञ्चयति । यस्य गुणनिमित्तो महान्नाम विग्रह आसीत् । विज्ञानं सत्त्वं धिष्ण्यमाश्रयो यस्य सः तस्य चित्तरूपत्वेन सत्त्वप्रधानत्वात् । स एव किलाधिदैवो वासुदेवाभेदविवक्षया भगवानजो ब्रह्मा । यत्सम्भवो यस्माद्ब्रह्मणः सम्भूतोऽहं रुद्रः । त्रिवृता त्रिगुणेन स्वतेजसा स्वविभूतिरूपेणाहङ्कारेण वैकारिकं देवतावर्गं तामसं भूतवर्गमैन्द्रियमिन्द्रियवर्गं च सृजे सृजामि ॥ २२ ॥

किञ्च एते वयं महदादयः सर्वे यस्यानुग्रहादिदं ब्रह्माण्डं सृजामः । कथम्भूताः । यस्य महात्मनो वशे स्थिताः सन्तः यतः सूत्रेण क्रियाशक्त्या यन्त्रिताः प्रोताः शकुन्ताः पक्षिण इव लौकिकेन सूत्रेण वयमित्युक्तं तानेवाह । महानहङ्कारश्च वैकृतादयः पूर्वोक्ताः वर्गाश्च ॥ २३ ॥

स्थितिलयहेतुत्वं दर्शयन्प्रणमति । येन निर्मितामेतां मायामेवायं जनोऽञ्जसा वेद न तु तन्निस्तारणयोगमुपायं कर्हिचिदपि वेदेति स्थितिहेतुत्वं दर्शितम् । कीदृशीं कर्मण्येव पर्वाणि ग्रन्थयस्तानि नयति प्रापयतीति तथा ताम् । प्रलयहेतुत्वमाह । विलीयतेऽस्मिन्निति विलयः उदेत्यस्मादित्युदयः विलयश्चोदयश्च आत्मा स्वरूपं यस्य तस्मै नमः ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पुनरैश्वर्यमेव व्यञ्जयन्नाह । यमिति चतुर्भिः । अस्य चिदचिन्मिश्रस्य जगतः स्थितिजन्मसंयमं स्थित्युत्पत्तिसंहारकारणम् ऋषयो वेदान्ता यमाहुः ऋषय इति दीर्घ आर्षः कारणत्वेऽपि त्रिभिर्गुणैः सत्त्वादिभिर्विहीनं त्रैगुण्यापरवशमनन्तं स्वरूपतः स्वभावतश्च देशकालवस्त्वपरिच्छिन्नमाहुः "स देव सोम्येदमग्र आसीदेकमेवाद्वितीयम् अस्थूलमनण्वह्रस्वं सत्यं ज्ञानमनन्तम्" इत्यादयः श्रुतयोऽत्र ऋषिशब्दविवक्षिताः अनन्तत्वमेवाह । यो मूर्द्धभूतानि सहस्रसंख्याकानि धामानि फणारूपाणि तेषु मध्ये क्वचित् सिद्धार्थमिव सर्षपमिव स्थितं भूमण्डलं न वेद भारत्वेन नानुसन्धत्ते न जानाति वा यच्छन्दानां कस्तं न मन्येतेति पूर्वेणान्वयः ॥ २१ ॥

यस्येति । अपादानस्य सम्बन्धमात्रविवक्षया षष्ठी यस्मात् महाशरीरेषु महत्त्वाभिमानी विज्ञानाधिष्ण्यः जगन्निर्माणाद्युपयुक्तज्ञानाश्रयः गुणविग्रहः रजःप्रचुरविग्रहः आद्यः रुद्राद्यपेक्षया आदौ भवः भगवानजो ब्रह्मा आसीत् यत्संभवः यस्माद्ब्रह्मणः सकाशात्संभवोऽहं रुद्रः किमर्थं त्रिवृता त्रिविधाहङ्कारेण अध्ययनेन वसतीतिवत् फलस्यैव हेतुत्वविवक्षया तृतीया देहेषु त्रिविधाहङ्कारप्रवृत्त्यर्थं जातोऽहमित्यर्थः स्वतेजसा स्वस्य संकर्षणमूर्तेस्तेजसा स्ववृत्तेनाहङ्कारप्रवर्तनोपयुक्तेन ज्ञानेन वैकारिकं सात्विकं तामसमैन्द्रियकं राजसं सृजे देहेषु त्रिविधाहङ्कारं प्रवर्त्तयामीत्यर्थः ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एत इति महान्महत्तत्त्वम् अहमहङ्कारस्तद्विधाभेदमाह वैकृततामसैन्द्रियाः सात्त्विकाहङ्कारो वैकृतः तामसो भूतादिः ऐन्द्रियो राजसः सर्वे ब्रह्मादयो वयं यस्य महात्मनो भगवतो वशे सूत्रे रज्ज्वां यन्त्रिताः बद्धाः शकुन्ता इव सन्तो यस्य भगवतोऽनुग्रहादिदं ब्रह्माण्डं तदन्तर्वर्तिवस्तुजातं च व्यष्टिसमष्ट्यात्मकं यथायथं सृजामः ॥ २३ ॥

एवं सर्वजगत्कारणत्वसत्यज्ञानानन्तत्वमवान्तरत्वानन्याधिपतित्वादिगुणविशिष्टं स्तुत्वा "प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः" इति बन्धमोक्षहेतुत्वेन स्तुवन्नमस्करोति । यन्निर्मितामिति । येन भगवता निर्मितां कर्मपर्वणीं कर्माख्यग्रन्थिमतीं मायां प्रकृतिं गुणमयसर्गेण गुणपरिणामात्मकदेहेन्द्रियादिसम्बन्धेन मोहितः स्वात्मपरमात्मयाथात्म्यज्ञानरहितोऽब्रह्मात्मकत्वस्वतन्त्रात्मत्वादिभ्रमयुक्तो जनो जन्ममरणादिकसांसारिकधर्मभाक् जीवः न वेद मायास्वरूपमेव न वेद किं तन्निस्तारणोपायं न वेदेतिवक्तव्यमित्याह । तन्निस्तारणयोगं मायानिस्तारणोपायमञ्जसा सुखेन न वेद तस्मै तद्विलयोदयात्मने तद्विलयः प्रकृतिसंबन्धविलयस्तदुदयः प्रकृतिसंबन्धः तदुभयापादनोपयुक्तमात्मज्ञानं यस्य तस्मै नम इति ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदानीं भगवद्विज्ञानाय तल्लक्षणान्याह । यमाहुरिति । अस्य जगतः स्थितिजन्मसंयमकारणं यतस्तज्ज्ञाने स्थित्यादीनि लक्षणानि इति ज्ञातव्यं स्वयमेतद्व्यञ्जितश्चेत्कथमेतल्लक्षणैर्ज्ञेय इत्यत उक्तम् । त्रिभिरिति । त्रिभिः स्थित्यादिभिर्विहीनं विरहितं जाग्रदाद्यवस्थाविशेषैर्वा कालत्रये अपरिच्छिन्नमहिमत्वाद्युक्तभावेनाह । अनन्तमिति । तदपि कथमत उक्तमीश्वरमिति ईश्वरत्वं विशदयति । न वेदेति । य इत्यध्याहृत्यान्वेतव्यं मूर्धसहस्रेषु मध्ये कस्मिंश्चिदेकस्मिन्मूर्धनि सिद्धार्थं सर्षपमिव स्थितं भूमण्डलं न वेद गुरुत्वाभावादित्यन्वयः लाघवात्तद्गरिमाणं न जानातीत्यनेनान्तःस्थितानन्तनामहरिमहिम्ना शेषस्यापि भूमण्डलधृतिसामर्थ्यमिति बोद्धव्यम् ॥ २१ ॥

पूर्वोक्तसृष्टेः क्रममाह । यस्येति । यस्य तव सकाशात् अजो ब्रह्माद्यः सृज्यपदार्थानामादिभूत आसीत् प्रकृतिसृज्यवस्तुषु महत्तत्त्वस्यादित्वात्तदभिमानित्वेन ब्रह्मण आदित्वं युक्तमिति भावेनोक्तम् । महानिति । निर्देहस्याभिमानित्वं कथमित्यत उक्तं गुणविग्रह इति । रजोगुणेन निर्मितो विग्रहो यस्य स तथा देहित्वेऽपि ज्ञानलोपोऽन्यदेहिवदस्य नास्तीत्यभिप्रेत्याह । विज्ञानेति । विज्ञानस्य धिष्ण्यं निधानस्थानं धिष्ण्य इतिपाठे विज्ञानमेव स्वरूपं यस्य स तथेत्यर्थः महत्तत्त्वस्य सृष्ट्या सृष्टिक्रमः कथं ज्ञायत इत्यत उक्तं यत्संभव इति । यस्मान्महत्तत्त्वात्संभवो यस्य स तथा अहं त्रिवृता वैकारिकादिभेदेन त्रिधा वर्तमानेन स्वतेजसा स्वरूपमहिम्ना वैकारिकादिकं तदभिमानिदेवादिकं च सृज इत्यन्वयः ॥ २२ ॥

अस्मत्सर्जनश्च श्रीनारायणानुग्रहेण न स्वातन्त्र्येणेत्याह । एत इति । वयमिति के इति तत्राह । महानिति । ब्रह्मप्रभृतय इत्यर्थः सूत्रयन्त्रिताः सूत्रबद्धाः शकुन्ताः पक्षिणः वैकृता वैकारिकदेवाः तामसाः पञ्चभूतदेवाः ऐन्द्रिया इन्द्रियाभिमानिनो देवाः शब्दाद्यभिमानिदेवताश्च ॥ २३ ॥

व्यतिरेकमुखेन संसारतरणोपायमाह । यन्निर्मितामिति । अयं जनो येन भवता जनं मोहयित्वेति विनिर्मितां कल्पितां कर्मपर्वणां विहितनिषिद्धलक्षणानि कर्माणि पर्वाणि यस्याः सा तथा तां मायां बन्धकशक्तिमासाद्य कदापि कदापि मायाया निस्तारणोपायमञ्जसा न वेद तत्र किं कारणमिति तत्राह । गुणैरिति । गुणेन सर्गो येषां ते गुणसर्गाः शब्दादिविषयास्तैर्मोहितः शब्दादिनिमित्तान्यथाज्ञानं कारणमित्यर्थः अनेन तत्कर्तृज्ञानपूर्वकं तज्ज्ञानं संसारतरणोपाय इति ध्वनितमिति इदमेव भगवत्प्रीतिकरं सर्वसाधारणमयत्नसाध्यं साधनमिति भावेनोपसंहरति । तस्मा इति । तद्विलयोदयात्मने तस्या मायाया निवर्तकज्ञानस्वरूपाय अनेन प्रणतिप्रसन्नश्रीनारायणस्वरूपज्ञानं मायानिवर्तकमिति सूचितमतो मुमुक्षुणा तज्ज्ञानमापाद्यमिति भावः ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
सप्तदशोऽध्यायः १७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

महान् महत्तत्त्वं चित्ताख्यं गुणमयो विग्रहोऽधिष्ठानं स एव विज्ञानाधिष्ण्यः बुद्धिरूपः स एव किल क्रमेण भेदविवक्षया भगवान् वासुदेवः अजो ब्रह्मा च । सृजे सर्गोपयोगितां प्राप्नोमीत्यर्थः । अग्निरन्नं पचतीतिवन्मतृकर्तृकमिति भावः । २२-२४ ।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

जगत्कारणत्वमाह । यमिति । स्थित्यादिहेतुम् अथ च त्रिभिर्गुणैर्हीनमत एव तत्त्वज्ञानादनन्तं न वेदेति य इति शेषः ऋषयः "ऋकारो देवमाता स्यात्" इत्यभिधानात् देवमातरश्च ऋषयश्च ते सिद्धार्थं सर्षपमिव क्वचित् कस्मिंश्चिन्मूर्ध्नि एकदेशे स्थितमिति यद्यपि चतुस्त्रिंशल्लक्षोनपञ्चाशत्कोटियोजनप्रमाणस्य भूमण्डलस्य अधस्तादेव स्थितत्वात् तस्मात् सकाशात् तन्मूर्द्धताधद्विस्ताराधिक्यं न युज्यते । तदपि तत्र गतैर्जनैस्तस्याचिन्त्यशक्त्यैव तन्मूर्ध्नो प्रमाणापरिच्छेद्यत्वं भूमण्डलस्य च सर्षपायमाणत्वं दृश्यते तच्च वास्तवमेव न तु मायिकमित्येतदप्येकमद्भुतमनन्तत्वमिति तथोक्तम् ॥ २१ ॥

तत्र स्वजन्महेतुत्वं महदादिद्वारेण प्रपञ्चयति । यस्याद्यः प्रथमो गुणात्मकविग्रहो महान् महत्तत्त्वनामा तेन सङ्कर्षणः स्वयं तु

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

गुणातीतविग्रह इत्यायातं विज्ञानं सत्त्वं धिष्ण्यमाश्रयो यस्य स प्रवाजो ब्रह्मा यत्सम्भवो यदुत्पन्नोऽहमहङ्कारात्मको द्वितीयो रुद्रः त्रिवृता सत्त्वादिवृत्तित्रयेण स्वतेजसा स्वशक्त्यैवाहं वैकारिकं देवतावर्गं तामसं भूतवर्गमैन्द्रियमिन्द्रियवर्गञ्च सृजामि ॥ २२ ॥

सर्वनियन्तृत्वमाह । एते इति । सूत्रयन्त्रिताः सूत्रप्रोताः शकुन्ताः पक्षिणः शाकुनिकाधीना इवेत्यर्थः । वयमेव के तानाह । महान्निति । वैकृतादयः पूर्वोक्ता वर्गाः ॥ २३ ॥

दुर्ज्ञेयत्वं कैमुत्येनाह । येन निर्मितां प्रापितां मायामेवायं जनो न वेद किमुत त्वां कर्मपर्वणीं कर्मग्रन्थिप्रग्रेणीं तस्या अञ्जसा शीघ्रेण निस्तारणोपायं भक्तियोगं च न वेद तस्या मायाया विलयो भक्तेषु उदयस्त्वभक्तेषु यतः तस्मै आत्मने परमात्मने ॥ २४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
पञ्चमेऽयं सप्तदशः सङ्गतः सङ्गतः सताम् ॥ १७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

सर्वहेतुत्वेन सर्वात्मत्वं दर्शयति । अस्येति । अस्य चिदचिदात्मकस्य विश्वस्य स्थित्यादि यस्मात्स तथा तमाहुः। त्रिभिः। स्थित्यादिभिर्विहीनमनन्तं कालाद्यपरिच्छिन्नं चाहुः ऋषय इति दीर्घश्छन्दोऽनुरोधात् मूर्द्धसहस्रमेव धामानि स्थानानि तेषु क्वचिदेकत्र स्थितं भूमण्डलं सिद्धार्थं सर्षपमिव यो न वेद तं को न मन्येतेति पूर्वेणैवान्वयः ॥ २१ ॥

विश्वहेतुत्वेन स्तुत्वा ब्रह्मादिजनकत्वादिना भगवन्तं स्तुवन् ब्रह्मादीनां भगवज्जन्यत्वं तदधीनत्वं तन्मायामोहितत्वं च दर्शयन् नमस्करोति । यस्येति त्रिभिः । यस्येति पञ्चम्यर्थे षष्ठी यस्मात् आद्यः अस्मदादिभ्यः पूर्वः अजः ब्रह्मा आसीत् कथम्भूतः गुणविग्रहः रजोगुणप्रधानशरीरः महान् महत्तत्त्वरूपः बुद्ध्यधिष्ठातुर्ब्रह्मणो बुद्धिकारणेन महत्तत्त्वेन सहाभेदोक्तिः। विज्ञायते अनेनेति विज्ञानं शब्दब्रह्म धिष्ण्यमाश्रयो यस्य सः यत्सम्भवः यस्मादजात सम्भूतः अहङ्काररूपः रुद्रः अन्तःकरणभेदरूपाहङ्काराधिष्ठातुः रुद्रस्यान्तःकरणभेदरूपाहङ्कारकारणेन सहाभेदोक्तिः। त्रिवृता त्रिगुणेन तेजसा स्वविभूतिरूपेण वैकारिकं देवतावर्गं तामसं भूतवर्गम् । ऐन्द्रियकमिन्द्रियवर्गम् सृजे सृजामि तस्मै ते नम इत्यन्तिमेन सम्बन्धः ॥ २२ ॥

तथाच महान् अस्मत्पिता ब्रह्मा अहं च सर्वे ब्रह्मपुत्राः मत्सृष्टाश्च वैकृतादयः एते वयं यस्य वशे स्थिताः इदं यथायथं सृजामः तस्मै ते नमः ॥ २३ ॥

गुणसर्गेण मायागुणकार्येण देहगेहादिना मोहितः जनः कर्माण्येव पर्वाणि ग्रन्थयस्तानि नयतीति तथा तां येन निर्मितां देहेन्द्रियादिरूपेण रचितां मायां तन्निस्तारणयोगं च कर्हिचिदपि न वेद यदनुग्रहं विना न जानातीत्यर्थः तस्मै ते विलीयते अस्मिन्निति विलयः विश्वप्रवेशस्थानम् । उदेत्यस्मादित्युदयः विश्वनिर्गमनस्थानं स च स च तथा तस्य प्रकृत्यादेः कारणजातस्य आत्मा कारणं तस्मै ते नमः ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
सप्तदशाध्यायार्थप्रकाशः ॥ १७ ॥

भाषाटीका।

ऋषि और वेदमन्त्र या विश्व की उत्पत्ति पालन नाश करने वाले आपको अनन्त और उत्पत्ति पालन प्रलय से रहित कहते हैं सहस्रों मस्तकों में से किसी एक मस्तक पर सरसों के समान आप भूमण्डल को धारण करते हैं और उसके बोझको कुछ नहीं जानते हैं ऐसे आपके निमित्त नमस्कार है ॥ २१ ॥

जिनके आद्य सत्त्वगुणी महाविज्ञानरूप से वासुदेव होते भये उन से भगवान् ब्रह्मा भये जिनसे हम रुद्र भये हैं मैं त्रिगुणात्मक अहंकार से देवता पञ्च महाभूत और इन्द्रियवर्ग को प्रकट करता हूं ॥ २२ ॥

जैसे कि विहङ्ग रस्सी से बंधकर पराये वश में होजाते हैं इसी प्रकार आपके वश में होकर यह हम सब महत्तत्त्व देवताभूत और इन्द्रियगण होरहे हैं जिनके अनुग्रह से हम सब ब्रह्माण्ड को सृजते हैं और आपको सृजने वाले कहते हैं ॥ २३ ॥

जिनकी कीहुई कर्मों की पर्व रूप धारिणी माया के गुण सर्गों से मोहित होय ये जन अनायास से निस्तारण योग को नहीं जानते ऐसे उत्पत्ति पालन नाश कर्त्ता भगवान् के अर्थ नमस्कार है ॥ २४ ॥

इति श्रीभागवत पञ्चमस्कन्ध सतरहवां अध्यायका
भाषानुवाद लक्ष्मणाचार्यकृत समाप्त ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे सप्तदशोऽध्यायः समाप्तः ॥ १७ ॥

॥ अष्टादशोऽध्यायः ॥

———:०:———

श्रीशुक उवाच ।

तथा च भद्रश्रवा नाम धर्मसुतस्तत्कुलपतयः पुरुषा भद्राश्ववर्षे साक्षाद्भगवतो वासुदेवस्य प्रियां तनूं धर्ममयीं हयशीर्षाभिधानां परमेण समाधिना सन्निधाप्येदमभिगृणन्त उपधावन्ति ॥ १ ॥

॥ भद्रश्रवस ऊचुः ॥

ओं नमो भगवते धर्मायात्मविशोधनाय नम इति ॥ २ ॥

अहो विचित्रं भगवद्विचेष्टितं घ्नन्तं जनोऽयं हि मिषन्न पश्यति ।
ध्यायन्नसद्यर्हि विकर्म सेवितुं निर्हृत्य पुत्रं पितरं जिजीविषति ॥ ३ ॥
वदन्ति विश्वं कवयः स्म नश्वरं पश्यन्ति चाध्यात्मविदो विपश्चितः ।
तथापि मुह्यन्ति तवाज ! मायया सुविस्मितं कृत्यमजं नतोऽस्मि तम् ॥ ४ ॥
विश्वोद्भवस्थाननिरोधकर्म ते ह्यकर्तुरङ्गीकृतमप्यपावृतः ।
युक्तं न चित्रं त्वयि कार्यकारणे सर्वात्मनि व्यतिरिक्ते च वस्तुतः ॥ ५ ॥
वेदान् युगान्ते तमसा तिरस्कृतान् रसातलाद्यो नृतुरङ्गविग्रहः ।
प्रत्याददे वै कवयेऽभियाचते तस्मै नमस्ते वितथेहिताय ते इति ॥ ६ ॥

हरिवर्षे चापि भगवान्नरहरिरूपेणास्ते तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये तद्दयितं रूपं महापुरुषगुणभाजनो महाभागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोऽव्यवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपास्ते इदं चोदाहरति ॥ ७ ॥

ओं नमो भगवते नरसिंहाय नमस्तेजस्तेजसे आविराविर्भव वज्रनख ! वज्रदंष्ट्र ! कर्माशयान् रन्धय रन्धय तमो ग्रस ग्रस ओं स्वाहा अभयमभयमात्मनि भूयिष्ठा ओं क्ष्रौम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टादशे ततो मेरोः पूर्वादिक्रमतस्त्रिषु ।
त्रिषु चोत्तरवर्षेषु सेव्यसेवकवर्णनम् ॥ १ ॥

भद्रश्रवा वर्षपतिः तस्य कुलपतयः सेवकमुख्याश्च ॥ १ ॥

भद्रश्रवस ऊचुरिति । प्राणभृत उपदधातीतिवद्गुणलक्षणया तद्योगाद्गणेषु लिङ्गसमवायन्यायेन बहुवचनम् ॥ २ ॥

अयं जनो मिषन्नपि पश्यन्नपि घ्नन्तं हिंसन्तं न पश्यति नालोचयतीति भगवद्विचेष्टितमेव तच्च विचित्रम् । अदर्शने लिङ्गम् । पुत्रं बालं पितरं वृद्धं मृतं निर्हृत्य दग्ध्वा स्वयं तदुभयधनैर्जिजीविषति जीवितुमिच्छति । पाठान्तरे तु छन्दःसामञ्जस्यम् । किं धर्माद्यर्थम् न यर्हि यतोऽसत्तुच्छं विषयसुखं सेवितुं विकर्म पापमेव ध्यायन् ॥ ३ ॥

नन्वविद्वांश्च पश्यति किमत्र चित्रं तत्राह । नश्वरं वदन्ति स्म शास्त्रतः पश्यन्ति च समाधौ । हे अज । तथापि मायया मुह्यन्ति एतच्च तव कृत्यं चेष्टितं सुविस्मितमतिचित्रमतः शास्त्रादिश्रमं विहाय तं त्वामजं नतोऽस्मि ॥ ४ ॥

इदमपरं चित्रवत्प्रतीयमानमपि त्वयि न चित्रमित्याह । विश्वोद्भवादिकर्माकर्तुरप्यपगता आवृत्तावरणो यस्मात्तादृशस्यापि तेऽङ्गीकृतं वेदेन । त्वयि तच्च चित्रम् । यतो मायया सर्वात्मनि कार्यस्य कारणे स्रष्टरि कर्म युक्तम् । वस्तुतः सर्वव्यतिरिक्ते निरुपाधावनावृतत्वमकर्तृत्वं च युक्तम् ॥ ५ ॥

परमेश्वरत्वेन स्तुत्वा प्रस्तुतावतारचरितमाह । वेदानिति । तमसा दैत्यरूपेण तिरस्कृतानपनीतान् नरा च तुरङ्गश्च नृतुरङ्गौ तद्रूपो विग्रहो यस्य कवये ब्रह्मणे सत्यसङ्कल्पाय ॥ ६ ॥

उत्तरत्र प्रह्लादचरित्रे महापुरुषस्य गुणानां भाजनं आश्रयः दैत्यदानवकुलस्य तीर्थीकरणं शीलमाचरितं च यस्य फल-

श्रीधरस्वामिकृतभावार्थदीपिका ।

सङ्कल्पेन व्यवधानशून्यश्चासावनन्यश्चाव्यभिचारी यो भक्तियोगस्तेनोपास्ते सेवते ॥ ७ ॥

तेजसामपि तेजसे आविराविः अतिप्रकटो भव वीप्सा वा कर्माशयान् कर्मवासनाः कर्माश्रयानिति पाठे रागादीन् रन्धय निर्दह भूयिष्ठाः भूयाः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमिलावृते उपास्यं रूपम् उपासनम् उपासनप्रकारं चाभिधाय भद्राश्ववर्षादिषु तान्याहाध्यायद्वयेन । तथाचेति भद्रश्रवाः नाम धर्मसुतो भद्राश्ववर्षाधिपतिः तस्य कुलपतयः कुलश्रेष्ठाः सेवकमुख्या उपासकमुख्याश्च भद्रश्रवसः पुरुषा भद्राश्ववर्षे मेरोः पूर्वस्मिन्साक्षाद्भगवतो वासुदेवस्य साक्षाच्छब्दः स्वसाक्षादपरोक्षाद्ब्रह्मेत्यादाविव ब्रह्मशब्दस्य भगवच्छब्दस्य च पौष्कल्येन प्रवृत्तिनिमित्तवत्परत्वसूचनार्थः प्रियामिति वासुदेवकथनं ननु रामकृष्णादितनुभ्योऽस्या हयशीर्षाभिधानायाः प्रीत्यतिशयद्योतनार्थं धर्ममयीं यज्ञोपासनादिधर्मावेदकवेदप्रचुरामित्यर्थः ईदृशधर्ममयत्वं रामादिष्वन्यविशिष्टं तथापि प्राधान्येन विस्रस्तवेदाहरणात्तदुपदेशार्थत्वादस्यास्तन्वा धर्ममयीमित्युक्तं हयग्रीवाख्यां तनुं परमेण साक्षात्कारपर्यन्तकाष्ठां गतेन समाधिना सन्निधाप्य साक्षात्कृत्वेदं वक्ष्यमाणं मन्त्रवचः अभिगृणन्तो जपन्त उपधावन्ति वक्ष्यमाणश्लोकैः स्तुवन्तीत्यर्थः ॥ १ ॥

ओंकारार्थः पूर्ववद्भगवच्छब्दार्थश्च धर्माय पूर्वोत्तरभागात्मकवेदावेद्यप्रमेयो धर्मस्तत्र पूर्वभागस्याराध्यस्वरूपशोधनप्रकारावेदकत्वेनाराध्यतात्पर्यकत्वात् ।

> ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः ।
> ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम् ॥

इत्युक्तरीत्या भगवत एव पूर्वभागप्रमेयत्वम्, उत्तरभागप्रमेयं तु स्पष्टमेवेति । धर्मायेत्यस्य पूर्वोत्तरभागप्रमेयायेत्यर्थः आत्मविशोधनाय आत्मान्तःकरणं जीवो वा शोध्यते येन स आत्मविशोधनस्तस्मै यत्प्रसादादन्तःकरणं जीवो वा शुद्धिं रजस्तमोभ्यामनभिभवरूपां प्रकृतिसम्बन्धराहित्यद्वारा ब्रह्मप्राप्तिरूपां मुक्तिं च प्राप्नोति स तथोच्यते अत्र धर्मायेत्यनेन प्रापकप्राप्यकवरूपतायामुपायत्वमुच्यते आत्मविशोधनायेत्यनेन प्राप्यत्वमुक्तं भगवच्छब्देन तदुभयोपयुक्तगुणवत्त्वं विवक्षितम् ॥ २ ॥

स्तुतिरूपान् श्लोकानाह । अहो इति । तावद्भगवन्मायाया दुरत्ययत्वद्योतनाय विस्मयमाना आहुः । यन्तं मृत्युं पित्रादिदृष्टान्तेनायं जनो मिषन् पश्यन्नपि न पश्यति नात्मनोऽनुसंधत्ते इत्येतद्भगवद्विचेष्टितं भगवन्मायावैभवरूपम् एतच्छब्दादिविचित्रं विस्मयनीयम् अहो विचित्रमिति । निपातसंघात आश्चर्यद्योतकः कथम्भूतो न पश्यति पुत्रं पितरं च मृतं निर्हृत्य दग्ध्वा स्वयं तदुपार्जितैर्जिजीविषुर्जीवितुमिच्छुः किमर्थमसत्तुच्छं विषयसुखं सेवितुं किंकुर्वन् यर्हि यदा विकर्म विरुद्धं कर्मोपायं ध्यायन् ॥ ३ ॥

नन्वविद्वान्न पश्यति किमत्र चित्रमत्राह । वदन्तीति । कवय अधीतवेदान्तविद्या विश्वं जगत् नश्वरं केवलं वदन्ति न त्वनुसन्दधते नन्वात्मयाथात्म्यविदोऽनुसन्दधत एव तत्राह । अध्यात्मविदः अधीतवेदान्तविद्याः विपश्चितः उपासितश्चात्मपरमात्मानः यद्यपीदं विश्वं नश्वरं पश्यन्ति तथापि हे अज ! तव मायया मुह्यन्ति मोहं प्राप्नुवन्ति विपश्चितामपि पुत्रमरणादिनिमित्तशोकदर्शनादिति भावः अत इदं कृतं भगवद्विचेष्टितं सुविस्मयं विस्मयनीयम् ईदृशमोहनिवृत्तये केवलं त्वां प्रपत्स्यामहे इत्याहुः अजं जन्ममरणादिसंसारधर्मप्रतिभटम् त्वां नतोऽस्मि कर्तरि क्तः नमस्कृतवानस्मि प्रत्येकाभिप्रायमेकवचनम् ॥ ४ ॥

ननु किं यदेतच्चित्रं यज्जीवमोहनानुकूलमायाप्रेरणमिति ततोऽप्येतद्विचित्रतरमकर्तुर्मम विश्वसृष्ट्यादिकर्तृत्वमस्ति तच्चाबन्धकं चेत्यत्राहुः । विश्वोद्भवेति । अकर्तुः ।

> चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
> तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥

इत्युक्तरीत्या चातुर्वर्ण्यचातुराश्रम्यादिव्यवस्थयातिविचित्रजगत्सृष्ट्यादिकर्तृत्वेऽपि तत्तत्कर्मायत्तदेवादिवैचित्र्यादकर्तुस्ते तव कर्तरि षष्ठी त्वयेत्यर्थः विश्वस्य जगतः उद्भवस्थाननिरोधकर्म सृष्टिस्थितिप्रलयरूपं कर्म अङ्गीकृतं स्वीकृतमिति यत्तद्युक्तमेव ननु त्वयि विचित्रं जीवस्येव न बन्धकमित्यभिप्रायः कुतः यतस्त्वमपावृतः कदाचिदपि पुण्यपापाख्यकर्मणा ज्ञानसङ्कोचरहितः जीवानां तु "अनृतेन हि प्रत्यूढाः तेषां सत्यानां सतामनृतमपिधानम्,, इति कर्माख्याविद्यया ज्ञानसङ्कोचरूपावरणसद्भावात् अविद्यावृतज्ञानैरनुष्ठितानां पूर्वपूर्ववासनानुरूपाणां सुखदुःखादिजननद्वारा बन्धकत्वं युक्तं भगवतो नित्यनिरस्तनिखिलदोषस्य सार्वज्ञादिगुणविशिष्टस्य जगदुदयविभवलयलीलस्य विश्वसृष्ट्यादि कर्म न बन्धकमित्यभिप्रायः अपावृत अपगतावरणः अविद्याकृतावरणप्रतिभटस्तस्यापावृतस्य तवेति षष्ठ्यन्तत्वेन व्याख्येयम् अपावृतमितिपाठे विश्वोद्भवादिकर्माङ्गीकृतमनावरकं तिरोधानद्वारा न बन्धकमिति युक्तं जीवस्येवेत्यर्थः । आवरणद्वारा वैषम्यनैर्घृण्यादिहेयापादकं नेति वेत्यर्थः कुतो मम विश्वोद्भवादि कर्म नावरकं तत्राहुः । कार्यकारणे कार्यकारणरूपे स्थूलसूक्ष्मावस्थचिदचिद्वस्तुशरीरकत्वेन तद्रूप इत्यर्थः कार्यकारणरूपत्वं च न तादात्म्यनिबन्धनं किं त्वात्मा देवो जात इत्यादिवदन्तरात्मप्रयुक्तमित्याशयेन सर्वात्मनीत्युक्तम् एवंभूतेऽपि वस्तुतः प्रकृतिपुरुषाभ्यां विविक्तस्वरूपतः व्यतिरिक्ते साक्षात्कार्यत्वकारणत्वोभयावस्थान्वयरहिते त्वयि न हि कर्तृत्वमात्रेण कर्मणो बन्धकत्वमपि तु कर्मायत्तकर्तृत्वेन अन्यथा मुक्तानामपि जक्षणादिकर्तृत्वस्य बन्धकत्वापत्तेः अयं भावः यद्यपि विश्वसृष्ट्यादिकर्तृत्वेन विश्वोपादानत्वेन च विश्वगतविकाराश्रयत्वाद्विश्वोद्भवादि कर्म तव बन्धकमिति सम्भाव्यते तथापि विश्वोद्भवादिकर्मणो लीलारूपत्वेन कर्मायत्तत्वाभावात्स्वरूपान्यथाभावस्वभावान्यथाभावरूपविकाराश्रयप्रकृतिपुरुषशरीरकस्यैव कार्यकारणोभयावस्थाश्रयत्वात्तद्द्वारकावस्थाश्रयत्वेऽपि साक्षादवस्थाश्रयत्वाभावाच्च न विश्वोद्भवादि कर्म बन्धकं यथा जीवस्य शरीराधिष्ठातृत्वमात्रेण शरीरगतकौमारयौवनाद्याश्रयत्वमित्यर्थः ॥ ५ ॥

एवं विविधविचित्रशक्तिमत्त्वेन भगवन्तं स्तुत्वा अथैतदवतारप्रयोजनमाविष्कुर्वन्तो नमस्कुर्वन्ति । वेदानिति । युगान्ते कस्मिंश्चिद्दैनंदिनप्रलये तमसा दैत्यरूपेण तिरस्कृतानपनीतान् वेदान् नृतुरङ्गविग्रहः ना च तुरङ्गश्च नृतुरङ्गौ विग्रहो यस्य स नृतुरङ्गविग्रहः हयशिरोमूर्तिर्यो भगवान् अभियाचते कवये चतुर्मुखाय प्रत्याददे प्रत्यर्पितवान् तस्मै तेऽवितथेहितायामोघचेष्टाय ते तुभ्यं नमः नमस्करोमीति ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ हरिवर्षे मेरोर्दक्षिणे उपास्योपासकोपासनाप्रकारानाह । हरिवर्षे चेति । नरहरिरूपेण नृसिंहरूपेणास्ते सन्निहितो भवति तन्नृसिंहरूपपरिग्रहे निमित्तमुत्तरत्र सप्तमस्कन्धे वक्ष्यामः तत्प्रियतमं रूपं प्रह्लादस्तद्वर्षपुरुषैः सहाव्यवधानानन्यभक्तियोगेन अव्यवधानः अविच्छिन्नः विघ्नानुपहतः अनन्यः न विद्यतेऽन्यत्फलं यस्य सोऽनन्यः प्रयोजनान्तररहितः तेन भक्तियोगेन उपास्ते आराधयतीत्यर्थः । प्रह्लादं विशिनष्टि । महापुरुषो भगवांस्तस्य ये गुणास्तेषां भाजनमाश्रयः भगवद्गुणसमानगुणक इत्यर्थः महाभागवतो भागवतश्रेष्ठः दैत्यानां दानवानां च यत्कुलं तत्पवित्रीक्रियतेऽनेनेति दैत्यदानवकुलतीर्थीकरणम् एवंभूतं शीलमाचरितं शीलरूप आचारो यस्य । यद्वा उक्तविधं शीलं सद्वृत्तिः शौचाचमनसंध्योपासनादिरूपमाचरितमाचारो यज्ञदानहोमादिरूपश्च यस्य इदं वक्ष्यमाणमुदाहरति जपति ॥ ७ ॥

इदमादिष्टमेवाह । ओमिति । ओं भगवच्छब्दार्थौ पूर्ववत् तेजसामपि तेजसे तेजोऽन्तरैरप्रकाश्याय सर्वतेजसां प्रकाशायेत्यर्थः तथा च श्रुतिः ।

न तत्र सूर्यो भाति न चन्द्रतारकम् ।
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ।

इति कठवल्लीष्वाम्नायते तद्रूपमेव चाथर्वणे परं ब्रह्माधिकृत्य श्रूयते अतोऽत्र परं ब्रह्मत्वं विवक्षितम् आविराविर्भव आविर्भवाविर्भव आविः शब्दो निपातः प्राकट्यद्योतकः तस्य द्विर्वचनं पुनः पुनः प्रकटीभवेत्यर्थः । अत्र वज्रवदप्रतिहतनखदंष्ट्रेति सम्बोधनं कर्माशयान् कर्मवासनाः रन्धय रन्धय निर्दहेति द्विर्वचनं ये भूयिष्ठा बहुलास्तान् कर्माशयानित्याशयविशेषणमध्याहार्यमिति बोध्यम् आत्मने मह्यमभयं भयप्रतिभटं यथा तथाविर्भवेत्यनुषङ्गः । यद्वा भूयिष्ठा इति विभक्तिप्रतिरूपकमव्ययं भूयसार्थकं भूयः अभयमाविर्भवेत्यर्थः अथवाभयं यथा भयाभावं यथा तथा भूयिष्ठाः भूयांसोऽभयं बहुला वयं भवामेत्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अनन्तजीवराशेः स्वयोग्यतानुसारेण पूज्या हरेरनन्ताः प्रादुर्भावविशेषाः सन्तीति दर्शयितुमिलावृतवर्षभवैः पूज्यां देवतां निगद्यानन्तरवर्षभवैः पूज्या देवताः क्रमेणाध्यायाभ्यां निरूपयति । तथा चेत्यादिना । तस्य भद्रश्रवसः कुलपतयः धर्ममयीं ज्ञानोपदेशेन सर्वजगद्धारणप्रधानभूताम् "हयगतौ" इतिधातोः हयन्ति अवगच्छन्ति बुध्यन्ते सर्वमिति हयाः सर्वज्ञा ब्रह्मादयस्तेषां शीर्षः प्रधान इति हयशीर्षः ॥ १ ॥

मार्गं इत्यात्मानं शोधयतीत्यात्मशोधनस्तस्मै ॥ २ ॥

आत्मशोधनपदार्थमाह । अहो इति । अयं जनो प्रेतं स्वमृत्युमिच्छन् पश्यन्नपि न पश्यति हि यस्मात्तस्माद्विचित्रं भगवच्चेष्टितमहो कालस्तमो मृत्योश्चारितं निद्रालोरिव पश्यतोऽप्यदर्शने किं कारणमिति तत्राह । ध्यायन्निति । शास्त्रतोऽसदमङ्गलं शब्दादिविषयजातं ध्यायन् विकर्म सेवते यर्हि यस्मात्तस्मात् पापलक्षणाञ्जनप्रतिबद्धचक्षुर्न पश्यतीत्यर्थः अत्र लुप्तोपममाह । निर्हृत्येति । पुत्रो मृतं पितरं निर्हृत्य दहनादिपितृमेधक्रियां कृत्वा जिजीविषुः स्वजीवनमेवेच्छन्मतिपितृमरणवन्ममापि मरणं भवेदिति युक्तिबलाच्चिन्तयन्नपि स्वात्मनो मृत्युं न चिन्तयति यथा तथायं जन इति अतस्तव प्रसादेन शुद्धान्तःकरणस्य पुरुषस्य करतलामलकवद्विश्वं प्रकाशत इति भावः ॥ ३ ॥

न केवलं प्राकृतजनमोहकस्त्वं किं तु कवीनामप्यतो निरतिशयमहिम्नस्तव चरितं चित्रमित्यतस्त्वज्ञतिरेव त्वत्प्रसत्तौ प्रधानं साधनमित्याशयवानाह । वदन्तीति । अनेन कवीनां परोक्षज्ञानिनां वचनमध्यात्मविदामपरोक्षज्ञानिनां दर्शनञ्च जगत्प्रवाहानित्यत्वे प्रमाणमुक्तं भवति तथापि ज्ञानसामग्रीमन्तोऽपि त्वदनुग्रहमन्तरेण तव विषये मुह्यन्ति अनेन मुह्यन्ति यं सूरय इत्येतद्विवृतं भवति सुष्ठु विगतः स्मयाख्यो दोषो यस्मात्स तथा तं सुविस्मयो यथा भवति तथेति क्रियाविशेषणं वा यत एवं ज्ञानिनोऽपि कर्तव्यं त्वन्मायया न जानन्ति अतो भवानेक एव तज्ज्ञ इत्याह । कृत्स्नमिदमिति ॥ ४ ॥

इदं चास्माकं तव चरितं चित्रमित्याह । विश्वेति । जगत्सर्जनादिलक्षणं कर्तव्यं त्वयैव कर्तव्यं नान्येनेति यदतस्त्वमेव तदभिज्ञ इत्यतो वै तत्प्रतिपादयन्ति विश्वेति "न तस्य कार्यं करणं च विद्यते" इति श्रुतेः कार्यकारणविरहितस्य हरेः प्रपञ्चनिर्माणादिकं कथं घटत इत्याशङ्क्य महाशक्तित्वादित्यतो वाह । विश्वेति । अपिशब्द एवार्थे हिशब्दः अकर्तुः कर्तृत्वघटकद्योतकः हे हरे ! अकर्तुस्तव जगत्सर्जनादिकर्माङ्गीकृतमेव नैतद्वसमपावृतं वेदादिषु प्रकाशितं मृत्पिण्डादित्याविवक्षितं मृदादिवत्कृत्वं युक्तिविरुद्धत्वाद्यथा नाङ्गीक्रियते तथात्रापीति तत्राह । युक्तमिति । न हरेः कर्तृत्वमात्रं निषिध्यते किन्त्वायासेन अप्रयासेन कर्तृत्वमकर्तृत्वमिष्टोच्यते "महाशक्तित्वतस्तस्य युज्यते परमस्य तु" इति मृदादीनां वक्तृत्वस्य प्रत्यक्षतोऽदर्शनाद्व्याप्तिग्राहकप्रमाणाभावादनुपपत्त्या तन्नाङ्गीक्रियते अत्र तु ज्ञानिप्रत्यक्षसिद्धत्वाद्वैदिकत्वाच्च युक्तं हीत्यभिप्रायः तथापि निर्विकारस्य हरेर्मायाकर्तृत्वमन्तरेण तात्त्विककर्तृत्वाङ्गीकरणं चित्रमिति तत्राह । न चित्रमिति । ज्ञानदौर्बल्यादस्माकमेव चित्रं त्वयि न चित्रं कुतो न चित्रं कार्यकारणोऽप्याश्चर्यलक्षणकार्यस्यापि कारणत्वादितोऽपि नेत्याह । सर्वात्मनि । सर्वस्वामिनि ननु कार्यकारणत्वे मृदादिवत्तदभिन्नत्वमापन्नमिति तत्राह । व्यतिरिक्त इति । निमित्तकारणत्वेन तद्भिन्नत्वं युक्तमिति चशब्देन ध्वनयति तर्हि लोकविलक्षणश्चेच्छून्यकल्प इति तत्राह । वस्तुनीति ॥ ५ ॥

अमायेति पदस्याभिप्रायमाह । वेदानिति । तमसा मधुनाम्ना दैत्येन तिरस्कृतानपहृतान् प्रत्यादे सृष्टौ दत्तान् पुनश्च तानेव दैत्यापहृतान् दत्तवानित्यर्थः कवये ब्रह्मणे अवितथेहितायेत्यनेन भगवत इत्यस्यार्थ उक्तः ऐश्वर्यादिगुणसामग्रीमत एव सत्यकर्मत्वोपपत्तेः "अशक्ताः सत्यसृष्टौ हि मायासृष्टिं वितन्वते" इत्यादेः ॥ ६ ॥

वीर्यशौर्यादयो भक्तिज्ञानादयो वा महापुरुषगुणास्तेषां भाजनं पात्रं महापुरुषगुणभाजनः पुल्लिङ्गस्तु छान्दसः तान् भजतीति वा प्रकृष्टो ह्लादः शान्त्यादिगुणो यस्य स तथा दैत्यदानवकुलस्य तीर्थीकरणं शीलं मांचरितं च यस्य स तथा

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

फलकामलक्षणाव्यवधानरहितश्चानन्यः असदृशभक्तियोगस्तेन॥७॥

सूर्यादितेजोऽप्यधिकतेजोरूपाय तमो दैन्यमज्ञानं वा ग्रस संहर भूयिष्ठादित्यव्ययं भावय ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

भद्रश्रवसस्तु अद्भुतमयभक्तिरसेनोपासत इत्याह । भद्रश्रवस इति । समाधिना तदेकावेशेन सन्निधाप्य साक्षात्कृत्य पश्यन्तीति द्रष्टुं प्रवर्तन्त इत्यर्थः न चित्रमित्यचिन्त्यशक्त्येति भावः श्रीप्रह्लादस्तु वीरकरुणायान्तादिमयभक्तिरसेनोपास्त इत्याह । ओं नम इत्यादि ॥ १—८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अथाद्ये तु भद्राश्वादिषु षट्सु निरूप्यते ।
भद्रश्रवःप्रभृतिभिर्हयशीर्षादिसेवनम् ॥

भद्रश्रवा नाम वर्षपतिस्तस्य कुलपतयः सन्तानमुख्याः ॥ १ ॥

भद्रश्रवःशब्देनाजहत्स्वार्थलक्षणया तद्वर्गोऽप्युच्यते अतः प्राणभृतः उपत्रधातीतिवल्लिङ्गसमवायन्यायेन बहुवचनम् आत्मनो जीवस्याविद्यामालिन्यदूरीकरणाद्विशोधनाय ॥ २ ॥

अन्तं हिंसन्तं मृत्युं मिषन् पश्यन्नपि न पश्यति यतः पुत्रं क्षेत्र जनितं पितरं स्वस्य जनकञ्च निर्हृत्य मृतं दग्ध्वा तन्मध्यवर्ती जनको जनितश्चापि सन् तदुभयधनैर्जीवितुमिच्छति मृत्युर्मा कथं ह्रासयतीत्यपि नानुसन्धत्त इत्यतिमौढ्यमिति भावः ननु पञ्चषानपि वासरान् जिजीविषा भगवद्भक्त्यर्थं तादृशस्यापि न विगीतेत्यत आह । विकर्मसेवितुं स्त्रीसङ्गादिसुखं कर्तुम् असत् स्वविनाशादिकं ध्यायन् यर्हीति तत्रापि यर्हि पुत्रादिकं निर्हृत्य विश्राम्यति तर्हीत्याश्चर्याधिक्यं जिजीविषन्निति पाठः छन्दोभङ्गाभावादतिसमञ्जसः । ननु भद्राश्वादिवर्षाणां भौमस्वर्गरूपत्वात्तद्वासिनां युगपदेव पितुः पुत्रस्य च मृत्युदर्शनं न घटते सत्यं सर्वा एव वाचो भारतभूमिवर्तिनो जनानालक्ष्यैवोच्यन्ते । वयमन्याः स्वकर्मफलं भुञ्जानाः । अत्र भद्राश्वादिवर्षे पशुवद्वर्त्तामहे ये त्वतिधन्या अपवर्गसाधने भारतभूमण्डले लब्धजन्मानः श्वपचादिजातयोऽपि यत्रानायासेनैव वैकुण्ठपदमपि साधयन्ति तत्रापि कथमेवं मुह्यन्तीति टीका ॥ ३ ॥

नन्वविद्वान् पश्यति किमत्र चित्रं तत्राह । वदन्तीति । अतस्तव सुविस्मितमत्याश्चर्यमित्यन्वयः । अतः शास्त्रादिश्रमं विहाय तं त्वामजं नतोऽस्मि त्वां भजन्त एव विद्वांस इति भावः ॥ ४ ॥

ननु विद्वांसोऽपि ममैव मायया मुह्यन्ति चेत्तर्हि मय्येव दोषं प्रसञ्जयसीति तत्र मायायास्तत्कार्यस्य च त्वदीयत्वेऽपि त्वं ततः पृथगेव वर्त्तस इत्याह । विश्वोद्भवेति । अकर्तुरिति गुणानामेव कर्तृत्वाविति भावः । अङ्गीकृतमुक्तं वेदेनेति त्वय्युपचारादिति भावः । न च जीववत् कर्तृत्वाभिमानादित्याह। अपावृत त्वं गुणैरावृतो न भवसीत्यर्थः । अपगता आवृदावरणं यस्य तस्येति वा

एतच्च त्वयि युक्तमेव न तु चित्रं मायायास्त्वच्छक्तित्वात् तत्कार्याणां कारणे अतः सर्वात्मनि सर्वेश्वररूपे मायायाः स्वरूपशक्तित्वाभावात् सर्वतो व्यतिरिक्ते चेति ॥ ५ ॥

प्रस्तुतावतारचरित्रमाह । वेदानिति । तमसा दैत्य रूपेण तिरस्कृतान् अप्रतीतान् । ना च तुरङ्गश्च तद्रूपो विग्रहो यस्य सः कवये ब्रह्मणे तदर्थमवितथहिताय सत्यसङ्कल्पाय ॥ ६ ॥

उत्तरत्र । सप्तमस्कन्धे तीर्थीकरणं शीलमाचारश्च यस्य सः ज्ञानकर्माद्यमिश्रत्वादव्यवधानः अन्यदेवोपासनासाहित्याभावादनन्यश्च यो भक्तियोगस्तेन ॥ ७ ॥

तेजसामपि तेजसे । कर्माशयान् कर्मवासनाः । कर्माश्रयानिति पाठे रागादीन् रन्धय निर्दह अभयं यथा स्यात्तथा आत्मनि मन्मनासि भूयिष्ठाः भूयाः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथाद्ये भद्राश्वादिषु षट्सु भगवन्मूर्तीस्तत्सेवकसहिताः निरूप्यन्ते । तथा चेति । भद्रश्रवाः तस्यकुलपतयः पुत्रादयः पुरुषाः सेवकमुख्याश्च भगवत इदं मन्त्ररूपमभिगृणान्तः तनुं सन्निधाप्य उपधावन्ति स्तुवन्ति ॥ १ ॥

भद्रश्रवसः राज्ञः पुत्रादयः सेवकमुख्याश्च तदीयत्वात्तद्गणयोगात्तद्वाचकेन शब्देन गृह्यन्ते अतो भद्रश्रवस ऊचुरिति बहुवचनम् भद्रश्रवःप्रधानाः ऊचुरित्यर्थः ॥ २ ॥

अन्तं मृत्युम् निर्हृत्य दग्ध्वा तदुभयधनेन जिजीविषति जीवितुमिच्छति किं कुर्वन् असदनित्यं विषयसुखं सेवितुं विकर्म विविधं कर्म ध्यायन् एतद्भगवद्विचेष्टितं विचित्रमत्यद्भुतमित्यन्वयः ॥ ३ ॥

किञ्च विपश्चितो विवेकिनः अध्यात्मविदः आत्मानात्मपरमात्मस्वरूपादियाथात्म्यविदः कवयःक्रान्तदर्शिनः विश्वं नश्वरमनित्यं वदन्ति पश्यन्ति च तथापि हे अज! तव मायया गुणमय्या मुह्यन्ति नित्यसुखे त्वयि प्रेम न कुर्वन्ति किन्तुदेहगेहादिरूपायां भवदीयमायायामासक्ताः भवन्ति एतच्च तव कृत्यं विचेष्टितं सुष्ठु चित्रमित्यन्वयः त्वत्कृपां विना शास्त्रश्रमादिभिरपि त्वयि भक्तिर्न जायते इति भावः तथाह भगवान् पूर्वाचार्यः "कृपास्य दैन्यादियुजि प्रजायते यया भवेत्प्रेमविशेषलक्षणा भक्तिर्ह्यनन्याधिपतेर्महात्मन" इति अतस्तं त्वामजं नतोऽस्मि एकवचनमत्र भद्रश्रवसो मुख्यत्वाभिप्रायेण प्रत्येकाभिप्रायेण वा ॥ ४ ॥

अनादितो विषयप्रावण्यस्य भगवद्वैमुख्यत्वादिस्वदोषसूचनाय एवं जीवानां स्वभावमुक्त्वाथ भगवद्गुणगणं वर्णयन्तस्तत्स्वभावमाहुः । विश्वोद्भवेति । वस्तुतः अनन्तशक्तियुक्तनिजस्वरूपतएव मत्त्यन्याश्रयेण विश्वोद्भवादिकं ते कर्म "तदात्मानं स्वयमकुरुत" इति श्रुतेः अनेनान्यनिरपेक्षस्वविश्वजन्मादिहेतुत्वादयो गुणा दर्शिताः कथंभूतस्य अकर्तुः नास्ति कर्त्ता यस्य स तथास्य अनेन नित्यसिद्धत्वनिःसमानातिशयत्वादयो गुणा दर्शिताः सत्संकल्पमात्रेणैव विश्वजन्मादिहेतुत्वात् भोगार्थकर्तृत्वशून्यत्वात् अकर्तुरिति अनेन सत्यसंकल्पत्वनित्यानन्दनिखिलत्वादयो गुणा दर्शिताः पुनः कथंभूतस्य अपावृतः अपगतः आवृदावरणं यस्मात्तस्य अनेन स्वरूपतो गुणतश्चापरिच्छिन्नत्वं वर्णितम् तच्च विश्वोद्भवादिकर्म मुमुक्षुभोगार्थं मुमुक्षुमुक्त्यर्थञ्च वेदेनाङ्गीकृतं गीतमित्यनेन सर्वोपकारित्व-

स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायन्तु भूतानि शिवं मिथो धिया ।
मनश्च भद्रं भजतादधोक्षजे आवेश्यतां नो मतिरप्यहैतुकी ॥ ९ ॥
माऽगारदारात्मजवित्तबन्धुषु सङ्गो यदि स्याद्भगवत्प्रियेषु नः ।
यः प्राणवृत्त्या परितुष्ट आत्मवान् सिद्ध्यत्यदूरान्न तथेन्द्रियप्रियः ॥ १० ॥
यत्सङ्गलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसम् ।
हरत्यजोऽन्तः श्रुतिभिर्गतोऽङ्गजं को वै न सेवेत मुकुन्दविक्रमम् ॥ ११ ॥
यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासते सुराः ।
हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कारुण्यवात्सल्यादयो गुणा द्योतिताः तच्च कर्म त्वयि युक्तं न च त्वयि चित्रमित्यनेनोक्तकर्मणोऽन्यत्रासंभवत्वं भगवति किञ्चिन्मात्रत्वं च दर्शितं भवति कथंभूते कार्यकारणे कार्य्याणि महदादितृणान्तानि तेषां कारणे पूर्वपूर्वरूपेण तत्तज्जनके प्रकृतिमधिष्ठाय महत्तत्त्वमुत्पादयति तदधिष्ठायाहङ्कारमित्येवमुत्तरोत्तरं बोध्यम् अनेन सर्वान्तर्यामित्वादयो गुणा दर्शिताः सर्वात्मनि सर्वेषां चेतनाचेतनपदार्थानामात्मन्याश्रये । ननु सर्वात्मत्वे संसारित्वजडत्वादीनां भगवति प्रसक्तिः स्यादत्राहुः । व्यतिरिक्ते चेति। सर्वे चेतनाचेतनात्मत्वेऽपि संसारित्वाल्पज्ञत्वादिभिश्चेतनधर्मैर्जडत्वादिभिरचेतनधर्मैश्चास्पृष्ट इत्यर्थः अनेन दोषास्पृष्टत्वमुक्तम् ॥ ५ ॥

तमसा दैत्यरूपेण तिरस्कृतान् लोपितान् ना च तुरङ्गश्च नृतुरङ्गौ तयोरिव विग्रहो यस्य सः कवये चतुर्मुखाय यः आददे प्रत्यर्पितवान् तस्मै ते अवितथेहिताय सत्यचेष्टाय नमः ॥ ६ ॥

उत्तरत्र । सप्तमे स्कन्धे दयितं प्रियतमम् महापुरुषगुणाभाजनः सद्गुणाश्रयः दैत्यदानवकुलस्य तीर्थीकरणं शीलमाचरितं च यस्य सः अव्यभानः निरन्तरश्चासावनन्योऽव्यभिचारी च यो भक्तियोगस्तेन उपास्ते आराधयति ॥ ७ ॥

तेजस्तेजसे तेजसामपि तेजसे "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इतिश्रुतेः आविराविर्भव प्रकटो भव प्रकटो भवेत्यर्थे छिरुक्तिरा विनिपातस्य हे वज्रनख ! हे वज्रदंष्ट्र कर्माशयान् कर्मवासनाः रन्धय रन्धय निर्दह निर्दह तमोऽज्ञानं ग्रस आत्मनि अभयमभयं भूयिष्ठाः भूयात् मन्त्रस्य आदौ मध्ये अन्ते च बीजानि मङ्गलार्थानि ॥ ८ ॥

भाषाटीका

श्रीशुकदेवजी बोले तैसेही भद्राश्ववर्ष में भद्रश्रवानाम का धर्मपुत्र है उसके सन्तान महा पुरुष साक्षात् भगवान् वासुदेवकी धर्ममयी प्रियतनु हयशीर्षनाम की मूर्ति को परम समाधि से सन्निधान करके यह मंत्र बोलते हुये स्तुतिकरतेहैं । १ ।

भद्रश्रवा बोले आत्मा के शुद्ध करनेवाले धर्मरूप भगवान् आप के अर्थ नमस्कार है ॥ २ ॥

अहो भगवान् का चरित्र बडा विचित्र है जोकि यह संसारी जीव मारते हुये मृत्यु को देखता हुआ भी नहीं देखता है जिससे कि असत् पदार्थ का स्मरण करके पाप ही करना चाहता है और अपने पिता तथा पुत्र दोनों को मरने पर जलाकर भी आप जीने चाहता है ॥ ३ ॥

कविलोग संसार को नाशमान् कहते हैं और ज्ञानी पुरुष जगत्को नश्वर देखतेभी हैं तौभी हे अज ! आप की माया से मोहित होजाते हैं ऐसा विस्मयकारक आपका कार्य है आप अजहो आपको मै नमस्कार करता हूं ॥ ४ ॥

आप माया के आवरण से रहित हो अकर्ता हो आप का जो जगत् का उत्पत्ति आदि अन्त ये वेदने कहा है तिस में कुछ आश्चर्य नहीं है क्योंकि सर्वात्मा होने से आप जगत्के कारण भी हो जगत् रूप कार्य भी हो वस्तुतः सब से अलग भी हो ॥ ५ ॥

जिन आपने प्रलय काल मे ब्रह्मा के निद्रा होने से मधुकैटभ दैत्य के लेगयेहुए वेदों को पाताल से लाकर मागने वाले ब्रह्मा को देदिया तिन सत्य संकल्प आपको नमस्कार है ॥ ६ ॥

हरिवर्ष में भी भगवान् नृसिंहरूप से हैं तिन के अवतार का हेतु आगे कहेंगे उस अत्यंत प्रिय रूप को दर्शनकरके महापुरुषों के गुणवाले महाभागवत दैत्यदानवों के कुल के पवित्र करने योग्य शीलस्वभाव वाले प्रल्हाद जी निरन्तर अनन्य भक्तियोग से उस वर्ष के पुरुषों के सहित उपासना करते हैं और इस मन्त्र को जपते हैं ॥ ७ ॥

अग्नि आदिकों के प्रकाशक भगवान् नरसिंह जी आप के अर्थ नमस्कार है हे वज्र सरीके नखोंवाले ! भगवन् ! आप प्रकट होवो कर्म वासनाओं का नाश करो अज्ञान को दूर करो तिस से जैसे सब आत्मा में अभय हो तैसे आप होजावो आप में सब कर्मों को समर्पण करते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विश्वस्य स्वस्तिप्रार्थने खलस्यापि भवेत्सा साधुपीडां विना न स्यात् । अन्योऽन्यममङ्गलं ध्यायतां च भूतानामन्योन्यघातं विना न भवेदित्याशङ्क्याह । खलः प्रसीदतां प्रसीदतु

हरिर्हि साक्षाद्भगवान् शरीरिणामात्मा झषाणामिव तोयमीप्सितम् ।
हित्वा महांस्तं यदि सज्जते गृहे तदा महत्त्वं वयसा दम्पतीनाम् ॥ १३ ॥
तस्माद्रजोरागविषादमन्युमानस्पृहाभयदैन्याधिमूलम् ।
हित्वा गृहं संसृतिचक्रवालं नृसिंहपादं भजताकुतोभयमिति ॥ १४ ॥

केतुमालेऽपि भगवान् कामदेवस्वरूपेण लक्ष्म्याः प्रियचिकीर्षया प्रजापतेर्दुहितॄणां पुत्राणां तद्वर्षपतीनां पुरुषायुषाहोरात्रपरिसंख्यानानां यासां गर्भा महापुरुषमहास्त्रतेजसोद्वेजितमनसां विध्वस्ता व्यसवः सम्वत्सरान्ते विनिपतन्ति ॥ १५ ॥

अतीव सुललितगतिविलासविलसितरुचिरहासलेशावलोकलीलया किञ्चिदुत्तम्भितसुन्दरभ्रूमण्डलसुभगवदनारविन्दश्रिया रमां रमयन्निन्द्रियाणि रमयते ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

क्रौर्यं त्यजतु । भूतानि च मिथः शिवमेव ध्यायन्तु तेषां मनश्च भद्रमुपशमादिकं भजतु नोऽस्माकमपि मतिः अपिशब्दाद्भूतानां च मतिरहैतुकी निष्कामा सती ॥ ९ ॥

नः सङ्गः क्वापि मा स्यात् । यदि कथञ्चित्स्यात्तर्ह्यगारादिषु मा स्यात्किन्तु भगवत्प्रियेष्वेव अगारादिसङ्गे दोषमाह । य इति । इन्द्रियप्रियो गृहाद्यासक्तः ॥ १० ॥

भगवत्प्रियसङ्गे गुणमाह । येषां भगवत्प्रियाणां सङ्गाल्लब्धं मुकुन्दविक्रमं श्रुतिभिः श्रवणादिभिः संस्पृशतां सेवमानानां पुंसामन्तर्गतोऽजो मानसं मलं हरति कथम्भूतं विक्रमम् निजमसाधारणं वीर्यवैभवं प्रभावातिशयो यस्य तीर्थन्तु गङ्गादि मुहुः संस्पृशतामङ्गजं मलं केवलं हरति नतु वासनाः तान् को वै न सेवेतेत्यन्वयः ॥ ११ ॥

मानसमलापगमफलमाह । यस्येति । अकिञ्चना निष्कामा मनःशुद्धौ हरेर्भक्तिर्भवति ततश्च तत्प्रसादे सति सर्वे देवाः सर्वैर्गुणैर्धर्मज्ञानादिभिः सह तत्र सम्यगासते नित्यं वसन्ति गृहाद्यासक्तस्य तु हरिभक्त्यसम्भवात्कुतो महतां गुणा ज्ञानवैराग्यादयो भवन्ति असति विषयसुखे मनोरथेन बहिर्धावतः ॥ १२ ॥

ननु हरिविमुखस्य गृहाद्यासक्तस्यापि लोके महत्त्वं दृश्यते सत्यं दृश्यते तत्तूपहासास्पदमिति सहेतुकमाह । हरिर्हीति । यथा झषाणां मीनानामीप्सितं तोयमेवात्मा तेन विना जीवनाभावात् महानतिप्रसिद्धोऽपि गृहे यदि सज्जते तदा दम्पतीनां मिथुनानां क्षुद्रादिष्वपि प्रसिद्धं वयसैव केवलं यन्महत्त्वं तदेव तस्य भवति नतु ज्ञानादिना मिथुनेषु पूज्यमानेषु स्त्रीभ्यः पुंसां महत्त्वं बालमिथुनेभ्यश्च वृद्धमिथुनानां महत्त्वं यथेत्यर्थः ॥ १३ ॥

यस्मादेवं तस्माद्गृहं हित्वाकुतोभयं नृसिंहपादं भजतेत्यसुरानुपदिशति कीदृशं गृहं रजस्तृष्णा रागोऽभिनिवेशः रजआदीनां मूलं कारणमत एव संसृतीनां जन्ममरणादीनां चक्रवालं मण्डलमविच्छेदी यस्मात् ॥ १४ ॥

केतुमालेऽपि कामदेवस्वरूपेणास्त इति शेषः । किमर्थमास्तेऽत आह । लक्ष्म्या इति । प्रजापतिः सम्वत्सरः "सम्वत्सरो वै प्रजापतिः" इति श्रुतेः तस्य दुहितरो रात्र्यभिमानिन्यो देवताः पुत्रा दिवसाभिमानिनो देवास्तेषां च प्रियचिकीर्षया पुरुषायुषा वर्षशतेन यान्यहोरात्राणि तैः परिसङ्ख्यानं गणना येषां षट्त्रिंशत्सहस्राणामित्यर्थः यासां दुहितॄणां महापुरुषस्य महास्त्रं चक्रं तस्य तेजसा ॥ १५ ॥

रमां रमयन् स्वीयानीन्द्रियाणि रमयते केन साधनेन रमयंस्तदाह । अतीव सुललितया गत्या यो विलासस्तेन विलसितो रुचिरो हासलेशो मन्दस्मितं तत्सहितोऽवलोक एव लीला तया किञ्चिदुत्तम्भितमुत्तुङ्गितं सुन्दरं यद्भ्रूमण्डलं तेन सुभगं यद्वदनारविन्दं तस्य श्रिया ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

श्लोकानाह । स्वस्तीति । विश्वस्य जगतः स्वस्ति मङ्गलं भूयात् । ननु विश्वस्य स्वस्तिप्रार्थने खलस्यापि भवेत्तच्च साधुपीडां विना न स्यादन्योऽन्यमङ्गलम् ध्यायतो भूतानां परस्परं घातं विना न भवेदित्याशङ्क्याह । खलः प्रसीदतां खलो दुर्मतिः प्रसन्नो भवतु क्रोधादिकं परित्यज्य सुमतिर्भवत्वित्यर्थः भूतानि मिथः परस्परं केवलं शिवमेव धिया सुमत्या ध्यायन्तु तेषां भूतानां मनश्च भद्रमुपशमादिकं भजतु नोऽस्माकं मतिरपिशब्दाद्भूतानां च मतिः अहैतुकी फलाभिसंधिरहिता सत्यधोक्षजे भगवत्यावेश्यतामावेशिता भवतु भगवत्प्रवणा भवत्वित्यर्थः ॥ ९ ॥

मेति । नोऽस्माकं सङ्ग आसक्तिः क्वापि मा न स्यात् यदि क्वापि कथंचित्स्यात्तर्ह्यगारादिषु न स्यात्किन्तु भगवत्प्रियेषु भागवतेष्वेव स्यात्तत्रागाराणि गृहाः भवत्वगारादिष्वप्यासक्तिस्तत्र को दोष इत्याशङ्कायां भागवतसङ्गगृहादिसङ्गयोर्गुणदोषावाह । यः पुमानात्मवान् भगवत्प्रियसङ्गेन समाहितमनाः प्राणवृत्त्या प्राणधारणमात्रोपयुक्तवस्तुपरिग्रहेण परितुष्टः यथा सिध्यति भगवत्कथाश्रवणाचार्योपसत्त्यादिप्रणाड्या दूरादाशु मुक्तो भवति न तथा इन्द्रियप्रियः इन्द्रियपोषणप्रियः शब्दादिविषयप्रवणचित्तः सिध्यतीत्यर्थः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पुनः सत्सङ्गतेः सिद्धिहेतुत्वमेव प्रपञ्चयति । यत्सङ्गेति । येषां भगवत्प्रियाणां ज्ञानिनां सङ्गेनैव लब्धं प्राप्तं निजवीर्यवैभवं मच्चित्तस्य भगवद्ध्यानसामर्थ्यं भगवत्प्रियसङ्गेनैव मया लब्धमित्यर्थः तथा हि तीर्थं गङ्गादितीर्थवत्पवित्ररूपं भगवद्यशः मुहुः संस्पृशतां सम्यक्सेवमानानां मानसं श्रुतिभिः श्रोत्रेन्द्रियैरन्तःप्रतिष्ठितो भगवानङ्गजमन्तर्गतमलं हरति निर्मलं च मनः तद्ध्यानसमर्थमिति भावः अतः ईदृशं मुकुन्दस्य विक्रमं यशः को वै पुमांश्च सेवेत मुकुन्दविक्रमसेवा च भगवत्प्रियसङ्गायेति सङ्गतिरेव प्रार्थ्यते इति भावः । यद्वा । येषां भगवत्प्रियाणां सङ्गाल्लब्धं प्राप्तं निजवीर्यवैभवं निजशब्दो भगवत्परः भगवद्वीर्यवैभवं मुहुः संस्पृशतां पुंसां श्रुतिभिः श्रोत्रेन्द्रियव्यापारैः श्रवणादिभिरन्तःप्रविष्टो भगवान्मानसं मनःसम्बन्धिमलं हरति तत्र दृष्टान्तः यथा भगवच्चरणाम्बुजातं गङ्गादितीर्थं संस्पृशतामङ्गजं शारीरमलं हरतीति शेषः पूर्ववत् अथवा यत्सङ्गलब्धं निजवीर्यवैभवं निजासाधारणं वीर्यवैभवं प्रभावातिशयो यस्य तथाभूतं मुकुन्दस्य विक्रमं मुहुः संस्पृशतां श्रुतिभिरन्तर्गतोऽजो मानसं मलं हरति यथा तत्पादाम्बुजतीर्थमङ्गजं मलमिति वा योजना अत्र न सेवेतेत्यत्र तं मुकुन्दविक्रममित्यध्याहारः तस्य संस्पृशतामित्यनेनान्वितत्वादावृत्तिर्वा मुकुन्दविक्रममित्यस्याद्ययोजनायां तु तीर्थपदस्य गौण्या वृत्त्या भगवद्यशसि वृत्तिः अङ्गशब्दस्य मनःपरत्वं च द्वितीययोजनायां तु न कोऽपि दोषः एतत्सङ्गतेर्भगवद्यशःश्रवणं ततो मनोनैर्मल्यं ततस्तस्य भगवद्ध्यानसामर्थ्यं ततश्च भगवदुपासना ततोऽपि च सिद्धिरिति प्रणाडी दर्शिता भवति ॥ ११ ॥

इदानीं भगवद्भक्तिं प्रस्तौति । यस्येति । अकिञ्चना नास्ति किञ्चन यस्याः सा अकिञ्चना किञ्चिदैहिकामुष्मिकं च फलमनवलम्बमाना भगवति भक्तिर्यस्य पुंसोऽस्ति तत्र भगवद्भक्तौ सत्यां देवा इन्द्रादयः सर्वैर्गुणैर्धर्मादिभिः शमदमादिभिश्च सह सम्यगासते तमेवानुवर्तन्त इत्यर्थः एवं भक्तस्य सद्गुणाश्रयत्वमुक्त्वाभक्तस्य तदभावमाह । हराविति । हरौ भगवत्यभक्तस्यात एवासति शब्दादौ मनोरथेन बहिर्धावतः विचिन्वतः महद्गुणा महतां भगवद्भक्तानां ये गुणा उक्तास्ते कुतः कस्माद्धेतोः भवेयुः अतोऽभक्तस्य न महद्गुणाश्रयत्वमित्यर्थः ॥ १२ ॥

ननु विषयासक्तोऽपि कश्चिल्लोके महानेव दृश्यतेऽत आह । हारिरिति । यथा झषाणां मीनानामीप्सितं तोयं जलमिवात्मधारकं तेन विना जीवनाभावात् तथा शरीरिणां देहिनां साक्षाद्भगवानेवात्मा धारकः तथाच श्रुतिः "को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्" निरतिशयानन्दरूप आकाशः सर्वप्रकाशकः परमात्मा यदि न स्यान्नोपासितः स्यात्तदा को ह्यन्यादैहिकामुष्मिकसुखसम्पादनेन जीवयेत् को वा प्राण्यादापवर्गिकसुखसम्पादनेनोज्जीवयेत्" इति श्रुत्यर्थः तथाच स्मरति भगवान् वाल्मीकिः ।

न च सीता त्वया हीना न चाहमपि राघव !
मुहूर्तमपि जीवावो जलान्मत्स्याविवोद्धृतौ ।

इति हि यस्मादेवं तस्मात्तं भगवन्तं महानपि वयोरूपप्रश्नस्नपुत्रधनादिसमृद्धोऽपि हित्वा यदि गृहे सज्जते आसक्तो भवति महान्तमिति पाठे महत्पुरुषं भगवन्तं विहायेत्यर्थः तदा दम्पतीनां वयसा महत्त्वं नतु ज्ञानादिभिरित्यर्थः मिथुनीभूतानां यद्वयआदिभिर्निर्वृत्तः क्षणिकोऽन्ततो निरतिशयदुःखहेतुः सुखलेशः तत्कृतमेव तेषां माहात्म्यं न तु निरतिशयानन्दापादकस्वात्मपरमात्मयाथात्म्यानुभवकृतमिति भावः ॥ १३ ॥

तस्मादिति । तस्माद्भगवद्भक्तेर्निरतिशयसुखहेतुत्वाद्विषयासक्तेर्निरतिशयदुःखहेतुत्वाच्च रजआदीनां मूलं संसृतिचक्रवालं संसारपरिवृत्तिहेतुं गृहं संसृतिर्जन्ममरणरूपा तस्याश्चक्रवालं मण्डलमविच्छेदो यस्मात् गृहं हित्वेत्यर्थः नृसिंहस्य पादं भजतां कुतो भयं दुःखं न तु कुतोऽपि भयमित्यर्थः तत्र रजः कामः विषयाभिलाषरूपः रागः क्रोधः विषयानुभवविरोधिविषयः विषादः विषयविहतिनिमित्तः शोकः मानोऽहङ्कारः महाजनावमानहेतुः मन्युस्तज्जन्यः क्रोधः स्पृहा परदारधनादिष्वभीप्सा भयमागामिदुःखे हेतुदर्शनज्ञानजं तज्जं दैन्यं मनसोऽवसादः आधिस्तत्कृता मनःपीडा ॥ १४ ॥

अथ केतुमाले वर्षे उपास्योपासकादीनाह । केतुमालेऽपीति । भगवान्कामदेवरूपेण प्रद्युम्नरूपेण केतुमाले वर्षे आस्ते इति शेषः किमर्थं लक्ष्म्याः प्रियं कर्तुमिच्छया किं च प्रजापतेः संवत्सरस्य "संवत्सरो वै प्रजापतिः" इतिश्रुतेः तस्य दुहितरो राज्यभिमानिन्यो देवताः पुत्रा अहरभिमानिनो देवाः केतुमालवर्षाधिपतयः तासां तेषां च पुरुषायुषा अहोरात्रसंख्यानानां पुरुषस्यायुः पुरुषायुषम् अचतुरविचतुरेत्यादिना निपातनात्समासान्तोऽच्प्रत्ययः एकं पुरुषायुषं वर्षशतमहोरात्रमहोरात्रस्थानीयं परिसंख्यानं गणनं येषां ते तथोक्ताः अहश्च रात्रिश्चाहोरात्रः "अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः" इति समासान्तोऽच्प्रत्ययः पुरुषायुषपरिमाणकमहोरात्रं येषामित्यर्थः षट्त्रिंशत्सहस्रपरिमितायुषामिति यावत् तेषां प्रियचिकीर्षया च यासां प्रजापतेर्दुहितॄणां राज्यभिमानिनीनां देवतानां कथंभूतानां महापुरुषस्य भगवतो महास्त्रस्य चक्रराजस्य तेजसा उद्वेजितं भीतं मनो यासां तासां गर्भाः संवत्सरान्ते गर्भाधानादारभ्य तत्संवत्सरान्ते विध्वस्ता विस्रस्ता अत एव व्यसवः विगतप्राणाः सन्तो निपतन्ति ॥ १५ ॥

अतीवेति । तत्र रमां लक्ष्मीं रमयन् स्वीयानीन्द्रियाणि रमयते केन साधनेन रमयन् तदाह । अतीवसुललितया सुन्दरया गत्या यो विलासस्तेन विलसितो रुचिरो हासलेशो मन्दस्मितं तत्सहितोऽवलोक एव लीला तया किञ्चिदुत्तम्भितमुत्तुङ्गितं सुन्दरं यद्भ्रूमण्डलं तेन सुभगं यद्वदनारविन्दं तस्य श्रिया शोभया भगवतस्तन्मायामयं मायाप्रचुरमात्मीयसङ्कल्पेन परिगृहीतमित्यर्थः ज्ञानपर्यायोऽत्र मायाशब्दः रमां लक्ष्मीं देवीं देवस्य भगवतः सम्बन्धिनीं "पुंयोगादाख्यायाम्" इति ङीष् सम्वत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिः राज्यभिमानिनीभिर्देवताभिरुपेता सती संवत्सरस्याहस्सु च तद्भर्तृभिः राज्यभिमानिदेवताभर्तृभिर्दिवाभिमानिभिर्देवैरुपेता परमेण समाधियोगेन उपास्ते ॥ १६ ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विश्वस्यार्थे स्वस्त्यस्तु नृसिंहः प्रसीदतां हे हरिवर्षजनाः ! भद्रायणमुद्दिश्य नृहरिं ध्यायन्तु शिवं नित्यशुद्धं मनोधिया धाक्षमननेन उपासनालक्षणध्यानेन च मनश्च भद्रं सकल-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मङ्गलरूपं हरिं भजनात् नोऽस्माकं मतिरप्यधोक्षजे आविश्यताम् अहैतुकी फलाभिसन्धिरहिता ॥ ९ ॥

मनआदेर्हर्येकविषयत्वे इत्थंभावलक्षणं साधनमाह । मागारेति । गृहादिषु सङ्गो माभूत् यदि सङ्ग आवश्यकस्तर्ह्यस्माकं भगवत्प्रियेषु स्यात् ननु गृहादिसङ्गाभावे जीवनाभावेन देहपातलक्षणानर्थः स्यादिति तत्राह । य इति । यः प्राणवृत्त्या प्राणधारणलक्षणजीवनस्थितिमात्रेण परितुष्टः स आत्मवान् वशीकृतमना अदूराच्छीघ्रं सिद्ध्यति संसारमुक्तो भवति यथा मुक्तसङ्गस्तथेन्द्रियप्रियो मुक्तो न स्यादित्यर्थः ॥ १० ॥

महात्मनां सङ्गात्किं फलं स्यादत्राह । यत्सङ्गेति । येषां भगवत्प्रियाणां सेवालक्षणसङ्गाद्धरेर्निजमौत्पत्तिकं वीर्यं माहात्म्यं वैभवं विभुत्वं व्याप्तलक्षणं च यस्मिन् तीर्थे तत्तथा तादृशं तीर्थं वेदान्तशास्त्रं मुहुर्निरन्तरं संस्पृशतां श्रवणादिनाऽभ्यस्यतां पुंसां मानसं विषयसंसर्गगतं मनोगतमंहो हरति अजः कथं श्रुतिभिः श्रवणेन्द्रियद्वारेणान्तर्गतः हृदयं प्रविष्टः ततः किं यत एवंविधफलमतः को वै मुकुन्दविक्रमं न सेवेत रसज्ञ इति शेषः । यद्वा यस्य हरेः श्रीपादसङ्गाल्लब्धं यस्य तीर्थस्य निजवीर्यवैभवं तादृशं गङ्गादितीर्थं मुहुः संस्पृशतां दर्शनस्पर्शनादिना सेवमानानां पुंसां मानसमंहः सोऽजो हरति हि यस्मात्तस्मान्मुकुन्दस्य गृहीतवामनाद्यवतारस्य विक्रमं त्रैलोक्यविक्रमलक्षणं चरितं कः पुरुषो न सेवेत यद्यपि बाह्यं स्नानादिना हरत्यान्तरमंहः कथमित्यत उक्तम् । अन्तरिति । बहुवारं श्रोतव्यमित्यभिप्रायेण श्रुतिभिरित्युक्तमिति ॥ ११ ॥

भक्तेरिन्द्रियाधीनत्वेनेन्द्रियाणां च स्वाभिमानिदेवताधीनत्वेन तत्प्रसादमन्तरेण इन्द्रियाणामात्मावशत्वेन भक्तिकरणानुपपत्तिरित्याशङ्क्य भगवद्भक्त्या देवप्रीतिरपि तदविनाभूतेति साधयन्नाह । यस्येति । व्यतिरेकेणापि हरौ भक्तिः कर्तव्येत्याह । हराविति । महतां गुणा असत्यमङ्गले बहिःशब्दादिविषये धावनमेवावशिष्यते नत्त्वात्मसुखमित्यतो धावत इति ॥ १२ ॥

भगवद्भक्त्याभिमानिदेवप्रीतिमुपपादयति । हरिर्हीति । आत्मा जीवनः अत्रापि व्यतिरेकमाह । हित्वेति । महान्तमनाद्यनन्तकालीनं हरिं हित्वा यदि गृहे सज्जते बहुकालं जीवति तदा वयसा आयुषा दम्पतीनां महत्त्वं न गुणतः गुणतो महत्त्वं हरिभक्त्यैवेत्यर्थः ॥ १३ ॥

उपसंहरति । तस्मादिति । यस्मात्तृष्णं रजोरागादिमूलं तस्मान्नृसिंहपादं भजतेत्यन्वयः संसृतिचक्रवालं संसारावृत्तिहेतुभूतम् ॥ १४ ॥

कामदेवस्वरूपेण कामदेवसन्निहितप्रद्युम्नाख्यात्मरूपेण प्रजापतेर्दुहितृणां केतुमालवर्षपतीनां लक्ष्म्याश्च प्रियचिकीर्षयेत्यनेन हरेर्भक्तवत्सलतैव प्रयोजनं नान्यदिति दर्शितं पुरुषायुषा शतवर्षसङ्ख्यानेन यान्यहोरात्राणि तैः षड्विंशत्सहस्रैः परिसङ्ख्यानं गणनं यासां तास्तथा तासां महापुरुषो हरिस्तस्य महास्त्रतेजसा सुदर्शनचक्रतेजसा व्यसवः गतप्राणाः ॥ १५ ॥

उत्तमिमसमूर्ध्वं नीतं सुभगं सुन्दरमिन्द्रियाणि रमयसे इन्द्रियाणामितिशेषः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मागारेति । तदेवोपपादयति । यः प्राणेत्यादिलक्षणः स यथा सिध्यति तथेन्द्रियप्रियो न सिध्यति तदेवं तारतम्ये सत्यपि यदि नः सङ्गः स्यात् तदागारादिष्वन्येषु च सर्वथा मा स्यात् किन्तु भगवत्प्रियेषु स्यादेवेत्यर्थः । प्राणवृत्त्या क्षुत्तृणमात्रशान्त्येत्यर्थः । आत्मवान् सङ्गरहितः ॥ १० ॥

यत्सङ्गलब्धं तीर्थभूतं मुकुन्दविक्रमं संस्पृशतां श्रवणेन्द्रियैरन्तर्गतोऽजः मानसं मनो हरति । अकिञ्चनभक्त्युद्रेकेणाकर्षति । अन्यत् टीकया च समम् अङ्गजं कामं च हरति खण्डयतीत्यन्वयः ॥ ११ ॥

किञ्च । यस्येति । सुरा भगवदादयः सर्वैर्गुणैरिति यदृच्छयैवेत्यर्थः । समासते वशीभूय तिष्ठन्ति ॥ १२ ॥

हित्वेत्ययमर्थः तं हित्वा यदि गृहे सज्जते तदा यदि महानुच्यते तदा दम्पतीनां कामार्थं युग्मीभूतस्त्रीपुंसानां वयसा यौवनमात्रेणापि महत्त्वमादरो दृश्यते । द्वयोर्यूनोः परस्परमादरः स्यात् एकत्र तु एकत्रैवेति अर्थान्तरे तु नृणामादरमात्रेणैव चरितार्थता स्यात् किं दम्पतीग्रहणेन दम्पत्योः पुरुषमहत्त्वे च वयसेत्यनन्वितं स्यात् ॥ १३ ॥ १४ ॥

लक्ष्मीस्तु दास्यसम्वलितशुचिरसेन स्तौतीत्याह । केतुमाल इत्यादिना । एवमग्रेऽप्यनुसन्धेया तत्र पुरुषायुषेति कथनसमकालकलियुगापेक्षयोक्तम् ॥ १५ ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मन्त्रं जपित्वा प्रार्थयते । स्वस्तीति । विश्वस्य स्वस्तिप्रार्थने खलस्यापि भवेत् । तच्च साधुपीडां विना न स्यादित्यत आह । खलः प्रसीदतां क्रौर्यं त्यजतु साधुमपीडयतामपि परस्परवैराणां भूतानां परस्परघातं विना स्वस्ति न भवेदित्यत आह । ध्यायन्त्विति । तदपि विषयासक्तिमतां विषयभोगं विना स्वस्ति न स्यादित्यत आह । मनश्चेति । भद्रमनासक्ति तदपि भक्तिं विना भद्रमप्यभद्रमेवेत्यत आह । अधोक्षजे श्रीकृष्णे नो मत्सहितानां विश्वेषामेव मतिरहैतुकी निष्कामा सती आवेश्यतामधोक्षजेनैवेत्यर्थः । अत्र अद्यैवेति युगपदिति पदोपन्यासाभावात् क्रमेण कालतः प्रह्लादवाञ्छितं भगवान् सम्पादयिष्यत्येव न च तर्हि सर्वमुक्तौ ब्रह्माण्डानां शून्यत्वप्रसङ्ग इति वाच्यम् । जीवशक्तिमायाशक्त्योर्नित्यत्वात्सदा तदैव तावतामनन्तानामन्येषां जीवानां प्रसवादिति ॥ ९ ॥

अधोक्षजासक्तेश्च यद्यपि सत्सङ्गदुःसङ्गौ साधकबाधकौ तदपि सत्सङ्गस्य प्राबल्यात् तस्मिन् सति दुःसङ्गः स्वत एवापयातीत्याह । मेति । नोऽस्माकं यदि भगवत्प्रियेषु सङ्गः स्यात्तदा अगारादिषु मैव स्यात् स्वत एव तेष्वासक्तिः शनैरपयास्यतीत्यर्थः । नन्वगारादिराहित्ये भोगासिद्ध्या क्लिष्टदेहः कथं वर्तेतेत्यत आह । य इति । प्राणवृत्त्या भिक्षान्नादिभिरुदरपूर्त्यैव तुष्टः यत आत्मवान् धृतियुक्तः । अदूरादिति । इन्द्रियप्रियस्तु विलम्बेनैवेत्यर्थः । यद्वा यदि भगवत्प्रियेषु सङ्गः स्यात्तदा अगारादिषु सङ्गो मास्तु । यतो युगपदुभयसङ्गे सति शीघ्रं न भगवन्तं प्राप्नोतीत्याह । य इति । यद्वा अगारादिषु सङ्गो मास्तु यदि भगवत्प्रियेषु

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सङ्गः स्यात्तदैव । भगवत्प्रियसंगाभावे सति भक्त्यसिद्ध्या असंगस्य ज्ञानजनकस्यापि वैफल्यमेवेति भावः । ननु तर्ह्यलमसंगेन केवलः साधुसंग एव प्रार्थ्यतां सत्यं तदपि असङ्गरहितः साधुसङ्गः शीघ्रफलप्रदो भवतीत्याह । य इति । लब्धभगवत्प्रियसङ्गः किञ्च यदि सङ्गः स्यात्तदा अगारादिषु मा स्यात् किन्तु भगवत्प्रियेषु स्यादिति व्याख्याने असङ्गादपि भगवत्प्रियसङ्गस्यापकृष्टत्वे व्यञ्जनयावगमिते भक्तिसिद्धान्तापगम उत्तरश्लोकार्थस्यासङ्गतिस्तुलयाम लवेनापीत्यादि वचनञ्च विरुद्ध्यत इत्याद्यवधेयम् ॥ १० ॥

भगवत्प्रियसङ्गस्य माहात्म्यमाह । येषां सङ्गादेव लब्धं निजवीर्यवैभवं श्रीगोवर्द्धनधारणादिप्रभावोत्कर्षं सत्त्वशोधकत्वात्तीर्थं श्रुतिभिः संस्पृशतां कर्णैराचम्यतां जनानां मानसमङ्गजं मनःसम्बन्धिनं कामं वासनामयमजः श्रीकृष्णो हरति, दूरीकरोति श्लेषेण मानसं मनश्चाकर्षति । कीदृशः सन् श्रुतिभिः श्रवणेन्द्रियैरेव अन्तर्गतः अतः को मुकुन्दस्य विक्रमं गोवर्द्धनोद्धारणादिवीर्यं न सेवेतेति तस्य च मुकुन्दविक्रमस्य भगवत्प्रियसङ्गं विना दुर्लभत्वात्तस्यैवोत्कर्षः ॥ ११ ॥

मुकुन्दविक्रमसेवनस्य भक्तित्वात्तस्याश्च साधुसङ्गलब्धायाः परमोत्कर्षत्वात्तद्वतो भक्तस्याप्युत्कर्षमाह । यस्येति । अकिञ्चना निष्कामा सर्वैर्धर्मज्ञानवैराग्यादिभिः सह तत्रैव सम्यक्तया आसते वसन्ति सर्वदेवमयः स एव स्यात्तत्सेवैव सर्वदेवसेवेति भावः । यद्वा । सुरा इन्द्रियाधिष्ठातारो रुद्रादयः सर्वैर्गुणैरेव सह नतु दोषैः सहेत्यर्थः । तेन तस्याहङ्कारादीनामिन्द्रियाणां दुरभिमानाद्यो दोषा नैव भवन्तीति भावः । अभक्तस्य तु महद्गुणा महतो भक्तिसमर्थस्य ये निर्दोषा गुणास्ते कुतः यदि च शास्त्रज्ञत्वादयो गुणाः स्युस्तदा खलवीर्ष्यामत्सरादिदोषसहिता एव स्युः । कुतः असति सद्भिर्निन्द्ये अविद्यमाने वा बहिर्लाभप्रतिष्ठादिसुखे मनोरथेनापि धावतः । यद्वा । समासते इति सुरा इन्द्रियाधिष्ठातारोऽन्यत्र सांसारिकलोके संसारप्रवर्त्तकत्वेन दोषैरेव सहासते ज्ञानिलोके नित्यमध्यात्मादिलयभावनावति न सम्यगासते किन्तु अकमत्त एव ज्ञानमवाप्य पुनरस्मानेव संजिहीर्षोत्रस्मिन् कृतघ्ने पुंसि स्थिता वयमद्य श्वो वा मरिष्याम एवेति सभयोत्कम्पमेवासते भक्तजने तु प्रतिदिनं भगवन्माधुर्यं एवाध्यात्मादिकं संचारयति सति सर्वैर्गुणैरेव समासते वयं कृष्णाय सजातयः प्राकृता अप्यप्राकृताः कृष्णस्पर्शसंयोगात् कारण्याः प्राप्तदिव्यजातिरूपगुणा नित्यमेव भगवन्माधुर्यामृते विहरन्तोऽत्र पुंसि नूतमतिमूत्यवो भवामेति सानन्दचमत्कारं निश्चलीभवन्तीत्यर्थः अन्यत् समानम् ॥ १२ ॥

ननु भक्ति राहित्यादेव गृहे सज्जतां शास्त्रज्ञत्वादिगुणवतां लोके महत्त्वं दृश्यते सत्यं तत्तु वस्तुत उपहासास्पदमेवेति सहेतुकमाह । हरिर्हीति । तोयमीप्सितमिति,कश्चित् झषजातिर्यथा तोयमपि हित्वा बहिस्तटादिषु सुखार्थं प्रचरन् जीवन्मृतो भवति तथैव हरिविमुखो जीवन्मृत एव स नतु महानिति भावः । तदपि यदि लोके महान् स्यात्तदा वयसा यौवनेनैव दम्पतीनां यथा महत्त्वं तथा यूनोर्दम्पत्योर्यथा परस्परमादरस्तथा न वृद्धयोर्नापि बालयोः दम्पतिपूजायाञ्च यौवनविशिष्टावेव दम्पती वस्त्रालङ्कारादिभिरधिकं पूज्येते न तथा वृद्धाविति ॥ १३ ॥

रजस्तृष्णा रागोऽभिनिवेशः । संसृतेश्चक्रवालं मण्डलरूपं गृहमध्य एव संसृतिस्तिष्ठतीति भावः । भजतेत्यसुरान् प्रत्युपदेशः ॥ १४ ॥

कामेन कन्दर्पविलासेन दीव्यतीति कामदेवस्तत्स्वरूपेण भगवानास्त इति शेषः । "सम्वत्सरो वै प्रजापतिः" इति श्रुतेः प्रजापतिः सम्वत्सरात्मकः कालस्तदभिमानी देव एव दस्य दुहितॄणां पुत्राणाञ्च रात्रिदिवसाभिमानिनां देवानां प्रियचिकीर्षया पुरुषायुषेति कथनसमकालकलियुगापेक्षयोक्तेवर्षशतेन यान्यहोरात्राणि तैः परिसङ्ख्या गणना येषां षट्त्रिंशत्सहस्राणामित्यर्थः । यासां पतिमतीनां दुहितॄणां दिवससहितानां रात्रीणामित्यर्थः । महास्त्रतः कालचक्ररूपात् गर्भाः क्षणलवाद्यात्मकाः कालाः । यद्वा । वर्षभोज्यानि लोकानां प्रारब्धकर्मफलान्येव ता रात्रीर्निमित्तीकृत्योद्भूतत्वात्तासामेव गर्भा इत्युत्प्रेक्षन्ते तथा तेषां सम्वत्सरात्मकस्थूलकालान्ते भोगेन क्षय एव गर्भपातत्वेनोत्प्रेक्षितः । अहोरात्राधिष्ठात्र्यो देवतास्ताः प्राकृतलोकवर्त्तिन्यो भगवन्तमुपास्य वैकुण्ठ एव तद्भक्तानामनश्वरप्रेमसेवासुखनिमित्तरूपा भविष्यन्तीत्युपासनाफलञ्च द्रष्टव्यम् ॥१५॥

अतीव सुललितो यो गतिविलासः विशेषेण लक्षितोऽतिकमनीयो रुचिरहासलेशयुक्तोऽवलोकश्च ताभ्यां या लीला तया कीदृश्या किञ्चिदुत्तम्भितेन सुन्दरचक्रमण्डलेन सुभगं यद्वदनारविन्दं तस्यापि श्रीर्यतः तया स्वीयया रमां रमयन् रमासम्बन्धिन्या च तया इन्द्रियाणि स्वीयानि रमयते ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

खलः प्रसीदतां खलतां त्यजतु भूतानि शिवं मङ्गलं परस्परं ध्यायन्तु तेषां मनः भद्रं कल्याणं भजताद्भजतु नोऽस्माकं मतिः अहैतुकी फलाभिसन्धिरहिता सती अधोक्षजे त्वय्येव आविश्यताम् प्रविष्टा भवतु ॥ ९ ॥

प्राणवृत्त्या यथा लाभेन ॥ १० ॥

यत् येषां भगवत्प्रियाणां सङ्गाल्लब्धं निजमसाधारणं मुकुन्दसाक्षात्कारकरं वीर्यं बलमेव वैभवं सामर्थ्यं यस्य तन्मुकुन्दविक्रमं श्रुतिभिः श्रुतिः श्रवणं बहुवचनेन वागादिसङ्ग्रहः श्रवणवर्णनमननादिभिः संस्पृशतां सेवमानानां जनानाम् अन्तर्गतः हृत्तोऽजः श्रीमुकुन्दः मानसम्मनोगतं सर्वाशुभबीजभूतम्मलं हरति तीर्थजलादिरूपन्तु मुहुः संस्पृतामङ्गजम्मलं केवलं हरति, तान् भगवत्प्रियान् को न सेवेत ॥ ११ ॥

अकिञ्चना भगवदितरफलविषयरहिता भगवद्भक्तिरस्ति तत्र तस्मिन् भगवद्भक्ते सर्वैर्धर्मज्ञानादिसाधनसहितैर्गुणैः फलैः सह सर्वे सुराः फलदाः सम्यगासते सानुकूला भवन्ति असति सूक्ष्मे स्वप्नादौ बहिर्जागरे धावतः हरावभक्तस्य तु महान्तो गुणा येभ्यस्ते सुराः सर्वैर्गुणैः सह सानुकूलाः कुतः ॥ १२ ॥

झषाणां तोयमिव शरीरिणां हरिरात्माश्रयस्तं हित्वा महानपि यदि गृहे सज्जते तदा दम्पतीनां मिथुनानां शूद्रादीनामिव वयसा महत्त्वं तस्यापि भवति नतु हेयोपादेयविवेकादिना ॥ १३ ॥

तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमा देवी सम्वत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेताऽहस्सु च तद्भर्तृभिरुपास्ते इदं चोदाहरति ॥ १७ ॥

ॐ ह्रां ह्रीं ह्रूं ॐ नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्विलक्षितात्मने आकूतीनां चित्तीनां चेतसां विशेषाणां चाधिपतये षोडशकलाय छन्दोमयायान्नमयायामृतमयाय सर्वमयाय सहसे ओजसे बलाय कान्ताय कामाय नमस्ते उभयत्र भूयात् ॥ १८ ॥

स्त्रियो व्रतैस्त्वां हृषिकेश्वरं स्वतो ह्याराध्य लोके पतिमाशासतेऽन्यम् ।
तासां न ते वै परिपान्त्यपत्यं प्रियं धनायूंषि यतोऽस्वतन्त्राः ॥ १९ ॥
स वै पतिः स्यादकुतोभयः स्वयं समन्ततः पाति भयातुरं जनम् ।
स एक एवेतरथा मिथो भयं नैवात्मलाभादधिमन्यते परम् ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

असुरानुपदिशति । तस्मादिति । रजआदिमूलं गृहं हित्वा अकुतोभयं नृसिंहपादं भजतेति ॥ १४ ॥

लक्ष्म्याः प्रियचिकीर्षया कामदेवरूपेण आस्ते इतिशेषः "सम्वत्सरो वै प्रजापतिः" इति श्रुतेः प्रजापतेः सम्वत्सरस्य दुहितॄणां रात्र्यभिमानिनीनां देवतानाम् पुत्राणां दिनाभिमानिनां च प्रियचिकीर्षया यासां दुहितॄणाम् महास्त्रं चक्रम् ॥ १५ ॥

अतीव सुललितगत्या यो विलासस्तेन विलसितो रुचिरो हासलेशो मन्दस्मितं तेन सहितोऽवलोक एव लीला तया किंचिदुत्तम्भितेन सुन्दरभ्रूमण्डलेन सुभगस्य वदनारविन्दस्य श्रिया रमां रमयन् इन्द्रियाणि रमयते ॥ १६ ॥

भाषाटीका ।

सब संसार का मङ्गल होवे दुष्ट की बुद्धि निर्मल होवे सब प्राणिआपस में मन से सब का भला चाहें हे अधोक्षज ! हमारा मन शान्ति को प्राप्त होवै हमलोगों की बुद्धि निष्काम होकर परमेश्वर में लगै ॥ ९ ॥

हम लोगों का सङ्ग कभी स्त्री पुत्र धन आदि में मत होवै यदि होवै तो भगवद्भक्तों के साथ होवै जो ऐसा विरक्त है वह प्राणवृत्ति भोजनादि मात्र से सन्तुष्ट होकर आत्मज्ञानी होने से थोड़े दिन में सिद्ध होजाता है इन्द्रियों की प्रीतिवाला कभी नहीं सिद्ध होता है ॥ १० ॥

जिन भक्त पुरुषों के सङ्ग से प्राप्त भगवत चरित्र को वारम्वार चिंतन करने वालों के मन को साक्षात् भगवान् कर्णों के द्वारा हृदय में आकर पवित्र कर देते हैं वह मुकुन्द भगवान् का चरित्र उत्तमतीर्थ है तिसको कौन नहीं सेवन करैगा और पुष्करादि तीर्थ तो देह के मल को ही वारम्बार सेवने से छुटाते हैं ॥ ११ ॥

जिस पुरुष की भगवान् में निष्काम भक्ति है तिसकेही पास सबगुणों के सहित सब देवता रहते हैं जो हरि का भक्त नहीं है वाहिर के असत् पदार्थों में मनोरथ को दौडाता है उस के पास महापुरुषों के गुण कहां से आवें गे ॥ १२ ॥

हरिभगवान् तो सब प्राणियों के जीवन के हेतु हैं जैसे कि मछलियों को जलअति प्रिय है तब महात्मा होकर भी उन परमात्मा को छोड कर यदि गृहादि में आसक्त होजावे तो उन स्त्री पुरुषों का केवल अवस्थाही से बडापन है और गुण कुछ नहीं होंगे ॥ १३ ॥

तिस कारण से अनुराग दुःख क्रोध मान इच्छा भय दीनता मनचिन्ता इन सबों का कारण संसार बढानेवाला जो घर तिस को छोडकर सवप्रकार से निर्भय श्रीनृसिंहजी के चरण को भजो इस प्रकार स्तुति करते हैं ॥ १४ ॥

केतुमाल वर्ष में भी लक्ष्मी की प्रसन्नता के वास्ते और प्रजापती के पुत्र तथा पुत्री जोकि उसवर्ष के छत्तीसहजार संख्या वाले हैं श्रीनारायण के अस्त्र कालचक्र से मन में डर होने से जिन के गर्भ ध्वस्त होकर मरकर सम्बत्सर के पीछे गिरते हैं ऐसे जो रात्रि दिन तिन के वास्ते श्री भगवान् कामदेव रूप से विराजते हैं ॥ १५ ॥

अति सुन्दर जो चाल का क्रीडा तिस से जो मनोहर हास का लेश तिस के सहित जो देखना तिस की लीला से कुछ उठाया हुआ जो सुन्दर भ्रूमंडल तिस से सुन्दर जो वदनारविन्द तिस की शोभा से लक्ष्मी को प्रसन्नकरते हुये भगवान् अपनी इन्द्रियों कोभी तृप्त करते हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तद्भर्तृभिर्दिवसाभिमानिभिरुपेता ॥ १७ ॥

सर्वैर्गुणविशेषैः श्रेष्ठवस्तुभिर्विलक्षितो लक्ष्यीकृत आत्मा यस्य आकूतीनां क्रियाणाम् । चित्तीनां ज्ञानानाम् । चेतसां सङ्कल्पाध्यवसायादीनाम् । विशेषाणां तत्तद्विषयाणां षोडशकला अंशा एकादशेन्द्रियपञ्चविषयलक्षणा यस्य । छन्दोमयाय वेदोक्तकर्मप्राप्याय । अन्नमयायाओपष्टम्भत्वात् । अमृतमयाय परमानन्दाविष्कारत्वात् सर्वमयाय सर्वविषयत्वात् । सहसे ओजसे बलाय तद्धेतुत्वात् ॥ १८ ॥

त्वत्कामेनैव त्वत्सेवकत्वादहं कृतार्थोऽस्मि । अन्यकामतया तु त्वामर्चन्त्यो न परिपूर्णमनोरथाः स्युरित्याह । स्त्रिय इति । स्वत एव हृषीकाणामीश्वरं पतिं सन्तं त्वामाराध्य याः स्त्रियोऽन्यम्

या तस्य ते पादसरोरुहार्हणं निकामयेत्साखिलकामलम्पटा ।
तदेव रासीप्सितमीप्सितोऽर्चितो यद्भग्नयाच्ञा भगवन् ! प्रतप्यते ॥ २१ ॥
मत्प्राप्तयेऽजेशसुरासुरादयस्तप्यन्त उग्रं तप ऐन्द्रियेधियः ।
ऋते भवत्पादपरायणान्न मां विन्दन्त्यहं त्वद्धृदया यतोऽजित ! ॥ २२ ॥
स त्वं ममाप्यच्युत ! शीर्ष्णि वन्दितं कराम्बुजं यत्त्वदधायि सात्वताम् ।
बिभर्षि मां लक्ष्म वरेण्य ! मायया क ईश्वरस्येहितमूहितुं विभुरिति ॥ २३ ॥

रम्यके च भगवतः प्रियतमं मात्स्यमवताररूपं तद्वर्षपुरुषस्य मनोः प्राक्प्रदर्शितं स इदानीमपि महता भक्तियोगेनाराधयतीदं चोदाहरति ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पतिं प्रार्थयन्ते पतिकामानां हि कामाराधनं व्रतेषु प्रसिद्धम् तासामपत्यादीनि ते पतयो न पातुं शक्ताः ॥ १९ ॥

अतस्ते पतय एव न भवन्तीत्याह । सवा इति । स चैवम्भूतः पतिर्भवानेक एव नान्यो यो भवानात्मलाभात्परमन्यदधिकं न मन्यते । इतरथान्याधीनसुखस्य न स्वतन्त्रता । स्वतन्त्रनानात्वे च मण्डलेश्वराणामिव मिथो भयं स्यादित्यर्थः ॥ २० ॥

किञ्च । निष्कामभजनेऽप्रार्थिता एव सर्वे कामा भवन्ति सकामभजने तु कामितमात्रमनित्यं चेत्याह । या स्त्री तस्योत्कलक्षणस्य तव पादसरोरुहस्यार्हणां पूजामेव कामयेन्न फलान्तरं साखिलेषु कामेषु लम्पटा सर्वान्कामान्प्राप्नोतीत्यर्थः। ईप्सितमीप्सितः फलान्तरमाप्तुमपेक्षितः सन्नर्चितश्चेत्तर्हि तदेवैकं रासि ददासि । किञ्च । यद्यतः फलभोगानन्तरम्भग्ना याच्ञा याचितोऽर्थो यस्याः सा प्रतप्यते दुःखं प्राप्नोति तदेव रासि न तु नित्यम् ॥ २१ ॥

ननु ममार्हणे कुतः सर्वकामप्राप्तिस्त्वमेव कामार्थिभिः सेव्यसेऽत आह । मत्प्राप्तये ब्रह्मादयस्तपस्तप्यन्ते कुर्वन्ति । कथंभूताः । ऐन्द्रिये सुखे धीर्येषाम् अलुक्समासः तथापि भवत्पादपरायणादृते मां न विन्दन्ति मत्कटाक्षविलसिता विभूतीर्न लभन्त इत्यर्थः । यतस्त्वय्येव हृदयं यस्याः साऽहं त्वत्परतन्त्रत्वात्त्वदनुवर्तिनमेव विलोकयामि नान्यमित्यर्थः ॥ २२ ॥

इदानीं कृपा प्रार्थ्यते । स त्वमिति । यद्भजनं विना न कश्चित्पुरुषार्थः स त्वं त्वदिति त्वया यत्कराम्बुजं सात्वतां भक्तानां शीर्ष्ण्यधायि कृपया न्यस्तं तन्ममापि शीर्ष्णि निधेहीति शेषः । कथंभूतम् । वन्दितं सर्वकामवर्षित्वेन सद्भिः स्तुतम् न च मयि तत्रानादरः यतो हे वरेण्य ! मां वक्षसि लक्ष्म बिभर्षि । अहो चित्रमेतत् मयि केवलमादरमात्रं भक्तेषु तु परमा कृपाऽत ईश्वरस्य तव यन्मायया ईहितं तत्को वितर्कयितुं समर्थः ॥ २३—२४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इदं वक्ष्यमाणमन्त्रवाक्यं चोदाहरन्ति जपन्ति बहुवचनं सम्बन्धिद्धृदयतद्भिप्रायकं जप्यं मन्त्रमाह । ॐ भगवच्छब्दार्थः पूर्ववत् हृषीकाणामिन्द्रियाणामीशाय नियन्त्रे सर्वैः प्रकृतिपुरुषयोरसम्भावनीयैर्गुणविशेषैः सत्यज्ञानादिभिः गाम्भीर्यादिभिः "सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरस" इत्यादिश्रुतिप्रसिद्धैर्विचित्रमाश्रयत्वेन वक्तुं प्रतिपादयितुमिष्टमात्मस्वरूपं यस्य तस्मै कल्याणगुणाश्रयत्वेन वेदान्तैः प्रतिपाद्यमानायेत्यर्थः सर्वत्राधिकरणार्थोऽत्रानुसन्धेयः आकूतीनां क्रियाणां चित्तीनां ज्ञानानां चेतसां सङ्कल्पाध्यवसायादीनां कर्मेन्द्रियज्ञानेन्द्रियमनोव्यापाराणां विशेषः पृथिवी बहुवचनमाकाशाद्यभिप्रायकं पृथिवीप्रभृतिपञ्चमहाभूतानां चाधिपतये नियन्त्रे इदं चाधिपत्यं न सत्यपि पृथग्भावे भृत्यनिरूपितनियन्तृभावस्य राज्ञ इव अपि त्वात्मत्वप्रयुक्तमिति द्योतयितुं शरीरात्मभावनिबन्धनसामानाधिकरण्यमाह । षोडशकलायेति । षोडशकलाः पञ्चभूतानि मनः सहितान्येकादशेन्द्रियाणि एतत्स्वरूपाय तच्छरीरकत्वेनावस्थितायेत्यर्थः षोडशकला अंशा मूर्त्तयो यस्येति बहुव्रीहिर्वा पञ्चभूतान्येकादश इन्द्रियाणि च जगत्कारणत्वमाह । छन्दोमयाय छन्दःप्रचुराय "तस्य ह वा एतस्य महतो भूतस्य निश्वासितमेतद्यदृग्वेद" इति श्रुत्यर्थोऽत्र विवक्षितः एवं समष्टितत्त्वशरीरकत्वमभिधाय व्यष्टितत्त्वात्मकत्वमाह । अन्नमयाय अन्नमयशब्दोऽत्र व्यष्ट्यवस्थातत्त्वसंघातात्मकदेहपरः तद्रूपाय व्यष्टिशरीरकायेत्यर्थः एवं व्यष्टिसमष्ट्यात्मकतत्त्वान्तरात्मकत्वमभिधाय जीवान्तरात्मकत्वमपि सामानाधिकरण्येनाभिधत्ते । अमृतमयायेति । अमृतशब्दोऽत्र जीववाची परमात्मपर्यन्तः अमृतशरीरकायेत्यर्थः उक्तानुक्तकालाद्यन्तरात्मत्वाभिप्रायेणाह । सर्वमयायेति । सर्वात्मकायेत्यर्थः किं बहुना तत्तद्वस्तुगतशक्तिरूपत्वमेवेत्याह । सहसे मनःसामर्थ्यरूपाय ओजसे इन्द्रियशक्तिरूपाय बलाय देहशक्तिरूपाय सहआदेर्हेतुत्वाच्च तादात्म्यव्यपदेशः कान्ताय निरतिशयप्रीतिविषयाय कामाय स्वीयेषु निरतिशयप्रीतिविशिष्टाय ते तुभ्यमुभयत्र पुरस्तात्पृष्ठतश्च नमो नमनं भूयादस्त्वित्यर्थः ॥ १८ ॥

एवमिमं मन्त्रमुदाहरन्ती इति पत्नी लक्ष्मीः पतिशब्दप्रवृत्तिनिमित्तपौष्कल्यविशिष्टत्वमेवेत्याह । स्त्रिय इति । स्वतः हृषीकाणामिन्द्रियाणामधीश्वरमधिपतिं स्वतःशब्देनाधिपत्यस्य निरुपाधिकत्वं व्यज्यते एवंभूतं त्वां व्रतैराराध्य लोके संसारे स्त्रियः अन्यं पतिमाशासते कामयन्ते ते चाशास्यमानाः पतयः तासां कामयमानानां स्त्रीणां प्रियं प्रीतिविषयमात्मापत्यधनायूंषि च न परिपान्ति न रक्षन्ति पातुमसमर्थत्वादिति

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

भावः तत्कुतः यतस्ते पतयः अन्यतन्त्राः कर्मवश्याः तेषां पतित्वं हि कर्मायत्तं न हि कर्मपरवशाः कर्मनिर्हरणे समर्था इति भावः एवं निरुपाधिकरक्षकत्वस्यैव पतिशब्दप्रवृत्तिनिमित्तत्वात्ते ते पतय एव न भवन्तीत्यभिप्रायः १९॥

एवमन्यत्र पतिशब्दोऽमुख्यवृत्त इत्युक्तं भगवति तु मुख्यवृत्त इत्याह। स वा इति। सः मन्त्रोक्तगुणसम्पन्नः भवान्पतिर्वै वैशब्दोऽवधारणे भवानेव पतिरित्यर्थः तथा च श्रुतयः।

एष सर्वेश्वरः एष भूताधिपतिरेष भूतपालः।

पतिं विश्वस्यात्मेश्वरं न तस्य कश्चित्पतिरस्ति लोके।

इति सूत्रं चैतद्विषयकम्"अनन्याधिपतिः"इति कुतो मम निरुपाधिकपतित्वं तत्राह। अकुतोभयः नास्ति कुतोऽपि भयं यस्य सोऽकुतोभयः अकर्मवश्यत्वेन कर्मकृतपारतन्त्र्याभावान्निरुपाधिकरक्षकत्वं त्वय्येवेति भावः अत एव भयातुरं जनं समन्ततः पाति सर्वेभ्योऽपि भयेभ्यस्त्रायते स च निरुपाधिकपतिर्भवानेक एव इतरथा ईश्वरद्वित्वे मण्डलेश्वराणामिव मिथोऽन्योऽन्यं भयं स्यात् यतो भवानेक एव पतिरत एव भवानात्मलाभात्परमन्यदधिकं न मन्यते आत्मनो लाभः परमात्मशेषत्वज्ञानं तस्मिन्नेव हि सत्यात्मनः सत्ता इतरथासत्प्रायतैव तन्मात्रमेव चेतनसंरक्षणे भवानपेक्षते न तु ततोऽन्यदित्यर्थः ॥ २० ॥

तदेव प्रपञ्चयति। येति। अखिलेषु कामेषु पत्यपत्यधनायुरादिषु लम्पटा आसक्ता सती या स्त्री तस्योक्तविधस्य ते तव पादसरोरुहयोरर्हणमाराधनं न कामयेन्न कुर्यात्तस्यास्तदेवेप्सितं पत्यपत्यादिकं क्षुद्रं फलमर्चितस्त्वं रासि ददासि "रा दाने" इति धातुः कथंभूतः त्वमीप्सितः प्रीतिविषयः पुरुषार्थरूपः सर्वविधपुरुषार्थरूपं त्वामपुरुषार्थरूपं मत्वा त्वत्तोऽन्यं यत्किञ्चित्पुरुषार्थं त्वत्तः प्रार्थयते तस्यास्तदेव पुरुषार्थाभासं ददासि न तु स्वात्मानमित्यभिप्रायः यतस्त्वत्तोऽन्यदपुरुषार्थरूपमत एवभग्ना याञ्चा याचितार्थो यस्यास्तथाभूता सती हे भगवन्! कामदेव! प्रतप्यते दुःखिता भवति न तु लब्धात्माहमिति नितरां सुख्यतीत्यभिप्रायः ईप्सितार्चितमिति पाठान्तरं तदा इष्टत्वेन पूजिते प्रकृतमीप्सितमिति यावत् तुच्छपुरुषार्थरूपमपि निरतिशयपुरुषार्थरूपत्वेन मन्यमानं पत्यपत्याद्यन्यतमं सांसारिकमेव फलं रासीत्यभिप्रायः ॥ २१ ॥

ननु लक्ष्मीर्हि लोके पुरुषार्थत्वेन प्रसिद्धा नत्वहं तत् कथमेवमुच्यते तत्राह। मत्प्राप्तय इति। ऐन्द्रिये शब्दादौ धीर्येषां तथाभूताः कण्ठे कालवदलुक्समासः अजो ब्रह्मा ईशो रुद्रः सुरा इन्द्रादयः असुराश्च ये यद्यपि मत्प्राप्तये मां प्राप्तुं भवत्पादपरायणादृते भवत्पादारविन्दशरणवरणं विनान्यदुग्रं तपः तप्यन्ति पाकं पचतीतिवन्निर्देशः तपः कुर्वन्तीत्यर्थः तथापि मां न विन्दन्ति न प्राप्नुवन्ति कुतः हे अजित! यतोऽहं त्वद्हृदया तव हृदया हृत्प्रया प्राप्ता त्वद्धृताहं त्वदपृथक्सिद्धत्वेन मम त्वदन्तर्गतत्वेनैव पुरुषार्थरूपत्वं नतु पृथगित्यर्थः यद्वा। त्वन्निरतिशयपुरुषार्थरूपा त्वं हृदये हृतो यस्यास्तथाभूताहं त्वय्येव हृदयं यस्याः सेति निरतिशयपुरुषार्थरूपस्य तव नित्यं मद्धृतत्वेनाहमपि पुरुषार्थरूपा भवामि नतु स्वत इत्यर्थः अतो ये भवत्पादारविन्दपरायणास्तानेवाहमनुवर्तयामीत्यभिप्रायः ॥ २२ ॥

इदानीं तत्कृपां प्रार्थयते। स त्वमिति। यः पुरुषार्थरूपः स त्वं हे अच्युत! वन्दितं सर्वपुरुषार्थप्रदत्वेन स्तुतं तत्कराम्बुजं मम शिरसि निधेहि कथंभूतं यत्सात्वतामेकान्तिनां शीर्ष्णि अधायि कृपया निहितं मत्पूर्णकृपाविषया त्वमप्यपूर्वं किमिदं प्रार्थयसे तत्राह। हे वरेण्य! मायया मायामयरूपेण श्रीवत्सेन सह मां चिन्हं वक्षसि विभर्षि चिन्हरूपेण विभर्षीत्यर्थः श्रीवत्सस्य प्रधानात्मकत्वं"श्रीवत्सस्थानमपरमनन्तेन समाश्रितम्। प्रधानबुद्धिरप्यास्ते गदारूपेण माधवम्"इति भगवता पराशरेणोक्तं माययेति दृष्टान्तार्थः यथा श्रीवत्सं तथा लक्ष्म तथाहमपि लक्ष्म अतः सात्वतस्य शिरसि कृपास्त्येवेत्याभिप्रायः "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः। ज्ञानी त्वात्मैव मे मतम्" इत्युक्तभगवदभिप्रायमालोच्य शीर्ष्णि सात्वतां यदधायीत्युक्तम् अत्र कारणं न कोऽपि वेत्तुं प्रभुरित्याह। ईश्वरस्य तवेहितं चेष्टितमभिप्रेतं वा ऊहितुं कथयितुं को वा प्रभुः समर्थः न कोऽपीत्यर्थः ॥ २३ ॥

एवं केतुमाले उपास्योपासकादिकमुक्तमथ रम्यके तदाह। रम्यके चेति। प्राग्युगान्तसमये मनो रम्यकवर्षाधिपतेः प्रदर्शितं यन्मात्स्यं रूपं भगवतः प्रियतमं तदेव रूपं स एव मनुः रम्यके वर्षे इदानीमपि महताविच्छिन्नेन भक्तियोगेनाराधयन्नास्ते ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

मायामयमिच्छामयं रमा देवी भगवतो रूपमुपास्त इत्यस्येदं तात्पर्यमवगन्तव्यं रतिसन्निहिता रमा देवी कामान्तःस्थितं हरेः रूपमुपास्ते रतिस्तु विष्णोः प्रतिमास्थानीयं कामदेवम्

कामदेवस्थितं विष्णुमुपास्ते श्री रतिस्थिता

कामदेवं रतिश्चापि विष्णोस्तु प्राकृतां तनुम्

इति स्मृतेः अनेन मायामयमित्यस्य प्राकृतमित्यर्थः सूच्यते सम्वत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरहस्सु तासां भर्तृभिरुपेता ॥ १७ ॥

ये ये सर्वे विशेषा व्यावर्तकधर्मास्तांस्तान् विदन्तीति सर्वविशेषविदो ब्रह्मादयस्तेषां क्षेत्रमावासस्थानमात्मा देहो यस्य स तथा तस्मै आकूतीनामभिप्रायाणां पूर्वानुभवसंस्काराणां वा चित्तानां स्मरणाकारणानामन्तःकरणविशेषाणां चेतसां बुद्धिवृत्तीनां वृत्तिविशेषाणां चाधिपतये सर्वमयाय सर्वोत्तमाय उभयत्रान्तर्बहिश्च भूयाद्भवाया इति शेषः ॥ १८॥

लोके विद्यमानाः स्त्रियो नानाव्रतैरिन्द्रियस्वामिनं त्वामाराध्य त्वत्तोऽन्यं पतिमाशासते प्रविशन्ति प्राप्नुवन्तीत्यर्थः त्वमनेन व्रतलक्षणाराधनेन हेतुना तासामपत्यं प्रियं भर्तारमुपभोगसाधनं धनान्यायूंष्यहोरात्रगमागमलक्षणानि रक्षसि कुतस्ताः स्त्रियः पतित्वेन वृताः पुरुषाश्चास्वतन्त्रास्तत्पालने शक्तिहीना यतोऽतस्तत्पतित्वं व्यावहारिकमित्यर्थः ॥ १९ ॥

तर्हि मुख्यपतिः क इति तत्राह। स वा इति। यः स्वयमकुतोभयः सन् भयातुरं जनं समन्ततः पाति स वै स एव पतिः स्यात् नन्वेवं तर्हि बहवः किं न स्युरिति तत्राह। एक इति। भवानिति शेषः इतरथा बहूनां पतित्वे मिथोऽन्योऽन्यं भयं स्यान्मण्डलेश्वराणामिवेति शेषः अतस्त्वमेक एव पतिरित्यर्थः इतोऽपि त्वल्लाभ

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

एवं पुरुषार्थं इत्याह। भजन्निति। त्वां भजन्पुरुष आत्मलाभात् त्वल्लाभात्परमन्यमभ्यधिकं नैव मन्यते अभावादिति शेषः "एकमेवाद्वितीयम्" इतिश्रुतेः ॥ २० ॥

अतोऽप्यस्यैव पुरुषार्थप्राप्तिहेतुत्वादित्याह। य इति। निरुपमचरितपतिर्यस्तस्य ते तव यः पादसरोरुहयोरर्हणं पूजनं नितरां कामयेत्सोऽखिलकामलम्पटः अपेक्षिताशेषपुरुषार्थप्राप्तिपटुतरः हे ईप्सितप्रेष्ठ ! अतस्त्वदर्चितमेवाभीप्सितं नान्यदर्चनं विशिष्टफलहेतुत्वात् व्यतिरेकमुखेन निर्धारयति। यद्व्रतेति। अयं भावः यत्कामोऽन्यपादार्चनं करोति तस्मात्फलानुदयात् प्रतप्यत इति यद्यस्मात्तस्मादिति चशब्देन पूर्वमर्चितमिदानीमर्च्यते उत्तरत्रार्चिष्यत इति सूचयति ॥ २१ ॥

अन्यपादार्चकस्य सम्प्रयाज्ञात्वमत्र द्रष्टव्यमित्याह। मत्प्राप्तय इति। ये ऐन्द्रियेधियः इन्द्रियविषये धीर्येषां ते तथा शब्दादिविषयरागान्धीभूतबुद्धयः ससुरासुरादय उग्रं तपस्तप्यन्ते ते मां न विन्दन्ति मत्तोऽभीष्टफलं न विन्दन्तीत्यत्र कारणमाह। ऋत इति। भवत्पादपरायणमर्चनमृते त्वच्चरणार्चनाभावः कारणं हेत्वन्तरमाह। अहमिति। अजित ! अहं त्वद्धृदया यतस्तस्मादिति शेषः त्वयि हृदयं यस्याः सा तथा यस्त्वत्पादार्चकस्तस्य मत्प्रसादः यो न तस्य नास्तीति अयं भावोऽसंप्रज्ञातस्तथा मया ज्ञायत इति ॥ २२ ॥

स्वशिरसि नित्यधृतकराम्बुजत्वेऽपि भगवत्पूजकैरेवं प्रार्थनीयमित्याशयवत्याह। स त्वमिति। यत्कराम्बुजं सात्वतां स्त्रीणामिति शेषः शिरस्स्वधायि येन त्वया स त्वं मम मूर्द्धन्यपि तत्कुर्वित्यन्वयः। किञ्च सर्वस्मान्मयि तव प्रसादाधिक्यमस्तीति द्योतयति। बिभर्षीति। हे वरेण्य ! त्वद्वक्षसि मा मां लक्ष्म चिन्हं बिभर्षि यदतो माययेश्वरस्य ईहितमूहितुं को विभुर्न कोऽपि समर्थः ॥ २३ ॥

मनोर्वैवस्वतस्य ॥ २४ ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

मायामयं कृपाप्रचुरम् ॥ १७ ॥

षोडशशक्त्यधिष्ठात्रे वेदाधिष्ठात्रे पार्थिवबलदायकभोज्यशक्त्यधिष्ठाने दिविजबलदायकभोज्यशक्त्यधिष्ठात्रे किं बहुना सर्वशक्त्यधिष्ठात्रे अत एव सर्वसहआद्यधिष्ठात्र इति क्रमेण ॥ १८ ॥

आत्मनस्तस्य स्वरूपस्यैव लाभात्। परमन्यत् सेवादिकं नाधिकं मन्यते। यथाह श्रीप्रह्लादः। "यस्त आशिष आशास्ते न स भृत्यः स वै वणिक्" इत्यादौ "नान्यथेहावयोरर्थो राजसेवकयोरिव" इति ॥ १९ ॥ २० ॥

अखिलकामलम्पटेति सर्वकामस्यापि कामनीयार्थस्य प्रतिष्ठा हि त्वत्पादसरोरुहमिति ॥ २१ ॥

यद्यजादयोऽपि विषयधियो भूत्वा मत्प्राप्तये मदंशभूतप्राकृतसम्पत्तये तप्यन्ते तदा मां मदंशभूतां सम्पत्तिं न विन्दन्ति किन्तु प्राकृतीमेव विन्दन्तु नामेत्यर्थः। ऋत इति। यदि तेषु कोऽपि त्वत्पादपरायणो भवति तदा तु स विन्दत्येवेत्यर्थः। त्वद्धृदयेति गर्वप्राप्तेः ॥ २२ ॥

स त्वमिति। दैन्योक्तिः यत्त्वया यत् कराम्बुजं स्वीकारव्यञ्जकं सात्वतानां शीर्ष्णि अधायि तन्ममापि तादृशभक्तिहीनायाः शीर्ष्णि अधायीत्येकमाश्चर्यम्। किञ्च। स तादृशस्त्वं मायया कृपया मा मां वक्षसि लक्ष्मरूपत्वेन बिभर्षीति ततोऽपि परमाश्चर्यम्। तस्मात् क ईश्वरस्येति। मत्स्यत्वेनानुत्कृष्टदृष्टिं प्रत्याह। प्रियतममिति। तदपि भगवतः परमस्वरूपमेव जानीयादित्यर्थः। अथाप्यात्मना सन्निधीयत इति सामान्योक्तेराराधयतीत्यत्र सन्निहितं सन्तमिति ज्ञेयम् ॥ २३ ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

मायामयं कृपामयं मायाया जीवाविद्याया आमयो रोगो यतस्तमिति वा रात्रिषु प्रजापतेर्दुहितृभिः राज्यभिमानिनीभिर्देवताभिः सह अहःसु तासां राज्यभिमानिदेवतानां पतिभिर्दिवसाभिमानिभिर्देवैः सहितेत्यर्थः ॥ १७ ॥

कृपामयत्वमेव विवृण्वती मन्त्रं जपन्ती एतन्मन्त्रोपासकोऽन्योऽप्येवं स्वसम्बन्धेन मन्त्रार्थं भावयेदिति व्यञ्जयन्ती प्रणमति कान्ताय मत्पतये कामाय नम इत्यन्वयः। देवपदानुक्तिः पत्युः सम्पूर्णनामोच्चारणानौचित्यात्। अन्यस्तु लक्ष्म्या दासीभावेनैवात्मानं ध्यात्वा मन्त्रमिममुच्चारयेदिति सम्प्रदायः। हृषीकेशाय स्वसौन्दर्यादिना मन्नेत्रादीन्द्रियाकर्षकाय मन्नेत्रादीन्द्रियमाधुर्यसम्भोक्त्रे इति वा स्वस्य तथा योग्यतायां हेतुः। सर्वैर्गुणविशेषैरप्राकृतैर्गुणैर्विलक्षिता विलक्षणीकृता आत्मानो देहमनोबुद्ध्यादयो भवन्ति यतस्तस्मै हृषीकेशत्वं विवृणोति। आकूतीनां मम कर्मेन्द्रियाणां चित्तीनां ज्ञानेन्द्रियाणां चेतसां चित्ताहङ्कारबुद्धिमनसां विशेषाणां तत्तद्वृत्तीनां तत्तद्विषयाणां वा अधिपतये स्वामिने तत्तन्माधुर्यास्वादिने अन्योपासकपक्षे अधिष्ठात्रे तेषामप्राकृतीकरणात् स्वयमेवाधिष्ठाता न तु दिगादिदेवसमूह इति भावः षोडशकलाय राकाचन्द्रतुल्यत्वात् पूर्णाय छन्दोमयाय वेदरूपेण स्वभक्त्युपदेष्ट्रे अन्नमयाय अन्नरूपेण साधकभक्तप्रतिपालकाय अमृतमयाय अमृतवदास्वाद्यरूपगुणलीलादिकाय मोक्षरूपाय च सर्वमयाय मम सर्वस्वरूपाय सहसे ओजसे बलाय त्वत्सेवायां मच्चित्तेन्द्रियदेहसामर्थ्यप्रदाय उभयत्र इह लोके परलोके च ॥ १८ ॥

स्वयं निष्कामा सकामभक्तिमतीरन्याः स्त्रीः शोचति। स्त्रिय इति। स्वत एव हृषीकाणामीश्वरं पतिमपि त्वा त्वामाराध्य अन्यम् ॥ १९ ॥

पतिशब्दार्थमेव ता न जानन्तीत्याह। स वा इति। पातीति पतिर्यश्चात्मानमपि पातुं न शक्नोति स कथमन्यान् पातीत्यर्थः अतः प्रथममकुतोभयः स्यात् स च एको भवानेव इतरथा प्रकारान्तरेण पतिशब्दव्याख्यानामित्यर्थः। यद्वा। सप्तम्यर्थ एव थाल्प्रत्ययः इतरत्र मण्डलेश्वराणामिव स्वप्रजापालकानामपि मिथो भयं ततश्च प्रजानामपि भयमिति तदपालनमेव वस्तुत इत्यर्थः अत एवात्मनः परमात्मनस्तव लाभात् अधि अधिकं परं वस्तु न मन्यते शास्त्रज्ञैरिति शेषः। त्वत्प्राप्तेः सकाशात् अन्यप्राप्तिर्नैवाधिकेति त्वमेव वस्तुतः पतिशब्दवाच्य इत्यर्थः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

किञ्च निष्कामभजने अप्रार्थिता एव सर्वे कामा भवन्ति सकामभजने तु कामितमात्रमनित्यञ्चेत्याह । या स्त्री तस्य उक्तलक्षणस्य तव पादपद्मपूजामेव नितरां कामयेत् न तु फलान्तरं साखिलेषु कामेषु लम्पटा सर्वानेव कामान् प्राप्नोतीति अथ च निष्कामपदवाच्या भवेत् । यया तु ईप्सितं प्रति ईप्सितः फलान्तरं प्राप्तुमपेक्षितः सन् अर्चितो भवसि । तस्यै तदेवैकं राँसि ददासि यद्यतः फलभोगानन्तरं भग्ना याच्ञा याचितोऽर्थो यस्याः सा प्रतप्यते दुःखं प्राप्नोतीत्यतः सैव निष्कामापि सकामपदवाच्या भवेदित्यतो भगवन्तं कामयमाना भक्ता नैव सकामशब्देन वाचनीया इति सिद्धान्तो व्यञ्जितः अत्र ईप्सितान्तरकामायाः परितापः स्वस्वभावः प्रातिकूल्यदृष्टयैव लक्ष्म्या तामधिक्षिपन्त्यैवोक्तः । वस्तुतस्तु सकामभजनादपि कृतार्थत्वमुपरिष्टाद्वक्ष्यते ॥ २१ ॥

केचित् सकामास्तु त्वामप्यपहाय मामेव भजन्ते तेऽपि धूलिमेव लभन्त इति तान् निन्दन्त्याह । मत्प्राप्तये ब्रह्मादयस्तपस्तप्यन्ते कुर्वन्ति । ऐन्द्रिये विषयसुखे एव धीर्येषाम् अलुक्समासः तदपि भवत्परायणात् ऋते विना मां मत्कटाक्षविलासितां सम्पत्तिरूपां लक्ष्मीं न लभन्ते भवत्परायणाः प्रह्लादध्रुवादय एव विन्दन्ति या तु त्वद्भक्तेष्वपि देवासुरादिषु सम्पदृश्यते सा तु गुणमयी प्रतिस्वकर्मफलरूपा मायाशक्तेर्दुर्गाया एव प्रसादाद्वा कामादितरङ्गजनिका कादाचित्की न तु त्वत्स्वरूपभूताया ममेति मम मायात्वाभावात् मत्प्रसादोत्थायाः सम्पत्तेरपि त्वद्भैमुख्यापादकत्वाभावात्तत्र हेतुः । त्वद्धृदया त्वन्मनस्का त्वन्मनस्कानेवावलोकयामि नान्यमित्यर्थः ॥ २२ ॥

तदेवं ब्रह्मादीनामाराध्यापि तव भार्याप्यहं निष्किञ्चनो भक्तो यथा त्वत्तः सौभाग्यं लभते तथा नाहं लभे एवं मे ललाटमित्याह स मद्धृदयनित्यविहारोऽपि त्वं ममापि शीर्ष्णि कराम्बुजं धेहीति शेषः । त्वत् त्वया यत् सात्वतां शीर्ष्णि अधायि । वन्दितं कृपासौभाग्यवर्षित्वेन सद्भिः स्तुतम् । ननु त्वत्सौभाग्यं सर्वतोऽप्यधिकं यतस्त्वामहं हृदये एव नित्यं दधामीति तत्र सत्रपं साश्रुमुखाच्छादनं सहुङ्कारं नीचैराह । बिभर्षीति । हे वरेण्य ! मा मां लक्ष्म कनकरेखाचिन्हतया यद्वक्षसि दधासि तन्माययैव मद्भक्तसौभाग्यं दृष्ट्वा निर्बुद्धिरेषा मय्यसूयां माकार्षीदिति कपटेनैव । ननु कोऽप्येवं न ब्रूते तत्राह । कः खल्वीश्वरस्य तव ईहितमूहितुं वितर्कितुं क्षमः यतः "न च सङ्कर्षणो न श्रीर्नैवात्मा च यथा भवान्" इति तव भक्तं प्रति निभृतोक्तिमहमश्रौषमेवेति ध्वनिः । प्रागिति चाक्षुषमन्वन्तरान्ते प्रलये स वैवस्वतो मनुः ॥ २३ ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

माया वयुनं सङ्कल्पस्तन्मयं स्वसङ्कल्पेनाविष्कृतमित्यर्थः "माया च वयुनं ज्ञानम्,, इति कोशात् उदाहरन्तीति बहुवचनं प्रजापतिपुत्र्याद्यभिप्रायेण ॥ १७ ॥

सर्वैर्गुणविशेषैः "एष सर्वेश्वरः" इत्यादिश्रुतिप्रोक्तैस्तदसाधारणैः सर्वेश्वरत्वादिभिर्विवक्षितः वर्णयितुमिष्ट आत्मा यस्य तस्मै आकूतीनां ज्ञानेन्द्रियव्यापाराणां चेतसामन्तःकरणव्यापाराणां विशेषाणां तत्तद्विषयाणां चाधिपतये षोडशकलाय सूक्ष्मशरीरात्मने छन्दोमयाय वेदात्मने अन्नमयाय स्थूलशरीरात्मने अमृतमयाय नित्यपदार्थात्मने सहसे मनःसामर्थ्यात्मने ओजसे इन्द्रियसामर्थ्यात्मने बलाय देहसामर्थ्यात्मने किं बहुना सर्वमयाय सर्वात्मने "ऐतदात्म्यमिदं सर्वम्" इतिश्रुतेः कान्ताय प्रियाय काऽयते इति कामः ईप्सिताय भगवते अन्तर्बहिश्च नमः ॥ १८ ॥

स्वत एव हृषीकाणामीश्वरं पतिं सन्तं त्वामाराध्य अन्यं पतिमाशासते कामयन्ते याः स्त्रियः तासां ते अपत्यादिकं न परिपान्ति रक्षन्ति अतस्ते पतयो नेति फलितोऽर्थः ॥ १९ ॥

कस्तर्हि पतिरत आह । स इति । यः आत्मलाभात्परमन्यदधिकं नैव मन्यते स पतिः स्यात् स च भवानेक एव "एष सर्वेश्वरः एषः भूताधिपतिः प्रधानक्षेत्रज्ञपतिः" इत्यादिश्रुतेः इतरथा अनेकेश्वराङ्गीकारे मिथो भयं स्यादित्यन्वयः ॥ २० ॥

या ते पादसरोरुहयोः अर्हणमर्चनमेव निकामयेत् नान्यत् साऽखिलकामानां लम्पटा वशीकरणे कुशला ईप्सितमीप्सितः पत्यपत्यादिकं प्राप्तुमपेक्षितः सन् अर्चितश्चेत्तदा तदेव राँसि ददासि यद्यतः भग्ना याच्ञा याचितोऽर्थो यस्याः सा प्रतप्यते ॥ २१ ॥

ऐन्द्रिये मत्प्रसादलब्धविभूतिसुखे धीर्येषां ते कण्ठे काल इति वदलुक्समासः भवत्पादः परायणं यस्य तस्माहते मां न विन्दन्ति विभूत्यर्थं मामनुकूलयितुं न शक्नुवन्ति भवत्पादपरायणास्तु मां विन्दति मम पुत्रत्वात् यतोऽहं त्वद्धृदया त्वं हृदये यस्याः सा तथा अत्र गूढोऽभिप्रायः भवदीयाः भवत्पादध्यानामृततृप्ताः ध्यानविच्छेदकरीं मद्दत्तां विभूतिं न वाञ्छन्ति किन्तु मम हृदयस्थं त्वां लब्धुं परां मातरं मद्दतादरेण मां भजन्ति अहं च तान् पुत्रवत्सला कदाचिदपि न त्यजामि एवं ते मां विन्दन्तीति ॥ २२ ॥

हे वरेण्य ! स उक्तप्रकारस्त्वं मां लक्ष्म वक्षसि बिभर्षि कृतार्था यद्यप्यहमिति भावः तथाप्यनुग्रहविशेषं [illegible]मित्याह । त्वत् इति पञ्चमी तृतीयार्थे त्वया यत्कराम्बुजं सात्वतां भक्तानां शीर्ष्णि मायया कृपया अधायि न्यस्तम् तन्ममापि शीर्ष्णि हे अच्युत ! कृपया निधेहि अत्र हेतुं दर्शयितुं कराम्बुजं विशिनष्टि वन्दितं परानन्ददत्वेन सद्भिः स्तुतम् अथ किं वर्ण्यते तवेहितस्य दुष्पारत्वादित्याह । ईश्वरस्य तवेहितं चेष्टितमूहितुमेतावदिति वितर्कयितुं कः विभुः समर्थः न कोऽपीत्यर्थः ॥२३-२४॥

भाषा टीका ।

भगवान् के उस माया मयस्वरूप को लक्ष्मी देवी सम्वत्सर प्रजापती के पुत्रिरात्रियों में दिनों में उन दोनों के देवतों के सहित सेवा करती हैं और यह मन्त्र बोलती हैं ॥ १७ ॥

भगवान् हृषीकेश सब गुण विशेषों से युक्त स्वरूपवाले वागादिकर्मेन्द्रियों के चक्षु आदि ज्ञानेंद्रियों के अन्तःकरणों के पृथिव्यादि द्रव्यों के पति षोडशकला वाले वेद स्वरूप मनुष्यों

ओं नमो भगवते मुख्यतमाय नमः सत्वाय प्राणायौजसे सहसे बलाय महामत्स्याय नम इति ॥ २५ ॥

अन्तर्बहिश्चाखिललोकपालैरदृष्टरूपो विचरस्युरुस्वनः ।
स ईश्वरस्त्वं य इदं वशेऽनयन्नाम्ना यथा दारुमयीं नरः स्त्रियम् ॥ २६ ॥
यं लोकपालाः किल मत्सरज्वरा हित्वा यतन्तोऽपि पृथक्समेत्य च ।
पातुं न शेकुर्द्विपदश्चतुष्पदः सरीसृपं स्थाणु यदत्र दृश्यते ॥ २७ ॥
भवान्युगान्तार्णव ऊर्मिमालिनि क्षोणीमिमामोषधिवीरुधां निधिम् ।
मया सहोरुक्रमतेऽज ओजसा तस्मै जगत्प्राणगणात्मने नम इति ॥ २८ ॥

हिरण्मयेऽपि भगवान्निवसति कूर्मतनुं बिभ्राणस्तस्य तत्प्रियतमां तनुमर्यमा सह वर्षपुरुषैः पितृगणाधिपतिरुपधावति मन्त्रमिमं चानुजपति ॥ २९ ॥

ओं नमो भगवते अकूपाराय सर्वसत्त्वगुणविशेषणायानुपलक्षितस्थानाय नमो वर्ष्मणे नमो भूम्ने नमोनमोऽवस्थानाय नमस्ते ॥ ३० ॥

यद्रूपमेतन्निजमाययार्पितमर्थस्वरूपं बहुरूपरूपितम् ।
संख्या न यस्यास्त्ययथोपलम्भनात्तस्मै नमस्ते व्यपदेशरूपिणे ॥ ३१ ॥
जरायुजं स्वेदजमण्डजोद्भिदं चराचरं देवर्षिपितृभूतमैन्द्रियम् ।
द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेय एकः ॥ ३२ ॥

भाषाटीका ।

का भोज्य अन्न देवों का भोज्य अमृत तद्रूप सर्व स्वरूप अन्तःकरण इन्द्रिय देहसामर्थ्यरूप सब के पति आप के अर्थ इस लोक तथा परलोक में नमस्कार होवे ॥ १८ ॥

जगत में सब स्त्रियां व्रतों से स्वयं हृषीकेश आपकी आराधन करके अन्यपति को चाहती हैं वे अन्यपति उन स्त्रियों के प्रिय पुत्र धन आयु इन को नहीं रक्षा कर सके हैं जिस से कि वे स्वतन्त्र नहीं हैं ॥ १९ ॥

जो सर्वथा निर्भय है वही पति सब प्रकार से प्रजाओं के भय से रक्षा कर सका है सो आपही हो जोकि आत्मलाभ से अन्य को अधिक नहीं मानते हो अन्यको तो आत्मलाभ न होने से सुख नहीं है ॥ २० ॥

जो स्त्री सब कामों की इच्छावाली होकर भी आपके चरण कमल मात्रको चाहती है उसको आप सब देते हो जो अन्य पदार्थों को चाहती है उसको वही चीज देते हो जिसके नाश होने पर फिर दुःख पाती है ॥ २१ ॥

हे अजित ! इन्द्रिय के विषयों में जिनकी बुद्धि है ऐसे ब्रह्मा महादेव देवादिक सब यद्यपि मेरे प्राप्ति होने के वास्ते उग्र तपस्या करते हैं तो भी आपके चरणारविन्द के आश्रय के विना मेरे को नहीं प्राप्त होते हैं क्यों कि मैं तो आप मे मन लगाने वाली हूं ॥ २२ ॥

हे अच्युत ! सब लोगों के प्रशंसा करने योग्य जो आप का हस्त कमल जिसको कि आपने सात्वतयादवों के या भक्तों के मस्तक पर रक्खा है तिसहस्तको मेरे मस्तक पर रक्खो हे वरेण्य ! आप मेरा चिन्ह मात्र बनाकर वक्षस्थल में धारण करते हो आपकी चेष्टाको जानने को कौन समर्थ होसका है ॥ २३ ॥

रम्यक वर्ष में भी भगवान् की अति प्रिय मूर्ति जो कि उस वर्ष के पति मनु को पहिले दिखाई थी वही मनु इस समय पर भी बड़े भक्ति योग से आराधन करते हैं और इस मन्त्र को पढते हैं ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सत्वाय सत्त्वप्रधानाय । मुख्यतमाय प्राणाय सूत्रात्मने ॥२५॥

उरुः स्वनो वेदात्मको नादो यस्य । य इदं विश्वं ब्राह्मणादिनाम्ना विधिनिषेधालम्बनभूतेन वशेऽनयन्नियमितवान्स त्वमीश्वरः । तथाच श्रुतिः "तस्य वाक्तन्तिर्नामानि दामानि„इति ॥२६॥

ननिन्द्रादयो वशं नयन्ति लोकपालत्वात्कुतोऽयं तत्राह । यमिति । मत्सर एव ज्वरो येषां ते । यं हित्वा द्विपदश्चतुष्पदः सरीसृपं जङ्गमं स्थाणु स्थावरं च यदत्र दृश्यते तत्किञ्चिदपि पातुं न शक्ताः स त्वमेव प्राणरूपेण पालक ईश्वरश्चेत्यर्थः । तथाच श्रुतिः । "ता अहिंसन्ताहमुक्थमस्म्यहमुक्थमस्मि" इत्यादि ॥ २७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अवतारचरितमाह । भवानिमां क्षोणीं मया मनुना सह मत्स्यहितां धृत्वेत्यध्याहारः ऊर्मिमालावति प्रलयार्णवे ओजसा क्रमते विचरति । यद्वा । पातुमित्यस्यानुषङ्गः क्षोणीं पातुं क्रमते उत्सहत इत्यर्थः । यतोऽजः कीदृशीम् । ओषधीनां वीरुधां च निधिमाश्रयभूताम् । तस्मै नमः जगतो यः प्राणगणस्तस्यात्मने नियन्त्रे ॥ २८ ॥

तत्प्रियतमां तां प्रियतमाम् ॥ २९ ॥

अकूपाराय कूर्माय । सर्वैः सम्पूर्णैः सत्त्वगुणो विशेषणं यस्य न उपलक्षितं स्थानं यस्य वारिचरत्वात् । वर्ष्मणे वर्षीयसे कालानवच्छिन्नाय भूम्ने सर्वगताय अवस्थानायाधाराय ॥ ३० ॥

निजमाययार्पितं प्रकाशितमेतद्दर्थस्वरूपं दृश्यं पृथिव्यादि यस्यैव रूपं यतः पृथङ्नास्ति । कथम्भूतम् । बहुभीरूपै रूपितं निरूपितम् । यस्य च सङ्ख्या नास्ति । कुतः । अयथा मिथ्यैवोपलम्भनात् । न हि मरीचिजलमेतावदिति सङ्ख्यातुं शक्यते अव्यपदेशरूपिणे निरुक्तप्रपञ्चाकाराय ॥ ३१ ॥

बहुरूपत्वं दर्शयंस्तस्येश्वराद्व्यतिरेकमाह । जरायुजमिति । द्वीपग्रहर्क्षमित्यभिधेयस्त्वमेवैको न त्वद्व्यतिरिक्तोऽस्ति । "सर्वं खल्विदं ब्रह्म" इत्यादिश्रुतेरित्यर्थः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मन्त्रमाह । ओमिति । सत्त्वाय शुद्धसत्त्वमूर्तये मुखे भवः मुख्यः तस्मै प्रथमावतारायेत्यर्थः प्राणाय जीवयित्रे प्राणव्यष्टयन्तरात्मने वा ओजसे इन्द्रियशक्त्यधिष्ठात्रे बलाय शरीरशक्त्यधिष्ठात्रे तत्तदवतारासाधारणगुणाः सर्वत्रोपासनार्थे मन्त्रेषूक्ता एवम्भूताय महते इष्टविसजातीयमत्स्याय नमः ॥ २५ ॥

कृत्स्नचिदचिदात्मकजगन्नियन्तृत्वरक्षकत्वविशिष्टं स्तुवन्ति । अन्तर्बहिरिति । लोकपालैरन्तर्बहिरदृष्टं रूपं यस्य उर्वधिकं स्वनो वेदात्मको नादो यस्य तथाभूतस्त्वमीश्वर एव कोऽसावीश्वर इत्यत्राह । य इदं विश्वं चिदचिदात्मकं कृत्स्नं जगद्विधिनिषेधावलम्बनभूतेन ब्राह्मणादिनाम्ना वशेऽनयन्नीतवान् नयनं चात्र नियमनपूर्वकं रक्षणं यथा दारुमयीं दारुणो विकाररूपां स्त्रियं स्त्रीप्रतिकृतिं नरः स्ववशीकृत्य नाटयति तथेति अनेन कृत्स्नजगन्नियन्तृत्वकथनेन कारणत्वमप्युक्तं कारणत्वनेतृत्वयोरेकगतत्वात् "एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायण,, इतिश्रवणात् सर्वभूतान्तरात्मेत्यनेन नेतृत्वमेक इत्यनेन कारणत्वञ्चोक्तम् "एको ह वै नारायण आसीत्" इत्यनेन सम्वादादित्यर्थः ॥ २६ ॥

इदञ्च जगन्नियन्तृत्वादिकमनितरसाधारणमित्याह । यमिति । मत्सरज्वरं मत्सरः परैश्वर्यासहिष्णुत्वं स एव ज्वरस्तं हित्वापि पृथक् समेत्य संघीभूयापि वा यतन्तोऽपि लोकपाला इन्द्रादयो यं प्रपञ्चं पातुं रक्षितुं न शेकुः न प्राभवन् प्रपञ्चं विशिनष्टि । यत्द्विपदादिरूपं चरिष्णु स्थास्नु पर्वतादिरूपस्थावरजातं च अत्र प्रपञ्चे दृश्यते सर्वं तु रक्षितवानित्यर्थः ॥ २७ ॥

भवानिति । ऊर्मिमालिनि उच्चतरतरङ्गपङ्क्तियुक्ते युगान्तार्णवे कस्मिंश्चिद्दैनंदिनप्रलयार्णवे ओषधीनां वीरुधां गुल्मानां च निधिमाश्रयभूतामिमां क्षोणीं भूमिं मया मनुना सह धृत्वेति शेषः यो भवानोजसा उर्वधिकं विक्रमते विचरति । यद्वा । पातुमित्यस्यानुषङ्गः क्षोणीं पातुं क्रमते उत्सहत इत्यर्थः यतोऽजस्त्वम् । यद्वा । हे उरुक्रम ! तेजओजसा तेजोरूपेण सङ्कल्परूपज्ञानात्मकेन ओजसा बलेन नतु साधनान्तरेणेमां क्षोणीं रक्षितवानित्यध्याहारः उवाह धृतवानित्यर्थः तस्मै जगत्प्राणगणात्मने तुभ्यं नमः जगत्प्राणगणाः प्रतिशरीरं प्राणव्यष्टिगणाः तदन्तरात्मन इत्यर्थः जगत्प्राणगुणात्मन इति पाठे तु जगत्प्राणरूपगुणस्वभावायेत्यर्थः ॥ २८ ॥

अथ हिरण्मयवर्षे उपास्योपासनादीनाह । हिरण्मय इति । भगवान् कूर्मरूपं बिभ्राणो हिरण्मये वर्षे निवसति तस्य भगवतस्तां प्रियतमां कूर्मतनुं पितृगणानामधिपतिरर्यमा तद्वर्षस्थैः पुरुषैः सहोपधावति अनुवर्तते उपास्ते इत्यर्थः शेषं पूर्ववत् ॥ २९ ॥

अकूपाराय कूर्मरूपाय कुत्सिताः स्वल्पा आपो यस्मिंस्तत्कूपं स्वाश्रयतया तद्व्यात्यादधाति स्वीकरोतीति कूपारः स न भवतीत्यकूपारः सर्वे सत्त्वा जन्तवः गुणास्तद्गता हेयाः कल्याणाश्च ज्ञानशक्तिबलैश्वर्यादयः ते विशेषणानि सद्वारकाण्यद्वारकाणि च प्रकारभूतानि यस्य तस्मै तत्र सर्वसत्त्वानां कल्याणगुणानां च साक्षाद्विशेषणत्वं सत्त्वगतगुणानां सत्त्वद्वारा विशेषणत्वमिति विवेकः अनुपलक्षितस्थानायान्तःसमुद्रे मन्दरमूले स्थितायेत्यर्थः अवर्ष्मणे प्राकृतदेहरहिताय वर्ष्मणे इत्यप्राकृतदिव्यदेहाय वर्ष्मशब्दो देहिपर्यन्तवृत्तिः वर्ष्मणे श्रेष्ठायेति वा गरीयसे वा गरीयस्त्वं च कालानवच्छिन्नत्वं भूम्ने महिमवतेऽवस्थानायाधारभूताय अधिकरणे ल्युट् गुणभेदाभिप्रायाय नमः पदावृत्तिः ॥ ३० ॥

विश्वरूपत्वानन्तत्वादिगुणविशिष्टं स्तौति । यद्रूपमिति । एतत् जगत् यस्य रूपं शरीरं तस्मै व्यवसायरूपिणे नम इत्यन्वयः व्यवसायरूपिणे सम्यग्ज्ञानप्रवर्तकायेत्यर्थः । यद्वा । व्यवसायोऽत्र नित्यासंकुचितापरिच्छिन्नं ज्ञानं तदेव रूपमाकारस्तदस्यास्तीति तथा तस्मै नमस्ते व्यपदेशरूपिणे इति पाठान्तरं तत्र व्यपदेशरूपिणे व्यपदिश्यते इति व्यपदेशः वाग्व्यवहारार्हः देवमनुष्यादिनामरूपात्मकः प्रपञ्चः स जगदेव रूपं तदस्यास्तीति तथा न च यद्रूपमित्यनेन पौनरुक्त्यं व्यपदेश्यरूपिणे इत्यस्यैवोपपादकत्वात् श्लोकशेषस्य अव्यपदेशरूपिणे इति वा छेदः अव्यपदेशं चेतनसजातीयत्वेन व्यपदेष्टुमशक्यं रूपं तदस्यास्तीति तथा तस्मै एतच्छब्दनिर्दिष्टं जगद्विशिनष्टि । निजमाययार्पितं प्रकृत्या निर्वर्तितम् अर्थरूपं भोग्यत्वेन प्रतीयमानं बहुरूपरूपितं जातिगुणादिनिरूप्यं एवंविधं जगत् यस्य रूपं यस्य च संख्यापरिच्छेदो नास्ति कुतः अयथोपलम्भनात् यथावत् साकल्येन उपलम्भाभावात् यस्येत्यनेन जगद्वा परामृश्यते यस्य जगतः संख्या प्रकाशो नास्ति कुतः अयथोपलम्भनाद्ब्रह्मात्मकत्वेनोपलम्भात् यद्यपि जगत्प्रतीयते एव तथाप्यविदुषामब्रह्मात्मकत्वेन तत्प्रतीत्यभिप्रायेण संख्या न यस्यास्तीत्युक्तम् । यद्वा । यस्य जगतः अयथोपलम्भनात्संख्यापरिच्छेदो नास्ति अयथोपलम्भनात्साकल्येन उपलम्भनाभावात् "कोटिशो ह्यण्डराशय" इति जगतोऽप्यानन्त्यादिति भावः । यद्वास्य जगतः अयथोपलम्भनादयथार्थत्वेनोपलम्भनान्मायार्पितत्वार्थस्वरूपत्वबहुरूपरूपितत्वभगवच्छरीरत्वादिव्यतिरेकेणोपलम्भनात् संख्याप्रकाशो नास्ति जगत उक्ताकारविपरीताकारोपलम्भो भ्रमरूप इत्यर्थः ॥ ३१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं विश्वरूपत्वमनन्तत्वञ्चोक्तं यतो विश्वरूपस्त्वमत एव द्यौः खमादिशब्दैः भवानेवाभिधीयत इत्याह । जरायुजामिति । हे देव ! चराचरभेदेन द्विविधं पुनर्जरायुजादिभेदेन चतुर्विधमेतज्जगत् तव विभूतिभेदं विभूतिविशेषरूपमित्यर्थः अत एव द्यौः खमित्यादेत्रमभिधेयस्त्वमेक एव द्यौरादिशब्दैरभिधीयमानस्त्वमेवेत्यर्थः "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि तत्सृष्ट्वा तदेवानुप्राविशत्तदनुप्रविश्य सच्च त्यच्चाभवत्" इति श्रुत्युक्तविधया नामरूपतद्बुद्धीनां परमात्मपर्यन्तत्वसिद्धेः द्यौरादीनां परमात्मशरीरत्वाच्छरीरवाचिनां शब्दानां शरीरिपर्यन्ताभिधानस्य गवादिशुक्लादिजातिगुणादिशब्दानां व्यक्तिगुण्यादिपर्यन्ताभिधानवदाकृत्यधिकरणन्यायसिद्धत्वाच्च द्यौः खमित्येवं रूपेण त्वमेव वाच्यो बोध्यश्चेत्यभिप्रायः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उरुगुरुः यो नः परमपुरुषः इदं जगद्वशे अनयन्नीतवान् स त्वमीश्वरः साक्षान्नारायणः आत्मा स्वामी । यद्वा । य आत्मा आदानसमर्थः इदं जगद्वशे नयन् वर्तते स त्वमीश्वर ऐश्वर्यादिगुणसमुद्र इति ॥ २६ ॥

लोकपालादिविश्वस्येश्वरवशत्वे तददृष्टरूपत्वं कथमस्येत्याशङ्क्य स्पर्द्धाहेतोरिति भावेनाह । यमिति । चशब्दो विकल्पार्थे यं त्वां हित्वा लोकपालाः पृथग्वा समेत्य वा यतन्तोऽपि द्विपदश्चतुष्पद इत्यादि यत्सरीसृपस्थास्नुचराचरमत्र दृश्यते श्रुतिदृष्टिविषयं तत्पातुं न शेकुरित्यन्वयः अशक्तत्वे निमित्तमाह । मत्सरेति । मात्सर्याख्यज्वरग्रस्तत्वादित्यर्थः "वार्तासम्भाव्ययोः किल" इति वचनादिदं स्पर्द्धालक्षणं मात्सर्यं सम्भावनामात्रं न तु मुख्यमाज्ञानिमित्तं दैत्यावेशनिमित्तं वेति गमयितव्यं तदुक्तम् ।

स्पर्द्धन्त इव देवास्तु हरिणा यत्र कुत्रचित् ।
हरेरेवाज्ञया क्वापि दैत्यावेशात्क्वापि वा ॥

इति अनेन स्पर्द्धाया अन्यनिमित्तत्वेन पालनाशक्तिः स्वरूपकृतेति ज्ञातव्या ॥ २७ ॥

यद्यप्यस्तु मूलरूपस्य हरेर्जगत्पालनशक्तिः स्वरूपभूता तथाप्यवताराणां सा न समास्तीत्याशङ्क्य द्वयोरपि कोऽपि माहात्म्यविशेषो नास्तीति भावेनाह । भवानिति । भवान् युगान्तार्णव इमां क्षोणीमूढे उवाहेत्यन्वयः तस्मै जगत्प्राणगुणात्मने जगच्चेष्टकगुणस्वरूपाय मत्स्याय हरये नम इत्यन्वयः ॥ २८ ॥ २९ ॥

न कूपे आरो गमनं यस्य स तथा तस्मै महासमुद्रनिवासायेत्यर्थः सर्वसत्त्वगुणाः पराक्रमगुणा एव विशेषणं यस्य स तथा तस्मै सर्वसत्त्वगुणा ज्ञानानन्दादिगुणा इति वा नोपलक्षितस्थानाय अज्ञातस्वरूपाय वर्ष्मणे भक्ताभीष्टवर्षणशीलाय प्रमाणाय सम्यग्वक्त्रे वा "प्रमाणं बोधनेयत्ता मर्यादा शास्त्रहेतुषु सम्यग्वक्तरि चाथ स्यात्प्रयाणमरणे गतौ" इति यादवः "वर्ष्म देहप्रमाणयोः" इति च अनेन दिव्यतिर्यग्योनेरपि सम्यग्वक्तृत्वमाहात्म्यं सूचितम् भूयसे महते "महतो महीयान्" इति श्रुतिः अवस्थानाय जगत्स्थितिहेतवे ॥ ३० ॥

मन्त्रसूचितगुणविशिष्टत्वेन श्रीहरिं स्तौति । यद्रूपमिति । यद्रूपमेतद्विश्वं निजमायया तव स्वरूपेच्छयार्पितं मदाधारतया तिष्ठत्विति माययेत्युक्त्यानिर्वाच्याविद्याकल्पितं किं न स्यादित्यतोऽर्थेति अबाधितरूपं जरायुजादिबहुरूपेण रूपितं शब्दितं यस्येयत्तेति सङ्ख्या च नास्ति "परमाणुप्रदेशेऽपि ह्यनन्ताः प्राणिराशय" इति वचनात् यच्चोपलम्भनादयथा अद्य यथा दृश्यते श्वस्तथा न तिष्ठति विकारित्वात् उर्वारुकफलादेरन्यथा दर्शनान्न च तावता वैतथ्यं "विश्वं सत्यम्" इत्यादिश्रुतेः अतः प्रवाहरूपेण नित्यमित्येष्टव्यमित्यर्थः रूपं सन्निधानयोग्यप्रतिमास्थानीयमित्यर्थः तस्मै तुभ्यं नम इत्यन्वयः न व्यपदेशो यस्य तदव्यपदेशं तादृशं रूपमस्यास्तीति अव्यपदेशरूपी तस्मै वाङ्मनसागोचररूपत्वादित्यर्थः अनेन सर्वसत्त्वविशेषणाय नोपलक्षितस्थानायेति पदद्वयं विवृतम् ॥ ३१ ॥

सन् घटः सन् पटः इति सदनुविद्धत्वेन प्रतीयमानत्वात् "सर्वं खल्विदं ब्रह्म" इति श्रुतेश्च विश्वस्य ब्रह्मात्मकत्वं मुख्यं किं न स्यादित्याशङ्क्य तत्सृष्ट्वा तदेवानुप्राविशदित्यादेः ।

सर्वान्तर्यामिकत्वात्तु सर्वनामा हरिः स्वयम् ।
न तु सर्वस्वरूपत्वाद्रूपत्वं तूपचारतः ॥

इति स्मृतेश्च सर्वान्तर्यामित्वेन तत्तत्सत्ताप्रदत्वेन तच्छब्दप्रवृत्तिनिमित्तस्य तदधीनत्वेन तत्तन्नामत्वं हरेरित्यभिप्रेत्याह । जरायुजमिति । देवादीनां भेदो यस्मिंस्तत्तथा इतिशब्द आदिवचनः ऋक्षादिनामवानेक एवेत्यनेन "यो देवानां नामधा एक एव" इति श्रुतिं सूचयति "नमो वर्ष्मणे नमो भूयसे" इति मन्त्रावयवस्याभिप्रायः सूचित इति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मुख्यतमायेत्यपि पूर्ववत् । सत्त्वादिपरमाश्रयत्वात् सत्त्वादिरूपाय ॥ २५ ॥ २६ ॥

यमित्यस्य टीकायां मत्सर एवेत्यत्र परस्परमिति ज्ञेयम् । ता देवताः अहिंसन्त समत्सरा बभूवुः । तत्र प्रत्येकं नाभिमानमाहुः । कमाश्रित्याहमस्मि अपि तु न कमपीति श्रुतेरर्थः ॥ २७ ॥

युगान्तोऽत्र मन्वन्तरान्तः क्षोणीमिति धृतनौकारूपामित्यर्थः "नाव्यारोप्य महीमय्याम्" इत्युक्तेः ॥ २८—३० ॥

यस्य तवैतत् कूर्माकारं रूपं निजेषु भक्तेषु मायया कृपया अर्पितं प्रकाशितम् अयथोपलम्भनात् यथावदुपलब्धुमशक्यत्वात् वाङ्मनसातीतत्वादित्यर्थः । यस्य च तव सङ्ख्या नास्ति अव्यपदेशं वक्तुमशक्यं रूपं नित्यमेव विद्यते यस्य तस्मै ॥ ३१ ॥

पूर्ववत् बहुरूपत्वं दर्शितम् । तच्च जरायुजेत्यादिना किञ्चित् सङ्ख्यातम् । यत्तु न यस्य सङ्ख्यास्तीत्युक्त्वा तस्यैकत्वाज्ञामरूपादीनामेवासङ्ख्यत्वमानीतं तेषां स्वरूपसिद्धत्वं दर्शयन् सङ्ख्यातानामारोपितत्वमाह ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

मुख्यतमाय सत्त्वाय शुद्धसत्त्वस्वरूपायेत्यर्थः प्राणादिनियन्तृत्वात् प्राणादिकाय ॥ २५ ॥

सर्वत्रैवान्तर्बहिरपि चरसि। अथ च लोकपालैरपि अदृष्टरूपः किमुतान्यैः। ननु तर्हि ममास्तित्वमेव मास्तु तत्राह। उरुर्वेदात्मकः स्वनो यस्य सः। वेद एव तवास्तित्वं प्रतिपदमुद्घोषयतीत्यर्थः। अत एव य इदं विश्वं ब्राह्मणादिनाम्ना विधिनिषेधाश्रयभूतेन वशे अनयन्नियमितवान् स त्वमीश्वरः। तथा च श्रुतिः। "तस्य वाक् तन्तिर्नामानि दामानि" इति। स्वियं पाञ्चालिकाम् अतो विश्वस्य पारतन्त्र्यादपि स्वतन्त्र ईश्वरस्त्वमनुमानेनापि ज्ञाप्यस इति भावः ॥ २६ ॥

नन्विन्द्रादयो वशं नयन्ति लोकपालकत्वादीश्वराः स्वतन्त्राश्च कुतोऽहं तत्र तेषां लोकपालकत्वादिकं सर्वमौपचारिकमित्याह। यं हित्वा पृथग्भूता वा समेत्य मिलित्वा वा द्विपदः चतुष्पदः सरीसृपं जङ्गमं स्थाास्तु स्थावरञ्च यद्यदत्र दृश्यते तत् पातुं न शक्ताः अतो मत्सरज्वराः। तथा च श्रुतिः "ता अहिंसन्ताहमु कमस्म्यहमु कमस्मीति" अस्यार्थः। ता देवता समत्सरा बभूवुः। अहम् उ भोः कमाश्रित्य अस्मि वर्त्ते अपि तु न कमपीत्यर्थः। इत्येवमिति स त्वमेव प्राणरूपेण पालक ईश्वरश्चेत्यर्थः ॥ २७ ॥

भक्त्या तु त्वं दृष्टरूपः प्रत्यक्षतयाप्युपलभ्यसे तत्र भक्ताभासोऽहमेव प्रमाणमित्याह। भवानिति। इमां महीं मया सह धृत्वेति शेषः हे अज! युगान्तार्णवे भवान् क्रमते विहरति जगतां यः प्राणगणस्तस्यात्मने नियन्त्रे ॥ २८ ॥

सा चासौ प्रियतमा चेति ताम् ॥ २९ ॥

अकूपाराय कूर्माय। सर्वैः सम्पूर्णाः सत्त्वगुणा यत्र तथाभूतं विशेषणमाकारो यस्य तस्मै शुद्धसत्त्वमूर्त्तये इत्यर्थः। न उपलक्षितं सर्वैरदृष्टं वैकुण्ठाख्यं स्थानं यस्य तस्मै वर्ष्मणे महाप्रमाणाय भूम्ने व्यापकाय अवस्थानाय आधाराय ॥ ३० ॥

एतद्विश्वं यस्य तवैव रूपं किन्तु मायाशक्त्या अर्पितं न तु स्वरूपभूतमित्यर्थः। अर्थस्वरूपं वस्तुस्वरूपं न त्ववस्तुभूतं बहुभिर्नरगोपशुपक्षिमत्स्यादिरूपै रूपितं निरूपितं किन्तु सङ्ख्या यस्य नास्ति कुतः अयथोपलम्भनात् यथावदुपलब्धुमशक्यत्वात् यैः प्रकारैरिदं विश्वमभूत्तेषामुपलम्भनाशक्यत्वादित्यर्थः। तथा लोकस्य स्थूलस्य नरजातेरेव प्रतिशरीरं वर्णस्वभावकण्ठस्वरादिभेदादनन्तप्रकारा ज्ञातुमशक्याः सूक्ष्माणां स्वेदजोद्भिज्जादीनां का वार्त्तेत्यनन्तस्य तव शक्तिकार्यस्याप्यानन्त्यमिति भावः। अतस्तव स्वरूपभूतस्य रूपस्य सर्वागम्यत्वे कैमुत्यमेवेत्याह। अव्यपदेश्यं वक्तुमशक्यं नित्यं रूपं यस्य तस्मै ॥ ३१ ॥

तदेवमनन्तमेदस्यापि विश्वस्य त्वदेककारणत्वादेकविधत्वमपीत्याह। जरायुजेति। महदृक्षेत्यार्षम् इत्येषामेकस्त्वमेवाभिधेयः। तथा च श्रुतिः "सर्वं खल्विदं ब्रह्म" इति ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मुख्यतमाय सर्वश्रेष्ठाय ॥ २५ ॥

अन्तर्यामिरूपेणान्तर्नानावतारैर्बहिरपि विचरसि तथापि अदृष्टरूपोऽयं परमात्मेति न दृष्टं निश्चितं रूपं यस्य सः। उरुर्विपुलः स्वनो वेदरूपो नादो यस्य सः ॥ २६ ॥

कुतस्तैरदृष्टरूपोऽस्मीत्यत्राह। मत्सरज्वरा इति। मत्सरः परोत्कर्षासहनं स एव ज्वरो येषां ते अत एव हित्वा साक्षाद्रूपेण सन्तमप्यनादृत्य द्विपदादि यदत्र दृश्यते तत् किञ्चिदपि पातुं न शेकुः ॥ २७ ॥

मया सह चोर्वीं पातुमित्यनुषङ्गः अजः भवान् उरु ओजसा क्रमते विचरति जगत्प्राणगणस्य आत्मने आश्रयाय ॥ २८ ॥

तस्य भगवतः तत् तां प्रियतमाम् ॥ २९ ॥

अकूपाराय कूर्माय सर्वैः सम्पूर्णाः सत्त्वगुणाः नियम्यभूतः विश्वपालनादिहेतुविशेषणमितरव्यावर्त्तकं यस्य तस्मै वर्ष्मणे वर्षीयसे कालानवच्छिन्नाय अवस्थानाय आधाराय ॥ ३० ॥

स्पर्द्धादिदोषनिवृत्तिपूर्वकभजननिष्ठासिद्धये विश्वरूपेण भगवन्तं वर्णयति। बहुभि रूपैरधिदैवादिभि रूपितं निरूपितम् अर्थस्वरूपम् अर्थः दृश्यमानः पृथिव्यादिपदार्थः स्वरूपं मूर्त्तिर्यस्य तत् निजमायया प्रकृत्या स्वशक्त्या अर्पितं स्थापितम् एतद्विश्वम् यस्य रूपं शरीरं यस्य च यथावदुपलम्भाभावात्संख्यावान्तरावयवगणाना नास्ति तस्मै व्यपदिश्यते इदमित्येवं वर्ण्यते इति व्यपदेशः दृश्यपदार्थः स एव रूपं यस्य तस्मै नमः ॥ ३१ ॥

अत एव जरायुजादि तथा शैलसरित्समुद्रद्वीपग्रहर्क्षाभिधेयस्त्वमेवैकः सर्वस्य त्वदात्मकत्वात् सर्वनामा सर्वरूपः "सर्वं खल्विदं ब्रह्म" इत्यादिश्रुतेः ॥ ३२ ॥

भाषाटीका

भगवान् सब इन्द्रियों के नियन्ता सत्त्व गुण प्रधान सूत्रात्मा मन बल इन्द्रिय बल देहबल के हेतु महामत्स्य आप के अर्थ नमस्कार है ॥ २५ ॥

आप वही ईश्वर हो जिनने ब्राह्मणादि नामों के कर्मोंसे इस जगत्को वश कर रखा है जैसें कि मनुष्य लकडी की पुतली को वशमें रखै आपको सकल लोकपाल नहीं देखते हैं तौभी आप वेद के वडे शब्द को करते हुये विचरते हो ॥ २६ ॥

जिन आप को छोड़कर मत्सर के ज्वर से युक्त सब लोकपाल एक एक या मिलकर द्विपाद चतुष्पाद सर्प स्थावर रूप इहां जो यह जगत् दीखता है तिसके रक्षाकरने में समर्थ नहीं होसके ॥ २७ ॥

जो आप प्रलयकाल के लहरों वाले वडे समुद्र मे सब ओषधियों की आधाररूप इस पृथिवी को लेकर बड़े वेग से मेरे को साथमे लेकर विचरते थे तिन जगत्प्राणरूप आप के अर्थ नमस्कार है ॥ २८ ॥

हिरण्मय वर्ष में भी कूर्ममूर्ति को धारण करके भगवान् निवास करते हैं उन की उस अति प्रिय मूर्ति को उहां के वर्षपुरुषों के सहित अर्यमा पितृगणों का पति स्तुति करता है इस मंत्र को जपता है ॥ २९ ॥

कूर्म रूप सबप्राणियों से विशिष्ट प्रत्यक्षस्थान से अलक्षित अतिश्रेष्ठ सर्वगत सब के आधाररूप भगवान् आप के अर्थ नमस्कार है ॥ ३० ॥

यस्मिन्नसङ्ख्येयविशेषनामरूपाकृतौ कविभिः कल्पितेयम् ॥
सङ्ख्या यया तत्त्वदृशापनीयते तस्मै नमः साङ्ख्यनिदर्शनाय त इति ॥ ३३ ॥

उत्तरेषु च कुरुषु भगवान् यज्ञपुरुषः कृतवराहरूप आस्ते तं तु देवी हैषा भूः सह कुरुभिरस्खलितभक्तियोगेनोपधावति इमां च परमामुपनिषदमावर्तयति ॥ ३४ ॥

ओं नमो भगवते मन्त्रतत्त्वलिङ्गाय यज्ञक्रतवे महाध्वरावयवाय महापुरुषाय नमः कर्मशुक्लाय त्रियुगाय नमस्ते ॥ ३५ ॥

यस्य स्वरूपं कवयो विपश्चितो गुणेषु दारुष्विव जातवेदसम् ॥
मथ्नन्ति मथ्ना मनसा दिदृक्षवो गूढं क्रियार्थैर्नम ईरितात्मने ॥ ३६ ॥

भाषाटीका ।

जिन आप का रूप यह जगत् अपनी माया से युक्त है यथार्थ रूप है नानाप्रकार का है यथार्थ विदित न होने से जिसकी संख्या नहीं हो सकती है ऐसे निर्देश के योग्यरहित रूपवाले आप के अर्थ नमस्कार है ॥ ३१ ॥

[जरायुज] मनुष्यादि (स्वेदज) खटमल आदि [अण्डज] पक्षि आदि [उद्भिज] वृक्षादि [स्थावर] पर्वतादि (जङ्गम) गऊ आदि देवता ऋषि पितर भूत इन्द्रिय समूह स्वर्ग आकाश पृथिवी पर्वत नदी समुद्र द्वीप ग्रह तारा नक्षत्र इन नामों के प्रधान वाच्य अर्थ आपही हो और सब आपके शरीर होने से गौण वाच्य हैं इसीप्रकार तत्त्व मसि के अर्थ में भी ईश्वर जीव का अभेद शरीर शरीरि भाव से यथार्थही है ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सप्रपञ्चतामनूद्य तन्निरासेन प्रणमति । यस्मिन्निति । असंख्येया अनन्ता विशेषा येषां तानि नामानि रूपाण्याकृतयश्च यस्य तादृशे यस्मिंस्त्वयि कविभिः कपिलादिभिरियं चतुर्विंशत्यादिसंख्या कल्पिता सती यया तत्त्वदृशा येन तत्त्वज्ञानेनापनीयते तस्मै ते साङ्ख्यसिद्धान्तरूपाय नमः परमार्थज्ञानरूपायेति वा ॥ ३३ ॥

एषा भूरुपधावति हेत्यन्वयः ॥ ३४ ॥

मन्त्रैस्तत्त्वेन लिङ्ग्यत इति तथा तस्मै । यज्ञा अयूपाः क्रतवः सयूपास्तद्रूपाय अत एव महान्तोऽध्वरा अवयवभूता यस्य । कर्मणा शुक्लाय शुद्धाय यज्ञानुष्ठात्रे । त्रियुगाय कृतयुगे यज्ञाभावात् । यद्वा । कलियुगे छन्नत्वात् ॥ ३५ ॥

कवयो विद्वांसो विपश्चितो निपुणा गुणेषु देहेन्द्रियादिषु मथ्नन्ति विचिन्वन्ति । मथ्ना विवेकसाधनेन मनसा । क्रियार्थैः कर्मभिस्तत्फलैश्च गूढमप्रकाशमानं दिदृक्षवः । एवं मथने ईरितः प्रकटित आत्मा स्वरूपं यस्य तस्मै नमः ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमनन्तविविधविचित्रविभूतिमत्त्वमुक्तम् । ननु सङ्ख्या न यस्यास्तीत्यानन्त्यमुक्तं तदयुक्तं पृथिव्यादितत्त्वानां चतुर्विंशत्यादिसङ्ख्यावच्छिन्नत्वादत आह । यस्मिन्निति । असङ्ख्येयान्यनन्तत्वात्परिच्छेत्तुमशक्यानि विशेषणानि विलक्षणानि देवादिनामानि रूपाणि चाकृतयश्च यस्य रूपशब्देन पृथिव्यादिद्रव्यं विवक्षितं तत्सङ्घातगतसङ्घानमाकृतिशब्देन तद्वाचकशब्दो नामशब्देन विवक्षितः असङ्ख्येया विशेषा येषामिति पूर्वत्र बहुव्रीहिः उक्तानि नामानि रूपाण्याकृतयश्च यस्येति वा एतादृशे प्रकृतिपुरुषकालशरीरकेऽसङ्ख्येयवैभवे त्वयि इयं चतुर्विंशतिः पञ्चविंशतिरित्यादिरूपा सङ्ख्या कविभिः कपिलादिभिः पृथिव्यादितत्त्वयाथात्म्यविद्भिः कल्पिता मन्दबुद्धीनां सुखग्रहणाय सङ्क्षेप्य संगृह्य प्रदर्शिता वस्तुतः पृथिव्यादीनामचेतनतत्त्वानामनन्तावान्तरभेदानां च चेतनानां च परमात्मनश्चानन्त्यादसङ्ख्येयत्वमेवेति भावः । एवं कल्पिता सङ्ख्या यया तत्त्वदृशा यद्विषयया तात्त्विकबुद्ध्यानन्तवैभवत्वयाथात्म्यबुद्ध्यापनीयते अपनुद्यतेऽसङ्ख्यातविभूतित्वात्तस्मै सांख्यनिदर्शनाय संख्या बुद्धिर्व्यवसायात्मिका प्रकृतिपुरुषेश्वरयाथात्म्यविषया सैव साङ्ख्यं नितरां दृश्यतेऽनेनेति निदर्शनं यस्य साङ्ख्यज्ञानगम्यायेत्यर्थः । ननु भगवद्विभूतिभूतस्य जगत आनन्त्ये कथं भगवत्स्वरूपस्यानन्त्यं प्रकृतिपुरुषादिनिरूप्यं हि तस्यानन्त्यं प्रकृतिपुरुषपरत्वमेव न घटते नान्यथा अत्रोच्यते देशकालवस्तुपरिच्छेदराहित्यरूपं हि तावदानन्त्यं तदेव त्रिविधमानन्त्यं परमात्मनि सुस्थम् इदमत्रास्त्यत्र नास्तीदमिदानीमस्ति कल्पान्तरे नास्ति इति देशकालपरिच्छेदयोरभावादिदमिदं न भवतीति वस्तुपरिच्छेदस्यापि सर्ववस्तुसामानाधिकरण्याभावरूपस्याभावाद्ब्रह्मणः सर्वात्मकत्वेन सर्ववस्तुसामानाधिकृतित्वव्यपदेशविषयत्वात् जीवानां त्वणुपरिमाणविषयत्वेऽपि तेषामानन्त्याद्धर्मभूतज्ञानस्य संसारदशायां कर्मसङ्कुचितत्वेऽपि वस्तुतस्तदभावान्मुक्तिदशायाम् सचानन्त्यं कल्प्यत "इत्यानन्त्यश्रवणाद्ब्रह्मणोऽचेतनात्परत्वे जीवद्वारकतया "अनेन जीवेनात्मनानुप्रविश्य" इति श्रवणाज्जीवस्वरूपस्य नित्यत्वाच्च तेषामप्यानन्त्यं देशतः कालतश्चास्त्येव अचेतनस्यापि कारणावस्थायां निरतिशयसूक्ष्मदशापन्नत्वेऽपि कार्यावस्थायामानन्त्यमस्त्येव तर्हि प्रकृतिपुरुषापेक्षया परमात्मन आनन्त्ये को

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

विशेष इति चेदियांस्तु विशेषः यत्कार्यावस्थायां कारणावस्थायाञ्च स्वरूपेण गुणैश्चानन्त्यमितरयोस्तु देशतः कालतश्च धर्मकृतं कालकृतं मुक्तावस्थाकार्यावस्थयोरिति । ननु ब्रह्मणः स्वरूपस्य सर्वात्मकत्वेन सर्ववस्तुसामानाधिकरण्यात्मकवस्त्वपरिच्छेदसत्त्वेऽपि कथं तद्गुणानां वस्त्वपरिच्छेद इति चेदेवं तर्हि वस्त्वपरिच्छेदः यद्गुणैर्निकर्षः तद्यथा दशवर्णस्वर्णापेक्षया नववर्णस्वर्णस्य पवित्रत्वोज्ज्वलत्वगुरुत्वादिभिर्गुणैर्निकर्षस्तदपेक्षया च कलधौतस्यैवं गुणैर्निकर्षाभावो वस्तुपरिच्छेदो बोध्यः ॥ ३३ ॥

अथोत्तरेषु कुरुषूपास्यादिकमाह । उत्तरेष्विति । कृतं धृतं वराहरूपं येन तादृशो भगवान् षाड्गुण्यपूर्णः यज्ञपुरुषः यज्ञशरीरकः तदाराध्यस्तत्फलदश्चास्ते तं तु वराहरूपं भगवन्तमेषा भूर्देवी कुरुभिः कुरुवर्षस्थैः पुरुषैः सहास्खलितभक्तियोगेनाविच्छिन्नभक्तियोगेनोपधावत्यनुवर्त्तते भक्तियोगेनाराधयतीत्यर्थः इमां वक्ष्यमाणां परमां श्रेष्ठामुपनिषदमावर्तयति जपति ॥ ३४ ॥

ओं भगवच्छब्दार्थौ पूर्ववत् मन्त्रतत्त्वलिङ्गाय मन्त्रप्रतिपाद्यं वस्तु तदेव लिङ्गं शरीरं यस्य । यद्वा । मन्त्रतत्त्वस्य स्वरूपस्य लिङ्गं ज्ञापको यस्य मन्त्रतत्त्वे मन्त्रतत्प्रतिपादिते लिङ्गे शरीरे ज्ञापके वा यस्येति वा यद्वा । मन्त्रगतानि तत्त्वानि इन्द्राद्यर्थस्वरूपाणि तानि लिङ्गानि शरीराणि यस्य तस्मै यज्ञक्रतवे असोमकाः यागाः यज्ञाः ससोमाः क्रतवः तदुभयाय तदन्तरात्मत्वात्तदाराध्यत्वात्तत्फलदत्वाच्च तत्तादात्म्यं विवक्षितं महान्तोऽध्वरा अवयवभूता यस्य । यद्वाध्वरस्यावयवाः स्रुक्स्रुवेडादयः महान्तः अध्वरा अवयवाः स्रुगादयो यस्य स्रुगादिरूपेण यष्टृभिरनुसन्धेया यस्य तस्मै इत्यर्थः तथा चोक्तं तृतीये "स्रुक्तुण्ड आसीत्स्रुव ईश नासयोरिडोदरे चमसाः कर्णरन्ध्रे" इत्यादिना महापुरुषाय "वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्" इति पुरुषसूक्तप्रतिपाद्यजगत्कारणत्वाद्यनन्तकल्याणमहागुणविशिष्टाय पुरुषाय सर्वान्तरात्मने कर्मशुक्लाय कर्मणा शुद्धाय विशुद्धाय विशुद्धकर्मणे संसृतिप्रतिभटकर्मण इति यावन्न तु कर्मरहितायेत्यर्थः "सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरस" इति देवमनुष्यादिसजातीयविजातीयाबन्धकसर्वकर्माश्रयत्वश्रवणात् "निष्क्रियं निष्कलम्" इत्यनेन बन्धककर्मानाश्रयत्वमुच्यते त्रियुगाय कर्मशुक्लायापि त्रियुगाय षाड्गुण्यपूर्णाय त्रीणि युगानि ज्ञानशक्त्यादीनि यस्य तस्मै यद्यपि भगवत इत्यनेनापि षाड्गुण्यपूर्णतोक्ता कर्मशुक्लायेत्यनेन क्रियाश्रयत्वकथनप्रयुक्तं जीवस्येवाज्ञानादिकं वारयितुं त्रियुगायेत्युक्तमतो न पौनरुक्त्यमरुणाय अरुणवर्णाय श्वेतवराहरूपत्वेऽपि चक्षुषोररुणवर्णत्वात्तदभिप्रायेणारुणायेत्युक्तं भवतीति मन्त्रार्थो ज्ञेयः ॥ ३५ ॥

सर्वान्तरात्मत्वमुमुक्षूपास्यत्वादिकमनुसन्दधाना नमस्करोति । यस्येति । कवयः प्रकृतिपुरुषेश्वरयाथात्म्यविदः यस्य विपश्चितः सर्वज्ञस्य तव विविधं पश्यच्चित्विपश्चित् पृषोदरादित्वात् पश्यच्छब्दस्य स्थाने पकारादेशः "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इति विपश्चिच्छब्दो ब्रह्मणि प्रयुक्तः स्वरूपम् 'सत्यं ज्ञानमनन्तं ब्रह्म' इतिलक्षणलक्षितं गुणेषु गुणपरिणामरूपेषु देवादिशरीरेन्द्रियसंसृष्टेषु भूतेषु क्रियार्थैर्गूढं क्रियार्थैः कर्मफलैर्गूढं तिरोहितं जीवसम्बन्धिक्रियाफलैस्तेषां गूढम् "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्" इति जीवानां कर्मभिः परमात्मस्वरूपस्य तिरोहितत्वश्रवणात् दिदृक्षवो द्रष्टुं साक्षात्कर्तुमिच्छवः दारुषु जातवेदसमिव मथ्ना विवेकसाधनेन मनसा मथ्नन्ति विविञ्चते पञ्चविंशतितत्त्वेभ्यः पृथक्कृत्य पश्यन्तीत्यर्थः दारुष्विव जातवेदसमित्यनेन दृष्टान्तेन सर्वान्तरात्मत्वमुक्तं दिदृक्षवः कवय इत्यनेनोपास्यत्वमुक्तमीक्षितात्मने कर्त्तरि क्तः ईश्वराय परमात्मने नमः ईरितात्मन इति पाठे ईरिताः प्रेरिताः नियमिता आत्मानो जीवा यस्य तस्मै इत्यर्थः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

असङ्ख्येया विशेषाः व्यावर्तकधर्मा असङ्ख्येयानि नामानि नारायणादीनि शुक्लादीनि रूपाणि यस्याः सा तथा तादृशी आकृतिर्विग्रहो यस्य स तथा तस्मिन्नेवम्विधे यस्मिन् त्वयि दशावतारा इत्यादिकेयं सङ्ख्या कविभिः कल्पिता जगत्स्थितिलक्षणरक्षणायेति शेषः नेयं सङ्ख्या तात्त्विकीत्याह । ययेति । यया दशावतारा इत्यादिकया सङ्ख्यया भवांस्तत्त्वदृशा वस्तु याथात्म्यं पश्यता जातावेकवचनं विनीयते विशेषेण नीयते शिष्यप्रशिष्यादिषूपदिश्य प्रवर्त्यत इति अनेन यथार्हं कवयन्तः कवयो न भवन्ति किन्तु अपरोक्षं पश्यन्त इत्युक्तं नचेदं वृत्तिज्ञानं सङ्ख्याप्रणयनस्य विशेषग्रहणस्य व्यर्थत्वापातादतः स्वरूपज्ञानमेवाङ्गीकर्तव्यम् आचार्यैरप्येतदभिप्रायेणोक्तं तज्ज्ञानं तद्रूपमेव हीति जीवस्य तिरोहितं स्वरूपज्ञानं च श्रीनारायणप्रसादेनाविर्भवतीत्यभिप्रायेण तं श्रीहरिं विशिनष्टि । साङ्ख्यानिदर्शनाय साङ्ख्यं यथार्थज्ञानं स्वरूपविषयं निदर्शयति सम्यग् ज्ञापयति प्रदीपप्राहिवत् इति साङ्ख्यनिदर्शनः तस्मै

बलमानन्द ओजश्च सहोज्ञानमनाकुलम् ।
स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्विभोः ।

इति वचनात् स्वरूपज्ञानमस्तीत्यत्र किं निदर्शनमित्यतो वा तत्स्थलमाह । साङ्ख्येति । हरेर्ज्ञानं यथा तद्रूपमेवं जीवज्ञानमित्यर्थः "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतेः इदं च भगवत्पादाभिप्रेतमिति ज्ञायते तज्ज्ञानं तद्रूपमेव हीति अनेन यथा ब्रह्मज्ञानं ब्रह्मस्वरूपं तथा जीवज्ञानं जीवस्वरूपमेव तत्र ब्रह्मज्ञानं नित्यं प्रकाशितं जीवज्ञानं स्वादृष्टेन तिरोहितं श्रीहरिप्रसादेन प्रकाशितं भवतीति विशेषं हिशब्देन प्रथयति ॥ ३३ ॥

उपनिषदं षट्कर्णागोचरं मन्त्रम् ॥ ३४ ॥

मन्त्रतत्त्वलिङ्गाय मन्त्रतत्त्वमूर्तये मन्त्रार्थज्ञापनाय वा यज्ञक्रतवे यज्ञसङ्कल्पविषयाय कर्मणा क्रियया पराक्रमलक्षणया शुक्लाय शुद्धाय त्रिषु युगेषु अवतारो यस्यासौ त्रियुगस्तस्मै ॥ ३५ ॥

वनगोचरस्य वराहस्य मन्त्रतत्त्वलिङ्गादिकं कथमुपपद्यत इत्याशङ्क्य प्रेक्षावद्भिर्विमृग्यरूपत्वेन पुरुषोत्तमत्वावगमात्तदवतारत्वेनोपपद्यत इत्याह । यस्येति । काव्यकर्तृत्वेन कवय इति नतु वेदान्तवेद्यवस्तुज्ञत्वेनेत्यन्यथा प्रतीतिनिरासाय विपश्चित इति गुणेषु सत्त्वादिकार्येषु शरीरेन्द्रियादिषु नियामकत्वेन सन्निहितं यस्य तव स्वरूपं विपश्चितः कवयो मनसा मथ्ना योनिषु काष्ठेषु जातवेदसमग्निमिव मथ्नन्ति आम्रेडयन्ति विचार्य जानन्तीत्यन्वयः शरीरादौ सन्निहितश्चेत्कुतो न प्रकाशत इति तत्राह । गूढमिति । "एको देवः सर्वभूतेषु गूढः विदं ज्योति-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदंय आहितं यत्,,इत्यादिश्रुतिः क्रियार्थैर्यज्ञविषयैरिन्द्राग्न्यादि नामभिरीरितात्मने प्रतिपादितस्वरूपाय ॥ ३६

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यस्मिन्निति । इयं सङ्ख्या जरायुजादिरूपा कल्पिता । प्रथमोपासनार्थं त्वद्रूपत्वेनारोप्यैवोपदिष्टा । ययापनीयते तस्मै तदेकगम्यायेत्यर्थः । साङ्ख्यानां साङ्ख्यविदां तेषां निदर्शनाय सिद्धान्तरूपाय ॥ ३३—३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

किञ्च । विश्वस्यास्य नश्वरत्वाज्ज्ञानिभिरनुपादेयत्वमाह । यस्मिन्निति । असङ्ख्येया अनन्ता विशेषा येषां तानि नामानि रूपाण्याकृतयश्च यस्य तत्र इयमुक्तलक्षणा जरायुजादिरूपा सङ्ख्या कल्पिता सती यया तु तत्त्वदृशा येन तत्त्वज्ञानेनापनीयते तस्मै ते साङ्ख्यनिदर्शनाय ज्ञानस्वरूपाय नमः ॥ ३३ ॥ ३४ ॥

मन्त्रैरेव तत्त्वेन लिङ्ग्यते ज्ञायते यस्तस्मै । यज्ञा अयूपाः क्रतवः सयूपास्तद्रूपाय महान्तोऽध्वरा अवयवभूताः यस्य । कर्मभिः स्वीयचरित्रैः सह शुक्लाय शुद्धसत्त्वस्वरूपाय । त्रियुगाय सत्यादियुगत्रय एव प्राकट्यात् कलौ छन्नत्वात् । यद्वा । त्रीणि युगानि युगलानि यस्य तस्मै । षडैश्वर्यायेत्यर्थः ॥ ३५ ॥

कवयो विद्वांसः विपश्चितः भक्तिचतुराः यस्य गुणेषु शब्दरूपादिषु कृष्णरामेति नीलोत्पलदूर्वादलश्यामेत्यादिषु मनसा मथ्ना मथनसाधनेन यस्य स्वरूपं दिदृक्षवो मथ्नन्ति दारुष्विव जातवेदसमिति यथा मथनेनैव जातवेदा वह्निः प्रत्यक्षीभवति तथैवात्र यस्य नामरूपादिषु पुनः पुनर्मनोनिधानमेव मथनं तेनैव यत्स्वरूपं प्रत्यक्षीकुर्वन्तीत्यर्थः । कीदृशं क्रियार्थैः कर्मभिस्तत्फलैश्च गूढं भक्त्यैव नैष्कर्म्ये सत्येव द्रष्टुं शक्यमित्यर्थः । एवमेव ईरितः कथितः आत्मा स्वभावो यस्य यत्नो वा यत्र तस्मै । यद्वा गुणेषु श्रोत्रवागादीन्द्रियेषु यस्य स्वरूपं स्वरूपभूतं नामगुणलीलादिश्रूयमाणकीर्त्यमानादि मनसा मथ्ना मथ्नन्ति मनःसहितश्रवणकीर्त्तनादिदृढाभ्यासेनैव यं प्रत्यक्षीकुर्वन्तीत्यर्थः । अन्यत् समानम् ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु नानापदार्थानामेकत्वं कथं घटेतेत्यत्र कार्यदृष्ट्या नानात्वं कारणमात्रदृष्ट्यैकत्वं च सुघटमेवेति "उभयव्यपदेशात्त्वहिकुण्डलवत्" इतिन्यायेन जगद्ब्रह्मणोः स्वाभाविकभेदाभेदसम्बन्धमाह । यस्मिन्निति । यस्मिन् कविभिः क्रान्तदर्शिभिर्वेदैः यया तत्त्वदृशा सर्वात्मभूतब्रह्मविषयिण्या दृष्ट्या इयं नाना संख्या अपनीयते "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन" इत्येवमपसार्यते तयैव तत्त्वदृशा "यतो वा इमानि भूतानि जायन्ते" इत्येवं कल्पिता तस्मै अत एवासंख्येया विशेषाः येषां तानि नामानि रूपाणि आकृतयश्च यस्य तथाभूताय सांख्यनिदर्शनाय सांख्यं सम्यक् ख्यायते प्रकथ्यते ब्रह्म अनयेति संख्या उपनिषत् तयावधारणीयं सांख्यं तथाभूतं निदर्शनं ज्ञानं यस्य तथाभूताय ते तुभ्यं नमः इत्यन्वयः ॥ ३३ ॥

एषा भूर्भूम्यधिष्ठात्री देवता ॥ ३४ ॥

मन्त्रा एव तत्त्वलिङ्गानि स्वरूपज्ञापका यस्य तस्मै यज्ञा अयूपाः क्रतवः सयूपाः तद्रूपाय महान्तो महाध्वराः अवयवा यस्य तस्मै कर्मणा भुवः उद्धरणे शुक्लाय प्रकाशमानाय त्रियुगाय त्रीणि युगानि ।

> उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।
> वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ।

इतिस्मृतिप्रोक्तानि यस्मादुपासकानां स तथा यदुपासनया जीवोऽप्युक्तषाड्गुण्ययोगाद्भगवान् भवति तस्मै इत्यर्थः ॥ ३५ ॥

यस्य विपश्चितः सर्वज्ञस्य "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इति श्रुतिप्रसिद्धस्य ते स्वरूपं क्रियार्थैर्गूढं जीवस्य स्वकृतकर्मफलैः सङ्कुचितज्ञानस्य ह्यप्रकाशमानं गुणेषु स्वकार्यभूतचतुर्विंशतिप्राकृततत्त्वसहितेषु जीवसहितेषु चाष्टाविंशतिपदार्थेषु वक्ष्यमाणेषु एकोनत्रिंशं मथ्नन्ति विचिन्वन्ति दारुषु जातवेदसमग्निमिव मथ्ना विवेकसाधनेन मनसा इत्थंकृते यत्ने ईरितः प्रकटितः आत्मा स्वरूपं यस्य तस्मै नमः ॥ ३६ ॥

भाषाटीका ।

जिन आप के असंख्य नामरूप आकृति हैं तिन आप के कवियों की वर्णन करी जो चतुर्विंशति तत्त्व की संख्या जिस तत्त्वदृष्टि के होने से दूर होजाती है तिन सांख्य प्रतिपादित आप के अर्थ नमस्कार है ॥ ३३ ॥

उत्तर कुरु वर्ष में वराह रूपवाले भगवान् यज्ञ पुरुष हैं उन को यह भूमी देवी अचलभक्ति योग से आराधन करती है इस उपनिषद् मन्त्र को आवर्तन करती है ॥ ३४ ॥

मन्त्रों से तत्त्वों से जानने योग्य यज्ञरूप क्रतुरूप महा अध्वर अवयव वाल महापुरुष कर्मों के शुद्ध फलरूप ऐश्वर्यादि छै गुणों वाले भगवन् आप के अर्थ नमस्कार है ॥ ३५ ॥

कवि विद्वान् आपके जानने की इच्छाकरनेवाले पुरुष कर्मफलों से गुणोंमें गुप्त जिन आपके स्वरूप के साधन भूत निर्मल मनसे निश्चित करते हैं जैसे विवेकी पुरुष काष्ठमें से मथनसे अग्नि पैदा करते हैं इस प्रकार जिनका आत्मा प्रगट है उन आपके अर्थ नमस्कार है ॥ ३६ ॥

द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने ॥
अन्वीक्षयाङ्गातिशयात्मबुद्धिभिर्निरस्तमायाकृतये नमो नमः ॥ ३७ ॥
करोति विश्वस्थितिसंयमोदयं यस्येप्सितं नेप्सितमीक्षितुर्गुणैः ॥
माया यथाऽयो भ्रमते तदाश्रयं ग्राव्णो नमस्ते गुणकर्मसाक्षिणे ॥ ३८ ॥
प्रमथ्य दैत्यं प्रतिवारणं मृधे यो मां रसाया जगदादिसूकरः ॥
कृत्वाग्रदंष्ट्रे निरगादुदन्वतः क्रीडन्निवेभः प्रणताऽस्मि तं विभुमिति ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां भुवनकोशवर्णनं नाम
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मथनमेव दर्शयन्त्याह । द्रव्येति । द्रव्यं विषयः क्रिया इन्द्रियव्यापारः हेतुर्देवता अयनं देहः ईशः कालः कर्ताहङ्कारः एतैर्मायागुणैः कार्यैरुपलक्षणैर्वस्तुत्वेन निरीक्षितो य आत्मा तस्मै अन्वीक्षया विचारेणाङ्गैर्यमनियमादिभिरतिशयात्मा निश्चयवती बुद्धिर्येषां तैर्निरस्ता मायानिमित्ता आकृतिर्यस्मात्तस्मै ॥ ३७ ॥

तदेवं निर्गुणरूपेण नत्वा परमेश्वररूपेण प्रणमति । करोतीति । यस्येक्षितुर्जीवार्थमीप्सितम् । अत्यन्तानिच्छायामीक्षणायोगात्स्वार्थं तु नेप्सितम्। विश्वस्थित्यादिस्वगुणैर्माया करोति तस्या जडत्वेऽपीश्वरसन्निधानात्प्रवृत्तिं दृष्टान्तेनाह। यथायो लोहं ग्राव्णोऽयस्कान्तान्निमित्ताद्भ्रमति तदाश्रयं तदभिमुखं सत् गुणानां कर्मणां जीवादृष्टानां च साक्षिणे तस्मै ते नमः ॥ ३८ ॥

अवतारचरितमाह । प्रमथ्येति । यो जगतामादिः कारणभूतः सूकरो मां पृथ्वीमग्रदंष्ट्रे दंष्ट्राग्रे कृत्वा रसातलादारभ्योदन्वतः प्रलयार्णवादिभो गज इव निरगात् ततश्च प्रतिगजतुल्यं दैत्यं प्रमथ्य यः क्रीडन् स्थितस्तं विभुं प्रणतास्मीत्यन्वयः ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गुणशब्दोपलक्षितचिदचिदात्मकजगदन्तरात्मत्वेन तद्वैलक्षण्यमुक्तं तदेव विशदयन्नमस्करोति । द्रव्येति । अक्षेत्याभिमुख्यीकरणं हे भगवन्नतिशयात्मबुद्धिभिरतिशयितात्मपरमात्मविषयबुद्धिमद्भिः पुरुषैरन्वीक्षया निपुणनिरूपणेन वस्तुतः परमार्थतः प्रकृतिपुरुषविलक्षणत्वेनेति यावत् निरीक्षितः आत्मा स्वरूपं यस्य निरस्तमायाकृतये निरस्ता मायाकृतिः प्रकृतिकार्यं यस्मात्तस्मै ते नमो नम इत्यन्वयः कैः सह कुत्र निरीक्षणं तत्राह । द्रव्यं भूतपञ्चकं क्रियाक्रियाहेतुर्वागादिकर्मेन्द्रियमयनं ज्ञानेन्द्रियमीयतेऽनेनेति ज्ञानसाधनत्वाच्चक्षुरादेर्ज्ञानेन्द्रियस्य एषां समाहारद्वन्द्वः एतत्सङ्घातरूपे शरीरे सकर्तृभिः सपरिच्छदकैः मायागुणैः सह निरीक्षितात्मने नमः देहभूतेन्द्रियगुणत्रयजीवात्मभिः सह विविच्य निरीक्षितायेत्यर्थः अनेन पूर्वश्लोके गुणपदं देवाद्यवस्थजीवोपलक्षणमित्यावेदितुम् अन्यथास्मिन् श्लोके जीवोपस्थापककर्तृपदासङ्गतिः स्पष्टैव एवञ्च गुणपदेन देहमात्रमभिप्रेत्य तेषु जीवतादात्म्येन मथ्नन्तीति न भ्रमितव्यम् ॥ ३७ ॥

निरस्तमायाकृतय इत्यनेन मायाकार्यदोषप्रतिभटत्वमुक्तं तदुपपत्तये मायाया ईश्वरवश्यतामाह । करोतीति । यो भवान् यस्य प्रधानस्य गुणैः सत्त्वादिभिः प्रधानाभिप्रायेण यस्येति नपुंसकनिर्देशः विश्वस्य स्थितिसंयमोदयं स्थितिलयोदयं करोति कथं भूतमीप्सितं धर्मार्थकाममोक्षार्थचतुष्टयस्य साधनोपयुक्तकरणकलेवरादिप्रदानेन जीवानुग्रहार्थत्वाज्जगत्सृष्ट्यादेस्तस्येप्सितत्वं जीवार्थत्वेनेप्सितमिति यावत्स्वार्थत्वेनानीप्सितमित्यर्थः तस्मादीक्षितुः सङ्कल्परूपज्ञानवतस्तस्य ततः माया सत्त्वादिगुणात्मिका त्वच्छरीरभूता माया यथा ग्राव्णोऽयस्कान्तात्तदाश्रयं तदभिमुखं सदयो लोहं भ्रमति तथा त्वत्सङ्कल्पानुगुणकारिणी भ्रमतीति भावः यद्वा। ईक्षितुः "तदैक्षत बहु स्यां प्रजायेय" इत्युक्तविधलक्षणवतः तस्य तव माया यस्येति षष्ठी शरीरशरीरिभावसम्बन्धे त्वच्छरीरभूता माया । यद्वा । तादर्थ्ये षष्ठी दृष्टान्तस्य सामर्थ्यात्त्वदधीना माया त्वदाहितशक्तिर्विश्वस्य सृष्ट्यादि करोति इत्यर्थः स्वतोऽशक्ता या कथमनुप्रवेशमात्रेण शक्तिमती स्यात्तत्राह । "यथायो भ्रमते तदाश्रयं ग्राव्णः" इति विश्वसृष्ट्यादिकर्तृत्वस्य परमात्मधर्मत्वेन माया करोतीत्युक्तमिति तदुच्यते भगवदवताररूपाणां ब्रह्मादीनां सृष्ट्यादिकर्तृत्वस्य रजआदिमायागुणप्राचुर्यप्रयुक्तत्वान्माया विश्वसृष्ट्यादिकं करोतीत्युक्तमिति नेप्सितमित्यनेन विश्वस्थित्यादिकं न भगवतो भोगार्थमित्युक्तम् ईप्सितमित्यनेन जीवानुग्रहार्थं लीलार्थं चेति सूचितम् । ननु विश्वस्थित्यादिकं न जीवानुग्रहार्थं किन्तु गर्भजन्मजरामरणादिदुःखहेतुत्वेन जीवनिग्रहार्थमेव स्यात् किञ्चाहितकरणाहिताकरणादिप्रयुक्तवैषम्यनैर्घृण्यं च भगवतः प्रसज्येत तत्राह । नमस्ते गुणकर्मसाक्षिण इति गुणानां मायागुणानां सत्त्वादीनां कर्मणां पुण्यपापरूपाणां चादृष्टादीनां साक्षिणे साक्षाद्द्रष्ट्रे ते नमः जीवगुणकर्मानुसारित्वात् हिताकरणादेर्न वैष-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ष्यनैर्घृण्यदोषप्रसक्तिरिति भावः तथा च सूत्रम्" वैषम्यनैर्घृण्ये न सापेक्षत्वात् । न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च"इति अयं भावः भगवान् जगदादौ स्वस्मिन्नुपसंहृतचिदचित्तत्त्वः सर्वज्ञः सर्वशक्तिः परमकारुणिकोऽवाप्तसमस्तकामः स्वस्मिन् प्रलीनमसत्कल्पं चेतनवर्गमालोक्य सर्वेषां सामान्येन धर्मादिपुरुषार्थसाधनत्वाराधनोपयुक्तकरणकलेवराणि प्रदायाराधनप्रकारावबोधि वेदाख्यं शास्त्रं च प्रदर्श्य स्वयं जगत्सृष्ट्यादिलील आस्ते ततस्ते जीवाः करणकलेवराणि परिगृह्य प्राचीनकर्मवासनानुसारेण साध्वसाधुकर्माणि कुर्वन्तः स्वस्वकर्मानुसारेण ईश्वरादिष्टं फलं भुञ्जते इति नेश्वरस्य वैषम्यादिप्रसक्तिरिति ॥ ३८ ॥

प्रकृतावतारचरित्रं वदन्ती नमस्करोति । प्रमथ्येति । यो जगतामादिः कारणभूतः सूकरः मां पृथ्वीं दंष्ट्राग्रे कृत्वा निधाय रसातलादारभ्य उदन्वतः प्रलयार्णवादिभो गज इव निरगात्ततश्च प्रतिवारणं प्रतिगजतुल्यं दैत्यं हिरण्याक्षं प्रमथ्य हत्वा क्रीडन् स्थितः तं विभुं प्रणतास्मि ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शरीरादिगूढेश्वरसद्भावे ब्रह्मादिप्रत्यक्षं च प्रमाणमित्याह । द्रव्येति । द्रव्यक्रियाहेत्वयनेशाश्च कर्तारश्चेति तथा ईशशब्दः प्रत्येकमभिसम्बध्यते हेतुः कारणमयनमाधारः द्रव्यादीनामीशैः शङ्करगरुडब्रह्मवायुभिर्जगत्कर्तृभूतैर्मायागुणैर्हरीच्छानुसारिभिर्वस्तु यथा तथा निरीक्षितात्मने साक्षात्कृतस्वरूपाय त्वत्प्रसादबलात्वत्साक्षात्कारे बुद्धिपाटवं चैषामस्तीत्याह । तत्रेति । तत्र तव स्वरूपे यथा शक्त्याखिलविशेषदर्शनपटुतरबुद्धिभिः यदुच्यते ब्रह्मविवर्तवादिभिर्मायारूपमेव गृह्यते न तात्त्विकमिति तत्राह । निरस्तेति । शङ्करादीनां द्रव्यादीशत्वम्

> द्रव्येशः शङ्करः प्रोक्तः क्रियेशो गरुडः स्मृतः ।
> कारणेशस्तथा ब्रह्मा वायुराधारवान् स्मृतः ।

इति वाक्यसिद्धं यथैषां वस्तुनिरीक्षणं शक्यते । तथेति । एवशब्देनान्येषामेतादृशशक्तिं निवारयति ॥ ३७ ॥

ब्रह्मादीनामपि त्वत्कटाक्षलेशमन्तरेण त्वज्ज्ञानादौ पाटवं नास्ति अतो नियामकत्वं च मुख्यं तवैवेत्यभिप्रेत्याह । करोतीति यो विश्वस्य स्थित्यादिकं करोति ब्रह्मादयश्च यस्य तवेप्सितमीक्षितुं नेशते सत्त्वादिगुणैर्मोहितत्वादिति शेषः ब्रह्मादीनामपि तदीप्सितज्ञानशक्त्यभावेऽपि लक्ष्म्याः सास्तु तदनुवर्तमानत्वादित्याशङ्क्याह । मायेति । यदाश्रया यस्त्वमाश्रयो यस्याः सा तथा माया लक्ष्मीर्भ्रमति अनन्तत्वात्स्वरूपं न परिच्छिनत्ति अनुवृत्तिरपि न स्वाधीना किन्तु हर्यधीनेत्यत्र दृष्टान्तमाह । यथेति । अयस्कान्तरत्नसन्निधानाद्यथाऽयो भ्रमते चेष्टते तथेयमपि त्वत्सन्निधानात्त्वामनुवर्तत इत्यर्थः त्वत्सन्निधानाभावे जडप्रायेति द्योतनायायोनिदर्शनमिति भावः अनेन त्वत्सन्निहितलक्ष्मीसान्निधानाज्जडप्रकृतिकार्येषु प्रवर्तते तत्रेदं निदर्शनमिति चोक्तं भवति तथा च योजना यस्य तवाश्रया माया जडप्रकृतिर्भ्रमतीति अयस्कान्तस्थायश्चेष्टकत्वशक्तिरीश्वरनियतेति ज्ञापनाय यदाश्रयेति अत एव ग्राव्णा इति अयस्कान्ते सन्निधाय द्रव्यान्तरचेष्टाशक्तिप्रदत्वात्तद्वृत्तिस्थिरत्वाद्वा तच्छब्दवाच्याय एतदेव सूचितं गुणकर्मेति । चेतनाचेतनाश्रयगुणकर्मणोः साक्षिणे कर्तृत्वेनेति शेषः ॥ ३८ ॥

प्रतिवारणं प्रतिगजस्थानीयं निरस्तनिवारणं वा अग्रदंष्ट्रे दंष्ट्राग्रे जगदादिः श्रीनारायण एव सूकरः जगदादिश्चायं सूकरश्च सुष्ठु करोतीति सूकर एव सूकरः शुमित्यनुकारं शब्दं करोतीति सूकरो वराहः "बवौ शसाविति प्राच्या" इति सूत्रात् शसयोरभेदः ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

द्रव्यादिभिर्मायागुणैरुपलक्षितं यद्वस्तु शुद्धजीवतत्त्वं तत्रापि निरीक्षितो य आत्मा परमात्मा तत्स्वरूपाय । अन्वीक्षादिभिर्निरस्ता प्रत्याख्याता माया यतस्तथाभूताकृतिर्यस्य तस्मै ॥ ३७ ॥

तत्स्थापनाय वशीभूतमायां स्वरूपशक्तिं योजयति । करोतीति ॥ ३८ ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एवं स्थूलसूक्ष्ममायिकदेहद्वयसद्भावे एव मन्थनं सम्भवेत् मन्थने च सति तत्स्वरूपं दृश्यं स्यादित्याह । द्रव्यं शब्दादिक्रिया इन्द्रियव्यापारः हेतुर्देवता अयनं देहः ईशः कालः कर्ता अहङ्कारः । एतैर्मायागुणैः श्रवणकीर्तनपरिचरणादिभिर्भजनसाधकैरन्वीक्षया मनः कृतेनः पुनः पुनः परामर्शेन च अङ्गानां श्रवणकीर्त्तनादीनामतिशये आत्मा यत्नो बुद्धिश्च येषां तैर्वस्तुत्वेन निरीक्षित आत्मा स्वरूपं यस्य तस्मै । तच्च तं स्वरूपं चिन्मयमेवेत्याह । निरस्ता माया यत्र तथाभूता आकृतिराकारो यस्य तस्मै । श्लेषेण निरस्ता माया भक्तस्याप्याकृतिर्यतस्तस्मै ॥ ३७ ॥

ननु मत्कार्यत्वात्क्वचिदपि जगन्ममैवाकाङ्क्षे मृद्घटादिवत्तत्र जगदिदं न वस्तुतस्त्वत्कार्यं किन्तु मायाकार्यमित्याह । करोतीति । यस्येक्षितुर्जीवार्थमीप्सितमत्यन्तानिच्छायामीक्षणयोगात् स्वार्थं तु नेप्सितं विश्वस्थित्यादि स्वगुणैर्माययैव करोति । तस्या जडत्वेऽपि ईश्वरसन्निधानात् प्रवृत्तिं दृष्टान्तेनाह । यथा लोहं ग्रावणोऽयस्कान्ताद्धेतोर्भ्रमति तदाश्रयं तदभिमुखं सत् अतो गुणानां कर्मणां जीवादृष्टानाञ्च साक्षिणे तस्मै तुभ्यं नमः ॥ ३८ ॥

अवतारचरित्रं ब्रुवती स्वस्मिन् कृपातिशयं द्योतयति । प्रमथ्येति । प्रतिवारणं प्रतियोद्धारं हस्तिनामिव इभो हस्ती रसाया रसातलोपलक्षितात् गर्भोदात् जगदादिर्जगत्कारणभूतः सूकरः । उदन्वतः उदन्वति प्रलयार्णवे ॥ ३९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमेऽष्टादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पूर्वश्लोकं विवृणोति । द्रव्येति । अन्वीक्षया विचारेण अङ्गैर्यमनियमादिभिः अतिशयारणा निश्चयवती बुद्धिर्येषां तैर्दिदृक्षुभिः द्रव्यादिभिः पञ्चविंशतितत्त्वैः सह त्रिभिर्मायागुणैश्च सह वस्तुतो याथात्म्येन निरीक्षितो य आत्मा एकोनत्रिंशः परमात्मा तस्मै नमो नमः तत्र द्रव्याणि महाभूतानि पञ्च क्रियाशब्देन कर्मेन्द्रियाणि पञ्च हेतवः प्रकृतिमहदहङ्काराः पञ्चतन्मात्राणि चेत्यष्टौ प्रकृतयः अयनानि ज्ञानायनानि पञ्च ज्ञानेन्द्रियाणि ईशः इन्द्रियेशः मनः कर्ता जीवः एतैर्मायागुणाः सत्त्वरजस्तमांसि तैश्च सहित इत्यर्थः कथम्भूताय निरस्ता मायानिमित्ता आकृतिर्यस्मात् तस्मै अप्राकृताकृतय इत्यर्थः ॥ ३७ ॥

एवं चेतनाचेतनब्रह्माख्यानि त्रीणि तत्त्वान्युक्तानि तत्र सेश्वरसाङ्ख्यपक्षे प्रकृतिर्यथेश्वरादत्यन्तभिन्नातः सैव जगत्कर्त्रीति शङ्का प्राप्ता तां वारयन् ब्रह्मणो जगत्कारणत्वमाह । करोतीति यस्य जगत्कारणस्य ईक्षितुः "तदैक्षत बहुस्याम्" इत्यादि श्रुतिप्रसिद्धस्यैव सम्बन्धिनी शक्तिभूतैव माया न तदत्यन्तपृथग्भूता मायास्तीति "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" इति श्रुतेः उपलक्षणमेतज्जीवादेरपि न ह्यब्रह्मात्मकश्चेतनो ऽचेतनश्च कश्चित्पदार्थोऽस्ति "सर्वं खल्विदं ब्रह्म तज्जलानिति" इति श्रुतेः सा च माया ब्रह्माधीनस्थितिप्रवृत्तिमतीति दृष्टान्तेनाह । यथा अयो लोहं ग्राव्णोऽयस्कान्ताद्धेतोस्तदाश्रयं तदभिमुखं भ्रमति तद्वन्मायापि स एव मायेशः ईप्सितं बुभुक्षोर्जीवस्य भोगार्थं मुमुक्षोर्मोक्षार्थं स्वार्थं तु नेप्सितं विश्वस्थित्यादिकं गुणैः स्वमायागुणैः करोति तस्मै ते जीवस्य गुणानां सात्त्विकत्वादीनां कर्मणां च गुणानुरूपाणां साक्षिणे नमः ॥ ३८ ॥

प्रतिवारणं विरोधिनमिभमिभ इव मृधे युद्धे दैत्यं प्रमथ्य रसायाः रसातलात् अग्रदंष्ट्रे दंष्ट्राग्रे मां कृत्वा उदन्वतः प्रलयार्णवात् क्रीडन्निव निरगात् तं प्रणतास्मि ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
अष्टादशाध्यायार्थप्रकाशः ॥ १८ ॥

भाषा टीका

विचार सहित यम नियमादिक अङ्ग इनों से अतिशय युक्त स्वरूपवाली बुद्धिवाले पुरुषोंने विषय इन्द्रिय व्यापार इन्द्रिय देवता देह ईश्वर काल कर्ता माया के गुण इनोंसे जिनके स्वरूप को देखा है ऐसे आत्ममाया को दूर करनेवाले आप के अर्थ नमस्कार है ॥ ३७ ॥

जो आप गुण कर्मों के साक्षी हैं नहीं इच्छा करनेवाले भी जिन आपकी इच्छा गुणों से संसार के उत्पत्ति स्थिति प्रलय को करती है जैसे कि चुम्बक पत्थर के पास में रहने से लोहा घूमता है ऐसी शक्तिवाले आप के अर्थ नमस्कार है ॥ ३८ ॥

जो आप जगत् के आदि में कारण सूकररूप होकर रसातल में गई पृथिवी को दन्त के अग्र भाग में रखकर प्रलय समुद्र के जलमें से निकल आये जैसे कि हस्ति कमल के नाल को लेकर आवै तैसे फिर दूसरे हस्तिसरी के हिरण्याक्ष दैत्य को युद्ध में मारकर स्थित हैं उन प्रभु को मैं नमस्कार करती हूं ॥ ३९ ॥

इति श्रीभागवत पञ्चमस्कन्ध अठारहमे अध्यायका
भाषानुवाद समाप्त ॥ १८ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे अष्टादशोऽध्यायः समाप्तः ॥ १८ ॥

॥ ऊनविंशोऽध्यायः ॥

———:०:———

॥ श्रीशुक उवाच ॥

किंपुरुषे वर्षे भगवन्तमादिपुरुषं लक्ष्मणाग्रजं सीताभिरामं रामं तच्चरणसन्निकर्षाभिरतः परमभागवतो हनुमान् सह किंपुरुषैरविरतभक्तिरुपास्ते ॥ १ ॥

आर्ष्टिषेणेन सह गन्धर्वैरनुगीयमानां परमकल्याणीं भर्तृभगवत्कथां समुपशृणोति स्वयं चेदं गायति ॥ २ ॥

ओं नमो भगवते उत्तमश्लोकाय नम आर्यलक्षणशीलव्रताय नम उपशिक्षितात्मन उपासितलोकाय नमः साधुवादनिकषणाय नमो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नम इति ॥ ३ ॥

यत्तद्विशुद्धानुभवमात्रमेकं स्वतेजसा ध्वस्तगुणव्यवस्थम् ।
प्रत्यक् प्रशान्तं सुधियोपलम्भनं ह्यनामरूपं निरहं प्रपद्ये ॥ ४ ॥
मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोबधायैव न केवलं विभोः ।
कुतोऽन्यथा स्याद्रमतः स्व आत्मनः सीताकृतानि व्यसनानीश्वरस्य ॥ ५ ॥
न वै स आत्मात्मवतां सुहृत्तमः सक्तस्त्रिलोक्यां भगवान् वासुदेवः ।
न स्त्रीकृतं कश्मलमश्नुवीत न लक्ष्मणं चापि विहातुमर्हति ॥ ६ ॥
न जन्म नूनं महतो न सौभगं न वाङ् न बुद्धिर्नाकृतिस्तोषहेतुः ।
तैर्यद्विसृष्टानपि नो वनौकसश्चकार सख्ये बत लक्ष्मणाग्रजः ॥ ७ ॥
सुरोऽसुरो वाऽप्यथवा नरो नरः सर्वात्मना यः सुकृतज्ञमुत्तमम् ।
भजेत रामं मनुजाकृतिं हरिं य उत्तराननयत्कोसलान् दिवमिति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ऊनविंशे किंपुरुषे भारते चोपवर्ण्यते ।
सेव्यसेवकभावश्च भारतश्रैष्ठ्यमेव च ॥ १ ॥ २ ॥

भर्ता चासौ भगवांश्च तस्य कथाम् ॥ २ ॥

आर्याणि लक्षणानि शीलं व्रतं च यस्मिन् । उपशिक्षितात्मने संयतचित्ताय उपासितोऽनुसृतो लोको येन । साधुवादः साधुत्वप्रसिद्धिस्तस्य निकषणाय निकषाश्मवन्निर्धारस्थानाय परमसीम्न इत्यर्थः ॥ ३ ॥

श्रीरामं परमार्थरूपेण प्रणमति । यदेकं वेदान्तेषु प्रसिद्धं तत्त्वं तत्प्रपद्ये तत्कथम्भूतम् । विशुद्धश्चासावनुभवश्च स एव मात्रा स्वरूपं यस्य विशुद्धत्वे हेतुः प्रशान्तं तत्रापि हेतुः स्वतेजसा स्वरूपप्रकाशेन ध्वस्ता गुणानां विविधा जाग्रदाद्यवस्था यस्मिन् अनुभवमात्रत्वे हेतुः प्रत्यक् दृश्यादन्यत् तत्कुतः अनामरूपम् । ननु वस्तुत एवम्भूतस्यापि जीवस्योक्तसर्वविपर्ययो दृश्यते तत्राह । निरहम् । अहङ्काराभावान्न तथा वैपरीत्यमित्यर्थः । ननु श्रीरामस्य स्वरूपं नैवं प्रतीयते तत्राह । सुधिया पुंसा उपलभ्यत इत्युपलम्भनं शुद्धचित्तेन ब्रह्मत्वेनैवोपलभ्यत इत्यर्थः ॥ ४ ॥

कथं तर्हि दशरथपुत्रत्वं तत्राह । विभोर्मर्त्यावतारस्तु रक्षसो रावणस्य बधाय तस्य मनुष्यादन्यतोऽवध्यत्वात् न केवलमेतावत्किन्त्विह संसारे स्त्रीसङ्गादिकृतं दुःखं दुर्वारमिति मर्त्यानां शिक्षणं च शिक्षार्थमपीत्यर्थः । अन्यथा स्वे स्वरूपे रममाणस्य जगदात्मनः सीताविरहकृतानि व्यसनानीति कुतः स्यात् ॥५॥

विषयासक्त्यभावेन व्यसनानर्हत्वमुपपादयति । न वै स भगवांस्त्रिलोक्यां क्वापि सक्तः यत आत्मवतां धीराणामात्मा सुहृत्तमश्च अतो न स्त्रीकृतं मोहं प्राप्नुयात् न लक्ष्मणं चेति देवदूतेन श्रीरामं संमन्त्रयता विज्ञापितमत्रागतस्त्वया बध्य इति तदैव द्वारि स्थितं लक्ष्मणं दुर्वाससमागतं विज्ञापयितुं प्रविष्टं हन्तुमुद्यतो वसिष्ठवाक्यात्तत्याज तच्च न युज्येतेत्यर्थः ॥ ६ ॥

अतः श्रीराम एव सर्वैः सेव्य इति वक्तुं न तस्य तोषहेतुः सत्कुलजन्मादि किन्तु भक्तिरेवेत्याह । न जन्मेति । महतः पुरुषा-

श्रीधरस्वामिकृतभावार्थदीपिका ।

जन्म महतः श्रीरामस्येति वा । सौभगं सौन्दर्यम् आकृतिर्जातिः यथास्मात्तैर्जन्मादिभिर्विसृष्टांस्त्यक्तानपि नो वनचरान् बत अहो लक्ष्मणस्याग्रजोऽपि सखित्वे कृतवान् ॥ ७ ॥

तस्मात्सुरो वान्यो वा यः कोऽपि श्रीराममेव सर्वप्रकारेण भजेत् । सुकृतज्ञमल्पीयस्यपि भजने बहुमानिनम् उत्तरान् कोसलानयोध्यावासिनः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमिलावृतादिषु वर्षेषु सत्सूपास्यादिकमुक्तमथेदानीं किंपुरुषे भारते च वर्षे तद्वदन्येषां मध्ये भारतवर्षश्रैष्ठ्यं चाहैकोनविंशेन । तत्रादौ किंपुरुषे उपास्यां भगवत्तनुं तदुपासकं जप्यं मन्त्रं चाह । किंपुरुष इति । आदिपुरुषं जगत्कारणभूतं परमपुरुषं लक्ष्मणस्य सौमित्रेरग्रजं सीताया मैथिल्या अभिराममनुरूपं रामं दाशरथिं रामम् ।

रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि ।
इति रामपदेनासौ परं ब्रह्माभिधीयते ॥

इति निरुक्तरामशब्दपुष्कलप्रवृत्तिनिमित्ताश्रयं तस्य श्रीरामस्य यौ चरणौ तयोः सन्निकर्षः सान्निध्यं भजनमिति यावत्तस्मिन्न भिरतं आसक्तो महाभागवतो हनुमानाञ्जनेयः किंपुरुषवर्षस्थैः सहाविरता अविच्छिन्ना भक्तिर्यस्य तादृश उपास्ते ॥ १ ॥

भगवतो भर्तुः श्रीरामस्य कथां गन्धर्वैरुपसमीपे गीयमानां आर्ष्टिषेणेन किंपुरुषवर्षस्थपुरुषश्रेष्ठेन सह सम्यगुपशृणोति स्वयमिदं वक्ष्यमाणमुपांशु गायति जपति ॥ २ ॥

ओंभगवच्छब्दार्थौ पूर्ववत् उत्तमैर्ब्रह्मादिभिः श्लोक्यते स्तूयते उत्तमःश्लोकः निरतिशयः श्लोकः यशो यस्येति वा तस्मै आर्याणां लक्षणानि व्रतानि च शीलानि यस्मिन् उपशिक्षितः संयतः आत्मा चित्तं येन उपाश्रितः लोको येन साधुवादः साधुत्वसिद्धः तस्य निकषणाय निकषाश्मवन्निर्द्धारणास्थानाय ब्रह्मणि कुले साधुः ब्रह्मण्यः तत्र साधुरिति यत्प्रत्ययः "येचाभावकर्मणोः" इति प्रकृतिभावाच्च टिलोपः ।

अप्यहं जीवितं जह्यां त्वां वा सीते ! सलक्ष्मणाम् !
न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः ॥

इत्युक्तरीत्या ब्राह्मणसंरक्षणपक्षैकदीक्षत्वमेवात्र ब्रह्मण्यत्वं स चासौ देवः स्वतेजसा दीप्यमानः अस्पृष्टप्राकृतदोषस्तस्मै । यद्वा । ब्रह्म वेद तत्र साधुः सम्यक् प्रतिपाद्यः सचासौ देवस्तस्मै महापुरुषाय पुंसूक्तप्रतिपाद्यजगत्कारणत्वोपयुक्तकल्याणगुणविशिष्टाय परमपुरुषाय महाराजाय ।

राजाधिराजः सर्वेषां विष्णुर्ब्रह्ममयो महान् ।
ईश्वरं तं विजानीध्वं स पिता सप्रजापतिः ।

इत्युक्तमहाराजाय नमः पदावृत्तिर्गुणभेदाभिप्राया ॥ ३॥

प्रकृतिपुरुषविलक्षणपरमात्मस्वरूपं विशोध्य तच्छ्रीरामरूपेणावस्थितं नमस्करोति । यदिति । विशुद्धं रागाद्यकलुषितं तदनुभवैकमात्रं ज्ञानैकस्वरूपं मात्रचा क्वचिदप्यजडस्वरूपत्वं विवक्षितं विशुद्धानुभवैकमात्रमनेन स्वरूपं निर्दिश्यते स्वतेजसा स्वप्रकाशेन नित्यासङ्कुचितानन्दस्वरूपविषयकधर्मभूतज्ञानेन ध्वस्ता नित्यं निरस्ता गुणा रजआदयः तत्कृतास्तिस्र उत्पत्तिस्थितिमरणभूता अवस्था यस्यं स्वतेजसा ध्वस्तगुणव्यवस्थमित्यनेन प्रकृतिसंसृष्टचेतनव्यावृत्तिः सह्यध्वस्तगुणव्यवस्थः प्रशान्तमशनायापिपासाशोकमोहजरामृत्युरूपोर्मिषड्गुणराहितानन्दस्वरूपम् । यद्वा । विशुद्धशब्देनैन्द्रियकानुभवव्यावृत्तिः प्रशान्तशब्देन नित्यं रागाद्यकलुषितत्वमुच्यतेऽनेन मुक्तचेतनव्यावृत्तिः स हि बद्धावस्थायां रागादिभिः कलुषितः प्रत्यक् स्वस्मै भासमानमनेन पराचोऽचेतनस्य व्यावृत्तिः नह्यचेतनं स्वस्मै अवभासते किन्तु परस्मै एव सुधिया सम्यग्ज्ञानेनोपलम्भनमुपलभ्यते इत्युपलम्भनम् "दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः हृदा मनीषा मनसाभिक्लृप्त„ इतिश्रुत्युक्तयोगपरिशुद्धबुद्ध्योपलभ्यमानमित्यर्थः अनेनैव तत्कारणत्वमप्युपलक्षितम् "कश्च ध्येयः कारणं तु ध्येय" इति ध्येयत्वकारणत्वयोरेकनिष्ठत्वश्रवणात् यदि कारणं तर्हि कारणत्वस्य भाव्यवस्थाविशेषवतः प्रागवस्थायोगित्वरूपत्वाद्देवादिनामरूपाश्रयत्वं स्यात्ततश्च "सत्यं ज्ञानमनन्तं निष्क्रियं निष्कलम्" इत्यादिनिर्विकारित्वश्रवणविरोधस्तत्राह । अनामरूपमिति । न विद्येते स्वमात्रनिष्ठे देवादिनामरूपे यस्य प्रकृतिपुरुषविशिष्टस्यैव कारणत्वाद्देवादिनामरूपयोः स्वविशेषणीभूतप्रकृतिपुरुषगतत्वात्तद्द्वारा सनामरूपत्वेऽपि साक्षादनामरूपमित्यर्थः एवम्भूतं यद्वेदान्तेषु प्रसिद्धं तत्परब्रह्मस्वरूपं नरहरिं पुरुषश्रेष्ठं पुरुषोत्तममिति यावत् एवं च "द्वाविमौ पुरुषौ लोके" इत्यारभ्य "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत„ इति भगवद्गीतोक्तनित्यमुक्तबद्धत्रिविधचेतनव्यावृत्तस्वरूपं विवक्षितं तत्र हि कूटस्थशब्देन मुक्तो नित्यसिद्धश्च चेतन उच्यते उभयोरपि प्राकृतविकारराहित्येनाक्षरकूटस्थशब्दवाच्यत्वात् यद्यपि प्रशान्तशब्देन मुक्तव्यावृत्तिस्तथापि नित्यसिद्धव्यावृत्तये नृहरिमित्युक्तं निरहमिति पाठे त्वनामरूपत्वे निरहं हेतुः अहमर्थान्निर्गतः अहंशब्देनाहङ्कारः प्रकृतिपरिणामविशेषः जीवश्चोच्यते आत्मनोऽप्यहमर्थत्वात्ततश्च निरहं प्रकृतिपुरुषगतविकारातीतं हि यतस्तस्मादनामरूपमिति योजना बोध्या एवंभूतं प्रपद्ये उपायोपेयभावेनाध्यवस्यामीत्यर्थः ॥ ४ ॥

नन्वस्तु परस्य ब्रह्मणोऽनामरूपत्वं श्रीरामस्य त्वनारूपत्वमित्ययुक्तं तस्य मनुष्यनामरूपभाक्त्वात्तत्राह । मर्त्येति । विभोः परस्यैव ब्रह्मण इह लोके श्रीरामरूपेण मर्त्यावतारः मनुष्यावतारः अवतारो नामाजहत्स्वभावस्यैव रूपान्तरपरिग्रहः एवञ्च परब्रह्मणाजहत्स्वभावं मनुष्यसजातीयरूपं परिगृहीतवदिति भावः किमवतारप्रयोजनं तत्राह । मर्त्यशिक्षणं मर्त्यानां संसारदोषज्ञापनेन धर्मसंस्थापनं साधुपरित्राणं प्रयोजनमिति भावः। ननु मर्त्यशिक्षणं नावतारप्रयोजनं किन्तु रावणादिरक्षोवध एवेत्यत्राह। रक्षोवधायैव न केवलमिति । विभोर्मर्त्यावतारो न केवलं रक्षोवधार्थमेवापि तु मर्त्यशिक्षणमेव तस्य प्रधानं प्रयोजनमित्यर्थः तथा चोक्तं भगवता ।

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥

इति विनाशाय चेत्यत्र चशब्दोऽन्वाचयपरः भिक्षामट गामानयेतिवत् दुष्कृतविनाशनमानुषङ्गिकं प्रयोजनमित्यर्थः धर्मो नाम चातुर्वर्ण्यचातुराश्रम्य व्यवस्थयावस्थित ईश्वराराधनरूपपञ्चमहायज्ञादिः तस्य संस्थापनं संसारदोषज्ञापनेन शिक्षणं दुष्कृतविनाशनं तु सङ्कल्पमात्रेणाप्युपपद्यते साधूनां शय्यासनाटनभोजनादिषु भगवता सह वर्तमानानां तं विना क्षणमात्रमपि कल्पसहस्रं मन्वानानां दर्शनस्पर्शनसंभाषणादिभिः परित्राणं सुखीकरणं धर्मसंस्थापनञ्च सङ्कल्पमात्रेणाप्युपपद्यत

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इति भावः यदुक्तं मर्त्यशिक्षणार्थमेवावतार इति तदस्मिन्नवतारे निदर्शयति । कुत इत्यादिना । अन्यथावतारस्य मर्त्यशिक्षणार्थत्वाभावे ईश्वरस्य ।

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ।

इत्युक्तसर्वनियन्तुः दारापहर्तृरावणाद्यन्तरात्मतया दारापहरणादिकं कारयितुः स्वे स्वस्मिन्निरतिशयापरिच्छिन्नानन्दस्वरूपे आत्मनि रमतः उक्तविधस्वस्वरूपानुभवेन नित्यसन्तुष्टस्य विषयासक्तिरहितस्य सीताकृतानि सीताविश्लेषादिभिः कृतानि व्यसनानि दुःखानि कुतः कस्माद्धेतोः स्युः प्रत्येकाभिप्रायं स्यादित्येकवचनं कुतोऽन्यथा स्युः रमत इति पाठस्तु सुगमः सर्वनियन्तुः सर्वान्तरात्मनः स्वानुभवसन्तुष्टस्य श्रीरामस्वरूपेणावस्थितस्य परब्रह्मणः सीताविश्लेषादिकृतव्यसनानुकरणं निरतिशयदुःखावहः संसार इति लोकस्य प्रदर्शयितुमेवान्यथोक्तविधस्य तस्य सीताकृतव्यसनादि न घटन्त इति भावः ॥ ५ ॥

एतदेवोपपादयति । नेति । स श्रीरामरूपेणावस्थितः परमात्मा आत्मवतां प्रशस्तमनसां निर्धूतनिखिलसांसारिकधर्माणां सनकादीनामात्मा सुहृत्तमः स्वाश्रितेषु निरतिशयसौहार्दनिष्ठः आश्रितानां निरतिशयप्रीतिविषयश्च भगवान् ज्ञानशक्तिबलैश्वर्यादिषाड्गुण्यपूर्णः वासुदेवः ।

सर्वत्रासौ समस्तश्च वसत्यत्रेति वै यतः ।
ततः स वासुदेवेति विद्वद्भिः परिकीर्तितः ।

इत्युक्तरीत्या सर्वत्रावस्थितोऽपि तद्गतदोषैरसंस्पृष्टः सर्वं स्वधार्यत्वेन स्वशेषत्वेन च परिगृहीतवांश्च त्रिलोक्यां कृत्स्नजगदन्तर्भूते कस्मिंश्चिदपि शब्दादिविषयभूते वस्तुनि न सक्तः वैशब्दोऽवधारणे न सक्त एवेत्यर्थः यतो न सक्तः अत एव स्त्रीकृतं स्त्रीविश्लेषादिकृतं कश्मलं दुःखं नाश्नुवीत अवतारस्य मर्त्यशिक्षणार्थत्वाभावे स्त्रीकृतं कश्मलमेवम्भूतो न प्राप्नुयादेवान्यथेत्यस्य सर्वत्रानुषङ्गः तथा लक्ष्मणं चशब्दात्सीतां च विहातुं त्यक्तुं नार्हति निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणाद्युपयुक्तशरीरभेदैः शेषत्वं गतस्य भगवतो नित्यानपायिनो न तस्यावताररूपम् ।

भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते ।
अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते ।
कुरुष्व मामनुचरं वैधर्म्यं नेह विद्यते ॥
कृतार्थोऽहं भविष्यामि तव चार्थः प्रकल्पते ।

इति सर्वावस्थोचिताशेषशेषतैकरतिकृतनित्याकिङ्करतां प्रार्थयमानं लक्ष्मणम् ।

नित्यैवैषा जगन्माता लक्ष्मीर्नित्यानपायिनी ।
राघवत्वे भवत्सीता रुक्मिणी कृष्णजन्मनि ।
अन्येष्वप्यवतारेषु विष्णोरेषानपायिनी ।

इत्युक्तविधां नित्यानपायिनीं लक्ष्म्यवताररूपां भगवतीं सीतां च मर्त्यशिक्षणमन्तरेण ।

प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।
मित्रभावेन संप्राप्तं न त्यजेयं कथञ्चन ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ।

इति वदन् कथं त्यक्तुमर्हति अतः केवलं मर्त्यशिक्षणार्थं सांसारिकपुरुषचेष्टामनुसृतवानित्यर्थः सीतालक्ष्मणत्यागस्तु श्रीरामायणे उत्तरकाण्डे प्रसिद्धः अत्रात्मवतामात्मेत्यनेन "अमृतत्वस्य तु नाशास्ति वित्तेन आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इति वीतरागोपास्यत्वप्रतिपादकश्रुत्यर्थप्रत्यभिज्ञानात्तस्य स्नग्रादिभिरकालुष्यं सूचितम् अत एव स्त्रीसंयोगवियोगकृतसुखदुःखाद्यभावश्चावेदितः भगवानित्यनेन षाड्गुण्यपूर्णत्वोक्त्यावाप्तसमस्तकामत्वोक्तिलाभात् स्त्रीसङ्गादिनिमित्तसुखानादरश्चोक्तः सुहृत्तम इत्यनेन ।

न स्मरत्यपकाराणां शतमप्यात्मवत्तया ॥
कथञ्चिदुपकारेण कृतेनैकेन तुष्यति ।

इत्युक्तरीत्या दोषानवेक्ष्य नारतम्यमनालोच्य उपकाराभासमवलम्ब्य स्वाश्रितत्वमात्रेणापरित्यजतो निरतिशयसुहृत्तमस्य मर्त्यशिक्षणमन्तरेण नित्यानपायिनोः सीतालक्ष्मणयोस्त्यागो न घटत इत्युक्तं भवति ॥ ६ ॥

तारतम्यमनादृत्य यस्याश्रितत्वमात्रेण निरतिशयप्रीतिविषयत्वरूपं तदस्मिन्नेवावतारे दर्शयति । नेति महतः शरणागतशब्दभाजं निहीनजन्मादिविशिष्टं पापीयांसमपि रक्षितुं बद्धदीक्षितस्य श्रीरामरूपेणावस्थितस्य ब्रह्मणः जन्म विप्रादिजन्म न तोषहेतुः तथा सौन्दर्याध्ययनसुबुद्धिजातयो न तोषहेतवः तिर्यक्ष्वपि तस्यानुग्रहदर्शनादिति भावः तथाहि निरश्चोभावः तैर्यञ्चं तिर्यक्त्वं तेन सृष्टान्वनौकसः वनस्थानस्मान् कपीन् प्रतिलक्ष्मणाग्रजः पूर्वोक्तविधानन्तावताररूपलक्ष्मणाग्रजो नित्यं तत्सहचरः श्रीरामः सख्यं चकार वतेत्याश्चर्ये सख्य इति पाठे सख्ये विषये नश्चकारेत्यर्थः तैर्यग्विसृष्टानिति पाठे यत् यस्मात्तैर्जन्मसौभगादिभिः विसृष्टान्परित्यक्तानपि नोऽस्मान् सख्ये चकार जन्मादिकतारतम्यमनवेक्ष्य संश्रयमात्रेणास्माभिर्हीनैः सख्यं कृतवान् बताहोऽस्य सुहृत्तमत्वमेवंविधमिति निर्वक्तुमशक्यमित्यर्थः ॥ ७ ॥

यत एवं निरतिशयसुहृत्तमस्ततस्तं मनुजाकृतिं मनुष्याकारं श्रीहरिं सुकृतमुपकाराभिज्ञम्

मय्येव जीर्णतां यातु यत्त्वयोपकृतं कपे ! ।
नरः प्रत्युपकारार्थी विपत्तिमभिकाङ्क्षति ।

इति मां प्रत्युक्तविधोपकाराभिज्ञं पुरुषोत्तमं श्रीरामं सुरासुरनराणां मध्ये यः कश्चित्सर्वात्मना सर्वप्रकारेण केनापि तदीयतासम्पादनप्रकारेणेति यावत् भजेत सेवेत कथं तन्मात्रेणैव तमनुगृह्णातीत्यत्राह । यः श्रीरामः उत्तरकोसलानुत्तरकोसलस्थान् लोकान् तरुगुल्मलतादींश्च स्वदेशवासित्वमात्रमवलम्ब्य दिवं स्वर्गमनयत् प्रापितवान् न केवलं ज्ञानक्रियाभक्तियोगानेवापेक्ष्यानुगृह्णात्यपि तु यत्किञ्चिद्व्याजमात्रमवलम्ब्यानुगृह्णात्ययं श्रीराम इति भावः तथा चोक्तम् श्रीवत्साङ्कमिश्रैः ।

त्वामामनन्ति कवयः करुणामृताब्धे !
ज्ञानक्रियाभजनलभ्यमलभ्यमन्यैः ॥
एतेषु केन वरदोत्तरकोसलस्थाः पूर्वम्
सदूर्वमभजन्त हि जन्तवस्त्वाम् ॥

इति ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सीतामभिरामयतीति सीताभिरामस्तम् ॥ १ ॥
भगवत्कथामित्युक्तेः कस्यचित्पूज्यस्य कथामिति तद्व्यावृत्त्यर्थं

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मार्ष्टीति "अतो सन् भ्रिमाणो बिभर्ति" इति श्रुतेरपि सङ्गृहीतानेनेति ज्ञातव्यम् ॥ २ ॥

आर्यस्य हरेर्लक्षणं शीलं नित्यनिर्दोषत्वं सत्यजगत्स्रष्टृत्वादि व्रतं च यस्य स तथा तस्मै "विश्वं सत्यं मघवानायुवोरिदापश्च न प्रमिनन्ति व्रतं वाम्" इति श्रुतिः उपाश्रिता आत्मानो जीवाः यस्य स तथा तस्मै लोकानुग्रहायाङ्गीकृतविग्रहायेति वा उपासित उपासना युक्तो लोका यमुद्दिश्य स तथा तस्मै साधुरयमिति वादस्य वचनस्य निकर्षणाय सम्यग्विचारकाय । यद्वा । साधूनां वादस्य विवादस्य विरोधस्य निकर्षणाय परिहारकाय ॥ ३ ॥

अहं तं त्वां शरणं प्रपद्य इत्यन्वयः यत्तस्य स्वरूपं विशुद्धानुभवमात्रं प्रकृतिप्राकृतवैकृतसम्बन्धरहितज्ञानात्मकेन्द्रियादिमत्स्वतेजसा स्वरूपसामर्थ्येन ध्वस्ता निरस्ता गुणाः सत्त्वादयश्च तिस्रो जाग्रदाद्यवस्थाश्च येन स तथा तं ध्वस्ता गुणनिमित्ताः तिस्रोऽवस्था येन स तथा तं वा प्रत्यग् जीवाभिमुखावस्थितं प्रशान्तं प्रकृष्टसुखपूर्णं प्रसन्नाकारं वा सुधिया शोभनबुद्ध्योपलक्ष्यत इति सुधियोपलम्भनं प्रत्यक्षपदार्थवत् प्रत्यक्षप्रमाणेन नोपलक्ष्यते प्राकृतनामरूपरहितत्वादित्याह । अनामरूपमिति । अत एव निरहमहङ्कारशून्यम् ॥ ४ ॥

ननु श्रीरामस्य विशुद्धानुभवादिविशेषणानि कथं सङ्गच्छन्ते सीतावियोगादिना दुःखाज्ञानादिप्रदर्शनादिति तत्राह । मर्त्येति । विभोर्व्याप्तस्य हरेर्मर्त्यावतारः मर्त्याकाररूपग्रहणं रक्षोवधायैव न केवलं तावन्मात्रं न भवति किन्तु मर्त्यशिक्षणं यमुद्दिश्य गुरोराज्ञाकरणं शरणागतपालनमभीष्टदानमित्यादिमर्त्यैः कर्तव्यमिति एतत्कुतोऽनेन कृतमिति ज्ञायते इत्याशङ्क्य दशरथाज्ञाकरणवनाभियानसीतान्वेषणाविप्रासव्यसनशरणागतसुग्रीवाभीष्टकरणविभीषणराज्यप्रदानादिभ्योऽवगम्यत इत्याह । कुत इति । स्वे आत्मनि स्वस्वरूपे रमतो रममाणस्य भगवतः "कस्मिन्प्रतिष्ठित इति स्वे महिम्नि,, इति श्रुतेः ॥ ५ ॥

ईश्वरश्चेन्न दुःखानुभवी तदनुभवी चेन्नेश्वर इति तत्राह । नवा इति । स आत्मा इति पदद्वयेन ।"आत्मा वा इदमेकएवाग्र आसीत्" इति श्रुतिं परामृशति वा इत्यनेन "निरनिष्टो निरवद्य" इति श्रुतिं प्रमाणयति हिशब्दो हेत्वर्थः कश्मलं सुरतलक्षणमपि पदेन [1] सीतामपीत्याह । अतो भक्तानुकम्पया कृतावतारस्य श्रीरामेश्वरस्य दुःखभोगाभावेनेश्वरत्वाविरोधात् भक्तिज्ञाने एव तत्प्रीतिजनके न जन्मादिकं वानरासुरादिपापयोनिजातस्यापि भक्तिज्ञानसद्भावे मोक्षस्य सुनियतत्वात्तदुक्तम्

यस्य सम्यग् भगवति ज्ञानं भक्तिस्तथैव च ।
निश्चितस्तस्य मोक्षः स्यात्सर्वपापकृतोऽपि तु ।
यो ममत्वादिना दोषस्सत्वन्यविषयः स्मृतः

इत्यभिप्रेत्याह । न जन्मेति । अन्यविषयस्तद्राहित दुष्टजीवविषय इत्यर्थः महतो महात्मनो मुक्तियोग्यस्य अङ्ग आर्ष्टिषेण ! जन्माजन्मादिस्तोषहेतुर्न भवतीति तत्राह । तैर्यग्विसृष्टानिति । तिर्यक्सम्बन्धियोनौ विसृष्टान् जातान् वराहादियोनेर्वानरयोनेर्निकृष्टत्वद्योतनाय वनौकस इति एतदेवाहापिपदेन गर्हितत्ववाचिना शब्देन कृपाशीलत्वमेव प्रयोजनमित्याह ॥ ६—७ ॥

अतः पुरुषार्थी भक्तिज्ञानाभ्यां श्रीराममेव भजेतेत्याह । सुरोऽसुरो वेति । यो मुमुक्षुः स पुरुषः श्रीराममेव भजेतेत्यन्वयः, असुरादिजातेर्ममत्वादिदोषसम्भवेन रामभजनं कथं सम्भाव्यत, इति चेन्न तस्य मुक्त्ययोग्यासुरजातिविषयत्वाद्योग्यस्य तज्जत्वेऽपि तदभावात् "यो ममत्वादिना दोषः सत्वन्यविषयः स्मृत", इति स्मृतेश्च "महद्देवानामसुरत्वमेकम्" इति श्रुतेः मुक्तियोग्यानामसुरजातित्वमस्तीति ज्ञायते इत्यभिप्रायेणासुर इति । न तु तमोयोग्यजात्यभिप्रायेणेति न केवलं मूलरूपस्यैव मोक्षदातृत्वशक्तिरपि त्ववतार रूपस्याप्यस्तीति आशयेनाह । य इति । उत्तरान् कोसलानयोध्यावासिनो दिवं वैकुण्ठम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मर्त्यभगवत्कथामिति । मर्त्यत्वाद्यमननविशेषेण सुखवैशिष्ट्यं दर्शितम् ॥ १ ॥ २ ॥

नमो भगवते इति । अत्र भगवत इत्यैश्वर्यमुत्तमः श्लोकायेति माधुर्यञ्च दर्शितम् । आर्यत्वं पूज्यत्वम् ॥ ३ ॥

स्वरूपज्ञानमाह । यत्तदिति । यत्तत् प्रसिद्धं श्रीरामचन्द्रस्य दूर्वादलश्यामलं रूपम् । अत्र प्रकाशैकलक्षणवस्तुनः सूर्यादिज्योतिषः प्रकाशकत्वं शौक्ल्यादिमत्त्वमित्यादि धर्मवत् गुणरूपादिलक्षणतत्स्वरूपधर्मस्यापि तदात्मकत्वदृष्ट्या तन्मात्रत्वमुक्तं स एव धर्मस्वरूपशक्तिरिति भगवत्सन्दर्भादौ स्थापितम् अत एवैकमपि तस्याश्च शक्तेर्मायातिरिक्तत्वमाह । स्वतेजसा ध्वस्तगुणव्यवस्थमिति । स्वरूपशक्त्या दूरीभूता त्रैगुण्यात्मिका मायाशक्तिर्यस्मादतः प्रशान्तं सर्वोपद्रवरहितम् । अनुभवमात्रत्वे हेतुः । प्रत्यक् दृश्यादन्यत् "न चक्षुषा पश्यति रूपमस्य यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्" इति श्रुतेः । तत् कुतः अनामरूपम् "एतास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इति प्रसिद्धप्राकृतनामरूपरहितं तत्र हेतुर्निरहमिति । आत्मशब्देन हि श्रुतावस्यां परमात्मनो जीवाख्यशक्तिरूपोऽंश उच्यते । अनेनेति । पृथक् निर्देशात् तद्रूपेण च प्रवेशो नाम देवताशब्दवाच्यतेजोवारिमृल्लक्षणोपाध्यभिनिवेशः । स च तस्य जीवस्य तत्र तत्राहन्ताध्यासादेव भवति । ततोऽन्तर्यामिरूपेण स्वयं तत्र स्थितस्यापि तदध्यासाभावादुपाधिकृतनामरूपराहित्यं युक्तमेवेत्यर्थः । सर्वथाहङ्कारराहित्ये सति व्याकरवाणीति प्रयोगस्यानर्हत्वादिति भावः । ननु श्रीरामरूपं न सर्वैरेवं प्रतीयते तत्राह । सुधियोपलम्भनं शुद्धचित्तेन स्वरूपतयैवोपलभ्यत इत्यर्थः । नातः परम्परम ! यद्भवतः स्वरूपमित्यादि श्रीब्रह्मवाक्यात् ॥ ४ ॥

नन्वेवं भूतस्य मर्त्येषु प्राकट्ये किं प्रयोजनम् उच्यते गौणे सत्यपि प्रयोजनान्तरे मुख्यं तु भक्तेषु लीला माधुर्याभिव्यञ्जनमेवेत्याह । मर्त्येति । तु शब्द आशङ्कानिवृत्त्यर्थः । मर्त्यलोके योऽवतार आविर्भावः स तु साधुजनोद्वेजकरक्षोवधायैव केवलं न भवति किन्तु मर्त्यशिक्षणमपि मर्त्येषु शिक्षणं तत्तदर्थप्रकाशनं यत्तन्मयमपि तत्र बहिर्मुखेषु विषयासक्तवुर्वारताप्रकाशनमानुषङ्गिकमुद्दिश्यन्तु स्वभक्तिवासनेषु चित्ताद्रताकरविरहसंयोगमयनिजलीलाविशेषमाधुर्यप्रकाशनम् । ततस्तदर्थमेवेत्यर्थः । अन्यथा यदि केवलं तद्वधायैव स्यात्तदा आत्मनः

(१) बं जहातीत्यन्वयः ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

परमात्मत्वेन परिपूर्णस्य ईश्वरस्य सर्वान्तर्यामिणः स्वे स्व-स्वरूपे तदेकरूपे वैकुण्ठे च रममाणस्य सीताकृतव्यसनानीति कुतः स्यात् मनसैव तद्भेदे सक्तत्वात्तद्व्यसनासम्भवाच्च । निज-माधुर्यप्रकाशनपक्षे तु तत्तत् सम्भवत्येवेति भावः । अत्र कृपा-रूपं तादृशलीलारूपञ्च माधुर्यमधिकं श्लाघितम् । तत्र श्रीसीता-वियोगदुःखञ्च लीलामाधुर्यान्तर्गतमेवेति न दोष इत्यपि दर्शितम् ॥ ५ ॥

तादृशलीला च न प्राकृतवत् कामादिसक्ततया किन्तु स्वजनविशेषविषयककृपाविशेषेणैवेत्याह । न वै इति । स वै खलु त्रिलोक्यां न सक्तः तत्र हेतुः आत्मा परमात्मा भग-वान् परिपूर्णैश्वर्यादिः वासुदेवः सर्वाश्रयश्चेति । किन्तु आत्म-वतामात्मा स्वयमेव नाथत्वेन विद्यते येषां तेषां स्वविषयक-ममताधारिणां भक्तविशेषाणामित्यर्थः । तेषामेव सुहृत्तमः । तस्माद्यथान्ये स्त्रीकृतं स्त्रीहेतुकं कश्मलमश्नुवते तथा नासावश्नुवीत । अतस्तस्या आत्मवत्त्वेनैव तादृशकश्मलहेतु-तत्प्रीतिविषयतापीति भावः । तथा देवदूतसमयातिक्रमेण आत्मवतोऽपि लक्ष्मणस्य परित्यागो यः स खलु नात्यन्तिक इत्याह । न लक्ष्मणमिति । विहातुमपि नार्हति न शक्नोति अनन्तरं झटित्येव स्वर्गस्थतया स्वागमनं प्रतीक्षमाणैस्तदादिभिः सह स्वधिष्ण्य-मारोहात् अधुनापि तेन सीतादिभिश्च सहैवास्मिन् किंपुरुष-वर्षेऽप्यस्माभिर्दृश्यमानत्वात् । ततो मर्यादारक्षार्थमेव किञ्चित्तद-नुकरणमिति भावः ॥ ६ ॥

पूर्वार्थमेव स्थापयितुं भक्त्येककारणकारुण्यप्रमुखपरम-माधुर्यं सर्वोर्ध्वमाह । द्वाभ्याम् । महतः पुरुषाज्जन्म सौभगं सौन्दर्यं आकृतिर्जातिः यद्यस्मात् तैः जन्मादिभिर्विसृष्टान् त्यक्तान् नोऽस्मान् तदीयपरमभक्तश्रीसीतान्वेषणादिभक्तितुष्टत्वेन अहो बत लक्ष्मणस्य सर्वसद्गुणलक्षितस्य श्रीसुमित्रानन्दनस्या-प्रजोऽपि सखित्वे कृतवान् दास्ययोग्यानपि सह विहारादिना सखी-निव स्वीकृतवानित्यर्थः सुग्रीवमुपलक्ष्य वा तथोक्तम् । तस्मात् सुर इति । पूर्वं स्वरूपज्ञानमयभक्त्या मनुजाकृतावेव परमस्वरूपं दर्शितवान् । सम्प्रति माधुर्यज्ञानमयभक्त्यापि विशिष्य तामेवा-वधारयति । मनुजाकृतिं हरिमिति । तत्रापि श्रीकपिलादिकं व्यावृ-त्तयति । राममिति । उत्तमसमोर्ध्वगुणां सुकृतज्ञं स्वल्पयापि भक्त्या सन्तुष्यन्तम् ॥ ७ ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

रामः किंपुरुषे नारायणः सेव्यश्च भारते ।

सर्वतो भारतश्रैष्ठ्यमूनविंशे निरूप्यते ॥ ० ॥

भर्त्तुरिव भगवतः कथामित्यनेन नारदादिरिव नावतारान्तर-कथायामनुरज्यतीति द्योतितम् ॥ १ ॥ २ ॥

आर्यैर्वा सर्वैः शिरोधार्याणि लक्षणानि चरणतलगतध्वज-वज्रादीनि आजानुबाहुत्वादीनि च शीलानि धीरोदात्तादीनि व्रतानि धर्मनिष्ठत्वादीनि यस्य तस्मै उपशिक्षितात्मने गुरुब्राह्म-णादिशिक्षाग्राहिणे उपासितलोकायेति स्वस्य ब्रह्माद्युपास्य-त्वेऽपि मयास्वाचरणेन रजकपर्यन्ता अपि लोकाः प्रसादनीया इति विचारवत्त्वाल्लोकानां तदुपासितत्वं साधुवादानां ब्रह्मण्य-त्वसत्यसन्धत्वकृपालुत्वादीनां निकषणाय परमोत्कर्षप्राप-काय लोका हि साधुवादैरुत्कृष्यन्ते । रामं प्राप्य साधुवादा अप्युत्कृष्टा भवन्तीत्यर्थः । यथा परमोत्कृष्टस्यापि कनकस्य निकषं प्राप्तस्यैवोत्कर्षो लोके प्रमाणीभवति तद्वदित्यर्थः ॥ ३ ॥

ननु शङ्खचक्रादिमत्त्वगरुडवाहनत्वाद्यैश्वर्यानाविष्कारादस्य वनारस्यास्य ब्रह्मत्वे केचित् संशेरते तत्र ये संशेरते ते संशेरतां नाम अहन्तु साक्षादिमं परब्रह्मरूपमेवानुभवामीत्याह । यदिति । विशुद्धो मायासम्बन्धशून्यो योऽनुभवस्तन्मात्रमेकं केवलं यस्त-देवेमं प्रपद्ये । ननु शुद्धजीवोऽप्येवं भवति तत्राह । स्वतेजसा स्वरूप-शक्त्या दूरीभूता गुणव्यवस्थानरूपा माया शक्तिर्यस्मात्तत् अत एव प्रत्यक् दृश्यादन्यत् "न चक्षुषा पश्यति रूपमस्य यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्" इति श्रुतेः । यतः प्रशान्तं सर्वोपद्रवरहितम् । ननु श्रीरामस्य रूपं नैव प्रतीयते तत्राह । सुधियैव पुंसा उपलभ्यत इत्युपलम्भनं यतो नामरूपम् "एतास्ति-स्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति" प्रसिद्धप्राकृतनामरूपरहितम् । श्रुतौ तिस्र इति तेजोवारिमृदः निर्निश्रयेनाहं प्रपद्ये । यद्वा । अहङ्काररहितं यथा स्यात्तथा तत्प्रपत्तिरपि कृपया तेनैव कारितेति बुद्ध्येत्यर्थः ॥ ४ ॥

ननु तर्हि प्रपञ्चलोके कथमेवं प्रकटीभवतीति तत्राह । मर्त्या-वतारः मर्त्याकारस्य प्रपञ्चलोके प्राकट्यं न केवलं रक्षसो राव-णस्यैव वधाय किन्तु मर्त्यशिक्षणं मर्त्यशिक्षणार्थोऽपि इत्यर्थः । मर्त्या द्विविधाः धर्मवन्तो भक्तिमन्तश्च तेभ्यः क्रमेण स्वस्य धार्मि-कत्वप्रेमवश्यत्वयोः प्रदर्शनया धर्मशिक्षणार्थं प्रेमशिक्षणार्थञ्चे-त्यर्थः । अन्यथा स्वे स्वरूप एव रममाणस्य परमात्मनः सीताविरह-कृतानि व्यसनानि दुःखानि कुतः स्यात् स्युः किन्तु साध्वी स्वभार्या धार्मिकैः सर्वथैव नोपेक्षितव्या तदर्थे प्राप्तानि दुःखान्यपि सह तैरेवेति शिक्षणार्थं स्वस्मिन्न सन्त्यपि दुःखानि दर्शितानीति प्रथमे पक्षे द्वितीये तु सीताविरहकृतानि विषादादीनि कुतो दुःखानि किन्तु प्रेम्णः स्थायिभावस्य विप्रलम्भनरसास्वादनजनि-तानि दुःखत्वेन भासमानानि परमसुखान्येव नतु दुःखानीत्यर्थः । आत्मारामत्वदुःखित्वयोर्युगपदेकत्र विरोधात् न च सीतायां रममाणस्य कुत आत्मारामत्वमिति वाच्यं सीतायाः स्वरूपशक्ति-त्वेनात्मभूतत्वात् । ननु सीतायाः स्वरूपभूतत्वे कथं तद्विरहः सम्भवेत् उच्यते एकमेव परमतत्त्वं चिच्छक्तिवृत्तिभेदेन महा-सारेण प्रेमाख्येनानादित एव द्विधा विभक्तं तिष्ठति ह्लादषडैश्वर्य-मयं केवलं ह्लादमयं च प्रथमं परमेश्वराख्यं द्वितीयं भक्त्याख्यं पुनश्च तेनैव प्रेम्णा स्वस्य चतसृभिर्वृत्तिभिर्द्वितीयं तत्त्वं चतुर्धा विभक्तं दाससखिपित्रादिप्रेयस्याख्यं प्रथमस्य तदेव तत्त्वस्य दास्यादिभावभावितत्वं व्यवस्थापितं प्राकृतेष्वपि जीवेषु यस्त्व-च्छयैतादृशभक्तिसाधनवत्सु भक्तिपरिपाके स्वयमाविर्भूय एतच्च-तुष्कमावेश्य तेऽपि दासादित्वेन यथाकालं प्राप्य चतुष्केण तेन समनुगम्यते पुनरपि तेनैव प्रेम्णा स्थायिभावतां प्राप्तेन स्वशक्त्यै-वाविर्भाविताभिर्विभावादिभिः स्वंरसरूपीकृत्य तदेव तत्त्वयुगलं स्वस्य विषयाश्रयीभावभावितं कृत्वा स्वाधीनीकृत्य योगवियो-गाभ्यां सुखदुःखायितं स्वमाधुर्यमसाधारणमपारमास्वादयता

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कोऽप्यानन्दचमत्कार एव तद्विदां निष्पाद्यते अतद्विदां तु केषाञ्चित् रामकृष्णादीनामप्येतावद्दुःखमनिर्वाच्यमिति केषाञ्चिज्जीवप्रतारणार्थं अनुकृतमित्येवं व्यामोह एव ॥ ५ ॥

तस्य प्रेमवश्यत्वसत्यव्रतत्वब्रह्मण्यत्वादिभिरप्राकृतैर्गुणैरेव एतदुपपद्यते नान्यथेत्याह । नेति । स वै खलु त्रिलोक्यां न सक्तः यत आत्मा परमात्मा तदपि आत्मवतामात्मा सेव्यत्वेन वर्त्तते येषां तेषां दासादीनां सुहृत्तमः यतो भगवान् पूर्णषडैश्वर्यः अतः प्रेमवश्यत्वानङ्गीकारे प्राकृतानामिव स्त्रीकृतं कश्मलं मोहं नाऽनुवीत न प्राप्नुयात् तथैव सत्यव्रतत्वब्रह्मण्यत्वाद्यनङ्गीकारे लक्ष्मणमपि त्यक्तुं नार्हेत । तथाहि देवदूतेन श्रीरामं मन्त्रयता विज्ञापितम् । अत्रागतस्त्वया वध्य इति । तदैव द्वारि स्थितं लक्ष्मणं दुर्वाससं विज्ञापयितुं प्रविष्टं हन्तुमुद्यतो वशिष्ठवाक्यात्तत्याजेति तस्मादेतादृश्या लीलया प्रेमाणं धर्मं च शिक्षयामासेति युक्तमुक्तं मर्त्यशिक्षणमिति ॥ ६ ॥

तत्तत्सर्वगुणाकरस्य तस्य कृपया निरुपाधिं विशिष्याह । न जन्मेति । महतो वंशाज्जन्म महतः श्रीरामस्येति वा । तैः सज्जन्मादिभिर्लक्ष्मणस्य सर्वसल्लक्ष्म परिपूर्णस्य सुमित्रासूनोरग्रजोऽग्रजत्वेन तमपि दास्ये विदधानोऽस्मान् सर्वसल्लक्षणरहितानपि सख्ये चकारेति सुग्रीवमुपलक्ष्योक्तिः ॥ ७ ॥

तस्माद्भजनीयेषु सर्वेष्ववतारेषु मध्ये राम एव कृपासिन्धुरतिशयेन भजनीयो यद्भजने सर्व एवाविशेषेणाधिकारीत्याह । सुर इति । यः कोऽपि सर्वात्मना सर्वप्रकारेण उत्तरान् कोसलान् अयोध्यावासिनः सशरीरानेव दिवं वैकुण्ठम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एकोनविंशे किंपुरुषे भारते च सेव्यसेवकभावः भारतश्रैष्ठ्यं च वर्ण्यते । किंपुरुषवर्षे इति ॥ १ ॥

आर्ष्टिषेणो गन्धर्वमुख्यस्तेन राजर्षिरष्टर्षिषेणस्तस्यां दिशि महाभारते प्रसिद्धस्तेन सह वा भर्ता चासौ भगवांश्च तत्कथाम् ॥ २ ॥

आर्याणि उत्तमानि लक्षणानि शीलं अनश्च यस्मिन् तस्मै उपशिक्षितानां सदनुशिष्टानामात्मोपास्यस्तस्मै उपासितः धर्मशिक्षार्थमनुसृतो लोको येन तस्मै साधुवादस्य साधुत्वप्रसिद्धेर्निकषणाय परीक्षास्थानाय धर्मधुरन्धरशिरोभूषणायेत्यर्थः ॥ ३ ॥

उक्तगुणगणनिधिं वेदान्तैकवेद्यं श्रीरामाख्यं ब्रह्मैव मुमुक्षुध्येयमित्याह । यदिति । यदेकं निःसमानातिशयं वस्तु तत्प्रपद्ये कीदृशं विशुद्धानां ध्यातृणामनुभवो ययोस्ते मात्रे नामरूपे यस्य तत् अप्राकृतनामरूपमित्यर्थः स्वतेजसा ध्वस्ता हेयाः गुणाः रागादयः विविधा अवस्था च यस्मात्तत् प्रत्यग् जीवः शान्तः यस्मात् स्मरणीयात्तत् सुधिया उपलभ्यते इत्युपलम्भनम् । अनामरूपं प्राकृतनामरूपशून्यम् अहमेवंभूतोऽस्मीत्यभिमानशून्यम् ॥ ४ ॥

एवंभूतस्य मर्त्येषु अवतारस्तु रक्षोवधाय न केवलं मर्त्यशिक्षणमपि तु मर्त्यचेष्टानुकरणेन मर्त्यैरेवं यथाशक्ति गुर्वाज्ञानुपालनस्वदारसन्तोषधार्मिकाधार्मिकजनानुग्रहादिकं कर्तव्यमिति शिक्षार्थमित्यर्थः अन्यथा मर्त्यानुकरणं विना आत्मनः सर्वात्मनः स्वे स्वात्माराणो निजानन्दे रमतः सीताविरहकृतानि व्यसनानि कुतः स्युः ॥ ५ ॥

एतदेवोपपादयति । नेति । त्रिलोक्यामनित्यविभूतौ न सक्तः यतो वासुदेवो भगवान् अत एव स्त्रीकृतं सूर्पणखाकृतं कश्मलं सीताविरहादिरूपं नाऽनुवीत लक्ष्मणं विहातुं च नार्हति एवं हि श्रीरामायणे कथा एकदायोध्यायां यथासुखं वर्त्तमानं श्रीराममेकान्ते सम्मन्त्रयता देवदूतेन विज्ञापितमत्रागतस्त्वया वध्य इति तदैव द्वारि स्थितं लक्ष्मणं दुर्वाससमागतं विज्ञापयितुं प्रविष्टं दृष्ट्वा सत्यप्रतिज्ञः प्राणादपि प्रियतरं भ्रातरं हन्तुमुद्यतस्तदा बन्धुपरित्यागोऽपि वध एवातो लक्ष्मणं त्यक्त्वा सत्यप्रतिज्ञ एवेति वसिष्ठवाक्यात्तत्याज तदुभयं मर्त्यचेष्टानुकरणमन्तरेण न युज्येतेत्यर्थः ॥ ६ ॥

सौभगं सौन्दर्यम् आकृतिर्जातिः तैर्जन्मादिभिर्विसृष्टांस्त्यक्तान् ॥ ७ ॥

अतः सुरादिः यः कश्चित्सभ्यन्यो वा राममेव भजेतेत्यन्वयः उत्तरान् कौसलान् अयोध्यावासिनः ॥ ८ ॥

भाषाटीका

श्रीशुकदेवजी बोले किंपुरुष वर्षमें आदि पुरुष भगवान् लक्ष्मणजी के बडे भ्राता सीताजी के रमाने वाले श्रीरामचन्द्रजी को उनके चरणारविन्द के समीप में निरत परम भागवत श्रीहनुमान्जी किंपुरुषों के साथ में निर्विघ्न भक्ति से उपासना करते हैं ॥ १ ॥

गन्धर्वों की गाई अपने पति श्रीरामजी की कथा को आर्ष्टिषेण के साथ सुनते हैं आप स्वयं इस स्तुति का गान करते हैं ॥ २ ॥

भगवान् उत्तमश्लोक श्रेष्ठों के लक्षणों से शील आचारों से युक्त अपने मन को वश करने वाले उत्तम लोकों के अनुसरण करने वाले सत्पुरुषों के वाद के परमसीमा ब्रह्मण्यदेव महापुरुष महाराज श्रीरामजी के अर्थ नमस्कार है ॥ ३ ॥

जो वह विशुद्ध अनुभव स्वरूप तत्त्व है अपने तेज से गुणों की नाना अवस्थाओं का नाश करने वाला है साक्षी स्वरूप शान्त स्वरूप शुद्ध बुद्धि से प्राप्त होने योग्य प्राकृत नाम रूप अहङ्काररहित सो आप हैं जिनके मैं शरणागत हूँ ॥ ४ ॥

आपका जो मनुष्य अवतार है सो केवल राक्षसों के वध के ही लिये नहीं हैं किन्तु मनुष्यों के शिक्षा के अर्थ है ऐसा न होता तो स्वयं आत्मस्वरूप में रमने वाले ईश्वर को सीताजी के वियोग के दुःख क्यों दीखते ॥ ५ ॥

मनुष्य लीला न होती तो आत्मज्ञानियों के भी आत्मा अति सुहृत् वे भगवान् वासुदेव तीनों लोकों में कहीं आसक्त होने वाले नहीं हैं तो सीताजी के वियोग के दुःख को न प्राप्त होते लक्ष्मणजी को भी नहीं छोडने को योग्य हैं ॥ ६ ॥

श्रीरामचन्द्रजी महापुरुष के सन्तोष का हेतु एक प्रेम छोडकर न उत्तम जन्म है न सुन्दरता है न वचन की मधुरता है न उत्तम जन्म है न उत्तम बुद्धि है न उत्तम जाति है क्योंकि

भारतेऽपि वर्षे भगवान्नरनारायणाख्य आकल्पान्तमुपचितधर्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोपलम्भनमनुग्रहायात्मवतामनुकम्पया तपोऽव्यक्तगतिश्चरति ॥ ९ ॥

तं भगवान्नारदो वर्णाश्रमवतीभिर्भारतीभिः प्रजाभिर्भगवत्प्रोक्ताभ्यां साङ्ख्ययोगाभ्यां भगवदनुभावोपवर्णनं सावर्णेरुपदेक्ष्यमाणः परमभक्तिभावेनोपसरति इदं चाभिगृणाति ॥ १० ॥

ओंनमो भगवते उपशमशीलायोपरतानात्म्याय नमोऽकिञ्चनवित्ताय ऋषिऋषभाय नरनारायणाय परमहंसपरमगुरव आत्मारामाधिपतये नमो नम इति ॥ ११ ॥

गायति चेदम् ॥ कर्तास्य सर्गादिषु यो न बध्यते न हन्यते देहगतोऽपि दैहिकैः ।
द्रष्टुर्न दृग् यस्य गुणैर्विदूष्यते तस्मै नमोऽसक्तविविक्तसाक्षिणे ॥ १२ ॥
इदं हि योगेश्वर ! योगनैपुणं हिरण्यगर्भो भगवान् जगाद यत् ।
यदन्तकाले त्वयि निर्गुणे मनो भक्त्या दधीतोज्झितदुष्कलेवरः ॥ १३ ॥
यथैहिकामुष्मिककामलम्पटः सुतेषु दारेषु धनेषु चिन्तयन् ॥
शङ्केत विद्वान् कुकलेवरात्ययाद्यस्तस्य यत्नः श्रम एव केवलम् ॥ १४ ॥
तन्नः प्रभो ! त्वं कुकलेवरार्पितां त्वन्माययाहंममतामधोक्षज ! ।
भिन्द्याम येनाशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः स्वभावमिति ॥ १५ ॥

भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवो मलयो मङ्गलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लकः सह्यो देवगिरिर्ऋष्यमूकः श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः शुक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्द्धनो रैवतकः ककुभो नीलो गोकामुख इन्द्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलास्तेषां नितम्बप्रभवा नदा नद्यश्च सन्त्यसङ्ख्याताः ॥ १६ ॥

भाषाटीका ।

श्रीलक्ष्मणाग्रजने तो इन सब गुणों से हीन वानरों को सखा बनाया है ॥ ७ ॥

इस हेतु से देवता हो अथवा मनुष्य हो अथवा दूसरी योनि का हो जो जीव अतिकृतज्ञ मनुष्यरूपी सब कोसलवासी जीवों को वैकुण्ठ को लेगये हैं तिन श्रीरामजी को अवश्य भजे ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उपचितैर्धर्मादिभिरात्मोपलभ्यते येन तत्तपश्चरति तत्रोपशम इन्द्रियाणां संयमः उपरमो निरहङ्कारता आत्मवतामनुग्रहाय न स्वार्थमीश्वरत्वात् ॥ ९ ॥

भगवदनुभाव उपवर्ण्यते येन पञ्चरात्रेण तत् सावर्णेर्मनोः उपसरति सेवते ॥ १० ॥

उपरतानात्म्याय निरहङ्काराय ॥ ११ ॥

असक्तश्चासौ विविक्तश्च साक्षी च तस्मै नमः असक्तत्वं दर्शयति । अस्य विश्वस्य सर्गादिषु कर्तापि यो न बध्यतेऽहं कर्तेति न मन्यते । विविक्तत्वमाह । देहगतोऽपि दैहिकैः क्षुत्पिपासादिभिर्यो न हन्यते नाभिभूयते साक्षित्वमाह । यस्य द्रष्टुरपि सतो दृष्टिर्गुणैर्दृश्यैर्न विदूष्यते न विक्रियते ॥ १२ ॥

योगकौशलं निरूपयन् योगं प्रार्थयते । इदमिति त्रिभिः हे योगेश्वर ! हिरण्यगर्भो यद्योगनैपुणं जगाद इदमेव तत् किम् जन्मप्रभृति भक्त्यान्तकाले पुमांस्त्वयि मनो धारयेदिति यत् कथंभूतः सन् उज्झितं दुष्कलेवरं तदभिमानो येन ॥ १३ ॥

अन्यथा तस्य शास्त्राभ्यासादिश्रमो व्यर्थ इत्याह । यथैहिकामुष्मिककामेषु लम्पटो मूर्खः सुतादिषु योगक्षेमं चिन्तयन्कुत्सितस्य कलेवरस्यात्ययान्मृत्योः शङ्कते तथा विद्वानपि सन् यः शङ्केत तस्य यत्नः शास्त्रश्रवणादिः श्रम एव ॥ १४ ॥

यस्माद्विदुषोऽपीयमेव दशा तस्माद्धे प्रभो! अधोक्षज! त्वमेव नो योगं विधेहि । कीदृशम् । त्वयि स्वभावं सहजप्रासमारूपम् येन योगेन वयं त्वन्मायया नः कुकलेवरेऽर्पितामहंममतां चाशु भिन्द्याम त्यजेम । सुदुर्भिदामुपायान्तरैः सर्वथा त्यक्तुमशक्याम् ॥ १५ ॥

इलावृतवदस्मिन्नपि वर्षे सरितः शैलाश्च सन्ति नितम्बप्रभवा स्तटेभ्यः सम्भूताः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

अथ भारते वर्षे उपास्यं भगवद्रूपम् उपासकं जप्यमानं मन्त्रं स्तोत्रं चाह। भारतेऽपीति भारतेऽपि वर्षे भगवान्नारायणाख्यो वदरिकाश्रमे। आकल्पान्तं कल्पपर्यन्तमव्यक्तगतिरेतदर्थमेवं करोतीतीतरैरविज्ञातचेष्टस्तपश्चरति कथंभूतम् उपचिताः प्रवृद्धा धर्मादयो येन तदुपचितधर्मज्ञानवैराग्यैश्वर्ययोगे। परमात्मोपलम्भनमात्मा उपलभ्यते साक्षात्क्रियते येन तदात्मोपलम्भनं ततः कर्मधारयः तत्र धर्मः कर्मयोगः ज्ञानमात्मयाथात्म्यज्ञानयोगः वैराग्यं मनोनिग्रहः ऐश्वर्यमणिमादीनि योगः प्राणजयः उपरमो बाह्येन्द्रियजयः किमर्थमेवमनीश्वरवत्तपश्चरतीत्यत्राह। आत्मवतामनुग्रहायात्मवतोऽनुग्रहीतुं मुमुक्षव एवम्विधं तपः कुर्युरित्येवं शिक्षयाताननुग्रहीतुमिति यावत् आत्मवत्स्वनुग्रहे तस्य कृपैव कारणमित्याशयेनाह। अनुकम्पयेति। ॥ ९ ॥

तं श्रीमन्नारायणं भगवान् षाड्गुण्यपूर्णः नारदः वर्णाश्रमवतीभिर्वर्णाश्रमधर्मानुवर्त्तनीभिः भारतीभिर्भरतवर्षवासिनीभिः प्रजाभिः सह साङ्ख्यमात्मयाथात्म्यज्ञानयोगः योगोऽसङ्गवर्णाश्रमोचितपञ्चमहायज्ञादिरूपः कर्मयोगः आभ्यां भगवत्प्रोक्ताभ्यां भगवता गीताचार्येण प्रोक्ताभ्याम् "अशोच्यानन्वशोचस्त्वम्" इत्यारभ्य "एषा तेऽभिहिता साङ्ख्ये बुद्धियोगे त्विमां शृणु" इत्यारभ्य चोक्ताभ्यां गीताया वेदवदनादित्वादेवमुक्तं परमभक्तिभावेन परमभक्तिरूपेण भावेनाभिप्रायेण उपसरति अनुवर्तते कर्मयोगज्ञानयोगानुगृहीतनिरतिशयभक्तियोगेनानुवर्तत इत्यर्थः कथंभूतः भगवतोऽनुभवः उपवर्ण्यते येन पञ्चरात्रेण तद्भगवदनुभवोपवर्णनं तत्पञ्चरात्रं सावर्णेर्मनोरुपदेक्ष्यमाणः इदमुदाहरति ॥ १० ॥

मन्त्रमाह। ओमिति। ॐ भगवच्छब्दार्थौ पूर्ववत् परमं निरतिशयं शीलं स्वभावो यस्य तस्मै सौशील्यविशिष्टायेत्यर्थः महतो मन्दैः सह नीरन्ध्रेण संश्लेषस्वभावत्वं सौशील्यम् अयमाश्रयणसौकर्यापादको गुणः इदं वात्सल्यसौलभ्यस्वामित्वानामप्याश्रयणसौकर्यापादकानामुपलक्षणमुपरतानात्म्यायानात्मा देहेन्द्रियादिः तस्य भावः प्रकारः धर्मः अशनायादिषडूर्मिवर्गः उपरतं निरस्तमनात्म्यं यस्माद्येन वा तस्मै अकिञ्चनवित्ताय नास्ति किञ्चन प्रार्थनीयं येषां तेऽकिञ्चना निष्कामा मुमुक्षवस्तेषां वित्ताय निधये नरनारायणरूपेणावतीर्णाय परमहंसाय पर उत्कर्षो मा न भवति हंसो जीवो यस्मात् पृषोदरादित्वात् माशब्दस्य ह्रस्वः यद्वा। हन्ति निरस्यति निखिलान् दोषानिति हंसः पृषोदरादित्वात् साधुः "मवेद्वर्णागमाद्धंस" इत्यानुशासनिकस्मरणात् परमश्चासौ हंस इति कर्मधारयः परमः निरतिशयकल्याणगुणगणः हंसो निरस्तनिखिलदोषः तस्मै परमगुरवे निरतिशयहितोपदेष्ट्रे आत्मारामाय नित्यासङ्कुचितापरिच्छिन्नानन्दरूपस्वात्मानुभवपरायाधिपतये भूतानामधिपतये "एष भूताधिपतिः" इति श्रवणात् नमस्काराभ्यासो गुणभेदाभिप्रायकः ॥ ११ ॥

इदं वक्ष्यमाणश्लोकचतुष्टयं स्तुतिरूपं गायति पठतीत्यर्थः यद्वा। इदं वक्ष्यमाणं गुणजातं गायति तावज्जगत्कारणं चिदचिद्विलक्षणं निरस्तनिखिलदोषं निस्समाभ्यधिकं सर्वज्ञं नमस्करोति। कर्तेति। अस्य कृत्स्नस्य चिदचिदात्मकस्य जगतः सृष्ट्यादौ कर्त्तापि यो न बध्यते नाभिमन्यते

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः
तस्य कर्तारमपि मां विद्ध्यकर्त्तारमव्ययम्

इति भगवदुक्तरीत्या कृत्स्नजगत्स्रष्टारमात्मानं तद्गुणकर्मायत्तदेवमनुष्यपशुपादपतारतम्येन कर्त्तारं न मन्यते सृज्यानां देवादिपदार्थानां देवत्वमनुष्यत्वादिनानाविधसर्गकर्मणि सृज्यशक्तीनामेव गुणकर्मणां प्रधानकारणत्वादात्मानं गुणकर्मानुगुणकर्त्तारं मन्यते न तु साक्षाद्वैचित्र्यं प्रतिहेतुं मन्यत इत्यर्थः तथा देहगतोऽपि अन्तरात्मतया देवादिदेहस्थोऽपि दैहिकैर्देहसम्बन्धप्रयुक्तैः सुखदुःखादिभिर्यो न हन्यते नाभिभूयते एवं द्रष्टुर्जीवस्य यद्दृश्यमचेतनं प्रधानं तस्य गुणैः रजआदिभिर्यो न दृश्यते न संकुचितज्ञानो भवति कर्तृत्वेऽपि मोहाभावात् देहस्थत्वेऽपि दुःखाभावात् त्रिगुणात्मकप्रधानशरीरकत्वेऽपि गुणकृतज्ञानसङ्कोचाभावाच्च जीवाद्वैलक्षण्यमुक्तं द्रष्टुर्जीवस्य गुणैः संसारित्वादिभिर्दृश्यस्य गुणैर्जात्यादिभिश्च न दूष्यत इति वा योजना एवंचिदचिद्वैलक्षण्यमुक्तमत एवासक्तो रागादिरहितो विविक्तोऽसहायः स्वतुल्याधिकद्वितीयवस्तुरहितः साक्षी सर्वस्य चेतनाचेतनात्मकस्य जगतः द्रष्टा चेत्यसक्तविविक्तसाक्षी तस्मै ते नमः "कर्त्तास्य सर्गादिषु यो न बध्यते" इत्यपि पाठः तत्रास्य जगतः सर्गादौ सृष्टिस्थितिलयेषु कर्त्तापि न बध्यते असक्तत्वाज्जीवस्तु स्वगुणानुगुणपरमात्मायत्तः कर्त्ता स्वकर्मायत्तभोगसङ्गात् स्वातन्त्र्येण कर्त्तास्मीत्यभिमानेन बध्यते संसारी भवति परमात्मा जगत्सर्गादौ निरपेक्षः कर्त्तापि न बध्यते जगद्व्यापारस्य लीलारूपत्वेन सुखदुःखादिफलभोगार्थत्वाभावात्तत्रासक्त्यभावादितिभावः तथा देहगतोऽपि दैहिकैः देहसम्बन्धप्रयुक्तैः सुखदुःखादिभिर्न हन्यते नाभिहतो भवति कुतः विविक्तत्वान्निरस्तनिखिलदोषतया समस्तकल्याणगुणाकरतया च जीवपर्यन्तेभ्यो देहेन्द्रियादिभ्यो विलक्षणत्वाद्विलक्षणस्वस्वरूपावलोकनशीलत्वादितिभावः तथाच शारीरकं सूत्रम्। न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ३।२।११ इति सर्वत्रावस्थानतोऽपि न परस्य ब्रह्मणोऽपुरुषार्थगन्धः सम्भवति कुतः सर्वत्र श्रुतिस्मृतिषु परं ब्रह्मोभयलिङ्गमुभयलक्षणं निरस्तनिखिलदोषमनन्तकल्याणगुणाकरमभिधीयत इति तदर्थः "अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प" इत्यादयः श्रुतयः।

समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशाकृतभूतसर्गः।
परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे ॥

इत्यादयः स्मृतयः अयं भावः जीवस्य कर्मवश्यत्वात्तत्कर्मानुगुण्येन तत्तद्वस्तुसम्बन्धो ऽपुरुषार्थ एव स्यात्परस्य तु ब्रह्मणः स्वाधीन स एव सम्बन्धस्तद्विचित्रनियमनरूपलीलारसायैव स्यादिति दिक्। तथाच श्रुतिः "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति,, इति तथा द्रष्टुः स्वस्वकर्मानुगुणज्ञानाश्रयस्य "अनृतेन हि प्रत्यूढास्तेषां सत्यानां सतामनृतमपिधानम्" इति श्रुत्युक्तरीत्या कर्मणा तिरोहितज्ञानस्य जीवस्य यद्दृश्यं कर्मायत्तदर्शनविषयं यत्प्रधानं तस्य गुणैः रजआदिभिर्न दूष्यते च गुणपरवशो न भवति कुतः साक्षित्वात्साक्षाद्द्रष्टृत्वात् "साक्षाद्द्रष्टरि संज्ञायाम्" इति साक्षिशब्दो व्युत्पादितः साक्षिशब्दोऽवयववृत्त्या समुदायरूढ्या च भगवत्येव मुख्यवृत्तः अव्ययः पुरुषः साक्षीति भगवन्नामसहस्रपाठात् अतः संज्ञायामित्यस्य न विरोधः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

द्रष्टुरिति दृष्टान्तार्थं यथा द्रष्टा दृश्यगुणैर्दूष्यते तथा साक्षी परमात्मा न दूष्यत इति अयं भावः जीवस्य स्वकर्मानुगुणमेव दृश्यदर्शनं न तु साक्षात्साकल्येनेति गुणैर्दूषणं परमात्मनस्तु निरुपाधिकं साक्षाद्दृश्ययाथात्म्यदर्शनमिति न गुणवश्यता किन्तु गुणानामेव परमात्मवश्यतेति एवं भूताय असक्तसाक्षिणे नम इत्यर्थः ॥ १२ ॥

एवं जीवपरयोर्हेयास्पदत्वतत्प्रत्यनीकत्वे उक्ते इदानीं जीवस्य हेयनिरसनोपायो देहाद्यनासक्त्या परमात्मनस्तव भक्तिरेव सैव पुरा चतुर्मुखेन मह्यमभिहितेत्याह । इदं हीति । हे योगेश्वर ! हिरण्यगर्भः योगे यन्नैपुणं कौशलं जगाद तदिदमेव किन्तदित्यत्राह । उज्झितदुष्कलेवरः उपेक्षितशरीरः कलेवरशब्दः तदनुबन्धिनामप्युपलक्षकः उपेक्षितदेहानुबन्धी पुमान् भवात् प्रभृति अन्तकाले अन्तकालपर्यन्तं भक्त्या ध्यानयोगेन त्वयि मनो धारयेत्स्थिरं कुर्यादिति यत् ॥ १३ ॥

एवं देहाद्युपेक्षया परमात्मभक्तिरेव जीवस्यानर्थपरिहारिणीत्युक्तमिदानीमुक्तविधभक्तिरहितस्य केवलशास्त्राध्ययनादिप्रयासो निष्फल इत्याह । यदेति । ऐहिकेषु पशुपुत्रान्नादिष्वामुष्मिकेषु स्वर्गादिषु कामेषु लम्पटः आसक्तः सुतादिषु विषयेषु चिन्तयन् तेषामनपायोपेयत्वं चिन्तयन्नित्यर्थः विद्वानधीतशास्त्रोऽपि कुत्सितस्य कलेवरस्यात्ययान्मृत्योः शङ्केत बिभीयात् तस्य यो यत्नः शास्त्राध्ययनादिरूपः स केवलं श्रम एव निष्फल एव मरणभीतस्य शास्त्रश्रमो निष्फल इत्यर्थः ॥ १४ ॥

यतो विदुषोऽप्यियमेव दशा तत्तस्मात्प्रभो ! हे अधोक्षज ! त्वमेव नो योगं विधेहि सम्पादय त्वत्प्रसादादेव नो योगसिद्धिरिति भावः ईदृशं योगं त्वयि स्वभावजं निरुपाधिकं कामानुपहतमिति यावत् येन योगेन वयं त्वन्मायया नः कुत्सिते कलेवरेऽर्पितामाहितां क्षुदुर्भिदामुपायान्तरैः सर्वदा त्यक्तुमशक्यामहंममतामहङ्कारममकाररूपामविद्यामाशु भिन्द्याम त्यजेम त्वत्प्रसादायत्तत्वद्भक्तियोग एवानर्थनिवर्त्तक इति भावः ॥ १५ ॥

एवं भारते उपास्यभगवद्रूपादिकमुक्तमथास्मिन्नेव वर्षे प्राधान्येन पुण्यतमान् पर्वतान्नदीश्चाह । तत्र प्रथमं पर्वतान् संग्रहेणाह । भारतेऽपीत्यपिशब्दाद्वर्षान्तरेऽप्यनुक्ताः पर्वता नद्यश्च सन्तीति सूचितम् सरितः शैलाश्च सरिच्छैलाः बहवः सन्ति तावच्छैलानुद्दिशति । मलय इत्यादिना । कामगिरिरित्यन्तेन अन्ये च बहवः सन्तीत्याह । अन्ये च शतशः सहस्रशः शैलाः सन्तीत्यनुषङ्गः नदीर्वक्ष्यमाणास्तासामुत्पत्तिस्थानं प्रभावञ्चाह । तेषामिति । तेषां शैलानां नितम्बेभ्यस्तटेभ्यः प्रभवाः सम्भूताः नदाः प्रायेण पश्चिमाभिमुखाः न पूर्वाभिमुखा असङ्ख्याताः सन्ति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उपशमोऽधिकभगवन्निष्ठा उपरमो मनआदीन्द्रियनिग्रहस्तपश्चरतामिवमपेक्षितमिति दर्शयितुं न तु स्वस्य नित्यनिगृहीतेन्द्रियत्वात् आत्मनः स्वरूपस्योपलम्भो नित्यापरोक्षता यस्य स तथा ॥ ९ ॥

साङ्ख्ययोगाभ्यां यथार्थज्ञानतत्साधनाभ्यां भगवतो हरेरनुभावस्य माहात्म्यस्योपवर्णनं प्रतिपादनं यस्मिंस्तत्तया तत्पश्चरात्रं सावर्णिमनोः उपसरत्युपास्ते ॥ १० ॥

उपरतानात्म्याय निवृत्तदेहादिधर्माय आत्मारामाणामधिपतये ॥ ११ ॥

सर्गादिषु कर्ता तथापि देवदत्तवद्यो न बद्ध्यते देहगतोऽपि दैहिकैर्देहसम्बन्धिभिर्दोषैः यो न हन्यते न पीड्यते द्रष्टुर्यस्य दृग् गुणैर्दर्शनयोग्यरूपादिभिः न दूष्यते दर्शननिमित्तपापेन सम्बद्ध्यते तस्मै नमः अत्र हेतुगर्भविशेषणमाह । असक्तेति । असङ्गत्वात् विलक्षणत्वात् साक्षित्वात् बन्धनादिदोषाभाव इत्यर्थः ॥ १२ ॥

बहुजन्मार्जितधर्माद्युपायपाटवमिदमित्याह । इदं हीति । हिरण्यगर्भो योगनैपुणं योगपाटवमिदमेव जगाद इदं किं तत्राह । यदीति । निर्गुणे त्वयि भक्त्यान्तकाले मनो निधाय दुष्कलेवरमुज्झतीति यत्तदिदमिति भावः "यस्य सम्यक् भगवति ज्ञानं भक्तिस्तथैव च" इत्यादिवाक्यमत्रापि प्रमाणमिति बोद्धव्यम् ॥ १३ ॥

यत एवं सर्वमनित्यं तस्माद्विदुषाज्ञवद्देहत्यागादौ शङ्का भयं न कार्यमित्याह । यथेति । यथैहिकामुष्मिककामेषु लम्पटो रागी सुतादौ नाशं चिन्तयन् शङ्केत मयि मृते सुतादयो नाशं गमिष्यन्तीति तथा विद्वानपि यदि कुशरीरत्यागाच्छङ्केत तर्हि तस्य यः शास्त्रश्रवणादौ प्रयत्नः स केवलं श्रम एव न किञ्चित्फलमित्यर्थः अतो न शङ्कितव्यमित्यर्थः ॥ १४

यतस्त्वदनुगृहीतमेव सफलमत इमं त्वदनुग्रहजनकमुपायमस्मभ्यं देहीत्याह । तन्न इति । योगं ज्ञानं ध्यानमुपायं वा येन योगेन अहंममतासम्भूतदोषस्य मुक्तिपरिपन्थित्वात्त्याशः प्रार्थ्यते तदुक्तम् । "यो ममत्वादिना दोषः स त्वन्य (१) विषयः स्मृत" इति ॥ १५ ॥

इदानीमस्मिन् भारतवर्षे पर्वततत्तटजा नदीः प्राधान्येन वक्ति । भारत इति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नरनारायणाख्य इति द्वयोरभेदो दर्शितः । आत्मवतामात्मा स एव भगवान् नाथत्वेन विद्यते येषां तेषां भक्तानामनुकम्पया हेतुना तद्विषयकानुकम्पाधीनः सन् तेषां मङ्गलार्थं स्वयमेव तपश्चरतीत्यर्थः । अहो एतावानपि तदनुकम्पापरिणाम इति भावः तमेव दर्शयति । उपचितेति । स्वयमेव कृतैस्तैस्तैरङ्गैस्तेष्वात्मनो भगवतः स्फूर्त्तिहेतुकमित्यर्थः । तर्हि लोकैस्तथा नावगम्यते तत्राह । अव्यक्तगतिरिति । ईश्वरस्य स्वार्थं तदसम्भवात् । व्यक्तगतिरिति वा ॥ ९ ॥

प्रजाभिः सह ताश्च मुनिरूपा एव न तु सर्वाः । भगवता नरनारायणाख्येन प्रोक्ताभ्यां साङ्ख्ययोगाभ्यां सारासारविवेकभगवन्निष्ठाभ्यां यद्भगवदनुभवोपवर्णनं तत्सावर्ण्यं प्रत्युपदेक्ष्यति यः स इत्यर्थः ॥ १० ॥ ११ ॥

(१) परोक्षज्ञानिविषयः ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तस्य परमहंसत्वं दर्शयन् गुरुत्वं योजयति। कर्त्तेति। देहगतोऽन्तर्यामिरूपेण द्रष्टुः परमसाक्षिणः॥ १२॥

अनासक्तत्वं कैमुत्येन स्थापयन् विशेषतो ज्ञेयस्य योगस्य सामान्यतो ज्ञानं तत्कारणञ्चाह। इदं हीति। उज्झितदुष्कलेवर इति। पार्षदकलेवरस्य शोभनत्वमुपादेयत्वं च बोधयति॥१३॥

तज्ज्ञानयोग्यत्वापादकं सारासारविवेकमपि सामान्यतो निवेदयति। यथेति॥ १४॥

अभीष्टमाह। तन्न इति। कुकलेवरेति। स्वेतरेषां कलेवरापेक्षया प्रोक्तम्॥ १५॥

कोजः कोञ्चक इति पाठौ। गोवर्द्धनोऽयं शास्त्रलोकप्रसिद्धः श्रीवृन्दावनगतः श्रीकृष्णक्रीडत्वेन तमनु रैवतोऽपि पठ्यते। अधुना तस्य स्वल्पत्वादिदृष्टिः काले कालेऽन्तर्द्धानात्॥ १६—१९॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

उपचितैर्धर्मादिभिः सहित आत्मा त्वंपदार्थ उपलभ्यते येन तत्तपश्चरति तत्र उपशमः इन्द्रियाणां संयमः उपरमो निरहङ्कारिता आत्मवतां ज्ञानिनामनुग्रहाय तपःशिक्षणरूपायेति तपसि प्रयोजनमनुकम्पयेति तत्र कारणमित्यपौनरुक्त्यम्॥ ९॥

भगवदनुभावो वर्ण्यते येन तद्भगवदनुभाववर्णनं पञ्चरात्रशास्त्रं साङ्ख्ययोगाभ्यां सह सावर्णेः सावर्णिम्॥ १०॥

उपरतानात्म्याय न विद्यते आत्मा ज्ञातव्यत्वेन यस्य सः अनात्मा अनात्मनो भावः आनात्म्यमुपरतमनात्म्यं यस्मात्तस्मै॥ ११॥

आत्मारामचूडामणित्वमाह। कर्त्तेति। न निबध्यत इत्यतस्तेष्वसक्ताय। दैहिकैः क्षुत्पिपासादिभिर्न हन्यते नाभिभूयते इत्यतो देहादिविकाय द्रष्टुरपि सतो दृग् दृष्टिः गुणैर्हश्यैर्न दूष्यते अत एव असक्तश्चासौ विविक्तसाक्षी अलिप्तसाक्षी चेति तस्मै॥ १२॥

योगाभ्यासिनां रहस्यमाह। इदमिति। यदिति। शश्वत्तम् अन्तकाले यत् गच्छत् चपलमिति यावत् मनस्त्वयि दधीत स्थिरीकुर्यादित्यर्थः उज्झितेति वर्त्तमाने निष्ठा॥ १३॥

अन्यथा योगाभ्यासो व्यर्थ एवेत्याह। यथेति। चिन्तयन् चिन्तां कुर्वन् कुकलेवरात्ययात् शङ्केत। मयि मृते सति मत्सुतादयः कथं वर्त्तेरन्निति भावयेत् तथैव विद्वानपि यः शङ्केत तस्य यत्नः श्रम एव॥ १४॥

तस्मादन्यावेशं त्याजयित्वा त्वयि मनसोऽभिनिवेशं त्वमेव कृपया देहीत्याह। तन्न इति। योगं विधेहि योग एव कस्तत्राह। त्वयि नोऽस्माकं स्वस्यात्मनो भावं रतिं यद्वा। यथा विषयेषु स्वभावस्तथैव त्वयि स्वभावो निसर्गोऽस्त्वित्यर्थः॥ १५॥

अपीति। यथा इलावृते तथा अस्मिन्नपि वर्षे इत्यर्थः॥ १६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

उपचितैः समृद्धैर्धर्मादिभिः आत्मा परमेश्वर उपलभ्यते येन तत्तप आकल्पं कल्पपर्यन्तं चरति आत्मवतामात्मा विद्यते उपादेयत्वेन येषां तेषामनुग्रहाय शिक्षार्थं न च स्वार्थमीश्वरत्वात् उपशमो निरहङ्कारता उपरमः इन्द्रियसंयमः॥ ९॥

भगवदनुभाव उपवर्ण्यते येन तत्पञ्चरात्रं शास्त्रं सावर्णेरुपदेक्ष्यमाणः भगवत्प्रोक्ताभ्यां साङ्ख्ययोगाभ्याम्।

एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु।

इति श्रीमुखवचनात् साङ्ख्यमात्मज्ञानं योगो निष्कामकर्मयोगस्ताभ्यां सम्वर्द्धितेन परमभक्तिभावेन प्रजाभिः सह उपसरति सेवते इत्यन्वयः॥ १०॥

परमहंसानां परमगुरवे उपरतानात्म्याय निरहङ्काराय॥ ११॥

देहगतोऽपि देहेषु अन्तर्यामिरूपेण संस्थितोऽपि दैहिकैः क्षुत्पिपासादिभिः असक्तः सर्वदा पूर्णकामत्वात् विविक्तः सर्वदा सर्वदोषास्पृष्टत्वात् साक्षी सर्वदा सर्वदर्शी स च सः तस्मै॥ १२॥

ज्ञानस्य देहादिविरक्तिपूर्वकं भगवति मनोनैश्चल्यं फलमन्यथा ज्ञानयत्नः केवलं श्रमोऽतस्तं ज्ञानयोगं नो विधेहि येन त्वयि मनोनैश्चल्यं भवेदित्याह। इदमिति त्रिभिः। हे योगेश्वर! हिरण्यगर्भः योगनैपुण्यं योगस्य ज्ञानयोगस्य नैपुण्यं यत् जगाद तदिदमेव किमुज्झितदुष्कलेवरः त्यक्तदुष्टजनदेहसङ्गः सन् भक्त्या त्वयि मनो दधीत धारयेत् किं बहुना अन्तकालेऽपि इतियत्॥ १३॥

यदि यथा ऐहिकामुष्मिककामलम्पटः अविद्वान् सुतादिषु चिन्तयन् योगक्षेममिति शेषः कुकलेवराणां स्वकीयदेहस्य सुतादिदेहानां च अत्ययान्नाशात् शङ्केत तथा विद्वानपि सन् यः शङ्केत तर्हि तस्य यत्नः विद्यायत्नः श्रम एव॥ १४॥

तत्तस्मात् हे प्रभो! अधोक्षज! त्वं तद्योगं तादृशं ज्ञानयोगं नो विधेहि येन त्वयि स्वभावं स्वकीयं भावं मनोनैश्चल्यलक्षणं ध्रुवांस्मृत्याख्यं प्राप्नुयाम इति शेषः येन च योगेन वयं त्वन्मायया नः कलेवरे अर्पितामहंममतां शीघ्रं भिन्द्याम॥ १५—१६॥

भाषाटीका।

भारतवर्ष में भी नरनारायणबदरीनारायणनाम के भगवान् कल्पपर्यन्त की इछा से आत्मज्ञानियों की कृपा से अनुग्रह करने को आप अव्यक्त मार्गवाले होने से भी वृद्धि को प्राप्त आत्मा के लाभ के हेतु धर्म ज्ञान वैराग्य ऐश्वर्य शान्ति के हेतु तपस्या को करते हैं॥ ९॥

भगवान् श्रीनारदजी भगवान्का कहा जो सांख्य तथा योग उन दोनों से भगवान् के चरित्र को सावर्णि मनु को उपदेश करने को स्थित हैं वर्ण आश्रम धर्म वाली भारत की प्रजाओं को साथ में लेकर परम भक्ति भाव से बदरीनारायणजी का अनुसरण करते हैं इस वचन को उच्चारण करते हैं॥ १०॥

उपशम स्वभाव वाले अहंतादि दुर्गुणों से रहित निर्भेत पुरुषों के धनरूप ऋषियों मे श्रेष्ठ नर नारायण परम हंसों के परमगुरु आत्मारामों के अधिपति आपके अर्थ नमस्कार है॥ ११॥

इस स्तोत्र का गानभी करते हैं आप इस जगत् के कर्त्ता हो तो भी सृष्टि आदि कों के कर्मों में नहीं बन्धते हो देह मे स्थित होकर भी दैहिक धर्मों से बाधित नहीं होतेहो द्रष्टा होने

एतासामपो भारत्यः प्रजा नामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति ॥ १७ ॥

चन्द्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणी पयस्विनी शर्करावर्ता तुङ्गभद्रा कृष्णा वेण्या भीमरथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती सिन्धुरन्धः शोणश्च नदौ महानदी वेदस्मृतिर्ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयू रोधस्वती सप्तवती सुषोमा शतद्रूश्चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः ॥ १८ ॥

अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्येव सर्वेषां विधीयन्ते यथा वर्णविधानमपवर्गश्चापि भवति ॥ १९ ॥

योऽसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रन्थिरन्धनद्वारेण यदा हि महापुरुषपुरुषप्रसङ्गः ॥ २० ॥

एतदेव हि देवा गायन्ति ।

अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः ।
यैर्जन्म लब्धं नृषु भारताजिरे मुकुन्दसेवौपयिकं स्पृहा हि नः ॥ २१ ॥
किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना ।
न यत्र नारायणपादपङ्कजस्मृतिः प्रमुष्टातिशयेन्द्रियोत्सवात् ॥ २२ ॥
कल्पायुषां स्थानजयात्पुनर्भवात्क्षणायुषां भारतभूजयो वरम् ।
क्षणेन मर्त्येन कृतं मनस्विनः संन्यस्य संयान्त्यभयं पदं हरेः ॥ २३ ॥
न यत्र वैकुण्ठकथासुधापगा न साधवो भागवतास्तदाश्रयाः ।
न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोऽपि न वै स सेव्यताम् ॥ २४ ॥

भाषाटीका ।

पर भी आपकी दृष्टि गुणों से दूषित नहीं होती है ऐसे अलिप्त निर्मल साक्षी आपके अर्थ नमस्कार है ॥ १२ ॥

हे योगेश्वर ! ब्रह्माजीने हमको उपदेश किया है सो योगकी निपुणता यही है जोकि अन्तकाल में पुरुष अहन्ता आदि शरीर वासनों को छोडकर भक्ति से प्राकृत गुण रहित आप मे मनको लगा देवै ॥ १३ ॥

जिस प्रकार इस लोक के पदार्थों में लंपट पुरुष पुत्र स्त्री धन की चिन्ता से मरण समय में शंका करता है तैसे ही विद्वान् होकर भी खोटे शरीर के नाश होने की शंका करे तो उसके सब साधन श्रम व्यर्थ ही हैं ॥ १४ ॥

हे प्रभो ! हे अधोक्षज ! तिस हेतु से इस खोटे शरीर में अर्पित हमारी इस अति दुस्तर अहंता ममता रूप माया को जिस योगसे हम शीघ्रही दूर करैं ऐसे स्वाभाविक आप के विषय के प्रेमभक्ति योगको विधान करो ॥ १५ ॥

इस भारतवर्ष में भी बहुत नदी तथा पर्वत हैं जैसे कि मलय मङ्गलप्रस्थ मैनाक त्रिकूट ऋषभ कूटक कोल्लक सह्य देवगिरि ऋष्यमूक श्रीशैल वेंकट महेन्द्र वारिधार विंध्य शुक्तिमान् ऋक्षगिरि पारियात्र द्रोण चित्रकूट गोवर्धन रैवत ककुभ नील गोकामुख इन्द्रकील कामगिरि और भी सैकडों हजारों पर्वत हैं तिनके नीचे से होने वाले नद नदी असंख्य हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मना च देहेनाप्युपस्पृशन्ति ॥ १७ ॥ १८ ॥

लब्धं जन्म यैस्तैः पुरुषैः । सात्त्विकादिना स्वकृतेन कर्मणा दिव्यादिगतय आत्मनी विधीयन्ते साध्यन्ते । हि यस्मात् सर्वा एव गतयः कर्मानुसारेण सर्वेषां भवन्ति यस्य वर्णस्य यद्विधानं मोक्षप्रकारः संन्यासवनस्थत्वादिस्तदनतिक्रमेणास्मिन्नेव वर्षे नृणामपवर्गश्च भवति । एतच्च कर्मादिबहुसाधनसम्भवाभिप्राये-

श्रीधरस्वामिकृतभावार्थदीपिका ।

णोक्तं नत्वन्यत्रापवर्गाभावेन । तदुपर्यपि बादरायणः सम्भवात् १ । ३ । २६ । इति देवानामपि मोक्षस्य सूचितत्वात् ॥ १९ ॥

अपवर्गस्वरूपमाह । योऽसाविति । अनात्म्ये आत्मनि भवमात्म्यं रागादि तद्रहिते । अनिरुक्ते वाचामगोचरे । अनिलयनेऽनाधारे । अनन्यनिमित्तोऽहैतुको भक्तियोग एव लक्षणं स्वरूपं यस्य कथं भवति नानागतीनां निमित्तं यो विद्याग्रन्थिस्तस्य रन्धनं छेदनं तद्द्वारेण महापुरुषपुरुषा विष्णुभक्तास्तैः प्रकृष्टः संयोगो यदा भवति तदा ॥ २० ॥

एतदेव मानुष्यमेव सर्वपुरुषार्थसाधनं गायन्ति । अमीषामेभिः उत स्वित् अथवा स्वयमेव साधनं विनैव हरिरेषां प्रसन्नोऽभूत् एवम्भूतस्य पुण्यस्य दुष्करत्वात् भारताजिरे भारताङ्गणे नः केवलं स्पृहैव यत्र तन्मुकुन्दसेवोपयोगि नृषु जन्म यैर्लब्धम् ॥ २१॥

स्पृहामेवाहुः । किमित्यादिसप्तभिः । दुष्करैः क्रत्वादिभिर्नः फल्गुना तुच्छेन क्षुजयेन स्वर्गप्राप्त्या किं न किञ्चित्फलम् । कुतः । यत्र नारायणपादपङ्कजस्मृतिर्नास्ति । प्रत्युतातिशयितादिन्द्रियाणामुत्सवाद्भोगात्प्रमुष्टाऽभूत् ॥ २२ ॥

क्षणमल्पमेवायुर्येषाम् परत्वे हेतुः मर्त्येनापि देहेन क्षणेनैव कालेन कृतं कर्म संन्यस्य हरेः पदं सम्यग्यान्ति ॥२३॥

अतो यत्र वैकुण्ठकथामृतनद्यो न सन्ति तदाश्रयाः कथापगाश्रयाः महान्तो नृत्याद्युत्सवा येषु तादृशा यज्ञेशस्य मखाश्च पूजाः स सुरेशस्य ब्रह्मणोऽपि लोको न सेव्यताम् ॥२४॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एतासां नदनदीनाम् आपो जलानि भारत्यः भरतवर्षस्थाः प्रजाः कर्म पूर्वसवर्णादीर्घाभाव आर्षः नामभिरेव पुनन्ति नामभिरेव पवित्रयन्ति हि ।

> गङ्गागङ्गेति यो ब्रूयाद्योजनानां शतैरपि
> मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ।

इत्याद्यभियुक्तस्मरणमत्रानुसन्धेयं या आपो नामभिरेव पुनन्ति प्रजास्ता अपः प्रजा आत्मना देहेनापि स्पृशन्ति यद्वा । भारत्यः भरतवर्षस्थपुण्याश्चापो नामभिरेव प्रजाः पुनन्ति नामतः आपः प्रजा आत्मना देहेनापि स्पृशन्तीत्यन्वयः नदीरुद्दिशति । चन्द्रवसेत्यादिना । विश्वेत्यन्तेन सिन्धुः शोणश्च नदाविल्याह । सिन्धुः शोणश्च नदाविति । कावेर्याः पृथगुक्तत्वान्मरुद्वृधेति नद्यन्तरपरः गोबलीवर्दन्यायात् गङ्गा तु पूर्वं प्रपञ्चितैवेत्यत्रानुक्तेति बोध्यम् ॥ १७ ॥ १८ ॥

अस्य भारतवर्षस्य प्राशस्त्यप्रतिपादनपरानभियुक्तैर्गीतान् श्लोकाननुवदन्नस्य प्राशस्त्ये कारणमाह । अस्मिन्नेवेत्यादिना । प्रसङ्ग इत्यन्तेन गद्येन अस्मिन्नेव वर्षे भारते लब्धं जन्म विप्रादिजन्म यैस्तैः पुरुषैः शुक्ललोहितकृष्णवर्णेन सत्त्वरजस्तमोगुणकल्पितकुशलमिश्ररूपेण स्वारब्धेन स्वकृतेन कर्मणा बह्व्यः दिव्यादिगतयः तत्र शुक्लकर्मणा दिव्यगतिः रजःकर्मणा मनुष्यलोकगतिः तामसकर्मणा नारकगतिः तथा च भगवता गीतम् ।

> ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
> जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥

इति अत्रापि तृतीये उक्तम् ।

> आत्यन्तिकेन सत्त्वेन दिवं देवाः प्रपेदिरे ।
> धरां रजःस्वभावेन" इत्यादिना ।

एवं दिव्यादिगतय आत्मनः स्वस्य विधीयन्ते सम्पाद्यन्ते हि यस्मात्सर्वा एव गतयः आनुपूर्व्येण कर्मानुसारेण सर्वेषां भवन्ति सर्वेषामविशेषेण त्रैगुण्यवश्यत्वाद् गुणानां ह्रासोल्लासादिभिः कृतानि कर्माणि दिव्यादिगतीः सर्वाः सर्वेषामापादयन्तीत्यर्थः एवमस्मिन्नेव वर्षे यथावर्णविधानं यस्य ब्रह्मक्षत्रियादेः यद्विधानम् ।

> शमोदमस्तपः शौचं क्षान्तिरार्जवमेव च ।
> ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥
> शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
> दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥

इत्यादिविधानं गुर्वनलशुश्रूषा पञ्चमहायज्ञादिरूपविधानं च तदनतिक्रम्य यथावर्णविधानमनभिसंहितफलस्वस्ववर्णाश्रमोचितकर्मानुष्ठानानुगृहीतभक्तियोगेनेत्यर्थः अपवर्गो मोक्षश्च भवति एतस्मात्र वर्षे मोक्षसाधनबहुधर्मानुष्ठानसम्भवाभिप्रायेणोक्तं नत्वन्यत्रापवर्गसाधनधर्मानुष्ठानासम्भवाभिप्रायेण । तदुपर्यपि बादरायणः सम्भवात्" इत्युपरितनश्लोकेष्वपि ब्रह्मविद्याधिकारस्य भगवता बादरायणेनैव सूत्रितत्वात् सूत्रे तदुपर्यपीति रम्यकादिवर्षाणामप्युपलक्षणम् ॥ १९ ॥

ननु यथा वर्णविधानं कदापवर्गो भवति को वा स्वस्ववर्णाश्रमोचितो धर्मः साक्षादपवर्गसाधनमुत कस्यचिदनुग्राहकः अनुग्राहकश्चेत् कोऽसावनुग्राह्यः कथं वा अनुग्राहकः अनुग्राह्यश्च कीदृशः अनुग्राह्यविषयश्च कीदृश इत्याशङ्कयाह । योऽसाविति । यदा ह्यविद्याग्रन्थिरन्धनद्वारेणाविद्यापुण्यपापात्मकं कर्म भक्तियोगोत्पत्तिविरोधिप्राचीनकर्म तद्रन्धनद्वारेण तन्निरसनद्वारेण महापुरुषो भगवान् तस्मिन् प्रसङ्गो भवति तदा यथाविधानमपवर्गश्च भवतीत्यन्वयः "धर्मेण पापमपनुदति कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तत" इतिश्रुतिस्मृत्युक्तरीत्या स्वस्ववर्णोचितानभिसंहितफलकर्मानुष्ठानेनाविद्याग्रन्थिनिरसनं तद्द्वारेण महापुरुषे प्रसङ्गः प्रकृष्टः सङ्गः विजातीयप्रत्ययान्तरात्मवतो ध्यानरूपो मनोव्यापारो भवति तदापवर्गो भवतीत्यर्थः अविद्याशब्दोऽत्र पुण्यपापात्मककर्मपरः तदेव कर्म ।

> अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ।
> इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः ॥
> ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्यया ।

इत्यादिषु मृत्युशब्देनाभिधीयते अविद्यया मृत्युमित्यादावविद्याशब्देनानभिसंहितफलं वर्णाश्रमोचितं कर्मोच्यते विद्येतरदन्यथा मृत्युतरणोपायत्वश्रवणविरोधात्तत्राविद्याशब्दस्थानीयोऽत्र यथावर्णविधानशब्दः तत्रत्यमृत्युशब्दस्थानीयोऽत्राविद्याशब्दः अविद्याशब्दो हि विद्येतरदविद्याकर्मेत्येवं कर्ममात्रे वर्तमानो यथोचितं कञ्चिदनभिसंहितफलं वर्णाश्रमोचितं विहितं कर्माभिदधाति कञ्चिद्बन्धकं कर्मेति विवेकः महापुरुषप्रसङ्गं विशिनष्टि । अनानागतिनिमित्तः नानागतिः स्वर्गनरकादिगतिस्तन्निमित्तो न भवतीत्यनानागतिनिमित्तः स्वर्गादिगतिनिवारकः मोक्षसाधनमिति भावः निमित्ताविद्याग्रन्थीतिपाठे नानागतिनिमित्तेति छेदः स्वर्गनरका-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दिनानागतिनिमित्तभूता याविद्या तद्रूपो यो ग्रन्थिस्तस्य रन्धनद्वारेणेत्यर्थः ग्रन्थिशब्देनाविद्याया दुर्मोचनीयत्वमभिप्रेतं न विद्यते अन्यदैहिकामुष्मिकरूपं निमित्तं फलं यस्य अनन्यनिमित्तः निष्काम इत्यर्थः सचासौ भक्तिलक्षणो भक्तिरूपश्चेति कर्मधारयः एवं यदाहीत्यस्योत्तरमुक्तं वर्णाश्रमधर्मस्य भक्तियोगानुग्राहकत्वं तत्प्रकारश्चोक्तः अविद्याग्रन्थिरन्धनद्वारेणेत्यनेन महापुरुषप्रसङ्ग इत्यन्तेन वानुग्राह्यं वोक्तम् अनन्यनिमित्तभक्तियोगलक्षण इत्यनेनानुग्राह्याकारश्चोक्तः महापुरुष पुरुषप्रसङ्ग इतिपाठे महापुरुषाणां प्रकृष्टः सङ्गो यस्य सः भक्तियोगलक्षण इत्यर्थः अथानुग्राह्यविषयं महापुरुष इत्यनेनाभिप्रेतं दर्शयति । सर्वभूतात्मनेत्यादिना । यद्यपि सर्वभूतात्मवासुदेवशब्दयो-स्तुल्यार्थता तथापि देवताविशेषं निर्दिधारयिषया वासुदेव इत्युक्तं वासुदेवशब्दावयवार्थप्रदर्शनाय सर्वात्मनीत्युक्तम् । इत्यतो न पौनरुक्त्यं भक्तियोगविषयं चिदचिद्विलक्षणत्वेन विशिष्टमनात्म्ये इति आत्मनो भावः प्रकारः अपृथक्सिद्धविशेषणं शरीरमात्म्यं ततोऽन्यस्मिन् स किं जीवः नेत्याह । अनिरुक्ते देवमनुष्यादिनामरूपाभ्यामनिरुक्ते अनात्म्ये इत्यचेतनव्यावृत्तिः अनिरुक्त इति बद्धजीवव्यावृत्तिः स तर्हि किं मुक्तजीवो नेत्याह । अनिलयने आधारान्तरानपेक्षाय अनेन मुक्तजीवव्यावृत्तिः तेषां हि भगवानाधारः "ब्रह्मभूयाय कल्पते ब्रह्मणो हि प्रतिष्ठाहम्" इत्युक्तत्वात् अत्र ब्रह्मशब्दो मुक्तजीवपर औचित्यात् स तर्हि नित्यसिद्धः नेत्याह । परमात्मनीति । अक्षरशब्दवाच्याभ्यां मुक्तनित्यसिद्धाभ्यां क्षरशब्दवाच्याद्बद्धचेतनाच्च योऽन्यत्वेन गीतः परमात्मा ।

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थो क्षर उच्यते ।
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।

इति तस्मिन्नित्यर्थः । एवंविधे भगवति षाड्गुण्यपूर्णे निरस्तनिखिलदोषे योऽसावनन्यनिमित्तभक्तियोगलक्षण इत्यन्वयः ॥ २० ॥

एवं स्वर्गापवर्गसाधनभूतबहुविधधर्मानुष्ठानोपयुक्तप्रदेशत्वादस्य वर्षस्य प्राशस्त्यम् अथैतत्प्राशस्त्यप्रतिपादनपरान् श्लोकान् वक्तुं तेषामविगीततां दर्शयति । एतदेव हीति । एतद्वर्षप्राशस्त्यं गायन्ति देवा इति शेषः श्लोकानेवाह । अहो इत्यादिना । अमीषामेभिः कर्तुः सम्बन्धविवक्षया षष्ठी किं शोभनं सुकृतमकारि अहो अपिस्वित् किं स्वयं साधनं विनैव हरिर्भगवान् प्रसन्नः किं निरतिशयसुकृतमेवमेभिः कृतं किम्वा स्वयमेवैषां भगवान् प्रसन्न एवं रूपस्य धर्मस्य दुष्करत्वादिति वितर्क्यते क इमे इत्यत्राह । यैर्जीवैः भारताजिरे भरतवर्षाङ्गणे भारतप्रदेश इत्यर्थः एतद्भारताजिरस्य. तत्रापि नृजन्मनश्च प्राशस्त्यमुक्तं तत्र कारणं मुकुन्दसेवौपयिकमित्युक्तम् ॥ २१ ॥

वर्षान्तरस्थानां लोकान्तरस्थानां मनुष्याणां भगवत्सेवानुपयुक्तिं वदन्तस्तान्निन्दन्ति त्रिभिः । किमिति । दुःखेनापि कर्तुमशक्यैः क्रतुभिस्तपोव्रतैः तपः सहितैर्वा व्रतैः तपः कृच्छ्रचान्द्रायणादिरूपं व्रतं प्राजापत्यादिकं दानं पात्रेषु द्रव्यत्यागात्मकं कृत्वा विभिस्तत्साध्येन फल्गुनाल्पास्थिरफलेन. द्युजयेन स्वर्गप्राप्त्या वा किं न किञ्चित्फलं कुतः यत्र स्वर्गादौ श्रीमन्नारायणस्य पादपङ्कजस्य स्मृतिर्नास्ति प्रत्युतनिरतिशयितादिन्द्रियाणामुत्सवात् सुखात् स्मृतिः प्रणष्टाभूत् अधिकेन्द्रियोत्सव एव भगवत्सेवाविरोधीतिभावः ॥ २२ ॥

कल्पमायुर्येषां पुनर्भवः जन्म यस्य तस्मात्स्थानजयादुपरितनलोकप्राप्तेः आकल्पानुभाव्यसुखोपरिलोकापेक्षयेत्यर्थः क्षणमल्पमायुर्येषां तेषां भारतभूजयः भारतवर्षप्राप्तिर्जिजये जय उत्कर्षप्राप्तिः ऊर्ध्वस्थानेषु सुखोत्कर्षप्राप्त्यपेक्षया भारतवर्षे जन्मलाभरूपोत्कर्षप्राप्तिरूपो जयो वरं श्रेष्ठ इत्यर्थः भारतभूजयश्रैष्ठ्ये हेतुमाह । अस्थिरेण मर्त्येन मरणशीलेन शरीरेण कृतं क्रियाजातं संन्यस्य भगवति समर्प्य मनस्विनः प्रशस्तमनसः भगवदुपासकाः सन्तः हरेरभयं न विद्यते भयं कालकृतं जन्मजरामरणादिनिमित्तं यस्मिन् तत्पदं स्थानं श्रीवैकुण्ठरूपं यान्ति कल्पायुषस्तु कल्पान्तरं पुनर्भवमेव यान्तीत्यर्थः ॥ २३ ॥

अतो यत्र वैकुण्ठस्य भगवतः कथारूपाः सुधापगा अमृतनद्यो न सन्ति तदाश्रया भगवत्कथामृतनदीसेवापराः साधवः साधूनां लक्षणलक्षिता भागवताश्च न सन्ति यत्र च महान्तो नित्यपक्षमाससम्वत्सरायनाद्युत्सवा येषां ते यज्ञेशमखाः यज्ञेशस्य भगवतः "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेवच" इति भगवदुक्तेः "इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः" इति श्रुतेश्च तस्य मखा आराधनरूपा यज्ञाः न सन्ति स सुरेशस्य ब्रह्मणो लोकोऽपि सेव्यतां प्राप्यतां न याति प्राप्यो न भवतीत्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आत्मना कायेनान्तरेण उपस्पृशन्ति आचमनस्नानाभ्यामितिशेषः ॥ १७ ॥ १८ ॥

पुण्यपापार्जनं च सत्त्वादिगुणैः क्रियते तत्फलभूताः स्वर्गादिगतयोऽपीत्याह । अस्मिन्नेवेति । शुक्ललोहितकृष्णवर्णेन सात्त्विकराजसतामसभेदभिन्नेन स्वारब्धेन स्वफलदानायोपक्रान्तेन स्वर्गादिगतय आनुपूर्व्येण पर्यायेणात्मनः परमात्मनः प्रेरणया सर्वेषां विधीयन्ते यथावर्णविधानं वर्णाश्रमविहितानुसारेणानुभारतीनां प्रजानां यदि तिस्रो गतयस्तर्हि निजानन्दाविर्भावलक्षणो मोक्षो दुरवस्थः किमिति तत्राह । अपवर्गश्चेति । न केवलं स्वर्गादिगतयोऽपि तु संसारदुःखनिवारणसमर्थो मोक्षश्चेति च शब्दार्थः ॥ १९ ॥

अपिशब्दाद्यदा महतां पुरुषाणां श्रीनारायणपरायणानां सङ्गतिस्तदा योऽसौ भगवत्यनन्यनिमित्तभक्तियोगलक्षण उपायो भवतीत्यन्वयः न अन्यदैश्वर्यादिप्राप्तिनिमित्तं यस्य सोऽनन्यनिमित्तः तादृशो भक्तियोगलक्षणस्तस्मात्स्वरूपानन्दाविर्भावलक्षणो मोक्षो भवतीति ज्ञातव्यं केन प्रकारेण तदुच्यते नाना गतीति पूर्वोक्तानां नाना गतीनां निमित्तहेतुभूतो यः अविद्याग्रन्थिस्तस्य रन्धनद्वारेण दहनप्रकारेण भक्तियोगोऽप्येवं प्रकारेणोत्पादनीय इति दर्शयति सर्वभूतात्मनि भूतभवद्भविष्यत्सर्वजगदन्तर्यामिणि अनात्म्ये जीवधर्मरहिते अनिरुक्ते वेदैरपि सर्वात्मना निर्वक्तुमशक्ये अनिलयने अनन्याधारे परा प्रकृष्टा मा श्रीर्येषां ते परमा मुक्तास्तेषामप्यानन्ददानादिकर्तरि संज्ञामाह । वासुदेव इति । अवतारूपाणामपि मुक्तिदानसामर्थ्यमस्तीति द्योतयितुं वा वासु-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देव इति हिशब्दो भक्त्युत्पत्तौ सत्सङ्गतिः प्रयोजिकेति दर्शयति भक्त्या मुक्तिर्भवतीत्येतदेव गायन्ति विद्वांसः ॥ २० ॥

एषामिति षष्ठी तृतीयार्थे किं शोभनं कर्म उत स्वित् किं भारतेऽजिरे भारताख्यप्राङ्गणे मुकुन्दसेवायामौपयिकं जन्म-लक्षणोपायस्तत्र स्पृहात्मभिरिच्छामनस्कैः ॥ २१ ॥

क्षुजयेन स्वर्गजयेन यत्र स्वर्गे श्रीनारायणपादपद्मस्मृतिः प्रमुष्टा कुतः अतिशयेन्द्रियोत्सवाद्विषयभोगातिरेकात् स्वर्गस्थान् कर्मिणः उद्दिश्येदं वचनं न देवान् तेषां सन्ततहरिस्मरणस्य प्रमाणसिद्धत्वात् ॥ २२ ॥

भारतलब्धजन्मनामपि पुनर्जन्मसम्भवात् कथं भारतभू-जयो वर इति प्रशस्यत इति तत्राह । क्षणेनेति । मनस्विनः क्षणकालेन मर्त्येन नश्वरेण देहेन कृतं कर्म हरौ संन्यस्य हरेरभयं पुनर्जन्मभयरहितं पदं संयान्तीति यस्मात्तस्मादिति शेषः कल्पायुषामित्यनेन महरादिलोकस्था लक्ष्यन्ते "कल्पायुषो विबुधा च" इति श्लोके ॥ २३ ॥

महरादिलोके विशिष्टभोगसम्भवात् कथं नीचीक्रियते भार-तखण्डादिति तत्राह । न यत्रेति । यत्र महर्लोकादिषु तदाश्रयाः श्रीनारायणचरणसरसिजस्मरणजनकाः साधवो रागद्वेषादि-दोषलेशशून्या भागवता न सुलभाः यथेहातः एव वैकुण्ठकथामृता-पगा अपि न अत एव विष्णुविषययज्ञाश्च न सन्ति तैः प्राप्य फलाभा-वात् पूर्वचीर्णकर्मफलभोगोत्सवेन गच्छत्कालत्वेनावसराभावान्नि-यस्तूष्णींभावाच्च "ध्यायन्तीव देवमनुष्या" इति श्रुतेः सुरेशस्वामिलोको महरादिः सेव्यतां न याति प्राप्यफलान्तरत्वेनेति शेषः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथावर्णविधानमिति स्वस्वधर्मोपेणादिकर्मणेत्यर्थः । एतच्च प्रायिकं यदा हि महापुरुषपुरुषप्रसङ्ग इत्यस्यैव मुख्यत्वेन वक्ष्य-माणत्वात् श्रीनारदजन्मवत् । प्रथम एव तत्प्रसङ्गेन तत्प्रवृत्तेः भक्तियोगलक्षणोऽप्यपवर्गो भवति । किमुतान्य इत्यर्थः ॥२०॥

अहो इति । छत्रिन्यायेन प्राचुर्योक्तिरियम् । तज्जन्मत्वेऽपि केषा-ञ्चिद्दुष्कर्मत्वतत्प्रसादाविषयत्वदर्शनात् । किं दुष्करैरं इत्यादि-वक्ष्यमाणाच्च । स्वयमिति यदाहीति पूर्वोक्तरीत्या स्वपुरुषानुस-रणस्वभावेन स्वैनैव साधनेनेत्यर्थः ॥ २१ ॥ २२ ॥

संन्यस्य हरावर्पयित्वा ॥ २३ ॥

न यत्रेति । भगवद्भक्तौ भारत भूमिनियमोऽपि खण्डितः तत्-द्भावे सर्वस्यापि लोकस्य स्तुत्यत्वेनाभिप्रेतत्वात् । किन्तु भार-तभूमौ तत्प्राचुर्यमस्तीति प्रस्तुता स्तुतिरेव ॥ २४ ॥ २५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आत्मना देहेन च ॥ १७ ॥

अन्धो ब्रह्मपुत्रः ॥ १८ ॥

अस्मिन्नेव वर्षे नान्यत्र तत्रापि सहस्रयोजनप्रमाणे प्रदेशे एवेति ज्ञेयम् । यदुक्तं विष्णुपुराणे ।

> भारतस्यास्य वर्षस्य नव भेदान्निशामय ।
> इन्द्रद्वीपः कशेरुश्च ताम्रवर्णो गभस्तिमान् ।
> नागद्वीपस्तथा सौम्यो गान्धर्वस्त्वथ वारुणः ।
> अयन्तु नवमस्तेषां द्वीपः सागरसम्भृतः ।
> योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरात् ।

सागरसम्भृत इति समुद्रप्रान्तवर्तीति श्रीस्वामिव्याख्या नवमस्यास्य पृथङ्नामाकथनात् नाम्नोऽपि नवद्वीपोऽयमिति गम्यते विशेषश्च तत्रैव ।

> पूर्वे किराता यस्यान्ते पश्चिमे यवनाः स्मृताः ।
> पूर्वे देशादिकाश्चैव कामरूपनिवासिनः ।
> ओड्रा कलिङ्गा मगधा दाक्षिणात्याश्च कृत्स्नशः ।

मालका मालवाश्च ।

> इत्यादिचत्वारि भारते वर्षे युगान्यत्र महामुने ।
> कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित् ।

इति वायवीये च ।

> भारतस्यास्य वर्षस्य नव भेदाभिबोधत ।
> सागरान्तरिता ज्ञेयास्ते त्वगम्याः परस्परम् ।

इति । शुक्ललोहितकृष्णवर्णेन सात्त्विकराजसतामसेन कर्मणा कर्मणा दिव्यादिगतयो बह्व्यः आत्मनः स्वस्य विधीयन्ते साध्यन्ते हि यस्मात् सर्वा एव गतयः सर्वेषां यथावर्णविधानमिति वर्णानां धर्मस्य अधर्मस्य च करणं सम्भवेदिति तदनतिक्रम्य आनुपूर्व्येण विधीयन्ते । वेदेनेति शेषः तथा अपवर्गश्चेति तस्य विधातुमश-क्यत्वात् स स्वयमेव भवतीति चकारेणापवर्गस्य वैरल्यं द्योति-तम् ॥ १९ ॥

ननु किंस्वरूपोऽपवर्गः कदा वा भवेदित्यपेक्षायामाह । योऽसा-विति । भगवति परमकल्याणसौन्दर्यादिगुणवति अत एव सर्व-भूतानामात्मा मनो यत्र माधुर्येण सर्वभूतचित्ताकर्षक इत्यर्थः । अत एवानात्म्ये आत्मनो भाव आत्म्यं न युज्यते प्राप्यत्वेन आत्म्ये आत्मत्वं यत्र तस्मिन् यत्र आत्मसेव्यत्वमेव युज्यते न तु आत्म-त्वमात्मैक्यमित्यर्थः । यन्माहात्म्यं प्राकृतरागादिभिर्निर्वक्तुमश-क्यमित्याह । अनिरुक्ते महाप्रलयेऽपि यद्रूपगुणादेर्नास्त्यभाव इत्याह । अनिलयने न विद्यते प्राकृतानां तत्त्वानामिव निलयनं लयो यस्य तस्मिन् सर्वेषामात्मा ह्यतिप्रेमास्पदं ततोऽपि परमत्वात् परमात्मनि विशेषणैरेतैर्भजनीयत्वातिशयो व्यञ्जितः । वासुदेवे वसुदेवनन्द-नेऽनन्यनिमित्तोऽहैतुको भक्तियोग एव कक्षणं स्वरूपं यस्य सः । नन्वपवर्गशब्देन रूढ्या मोक्ष एवोच्यते सत्यमविद्याध्वंसरूपस्य मोक्षस्य भक्तावन्तर्भावात् भक्तियोगोऽपि मोक्षादिशब्दवाच्य इत्याह । नाना गतीनां निमित्तं योऽविद्याग्रन्थिस्तस्य रन्धनं ध्वंस-स्तद्द्वारेण तद्धेतुनैव अपवर्गसंज्ञ इत्यर्थः । कदा महापुरुषस्य विष्णोः पुरुषा भक्तास्तैः प्रकृष्टः सङ्गो यदा तदैव नान्यदा ॥ २० ॥

अमीषाममीभिः शोभनं सुकृतमुत स्विदथवा स्वयमेव साधनं विनैव हरिरेषां प्रसन्नोऽभूदेतादृशभाग्यस्य पुण्यजन्यत्वासम्भवा-दिति भावः । भारताजिरे भारताङ्गणे । ननु दुरात्मनामपि तत्र जन्म दृश्यते इत्यतो विशिंषन्ति । मुकुन्दसेवौपयिकं हि यस्मात्तोऽस्माकं केवलं स्पृहैव यत्र न तु प्राप्तिः ॥ २१ ॥

ननु भवद्भिरपि भारते जन्म प्राप्यैव सत्कर्मभिर्दिवि सुख-मुपभुज्यते इति चेदस्माकं तज्जन्म धिक् तानि कर्माण्यपि धिक् तत्प्राप्यं दिवमपि धिक् अत्रत्यं सुखमपि धिगित्यभिव्यञ्ज-यन्त आहुः । किमिति क्षुजयेन स्वर्गप्राप्त्या किं न किञ्चिदपि फलं

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कुतः यत्र दिवि नारायणपादपङ्कजस्मृतिर्नास्ति । प्रत्युत अतिशयितादिन्द्रियाणामुत्सवाद्भोगात् स्मृतिः प्रमुष्टा ॥ २२ ॥

ब्रह्मलोकादपि सकाशात् भारतभूमेरुत्कर्षः खल्वपूर्व एवेत्याह । कल्पायुषामिति । ब्रह्मलोके द्विपरार्द्धपर्यन्तनिवासादपि सकाशात् भारतभूमौ क्षणमात्र वासोऽपि श्रेष्ठ इत्यर्थः । तत्र हेतुः पुनर्भवात् ब्रह्मलोके तावान् वासोऽपि पुनर्भवप्रद इत्यर्थः भारते तु मर्त्येन मरणधर्मणापि देहेन क्षणेन क्षणमात्रकालेनापि मनस्विनो भगवच्चरणादत्तमनसः हरेः पदमभयं वैकुण्ठं ब्रह्मलोकमूर्द्धन्यपि पादौ निधाय यान्ति कृतं शुभाशुभं सर्वमेव कर्म संन्यस्य परित्यज्य ॥ २३ ॥

तस्माद्विवेकिनामयमेव विवेक इत्याहुः । न यत्रेति । वैकुण्ठकथासुधेव सर्वत आधिक्येन स्वाद्वी तदापगेव भूयसी नतु ज्ञानयोगादिकथेव अव्या अल्पीयसी च । भागवता भगवदालम्बिनः तदाश्रयाः तामेवाश्रयन्तः नतु परमात्मालम्बिनः ज्ञानादिसिद्धयर्थं तां किञ्चिन्मात्रीमपेक्षमाणाः यज्ञानां ब्रह्मयज्ञादीनामाङ्गिरसबृहस्पतिसवादीनामप्यन्येषां चेशस्यापि हरेर्मखाः "यज्ञैः सङ्कीर्त्तनप्रायैर्यजन्ति हि सुमेधसः,, इति प्रमाणोक्तलक्षणाः सङ्कीर्त्तनबहुलाः परिचरणादिरूपाः महान्तः उत्सवा गीतनृत्यवाद्यप्रकाराधनाद्या येषु ते यत्र न सन्ति सः सुरेशस्य ब्रह्मणोऽपि लोकः न सेव्यतां नाश्रीयताम् ॥ २४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नामभिः पुनन्तीनामर्थात् हे गङ्गे ! हे यमुने ! इत्येवं नामोच्चारणमात्रेणैव पवित्रीभूताः प्रजाः अपः आत्मना च देहेनाप्युपस्पृशन्ति ॥ १७-१८ ॥

अस्मिन्नेव वर्षे लब्धजन्मभिः शुक्लादिवर्णेन स्वारब्धेन स्वकृतेन कर्मणा आनुपूर्व्येण स्वकर्मानुसारेण दिव्याद्या गतयः सर्वा एव आत्मनो विधीयन्ते साध्यन्ते किञ्च सर्वेषां वर्णानां यथावर्णविधानं यस्य ब्राह्मणादिवर्णस्य यद्विधानं मोक्षोपायविधानं तदनतिक्रमेणापवर्गो मोक्षश्चापि भवति अस्मिन् वर्षे मोक्षसाधनप्राचुर्यस्यामिति भावः मुक्त्यधिकारस्तु देवानामपि दर्शितः । तदुपर्यपि बादरायणः सम्भवात् इति १-३-२६-३ ॥१९॥

भगवन् ! कोऽसौ उपायः तद्वर्णनं स्वयमेव कृपया कुरु इत्यत्र मोक्षोपायमाह । य इति । नानागतिनिमित्तायाः

अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते ।
यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप ! सर्वगा ।

इतिस्मृतिप्रसिद्धायाः पुण्यपापरूपायाः अविद्यायाः ग्रन्थिरन्धनद्वारेण भगवति योऽसौ अनन्यनिमित्तो निष्कामः भक्तियोगलक्षणः इत्यन्वयः कथम्भूते नास्ति आन्यम् अतमभवं रागद्वेषादि यस्माद्भजनीयात्तस्मिन्ननिरुक्ते एतावानित्येवं वाचामगोचरे अनिलयने स्वाश्रये स भक्तियोगः यदा महापुरुषस्य भगवतः पुरुषैर्दासैः प्रकृष्टः सङ्गो भवेत्तदा भवति ॥ २० ॥

एतदेव । भरतखण्डजानां कृतार्थत्वम् अमीषामेभिः ॥ २१ ॥

फल्गुना तुच्छेन अतिशयेन्द्रियोत्सवात् हेतोः प्रमुष्टा अभूत् अतः नारायणपादपङ्कजस्मृतिरप्यत्र नास्ति ॥ २२ ॥

क्षणायुषामल्पायुषां क्षणेनाल्पेनायुषा मर्त्येन देहेन कृतं कर्म संन्यस्य अभयमपुनर्भवम् ॥ २३—२४ ॥

———

भाषा टीका ।

ये नदी नामही लेने से मनुष्यों को पवित्र करनेवाली हैं तहां पर भी भारतवासीजन इनके जलों से स्नान पानादि करते हैं ॥ १७ ॥

उन के नाम चन्द्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणी पयस्विनी शर्करावर्ता तुङ्गभद्रा कृष्णा वेण्या भीमरथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती सिन्धु अन्ध शोणनद महानदी वेदस्मृती ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयू रोधस्वती सप्तवती सुसोमा शतद्रू चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वा ए सब महानदी हैं ॥ १८ ॥

इसी भारतवर्ष मे जिनपुरुषों के जन्म भये हैं उनहींको अपने प्रारब्ध के अनुसार सात्विक राजस तामस कर्म से देवता मनुष्य नारकी गति सबों को सब क्रम से विधान की जाती हैं और वर्णाश्रम के अनुसार धर्मों से मोक्ष भी उन का होता है ॥ १९ ॥

जब कभी भागवतों के सङ्गहोने से सर्वभूतों के आत्मा देह दोष रहित वचन के अगोचर सर्वाधार परमात्मा भगवान् वासुदेव मे नाना प्रकार की गतियों के निमित्त अज्ञान ग्रन्थि का नाश करने वाला निष्काम भक्तियोगरूप भजन होता है वही मोक्ष है दूसरा मोक्ष नहीं ॥ २० ॥

इसी बात को देवता गान करते हैं अहो इन जीवों ने क्या पुण्य किया है किम्वा इन से उपर हरि भगवान् प्रसन्न हैं जिन ने भारत भूमी मे प्राप्त होकर मनुष्यों मे जन्म लिया है जोकि जन्म भगवान् की सेवा के योग्य है जिसमें हम लोगों की इच्छा होती है ॥ २१ ॥

हम लोगों के वडे कठिन यज्ञों से तपसे व्रतों से अथवा दानादिकों से अतिक्षुद्र स्वर्ग से जय के क्या प्रयोजन है जहां पर की श्रीनारायण चरणारविन्द की स्मृति नहीं होती है उलटा और वडे इन्द्रियों के आनन्द से नारायण स्मरण नष्ट होगया है ॥ २२ ॥

कल्पपर्यन्त आयुवाले ब्रह्मादिकों के स्थान के प्राप्त होने से तो भारत भूमी का प्राप्त होना अच्छा है क्योंकि ब्रह्मादिकस्थानों से तो फिर संसार में आना पडता है और इस भारत भूमी में तो उत्साही पुरुष क्षणभङ्गुर मनुष्य शरीर से सब कर्मों को परमात्मा में समर्पण करके क्षणमात्र ही में अभय पुनरावृत्ति रहित श्रीहरि के स्थान वैकुण्ठ को चले जाते हैं ॥ २३ ॥

जहां पर श्रीनारायण कथा रूपी अमृत की नदी नहीं वहती हैं अथवा जहां पर भगवान् के आश्रय करने वाले भागवत साधु नहीं हैं जहांपर वडे नाम संकीर्तनादि उत्सव वाले श्रीभगवान् के पूजनादिक नहीं होते हैं ऐसा तो यदि ब्रह्मलोक वा इन्द्र लोक होवै तो उसमें नहीं रहना चाहिये ॥ २४ ॥

प्राप्ता नृजातिं त्विह ये च जन्तवो ज्ञानक्रियाद्रव्यकलापसंभृताम् ।
न वै यतेरन्नपुनर्भवाय ते भूयो वनौका इव यान्ति बन्धनम् ॥ २५ ॥
यैः श्रद्धया बर्हिषि भागशो हविर्निरुप्तमिष्टं विधिमन्त्रवस्तुतः ।
एकः पृथङ्नामभिराहुतो मुदा गृह्णाति पूर्णः स्वयमाशिषां प्रभुः ॥ २६ ॥
सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत्पुनरर्थिता यतः ।
स्वयं विधत्ते भजतामनिच्छतामिच्छापिधानं निजपादपल्लवम् ॥ २७ ॥
यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य सूक्तस्य कृतस्य शोभनम् ।
तेनाजनाभे स्मृतिमज्जन्म नः स्याद्वर्षे हरिर्यद्भजतां शं तनोति ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अमुमुक्षूनगानिन्दन्ति । प्राप्ता इति । ज्ञानञ्च तदर्थाः क्रियाश्च तदर्थानि द्रव्याणि च तेषां कलापेन सम्भृतां पूर्णामपुनर्भवाय मोक्षाय वनौका इव वनौकसः पक्षिणो यथा लुब्धकान्मुक्ता अपि पुनर्यदि तस्मिन्नेव वृक्षे प्रमत्ता विहरन्ति तर्हि यथा बध्यन्ते तद्वत् ॥ २५ ॥

अहो भारतवासिनां भाग्यमित्याहुः । यैरिति । "अग्नये जुष्टं निर्वपामि इन्द्राय जुष्टं निर्वपामि" इत्येवं भागशो निरुप्तं पृथक् कृतं कथं विधिना प्रकारेण मन्त्रेण च वस्तुतश्चरुपुरोडाशादिभेदेन चेष्टं देवतामुद्दिश्य त्यक्तं निरुप्तं च ममेदमिति स्वीकृत्य त्यागानन्तरमश्नातीत्यर्थः पृथगिन्द्रादिनामभिराहुत आहूतः आशिषां प्रभुः स्वयं पूर्णोऽपि हरिः ॥ २६ ॥

तत्रापि निष्कामाः कृतार्था इत्याहुः । सत्यमिति । प्रार्थितः सन्नर्थितं ददातीति सत्यं तथापि परमार्थदो न भवत्येव यद्यस्माद्यतो दत्तादनन्तरं पुनरभ्यर्थिता भवति । ननु नार्थितश्चेत्किमपि न दद्यादित्याशङ्क्याहुः । अनिच्छतां निष्कामानां तु इच्छानां पिधानमाच्छादकं सर्वकामपरिपूरकं निजपादपल्लवं स्वयमेव सम्पादयति ॥ २७ ॥

स्विष्टस्य सम्यग्यजनस्य सूक्तस्य प्रवचनस्य कृतस्यान्यस्यापि कर्मणः स्वर्गसुखादुपभुक्तादवशेषितं यदि किञ्चिदस्ति तेनाजनाभे वर्षे नोऽस्माकं जन्म स्यात् कीदृशं स्मृतिमत् हरिरेव सेव्य इत्यनुसन्धानयुक्तम् । यतो हरिर्भजतां शं सुखं तनोति ॥ २८—२९—३०—३१ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं भारतवर्षेऽन्तरस्थान् विनिन्द्याधुना भारतवर्षस्थानपि नरानमुमुक्षूनिन्दन्ति । प्राप्ता इति । इहास्मिन् भारते वर्षे ये च जन्तवो जीवाः नृजातिं मनुष्यजन्म प्राप्ताः कथम्भूता द्रव्यक्रियाज्ञानकलापसम्भृतां द्रव्यं भूतपञ्चकं क्रिया कर्मेन्द्रियाणि ज्ञानं ज्ञानेन्द्रियाणि च एतेषां कलापेन सङ्घातेन च संभृतां पूर्णां भगवद्गुणकीर्तनार्चनपदप्रक्रमणगुणश्रवणविग्रहावलोकनसमार्पितफलस्याघ्राणोपयुक्तस्रग्गन्धवासोऽलंकारचर्चितोच्छिष्टभोजनादिरूपसर्वविधभगवत्सेवोपयुक्तज्ञानकर्मेन्द्रियतदाश्रयभूतसङ्घातपूर्णामित्यर्थः एवम्विधां नृजातिं प्राप्ता अपि यद्यपुनर्भवाय मुक्तये न यतेरन् यत्नं न कुर्युश्चेत्तर्हि भूयः पुनः वनौका इव वने स्थिता ओकाः शकुन्ता इव "ओकः शकुन्तपृशतौ" इति कोशः "उच समवाये" इत्यस्माद्धातोः कप्रत्यये गुणः कुत्वं च "ओकउचः क" इतिसूत्रेण निपात्यते कप्रत्ययस्तु "इगुपधज्ञाप्रीकिरः क„इत्यधिकारे "घञर्थे कविधानम्" इतिवचनेन यद्यपि घञ्यप्येतद्रूपसिद्धिस्तथाप्यन्तोदात्तार्थमिदं निपातनं घञि सति ञित्स्वरेणाद्युदात्तः स्यात् दिवौकसः जलौकस इत्येवमादौ तु असुप्रत्यये "उणादयो बहुलम्"इति वचनात्कुत्वं द्रष्टव्यं यथा शकुन्ता लुब्धकान्मुक्ता अपि पुनर्यदि तत्रैव प्रमत्ताः विहरन्ति तर्हि पुनर्यथा बध्यन्ते तद्वत् ॥ २५ ॥

अहो भारतवासिनां भाग्यमित्याहुः । यैरिति । यैर्भारतवासिभिर्नरैः बर्हिषि यज्ञे श्रद्धया विधिना प्रकारेण मन्त्रेण वस्तुतश्चरुपुरोडाशादिभेदेन चेष्टं देवतोद्देशेन त्यक्तं तथा भागशः "अग्नये त्वा जुष्टं निर्वपामि„इत्येवं भागशो निरुप्तं च हविः अग्नीन्द्रादिरूपेणैक एव स्थितः पृथग्नामभिरग्नीन्द्रादिनामभिराहुतः हुत इति दीर्घाभाव आर्षः पूर्णः स्वतोऽवाप्तसमस्तकामः अविजिघत्सोऽपि इति यावत् हविर्गृह्णातीत्यर्थः पूर्णः किमर्थं गृह्णाति तत्राह आशिषां प्रभुरिति । यत आशिषां पुरुषार्थानां प्रभुर्दाता अतो यष्टॄणामाशिषः प्रदातुं तत्कृताराधनं परिगृह्णातीत्यर्थः तदुक्तं भगवता "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्"इति ॥ २६ ॥

आशिषां प्रभुरित्यनेन धर्मादिचतुर्विधपुरुषार्थेप्सुभिर्भगवान् भारते वर्षे आराध्य इत्युक्तं तत्रापि केवलमुमुक्षून् स्तुवन्ति । सत्यमिति । अर्थितस्तत्तत्पुरुषार्थेप्सुभिः प्रार्थितः सन् भगवानर्थितं याचितं तं पुरुषार्थं दिशति ददातीति सत्यं तत्रापि नैवार्थदः न परमपुरुषार्थदः अस्थिराल्पपुरुषार्थदो न तु नित्यनिरतिशयमोक्षरूपार्थप्रदोऽभूदित्यर्थः अर्वाचीनपुरुषार्थदानानन्तरमप्यर्थितुर्याञ्चाया अनिवृत्तेरर्थितं दिशन्नपि न दत्तवानिति भावः एतदेवाह । जनः अवाप्तपुरुषार्थोऽपि यद्यतः पुरुषार्थान्तरं पुनरीश्वरं प्रत्यर्थिता याचिता एवमितरपुरुषार्थेप्सूनां नित्ययाचकत्वान्नित्यदरिद्रत्वमुक्तं तथा च वक्ष्यत्येकादशे "दरिद्रो यस्त्वसन्तुष्ट„ इति अथानिच्छतां मुमुक्षूणां सर्वपुरुषार्थानां मोक्षान्तर्भावादाढ्यत्वमाहुः अनिच्छतामकामयमानानां भजतां जनानाम्

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इच्छापिधानम् इच्छायाः पिधानमाच्छादकं स्वकीयं पादपल्लवं स्वयमेव विधत्ते समस्तपुरुषार्थरूपं स्वात्मानमेव ददातीत्यर्थः॥२७॥

एवं भारते मुमुक्षून् प्रस्तूयाथ स्वमनीषितमाविष्कुर्वन्तस्तमेव भारतं स्तुवन्ति । यदीति । यदि नः अस्माकं कृतस्य स्विष्टस्य सम्यग्यजनस्य सूक्तस्य प्रवचनस्य स्वर्गसुखावशेषितं स्वर्गसुखेनावशेषितम् अस्माभिः कृतं यागादिरूपं स्वर्गादिसुखं सम्पाद्य किञ्चिच्छोभनं सुकृतमुपभुक्तावशिष्टमस्ति चेद्यदीत्यर्थः तेन आचरितेन शुभेन कर्मणा नोऽस्माकमजनाभे भारते वर्षे भगवद्विषयकस्मृतिमज्जन्म नृजन्म स्यात् नृजन्मन्येव भगवद्विषयकस्मृतिसम्भवात् सम्भावितस्मृतिमात्रजीवजन्मना किं स्यादित्यत्राहुः । यतः स्मृतिवशाद्भजतां हरिः शं सुखं मोक्षरूपं सुखं तनोति ददातीत्यर्थः ॥ २८॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

इतोऽपि भारतं पुण्यक्षेत्रमाहुरित्याह । प्राप्ता इति इह भारते ये जन्तवः प्राणिमात्रनामानोऽपुनर्भवाय मोक्षाय न यतेरंश्चेत्ते भूयो वनौका इव निरयवासिन एव न चैषां पुनरुत्थितिरित्याह। यान्तीति "वसन्तु नरकं विन्ध्याद्रजने" इत्यभिधानं ये च नृजातिपुरुषत्वेन जननं प्राप्ताः "जातिः सामान्यजन्मनोः" इत्यभिधानं मुक्तये न यतेरंश्चेत्ते सुतरां भूयो वनौका महातमःस्थानयोग्याः एषशब्दवदोकशब्दोऽकारान्तः नानार्थेषु शब्दानामनेकान्तत्वेन पाठात् "बर्हिर्नाग्नौ नपुंसक" इत्यादिषु ये च नृनय इतिधातोर्ज्ञानकर्मयोग्यविप्रजातिं प्राप्तास्तेतोऽपि भूयो वनौकाः ॥ २५ ॥

अशेषसाधनत्वेन भारतस्योत्तमत्वमितरखण्डेभ्यो यतोऽत्र क्रियमाणकर्म यज्ञादिलक्षणं श्रीहरिप्रीतिजनकमतः स्तुवन्तीत्याह। यैरिति । भारतवासिभिर्यैः श्रद्धया बर्हिषि यज्ञे निरुप्तं हविराशिषां प्रभुरेकः स्वयम्मुदा गृह्णाति । कथं निरुप्तं विधिमन्त्रवस्तुतो भागश इष्टं इन्द्राय निर्वपामि प्रजापतये निर्वपामि, इति पृथङ्निरुप्तम् "इन्द्रं अजाग्निं यज" इति पृथगिष्टं विधिमन्त्राणामिन्द्रादिविषयत्वेन सिद्धत्वात् कथमेको हरिर्गृह्णातीत्युच्यत इति तत्राह । नामभिरिति । इन्द्रादिनामभिराहुतः धिष्ण्येश्वरादिवरप्रासव्यफलापेक्षी नेत्याह । पूर्ण इति। कुतः आशिषां प्रभुत्वात् ॥ २६ ॥

न केवलं हविरादाय तूष्णीमास्ते हरिः फलं च प्रयच्छतीत्याहुरित्याह । सत्यमिति । अर्थितो हरिस्तेषां यजतां नृणाम् अर्थितं स्वर्गादिकं दिशतीति सत्यं शपथेन प्रतिजानीते प्राप्तस्वर्गैरर्थितोऽपि पुनः फलं नैव दिशतीति इदञ्च सत्यम् अर्थिनो मदो भवतीति यद्यस्मात् "अपाम सोमम्" इत्यादेः तस्मात् पुनरार्थितं प्राप्य पुनः प्रार्थयमानस्य प्रार्थितो न दिशतीति । अमद इति । यदिति वा तत्रोत्रत्यानां स्वर्गादिकमेव दिशति न मोक्षमित्याशङ्का माभूदित्याहुरित्याह । स्वयमिति । इच्छाया विधानं यस्मात्तदिच्छाविधानम् अभीष्टदं निजपादपल्लवम्भजतां फलमनिच्छतां भक्तिमत्तरेण तेषां स्वयमात्मानं विधत्ते ददाति ॥ २७ ॥

स्वाभिप्रेतमाहुरित्याह । यद्यत्रेति । यत्र यस्मिन् भारतेऽपि वर्षे हरिर्निजपादपद्मं भजतां शं सुखं तनोतीति यद्यस्मात्तस्मात्स्विष्टादेः स्वर्गसुखावशेषितं स्वर्गसुखमनुभूयावशिष्टं यच्छोभनं तेन पुण्येन नोऽस्माकमजनाभस्मृतिनिमित्तं जन्म स्यादिति प्रार्थयामहे । तदुक्तम् ।

अनधिकारिणो देवाः स्वर्गस्था भारतोद्भवम् ।
वाञ्छन्त्यात्मविमोक्षार्थमुद्रेकार्थेऽधिकारिणः ।

इति वेदैर्गीतमिति ज्ञायते अनेन शास्त्रतात्पर्यार्थोऽपि निःसंदिग्ध इति बोद्धव्यम् ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इत्यर्पणमेव दर्शयति । यैर्नामभिरिष्टं देवतामुद्दिश्य त्यक्तं यत्तदेव भागशस्तत्तद्देवतामुद्दिश्य निरुप्तं पृथक् कृतं सत् पृथगिन्द्रादिनामभिरप्याहूत एक एव मुदा गृह्णाति तमुद्दिश्यैव तत्तन्नाम्ना त्यक्तत्वादिति भावः ॥ २६ ॥

सत्यमिति । अर्थितः प्रार्थितः सन् नृणामर्थितं सत्यमेव ददाति न तत्र कदाचिदपि व्यभिचार इत्यर्थः । किन्तु तथापि तन्मात्रेणार्थदो न भवति । तन्मात्रं दत्त्वा निवृत्तो न भवतीत्यर्थः । यत उपासकस्तत्रापूर्णत्वाद्भोगक्षये सति यदेव पुनरप्यर्पिता भवति "न जातु कामः कामानामुपभोगेन शाम्यति" इत्यादेः । तदेवमभिप्रेत्य स तु परमकारुणिकस्तत् पादपल्लवमाधुर्यज्ञानेन तदनिच्छतामपि भजतामिच्छापिधानं सर्वकामसमापकं निजपादपल्लवमेव विधत्ते तेभ्यो ददातीत्यर्थः । यथा माता चर्व्यमाणां मृत्तिकां बालकमुखादपसार्य तत्र खण्डं ददाति तद्वदिति भावः । एवमप्युक्तम् "अकामः सर्वकामो वा मोक्षकाम" इत्यादौ तीव्रत्वं भक्तेः । तथोक्तं गारुडे ।

यद्दुर्लभं यदप्राप्यं मनसो यन्नगोचरम् ।
तदप्यप्रार्थितं ध्यातो ददाति मधुसूदनः इति ॥ २७—३१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तादृशं भारतं प्राप्ता अप्यकृतार्था अतिशयेन शोच्या एव यथा लब्धचिन्तामणयोऽपि पूर्ववत् कृषीवला एवेत्याहुः । प्राप्ता इति । ज्ञानमधिदैवं क्रिया अध्यात्मं द्रव्यमधिभूतं तेषां समूहैः संभृतां पूर्णां श्रवणादिसर्वेन्द्रियैः पूर्णामिति हरिनामश्रवणकीर्तनादिसम्भवेऽपीति भावः । अपुनर्मृताय भक्तियोगाय वनौका इव वनौकसः पक्षिणो यथा लुब्धकान्मुक्ता अपि पुनर्यत्र तस्मिन्नेव वृक्षे प्रमत्ता विहरन्ति तर्हि यथा बध्यन्ते तद्वत् ॥ २५ ॥

अत्र भारते "एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्" इत्यादिश्रीभगवदुक्तां भगवद्विभूतिबुद्ध्या विश्वरूपोपासनामपि कुर्वाणा धन्या एवेत्याहुः । यैरिति । बर्हिषि यज्ञे विधिना प्रकारेण मन्त्रेण वस्तुतश्च हविर्यज्ञीयद्रव्यमिष्टं शुद्धं भागशः इन्द्राय स्वाहा अग्नये स्वाहा इत्यादि पृथक् कृतं निरुप्तं दत्तं पूर्णोऽपि आशिषां प्रभुः हरिस्तेषां भक्त्या गृह्णाति एकोऽपि पृथगिन्द्रादिनामभिराहुतः आहूतः ॥ २६ ॥

शुद्धां भक्तिं कुर्वाणास्तु सकामा अपि कृतार्था निष्कामभक्ततुल्या एव भवन्तीत्याहुः । सत्यमिति । नृणां भजतामर्थितं कामितं पदार्थं तैरर्थितः सन् दिशति ददातीति सत्यं किन्तु यथा पुनरर्थिता भोगान्ते याचकत्वं स्यात्तथा नैवार्थदः कथमेवमवगतमित्यत आह । यतः निजपादपल्लवमनिच्छतामपि भजतां स्वयमेव ध्रुवादीनामिव इच्छापिधानं सर्वकामाच्छादकं

श्रीशुक उवाच।

जम्बूद्वीपस्य च राजन्नुपद्वीपानष्टौ हैक उपदिशन्ति सगरात्मजैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान् ॥ २९ ॥

तद्यथा स्वर्णप्रस्थश्चन्द्रशुक्ल आवर्त्तनो रमणको मन्दरहरिणः पाञ्चजन्यः सिंहलो लङ्केति ॥ ३० ॥

एवं तव भारतोत्तम ! जम्बूद्वीपवर्षविभागो यथोपदेशमुपवर्णित इति ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां संहितायां वैयासिक्यां जम्बूद्वीपवर्णनं नाम एकोनविंशतितमोऽध्यायः ॥१६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

तदेव निजपादपल्लवं विधत्ते कृपया ददाति निजपादपल्लवं स्वयमेव बलाद्दत्वा इच्छायाः पिधानमाच्छादनं विधत्ते करोतीति वा। ततश्चानभीप्सितामपि सितशर्करां पितुः सकाशात् प्राप्य शिशवो यथा मृदि स्पृहां त्यजन्ति तथैव कामानपीत्यर्थः। अत एव "अकामः सर्वकामो वा" इत्यादौ तीव्रेण ज्ञानकर्माद्यमिश्रेण भक्तियोगेन यजेतेत्युक्तम्। अत्र निष्कामाणां सकामानाञ्च भक्तानामन्ततः पादपल्लवप्राप्तावपि नैव सर्वथा ऐकरूप्यं भावनीयम्। न हि जात्यैव शुद्धं बलात् शोधितञ्च वस्तुतुल्यमूल्यं भवत्यतो ध्रुवादिभ्यः सकाशाद्धनुमदादीनामुत्कर्षः परम एव दृश्यत इति ॥ २७ ॥

अत एव प्रार्थयन्ते। यद्यत्रेति। स्विष्टस्येति स्विष्टादिजन्यात् स्वर्गसुखादुपभुक्तादवशेषितं शोभनं सुकृतमस्ति तेन हेतुना अजनाभे भारते जन्म स्यात् स्मृतिमदेतादृशौत्सुक्यस्मरणायुक्तम्। ततश्च तत्र साधुसङ्गं कृत्वा हरिं भजिष्यामः यद्यस्माद्भजतां हरिः शं तनोत्येव ॥ २८—३१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

नित्यवद्धाभिन्दन्ति। भासा इति। ज्ञानञ्च तत्पूर्विका क्रिया वासुदेवाराधनं तदर्थानि द्रव्याण्याराधनोपकरणानि च तेषां कलापेन संभृता पूर्णा वनौका वनौकसः ॥ २५ ॥

सकामानामपि भगवद्भक्तानां भारतवासिनामहोभाग्यमित्याहुः। यैरिति। बर्हिषि यज्ञे यैः भारतवासिभिः "अग्नये जुष्टं निर्वपामि इन्द्राय जुष्टं निर्वपामि" इत्येवं भागशो निरुप्तं पृथक् कृतम् श्रद्धया विधिना प्रकारेण च मन्त्रेण वस्तुतश्च चरुपुरोडाशादिभेदेन इष्टं देवतोद्देशेन त्यक्तं पृथगिन्द्रादीनां नामभिः आहुतः आहूतः आशिषां प्रभुः स्वयं पूर्णोऽपि भगवानेक एव हविः गृह्णाति "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" इति श्रीमुखवचनात् ॥ २६ ॥

निष्कामभक्तास्तु कृतार्था इत्याहुः। सत्यमिति। अर्थितः प्रार्थितः अर्थितं याचितं पुरुषार्थं ददातीति सत्यमथापि अर्थदः परमपुरुषार्थदो न भवति यद्यस्माद्यतो दत्तानन्तरं पुनरर्थिता इच्छा भवति अनिच्छतां निष्कामानां भजतां तु इच्छानां पिधानमाच्छादकं सर्वकामपरिपूरकं निजपादपल्लवं स्वयमेव विधत्ते ददाति ॥ २७ ॥

यदि नोऽस्माकं स्विष्टस्य सम्यग्यजनस्य प्रवचनस्य कृतस्य अन्यस्यापि तपोव्रतादेरनुष्ठितस्य स्वर्गसुखादुपभुक्तादवशेषितमवशिष्टं शोभनं पुण्यं यत्किञ्चिदस्ति तर्हि तेन शोभनेन अजनाभे वर्षे नोऽस्माकं जन्म स्यात् कीदृगत्र वर्षे हरिर्यजतां भजतां शं सुखं तनोतीति स्मृतिमत् ॥ २८ ॥

भाषाटीका।

जो जन्तु इस भारतवर्ष में ज्ञानेन्द्रिय कर्मेन्द्रिय पञ्च भूत-समूह रूप मनुष्यजाति को प्राप्त होकरभी मोक्ष के वास्ते यत्न नहीं करते हैं वे लोग वन के पक्षी के तुल्य फिर बन्धन में ही प्राप्त होते हैं ॥ २५ ॥

जिन भारत वासिमनुष्यों के विधिपूर्वक मन्त्रों से वस्तुओं द्वारा यज्ञ में पृथक् भाग से प्रदान किये हवि को स्वयं चारों पुरुषार्थों के पति भी एकहोकर भी भगवान् भिन्न नामों से देने परभी परिपूर्ण होकर भी बुलाने पर बड़े हर्ष से ग्रहण करते हैं ॥ २६ ॥

यद्यपि भगवान् उन सकाम पुरुषों को देते हैं सो ठीक है परन्तु तौभी वह देना ठीक नहीं होता है क्योंकि उस के भोग होजाने पर फिर मांगना पड़ता है और निष्काम भक्त तो इच्छा नहीं करते हैं तौभी सब इच्छाओं के दूरकरने वाले अपने चरण के स्मरण को भगवान् दे देते हैं तिस से फिर चाहना नहीं होती है ॥ २७ ॥

यदि इहां पर स्वर्ग सुख से शेष सुन्दर यज्ञ का या वेदाध्ययन का या सुकृत का कुछ पुण्य होवै तिस से भारत वर्षमे हरिस्मरण सहित हमारा जन्म होवे जहांपर कि भजन करने वालों का भगवान् कल्याण करते हैं ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम् ऊनविंशोऽध्यायः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं नवखण्डात्मकं जम्बूद्वीपं ससंस्थानं सपर्वतनदिं सवर्णाश्रमधर्मवन्मनुजमुपवर्ण्याथजम्बूद्वीपस्योपद्वीपानष्टौ आह । जम्बूद्वीपस्येति। हे राजन्! एके अभिमुक्ता अद्धा जम्बूद्वीपस्योपद्वीपान् उपदिशन्ति ते जम्बूद्वीपाः न प्रियव्रतस्य रथचरणनेमिना परिक्लृप्ता इत्याह। सगरात्मजैः यागीयाश्वस्यान्वेषणसमये इमां जम्बूद्वीपात्मिकां पृथिवीं तत्र निखनद्भिरवदारयद्भिरुपकल्पिताः ॥ २६ ॥

तेषामुद्देशं प्रतिजानीते । तद्यथेति । तानुद्दिशति स्वर्णप्रस्थ इत्यादिना ॥ ३० ॥

एवं सोपद्वीपं जम्बूद्वीपमुपवर्ण्योपसंहरति। एवमिति। हेभारतोत्तम! जम्बूद्वीपस्य ये वर्षा इलावृतादयस्तेषां विभागो यथोपदेशं यथाक्रममनुवर्णितः॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकोनविंशोऽध्यायः॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एक इति विशेषणाद्विशेषविवक्षवोऽष्टावुपद्वीपानुपदिशन्ति । सामान्यविवक्षवस्तान् समुद्रैकदेशानिति ॥ २६ ॥ ३० ॥ ३१ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
एकोनविंशोऽध्यायः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
ऊनविंशः पञ्चमस्य सङ्गतः सङ्गतः सताम् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इमां महीं निखनद्भिरित्यनेन नवसहस्रयोजनविस्तारो भरतखण्डस्तत्र भूखननजलप्रवेशादिनाल्पविस्तारोपलब्धिर्न विरुध्यते इति सूचितम् ॥ २६—३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
ऊनविंशाध्यायार्थप्रकाशः ॥ १६ ॥

भाषाटीका ।

श्री शुकदेव जी बोले हे राजन्! कोई मुनि जम्बूद्वीप के आठ उपद्वीप हैं ऐसा कहते हैं जिन को कि घोड़ा के ढूंढते समय मे सगर के पुत्रों ने पृथिवी के खोदने से बनाये हैं॥२६॥

सो जैसे स्वर्णप्रस्थ चन्द्रशुक्र आवर्तन रमणक मन्दरहरिण पाञ्चजन्य सिंहल लङ्का इनके नाम हैं॥ ३० ॥

हे भारत! इस प्रकार से जम्बूद्वीपवर्षोंका विभाग जैसा सुना है तैसा तुम से हमने वर्णन करदिया है॥ ३१ ॥

इति श्रीभागवत पञ्चमस्कन्ध उन्नीसमे अध्यायका
भाषानुवाद लक्ष्मणाचार्य कृत
समाप्त ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे ऊनविंशोऽध्यायः समाप्तः ॥ १६ ॥

॥ विंशोऽध्यायः ॥

—————:०:—————

॥ श्रीशुक उवाच ॥

अतः परं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते ॥ १ ॥

जम्बूद्वीपोऽयं यावत्प्रमाणविस्तारस्तावता क्षारोदधिना परिवेष्टितो यथा मेरुर्जम्ब्वाख्येन लवणोदधिरपि ततो द्विगुणविशालेन प्लक्षाख्येन परिक्षिप्तो यथा परिखा बाह्योपवनेन प्लक्षो जम्बूप्रमाणो द्वीपाख्याकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वस्तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्त वर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम ॥ २ ॥

शिवं यवसं सुभद्रं शान्तं क्षेममममृतमभयमिति वर्षाणि तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः ॥३॥

मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुपर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः अरुणा नृम्णाङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरा इति महानद्यः यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतङ्गोर्ध्वायनसत्याङ्गसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसंदर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्यमात्मानं यजन्ते ॥ ४ ॥

प्रत्नस्य विष्णो रूपं यत्सत्यस्यर्तस्य ब्रह्मणः। अमृतस्य च मृत्योश्च सूर्यमात्मानमीमहीति॥५॥

प्लक्षादिषु पञ्चसु पुरुषाणामायुरिन्द्रियमोजः सहो बलं बुद्धिर्विक्रम इति च सर्वेषामौत्पत्तिकी सिद्धिरविशेषेण(१) वर्तते ॥ ६ ॥

प्लक्षः स्वसमानेनेक्षुरसोदेनावृतो यथा तथा द्वीपोऽपि शाल्मलो द्विगुणविशालः(१)समानेन सुरोदेनावृतः परिवृङ्क्ते ॥ ७ ॥

यत्र ह वै शाल्मली प्लक्षायामा यस्यां वाव किल निलयमाहुर्भगवतश्छन्दःस्तुतः पतत्त्रिराजस्य सा द्वीपहूतये उपलक्ष्यते ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

विंशे प्लक्षादिषड्द्वीपस्थितिमाह सहार्णवैः।
लोकालोकस्थितिश्चान्तर्बहिर्भागादिमानतः ॥ १—१ ॥

तावता लक्षविस्तारेण परिक्षिप्तः परिवेष्टितः। उपास्ते तिष्ठति आकलय्य समर्प्य ॥ २ ॥

अभिज्ञाताः प्रसिद्धाः सप्तैव अन्ये च पर्वता नद्यश्च सहस्रशः सन्तीत्यर्थः। मानसोत्तरस्य मण्डलाकारत्वोक्तेरेतेषु प्लक्षादिपञ्चद्वीपेषु वर्षाद्रयस्तिर्यग्रेखाकारा उभयतोऽब्धिस्पृश इति गम्यते अन्यथा सप्तभिः सप्तवर्षविभागासम्भवात् वैष्णवे वर्षाणां पूर्वादिक्रमोक्तेश्च ॥ ३ ॥

जलोपस्पर्शनेन विधूतं रजस्तमश्च येषां हंसादयो ब्राह्मणादिस्थानीयाः विबुधोपमं संदर्शनं श्रमस्वेदादिरहितं रूपं प्रजननमपत्योत्पादनं च येषाम् ॥ ४ ॥

विगीता अपि द्वीपमन्त्रा व्याख्यायन्ते प्रत्नस्य पुराणपुरुषस्य विष्णोर्यद्रूपं तं सूर्यमीमहि शरणं व्रजेम कथंभूतम् सत्यादीनामात्मानमधिष्ठातारं तत्र सत्यमनुष्ठीयमानो धर्मः ऋतं प्रतीयमानो धर्मः ब्रह्मणस्तद्बोधकस्य वेदस्य। अमृतस्य शुभफलस्य मृत्योरशुभफलस्य ॥ ५—६—७ ॥

"सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिर" इत्यादिश्रुतेश्छन्दोभिः स्वावयवभूतैः श्रीविष्णुं स्तौतीति छन्दःस्तुत् तस्य गरुडस्य निलयनं स्थानं सा शाल्मली द्वीपस्य हूतये व्यपदेशाय ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

————

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवं जम्बूद्वीपः सप्रपञ्चमुपवर्णितः अथ प्लक्षादीनां द्वीपानामुपवर्णनं प्रतिजानीते शुकः। अत: परमिति। प्लक्षादीनां ये वर्षा-

---

परिवृत्तेनेति श्रीविजयध्वजतीर्थपाठः। (१) स्वमानेनेति श्रीवीरराघवाचार्यपाठः।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एतेषां विभागः प्रमाणं परिमाणं लक्षणं तेषु वसतामायुरिन्द्रियौजःसहोबलबुद्धिविक्रमादीनां स्वभावतो वर्द्धकत्वरूपं संस्थानमनितरासाधारणाकारः एभिरुपवर्ण्यते ॥ १ ॥

तावत् प्लक्षद्वीपमुपवर्णयति । जम्बूद्वीप इत्यादिना जम्ब्वाख्येनेत्यन्तम् । दृष्टान्तार्थं यथा जम्बूद्वीपो यावद्विस्तारः लक्षयोजनविशालः । तावता लक्षयोजनविस्तीर्णेन क्षारोदधिना लवणसमुद्रेण परितो वेष्टित आवृतः यथा च मेरुर्द्वीपमध्यस्थो जम्ब्वाख्येन द्वीपेन परिवेष्टित इत्यनुषङ्गः तथा लवणोदधिरपि ततः लवणोदधेर्द्विगुणविशालेन द्विलक्षयोजनविस्तीर्णेन प्लक्षाख्येन परितः अभितः क्षिप्तः आवृतो जम्बूद्वीपस्याप्यत्रत्यैः साकल्येनादृष्टत्वात् अप्रसिद्धत्वात् दृष्टान्तान्तरमाह । यथा परिखा बाह्योपवनेन परिक्षिप्तेति लिङ्गपरिणामेनानुषङ्गः द्वीपमध्यस्थः प्लक्षो वृक्षः जम्बूप्रमाणः जम्बूवृक्षतुल्योच्छ्रायः द्वीपस्य आख्यातिराख्यानं यत् प्लक्षेति नामधेयं तत्कर आपादकः हिरण्मयः प्रकाशबहुलः उत्थित ऊर्ध्वं स्थितः यत्र यस्मिन् प्लक्षवृक्षमूले सप्त जिह्वाः ज्वाला यस्य तादृशोऽग्निरुपास्ते तिष्ठति तस्य द्वीपस्याधिपतिरधिपातिरित्यनेन चिरं तद्द्वीपाधिपत्यं कृतवानिति गम्यते प्रियव्रतस्यात्मज आग्नीध्रानुज इध्मजिह्वः तं प्लक्षद्वीपं सीमाबन्धनेन सप्तवर्षात्मकं विभज्य सप्तानां वर्षाणां नामानि तान्येव नामानि येषां तेभ्यः पुत्रेभ्यः सप्त वर्षाण्याकलय्य समर्प्य स्वयमात्मयोगेन भगवदुपासनात्मकभक्तियोगेनोपरामोपरतः संसारान्मुक्तोऽभूदित्यर्थः ॥ २ ॥

पुत्रनामानि वर्षाणि निर्दिशति । शिवमित्यादिना । तान्पुत्रानाकलय्येति पूर्वेणान्वयः तेषु वर्षेषु गिरयो नद्यश्च सप्त सप्तैवाभिज्ञाताः प्रसिद्धा आसन्नित्यर्थः तावत्पर्वतान्नामाभिर्निर्दिशति । मणिकूट इति मेघमाल इत्यन्तेन । एते एव वर्षाणां मर्यादागिरय इत्याह । सेतुशैला इति । नदीर्निर्दिशति नामभिः अरुणेत्यादिना विश्वम्भरेत्यन्तेन । इतिशब्देनैतैरेव नामभिस्तत्र तत्र शिवादिवर्षे व्यवह्रियन्त इति सूच्यते नदीर्विशिनष्टि । महानद्य इति । स्वच्छत्वपवित्रत्वविस्तृतत्वादिमहागुणाश्रया इत्यर्थः ॥ ३ ॥

पुनस्ता एव नदीर्विशिंषंस्तेषु प्लक्षद्वीपवर्षेषु चतुरो वर्णान्नामभिर्निर्दिशन्तेषामायुःपरिमाणमुपास्यञ्चाह । यासामिति । यासामरुणादिनदीनां जलस्योपस्पर्शेन स्नानपानादिना विधूतं रजस्तमश्च येषां ते चत्वारो वर्णा हंसादिसंज्ञाः ब्राह्मणादिसंज्ञास्थानीया हंसादिसंज्ञाः सहस्रं वर्षाण्यायुरेषां ते तादृशाः विबुधोपमं संदर्शनं सौन्दर्यं येषां तानि प्रजननान्यपत्यानि येषामेवम्भूताः सन्तस्त्रय्या विद्यया वेदविद्यया वेदोक्तकर्मयोगादिभिः तन्मूलस्मृत्याद्युक्तमार्गैश्च यथायोग्यं त्रयीमयम् ऋग्यजुरादिवेदप्रचुरं तद्धारकत्वात् तदध्यापयितृत्वात्तत्प्रतिपाद्यत्वाच्च तत्प्राचुर्यं बोध्यं सूर्यं सूर्यशरीरकमात्मानं परमात्मानं यजन्ते आराधयन्ति ॥ ४ ॥

तेषां जप्यमानमन्त्रमाह । प्रत्नस्येति । प्रत्नस्य पुराणस्यानादेर्जगत्कारणस्येति यावत् सत्यस्य निर्विकारस्य प्रत्नस्येत्यनेन समष्टिजीवव्यावृत्तिः तस्य सादित्वात् सत्यस्येत्यनेन व्यष्ट्यवस्थचेनाचेतनव्यावृत्तिः तयोर्विकारित्वादृतस्य निरतिशयसुकृतफलस्य धर्माद्यर्वाचीनसुकृतफलप्रदस्येत्यर्थः ऋतस्य तदभिन्नत्वादुपचारस्तदभेदेन निर्देशः ऋतशब्दो हि सुकृतफलपरः "ऋतं पिबन्तौ सुकृतस्य लोके,, इति श्रौतप्रयोगात् । यद्वा । ऋतशब्दः पुण्यस्य कर्मणो वाचक उपचारात्तदन्तरात्मतया तत्कारयितरि प्रयुज्यते पुण्यस्य कर्मणः कारयितुरित्यर्थः तत्कारयितृत्वञ्च श्रुतेः "एष एव साधु कर्म कारयति यमुन्निनीषति,,इति ऋतशब्दो हि पुण्यस्य कर्मणोऽपि वाचकः "यथा पुण्यस्य कर्मणो दूराद्गन्धो वाति"इति पुण्यं कर्म प्रस्तुत्य तत्प्रतिसम्बन्धिनो पुण्यस्य कर्मण एवम् "अनृतादात्मानं जुगुप्सेत"इत्यनृतशब्देन निर्देशात्पुण्यस्य कर्मणः ऋतशब्दो वाचक इत्यवगम्यते तथा अमृतस्य च मृत्योश्चेत्यमृतमृत्युशब्दावपि बन्धमोक्षवाचकौ उपचारात्तद्धन्तौ प्रयुक्तौ भगवतश्च बन्धमोक्षहेतुत्वञ्च श्रुतम् "संसारमोक्षस्थितिबन्धहेतुः"इति "उतामृतत्वस्येशानो यदन्नेनातिरोहति"इति च एवम्भूतस्य ब्रह्मणो विष्णोर्यद्रूपं शरीरभूतं तत्सूर्याख्यमात्मानं जीवविशेषमीमहि शरणं व्रजेम प्रतर्दनविद्यान्यायेनात्र सूर्यजीवशरीरकपरमात्मोपासनमुक्तमित्यवगन्तव्यम् ॥ ५ ॥

प्लक्षादिषु पञ्चसु द्वीपेषु अविशेषेण सामान्येन सर्वेषां पुरुषाणामायुरादिरूपा सिद्धिरौत्पत्तिकी जन्मसिद्धा वर्त्तते अत्रेदमवगन्तव्यं मानसोत्तरगिरेर्मण्डलाकारत्वोक्तेरेतेषु प्लक्षादिषु पञ्चसु द्वीपेषु वर्षाद्रयस्तिर्यक्त्वाकारा उभयतोऽब्धिस्पृशः अन्यथा सप्तभिः सप्तवर्षाणां विभागासम्भवाच्च श्रीवैष्णवे पुराणे वर्षाणां पूर्वादिक्रमेणोक्तेश्चेति ॥ ६ ॥

एवं प्लक्षद्वीपः सवर्षपर्वतनदीसवर्णाश्रमपुरुष उपवर्णितः अथ तद्दृष्टान्तेन शाल्मलीद्वीपमनुवर्णयति । प्लक्ष इति । यथा प्लक्षद्वीपः समानेन स्वतुल्यविशालेनेक्षुरसोदेन द्विलक्षयोजनविशालेनावृतस्तथा शाल्मलीद्वीपोऽपि द्विगुणविशालः प्लक्षद्वीपापेक्षया चतुर्लक्षयोजनविशाल इत्यर्थः स्वमानेन चतुर्लक्षयोजनविशालेन सुरोदधिनाभितो वृत्तेनाकारेणावृतः परिवेष्टितः ॥ ७ ॥

यत्र द्वीपे शाल्मली प्लक्षद्वीपसमानविस्तार आस्ते तां विशिनष्टि । यस्यां शाल्मल्यां वाव किलशब्दो निपातसमुदायः प्रसिद्धिद्योतकश्छन्दस्तुतः छन्दोभिः "सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिरो गायत्रं चक्षुः स्तोमः आत्मा साम ते तनू वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञायज्ञीयं पुच्छं छन्दांस्यङ्गानि धिष्ण्या पारिशिक्षा यजूंषि नाम"इत्यादिभिः छन्दोऽवयवत्वेन स्तूयते इति छन्दस्तुत् आर्षत्वात्कर्मणि क्विप् तस्य छन्दसामक्षरेयत्तारूपपरिणामात्मकानां गायत्र्यादीनां तच्चक्षुराद्यवयवत्वं तेषां तच्चक्षुराद्यवयवत्वदृष्ट्योपासननिबन्धनमित्यवगन्तव्यम् । यद्वा छन्दः सुपर्णोऽसीत्यादिरूपं स्तुत्यं यस्य गायत्र्याद्यवयवकत्वेन स्तावकं यस्येत्यर्थः एवम्भूतस्य पतत्रिराजस्य पक्षिराजस्य गरुत्मतः सौपर्णस्य निलयनं नीडमाहुः विपश्चित इति शेषः सा शाल्मली द्वीपहूतये हूतिर्व्यवहारः शाल्मलीद्वीप इति व्यवहारायेत्यर्थः उपलभ्यते उपलक्ष्यते दृश्यत इत्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्लक्षादिद्वीपप्रमाणादिज्ञानेन श्रीनारायणमाहात्म्यमेव ज्ञाप्यतेऽस्मिन्नध्याये प्रमाणमियत्ता "प्रमाणं बोधनेयत्तामर्यादाशास्त्रहेतुषु" इति यादवः लक्षणमेतावद्भिरिसरित्क्ष्माद्युक्तं संस्थानं वर्तुलचतुरस्रत्वादिस्वरूपप्रकारः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तावता विस्तारेण लक्षयोजनप्रमाणेन ततो जम्बूद्वीपात् प्लक्षाख्येन बहिःस्थितेन तत्र दृष्टान्तो यथेति । यत्र द्वीपे प्लक्ष उत्थितः असौ प्लक्षः जम्बूप्रमाणः द्वीपाख्यातिकरत्वे जम्बूं प्रमाणीकरोति अधिसहस्रयोजनोन्नाह इति वा यत्रे-त्युत्तरत्रापि सम्बद्ध्यते श्रीहरिमितिशेषः आकलय्य दत्वा ॥ २ ॥

अभिज्ञाताः प्रसिद्धाः प्रधाना वा ॥ ३ ॥

सेतुशैलाः मर्यादागिरयः विबुधोपमसंदर्शनं प्रजननं सुरतवलञ्च येषां ते तथा सूर्यात्मानं सूर्यस्वरूपम् ॥ ४ ॥

प्रत्नस्य पुरातनस्य विष्णोर्व्याप्तस्य हरेर्यद्रूपं प्रतिमास्थानीयं यच्च सत्यतस्य वाचिककायिकसुकृतप्रेरकस्य ब्रह्मणो विरिञ्चस्य रूपं सन्निधाननिमित्तं यच्चामृतस्यामरसमूहस्य मृत्योर्मारकस्य महेश्वरस्य रूपम् एवं त्रिमूर्तिनिवासयोग्यं तं सूर्यमात्मानमीमहि शरणं प्राप्नुम इति मन्त्रार्थः । ननु सूर्यान्तः स्थितं हरिं शरणं प्रपद्यामह इति व्याख्यानं किं प्रमाणकं प्रतीतार्थं परित्यज्यान्यार्थाङ्गीकारस्य प्रमाणसापेक्षत्वादितीयमाशङ्का ।

सूर्यसोमाग्निवारीशविधातृषु यथाक्रमम् ।
प्लक्षादिद्वीपसंस्थासु स्थितं हरिमुपासते ॥

इत्येतेन परिहर्तव्येति ॥ ५ ॥ ६ ॥

परिवृत्तेन वर्तुलेनेत्येतत्सर्वद्वीपसमुद्रेष्वनुसन्धेयम् ॥ ७ ॥

यत्र शाल्मली समुत्पन्ना स द्वीपः शाल्मलः प्लक्षायामेत्यनेन शाल्मल्याः परिमाणं सम्यङ् न ज्ञातं स्यादित्यतः साध्यर्धेति "सुपर्णोऽसि गरुत्मान्"इत्यादिछन्दोभिर्वेदैः स्तूयत इति छन्दः स्तुतः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

परिवृङ्क्त इति"वृजी वर्जने"रुधादिरुदात्तेत आत्मनेपदमार्षं पृथग् वर्तत इत्यर्थः ॥ १—१९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्लक्षद्वीपादिवर्षाब्धिनदीशैलेज्यदेवताः ।
लोकालोकाचलश्चापि विंशे प्रोक्ता यथा स्थितम् ॥ ० ॥ १ ॥

परिक्षिप्तः परिवेष्टितः उप आधिक्येनास्ते आकलय्य दत्वा ॥ २ ॥

गिरयो हि वर्षसीमाभिव्यञ्जका उभयतोऽब्धिं स्पृशन्तस्तिर्यग्रेखाकाराः ॥ ३ ॥

हंसादयो ब्राह्मणादिस्थानीयाः विबुधोपमं सन्दर्शनं रूपं प्रजननमपत्योत्पादनञ्च येषां ते ॥ ४ ॥

प्रत्नस्य पुराणपुरुषस्य यद्रूपं तं सूर्यमीमहि शरणं व्रजेम । कीदृशं सत्यादीनामात्मानमधिष्ठातारं सत्यमनुष्ठीयमानो धर्मः ऋतं प्रतीयमानो धर्मः ब्रह्मणस्तद्बोधकस्य वेदस्य । अमृतस्य शुभफलस्य मृत्योरशुभफलस्य"सुपर्णोऽसि गरुत्वान् त्रिवृत्ते शिर" इत्यादिश्रुतेश्छन्दोभिः स्वावयवभूतैर्विष्णुं स्तौतीति छन्दस्तुत् तस्य सा शाल्मली द्वीपस्य ह्नतये नाम्ने ॥ ५—११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

जम्बूद्वीपं निरूप्य ततः परितः संस्थितान् क्षारोदादीन् समुद्रान् प्लक्षादीन् द्वीपांश्च वर्णयति भगवान् शुकः विंशेनाध्यायेन ॥ १ ॥

तावता लक्षयोजनविस्तारेण क्षारोदधिना अयं वेष्टितः परिक्षिप्तः परितः आवृतः द्वीपाख्याकरः प्लक्षद्वीपसंज्ञासम्पादकः जम्बूप्रमाणः जम्बूद्वीपसमानविस्तारः सप्तजिह्वः सप्तशिखः उपास्ते तिष्ठति आकलय्य समर्प्य आत्मनि परमात्मनि यो योगो ध्यानयोगस्तेनोपरराम संसारान्मुक्तोऽभूदित्यर्थः ॥ २ ॥

अभिज्ञाताः प्रसिद्धास्तु सप्तैव अप्रसिद्धाः सहस्रशः इति भावः ॥ ३ ॥

हंसादयः ब्राह्मणादिस्थानीया वर्णाः विबुधोपमं सम्यग्दर्शनं प्रजननञ्च येषां ते सहस्रायुषः सहस्रं सम्वत्सराः आयुर्येषां ते स्वर्गद्वारं स्वर्गप्रापकं त्रयीमयं त्रयीप्रतिपाद्यं सूर्यात्मानं सूर्यरूपमात्मानं भगवन्तं त्रय्या विद्यया वेदत्रयोक्तकर्ममार्गेण यजन्ते आराधयन्ति ॥ ४ ॥

प्रत्नस्य पुरातनस्य जगत्कारणस्य विष्णोर्यद्रूपं तं सूर्यमात्मानं परमात्मानमीमहि शरणं व्रजेम विष्णोः सर्वात्मत्वमाहुः । सत्यस्य समदर्शनरूपस्य ऋतस्य सूनृतवाणीरूपस्य ब्रह्मणः शब्दब्रह्मरूपस्य अमृतस्य जीवनहेतोः मृत्योर्मरणहेतोः चकारात्सर्वचराचररूपस्येत्यर्थः ॥ ५ ॥

औत्पत्तिकी सहजा ॥ ६ ॥ ७ ॥

प्लक्षायामः प्लक्षद्वीपवदायामो विस्तारो यस्याः सा अत एव यस्यां विपुलविस्तारायां पतत्त्रिराजस्य निलयं नीडमाहुः प्राज्ञः कथम्भूतस्य "सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिरो गायत्रं चक्षुस्तोम आत्मा साम ते तनू वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञा यज्ञीयं पुच्छं छन्दांस्यङ्गानि,,इत्यादिश्रुतेः छन्दोभिः स्वावयवभूतैः श्रीविष्णुं स्तौतीति छन्दस्तुत्तस्य द्वीपस्य ह्नतये व्यपदेशाय संज्ञासिद्धये इत्यर्थः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

भाषाटीका

श्रीशुकदेवजी बोले इस के अनन्तर प्लक्षादिद्वीपों का प्रमाण लक्षण स्थितिसे वर्षों का विभाग वर्णन किया जाता है ॥ १ ॥

यह जम्बूद्वीप जितना चौडा है उतनेही चौड़े खारी समुद्र से चारों तरफ घिरा है जैसे जम्बूद्वीप से मेरू घिरा है खारी समुद्र भी उस से द्विगुण प्लक्षनामा द्वीप से घिरा है जैसे खाई उपवन से घिरी होवे प्लक्ष गेंठीका पेड जामुन के पेड के बरोबर ऊंचा है द्वीप के नाम करनेवाला है जहांपर ऊपर को उठा हुआ सात जिह्वा वाला अग्नि स्थित है उस द्वीप का पति प्रियव्रतका पुत्र इध्मजिह्व जो है तिसने अपने द्वीपके सात वर्ष विभाग करके सात वर्षों के नामवाले पुत्रोंको देकर स्वयं आत्म योगसे निवृत्ति मार्गके ग्रहण किया ॥ २ ॥

शिव यवयस सुभद्र शान्त क्षेम अमृत अभय ये वर्ष हैं तिनोंमेंपर्वत नदीभी सातही हैं मणिकूट वज्रकूट इन्द्रसेन ज्योति-

तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्नामानि सप्त वर्षाणि व्यभजत् सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्रमाप्यायनमविज्ञातमिति ॥ ९ ॥

तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः स्वरसः शतशृङ्गो वामदेवः कुन्दो मुकुन्दः पुष्पवर्षः सहस्रश्रुतिरिति(१) अनुमतिः सिनीवाली सरस्वती कुहू रजनी नन्दा राकेति ॥ १० ॥

तद्वर्षपुरुषाः श्रुतधरवीर्यधरवसुन्धरेषन्धरसंज्ञा भगवन्तं वेदमयं सोममात्मानं वेदेन यजन्ते ॥११॥

स्वगोभिः पितृदेवेभ्यो विभजन् कृष्णशुक्लयोः ।
प्रजानां सर्वासां राजान्धः सोमो न आस्त्विति ॥ १२ ॥

एवं सुरोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथा पूर्वः कुशद्वीपो यस्मिन् कुशस्तम्बो देवकृतस्तद्द्वीपाख्याकरो ज्वलन इवापरः स्वशष्परोचिषा दिशो विराजयति ॥ १३ ॥

तद्द्वीपपतिः प्रैयव्रतो राजन् ! हिरण्यरेतो नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तवामदेवनामभ्यः ॥ १४ ॥

तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्त सप्तैव चक्रश्चतुःशृङ्गः कपिलश्चित्रकूटो देवानीक ऊर्ध्वरोमा द्रविण इति रसकुल्या मधुकुल्या मित्रविन्दा श्रुतविन्दा देवगर्भा घृतच्युता मन्त्रमालेति ॥ १५ ॥

यासां पयोभिः कुशद्वीपौकसः कुशलकोविदाभियुक्तकुलकसंज्ञा भगवन्तं जातवेदसरूपिणं कर्मकौशलेन यजन्ते ॥ १६ ॥

भाषा टीका ।

ष्मान् सुपर्ण हिरण्य छीव मेघमाल ये सब सेतु पर्वत हैं अरुणा नृम्णा अङ्गिरसा सावित्री सुप्रभाता ऋतम्भरासत्यम्भरा ए महानदी हैं जिन नदियों के जलके स्नानपानादि से रजोगुण तमोगुणके छूटजाने से निर्मल मनवाले हंसपतङ्ग ऊर्ध्वायन सत्य संज्ञक चारवर्ण हजारवर्ष की आयुवाले देवता सरीका जिन का दर्शन और प्रजा हैं सो लोग स्वर्ग के द्वार भूत वेद त्रय प्रतिपाद्य भगवान् आत्मा सूर्यनारायण को वेदत्रयी से आराधन करते हैं ॥ ४ ॥

क्रियमाणधर्म प्रतीयमाणधर्म वेद शुभफल अशुभफल रूपपुराण पुरुष साक्षात् विष्णु के रूप सूर्यात्मा भगवान् को हम शरण प्राप्त होते हैं ॥ ५ ॥

प्लक्षादिक पांच द्वीपों मे पुरुषों की आयु इन्द्रिय देहबल इन्द्रियबल मनोबल बुद्धि पराक्रम सब लोगों को स्वभावही से सिद्धि समान रूप से रहती है ॥ ६ ॥

प्लक्षद्वीप अपने बरोबर ईख के रस के समुद्र से घिरा है जैसे तैसेही शालमल द्वीप भी दोगुण विस्तार है अपने बरोबर मदिरा के समुद्र से घिरा हुआ प्रकाशित होरहा है ॥ ७ ॥

जिस द्वीप मे प्लक्ष के बरोबर विस्तार वाली शालमली का पेड है जिस मे कि वेदों से विष्णु की स्तुति करने वाले भगवान् पक्षिराज गरुड जीका स्थान है ऐसा कैहते हैं वह शालमली का पेड उस द्वीप के शालमलीद्वीपनाम जानने के वास्ते लक्षित होता है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वगोभिः स्वरश्मिभिः । अन्धोऽन्नं सोमो नो राजा आस्तु आभिमुख्येन भवतु ह्रस्वपाठे त्वविवक्षया सन्ध्यभावः ॥ १२ ॥

एवं सुरोदाद्बहिर्घृतोदेनावृतः कुशद्वीप इत्यन्वयः । स्वशष्पाणि स्वकोमलशिखास्तेषां रोचिषा ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्य द्वीपस्य शालमलस्याधिपतिः चिरं कृताधिपत्यो यज्ञबाहुः प्रियव्रतस्यात्मजः सप्तभ्यः स्वसुतेभ्यः तन्नामानि स्वपुत्रतुल्यनामानि सप्त वर्षाणि व्यभजद्विभज्यादादित्यर्थः ॥ ९ ॥

पुत्राणां वर्षाणां च साधारणैर्नामभिर्वर्षाणि निर्दिशति सुरोचनमित्यादिना । तेषु सुरोचनादिषु वर्षेषु शैलाः सप्त नद्यश्च अभिज्ञाताः प्रसिद्धाः अन्ये च शैला नद्यश्च सन्तीत्यर्थः तावत्सप्त शैलानाह । स्वरस इत्यादिना । सेतुशैलाः मर्यादागिरयः नदीराह । अनुमतिरित्यादिना ॥ १० ॥

तद्वर्षपुरुषाः चतुर्धा वर्णविभागं तेषामाराध्यं भगवद्रूपं जप्यमानमन्त्रंचाह । तद्वर्षेत्यादिना । श्रुतधरादिशब्दाः संज्ञा-

(१) सेतुशैलाइत्यधिकः पाठः श्रीवीरराघवाचार्यमते ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

नामानि येषां ते वेदमयं वेदप्रचुरं भगवदात्मकं सोमाख्यं सोमाख्यमात्मानं जीवविशेषं वेदेन वेदेनोक्तेन तन्मूलस्मृत्या-युक्तेन स्वस्ववर्णोचितस्वधर्मेण यजन्ते आराधयन्ति ॥ ११ ॥

स्वगोभिः स्वकिरणैः शुक्लकृष्णयोः पक्षयोः पितृदेवेभ्योऽन्ध-मन्नं शुक्लपक्षे देवेभ्यः कृष्णे पितृभ्यश्चान्नं विभजन् स्वगोभि-श्चन्द्रस्य शुक्लकृष्णपक्षविभाजकत्वाभावे उचितकाले पित्रा-दीनां स्वधास्वाहापूर्वकं हविर्दानमेव न स्यादिति भावः यत एव पित्रादीनामप्यसाङ्कर्येणान्नस्य विभागेन प्रदापयिताऽतो नोऽस्माकं सर्वासां प्रजानां राजा चन्द्रः सोमः अमृतमस्तु सुख-करोऽस्त्विति यावत् ॥ १२ ॥

एवं शाल्मलीद्वीप उपवर्णितः अथैतद्दृष्टान्तेन कुशद्वीप-मनुवर्णयति। एवमिति। यथापूर्वः शाल्मलः तथा कुशद्वीपोऽपि सुरोदधेर्बहिः द्विगुणमानेनाष्टलक्षयोजनविशालेन घृतोदधिना परिवेष्टितः स्वयमप्यष्टलक्षयोजनविशालः यस्मिन् कुशद्वीपे द्वीपस्य कुशद्वीपस्य व्यपदेशकरः अपरोऽग्निरिव प्रकाशबहुलः देवेन भगवता ब्रह्मणा निर्मितः स्वशष्पाणां स्वावयवानां कोमल-तृणानां रोचिषा दिशो दश विराजयति प्रकाशयति ॥ १३ ॥

तस्य कुशद्वीपस्याधिपतिः हिरण्यरेतोनाम प्रियव्रतस्य पुत्रः स्वीयं सप्तभ्यः स्वपुत्रेभ्यो वस्वादिवर्षनामभ्यः यथाभागं विभज्य स्वयं तप आतिष्ठत तपसा युक्तोऽभूदित्यर्थः ॥ १४ ॥

वर्षनाम्नः सप्तपुत्रान्निर्दिशति । वस्वित्यादिना । वस्वादी-नामितरेतरयोगद्वन्द्वः तेषां वर्षेषु तत्तुल्यनामससीमा गिरयः सप्त तथा नद्यश्च सप्त बभूवुः शैलान्निर्दिशति । चक्र इत्यादिना । सेतुशैला मर्यादा गिरयः ॥ १५ ॥

नदीराह। रसकुल्येत्यादिना । नदीर्विश्विनष्टि । मद्यानद्य इति । पुनर्नदीर्विशिंषन् तद्द्वीपस्थानां पुरुषाणां चतुर्धा वर्णविभागं तेषामुपास्यं भगवद्रूपं जप्यमानं मन्त्रश्चाह । यासामिति । यासां रसकुल्यादिनदीनां पयोभिर्जलैर्विधूतमलाः कुशद्वीपो नीडः स्थानं येषां ते कुशलकोविदादिसंज्ञाः जातवेदसरूपिणं जातवेदा एव जातवेदसः प्रज्ञादित्वात् स्वार्थिकोऽणप्रत्ययः स अग्निरेव रूपं शरीरं जातवेदसरूपं तदस्यास्तीति तथा तं भगवन्तं कर्मनैपुण्येन यजन्ते आराधयन्ति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

शुक्लकृष्णयोरुभयोः पक्षयोरपि स्वगोभिः सुधालक्षणैः पितृदेवानुद्दिश्य सोमलक्षणमन्धोऽन्नं विभजन् राजा चन्द्रान्त-र्यामी सर्वासां प्रजानां नोऽस्माकञ्च राजा रञ्जकोऽस्त्विति प्रजानां नोऽन्धो विभजन् पित्रादिभ्यः सोमं विभजन् राजा नः सोमं सुखमस्त्विति वा ॥ १२ ॥

सङ्ख्यया कुशद्वीपसमानेन यथापूर्वः शाल्मलः सुरोदेनावृत-स्तथा स्वशष्पाणां निजबालतृणानां तेजसा ॥१३॥१४॥१५॥१६॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

स्वगोभिः स्वरश्मिभिः । अन्धोऽन्नम् । सोमो नो राजा आभिमुख्येनास्तु। इत्यपाठे त्वविवक्षया सन्ध्यभावः ॥ १२ ॥

सुशष्पाणि सुकोमलशिखास्तेषां रोचिषा ॥ १३--१६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अन्धः अन्नं नोऽस्माकं राजा आ आभिमुख्येन अस्तु ॥ १२ ॥

स्वशष्परोचिषा स्वगतबालतृणकान्त्या ॥ १३-१६ ॥

भाषाटीका

उस द्वीपका पति प्रियव्रत का पुत्र यज्ञबाहुने अपने सात पुत्रोंको उनहीं नामवाले वर्षोंका विभाग करके देदिया जिनके सुरोचन, सौमनस्य, रमणक, देववर्ष, पारिभद्र, आप्यायन, अविज्ञातये नाम हैं ॥ ९ ॥

उन वर्षोंके मर्यादा पर्वत तथा नदी भी हैं स्वरस शतशृङ्ग वामदेव कुन्द मुकुन्द पुष्पदन्त सहस्रश्रुति ये पर्वत हैं अनुमति सिनीवाली सरस्वती कुहू रजनी नन्दा राका ये नदी हैं ॥ १० ॥

उस वर्षके श्रुतधर वीर्यधर वसुंधर इषंधर संज्ञावाले पुरुष देवमय सोम आत्मा भगवान को वेदोक्त कर्मसे पूजन करते हैं ॥११॥

उसका मन्त्र अपने किरणोंसे शुक्ल कृष्ण दोनों पक्षों में सब प्रजों के अन्नरूपसे पोषण करनेवाले सोमराजा हमारे ऊपर प्रसन्न होवें ॥ १२ ॥

इसी प्रकार मदिरा समुद्र से बाहिर अपने दुगुण प्रमाण घृतके समुद्र से घिरा हुआ कुशद्वीप पहिले सरीका है जिस द्वीप में उस द्वीप के नामको करने वाला परमेश्वर का रचित अग्नि सरीका प्रकाशमान अपने घासोंकी दीप्तिसे सब दिशों को प्रकाश करता हुआ कुशका गुच्छा है ॥ १३ ॥

उस द्वीप के अधिपति हिरण्यरेत नामा राजा प्रियव्रत के पुत्र ने अपने द्वीपको सात अपने पुत्रों को यथा योग्य विभाग देकर आपनी तपस्या में निष्ठा करलीनी ॥ १४ ॥

उनके नाम वसु वसुदान दृढरुचि नाभि गुप्तस्तुत्य व्रत विविक्त वामदेव हैं उनवर्षों में मर्यादाके पर्वत तथा नदी भी सात सात हैं तिनके नाम चक्र चतुःशृङ्ग कपिल चित्रकूट देवानीक ऊर्ध्वरोमा द्रविण ये हैं ॥ १५ ॥

रसकुल्या मधुकुल्या मित्रविन्दा श्रुतविन्दा देवगर्भा घृतच्युता मंत्रमाला ये नदियों के नाम हैं जिनके जलों से कुश द्वीपके वासिजन कुशल कोविद अभियुक्त कुलक संज्ञावाले अग्निरूपी भगवान् को कर्मों की निपुणतासे आराधन करते हैं ॥ १६ ॥

परस्य ब्रह्मणः साक्षाज्जातवेदोऽसि हव्यवाट् ।
देवानां पुरुषाङ्गानां यज्ञेन पुरुषं यजेति ॥ १७ ॥

(१) तथा घृतोदाद्बहिः क्रौञ्चद्वीपो द्विगुणः स्वमानेन क्षीरोदेन परित उपक्लृप्तो वृतो यथा कुशद्वीपो घृतोदेन यस्मिन् क्रौञ्चो नाम पर्वतराजो द्वीपनामनिर्वर्तक आस्ते ॥ १८ ॥

योऽसौ गुहप्रहरणोन्मथितनितम्बकुञ्जोऽपि क्षीरोदेनासिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव ॥ १९ ॥

तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः (२) स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान्वर्षपान्निवेश्य (३) स्वयं भगवान् भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविन्दमुपजगाम ॥ २० ॥

आमो (४) मधुरुहो मेघपृष्ठः सुधामा (५) भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुतास्तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः शुक्लो वर्धमानो भोजन (६) उपबर्हिणो नन्दो नन्दनः सर्वतोभद्र इति अभया अमृतौघा आर्यका तीर्थवती (७) वृत्तिरूपवती शुक्लेति ॥ २१ ॥

यासामम्भः (८) पवित्रममलमुपयुञ्जानाः पुरुषऋषभद्रविणदेवकसंज्ञा वर्षपुरुषा (९) आपोमयं देवमपां पूर्णेनाञ्जलिना यजन्ते ॥ २२ ॥

आपः ! पुरुषवीर्याः स्थ (१०) पुनन्तीर्भूर्भुवः सुवः ।
ता नः (११) पुनीतामीवघ्नीः (१२) स्पृशतामात्मना भुव इति ॥ २३ ॥

एवं पुरस्तात्क्षीरोदात्परित (१३) उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन च दधिमण्डोदेन परितो यस्मिन् शाको नाम महीरुहः स्वक्षेत्रव्यपदेशको यस्य ह (१४) महासुरभिगन्धस्तं द्वीपमनुवासयति ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हे जातवेदस्त्वं साक्षात्परस्य ब्रह्मणो हरेर्हव्यवाडसि अतो देवानां यज्ञेन पुरुषं हरिमेव यज । अङ्गानां नाम्ना दत्तमङ्गिने समर्पयेत्यर्थः ॥ १७ ॥

उपक्लृप्तो वेष्टितः । यथा कुशद्वीपो घृतोदेन वृतः ॥ १८ ॥

गुहस्य कार्तिकेयस्य प्रहरणेनायुधेनोन्मथिता नितम्बाः कुञ्जानि च यस्य ॥ १९ ॥

स्वयं भगवान् ज्ञानी परमकल्याणं यशो यस्य ॥ २० ॥ २१ ॥

आपोमयमम्भोमयम् ॥ २२ ॥

हे आपः ! पुरुषवीर्या ईश्वराल्लब्धसामर्थ्याः स्थ भवथ अतएव भूर्भुवः स्वस्त्रैलोक्यं पुनन्त्यस्ता भवत्यो नोऽस्माकं स्पृशतां स्पर्शनं कुर्वतां भुवः शरीराणि पुनन्तु । यत आत्मना स्वरूपेणैवामीवघ्नीः पापहन्त्र्यः ॥ २३ ॥

दध्नो मण्डं रस सः पयोदकं यस्य । यस्य पर्णान्यन्तः खरस्पर्शानि बहिर्मृदुस्पर्शानि स शाको नाम वृक्षः ॥ २४—२७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे जातवेदः ! त्वं साक्षात्परस्य ब्रह्मणोऽसि तदीयोऽसि तच्छरीरभूतोऽसीत्यर्थः तथा हव्यवाडसि हव्यमिन्द्रादीनां भगवदात्मकानां यज्ञियं हव्यं वहति प्रापयति इन्द्राद्यन्तर्यामिणं भगवन्तं प्रतीति तथा तथाभूतोऽसीत्यर्थः अतो देवानां पुरुषस्य परमपुरुषस्याङ्गानां शरीरभूतानाम् "स आत्मा अङ्गान्यन्या देवताः,, इति श्रुतेरात्मशब्दप्रतिसम्बन्धि अङ्गं शरीरमेवम्भूतानामिन्द्रादीनां सम्बन्धिना भगवदात्मकेन्द्राद्याराधनभूतेन यज्ञेन तदन्तरात्मानं परमपुरुषं यज्ञमाराधय तत्प्रीतिं जनय अङ्गेभ्यः समर्पितं हविरङ्गिने समर्पयेत्यर्थः ॥ १७ ॥

---

(१) तथा बहिः क्रौञ्च द्वीपः कुशद्वीपाद्विगुणस्वमानेन (२) स्वसद्वीपवर्षाणि सप्तधा विभज्य (३) स्वयंभगवतः परमकल्याणस्य (४) मज्यो (५) ऋषिजिह्वा (६) उपबर्हण उपमोजनो (७) रूपवती पवित्राशुक्लेति (८) पवित्रमुपयुञ्जानाः गुरुऋषभ (९) अम्मयं (१०) वीर्याश्च (११) पुनीयुरघघ्नीः (१२) संस्पृशतात्मना भवः (१३) परित उपक्लृप्तः (१४) महान्सुरभिगन्धः इति श्रीविजयध्वजतीर्थपाठः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एतद्दृष्टान्तेन क्रौञ्चद्वीपमनुवर्णयति। तथेति। यथा कुशद्वीपः घृतोदेन स्वसमविशालेन वेष्टितस्तथा कुशद्वीपाद्बहिः क्रौञ्चद्वीपोऽपि द्विगुणः कुशद्वीपाद्द्विगुणः षोडशलक्षयोजनविशालः स्वमानेन षोडशलक्षयोजनविशालेन दधिमण्डोदेन मथितदधिसमानोदकेन समुद्रेणाभित उपक्लृप्तः परिवृतः यस्मिन् क्रौञ्चे द्वीपे द्वीपस्य नाम क्रौञ्च इति संज्ञा तन्निर्वर्तकः क्रौञ्चो नाम पर्वतश्रेष्ठः आस्ते॥ १८॥

क्रौञ्चपर्वतं विशिनष्टि। य इति। योऽसौ क्रौञ्चो गिरिः पूर्वं गुहस्य कार्तिकेयस्य प्रहरणेनायुधेन उन्मथिता नितम्बाः कुञ्जानि च यस्य तथाभूतः पश्चाद्दधिमण्डोदेनासिच्यमानः दधिमण्डोदे लीनः पश्चाद्भगवता वरुणेनाभिगुप्तः अभयप्रदानेनाभिरक्षितः निरस्तभयो बभूव॥ १९॥

तस्मिन्नपि क्रौञ्चद्वीपेऽपि प्रियव्रतात्मजो घृतपृष्ठो नामाधिपतिः सप्तधा वर्षाणि विभज्य तेषु पुत्रतुल्यनामसु सप्तसु वर्षेषु रिक्थादान् दायादान् सप्त पुत्रान् वर्षाणामधिपतीन्निवेश्य प्रतिष्ठाप्य स्वयं परमकल्याणं निरतिशयमङ्गलरूपं यशो यस्य तस्यात्मभूतस्य स्वान्तरात्मनो भगवतः हरेर्बन्धहारिणश्चरणारविन्दं जगाम भक्त्या प्राप्तः॥ २०॥

घृतपृष्ठसुतानाह। अमोघ इत्यादि। तेषाममोघादीनां यानि वर्षाण्यमोघादीनि तेषां गिरयो मर्यादा गिरयः सप्त तथा नद्यः सप्तैवाभिज्ञाताः अन्ये च ते ताश्च सन्तीतिभावः गिरीनाह। शुक्ल इत्यादि। नदीराह। अभयेत्यादिना॥ २१॥

ता विशिंषंस्तद्वर्षस्थानां चतुर्णां वर्णविभागं भजनीयं भगवद्रूपं मन्त्रं चाह। यासामिति। यासामभयादीनां निर्मलं पवित्रमम्भ उपयुञ्जानाः स्नानाद्युपयुक्तं कुर्वाणा गुर्वादिचतुर्वर्णनामानः पुरुषाः आपोमयमप्छरीरकं देवं भगवन्तं पूर्णेनापामञ्जलिना जलाञ्जलिना आराधयन्त्यर्घादिप्रदानेनेति भावः॥ २२॥

हे आपः! यूयं पुरुषस्य भगवतो वीर्याः शक्तिरूपाः तदपृथक्सिद्धविशेषणभूतास्तच्छरीरभूता इति यावत् स्थ भवथ तथा भूर्भुवः स्वः इति भूरादिलोकत्रयं पुनन्त्यः पवित्रयन्त्यः स्थेत्यनुषङ्गः यत एवमतः स्पृशताममीवघ्नीः पापहराः आत्मनो भुवः परमात्मन उत्पन्नाः ताः युष्मान् स्पृशत इति शेषः नोऽस्मान् पुनन्तु भगवत्य इत्यर्थः आत्मना भवमितिपाठे आत्मना देहेन स्पृशताममीवघ्नीर्युष्मान्स्पृशतां नोऽस्माकं भवं जन्म पुनन्त्वित्यर्थः॥ २३॥

एतद्दृष्टान्तेन शाकद्वीपमनुवर्णयति। एवं यथा क्रौञ्चस्तथेत्यर्थः दधिमण्डोदात्परतः बहिः उपवेष्टितः विन्यस्तः शाकद्वीपः द्वात्रिंशल्लक्षयोजनविशालः समानेन द्वात्रिंशल्लक्षयोजनविशालेन क्षीरोदधिना परिवेष्टितः यस्मिन् शाकद्वीपे शाकाख्यो महीरुहः स्वकीयस्य द्वीपस्य व्यपदेशकः नामनिर्वर्तकः आस्त इतिशेषः तं विशिनष्टि यस्येति। यस्य शाकस्य वृक्षस्य महासुरभिर्गन्धः निरतिशयसुगन्धः तं कृत्स्नं शाकद्वीपमनुवासयति सुरभीकरोति॥ २४॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

हे जातवेदः! सर्वज्ञ! त्वं साक्षात्परस्य ब्रह्मणः श्रीनारायणस्यार्थे हव्यवाडसि हव्यलक्षणाहविषो नेतासि तथा पुरुषशब्दवाच्यस्य हरेरङ्गभूतानां देवानाञ्च हव्यवाडसि स त्वमस्मत्सन्निहितो भूत्वा यज्ञलक्षणेन कर्मणा पुरुषं यज्ञनामानं श्रीहरिं यज याजयास्माभिरिति शेषः॥ १७॥

क्षीरोदेन मण्डोदेन।
मण्डोदे पूरणश्चैव व्यत्यासं क्षीरसागरं।
राहुसोमरवीणाञ्च मण्डलाद्द्विगुणोक्तिताम्॥
विनैव सर्वमुक्तेयं योजनाभेदतोऽत्र तु॥

इति वचनाद्व्यत्यासो ज्ञातव्यः॥ १८॥

गुहस्य षण्मुखस्य प्रहरणेन शक्त्याख्येनोन्मथिनाः पीडिताः नितम्बाश्च कुञ्जलतादिपिहितोदग्र अगुतरा गिरिविशेषा मिथुनानां किडायोग्याश्च यस्य स ० तथा क्षीरोदेन मण्डोदेनाभिषिच्यमानः॥ १९॥

रिक्थादान् दायादान् पुत्रानित्यर्थः॥ २०॥ २१॥

अम्मयं जलाधिदैवतं देवं क्रीडादिगुणसम्पन्नम्॥ २२॥

या आपः पुरुषवीर्याः श्रीनारायणस्य रेतोभूताः "आपो नारा इति प्रोक्ता आपो वै नरसूनवः" इति स्मृतेः भूर्भुवः सुवः एवं त्रैलोक्यमपि पुनन्तीः पुनन्त्यः याश्चामघ्नीः पापहराः भवे भवार्थं शुद्धिलक्षणसुखार्थमात्मना देहेन चान्तरेण च संस्पृशेत ता आपः पुनीयुः पुनन्त्वित्यन्वयः॥ २३॥

दधिमण्डोदेन "अनाम्लन्तु दधि क्षीरं क्षीरं सान्द्रं तथा दधि" इत्यभिधानात् क्षीरोदार्थे दधिमण्डोदशब्दः॥ २४—२७॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तस्मिन्नपीति। स्वयमुपजगामेत्यन्वयः। स्वयं भगवत इति वा भगवान् उत्पत्तिं प्रलयञ्चेत्यादिलक्षणज्ञानवान्॥ २०—२३॥

तं द्वीपमनुवासयति। तद्द्वीपस्थस्वाधारखण्डविशेषमित्यर्थः। सर्वानुवासनेत्वत्रापि तत् स्यात्॥ २४—२७॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

हे जातवेदस्त्वं साक्षात् परस्य ब्रह्मणो हरेर्हव्यवाडसि। अतो देवानां यज्ञेन पुरुषं हरिमेव यज। अङ्गानां नाम्ना दत्तमङ्गिने समर्पयेत्यर्थः॥ १७॥

उपक्लृप्तः वेष्टितः वृत इति परत्रान्वितम्॥ १८॥

गुहः कार्त्तिकेयः विभयः विगतभयः॥ १९॥

भगवान् उत्पत्त्यादिज्ञानवान्॥ २०॥ २१॥

आपोमयम् अम्मयम्॥ २२॥

हे आपः! पुरुषवीर्या ईश्वराल्लब्धसामर्थ्या भवथ। अत एव भूर्भुवः सुवः त्रैलोक्यं पुनन्त्यस्ता यूयं नोऽस्माकं स्पृशतां स्पर्शनं कुर्वतां भुवः शरीराणि पुनीत यत आत्मना स्वरूपेणैव अमीवघ्नीः पापहन्त्र्यः॥ २३॥

दध्नो मण्डं रस एव उदकं यस्य॥ २४॥ २७॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

हे जातवेदः! देवानां परस्य आत्मनः "स आत्मा अङ्गान्यन्याः देवताः" इति श्रुतेः साक्षाद्ब्रह्मणः हव्यवाडसि देवानामङ्गभूतानां

तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः सोऽपि विभज्य सप्त वर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजवमनोजवपवमानधूम्रानीकचित्ररेफबहुरूपविश्वधारसंज्ञान्निधाप्याधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश ॥ २५ ॥

एतेषां वर्षमर्यादागिरयो नद्यश्च सप्त सप्तैव ईशान उरुशृङ्गो बलभद्रः शतकेसरः सहस्रस्रोतो देवपालो महानस इति अनघाऽऽयुर्दा उभयस्पृष्टिरपराजिता पञ्चपदी सहस्रस्रुतिर्निजधृतिरिति ॥ २६ ॥

तद्वर्षपुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो भगवन्तं वाय्वात्मकं प्राणायामविधूतरजस्तमसः परमसमाधिना यजन्ते ॥ २७ ॥

अन्तः प्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः ।
अन्तर्यामीश्वरः साक्षात्पातु नो यद्वशे स्फुटम् ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नाम्ना दत्तं यद्धविर्यं हव्यं तस्मै वहसि अतो यज्ञेन पुरुषं सर्वदेवाङ्गिनं यज तत्तन्नाम्ना दत्तं तस्मै समर्पयेत्यर्थः ॥ १७ ॥

उपक्लृप्तो वेष्टितः ॥ १८ ॥

गुहप्रहरणेन कार्त्तिकेयायुधेनोन्मथिता भग्नाः नितम्बाः कुञ्जानि च यस्य सः ॥ १९ ॥

भगवान् ।

उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ।
इति स्मृत्युक्तविश्वोत्पत्त्यादिज्ञानवान् स्वयं भगवतः ।
ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चापि षण्णां भग इतीङ्गना ।

इतिस्मृत्युक्तषड्गुणयोश्रयस्य हरेर्वन्धहारिणश्चरणारविन्दमुपजगाम प्राप्तवान्मुक्तोऽभूदित्यर्थः ॥ २०—२१ ॥

आपोमयमम्मयम् । अपां पूर्णेनाञ्जलिना देवं भगवन्तं यजन्ते "जलं ब्रह्मोपासीत"इतिश्रुतेः ॥ २२ ॥

हे आपः ! पुरुषवीर्याः परमपुरुषशक्तिरूपाः स्थ भवथ अत एव भूर्भुवः स्वः लोकत्रयं पुनन्तीः पुनन्त्यः ताः भवत्यो नोऽस्माकं स्पृशतां स्पर्शनं कुर्वतां भुवः शरीराणि पुनीत पुनन्तु यतः आत्मना स्वाश्रयेण पुरुषेण हेतुभूतेन अमीवघ्नीः पापघ्न्यः ॥ २३ ॥

दधिमण्डोदेन दध्नो मण्डं रसः पयोदमुदकं यस्य तेन २४।२७

भाषाटीका ।

मंत्र हे अग्निदेव ! आप साक्षात् परब्रह्म विष्णुके हवि ग्रहण करने वाले मुख रूपी हौ तिससे परमात्मा के अङ्गभूत जो देवता तिनके यज्ञ से परमात्मा का यजन करो ॥ १७ ॥

तिसी प्रकार से घृत समुद्र के बाहिर अपने से दुगुणे दुग्ध समुद्र से घिराहुआ क्रौंचद्वीप कल्पना किया है जैसे कि कुशद्वीप घृत समुद्र से घिरा है जिसमें क्रौंच नामक पर्वतों का राजा है सो द्वीप के नामको जनाता हुआ है ॥१८॥

जिस पर्वत के कार्तिक स्वामी के शक्ति आयुध से सब तट और कुञ्जभी फूट टूट गये तौभी क्षीरसमुद्र के जलसे सिंचजाने से भगवान् वरुणजी रक्षा करने से अभय होकर रहाहै ॥ १९ ॥

तिस मैभी प्रियव्रत का पुत्र घृतपृष्ठ नाम के मालिक हैं वे भी अपने द्वीप मे पुत्रों के तुल्य नाम वाले सात द्वीपों को उनकों विभाग से देकर सातों को धन के मालिक बना स्थापन करके आप सब समर्थ होने पर भी परम कल्याण यशवाले अपने आत्मा गुरु श्रीहरि भगवान् के चरण कमल को प्राप्त होगये ॥ २० ॥

आम मधुरुह मेघपृष्ठ सुधामा भ्राजिष्ठ लोहितार्ण वनस्पति ए घृतपृष्ठ के पुत्र हैं तिन के वर्ष मर्यादा पर्वत सात हैं सातही नदी भी हैं शुक्ल वर्धमान भोजन उपवर्हण नन्द नन्दन सर्वतोभद्र ए पर्वत हैं अभया अमृतौघा आर्यका तीर्थवती वृत्तिरूपवती पवित्रवती शुक्ला ये नदीं हैं ॥ २१ ॥

जिन नदियों के निर्मल पवित्र जल को सेवन करते हुये पुरुष ऋषभ द्रविण देवक संज्ञावाले उस वर्ष के पुरुष आपोमयदेव को जलों की भरी अंजुली से यजन करते हैं ॥ २२ ॥

मंत्र हे जलदेव ! आप पुरुषके वीर्यरूपहो परमेश्वरसे सामर्थ्यको प्राप्त भये हो सब के पापों के नाश करनेवाले हो सो भूः भुवः स्वः तीनों लोकों को पवित्र करते हुये आप तुमारे स्पर्श करनेवाले हम लोगों के शरीरों को पवित्र करो ॥ २३ ॥

इसी प्रकार क्षीर समुद्र से परे चारों ओर से स्थापित शाकद्वीपभी बत्तीस लक्ष योजन चौडा है अपने बरोबर हि मण्ड के समुद्रसे घिरा हुआ है जिसमें शाक नाम का पेड अपने द्वीप के नाम करने वाला है जिसका कि महासुरभि सुगन्ध उस द्वीप को सुगन्धित करता है ॥२४॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मकेतुभिः प्राणादिवृत्तिभिः ॥ २८ ॥

एवमेव दधिमण्डोदात् परतः पुष्करद्वीपस्ततो द्विगुणायामः समन्तत उपकल्पितः समानेन स्वादूदकेन समुद्रेण बहिरावृतो यस्मिन् बृहत् पुष्करं ज्वलनशिखामलकनकपत्रायुतायुतं(१) भगवतः कमलासनस्याध्यासनं परिकल्पितम् ॥ २९ ॥

तद्द्वीपमध्ये मानसोत्तरनामैक एवार्वाचीनपराचीनवर्षयोर्मर्यादाचलोऽयुतयोजनोच्छ्रायायामो यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानामिन्द्रादीनां यदुपरिष्टात् सूर्यरथस्य मेरुं(२) परिभ्रमतः सम्वत्सरात्मकं(३) चक्रं देवानामहोरात्राभ्यां परिभ्रमति ॥ ३० ॥

तद्द्वीपस्याप्यधिपतिः प्रैयव्रतो वीतिहोत्रो नामैतस्यात्मजौ रमणक(४)धातकिनामानौ वर्षपती नियुज्य स स्वयं पूर्वजवद्भगवत्कर्मशील एवास्ते ॥ ३१ ॥

तद्वर्षपुरुषा भगवन्तं ब्रह्मरूपिणं(५) सकर्मकेन कर्मणाराधयन्तीदं चोदाहरन्ति ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ज्वलनशिखावदमलानां कनकपत्राणामयुतानामयुतानि यस्य तत् ॥ २९ ॥

देवानामहोरात्राभ्यामुत्तरदक्षिणायनाभ्यामित्यर्थः ३० ॥ ३१ ॥

ब्रह्मरूपिणं कमलासनमूर्तिं सकर्मकेन ब्रह्मसालोक्यादिसाधनेन ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्यापि शाकद्वीपस्याप्यधिपतिर्मेधातिथिर्नाम प्रियव्रतात्मज एव सोऽपि पुत्रतुल्यनामानि वर्षाणि विभज्य तेषु वर्षेष्वात्मजान् पुरोजवादिसंज्ञान्निधाय प्रतिष्ठाप्य स्वयमनन्तेऽपरिच्छिन्नानन्दस्वरूपे भगवत्यावेशिता निहित मतिर्येन तादृशस्तपोवनं तपसो योग्यं वनं प्रविवेश तपसा सिद्धोऽभूदित्यर्थः ॥ २५ ॥

अथ शाकद्वीपवर्षविभागं पुत्रनामपूर्वकं पर्वतान्नदीश्चाह । एतेषामिति । तेषु पुरोजवादिषु वर्षेषु सप्त सीमापर्वताः तथा नद्यश्च सप्तैवासन् पर्वतान्नदीश्चाह । ईशानःशृङ्ग इति । अनघेत्याभ्यां गद्याभ्याम् तद्वर्षस्थाः पुरुषाः ऋतव्रतादिचतुर्वर्णात्मकाः वाय्वात्मकं वायुशरीरकं भगवन्तं परमसमाधिना निरतिशयध्यानयोगेन यजन्ते आराधयन्ति कथम्भूताः सन्तः प्राणायामैरासमन्ताद्विधूतं निरस्तं रजस्तमश्च येषां तादृशाः सन्तः ॥ २६ ॥ २७ ॥

यो वायुशरीरकः परमात्मान्तः प्रविश्य मुख्यप्राणरूपेणान्तः प्रविष्टः सन्नात्मनः स्वस्य चिन्हभूताभिः पञ्चभिः प्राणापानादिभिर्वृत्तिभिः "यः प्राणेन प्राणिति योऽपानेनापानिति" इत्यादिश्रुतिः भूतानि बिभर्ति स साक्षादीश्वरोऽन्तः प्रविश्य नियन्ता नः अस्मान् पातु यस्य प्राणशरीरकस्य भगवतः वशे इदं जगद्वर्तते भगवतो वायुशरीरकत्वादन्तर्यामीश्वरसामानाधिकरण्यम् ॥ २८ ॥

अथ पुष्करद्वीपमनुवर्णयति। एवमिति। क्षीरोदधेः परस्तात्पुष्करद्वीपः ततः शाकद्वीपाद्द्विगुणायामः द्विगुणविशालः चतुःषष्टिलक्षयोजनविशालः समन्ततश्चतुर्दिक्षु उपकल्पितः ईश्वरेणेति शेषः । यद्वा । प्रियव्रतरथचरणनेमिनेति शेषः स्वसमानविशालेन चतुःषष्टिलक्षयोजनविस्तीर्णेन शुद्धोदकेन शुद्धोदकसमुद्रेण बहिः समन्ततः पिहितः परिवृतः यस्मिन् पुष्करद्वीपे बृहद् विपुलं पुष्करं कमलं ज्वलनशिखावदमलानां प्रकाशमानानां कनकपत्राणामयुतानामयुतानि यस्य तद्भगवतः कमलासनस्य चतुर्मुखस्याध्यासनं परिकल्पितं तत्कर्णिकामध्यगतत्वेन तद्वर्षस्थाः पुरुषाः चतुर्मुखमुपासत इत्यर्थः ॥ २९ ॥

अस्मिन् द्वीपे मर्यादागिरिर्मानसोत्तरनामा एक एवेत्याह । तद्द्वीपमध्य इति । पुष्करद्वीपमध्ये एक एव मानसोत्तराख्योऽयुतयोजनानि उच्छ्राय औन्नत्यमायामो विस्तारश्च यस्य सः अर्वाचीनपराचीनयोरन्तर्वर्त्तिबाह्यवर्तिनोर्वर्षयोर्मर्यादागिरिः यत्र मानसोत्तरे गिरौ चतसृषु दिक्षु इन्द्र आदिर्येषां तेषामिन्द्राग्निवरुणकुबेराणां लोकपालानां पुराणि सन्ति यस्य मानसोत्तरगिरेः उपरिस्थितेन्द्रादिलोकपालपुरीणामुपरि मेरुं परिक्रमतः परितो भ्रमतः सूर्यरथस्य यच्चक्रं सम्वत्सरात्मकं तद्देवानामहोरात्राभ्यामुत्तरायणदक्षिणायनाभ्यां स्वावयवाभ्यां चक्रवत् लौकिकरथचक्रवत्परिभ्रमति ॥ ३० ॥

तस्य पुष्करद्वीपस्यापि पतिर्वीतिहोत्राख्यः प्रियव्रतात्मज एव तस्य वीतिहोत्रस्यात्मजौ पुत्रौ रमणधातकाख्यौ रमणधातकयोर्वर्षयोः पतीकृत्वेत्यर्थः अयं वीतिहोत्रः पूर्वजवन्मेधातिथिवद्भगवदाराधनरूपकर्मशील एवास्ते आसीदित्यर्थः ॥ ३१ ॥

तत्पुष्करद्वीपवर्षपुरुषाः ब्रह्मरूपिणं चतुर्मुखशरीरकं भगवन्तं कर्मणा कर्मयोगविशिष्टेन कर्मणा मनोव्यापाररूपेण भगवदुपासनयोगेन कर्मशब्दो हि मनोव्यापाररूपोपासनायोगेऽपि वर्त्तते प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ३।२।२५ इति सौत्रप्रयोगात् प्रकाशादिवत् ज्ञानानन्दादिस्वरूपवन्मूर्त्तामूर्तप्रपञ्चविशिष्टताया अपि ब्रह्मगुणत्वाद्वैशेष्यं प्रतीयते "तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च" इत्यादिब्रह्मस्वरूपभूतप्रकाशानन्दादिवच्च तेषां वामदेवादीनां संराधनात्मके कर्मण्यभ्यासादुपलभ्यते तद्वच्चाभ्यस्तसंराधनानां तेषां मूर्त्तामूर्त्तादिना विशिष्टत्वमप्यविशेषेण प्रतीयते इति तदर्थः तथा च ।

(१) पत्रयुतं। (२) परिचङ्क्रमतः। (३) चक्रमहो० इति श्रीविजय० पाठः। (४) रमण इति श्रीवीर० विजयध्वजपाठः। (५) रूपिणमकर्म० इति श्रीविजय० पाठः।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ।
शरीरजैः कर्मदोषैर्याति स्थावरतां नरः ॥

इतिभगवता - मनुनापि मानसैः कर्मदोषैरिति मनोव्यापारे कर्मसब्दः प्रयुक्तः अकर्मणा इतिपाठे अकर्मणो कर्मबन्धनिरासाय कर्मणा स्वस्ववर्णोचितकर्मणेत्यर्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आत्मकेतुभिः आत्मस्वरूपैः प्राणादिभिर्वृत्तिभेदैर्वा ॥ २८ ॥

दधिमण्डोदात् क्षीरोदात् ज्वलनशिखावदमलानां कनकपात्राणामयुतं यस्य तत्तथा अर्वाचीनपराचीनयोर्बाह्याभ्यन्तरप्रदेशस्थितयोर्यस्य मानसोत्तरपर्वतस्य

अहास्त्रिनाभिः सूर्यस्य एकचक्रस्य वै स्मृतम् ।
अरः संवत्सराः पञ्च तेभ्यः षड् ऋतवः स्मृताः ।

इति मत्स्यपुराणे चक्रस्य संवत्सरात्मकत्वमुक्तम् "त्रिणाभिचक्रमजरमनर्वं पञ्चारे चक्र" इत्यादि च ॥ २९—३१ ॥

अकर्मकेण ध्यानलक्षणेन कर्मणा ध्यानस्य चित्तनिरोधलक्षणकर्मसाध्यत्वात् फलाभिसन्धिरहितेन वा ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

जम्बूद्वीपदक्षिणदिक्स्थितानामेवोद्देशावगमादन्तः प्रविश्येति स्फुटं व्यक्तं जगदिति यावत् ॥ २८—३१ ॥

सकर्मकेणेति । क्रियते साध्यते इति कर्म फलं तेन सहवर्त्तमानेन ब्रह्मसालोक्यादिसाधनेनेत्यर्थः ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आत्मकेतुभिः प्राणादिवृत्तिभिः ॥ २८ ॥

ज्वलनस्य तेजसः शिखाभिरमलानि यानि कनकवर्णानि पत्राणि तेषामयुतायुतं यस्य ॥ २९ ॥

तद्द्वीपमध्य इति । मानसोत्तरस्य मण्डलाकारत्वात्तत्पार्श्वद्वयवर्तिनी द्वे वर्षे अपि मण्डलाकारे एव ज्ञेये इत्याह । अर्वाचीनेति । देवानामहोरात्राभ्यामुत्तरदक्षिणायनाभ्यामित्यर्थः ॥ ३०—३१ ॥

सकर्मकेण । यतः कर्मणः कर्माण्येवोद्भवन्ति न तु कर्मक्षयः तेन सकामेनेत्यर्थः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मकेतुभिः प्राणापानादिवृत्तिभिः ॥ २८ ॥

ज्वलनोऽग्निस्तच्छिखावदमलानां कनकपत्राणामयुतानामयुतानि यस्य तत् ॥ २९ ॥

अहोरात्राभ्यामुत्तरदक्षिणायनलक्षणाभ्याम् ॥ ३० । ३१ ॥

भगवन्तं वासुदेवम् ब्रह्मरूपिणं सकर्मकेण कर्मयोगसहितेन कर्मणा वन्दनस्तवनादिव्यापारेण आराधयन्ति साक्षाद्वासुदेवं न जानन्तीति भावः ॥ ३२ ॥

भाषा टीका ।

उस द्वीपका भी पति प्रियव्रत का पुत्र मेधातिथि नामका है सोभी अपने पुत्रों के नाम वाले सातवर्षों का विभाग कर के तिनमें पुरोजव मनोजव पवमान धूम्रानीक चित्ररेफ बहुरूप विश्वधार संज्ञक अपने पुत्रों को राजा करके आपतो अनन्त भगवान् में मनको लगाकर तपोवनको चलागया ॥२५॥

इनके वर्ष मर्यादा पर्वत नदी भी सातही सात हैं ईशान उरुशृङ्ग बलभद्र शतकेसर सहस्रस्रोत देवपाल महानस ए पर्वतों के नाम हैं अनघा आयुर्दा उभयस्पृष्टि अपराजिता पञ्चपदी सहस्रस्रुति निजधृति ये नदी हैं ॥ २६ ॥

उस वर्षमें पुरुष ऋतव्रत सत्यव्रत दानव्रत अनुव्रत नाम वाले हैं सो प्राणायामों से रजोगुण तमोगुण को दूर करके वायु रूप भगवान् को समाधि से यजन करते हैं ॥ २७ ॥

मंत्र जो सब भूतों के भीतर प्रविष्ट होकर अपनी प्राणादि वृत्तियों से सबको पालन करते हैं सबके अन्तर्यामी साक्षात् ईश्वर हैं जिनके वशमें सब जगत् है सो हमारी रक्षा करैं ॥२८॥

ऐसेही दहीमण्डके समुद्र से परे पुष्कर द्वीप है उससे द्विगुण विस्तार चारों ओर से कल्पित है अपने समान स्वादजल के समुद्र से बाहिर से घिराहै जिसमें बड़ा भारी कमल अग्निकी शिखा सरीके निर्मल सुवर्ण के अयुत पत्रों वाला है वह श्रीभगवान् ब्रह्माजी के आसन रूपसे कल्पित है॥२९॥

उस द्वीप के मध्यमें मानसोत्तर नाम का एकहीं पर्वत है पूर्व परके वर्षों का मर्यादा गिरि है दशहजार योजन लम्बा ऊंचा है जहां चारों दिशों में चारों इन्द्रादि लोकपालों के पुर बने हैं जिस के ऊपर मेरूके चारों ओर घूमने वाले सूर्य के रथका सम्वत्सररूप चक्र देवतों के अहोरात्र मे घूमताहै॥३०॥

इस द्वीप का भी पति प्रियव्रतका पुत्रवीतिहोत्र नामक है उसके रमणक धातकि नामक दो पुत्र हैं उन दोनों को वह वर्ष पति बनाकर आप पूर्वज सरीका भगवान् के सेवा मे तत्पर होकर रहा है ॥ ३१ ॥

उस वर्ष के पुरुषभी ब्रह्मरूपी भगवान् को अनेक जन्मार्जित कर्मवाले कर्म से आराधन करते हैं और इस मन्त्रको पढते है ॥ ३२ ॥

यत्तत् कर्ममयं लिङ्गं ब्रह्मलिङ्गं (१) जनोऽर्चयेत् ।
(२) एकान्तमद्वयं शान्तं तस्मै भगवते नम इति ॥ ३३ ॥

ऋषिरुवाच ।

ततः परस्ताल्लोकालोकनामाचलो लोकालोकयोरन्तराले परित उपक्षिप्तः (३) ॥ ३४ ॥

यावन्मानसोत्तरमेर्वोरन्तरं तावती भूमिः काञ्चन्यन्याऽऽदर्शतलोपमा यस्यां प्रहितः पदार्थो न कथञ्चित् पुनः प्रत्युपलभ्यते तस्मात् सर्वसत्त्वपरिहृतासीत् ॥ ३५ ॥

लोकालोक इति समाख्या यदनेनाचलेन (४) लोकालोकस्यान्तर्वर्तिनावस्थाप्यते ॥ ३६ ॥

स लोकत्रयान्ते परित ईश्वरेण विहितो यस्मात् सूर्यादीनां ध्रुवापवर्गाणां ज्योतिर्गणानां गभस्तयोऽर्वाचीनांस्त्रीँल्लोकानावितन्वाना न कदाचित् पराचीना भवितुमुत्सहन्ते तावदुन्नहनायामः ॥ ३७ ॥

एतावाँल्लोकविन्यासो मानलक्षणसंस्थाभिर्विचिन्तितः कविभिः स तु पञ्चाशत्कोटिश्च (५) गणितस्य भूगोलस्य तुरीयभागो (६) ऽयं लोकालोकाचलः ॥ ३८ ॥

तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाऽखिलजगद्गुरुणाऽधिनिवेशिता ये द्विरदपतय ऋषभः पुष्करचूडो वामनोऽपराजित इति सकललोकस्थितिहेतवः ॥ ३९ ॥

तेषां स्वविभूतीनां (७) लोकपालानां च विविधवीर्योपबृंहणाय भगवान् (८) परममहापुरुषो महाविभूतिपतिरन्तर्याम्यात्मनो विशुद्धसत्त्वं धर्मज्ञानवैराग्यैश्वर्याद्यष्टमहासिद्ध्युपलक्षणं विष्वक्सेनादिभिः स्वपार्षदप्रवरैः परिवारितो निजवरायुधोपशोभितैर्निजभुजदण्डैः संधारयमाणस्तस्मिन्गिरिवरे समन्तात् सकललोकस्वस्तय आस्ते ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कर्ममयं कर्मफलरूपम् । ब्रह्म लिङ्ग्यते यस्मात् । एकस्मिन्नेव परमेश्वरेऽन्तो निष्ठा यस्य तदत एव वस्तुतोऽद्वैतम् ॥ ३३ ॥

ततः शुद्धोदात्परस्तात् । लोकः सूर्याद्यालोकवान् देशः अलोकस्तद्रहितस्तयोरन्तराले मध्ये । तयोर्विभागार्थमित्यर्थः ॥ ३४ ॥

ततः परस्तादित्युक्तं तदेव कियतान्तरेणेत्यपेक्षायां तदन्तर्वर्तिनीं भूमिमाह । यावन्मानसोत्तरमेर्वोरन्तरं सार्द्धसप्तलक्षोत्तरसार्धकोटिपरिमितं तावती भूः शुद्धोदात्परास्ति तत्र च प्राणिनोऽपि सन्ति ततः काञ्चनी भूमिरन्यास्तीत्यर्थः । सा चैकोनचत्वारिंशल्लक्षोत्तरकोट्यष्टकपरिमिता ज्ञेया एवं हि सति मेरुलोकालोकयोरन्तरं सार्द्धद्वादशकोटिपरिमितं वक्ष्यमाणमुपपन्नं भवति एतदेव शैवतन्त्रेप्युक्तम् ।

कोटिद्वयं त्रिपञ्चाशल्लक्षाणि च ततः परम् ।
पञ्चाशच्च सहस्राणि सप्तद्वीपाः ससागराः ॥
ततो हेममयी भूमिर्दशकोट्यो वरानने ।
देवानां क्रीडनार्थाय लोकालोकस्ततः परम् ॥

इति अत्र च दशकोटित्वं पूर्वोक्तभूम्या सह द्रष्टव्यम् । सर्वसत्त्वपरिहृतेति देवव्यतिरेकेणेति विज्ञेयं देवानां क्रीडनार्थेत्युक्तत्वात् ॥ ३५ ॥ ३६ ॥

लोकत्रयस्यान्ते परितो मर्यादारूपो विहितः । यस्मात्प्रतिबन्धकात् । सूर्यआदिर्येषां ध्रुवोऽपवर्गोऽन्तो येषाम् । आवितन्वानाः समन्तात्प्रकाशयन्तः परतो गन्तुं न शक्नुवन्ति तावदुन्नहनमुत्सेधस्तदनुरूप आयामश्च विस्तारो यस्य । ध्रुवादप्युच्छ्रितत्वात्त्रिलोकीमर्यादाभूत इत्यर्थः ॥ ३७ ॥

सोऽयन्तु लोकालोकाचलस्तुरीयभागश्चतुर्थोऽशः सार्द्धद्वादशकोट्यः मेरोरेकत इति द्रष्टव्यम् ॥ ३८ ॥

आशासु दिक्षु येऽधिनिवेशितास्ते आसते ॥ ३९ ॥

तेषां दिग्गजानां स्वविभूतीनां स्वांशभूतानां महेन्द्रादीनाञ्च विविधवीर्योपबृंहणाय सकललोकस्वस्तये च भगवांस्तस्मिन्नास्ते इत्यन्वयः । किं कुर्वन् । आत्मनः स्वस्य यद्विशुद्धं सत्त्वं तत्सन्धारयमाण आविष्कुर्वन् । कीदृशं धर्मज्ञानादीन्यष्टमहासिद्धयश्चोपलक्षणं यस्य तत् । दोर्दण्डैरुपलक्षितः सन्महाविभूतेः परमैश्वर्यस्य पतित्वादेकयैव मूर्त्या समन्तादास्ते ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भेदेन वर्णाश्रमभेदेनोपलक्षितो जनः यद्ब्रह्मणः परस्य लिङ्गं शरीरभूतम् । यद्वा । ब्रह्म वेदस्तदेव लिङ्गं ज्ञापकं यस्य तद्ब्रह्मलिङ्गं वेदावबोध्यं कर्ममयं जगत्सृष्ट्यात्मककर्मप्रचुरमादि-

(१) जनोऽर्चेति (२) भेदेनैकान्तमद्वैतं (३) उपक्लृप्तः (४) लोकालोकावन्तर्वर्तिना (५) गुणितस्य (६) यावान् (७) महेन्द्रादीनां (८) परमपुरुष इति श्रीविजयध्वज श्रीवीरराघव पाठः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

चित्रज्ञत्वाद्ब्रह्मणः परमात्मनो लिङ्गं शरीरमर्चयेदाराधयेत् कथमद्वैतमिति क्रियाविशेषणं देवमनुष्यादिकार्यवर्गं प्रति ब्रह्मणः समष्टिरूपत्वात्कार्यकारणयोरभेदाध्यवसायादद्वैतं यथा भवति तथार्चयेदित्यर्थः यच्चतुर्मुखरूपं केवलवेदावबोध्यं व्यष्टिसृष्ट्यात्मककर्मप्रचुरं ब्रह्मणः परस्य शरीरभूतमद्वैतं यथा तथार्चयेदिति यावत् तथैकान्तमित्यपि क्रियाविशेषणमेकान्तमव्यभिचरितं यथा तथार्चयेदिति तस्मै भगवते हिरण्यगर्भाय ते नमः ॥ ३३ ॥

एवं शुद्धोदधिपर्यन्तं सप्तद्वीपात्मकं भूमण्डलमनुवर्ण्याथ ततः परमनुवर्णयति । तत इति । ततः शुद्धोदात्परस्ताद्बहिर्लोकालोकाख्यः पर्वत आस्ते इति शेषः तस्य लोकालोक इति नाम्नि प्रवृत्तिनिमित्तमाह । यतो लोकालोकयोरन्तराले मध्ये उपकल्पितः ॥ ३४ ॥

ननु ततः परस्तादित्युक्तं तदेव कियतान्तरेणेत्यपेक्षायां तदन्तर्वर्त्तिनीं भूमिमाह । मानसोत्तरमेर्वोरन्तराले मध्ये यावती भूमिरास्ते मेरोर्मध्यादारभ्य मानसोत्तरपर्यन्तं सार्द्धसप्तलक्षोत्तरसार्द्धकोटियोजनपरिमिता भूमिरास्ते तावती भूमिः शुद्धोदात्परतोऽस्तीत्यर्थः ततोऽन्यामेकोनचत्वारिंशल्लक्षोत्तराष्टकोटियोजनमितां भूमिमाह । काञ्चनीति । काञ्चनी स्वर्णमयी आदर्शतलोपमा दर्पणोदरतुल्या निर्जना भूमिर्लोकालोकशुद्धोदध्योरन्तराले वर्तत इत्यर्थः ततस्तां विशिनष्टि । यस्यां लोकालोकान्तरालवर्तिन्यां सार्धसप्तलक्षोत्तरसार्द्धकोटियोजनात्मिकायां शुद्धोदाद्बाह्याया भूमेः परस्ताद्विद्यमानायामेकोनचत्वारिंशल्लक्षोत्तराष्टकोटिपरिमितायां भूम्यां निहितः कश्चित्पदार्थः पुनर्नोपलभ्यते दर्पणोदरतुल्यत्वात्तस्या इति भावः । न हि दर्पणोदरे निहितमाषादिस्तिष्ठतीति लोकालोकाद्बाह्यमाह । तस्मादिति । तस्माल्लोकालोकपर्वताद्बहिः सर्वैः सत्त्वैर्जन्तुभिः परिहृता रहिता आसीद्भूमिरित्यनुषङ्गः अलोका भूमिरास्त इत्यर्थः इदमेव हि पर्वतस्य लोकालोकसमाख्यायां निमित्तमित्याह । लोकेत्यादिना । स्वपर्यन्ताया अन्तर्भूम्या लोकशब्दवाच्यत्वात्स्वस्माद्बाह्याया अलोकशब्दवाच्यत्वाच्चोभयोरन्तरालवर्तिनानेन पर्वतेन स्वनिष्ठान्तरालवर्त्तित्वेन धर्मेण हेतुना स्वस्मिँल्लोकालोक इति समाख्या व्यवस्थाप्यते व्यवहृतसमाख्योऽयं पर्वतो भवतीत्यर्थः पर्वतं विशिनष्टि । स इति । लोकालोकः भूरादिलोकत्रयमन्तरमन्तर्गतं यस्य तस्मिन्विषये ईश्वरेण परिवृताकारेण निहित इत्यर्थः गर्भस्थलोकत्रयत्वेन लोकालोकयोर्मर्यादात्वेन चेश्वरेणायमचलो निहित इत्यर्थः एतदेव प्रपञ्चयति । यस्मादिति । सूर्यप्रभृतीनां ध्रुवपर्यन्तानां ज्योतिर्गणानां गभस्तयो मरीचयः त्रिलोकान् भूरादीनर्वाचीनानधःस्थान् वितन्वानाः समन्तात्प्रकाशयन्तो यस्माल्लोकालोकपर्वतरूपात्प्रतिबन्धात्कदाचिदपि पराचीनाः परितो व्याप्ताः पर्वताद्बहिः प्रकाशमाना भवितुं नोत्सहन्ते न शक्नुवन्ति तावदुन्नहनमौन्नत्यं तदनुरूप आयामो विस्तारश्च यस्य सः ध्रुवादप्युन्नतत्वाद्गर्भस्थत्रिलोकीत्वाच्च लोकालोकयोर्मर्यादारूपः इत्यर्द्धपर्वताद्बहिः सूर्यादिप्रकाशाद्बाह्यो लोक आलोकस्तद्वान् लोकः आलोकरहितोऽलोक इति च लोकालोकशब्दयोः प्रवृत्तिनिमित्तमुक्तं भवति ॥ ३५ ॥ ३६ ॥ ३७ ॥

तावदुन्नहनायाम इत्युक्तमौन्नत्यं कियद्योजनपरिमितमित्यपेक्षायां तदुक्तं तस्य कृत्स्नभूमण्डलपरिमितेः कथनापेक्षत्वात्तत्परिमाणमाह । एतावानेवेति । लोकस्य कृत्स्नभूमण्डलस्य विन्यासः संस्थानमानादिभिरेतावानिति पञ्चाशत्कोटियोजनपरिमित इति कविभिः भूमण्डलयाथात्म्यविद्भिः चिन्तितः सम्यग्ज्ञातः पर्वतस्यौन्नत्यपरिमितिमाह । स त्विति । पञ्चाशत्कोटियोजनविस्तृतस्य भूगोलस्य यस्तुरीयो भागः सार्द्धद्वादशकोटियोजनात्मकः तत्परिमितौन्नत्यवान् तदनुगुणायामश्चेत्यर्थः ॥ ३८ ॥

तस्य लोकालोकस्य गिरेरुपरिष्टाच्चतसृष्वाशासु पूर्वादिषु दिक्षु अखिलजगद्गुरुणा आत्मयोनिना ब्रह्मणा ऋषभादिसंज्ञाश्चत्वारो द्विरदपतयः गजश्रेष्ठा ये निवेशितास्ते सकललोकानां स्थितिहेतवः क्षेमहेतवः आसते ॥ ३९ ॥

तेषां द्विरदपतीनां स्वांशभूतानामिन्द्रादिलोकपालानाञ्च नानाविधसामर्थ्याभिवृद्धये सकललोकस्वस्तये भगवान् तस्मिन्पर्वते आस्ते इत्यन्वयः कथम्भूतः परमः सर्वोत्कृष्टः निरतिशयकल्याणगुणाश्रयः पुरुषः विभूतिद्वयाधिपतिः सर्वान्तरात्मा आत्मनः स्वस्य यद्विशुद्धं सत्त्वं तद्धारयमाणः शुद्धसत्त्वमयाकर्मवश्यं दिव्यमङ्गलविग्रहं बिभ्राण इत्यर्थः कथम्भूतं शुद्धसत्त्वं धर्मादयः उपलक्षणानि दर्शनसाधनानि यस्य तद्धर्माद्युपलक्षणं तत्र धर्मो वर्णाश्रमोचितकर्मयोगः ज्ञानं प्रकृतिविविक्तात्मज्ञानयोगः वैराग्यमन्तर्बाह्येन्द्रियनियमः ऐश्वर्यादयः अष्टौ सिद्धयः अणिमादयो योगसिद्धयः एभिरुपलक्ष्यते कर्मयोगज्ञानयोगानुगृहीतेनाणिमाद्यष्टैश्वर्यसिद्धिपर्यन्तेनोपासनेनोपलक्ष्यमित्यर्थः स्वपार्षदश्रेष्ठैर्विष्वक्सेनप्रभृतिभिः परिवृतः स्वकीयैः श्रेष्ठैश्चक्रादिभिरायुधैरुपशोभिताः दोषः भुजा दण्डाकारास्तैरुपलक्षितः तस्मिल्लोकालोके गिरिवरे सर्वत्र सकलजगतां स्वस्तय आस्ते इत्यर्थः कियन्तं कालमास्त इत्यत्राह । आकल्पमिति । एष भगवानात्ममायया विरचितो विविधो यो लोकः तस्य यात्रा जीवनं तस्या गोपीथाय रक्षणाय चाकल्पमेवम्भूतं वेषं लीलया प्राप्त आस्त इत्यर्थः एवं जम्बूद्वीपादीनां परिमाणकथनेन शुद्धोदधिपर्यन्तभूमण्डलस्य मेरोर्मूलस्य मध्यादारभ्याभितः शुद्धोदधिपर्यन्तमृजुगमने पञ्चशतसहस्राधिकत्रिपञ्चाशल्लक्षान्तरकोटिद्वययोजनात्मकं परिमाणमुक्तं भवति तथा चोक्तमन्यत्रापि

> कोटिद्वयं त्रिपञ्चाशल्लक्षाणि च ततः परम् ।
> पञ्चाशच्च सहस्राणि सप्तद्वीपाः ससागराः ॥
> ततो हेममयी भूमिर्दशकोट्यो वरानने ! ।
> देवानां क्रीडनार्थाय लोकालोकस्ततः परम् ।

इति एवं शुद्धोदधेर्बाह्यायाः काञ्चनीभूमेर्गर्भभूतायाः परिमाणमपि यावन्मानसोत्तरमेर्वोरन्तरा तावती भूमिरित्यनेन सार्द्धसप्तलक्षोत्तरसार्द्धकोटियोजनात्मकमुक्तं यद्यप्यादर्शभूमेर्विशिष्य परिमाणं नोक्तं तथापि कृत्स्नभूमण्डलस्य पञ्चाशत्कोटियोजनपरिमितत्वोक्तेस्तत्र सप्तद्वीपससागरात्मकस्य परिमाणोक्तेरलोकस्य लोकसमानपरिमाणस्य वक्ष्यमाणत्वाच्च "ततो हेममयी भूमिर्दशकोट्यः" इति वचनान्तरानुरोधाच्च परिशेषादेकोनचत्वारिंशल्लक्षोत्तराष्टकोटियोजनात्मकं परिमाणं वेदितव्यं हेमभूमेर्दशकोटियोजनपरिमितत्वकथनं पूर्वोक्तसार्द्धसप्तलक्षोत्तरसार्द्धकोटियोजनसङ्ख्यया पूर्वोक्तभूम्या सह किञ्चिदूनमस्तीत्यभिप्रायेणेति द्रष्टव्यम् ॥ ४० ॥ ४१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे भगवन्! यत्तव लिङ्गं सर्वलक्षणसंपन्नं स्वरूपं कर्मणा यज्ञलक्षणेन मीयते ज्ञायत इति कर्ममयं वेदप्रतिपाद्येषु प्रधानं वा ब्रह्मा चतुर्मुखो लिङ्गं प्रतिमा यस्य तत्तथा जनोऽर्चति कथं भेदेन विरिञ्चात्सर्वजगतश्च वैलक्षण्येन एकान्तं नियमेन अद्वैतं स्वगतभेदवर्जितं यत्तस्मै भगवते तुभ्यं नम इति मन्त्रार्थः विरिञ्चस्य यत्तल्लिङ्गं शरीरं पुण्यकर्मनिर्मितं ब्रह्मणो हरेर्लिङ्गं विशेषसन्निधानयोग्यमेकान्तमवसाने प्रलये केवलं निर्व्यापारम् "एके मुख्यान्यकेवला" इत्यभिधानमद्वैतं मुक्तौ संसारे च श्रीनारायणमत्यभेदेन प्रवर्तमानं "गच्छामि विष्णुपादाभ्याम्"इत्याद्यनुसन्धानवचनात् मुख्याद्वैतं किं न स्यादत्राह । भेदेनेति । विरिञ्चपरमात्मनोर्भेदेन जनः पूजयति तस्मै भगवते पूज्याय विरिञ्चाय नम इति वा ॥ ३३ ॥

ततः परस्तादूबहिः ॥ ३४ ॥

मानसोत्तरमेर्वोः पर्वतयोरन्तरमन्तरालं स्थलं यावद्योजनं षोडशलक्षाधिकदशकोटिप्रमितमस्ति तावती भूमिः काञ्चनी ततो हिरण्मयी भूमिरित्यन्यत्र प्रसिद्धिः ।

ततो हेममयी भूमिर्दशकोट्यो वरानने ! ।
देवानां क्रीडनार्थाय लोकालोकस्ततः परः ।

इति षण्णवतिलक्षमिति केचिदादर्शतलोपमा दर्पणतलसदृशी देवतदनुगव्यतिरिक्तसर्वसत्त्वपरिहृता द्विगुणा काञ्चनी भूमिः सर्वसत्त्वविवर्जितेत्यत्र पूर्वभूमेः सकाशात्काञ्चन्या भूमेर्द्विगुणसुखहेतुत्वं देवान् प्रत्युच्यते न पुनः सङ्ख्याया द्विगुणत्वं ग्रन्थान्तरविरोधात् ॥ ३५ ॥

लोकालोक इति समाख्या सम्यगाख्या अन्वर्थसंज्ञा तत्कथमिति तदाह । यदिति । अनेनाचलेन लोकश्चालोकश्च व्यवस्थाप्येते विविच्य ज्ञाप्येते अन्तर्वर्तिना लोकालोकयोर्मध्यवर्तिनेति यद्यस्मात्तस्मादिति शेषः असौ लोकालोकाचल इति ॥ ३६ ॥

स लोकालोकाचलो लोकत्रयान्ते लोकत्रयसृष्ट्यनन्तरं मर्यादासिद्ध्यर्थं परित उपक्लृप्तः केन परमेश्वरेण अथवा लोकत्रयान्ते लोकत्रयावसाने । किञ्च लोकत्रयं योजनत एकपञ्चाशल्लक्षतया यावदुच्चं तावानयं चोच्चविस्तृतत्वे सार्द्धपञ्चाशल्लक्ष इति शेषः यावदुन्नहनायाम इति वचनञ्च आयामे कथञ्चिदेव तावानिति ज्ञातव्यं स पञ्चाशत्सहस्रश्चेति वचनात् ध्रुवोऽपवर्गं अन्ते येषां ते ध्रुवापवर्गास्तेषां पराचीना उपरिवर्तमानाः ॥ ३७ ॥

एतावाँल्लोकविन्यासः देवमनुष्यादिव्यवहारयोग्यं लोक इत्युच्यमानप्रदेशस्य स्वरूपस्थितिपरिमाणमेतावत् सार्द्धत्रिकोटियोजनात्मकं स लोकविन्यासश्च पञ्चाशत्कोटिगुणितस्य पञ्चाशत्कोटिविस्तारयोजनात्मकस्य भूगोलकस्य ब्रह्माण्डलक्षणस्य तुरीयभागेन चतुर्थांशत्वेन तिष्ठति ब्रह्माण्डप्रदेशे चतुर्द्धा विभक्त एकांशः सर्वस्मात्प्रान्ते विद्यमानो घनोदकाख्यः द्वितीयस्तत आभ्यन्तरोऽन्धंतम आख्यः तृतीयो लोकालोकाचलाख्यः चतुर्थस्तु काञ्चनीं भूमिमारभ्य मेरुपर्यन्तप्रदेशः अयं चतुर्थभागो लोकशब्दितः अयञ्च यावल्लोकालोकः यत्र लोकालोकाचलस्तिष्ठति तावत्पर्यन्तत्वेन विद्यते योऽन्तर्विस्तारः लोकालोकाचलाद्यल्लोकपरिमाणं सार्द्धत्रिकोटियोजनात्मकमेतेन परिमाणेनालोकपरिमाणं व्याख्यातं भवति लोकालोकाचलादूबहिः स्थलं तस्यालोकशब्दवाच्यस्य लोकपरिमाणेन व्याख्यातमित्यर्थः-योगेश्वराणामष्टाणिमादिसिद्धानां गतिमुदाहरन्ति ॥ ३८--४२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

लिङ्गं मूर्त्तिस्तस्मै लिङ्गरूपाय । तेषामिति धर्माद्यष्टमहासिद्धयः उपलक्ष्यन्ते प्रकाश्यन्ते येन तत् ॥ ३३—४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कर्ममयं "स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चतामेति" इत्युक्तेः कर्मप्राप्यं लिङ्गं मूर्तिं ब्रह्म लिङ्ग्यते ज्ञायते येन तत् । भेदेन सेव्यसेवकभावेन अर्च्चयेत् । एकस्मिन्नेव परमेश्वरे अन्तो भक्तिनिष्ठा यस्य तत् । अत एवाद्वैतं "यो यच्छ्रद्धः स एव सः" इति न्यायेन परमेश्वरादभिन्नम् ॥ ३३ ॥

ततः शुद्धोदाल्लोकः सूर्याद्यालोकवान् देशः अलोकस्तद्रहितः तयोरन्तराले मध्ये तयोर्विभागार्थमित्यर्थः परितोऽष्टदिक्षु मण्डलाकारतयेत्यर्थः ॥ ३४ ॥

ततः परस्तादित्युक्तं तदेव कियदन्तरमित्यपेक्षायामाह । यावन्मानसोत्तरमेर्वोरन्तरं मानसोत्तरमध्यान्मेरुमध्यपर्यन्तं स्थलमित्यर्थः । सार्द्धसप्तपञ्चाशल्लक्षोत्तरकोटियोजनपरिमितं तावती भूमिः शुद्धोदात् काञ्चनी ततः परत्र लोकालोको वर्त्तत इत्यर्थः । सर्वैः सत्त्वैः प्राणिमात्रैरेव परिहृता त्यक्ता ॥ ३५ ॥

समाख्या निरुक्तिः अनेन अन्तर्वर्त्तिना मध्यवर्तिना सता लोकः-आलोकमयो देशः अलोक आलोकाभावमयो देशः व्यवस्थाप्यते तुल्यप्रमाणत्वेन ज्ञाप्यते ॥ ३६ ॥

लोकत्रयं भूर्भुवः स्वस्तदन्ते परितोऽष्टदिक्षु तर्हि तस्य कियानुच्छ्रायो विस्तारश्चेत्यपेक्षायामाह । यस्मात् प्रतिबन्धकाद्धेतोः सूर्यादीनां ध्रुवान्तानां गभस्तयः किरणास्त्रीँल्लोकान् व्याप्य आवितन्वानाः समन्तात् प्रकाशं विस्तारयन्तः परतो गन्तुं न शक्नुवन्ति । तावन्तावुन्नहनायामौ उच्छ्रायविस्तारौ यस्य सः ध्रुवादप्युच्छ्रितत्वात्त्रिलोकीमर्यादाभूत इत्यर्थः ॥ ३७ ॥

स तु लोकालोकस्तु भूगोलकस्य भूसम्बन्धाण्डगोलकस्येत्यर्थः सूर्यस्येव भुवोऽप्यण्डगोलकयोर्मध्यवर्त्तित्वात् खगोलमिव भूगोलमपि पञ्चाशत्कोटियोजनप्रमाणं तस्य तुरीयभागः सार्द्धद्वादशकोटियोजनविस्तारोच्छ्राय इत्यर्थः । भूस्तु चतुस्त्रिंशल्लक्षोनपञ्चाशत्कोटियोजनप्रमाणा ज्ञेया । यथा मेरुमध्यान्मानसोत्तरमध्यपर्यन्तं सार्द्धसप्तपञ्चाशल्लक्षोत्तरकोटियोजनप्रमाणं मानसोत्तरमध्यात् स्वादूदकसमुद्रपर्यन्तं षण्णवतिलक्षयोजनप्रमाणं ततः काञ्चनी भूमिः सार्द्धसप्तपञ्चाशल्लक्षोत्तरकोटियोजनप्रमाणा एवमेकतो मेरुलोकालोकयोरन्तरालमेकादशलक्षाधिकचतुष्कोटिपरिमितमन्यतोऽपि तथेत्यतो लोकालोकालोकपर्यन्तं स्थानं द्वात्रिंशतिलक्षोत्तराष्टकोटिपरिमितं लोकालोकाद्बहिरप्येकतः एतावदेव अन्यतोऽप्येतावदेव । वक्ष्यते "योऽन्तर्विस्तार एतेन ह्यलोकपरिमाणञ्च व्याख्यातं यद्बहिर्लोकालोकाचलात्"इति एकतो लोकालोकः सार्द्धद्वादशकोटियोजनप्रमाणः अन्यतोऽपि स तथेत्येवं चतुस्त्रिंशल्लक्षोनपञ्चाशत्कोटिप्रमाणा भूः सप्तद्वीपपर्यन्ता ज्ञेया । अत एवाण्डगोलकात् सर्वतो दिक्षु सप्त

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दशलक्षयोजनावकाशे वर्त्तमाने सति पृथिव्याः शेषनागेन धारणं दिग्गजैश्च निश्चलीकरणं सार्थकं भवेदन्यथा तु व्याख्यान्तरे पञ्चाशत्कोटिप्रमाणत्वादण्डगोलकलग्नत्वे तत्तत् सर्वमकिंचित्करं स्यात् चाक्षुषे मन्वन्तरे चाकस्मान्मज्जनं श्रीवराहदेवेनोत्थापनञ्च दुर्घटं स्यादित्यादिकं विवेचनीयम् ॥ ३८ ॥

येऽभिनिवेशितास्ते आसते ॥ ३९ ॥

स्वविभूतीनां स्वांशभूतानां इस्तिनामुपबृंहणं वर्द्धनं तदर्थं धर्मादुपलक्षयतीति तादृशं शुद्धसत्वं धारयमाणः सकललोकस्वस्तये च ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कर्ममयं कर्मसाध्यं लिङ्गं फलं ब्रह्मलिङ्गं वेदस्तान्यमेकस्मिन् प्रजोत्पादने अन्तो निष्ठा यस्य तदद्वयमस्माकमुपासकानामुपास्यान्तरस्याभावाद्यत्तदादिशब्दैर्वेदे वर्णितं तस्मै भगवते नमः॥३३॥

ततः शुद्धोदात् लोकः सूर्यादिप्रकाशितदेशोऽलोकस्तमोव्याप्तो देशस्तयोः ॥ ३४ ॥

शुद्धोदलोकयोरन्तर्गतं भूमण्डलं द्वेधा विभज्य दर्शयति। यावदिति। यावन्मानसोत्तरमेर्वोरन्तरमन्तराले भूमण्डलं तयोरप्यर्द्धमादायेति बोध्यं सार्द्धसप्तलक्षाधिकसार्द्धकोटियोजनपरिमितमित्यर्थः तावती भूरेव सामान्यतोऽस्ति तस्यां केषाञ्चित्प्राणिनां संस्थितिरप्यस्ति "स्वादूदकस्य परितः दृश्यते लोकसंस्थितिः" इति विष्णुपुराणात् एवं सति पञ्चदशलक्षोत्तरयोजनकोटित्रयं भवति अवशिष्टपुष्करद्वीपस्वादूदकगता षण्णवतिलक्षयोजनपरिमिता एवं स एकादशलक्षोत्तरयोजनकोटिचतुष्टयं भवति तदनन्तरमन्या काञ्चनी भूमिरस्ति सा च "द्विगुणा काञ्चनी भूमिः सर्वसत्वविवर्जिता" इति श्रीविष्णुपुराणात् एवं सति अधिकत्रिंशल्लक्षोत्तरद्वादशकोट्यः स्युः ततोऽयुतयोजनविस्तारः लोकालोकाचलः "लोकालोकाचलः शैलो योजनायुतविस्तरः" इति श्रीविष्णुपुराणवचनात् काञ्चन्याः परिमाणमत्र नोक्तं तेनायुतोनसप्तदशलक्षयोजनपरिमितभूमिलाभः , तदित्थं सलोकालोकाचलायाः सार्द्धद्वादशकोटियोजनायामत्वं ज्ञेयं ततः परितः सार्द्धद्वादशकोटियोजनपरिमिता तमोव्याप्ता ज्ञेयेति सर्वं समञ्जसं न प्रत्युपलभ्यते काञ्चनभावं गतत्वात्तस्मात्सर्वैः सत्वैः परिहृता परिवर्जिता ॥ ३५ ॥ ३६ ॥

लोकत्रयस्यान्ते मर्यादारूपः परितो विहित उपक्लृप्तः यस्माल्लोकालोकात्प्रतिबन्धात्सूर्यादीनां ध्रुवापवर्गाणां ध्रुवान्तानां गभस्तयः आवितन्वानाः समन्तात्प्रकाशयन्तः कदाचिदपि पराचीना पर्वताद्बहिर्गमनशीलाः भवितुं नोत्सहन्ते स तावदुन्नहनायामः तावदुन्नहनमुत्सेधः तदनुरूपः आयामश्च यस्य सः ॥ ३७ ॥

तावदुन्नहनायाम इत्युक्तं तत्रायामः पूर्वत्र प्रतिपादित उन्नहनमाह । स त्विति । तुरीयभागः सार्द्धद्वादशकोटियोजनोच्छ्राय इत्यर्थः ॥ ३८ ॥

आशासु दिक्षु अधिनिवेशितास्तिष्ठन्तीति शेषः ॥ ३९ ॥

तेषामृषभादीनां स्वविभूतीनां स्वांशानां महेन्द्रादीनां च विविधवीर्योपबृंहणाय नानासामर्थ्यवृद्धये सकललोकस्वस्तये च भगवांस्तस्मिन् गिरिवरे आस्ते किं कुर्वन् आत्मनः स्वस्य यद्विशुद्धमप्राकृतरूपं श्रीमन्मङ्गलविग्रहं सन्धारयमाणः कीदृशं धर्मज्ञानादीनि अष्टमहाविभूतयश्चोपलक्षणं यस्य तत्। ननु प्राकृतलोकादन्योऽप्राकृतलोकः कस्य यत्रत्यं विग्रहमाविष्कुर्वन् तस्मिन् गिरौ आस्ते इत्यत आह। महाविभूतिपतिरिति। महाविभूतिः परमव्योमविष्णुपदादिशब्दवाच्यं परमं धाम तदधिपतिः "योऽस्याध्यक्षः स परमे व्योमन्" इति श्रुतेः वनपर्वणि मुद्गलोपाख्याने ।

ब्रह्मणः सदनादूर्ध्वं तद्विष्णोः परमं पदम् ।
शुद्धं सनातनं ज्योतिः परब्रह्मेति यद्विदुः ॥

इति स्मृतेश्च विस्तरस्तु वेदान्तकौस्तुभे सूत्रभाष्ये द्रष्टव्यः दोर्दण्डैः उपलक्षितः सन् ॥ ४० ॥

भाषाटीका

यह कर्मनिष्ठावाला ब्रह्म का जनाने वाला एक परमेश्वर मे निरत सर्वोत्तम शान्तरूप है जिसका मनुष्य अर्चन करते हैं तिस मूर्तिवाले भगवान् ब्रह्माजीके अर्थ नमस्कार है ॥ ३३ ॥

ऋषि श्रीशुकदेवजी बोले उसके परे लोकालोक नाम पर्वत है लोक अलोक दोनों के मध्य मे चारों ओर से स्थापित है ॥ ३४ ॥

मानसोत्तर पर्वत तथा मेरु इन दोनों के बीचमे जितनी भूमि है उतनी ही भूमि शुद्धोदक समुद्र के आगे है सब सुवर्णमयी दर्पण के समान है जिसमे डाला हुआ पदार्थ फिर किसी प्रकार से मिल नहीं सकता है तिससे सब जन्तुओं से वह भूमि रहित होगई है ॥ ३५ ॥

लोकालोक इसका नाम है जिससे कि बीचमे रहने वाले इस पर्वत से लोक अलोक दोनों की व्यवस्था होती है ॥ ३६ ॥

परमेश्वरने उस पर्वत को तीनों लोकों के अन्तमें चारों ओर से विधान किया है सूर्य से लेकर ध्रुवपर्यन्त जितने तेज वाले हैं तिनके किरण उस पर्वत के इसी तरफके लोकों मे प्रकाश करते हैं कभी भी उसके दूसरी तरफ को नहीं जाते हैं इतना चौडा ऊंचा पर्वत है ॥ ३७ ॥

इतना लोकों का विभाग प्रमाण लक्षण स्थितिसे कविजनों ने निश्चित किया है सो पञ्चाशत् कोटि गणित भूगोल का चौथा हिस्सा केवल लोकालोक पर्वत है ॥ ३८ ॥

तिस के ऊपर चारों दिशों में सब जगत्के गुरु आत्मयोनि ब्रह्माजी के स्थापन किये ऋषभ पुष्करचूड वामन अपराजित नाम के चार हाथी सब लोक की धारणा के हेतु हैं ॥ ३९ ॥

परमैश्वर्य के पति अन्तर्यामी परममहापुरुष भगवान् नारायण धर्मज्ञान वैराग्य ऐश्वर्यादि अष्ट महासिद्धियों से उपलक्षित अपने विशुद्ध सत्त्व मूर्त्ति को धारण करके अपने पार्षदों में श्रेष्ठ विश्वक्सेनादिकों के सहित अपने आयुधों में श्रेष्ठ सुदर्शनादिसहित भुजदण्डों से सुशोभित होकर उस पर्वत के उपर अपनी विभूति लोकपाल तथा हस्ति इनों के विविध पराक्रमों को बढाने तथा सबलोकों के कल्याण करने को विराजमान हैं ॥ ४० ॥

---

(१) आकल्पमेवं वेषं गत एष भगवानात्मयोगमायया विरचितविविधलोकयात्रागोपीथाये-त्यर्थः (२) ॥ ४१ ॥

(३) योऽन्तर्विस्तार एतेन ह्यलोकपरिमाणं च व्याख्यातं यद्बहिर्लोकालोकाचलात् ततः परस्ताद्योगेश्वरगतिं विशुद्धामुदाहरन्ति ॥ ४२ ॥

अण्डमध्यगतः सूर्यो द्यावाभूम्योर्यदन्तरम् ।
सूर्याण्डगोलयोर्मध्ये कोटयः स्युः पञ्चविंशतिः ॥ ४३ ॥

मृतेऽण्ड एष एतस्मिन् यदभूत्ततो मार्तण्ड इति व्यपदेशः ।
हिरण्यगर्भ इति यद्धिरण्याण्डसमुद्भवः ॥ ४४ ॥

सूर्येण हि विभज्यन्ते दिशः खं द्यौर्मही भिदा (४) ।
स्वर्गापवर्गौ नरका रसौकांसि च सर्वशः ॥ ४५ ॥

देवतिर्यङ्मनुष्याणां (५) सरीसृपसवीरुधाम् ।
सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे भुवनकोशवर्णने
समुद्रद्वीपवर्षसन्निवेशपरिमाणलक्षणो
विंशतितमोऽध्यायः ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वन्तर्यामित्वेनान्तःस्थेनैव सर्वं कर्तुं शक्यं किं तस्य बहिः समन्तादवस्थानेनेत्याशङ्क्य तस्यार्थं स्वयमेव व्याचष्टे । आत्मनो योगमायया विरचिता या विविधलोकयात्रा तस्या गोपीथाय रक्षणाय एष भगवानेवम्भूतमाकल्पं वेषं गतो लीलया प्राप्त इति समन्तादास्त इत्यस्यार्थः ॥ ४१ ॥

अलोकपरिमाणं च मेरोरेकतः सार्द्धद्वादशकोट्यः । ततो लोकालोकात् अलोकाद्वा परस्तात् विशुद्धां द्विजपुत्रानयनेऽर्जुनस्य श्रीकृष्णेन प्रदर्शिताम् ॥ ४२ ॥

विस्तरेणोक्तं ब्रह्माण्डमानं सर्वतोऽपि निरूपयति । अण्डमध्यगतः किं तन्मध्यं तदाह । द्यावाभूम्योः पूर्वोत्तरकपालयोर्यदन्तरं मध्यस्थानं सर्वतः पञ्चविंशतिकोट्यः ॥ ४३ ॥

अण्डमध्यावस्थाने कारणं तन्नाम निर्वचनेनाह । मृतेऽचेतने एष सूर्यो वैराजरूपेण यस्मात्प्रविष्टः ॥ ४४ ॥

किञ्च । सूर्येणैव विभज्यन्ते दिशः खमन्तरिक्षं भिदा अन्योऽपि विभागः स्वर्गापवर्गौ भोगमोक्षदेशौ रसौकांस्यतलादीनि ॥ ४५ ॥

उपासनार्थमाह । देवादीनां सूर्य आत्मा दृगीश्वरो नेत्राधिष्ठाता च ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
विंशोऽध्यायः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं लोकालोकपर्यन्तस्य लोकस्य मेरोरारभ्य सार्द्धद्वादशकोटियोजनपरिमाणमुक्त्वाथालोकपरिमाणमाह । अथेति । ननु हे राजन् ! तेन लोकालोकान्तर्वर्तिनः परिमाणकथनेन लोकालोकाद्बहिर्बाह्यो देशः तस्य लोकस्य परिमाणमपि व्याख्यातमलोकोऽपि लोकेन तुल्यपरिमाणः सार्द्धद्वादशकोटियोजनपरिमाण इत्यर्थः अत्रेदमवगन्तव्यं पञ्चाशत्कोटियोजनात्मकभूमण्डले मेरुर्मध्ये वर्तते तस्मादारभ्य चतुर्दिक्षु अण्डभित्तिपर्यन्तमृजुगमनेन पञ्चविंशतिकोटियोजनानि भवन्ति दक्षिणाण्डभित्तिमारभ्योत्तरभित्तिपर्यन्तमृजुगमने तु पञ्चाशत्कोटियोजनानि भवन्ति एवं पश्चिमत आरभ्य पूर्वभित्तिपर्यन्तेऽपि द्रष्टव्यं तत्र मेरो-

(१) आकल्पमेष भगवान् इति श्रीविजयध्वज पाठः । (२) इत्यर्थ इति नास्ति श्रीवीर० पाठे । (३) अथ ननु इत्यधिकः श्रीवीर० ।
(४) तथेति । (५) सरीसृपनगवीरुधाम् इति श्रीविजय० पाठः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रारभ्याण्डभित्तिपर्यन्ते पञ्चविंशतिकोटियोजनात्मके भूभागे जम्बूद्वीपविभागः पञ्चाशत्सहस्रयोजनात्मकः ततो लवणोदध्यादयः समुद्राः प्लक्षादयो द्वीपाश्च यथोक्तयोजनपरिमाणाः एवं पञ्चाशत्सहस्रोत्तरपञ्चाशल्लक्षाधिककोटिद्वययोजनपरिमिता सप्तसागरसप्तद्वीपात्मिका भूमिः शुद्धोदधेर्बाह्यभूमिः सार्द्धसप्तलक्षोत्तरसार्द्धकोटियोजनपरिमिता बाह्या आदर्शभूमिरेकोनचत्वारिंशल्लक्षोत्तराष्टकोटियोजनपरिमिता सङ्कलय्य गणनया सार्द्धद्वादशकोटियोजनानि भवन्ति ततो लोकालोकात्परालोकभूमिः सार्द्धद्वादशकोटियोजनपरिमितेति तत्र न लोकानां सञ्चार इत्याह । ततः परस्तादिति । ततो लोकालोकाद्बहिर्विशुद्धां योगप्रभावसिद्धां योगेश्वराणामेव गतिं सञ्चारमुदाहरन्ति कथयन्तीत्यर्थः वस्तुतस्त्वत्र शुद्धोदधेः पुरस्तात्काञ्चनभूम्यतिरिक्ता भूमिर्न प्रतीयत एव किन्तु काञ्चन्या एव भूमेर्मेरुमानसोत्तरमध्यस्य भूपरिमाणं गम्यते अत एव हि श्रीवैष्णवे पुराणे "स्वादूदकस्य पुरतः दृश्यते लोकसंस्थितिः । द्विगुणा काञ्चनी भूमिः सर्वजन्तुविवर्जिता" इति काञ्चनभूमिरेवोक्ता अत एव हि ।"ततः काञ्चनभूमिस्तु दशकोट्यो वरानने" ! इति वचनान्तरमप्युपपन्नं तत्रायमर्थः अथालोकपरिमाणमाह । अथेति । ननु योऽन्तर्विस्तारः लोकालोकपर्यन्तवर्त्तिनो भूमण्डलस्य विस्तारः कथित इति शेषः एतेनान्तर्वर्तिनः परिमाणकथनेनालोकस्य लोकालोकपर्यन्ताद्बाह्यवर्त्तिनोऽपि परिमाणमाख्यातं कथितप्रायं पञ्चाशत्कोटियोजनपरिमिते भूमण्डले लोकालोकान्तर्वर्त्तिनो विस्तारे कथितेऽवशिष्टमलोकस्य परिमाणमपि कथितप्रायमेवेत्यर्थः अत्रेदमवगन्तव्यं पञ्चाशत्कोटियोजनपरिमितं भूमण्डलं मेरोर्मूलमध्यादारभ्याभितश्चतुर्द्धाण्डगोलपर्यन्तं विभजनीयमेवं विभक्ताश्चत्वारो भागा अल्पमूला विपुलाग्रभागास्त्रिकोणाकारा भवन्ति यथा मेरोरारभ्य लवणोदधिविभक्ता भागाः तत्रैकैकस्मिन्भागे मेरोरारभ्याण्डभित्तिपर्यन्तमृजुगमने पञ्चविंशतिकोटियोजनानि भवन्ति तेषामेव भागानामाद्यन्तभागयोः समीकरणेन गणनायां सार्द्धद्वादशकोटियोजनानि भवन्ति यथा च मेरोरारभ्य लवणोदधिपर्यन्तेषु चतुर्षु भागेष्वेकैकस्मिन् भागे मेरुमूलादारभ्य ऋजुगमनेन शुद्धोदधिपर्यन्तं पञ्चाधिकसहस्राधिकत्रिपञ्चाशल्लक्षोत्तरकोटिद्वययोजनात्मकः शुद्धोदादारभ्य लोकालोकपर्यन्तं सार्द्धसप्तलक्षोत्तरसार्द्धकोटियोजनपरिमितः लोकालोकादारभ्याण्डभित्तिपर्यन्तो लोकभागः एकोनचत्वारिंशल्लक्षाधिकाष्टकोटियोजनपरिमितः मिलित्वा सार्द्धद्वादशकोटियोजन एकैको भागो भवति चतुर्णां भागानां मेलनेऽण्डभित्तेर्दक्षिणत आरभ्योत्तरभित्तिपर्यन्तमृजुगमने पञ्चाशत्कोटियोजनानि भवन्ति एवं पाश्चात्यामण्डभित्तिमारभ्य पूर्वभित्तिपर्यन्तं गगनेऽपीति बोध्यम् । भागानां समीकारेण गणनायां त्वन्यदेव परिमाणं भवतीति अयमप्यपरो विशेषः सार्द्धद्वादशकोट्यात्मके एकैकस्मिन् भागे योऽयं शुद्धोदधिपर्यन्तः पञ्चाशत्सहस्राधिकत्रिपञ्चलक्षोत्तरकोटिद्वययोजनपरिमित एकैकभागकृतास्मिन्नपि भागे मेरोर्मूलादारभ्य ऋजुगमने लवणोदधिपर्यन्तो जम्बूद्वीपविभागः पञ्चाशत्सहस्रयोजनपरिमितः ततो लवणोदधिभागोऽपि ऋजुगमनेन लक्षयोजनपरिमितः ततः प्लक्षद्वीपो द्विलक्षयोजनात्मकः तत इक्षुरससमुद्रोऽपि द्विलक्षयोजनात्मकः एवं ततः शाल्मलादयो द्वीपाः सुरोदादयश्च समुद्राः चतुर्लक्षादिरूपयथोक्तपरिमाणा एव वेदितव्याः एवं शुद्धोदधिपर्यन्तं सङ्कलय्य गणनायां पञ्चाधिकसहस्राधिकत्रिपञ्चाशल्लक्षोत्तरकोटिद्वययोजनात्मकोक्तसङ्ख्या सम्पन्ना भवतीति ततः काञ्चनी भूमिः सार्द्धसप्तलक्षोत्तरसार्द्धकोटियोजनपरिमिता ततो "द्विगुणा काञ्चनी भूमिः" इति तु श्रीविष्णुपुराणवचनं पूर्वोक्तशुद्धोदधिपर्यन्तया भूम्या सह षण्णवतिलक्षन्यूनद्विगुणेत्येव तात्पर्यकं दशकोट्य इति वचनान्तरं तु लोकादारभ्य पुनर्लोकालोकपर्यन्तमृजुगमनेन चतुर्दशलक्षोत्तरदशकोटियोजनप्रमिता भूमिर्भवतीत्येतदभिप्रायकं द्विगुणत्वदशकोटित्वकथनं न्यूनाधिकभागावनादरेणेत्यतो न विरोध इति ततो लोकालोकाचलः ततोऽन्धकारभूमिः सा च पारिशेष्यादवशिष्टकोटियोजनपरिमिता एवञ्च मेरोरारभ्य पञ्चविंशतिकोटियोजनानि भवन्तीति द्रष्टव्यम् ॥ ४२ ॥

एवं मेरुमध्यस्थमवधीकृत्य भूमण्डलस्य परिमाणमुक्तमथ ब्रह्माण्डस्य कियत्परिमाणकं वावधीकृत्य परिमातव्यमित्यपेक्षायामाह । अण्डमध्यगत इति । अण्डमध्यगतः अण्डमध्ये स्थितः सूर्यः यथा भूमण्डलस्य मध्ये मेरुः स्थितस्तद्वदित्यर्थः किं तन्मध्यं यत्र स्थितः सूर्यस्तत्राह । द्यावाभूम्योर्यदन्तरमिति । द्यावाभूम्योरूर्ध्वाधःकपालयोर्यदन्तरं मध्यस्थानमित्यर्थः अनेन सूर्यमवधीकृत्याण्डस्य परिमाणं कार्यमेवेत्युक्तं भवति सूर्याण्डभित्त्योर्मध्ये पञ्चविंशतिकोट्यः स्युरित्यर्थः सूर्यमवधीकृत्याण्डभित्तिपर्यन्तमूर्ध्वमधस्तात्पार्श्वतश्च पञ्चविंशतिकोटियोजनानि भवन्तीत्यर्थः ॥ ४३ ॥

अण्डप्रसङ्गात्सूर्यचतुर्मुखादीनामण्डसम्बन्धादेव मार्तण्डहिरण्यगर्भादिनामवत्त्वमित्याह । मृतेऽण्ड इति । मृते नश्वरे एतस्मिन्नण्डे यतः स्थितः ततोऽसौ सूर्यो मार्तण्ड उच्यते मृतञ्च तदण्डं च मृताण्डं मृताण्डे भवः मार्ताण्डः शकन्ध्वादित्वात्पररूपे मार्तण्ड इत्यपि साधुः यद्यस्माद्धिरण्ये हिरण्मये समुद्भवो यस्य स ब्रह्मा हिरण्यगर्भ इत्युच्यते हिरण्याण्डस्य गर्भभूतत्वाद्धिरण्यगर्भ इत्युच्यते इत्यर्थः । यद्वा । हिरण्यगर्भ इति सूर्यस्यैव क्वचिद्व्यपदेशनिर्वाहार्थमेव ॥ ४४ ॥

यदुक्तमण्डपरिमाणे सूर्यस्यावधित्वं तदेव न केवलं किन्तु दिगादिविभागेऽप्यवधित्वं सूर्यस्यास्तीत्याह । सूर्येणेति । दिशः पूर्वादयः एवं खमन्तरिक्षं द्यौः स्वर्लोकः मही भूमिः भिदान्योऽपि विभागः स्वर्गापवर्गौ भोगमोक्षदेशौ नरकाः रसौकांसि अतलादीनि च सर्वशः कृत्स्नशः सूर्येणैव विभज्यन्ते ज्ञायन्त इत्यर्थः ॥ ४५ ॥

न केवलं दिगादिविभाजक एव सूर्यः किन्तु देवादीनां चक्षुरिन्द्रियाधिष्ठाता चेत्याह । देवेति । आत्मा भगवदात्मकः सूर्यः देवादीनां सर्वेषां जीवनिकायानां जीवसमूहानां दृगीश्वरः दृगधिष्ठाता अगानां स्थावराणां वीरुधाञ्च चक्षुरिन्द्रियस्यानभिव्यक्तस्य भासकत्वाच्च चक्षुरिन्द्रियाधिष्ठातृत्वमप्युक्तम् ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
विंशोऽध्यायः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पञ्चाशत्कोटिगुणितो ब्रह्माण्डकटाह इत्युक्तं तस्य दशदिगपेक्षया मध्यप्रदेशः कियानिति तत्राह। अण्डेति। द्यावापृथिव्योर्यदन्तरमन्तरिक्षं तस्मिन् यत्र स्थितः सूर्यः अण्डमध्यगतः अन्तरिक्षप्रदेशो यत्र सूर्यमण्डलसञ्चारः सोऽण्डमध्यप्रदेशः सर्वदिगपेक्षया सूर्याण्डगोलयोर्मध्ये सर्वदिक्ष्वपि सम्भूय पञ्चविंशतिकोटियोजनानि स्युरित्यर्थः ॥ ४३ ॥

एष सूर्य एतस्मिन् मृते जीवरहिते अचेतन इति यावदण्डे अभूदचेतनब्रह्माण्डमध्ये वर्तत इति अतस्तस्मात्तस्मान्मार्तण्ड इति व्यपदेशः यद्यथा हिरण्याण्डसम्भवो विरिञ्चो हिरण्यगर्भ इत्युच्यते तथेति ॥ ४४ ॥

सूरिप्राप्यत्वात्तदन्तर्यामित्वाच्च सूर्यस्तेन हरिणा दिगादयो विभज्यन्ते यदतः सूर्य आत्मा श्रीनारायणः सर्वेषां दृग् दृष्टिरिति कथितः ॥ ४५ ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

विंशोऽध्यायः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आकल्पं प्रलयपर्यन्तमेवं समन्तात् स्थितिप्रकारेण गतस्तत्र प्राप्त इत्यर्थः । इति स एव मदीयपूर्वोक्तस्याभिप्राय इत्यर्थः ॥ ४१ ॥

योऽन्तरिति । लोकालोकस्तु लोकमलोकं चार्द्धेनार्द्धेन व्याप्य स्थितः अतः काञ्चन्या भूमेः परभागमाक्रान्तः शिवतन्त्रे च "लोकालोकं ततः परम्" इत्युक्तम् । अन्यथा ब्रह्माण्डगर्भस्य पञ्चाशत्कोट्यतिक्रमः स्यादिति विशुद्धान्तर्गतमिति विशुद्धगतिहेतुत्वात् ॥ ४२ ॥ ४३ ॥

एष सूर्य इत्यन्तर्याम्यभेदविवक्षया ॥ ४४—४६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

विंशोऽध्यायः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ननु किं तस्यैतावता प्रयासेनेत्यतः सकललोकस्वस्त्य इत्येतत् स्वयमेव व्याचष्टे। आकल्पं कल्पपर्यन्तम् एवमनेन प्रकारेण गतः लोकालोकं प्राप्तः आकल्पं वेषं प्राप्त इति वा आत्मनो योगमायया विरचिता या विविधलोकयात्रा तस्या गोपीथाय रक्षणाय तस्यैव शक्त्या रचितं विश्वं स चेन्न पालयेत्तर्हि कः पालयेदिति भावः ॥ ४१ ॥

अलोकपरिमाणं द्वाविंशतिलक्षोत्तरं कोटयष्टकं बहिः सर्वदिक्षु योगेश्वराणामावरणादिकं विभिन्न मुमुक्षूणाम्। यद्वा। नारदादीनाम् ॥ ४२ ॥

विस्तरेणोक्तमण्डगोलकमानमूर्द्धाधोऽपि निरूपयति । अण्डमध्यगत इति। किन्तन्मध्यं तदाह। द्यावाभूम्योः भुवर्लोकभूर्लोकयोर्यन्मध्यमतः सूर्यश्च अण्डगोलकञ्च तयोर्मध्ये सूर्यादूर्ध्वगोलकपर्यन्तं यथा पञ्चविंशतिकोट्यः तथा अधोगोलकपर्यन्तञ्चेत्यर्थः उपपत्तिस्तूपरिष्टाद्व्याख्येया ॥ ४३ ॥

अण्डमध्यावस्थाने कारणं तन्नाम निर्वचनेनाह । मृते अचेतने एष सूर्योऽभूत् प्रविष्टः ततो मार्त्तण्डः स एव क इत्यत आह । हिरण्यगर्भसमष्टिजीवसूक्ष्मोपाधिरूपः यद्यत एष हिरण्याण्डस्य तदीयस्थूलदेहस्य सम्भवः सम्यग्विद्यमानता ॥ ४४ ॥

भिदा अन्योऽपि विभागः स्वर्गापवर्गौ भोगमोक्षदेशौ रसौकांसि अतलादीनि ॥ ४५ ॥

सूर्य आत्मा आत्मत्वेनोपास्यः ॥ ४६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
विंशोऽध्यायः पञ्चमस्य सङ्गतः सङ्गतः सताम् ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पूर्ववाक्यार्थं व्याचष्टे। एष महाविभूतिपतिः आत्मयोगमाययाऽऽज्ञतया शक्तिविशेषरूपया विरचिता विविधलोकयात्रा तस्याः गोपीथाय रक्षणायैवमाकल्पं वेषं गतः प्राप्तो भवतीत्यर्थः ॥ ४१ ॥

अन्तर्विस्तारः सार्द्धद्वादशकोटियोजनपरिमितः लोकालोकसहितो मेरोरेकतः एतेनैवालोकपरिमाणं व्याख्यातमलोकमेवाह । यल्लोकालोकाद्बहिरिति । ततो लोकालोकात् ॥ ४२ ॥

विस्तरेणोक्तं परिमाणं संक्षिप्यानुवदति। अण्डस्य मध्ये सूर्यो गतः प्रविष्टः किं तन्मध्यमित्यत आह । द्यावाभूम्योः पूर्वोत्तरकपालयोर्यदन्तरं मध्यं स्थानं तदेवम्भूतस्य सूर्याण्डस्य प्रकाश्यतया सूर्यसम्बन्धिनः अण्डस्य लोकाचलमण्डलस्य गोलयोरुभयपार्श्वयोर्मध्ये पञ्चविंशतिः कोट्यः स्युः योजनानामिति शेषः। लोकालोकविस्तारोऽप्यत्रैव ज्ञेयः पूर्वोक्तनिर्णयबलात् ॥ ४३ ॥

अण्डप्रसङ्गात्सूर्यनामान्तरमाह । मृतेऽण्डे प्रकाशशून्ये एषः सूर्यो यतोऽभूदतो मार्त्तण्डः मृतञ्च तदण्डं च मृतण्डं सकन्ध्वादित्वात् पररूपं तत्रभवो मार्तण्डः इति व्यपदेशः हिरण्मयस्य हिरण्याण्डस्य गर्भभूतत्वाद्धिरण्यगर्भ इति व्यपदेशः यद्य एव हिरण्याण्डे समुद्भवतीति हिरण्याण्डसमुद्भव इति च व्यपदेशः ॥ ४४ ॥

स्वमन्तरिक्षं महीभिदा अन्योऽपि भूविभागः स्वर्गापवर्गनरकाः भोगमोक्षयातना रसौकांस्यतलादीनि ॥ ४५ ॥

देवादीनां यथा सम्भवमुपकारकर्तृत्वादात्मा आश्रयः दृगीश्वरः दृगधिष्ठाता च ॥ ४६ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

विंशाध्यायार्थप्रकाशः ॥ २० ॥

भाषा टीका

अपनी योगमाया से रचित नाना प्रकार के लोकों के रक्षा करने के वास्ते भगवान् कल्पपर्यन्त इस वेषको प्राप्त होकर रहते हैं ॥ ४१ ॥

मेरुसे लेकर लोकालोकपर्वत के मध्यमे जो विस्तार है उतनाहीं उधर अलोकस्थान का भी विस्तार है जो कि स्थान उसके आगे योगीश्वरों की विशुद्धगति का है ऐसा कहते हैं ॥ ४२ ॥

अण्डके मध्यमे सूर्य प्राप्त है आकाश भूमिका जो अन्तर कोई मध्य है सूर्य तथा अण्डगोल के मध्यमें पञ्चाशकोटि योजन का विस्तार है ॥ ४३ ॥

जिस हेतुसे अचेतन इस अण्ड मरेमें सूर्य भये हैं इसीसे मार्तण्ड इनका नाम है हिरण्य अण्डके सम्भव होने से हिरण्यगर्भ ऐसा नाम हुआ है ॥ ४४ ॥

दिशा आकाश पृथिवी और सब भेद स्वर्ग मोक्ष नरक, पाताल के स्थान ए सब विभाग सूर्य से ही होते हैं ॥ ४५ ॥

देवता मनुष्य तिर्यग् जन्तु सर्पादिक लतादिक और सब जीवसमूह तथा सब के नेत्र इनके अधिष्ठाता ईश्वर श्रीसूर्यनारायण ही हैं ॥ ४६ ॥

इति श्रीभागवत पञ्चमस्कन्ध बीसमे अध्यायका
भाषानुवाद लक्ष्मणाचार्य कृत
समाप्त ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे विंशोऽध्यायः समाप्तः ॥ २० ॥

एकविंशोऽध्यायः ।

——:०:——

॥ श्रीशुक उवाच ॥

एतावानेव भूवलयस्य सन्निवेशः प्रमाणलक्षणतो व्याख्यातः ॥ १ ॥

एतेन हि दिवो मण्डलमानं तद्विद उपदिशन्ति । यथा द्विदलयोर्निष्पावादीनां ते अन्तरेणान्तरिक्षं तदुभयसन्धितम् ॥ २ ॥

यन्मध्यगतो भगवांस्तपतां पतिस्तपन आतपेन त्रिलोकीं प्रतपत्यवभासयत्यात्मभासा स एष उदगयनदक्षिणायनवैषुवतसंज्ञाभिर्मान्द्यशैघ्र्यसमानाभिर्गतिभिरारोहणावरोहणसमानस्थानेषु यथासवनमभिपद्यमानो मकरादिषु राशिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते ॥ ३ ॥

यदा मेषतुलयोर्वर्तते तदाहोरात्राणि समानानि भवन्ति यदा वृषभादिषु पञ्चसु च राशिषु चरति तदाहान्येव वर्धन्ते ह्रसति च मासि मास्येकैका घटिका रात्रिषु ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवमध्यायविंशत्या भूमर्यादा निरूपिता ।
अतः परं द्युमर्यादापालनं त्रिभिरुच्यते ॥ १ ॥
एकविंशे रवेः कालचक्रेण भ्रमतोऽन्वहम् ।
खगत्या राशिसञ्चारैर्लोकयात्रा निरूप्यते ॥ २ ॥

एतावान्विस्तारेण कोट्यः पञ्चाशत् । उत्सेधेन पञ्चविंशतिः ॥ १ ॥

द्विदलयोर्मध्ये यथैकस्य मानेनापरस्य मानमुपदिश्यते तद्वत् ते अन्तरेण तयोर्मध्ये तदुभयसन्धितं ताभ्यामुभयतः संलग्नम् ॥ २ ॥

उदगयनादिसंज्ञाभिर्मन्दक्षिप्रसमगतिभिर्यथाकालमारोहणादिस्थानेष्वारोहणाद्यभिपद्यमानो मकरादिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते ॥ ३ ॥

तत्प्रपञ्चयति । यदेति । अत्यन्तवैषम्याभावात्समानानीत्युक्तं सर्वथा साम्यं त्वेकस्यैवाहोरात्रस्य यद्यपि वृषभमिथुनयोरेवाह्नां वृद्धिः कर्कटादिषु ह्रासस्तथापि रात्र्यपेक्षयाधिकत्वाद्वर्धन्त इत्युक्तम् । एवं रात्रिवृद्धावपि दिनापेक्षया ह्रसतीत्युक्तम् । एकैकेति स्थूलदृष्ट्योक्तम् । वृद्धिह्रासयोः प्रतिमासवैषम्यात् ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं कृत्स्नस्य भूमण्डलस्य सन्निवेशं तत्परिमाणञ्चाभिधायाथ दिवोमण्डलपरिमाणं सूर्यगतिञ्च विवक्षुर्वक्ष्यमाणस्योक्तसापेक्षत्वादुक्तमनुवदति त्रिभिरध्यायैः । एतावानेवेति । भूमण्डलस्य सन्निवेशः संस्थानं प्रमाणादिभिरेतावानेव पञ्चाशत्कोटियोजनपरिमित एवमाख्यातः एवकारेण उक्ताधिकपरिमाणव्यावृत्तिः वक्ष्यमाणमवतारयति । एतेन । भूमण्डलपरिमाणेन दिवो मण्डलस्यापि मानं परिमाणं तद्विदः दिवो मण्डलमपि पञ्चाशत्कोटियोजनपरिमितमित्येवोपदिशन्ति कथयन्तीत्यर्थः कथमन्यस्य परिमाणकथनेनान्यस्यापि परिमाणं ज्ञातुं शक्यमित्यपेक्षायां दृष्टान्तमाह । यथा द्विदलयोर्निष्पावादीनामिति । निष्पावो गोधूमादिधान्यानि चूर्णयितुं शिल्पिभिर्निर्मितः द्विदलात्मकः पाषाणविशेषः यद्वा द्वयदलविशिष्टो धान्यविशेषो निष्पूयते सूर्पादिभिरिति निष्पावः "निरभ्योः पूल्वोः" इति घञ् निष्पावप्रभृतीनां द्वयोर्दलयोर्मध्येऽधःस्थितस्य दलस्य परिमाणे कथिते उपरितनदलमपि तत्तुल्यपरिमाणमिति कथितं भवति तथेत्यर्थः अस्तु दिवो मण्डलं भूमण्डलेन तुल्यपरिमाणं किन्तद्भूमण्डलद्युमण्डलयोर्मध्यं यत्र स्थितं सूर्यमवधीकृत्य परिच्छेदः कार्य इत्युक्तं तत्राह । तयोरिति । तयोर्भूमण्डलद्युमण्डलयोरन्तरेण मध्येऽन्तरिक्षमन्तरिक्षलोकमुपदिशन्तीत्यनुषङ्गः कथम्भूतं तदुभयसन्धितं ताभ्यां भूमण्डलद्युमण्डलाभ्यामुभयतः अध ऊर्ध्वञ्च सन्धितं संलग्नं सन्नद्धमित्यर्थः यस्यान्तरिक्षस्य मध्यगतो मध्ये स्थितो भगवांस्तपतां पतिः तापं कुर्वतां पत्निरग्न्यादीनां मध्ये पतिः श्रेष्ठः तपनः सूर्य आतपेन त्रिलोकीं भूर्भुवः सुव इत्यात्मिकां प्रतपति प्रकाशयत्यात्मनः स्वस्य भासा कान्त्या त्रिलोकीमवभासयति प्रकाशयति स्वस्वकर्मणि प्रवृत्तां करोतीत्यर्थः किमयं सूर्य एकत्र स्थित एव त्रिलोकीं प्रतपत्यवभासयति उताटन्नेव यद्यटन्नेव तर्हि सदैकरूपेणाटति उत कदाचित्त्वरया कदाचिच्छनैः कदाचित्समं किमूर्ध्वमेवाटति अथवा अध आहोस्विदुभयतः केषु स्थानेष्वटति कथम्वा तद्गतिकृतो भवत्यहोरात्रपरिमाणविभाग इत्याद्यपेक्षायामाह । स एष इति । स एष अन्तरिक्षमध्यगतः सूर्य उदगयनादिसंज्ञाभिर्मान्द्यादिगतिभिरारो-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हणादिस्थानेषु यथाकालमारोहणादिकमभिपद्यमानः मकरादिषु राशिषु वर्तमानः अहानि रात्रीश्च दीर्घह्रस्वसमानानि विधत्ते कुरुते मार्गस्य अल्पीयस्त्वं तावत् "अशीतिमण्डलशतं काष्ठयोरन्तरं द्वयोः। आरोहणावरोहाभ्यां भानोरब्देन या गतिः" इति श्रीवैष्णवपुराणोक्तरीत्या शेषग्रहर्क्षनाराश्च येऽन्तर्मध्यबहिर्वलयत्रयाकारे अशीतिशतकुण्डलाकारे रेखामये अवाक्शिरस्कदक्षिणावर्तकुण्डलीभूतसर्पाकारे भगवदात्मके शिशुमाराख्ये कालचक्रेऽधिश्रित्यारोहणावरोहणसमवस्थानेष्वन्तर्वलयबाह्यवलयमध्यमवलयेषूदगयनादिसंज्ञाभिर्मान्द्याद्विगतिभिर्यथा सवनमीश्वरादृष्टकालमनतिक्रम्याभिपद्यमानः प्राप्तः सन्मकरादिषु शिशुमाराख्यस्य मकाराद्याकाररेखामयमण्डलेषु नक्षत्राभिमुखतया चरन्नहरादीनि ह्रस्वानि दीर्घाणि समानानि च कुरुते तत्र बहिर्वलयादन्तर्वलयगमनमारोहणं तदेवोदगयनमारोहे च चिरगतिर्मार्गस्य राशिकृतभूयस्त्वादन्तर्वलयाद्बहिर्वलयगमनमवरोहणं तदेव दक्षिणायनमवरोहे च ह्रस्व इति गतेर्मार्गस्य राशीकृतस्याल्पीयस्त्वात् समवस्थानशब्दनिर्दिष्टेषु मध्यमवलये गमनं समवस्थितिः तदेव विषुवाख्यितिः तत्र समगतिर्मार्गस्य राशीकृतस्य साम्यात् आरोहणादिकम्" "ध्रुविणा मुच्यमानेन पुरा रश्मियुगेन तु । तस्यैव बाह्यतः सूर्यो भ्रमते मण्डलानि च" इति आरोहणे चिरगत्यैव दिनवृद्धिरात्रिह्रासश्च भवति अवरोहणे द्रुतगमनेऽह्नां ह्रासः त्रिवृद्धिश्च समवस्थितावहोरात्रस्य साम्यमितिभेदः ॥ १—३ ॥

(१) एतदेव प्रातीपिपादायिषुस्तावत्कासु राशिषु चरन्नहोरात्रस्य साम्याधिकं विभत्ते इतिशङ्कायामहोरात्रिकृतसाम्याधिकविभागमाह । यदेति । यदा वृषभादिषु वृषभ आदिर्यासां तासु वृषभमिथुनकर्कटसिंहकन्यासु राशिषु पञ्चसु यदा चरति तदाहान्येव वर्धन्ते नतु रात्रय इत्यर्थः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"चतुर्भिः साकं नवतिञ्च नामभिश्चक्रं न वृत्तं व्यतीं रवीविपल भीषास्माद्वातः पवते भीषोदेति सूर्य" इत्यादिश्रुतेरखण्डस्वामिनो हरेराज्ञया स्वाधिकारेषु प्रवर्तमानानामिष्टदेवतात्वेन लोकैर्निषेव्यमाणानां तस्यैव विशेषनिवासस्थानानां सूर्यादीनां स्वरूपज्ञानमपि भगवज्ज्ञानोपयोगीत्यभिप्रायेण तत्स्वरूपयत्यस्मिन्नध्याये। तत्रातीताध्यायार्थानुवादमुखेनैतमध्यायमवतारयति। एतावानिति। भूवलयस्य लोकात्मकस्य सन्निवेशः विस्तारविशेषः ॥ १ ॥

द्विदलनिष्पावादीनां निष्पावराजमाषद्विदलानां सर्वप्रकारेण परिमाणतः समत्वमेवं भूवलयस्य सर्वस्य परिमाणतः समत्वमेव यस्यान्तरिक्षस्य मध्यगतस्तदन्तरिक्षं तयोर्द्यावापृथिव्योरन्तरेण मध्य उपसंधितं स्थापितम् ॥ २ ॥

आत्मनः परमात्मनो भासा "यदादित्यगतं तेज" इत्यादेः एष सूर्य उदगयनमुत्तरायणं तत्संज्ञया गत्या आरोहणसंज्ञेषु मकरादिमिथुनान्तेषु राशिषु यथासवनं तत्तन्मकरादिमासकालमनतिक्रम्य तत्तन्नक्षत्रेष्वोदयमभिपद्यमानो दक्षिणायनसंज्ञया गत्यावरोहणसंज्ञकेषु कर्कटादिधनुःपर्यन्तेषु राशिषु तत्तत्कर्कटादिमासकालमनतिक्रम्य तत्तन्नक्षत्रेष्वोदयमभिपद्यमानस्तथा वैषुवसंज्ञया गत्या समस्थानसंज्ञयोर्मेषतुलयोराश्योस्तन्नक्षत्राभ्यामुदयं प्राप्नुवन्नहोरात्राणि दीर्घह्रस्वसमानानि करोति ॥ ३ ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भूवलयस्येति भुवः पर्यक् स्थितानां देशानां ग्रहणम् ॥ १ ॥

ते अन्तरेणान्तारिक्षमिति सूर्यमण्डलस्य दलप्रमाण एव देशो ज्ञेयः ॥ २—६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एकविंशे रवेरुक्तं राशिगत्ययनादिकम् ।
उदयास्तमनादीनां व्यवस्था च गतेर्मितिः ॥ ० ॥

एतेन भूगोलकमानेन निष्पावः शूकशिम्बी तदादीनामित्यतद्गुणसंविज्ञानबहुव्रीहिणा कलायादीनामित्यर्थः । तेषां यथा द्वयोर्दलयोर्मध्ये एकस्य मानेनापरस्य मानमुपदिश्यते तथैव भूगोलकखगोलकयोर्विस्तारेण तुल्यमेव मानमित्यर्थः ते अन्तरेण तयोर्मध्ये अन्तरिक्षं लक्षद्वयप्रमाणं तदुभयसन्धितं ताभ्यामुभयतः संलग्नम् । यस्य अन्तरिक्षस्य मध्यगतः सः सूर्यः मान्द्यशैघ्र्यस्वार्थेष्वन्ते उदगयनन्नाम्न्या गत्या मन्दया गत्या आरोहणस्थाने यथा सवनं समयमनतिक्रम्य आभिपद्यमानश्चलन् मकरादिषु षट्सु राशिषु अहानि क्रमेण दीर्घाणि रात्रीस्तु ह्रस्वा विधत्ते दक्षिणायननाम्न्या क्षिप्रगत्या अवरोहणे कर्कटादिषु षट्सु राशिषु अहोरात्रान् ह्रस्वदीर्घान् विधत्ते । वैषुवतसंज्ञया उत्तरायणदक्षिणायनमध्यवर्तिन्या समया समानया गत्या मेषतुलयोः अहोरात्रान् समानान् विधत्ते अभिपद्यमानश्चलन् ॥ १ ॥ २ ॥ ३ ॥

एतत् प्रपञ्चयति । यदेत्यादिना । अत्यन्तवैषम्याभावात् समानानीत्युक्तम् । सर्वथा साम्यं त्वेकस्यैवाहोरात्रस्य यद्यपि वृषभमिथुनयोरेवाह्नो वृद्धिः कर्कटादिषु ह्रासस्तथापि रात्र्यपेक्षया अधिकत्वाद्वर्धन्त इत्युक्तम् एवं रात्रिवृद्धावपि दिनापेक्षया ह्रसतीत्युक्तं वस्तुतस्तु मकरादिषु अह्नां वृद्धिप्रक्रमः कर्कटादिषु ह्रासप्रक्रम इत्यग्रे स्पष्टं वक्ष्यते । एकैकेति । स्थूलदृष्ट्योक्तं वृद्धिह्रासयोः प्रतिमासं वैषम्यात् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं भूर्लोकः वर्णितः

पादगम्यं तु यत्किञ्चिद्वस्त्वस्ति पृथिवीमयम् ।
स भूर्लोकः समाख्यातो विस्तारोऽस्य मयोदितः ।

इति श्रीविष्णुपुराणात् तदुपरि लोकाः सन्ति तत्र भूर्लोकात् सूर्यलोकपर्यन्तो भुवर्लोकः

भूमिसूर्यान्तरं यत्तु सिद्धादिमुनिसेवितम् ।
भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम ।।

इति तत्रैवोक्तत्वात् तदुपरि सूर्यमण्डलाद्ध्रुवपर्यन्तः स्वर्गलोकः तदुपरि कोटियोजनोच्छ्रायो महर्लोकः तदुपरि द्विगुणोच्छ्रायो जनलोकः तदुपरि चतुर्गुणोच्छ्रायस्तपोलोकः तदुपरि ब्रह्म-

---

(१) इतः परन्दशश्लोकपर्यन्तं श्रीधरस्वामिपाठापेक्षया श्लोकानां क्रमवैपरीत्यं वर्तते तदनुसारेणैव टीकास्ति ।

यदा वृश्चिकादिषु पञ्चसु वर्त्तते तदाऽहोरात्राणि विपर्ययाणि भवन्ति ॥ ५ ॥

यावद्दक्षिणायनमहानि वर्द्धन्ते यावदुदगयनं रात्रयः ॥ ६ ॥

एवं नव कोटय एकपञ्चाशल्लक्षाणि योजनानां मानसोत्तरगिरिपरिवर्त्तनस्योपदिशन्ति तस्मिन्नैन्द्रीं पुरीं पूर्वस्मान्मेरोर्देवधानीं नाम दक्षिणतो याम्यां संयमनीं नाम पश्चाद्वारुणीं निम्लोचनीं नाम उत्तरतः सौम्यां विभावरीं नाम तासूदयमध्याह्नास्तमयनिशीथानीति भूतानां प्रवृत्तिनिवृत्तिनिमित्तानि समयविशेषेण मेरोश्चतुर्दिशम् ॥ ७ ॥

तत्रत्यानां दिवसमध्यङ्गत एव सदादित्यस्तपति सव्येनाचलं दक्षिणेन करोति ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

कोटयुच्छ्रायः सत्यलोकः ततो यथा सम्भवं तमस्ततो गर्भोदकं ततोऽण्डकटाहः एवं सर्वदिक्षु तमः गर्भोदकञ्च परितो ज्ञेयं तत्परितोऽण्डकटाहः तमसः परिमाणं प्रागुक्तं गर्भोदककटाहमानम्

समस्तसागरमानस्तु गर्भोदस्तदनन्तरम्।
कोटियोजनमानस्तु कटाहः सर्व्यवस्थितः।

इत्यादिवचनाद्बोध्यं तथा कटाहादुपरि दशगुणोत्तराणि आवरणानीति संक्षेपः तत्र भुवर्लोकस्वर्गयोः स्थितिमाह। एतावानित्यध्यायत्रयेण सन्निवेशः संस्थानमेतावानेव पञ्चाशत्कोटियोजनपरिमितः ॥ १ ॥

निष्पूयते वाताद्विनेति निष्पावो द्विदलयुक्तोऽन्नविशेषः "निरभ्योः पूल्वोः" इति घञ् निष्पावस्यान्नविशेषत्वं मार्कण्डेयपुराणे प्रसिद्धम्।

व्रीहयश्च यवाश्चैव गोधूमाकङ्गुणास्तिलाः।
प्रियङ्गवः कोविदारः कोरदूषः सचीणकाः।
माषा मुद्गा मसूराश्च निष्पावाश्च कुलत्थकाः

इति एतदादीनां द्विदलयोर्मध्ये यथैकस्य माने वर्णिते अपरस्य मानं वर्णितं भवति तद्वत् ते अन्तरेण तयोर्मध्ये तत्ताभ्यामुभयतः सन्धितं नभम् ॥ २ ॥

तपनः सूर्यः स एव सूर्यः उदगयनादिसंज्ञाभिर्मान्द्यादिगतिभिः आरोहणादिस्थानेषु यथासवनं यथाकालमारोहणादिकमभिपद्यमानः मकरादिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते करोति ॥३॥

समानानि भवन्ति अत्यन्तवैषम्यरहितानि भवन्तीत्यर्थः एकमहोरात्रं तु समं भवति वृषभमिथुनयोरह्नां वृद्धिः कर्कटादिषु तु ह्रासस्तथापि अह्नां रात्रिभ्योऽधिकत्वाभिप्रायेण पञ्चसु वर्द्धन्ते इत्युक्तं रात्रिषु एकैकाघटिका मासि ह्रसतीति स्थूलदृष्ट्योक्तम्। प्रतिमासं वैषम्यात् ॥ ४ ॥

भाषाटीका।

श्रीशुकदेव जी बोले इतनी ही पृथिवी मण्डल की रचना प्रमाण लक्षण से कही गई है ॥ १ ॥

इतनेही से आकाश का प्रमाण भी उसके ज्ञाता लोग कहते हैं जैसे चनामादिकोंके दो दल बराबर होते हैं। उन दोनों के मध्यमें दोनों से मिलाहुआ अन्तरिक्ष लोक है ॥ २ ॥

जिन दोनोंके मध्यमें रहकर सब तेजवालों के पति भगवान् सूर्य अपने तेज से तीनों लोकों को तपाते हैं और अपने प्रकाश से सब को प्रकाशित करते हैं सो यही सूर्यदेव मन्द शीघ्र समान गतियों से उत्तरायण दक्षिणायन वैषुवत संज्ञाओं से ऊपर को जाना नीचे को आना बीचमें रहना इन क्रियों से यथा काल चलते हुये मकरादिक राशियों में अहोरात्रों को बडा छोटा मध्यम करते हैं ॥ ३ ॥

जब मेष और तुला राशिपर रहते हैं तब अहोरात्र बरोबर होते हैं जब वृषादि पांच राशियों में घूमते हैं तब दिन ही बढते हैं रातों में एक एक घडी कम होती जाती है ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

विपर्ययाणीति अहानि न्यूनानि रात्रयोऽधिका इत्यर्थः ॥ ५ ॥

तद्वृद्धिह्रासकालमाह। यावदिति ॥ ६ ॥

एवं मन्दादिगतिभिः नव कोटय इति मेरोरुभयतो मानसोत्तरस्यान्तर्विस्तारेण पञ्चदशलक्षाधिककोटित्रयपरिमितेनैवं परिमण्डलमानमुन्नेयमेवं पञ्चदशभिर्घटिकाभिरित्यादिष्वपि त्रैराशिकगणितेन तत्तन्मानमुन्नेयम्। अत्रापेक्षितो विशेषः पुराणान्तरादवगन्तव्यः। तत्रारोहणादिस्थानानि वायुपुराणे दर्शितानि।

सर्वग्रहाणां त्रीण्येव स्थानानि द्विजसत्तमाः।
स्थानं जरद्गवं मध्यं तथैरावतमुत्तरम् ॥
वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः।

इति तदेव मध्यमोत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथीत्रयेण त्रिधा भिद्यते त्रिभिस्त्रिभिरश्विन्यादिनक्षत्रैर्नागवीथी गजवीथी ऐरावती चेत्युत्तरमार्गे वीथी त्रयम् आर्षभी गोवीथी जरद्गवी चेति वैषुवते मध्यममार्गे वीथीत्रयम्। अजवीथी मृगवीथी वैश्वानरी चेति दक्षिणमार्गे वीथीत्रयं तदप्युक्तं तत्रैव।

अश्विनी कृत्तिका याम्या नागवीथीति शब्दिता।
रोहिण्यार्द्रा मृगशिरो गजवीथ्यभिधीयते ॥
पुष्याश्लेषा तथादित्या वीथी चैरावती स्मृता।
एतास्तु वीथयस्तिस्र उत्तरो मार्ग उच्यते ॥
तथा द्वे चापि फाल्गुन्यौ मघा चैवार्षभी मता।
हस्तश्चित्रा तथा स्वाती गोवीथीति तु शब्दिता।
ज्येष्ठा विशाखानुराधा वीथी जारद्गवी मता।
एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मूलाषाढोत्तराषाढा अजवीथ्यभिशब्दिता ।
श्रवणं च धनिष्ठा च मार्गी शतभिषस्तथा ॥
वैश्वानरी भाद्रपदे रेवती चैव कीर्तिता ।
एतास्तु वीथयस्तिस्रो दक्षिणो मार्ग उच्यते ॥

इति याम्या भरणी आदित्या अदितिदेवताका पुनर्वसुः मार्गी मृगवीथी एवं स्थिते उत्तरायणे ध्रुवेण युगाक्षकोटिनिबद्धवायुपाशद्वयाकर्षणे रथस्यारोहणं तदाऽभ्यन्तरमण्डलप्रवेशो गतिमान्द्यं चेति दिनवृद्धी रात्रिह्रासश्च दक्षिणायने च पाशप्रेरणादवरोहणे बहिर्मण्डलप्रवेशो गतिशैघ्र्यं चेत्यहोरात्रयोर्विपर्ययः वैषुवते तु पाशसाम्यात्समावस्थाने मध्यमण्डलप्रवेशो गतिसाम्यञ्चेत्यहोरात्रयोः साम्यमिति तथाच पुराणान्तरम् ।

आकृष्येते यदा तौ तु ध्रुवेण समधिष्ठितौ ।
तदाऽभ्यन्तरतः सूर्यो भ्रमते मण्डलानि तु ॥
ध्रुवेण मुच्यमानेन पुना रश्मियुगेन तु ।
तथैव बाह्यतः सूर्यो भ्रमते मण्डलानि च ॥

इति तदेतदुक्तम् । यदा मेषतुलयोरित्यादिना । उदयास्तादिकं वक्तुमाह । तस्मिन्मानसोत्तरे मेरोः पूर्वेण ऐन्द्रीं पुरीमुपदिशन्तीत्यनुषङ्गः तासु पुरीषूदयादीन्युपदिशन्ति चतुर्दिशमित्युक्तेः ये मेरोर्दक्षिणे देशे तेषामैन्द्रीमारभ्य पूर्वोदयः ये पश्चिमे तेषां याम्यामारभ्य ये उत्तरे तेषां वारुणीमारभ्य ये पूर्वे तेषां सौम्यामारभ्य ॥ ७ ॥

तत्रत्यानां मेरुस्थानाम् । सव्येनेति । नक्षत्राभिमुखतया स्वगत्या मेरुं वामतः कुर्वन्नपि प्रदक्षिणावर्तप्रवहाख्यवायुभ्राम्यमाणज्योतिश्चक्रवशात्प्रत्यहं दक्षिणतः करोति अतश्चक्रगतिवशादतिदूरतो भूसंलग्नस्येव दर्शनमुदयः आकाशमारूढस्येव दर्शनं मध्याह्नः भूमिं प्रविष्टस्येव दर्शनमस्तमयः ततोऽतीव दूरगमने निशीथ इति समुद्रनीरस्थदृष्ट्या च"अद्भ्यो वा एष प्रातरुदेत्यपः सायं प्रविशति"इति श्रुतिव्यवहारो न वस्तुतः तदुक्तं वैष्णवे ।

उदयास्तमये चैव सर्वकालं तु संमुखे ।
दिशास्वशेषासु तथा मैत्रेय ! विदिशासु च ॥
यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः ।
तिरोभावं च यत्रैति तत्रैवास्तमनं रवेः ॥
नैवास्तमनमर्कस्य नोदयः सर्वदा स्मृतः ।
उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः ॥
शक्रादीनां पुरे तिष्ठन् स्पृशत्येष पुरत्रयम् ।
विकोणौ द्वौ विकोणस्थस्त्रीन् कोणान् द्वे पुरे तथा ॥

इति मत एव तत्रैवोक्तम् ।

तस्माद्दिश्युत्तरस्यां वै दिवारात्रिः सदैव हि ।
सर्वेषां द्वीपवर्षाणां मेरोरुत्तरतः स्थितिः ॥

इति यतो यत्र यः पश्यति सैव तस्य प्राची तस्य च वामतो मेरुस्तिष्ठतीति ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यद्यपि वृषभमिथुनयोरेवाह्नां वृद्धिः कर्कटादिषु ह्रासस्तथापि राज्यपेक्षयाधिकत्वाद्वर्द्धन्त इत्युक्तं ह्रसति चेति मासि मासि रात्रिषु एकैका घटिका ह्रसति चाहस्सु एकैका घटिका वर्द्धते चेत्यर्थः वृश्चिकधनुर्मकरकुम्भराशिषु पञ्चसु वर्तते चरति तदाहोरात्राणि विपर्ययाणि रात्रयो वर्द्धन्तेऽहानि ह्रसन्तीत्यर्थः पूर्ववद्दिनापेक्षयात्र ह्रासो बोध्यः अत्राप्येकैका घटिका रात्रिषु वर्द्धतेऽहस्सु ह्रसतीत्यवगन्तव्यमिदं च स्थूलदृष्ट्योक्तं वृद्धिह्रासयोः प्रतिमासवैषम्यादथ नात्त्विकं वृद्धिह्रासमाह । यावदिति । दक्षिणायनपर्यन्तमहानि वर्द्धन्ते रात्रयो ह्रसन्ति तत उत्तरायणपर्यन्तमहानि ह्रसन्ति रात्रयो वर्द्धन्त इत्यर्थः एतदेव प्रपञ्चितं श्रीवैष्णवे ।

अयनस्योत्तरस्यादौ मकरं याति भास्करः ।
ततः कुम्भं च मीनं च राशिराश्यन्तरं द्विज ! ॥
त्रिष्वेतेषु च भुक्तेषु ततो वैषुवती गतिः ।
प्रयाति सविता कुर्वन्नहोरात्रं ततः समम् ॥
ततो रात्रिः क्षयं याति वर्द्धतेऽनुदिनं दिनम् ।
ततश्च मिथुनस्यान्ते परां काष्ठामुपागतः ॥
राशिकर्कटकं प्राप्य कुरुते दक्षिणायनम् ।
कुलालचक्रपर्यन्तो यथा शीघ्रं प्रवर्त्तते ॥
अनिवेगितया कालं वायुवेगगतश्चरन् ।
तस्मात् प्रकृष्टां भूमिं तु कालेनाल्पेन गच्छति ॥
सूर्यो द्वादशभिः शैघ्र्यान्मुहूर्तैर्दक्षिणायने ।
त्रयोदशार्द्धमृक्षाणां ह्यह्नमाचरते द्विज ! ॥
मुहूर्तैस्तावदृक्षाणि नक्तमष्टादशैश्चरन् ।
कुलालचक्रमध्यस्थो यथा मन्दं प्रवर्त्तते ॥
तथोदगयने सूर्यः सर्पते मन्दविक्रमः ।
तस्माद्दीर्घेण कालेन भूमिमल्पां च गच्छति ॥
अष्टादशमुहूर्तं तु उत्तरायणपश्चिमम् ।
अहो भवति तत्रापि चरते मन्दविक्रमः ॥
त्रयोदशार्द्धमह्नां वै ऋक्षाणां चरते रविः ।
मुहूर्तैस्तावदृक्षाणि रात्रौ द्वादशभिश्चरन् ॥
अतो मन्दतरं नाभ्यां चक्रं भ्रमति वै यथा ।
कुलालचक्रनाभिस्तु यथा तत्रैव वर्तते ॥
ध्रुवस्तथा हि मैत्रेय ! तत्रैव परिवर्तते ।
उभयोः काष्ठयोर्मध्ये भ्रमते मण्डलानि तु ॥
दिवा नक्तं च सूर्यस्य मन्दा शीघ्रा च वै गतिः ।
एवं प्रमाणमेवैष मार्गं याति दिवाकरः ॥
अहोरात्रेण यो भुङ्क्ते समस्ता राशयो द्विज ! ।
षडेव राशीन् यो भुङ्क्ते रात्रावन्यांश्च षड्दिवा ॥
राशिप्रमाणजनिता दीर्घह्रस्वात्मता ततः ।
तथा निशायां राशीनां प्रमाणैर्लघुदीर्घता ॥
दिनान्ते दीर्घह्रस्वत्वं तद्भागेनैव जायते ।
उत्तरे प्रक्रमे शीघ्रा निशि मन्दा गतिर्दिवा ॥
दक्षिणे त्वयने सैव विपरीता विवस्वतः ।

इति यदा मेषतुलयोर्वर्तते तदाहोरात्राणि समानानि भवन्ति इत्यनेन उत्तरायणे मेषमासे साम्यमहोरात्रस्य दक्षिणायने तुलामासे साम्यमित्युक्तमेतदेव श्रीवैष्णवेऽप्युक्तम् । "तुलामेषगते भानौ समं रात्रिदिनं तु तत्" इति । एवं सूर्यस्य मन्दादिगतिभिरहोरात्रपरिमाणविभाग उक्तः अथाहोरात्रविभागात्परिमाणविभागाद्यर्थम् मानसोत्तरे मेरुं परिभ्रमता सूर्येण

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कति योजनानि परिभ्रमितानि भवन्तीत्यपेक्षायामाह । एवमिति । एवं मन्दादिगतिभिर्मानसोत्तरगिरिपरिवर्त्तमानस्य मानसोत्तरे मेरुं परिवर्तमानस्य योजनानां तेन परिभ्राम्यमाणानां योजनानां नवकोटयः एकपञ्चाशल्लक्षाणि चेत्युपदिशन्ति इत्यर्थः अथोदयास्तमयादिस्वरूपं विवक्षुस्तदुपोद्घातं प्रपञ्चयति । तस्मिन्नित्यादिना विभावरीनामेत्यन्तेन । तस्मिन्मानसोत्तरगिरौ पूर्वस्मात्पूर्वस्मिन् दिशि देवधानीं नाम पुरीं दक्षिणादिशि नाम्ना संयमनीं पुरीं पश्चिमे वारुणीं नाम वरुणाधिष्ठितां निम्लोचनीं नाम उत्तरतः सौम्यां सोमाधिष्ठितां विभावरीं नाम पुरीमुपदिशन्तीति पूर्वेणान्वयः । ऐन्द्रीमिति । इन्द्राधिष्ठितामिन्द्रेण रक्ष्यमाणामित्यर्थः तथा याम्यामिति यमेन पाल्यमानामिति ज्ञेयम् अथोदयादिकमाह । तास्विति । तासु देवधान्यादिचतसृषु पुरीषु मेरोश्चतुर्दिशं चतुर्दिक्षु समयविशेषेण कालविशेषेण भूतानां भूमण्डलस्थानां प्रवृत्तिनिवृत्तिनिमित्तानि व्यापारतदभावनिमित्तानि उदयादीनि भवन्ति तत्रास्तमयान्तानि प्रवृत्तिनिमित्तानि उदयादीनि प्रवृत्तिनिमित्तानि निशीथादीनि निवृत्तनिमित्तानि तदा भूतानां सुप्तत्वादिति विवेकः आदिशब्दात्पूर्वोत्तरराशयो गा विवक्षिताः मेरोश्चतुर्दिशमित्यस्यायं भावः यानि मेरोर्दक्षिणतः भूतानि तेषामैन्द्रीमारभ्य पूर्वादयो दिशस्तु क्रमेण उदयाद्ययश्चत्वारो भवन्ति यानि पश्चिमतः तेषां याम्यामारभ्य याम्युत्तरतस्तेषां वारुणीमारभ्य यानि पूर्वतस्तेषां सौम्यामारभ्येति ज्ञेयमिति मेरौ स्थितानां तु नोदयादिकमस्तीत्याह । तत्रत्यानामिति । तत्रत्यानां मेरौ स्थितानां भूतानामादित्यः दिवसमध्यं गतः एव मध्याह्नगत एव सदा विद्यमानः व्यापारयन् तपति प्रकाशते किञ्च सर्वेषां द्वीपवर्षाणां मेरुमुत्तरं करोतीत्याह । सव्येनेति । आदित्यं पश्यतां सव्येन स्थितं मेरुमारभ्य स्वदक्षिणभागे स्थितं करोतीत्यर्थः यत्र यः पश्यत्यादित्यं मेव तत्र प्राची तस्य च वामतो मेरुस्तिष्ठतीति भावः समयविशेषेणेत्यस्यायमभिप्रायः "उदयास्तमने चैव सर्वकालं तु सम्मुखे । दिशास्वशेषासु तथा मैत्रेय ! विदिशासु च । यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः । तिरोभावं च यत्रैति तत्रैवास्तमनं रवेः । नैवास्तमनमर्कस्य नोदयः सर्वदा स्मृतः । उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः । शक्रादीनां पुरे तिष्ठन् स्पृशत्येष पुरत्रयम् । विकोणौ द्वौ विकोणस्थस्त्रीन् कोणात् द्वे पुरे तथा" । इति विष्णुपुराणोक्तरीत्या दक्षिणावर्तप्रवहाख्यवायुना भ्रममाणज्योतिश्चक्रवशादतिदूरतो भूसंलग्नस्येव कालविशेषे दर्शनमुदय आकाशमारूढस्येव दर्शनं मध्याह्नः भूमिप्रविष्टस्येव दर्शनमस्तमयः ततोऽतिदूरगमने निशीथ इति कालविशेषकृता विभावादिकमेवोदयादिकमिति एवम् "अद्भुतो वा एष प्रातरुदेति अपः सायं प्रविशति" इति श्रीतश्रयवहारोऽपि समुद्रतीरस्थदृष्टिकृतः मानसोत्तरे भ्रमतो रवेरप्सु प्रवेशासम्भवादिति भावः ॥ ५-८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतदेव विविच्य दर्शयति । यदेति । वृषभादिकन्यान्तेषु वृद्धिश्च ह्रासश्च भवतः तौ कियन्ताविति तत्राह । मासीति वर्द्धते ह्रसतीति शेषः अत्र वृद्धिह्रासयोरेकैका घटिकेति नियमो नास्ति त्रिचतुरादिवृद्धिदर्शनात्तर्हि मुहूर्तानामपि वृद्धि-ह्रासौ स्याताम् इति नेत्याह । तुल्यं दिवसमिति । त्रिंशन्मुहूर्तमेव दिवसमाहुरित्यर्थः कथं तुल्यतेति तत्राह । वर्द्धमानानीति । वर्द्धमानान्यहानि भवन्ति तावतीस्तावत्यो वर्द्धमाना रात्रयश्च संचीयमाणाः ह्रसन्त्यश्च यास्ताः समुद्धृत्य घटिकाभिरेकीकृत्य त्रिंशन्मुहूर्तान्यहोरात्राणि समानानि भवन्ति वृश्चिकादिषु मीनान्तेषु अहोरात्राणि विपरीतानि अहानि ह्रसन्ति रात्रयो वर्द्धन्ते ॥ ५ ॥

मकरादिषु वृश्चिकादिषु मेषतुलयोरित्येतेषु कथितं सङ्ख्याह । यावदिति । अथवा आवहप्रवहोद्वहसम्वहविवहपरावहपरिवहनामानः सप्त वायवो ज्योतिश्चक्रस्य प्रवर्तकास्तत्र ज्योतिश्चक्राभिपत्यादित्यगमनस्य तिस्रो वीथ्यो मध्यमोत्तरा दक्षिणा च तदुक्तम्

> सर्वग्रहाणां त्रीण्येव स्थानानि द्विजसत्तमाः ! ।
> स्थानं जारद्गवं मध्यं तथैरावतमुत्तरम् ।
> वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः ॥

इति तच्च वीथीत्रयमेकैकं त्रिधाभिपद्यते अश्विन्यादिनक्षत्राणां त्रिभिस्त्रिभिर्नक्षत्रैर्नागवीथी गजवीथ्यैरावतीवीथीत्युत्तरमार्गे वीथीत्रयम् आर्षभी गोवीथी जारद्गवी चेति वैषुवे मध्यमार्गे वीथीत्रयं अजवीथी मृगवीथी वैश्वानरी चेति दक्षिणमार्गे वीथीत्रयम् एतद्वायुपुराणे कथितम्

> अश्विनी कृत्तिका याम्या नागवीथी तु शब्दिता ।
> रोहिण्यार्द्रा मृगशिरो गजवीथ्यभिधीयते ॥
> पुष्याश्लेषा तथादित्या वीथी चैरावती मता ।
> एतास्तु वीथयस्तिस्र उत्तरो मार्ग उच्यते ॥
> तथा द्वे चापि फाल्गुन्यौ मघा चैवार्षभी मता ।
> हस्तश्चित्रे तथा स्वाती गोवीथीति तु शब्दिता ॥
> ज्येष्ठा विशाखानुराधा वीथी जारद्गवी मता ।
> एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥

याम्या भरणी आदित्या अदितिदेवताका पुनर्वसुः मार्गी मृगवीथी तत्र च युगाक्षकोटिसम्बद्धवायुपाशद्वयस्य ध्रुवेणाकर्षणे यदा तदाऽभ्यन्तरमण्डलगमनाय रथनीडस्यारोहणं वायुपाशशैथिल्ये च बहिर्मण्डलगमनार्थमवरोहणम् ।

> आकृष्येते यदा तौ तु ध्रुवेण समधिष्ठितौ ।
> तदाऽभ्यन्तरतः सूर्यो भ्रमते मण्डलानि तु ॥
> ध्रुवेण मुच्यमानेन पुना रश्मियुगेन तु ।
> तथैव बाह्यतः सूर्यो भ्रमते मण्डलानि च ॥

इति तत्र बाह्यवीथ्यां गतस्य शीघ्रगतित्वाद्दिनह्रासो रात्रिवृद्धिश्च अभ्यन्तरवीथ्यां गतस्य मन्दगतित्वाद्रात्रिक्षयो दिनवृद्धिश्च मध्यवीथ्यां गतस्य समानगतित्वादहोरात्रसाम्यमित्यादिविशेषस्तु कालविशेषवेदिभिरवगम्यत इति तदधिकारित्वादस्माभिरत्र यत्नो न क्रियत इति ॥ ६ ॥

इदानीमेकाहोरात्रगन्तव्यमार्गसङ्ख्यामाह । एवमिति । एवं त्रिविधगतिभिः त्रिविधराशिषु वर्तमानस्यादित्यस्य रथचक्रस्यैकस्मिन्नहोरात्रे मानसोत्तरशिखरे यत्परिवर्तमानं परितो भ्रमणं तस्य मार्गमेकपञ्चाशल्लक्षाधिकनवकोटय इति व्यपदिशन्ति तन्मार्गज्ञा इति शेषः तस्मिन्मानसोत्तरपर्वते पूर्वस्मान्मेरोः पूर्वदिक्सूत्रनिपाते दक्षिणत आदिष्वेवं सौम्या सोमस्य

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विद्यमाना यासु पुरीषु सत्पुरद्वारेष्वादित्यस्य यानि गमनान्युदयादि संज्ञानि स्युः समयविशेषेण सङ्केतविशेषेण न हि सर्वदा सर्वतः उदयादिकमस्ति मेरोश्चतुर्दिशि स्थितानां भूतानां प्रवृत्तिनिवृत्तिनिमित्तानि तत्रोदयमध्याह्न प्रवृत्तिनिमित्ते अस्तङ्गमनमीषन्निवृत्तिनिमित्तम निशीथगतिरहा संचरमाणानां सम्यङ् निवृत्तिनिमित्तमूना निशीथमर्द्धरात्रम् ॥ ७ ॥

तत्रत्यानामिलावृतखण्डनिवासिनां सव्येनाचलमचलस्य मेरुनाम्नो वामपार्श्वतो गच्छन्नचलं दक्षिणेन स्वस्य दक्षिणतः सर्वदा करोति "सर्वेषां द्वीपवर्षाणां मेरुरुत्तरतः स्थित" इति न्यायेन सर्वदिङ्मुखस्यापि मेरोः पूर्वाभिमुखत्वात् सर्वत्र गच्छन् सव्येनैव गच्छत्यादित्य इत्यर्थः गतिघटनोपरि वक्ष्यते च ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एकपञ्चाशल्लक्षाणि चेति विचार्यम् । मण्डलत्रैगुण्येन पञ्चचत्वारिंशल्लक्षाधिकत्वमेव स्यात् किन्तु मूलमते मानसोत्तरः पुष्करद्वीपार्द्धमतिक्रम्य लक्षद्वययोजनोपरि स्यात् । टीकायां वायुपुराणमतेन वीथीगणना न तु नक्षत्राणामवस्थितिक्रमेण तेषामन्यत्रान्यत्र दृश्यमानत्वात् । न च भोगक्रमेण । तथा च सति आरोहावरोहाभ्यां रेवत्यश्विन्योरव्यवहितवीथ्योर्व्यवहितवीथ्योश्चित्राश्विन्योश्चैकस्यामेव वीथ्यां गणना स्यात् । ततस्तेषां नक्षत्राणां तत्र तत्र सम्बन्धः केनचित् प्रकारान्तरेणैव स्यात् । तच्च तासां तत्तद्वीथ्यधिष्ठातृदेवतात्वेनैवेति ज्ञेयम् । तथा टीकायामेव तदाभ्यन्तरमण्डलत्रयेणो गतिमान्द्यञ्चेति । अन्तर्मण्डलस्य स्वल्पभूमित्वात् परिवर्त्तस्य बहुशोऽपि सूर्यादिदृष्टिविषयो भवति । मेढिसान्निकृष्टवृषभवद्गतेश्च मान्द्यं भवतीत्यर्थः । मण्डलश्चेदमेवमूर्द्धोपर्येव गच्छति । उत्तरायणमध्याह्ने मूर्द्धन्येव सूर्यो दृश्यते इति । एवं बहिर्मण्डलस्य बहुभूमित्वाद्दूरमारभ्य परिवर्त्तस्य स्वल्पांश एव सूर्यादिर्दृश्यते । मेढिविप्रकृष्टवृषभवद्गतेश्च शैघ्र्यं भवतीत्यर्थः ॥ ७ ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विपर्ययाणीति । अहानि न्यूनानि रात्रयोऽधिका इत्यर्थः ॥ ५ ॥

यावद्दक्षिणायनमिति । उत्तरायणाद्दक्षिणायनपर्यन्तमित्यर्थः एवमग्रेऽपि ॥ ६ ॥

नवकोटय इति । मेरोरुभयतो मानसोत्तरपर्यन्तविस्तारो यस्तस्य परिमाणं पञ्चदशलक्षाधिककोटित्रयं सूर्यरथवर्त्मनश्च लक्षद्वयमित्येवं सप्तदशलक्षोत्तरकोटित्रयेण त्रिगुणीकृतेनैतत्परिमण्डलमानमुन्नेयं मेरोः पूर्वस्मात् पूर्वस्यां दिशि यन्मानसोत्तरं तस्मिन्नैन्द्रीं पुरीमुपदिशन्तीत्यनुषङ्गः तासु पुरीषूदयादीन्युपदिशन्ति । चतुर्दिशमित्युक्तेर्ये मेरोर्दक्षिणे देशे वर्त्तेरन् तेषामैन्द्रीमारभ्य पूर्वादयः ये पश्चिमे तेषां याम्यामारभ्य ये उत्तरे तेषां वारुणीमारभ्य ये पूर्वे तेषां सौम्यामारभ्य अत एव "सर्वेषां द्वीपवर्षाणां मेरुरुत्तरतः स्थित" इति वैष्णवोक्तिः ॥ ७ ॥

तत्रत्यानां मेरुस्थानां सव्येनेति नक्षत्राभिमुखतया स्वगत्या मेरुं वामतः प्रकुर्वन्नपि प्रदक्षिणावर्त्तप्रवर्त्तकप्रवहाख्यवायुना भ्राम्यमाणज्योतिश्चक्रवशात् प्रत्यहं दक्षिणतः करोति । अतश्चक्रगतिवशाददूरतः भूमिलग्नस्येव दर्शनमुदयः आकाशमध्यमारूढस्येव दर्शनं मध्याह्नः भूमिप्रविष्टस्येवादर्शनमस्तमयः । ततोऽतिविदूरगमने निशीथ इति अत एव समुद्रतीरस्थदृष्ट्या च "अद्भ्यो वा एष प्रातरुदेत्यपः सायं प्रविशति" इति श्रुतिरपि व्यवहारतो न तु वस्तुतः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विपर्ययाणीति रात्रयो वर्द्धन्ते अहःसु एकैका घटिका ह्रसति अत्रापि रात्रीणां वृद्धिः मासि मासि घटिका ह्रासश्च पूर्ववदेव ॥ ५ ॥ ६ ॥

एवं मन्दादिगतिभिः मानसोत्तरगिरिपरिवर्त्तनस्य नव कोटयः एकपञ्चाशल्लक्षाणि चेत्युपदिशन्ति तस्मिन्मानसोत्तरे मेरोः पूर्वतः ऐन्द्रीं देवधानीं नामोपदिशन्तीत्यनुषङ्ग मेरोश्चतुर्दिशं तासु पुरीषु समयविशेषेण कार्य्यप्रवृत्तिनिवृत्तिकालभेदेन भूतानां कार्यप्रवृत्तिनिवृत्त्योः निमित्तानि उदयादीन्युपदिशन्ति चतुर्दिशमित्यनेन मेरोर्दक्षिणादिदेशस्थानामैन्द्र्यादिषु क्रमेणोदयादीनि स्युरित्युक्तम् । यथोक्तं श्रीविष्णुपुराणे ।

> यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः ।
> तिरोभावं च यत्रैति तत्रैवास्तमनं रवेः ।

इति ॥ ७ ॥

मेरुस्थानां तूदयादिकं नेत्याह । तत्रत्यानामिति । सव्येनाचलं दक्षिणेन करोतीति नक्षत्राणामभिमुखतया स्वगत्या मेरुं सव्येन कुर्वन्नपि प्रदक्षिणावर्त्तप्रवहाख्यवायुप्रचालितज्योतिश्चक्रगतिवशाद्दक्षिणेन करोति दक्षिणतः करोति ॥ ८ ॥

भाषा टीका ।

जब वृश्चिकादि पांच राशियों मे रहते हैं सूर्य तब रातादिन बढने घटने मे विपरीत होजाते हैं ॥ ५ ॥

जब तक दक्षिणायन होता है तबतक दिन बढते हैं जब तक उत्तरायण होता है तबतक रात्री बढती हैं ॥ ६ ॥

इस प्रकार से एक कोटि एक पंचाशल्लक्षयोजन मानसोत्तर पर्वत का परिमाण कहते हैं तिस मानस पर्वत में मेरु से पूर्व देवधानी नामक इन्द्र की पुरी है दक्षिण में संयमनी नामक यम की पुरी है पश्चिम में निम्लोचनी नाम की वरुण की पुरी है उत्तर में विभावरी नाम की कुवेर की पुरी है उन पुरियों में सूर्य का उदय मध्यान्ह अस्त अर्धरात्र क्रमसे समय विशेष से मेरू के चारो दिशों में होते हैं जिनसे कि सब प्राणियों की प्रवृत्ति औनिवृत्ती होती हैं ॥ ७ ॥

मेरुमे रहनेवालों को मध्य दिनहीमें सदा सूर्य प्रकाशित होते हैं बाये तरफके मेरु को भी सूर्य दाहिने तरफ करते हैं ॥ ८ ॥

यत्रोदेति तस्य ह समानसूत्रनिपाते निम्लोचति यत्र क्वचन स्यन्देनाभितपति तस्य हैष समानसूत्रनिपाते प्रस्वापयति तत्र गतं न पश्यन्ति ये तं समनुपश्येरन् ॥ ९ ॥

यदा चैन्द्र्याः पुर्याः प्रचलते पञ्चदशघटिकाभिर्याम्यां सपादकोटिद्वयं योजनानां सार्द्धद्वादशलक्षाणि साधिकानि चोपयाति ॥ १० ॥

एवं ततो वारुणीं सौम्यामैन्द्रीं च पुनस्तथाऽन्ये च ग्रहाः सोमादयो नक्षत्रैः सह ज्योतिश्चक्रे समभ्युद्यन्ति सह वा निम्लोचन्ति ॥ ११ ॥

एवं मुहूर्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानि सौरो रथस्त्रयीमयोऽसौ चतसृषु परिवर्तते पुरीषु ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

यथोक्तमुदयास्तमनादिनियमं दर्शयति। यत्रोदेतीत्यादिना। स्यन्देन स्वेदोद्गमेन। प्रस्वापयति निशीथं करोति। ये तं समनुपश्येरन् प्रस्वापसमानसूत्रस्थाः ॥ ९ ॥

साधिकानि पञ्चविंशतिसहस्राधिकानि ॥ १० ॥

सह वा सहैव यद्यपि वस्तुतः सूर्यस्यापि नक्षत्रैः सहैवोदयास्तमयौ तथापि तस्य तत्साहित्यादर्शनात्सोमादीनामेव तत्साहित्यमुक्तम् ॥ ११ ॥

त्रयीमय इत्याद्युपासनार्थम् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

यथोक्तमस्योदयास्तमनादेर्नियमं दर्शयति। यत्रोदेतीत्यादिना। यत्र ऐन्द्र्यादिपुरे उदेति उदयं प्राप्नोति दृष्टो भवतीति यावत् तस्य उदयस्थानस्य समानसूत्रनिपाते वारुण्यां निम्लोचत्यस्तं गच्छति न तिर्यग्दर्शनं प्राप्नोतीत्यर्थः यत्र हि याम्यादौ पुरि स्यन्देनाभितपति स्वेदोद्गमेनाभितपति मध्याह्नस्थितो भवतीति यावदेष भगवान् सूर्यस्तस्य समानसूत्रनिपाते न्यूनाधिकदेशे सौम्यादौ पुरे स्थितो प्रस्वापयति याम्यदिक्स्थितानामर्द्धरात्रं करोतीत्यर्थः ये याम्यदिशि स्थिताः अस्तं गतं सूर्यमनुपश्येरन् ते तत्र गतं सौम्यदिग्गतं न पश्यन्ति एवं याम्यादिषु पुरीषु उदयादिनियमो द्रष्टव्यः ॥ ९ ॥

एवमुदयादिदेशनियम उक्तः अथेन्द्रादिपुर्याः याम्यादिपुरीं कियता कालेन कति योजनानि गच्छतीत्यपेक्षायामाह। यदेति। यदा ऐन्द्र्यादिपुर्याः प्रचलति निष्क्रान्तो भवति तदा पञ्चदशघटिकात्मकेन कालेन त्रैराशिकगणितेन योजनानां सार्द्धद्वादशलक्षाणि साधिकानि पञ्चविंशतिसहस्राधिकानि सपादकोटिद्वयं पञ्चविंशतिलक्षाधिककोटिद्वयं चातिक्रम्येति शेषः याम्यां पुरीमुपयाति ॥ १० ॥

एवं ततो याम्यायाः प्रचलति एवमुक्तकालेन उक्तयोजनानि वारुणीं पुरीं गच्छति एवमुत्तरत्रापि योज्यमेवं सूर्यस्योदयास्तमयादिस्वरूपं तद्देशनियमं कालपरिमाणं योजनपरिमाणं चाभिधायाथ सोमादीनामपि ग्रहाणामभ्युदयादिकमाह। तथेति। ज्योतिश्चक्रेण तारागणेन सह वर्त्तमाना अन्ये सोमादयो ग्रहा अपि नक्षत्रैरश्विन्यादिभिः सह तथा सूर्यवदिन्द्रादिपुरीषु गमनं प्रत्यभ्युद्यन्ति उद्गच्छन्ति उदयं प्राप्नुवन्ति सहैव निम्लोचन्त्यस्तं प्राप्नुवन्तीत्यर्थः यद्यपि वस्तुतः सूर्यस्यापि नक्षत्रैः सहैव उदयास्तमयौ तथापि तत्साहित्यादर्शनात्सोमादीनामेव तत्साहित्यमुक्तमिति भावः ॥ ११ ॥

पञ्चदशघटिकाभिः सपादकोटिद्वयं साधिकानि सार्द्धद्वादशलक्षाणि योजनानि गच्छतीत्युक्तं तत्रैकेन मुहूर्तेन कति योजनानि गच्छतीत्यपेक्षायामाह। एवमिति। त्रयीमय इत्युपासनार्थमुक्तं वेदरूपेणोपास्यः सौरो रथ एकमुहूर्तेनाष्टशताधिकचतुस्त्रिंशल्लक्षयोजनानि चतसृषु देवधान्यादिषु पुरीषु परिभ्रमते कोऽसौ सौरो रथः एकेन मुहूर्तेन यः परिभ्रमते तत्राह। यस्येति। यस्य सौररथस्यैकं चक्रं सम्वत्सरात्मकं समामनन्त्युपासते चक्रं विशिनष्टि। द्वादशारं द्वादश मासा अरा यस्य षडृतवो नेमयो यस्य त्रीणि चातुर्मास्यानि नाभयो यस्य इदमप्युपासनार्थमेवोक्तं मासाद्यादिरूपेण सम्वत्सरात्मरूपेण चोपास्यमानमित्यर्थः सौरो रथः परिवर्त्तत इत्युक्तं स किं निरवलम्ब एव एष भ्रमतीत्यत्र विशिनष्टि। यस्येति। यस्य रथस्याक्षो मेरोर्मूर्ध्नि कृतमूलः अक्षशब्दोऽत्रोपचारात्तत्स्थितायां धुरि वर्तते एवं द्वितीयोऽक्ष इत्यत्रापि यत्र रथो मानसोत्तरे कृतोत्तरभागः मानसोत्तरगिरौ लक्षार्द्धोपरि वायुबद्धभूमौ कृतोत्तरभागः वायुना निबद्धोत्तरभागः अन्यथायुतार्द्धमात्रोच्छ्रायत्वान्मानसोत्तरगिरेर्मेरोश्चतुरशीतियोजनोच्छ्रायत्वादतस्तस्य साम्यानुपपत्तेः कोऽसावितरभागः यो मानसोत्तरे कृतमूलः तत्राह। यत्रेति। यत्र इतरभागे प्रोतं सद्रविरथचक्रं तैलयन्त्रवन्मानसोत्तरगिरौ परितो भ्रमति ॥ १२ ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

यत्रोदेति। तत्समानसूत्रनिपाते पश्चिमभागे निम्लोचति दक्षिणायने किञ्चित्किञ्चिद्दक्षिणभागोदये सति किञ्चित्किञ्चिद्दक्षिणभागे पश्चिमे निम्लोचति एवमुत्तरायणे किञ्चित्किञ्चिदुत्तरतः उदयनिम्लोचौ याति एवमुद्यदादित्य उदयप्रदेशस्थस्तत्र निपातं विहाय यत्र क्वापि न दृश्यते न चलति

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तस्योदयस्थस्य समानसूत्रनिपाते विभावरीपुरि द्वारि स्थितोऽ
स्यजनान् प्रस्वापयति निद्रितान् करोति उद्धतशृङ्गच्छायापि-
हितं तत्र विभावर्यां गतं न पश्यन्ति जना इति शेषः ॥ ९ ॥

सार्धद्वादशलक्षाणि साधिकानीति । पञ्चविंशतिसहस्रा-
धिकानि सार्धद्वादशलक्षाणीत्यर्थः ॥ १०-११ ॥

देवधान्या निर्गत्य संयमनीं प्रवेक्ष्यन् पञ्चदशघटिकाभिः
कालावयवैः पादोनाष्टत्रिंशल्लक्षोत्तरकोटिद्वयमतिक्रम्य प्रविशति
तपनः एवं चतुर्गुणितान्येतानि योजनानि सैकपञ्चाशल्लक्ष-
नवकोटिसङ्ख्यानीति सर्वात्मना ज्ञातव्यम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यत्रेति । यद्दीर्ध्वभोगतदेश इत्यर्थः ॥ ९—११ ॥

मुहूर्त्तेन चतुस्त्रिंशदिति मानसोत्तरमानं तत्वन्यत्र एवं पूर्वत्र
च तु ज्योतिःशास्त्ररीत्या तत्तद्देशे रव्युदयक्रमविचारेण रवि-
परिक्रमणीय मण्डलमिदं स्वल्पमेव प्रतीयते तत् खलु चलता
विदूरस्य स्वल्पस्यापि वृक्षादेः समसूत्रता बहुलदेशेन नैव त्यक्तुं
शक्यते तथातिदूरं व्योमगतेनापि रविणा स्वल्पभूमिसमसूत्र-
तेति रविचलतस्य स्वल्पत्वव्यवहाराच्च विरुद्धं न च दृष्टिभ्रम-
मात्रमिदं छायापि दृश्यमानतद्गतिमान्द्यमनुकरोति इति ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

उदयास्तमयमध्याह्ननिशीथानां वर्षभेदेन व्यवस्थामाह
यत्रेति । "यत्र यत्र दृश्यते साक्षात् स तेषामुदयः स्मृत" इति वैष्णवो-
क्तेः सूर्यस्य प्रथमदर्शनमेवोदयः निम्लोचस्तत्र गच्छति उदयान-
न्तरं त्रिंशद्घटिकान्ते स्यन्देन आकाशमध्यस्थः सन् प्रस्वेदो-
द्गमेन तस्य देशस्य समानसूत्रपातविषयीभूते देशे त्रिंशद्घ-
टिकानन्तरं गतः सन्निति शेषः । प्रस्वापयति निशीथं करोति
ये अस्तमुदयञ्च अनुपश्येरंस्ते जनास्तत्र गतं सूर्यं न पश्यन्त्यत
एव स्वपन्ति तेन च मेरोर्दिक्चतुष्टये स्थितेषु मध्ये यदा यत्र
सूर्यस्योदयो दृश्यते तदैव तस्मात् पूर्वे वर्षे मध्याह्नः पश्चिमे वर्षे
निशीथः उत्तरवर्षे निम्लोचो ज्ञेयः । एवं मध्याह्नदर्शनसमय
एव पूर्ववर्षे निम्लोचः पश्चिमवर्षे उदयः उत्तरवर्षे निशीथश्च
ज्ञेयः । अस्तदर्शनसमय एव पश्चिमवर्षे मध्याह्नः पूर्ववर्षे निशीथः
उत्तरवर्षे उदयश्च ज्ञेयः । तदेवं सर्ववर्षस्था अपि मेरोर्दक्षिणदेश-
स्थानेवात्मनो मन्यमानाः स्ववर्षे सूर्यस्योदयमध्याह्ननिम्लोचान्
पश्यन्त एवान्येषु तान् पूर्वोक्तविवेकेन जानन्तीति संक्षेपः ।
विष्णुपुराणे स्थितोऽपि विशिष्योक्तम् ।

शक्रादीनां पुरे तिष्ठन् स्पृशत्येष पुरत्रयम् ।
विकर्णौ द्वौ विकर्णस्थस्त्रीन् कोणान् द्वे पुरे तथा ॥

इति अस्यार्थः शक्राद्यन्यतमस्य पुरे तिष्ठन् पुरत्रयं युगपत् स्पृशति
द्वौ विकर्णौ कोणौ च । तथा हि शक्रपुरे तिष्ठन् शक्रदिग्वर्षे
मध्याह्नं दक्षिणदिग्वर्षे उदयमुत्तरदिग्वर्षे अस्तमनं करोतीति
पुरत्रयस्पर्शः अग्निकोणवर्षे प्रथमं याममीशानकोणवर्षे तृतीयं
यामं करोतीति विकर्णद्वयस्पर्शः । विकर्णस्थः अग्न्याद्यन्यतम-
कोणस्थः संस्त्रीन् कोणान् द्वे पुरे द्वे दिशौ च स्पृशति । तथा हि
अग्निकोणे तिष्ठन् अग्निकोणवर्षे मध्याह्नं नैर्ऋतकोणवर्षे उदय-
मीशानकोणे अस्तमनं करोतीति कोणत्रयस्पर्शः । तथा दक्षिण-
दिग्वर्षे प्रथमो यामः पूर्वदिग्वर्षे तृतीयो यामः इति पुरद्वयस्पर्शः
दिग्द्वयस्पर्शश्च । एवमन्येषु कोणेषु पुरेष्वपि द्रष्टव्यम् ॥ ९ ॥

साधिकानि पञ्चविंशतिसहस्राधिकानि ॥ १० ॥

सह वा सहैव ॥ ११ ॥

त्रयीमय इत्युपासनार्थम् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यत्र स्थाने उदेति उदितो दृष्टो भवति तस्योदयस्थानस्य
समानसूत्रनिपाते निम्लोचति अदृष्टो भवति न च प्रातरधः
स्थानादुद्गच्छति सायं चाधः स्थाने प्रविशतीति मन्तव्यम्
"अद्भ्यो वा एष प्रातरुदेत्यपः सायं प्रविशति" इति भगवती श्रुतिस्तु
द्रष्टृजनमत्यनुसारिणीति भावः यत्र कचनजनविषये एष सूर्यः
स्यन्देन स्वेदोद्गमेन प्रतपति मध्यान्हं करोति अभि अभि-
मुख्येन समानसूत्रनिपाते प्रस्वापयत्यर्द्धरात्रं करोतीति
यावत् ये अस्तं गतं सम्यक् अनुपश्येरन् ते एव तत्रस्थाने
स्थिताः न पश्यन्ति सूर्यस्तु सदा वर्त्तत एव तथाह
भगवान् पराशरः ।

नैवास्तमनमर्कस्य नोदयः सर्वदा सतः ।
उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः ॥

इति ॥ ९ ॥

अधिकेन पञ्चविंशतिसहस्रात्मकेन सहितानि ॥ १०-११ ॥
एकेन मुहूर्त्तेन कतियोजनानि गच्छतीत्यत आह । एवमिति ।
त्रयीमयः वेदत्रयीत्वेनोपास्यः ॥ १२ ॥

भाषाटीका

जहां पर सूर्य देव उदित होते हैं तिसी के सामने अस्त होते हैं
जहां पर मध्यान्ह करते हैं तिसके सामने ही अर्धरात्र करते हैं तब
उहां जाने से जो लोग उनको देखते थे सो नहीं देखते हैं ॥ ९ ॥

जब इंद्र की पुरी से सूर्य चलते हैं तब से पंद्रा घडी में
सवा दो करोड साढे बारा लक्ष पचीस हजार योजन दूर दक्षिण
संयमनी पुरी को जाते हैं तिसके पीछे वरुणपुरी कुबेरपुरी इंद्र
पुरी को जाते हैं ॥ १० ॥

और सोमादिक सब ग्रह नक्षत्रों के ज्योतिश्चक्र में साथ ही
उदित होते हैं साथ ही अस्त होते हैं ॥ ११ ॥

इस प्रकार से एक मुहूर्त में चौंतीस लाख आठ सौ योजन
पर्यंत वेदत्रयीमय सूर्य का रथ चारों पुरों में घूमता रहता है ॥ १२ ॥

यस्यैकं चक्रं द्वादशारं षण्नेमि त्रिणाभि सम्वत्सरात्मकं समामनन्ति तस्याक्षो मेरोर्मूर्धनि कृतो मानसोत्तरे कृतेतरभागो यत्र प्रोतं रविरथचक्रं तैलयन्त्रचक्रवद्भ्रमन्मानसोत्तरगिरौ परिभ्रमति ॥ १३ ॥

तस्मिन्नक्षे कृतमूलो द्वितीयोऽक्षस्तुर्यमानेन सम्मितस्तैलयन्त्राक्षवद्ध्रुवे कृतोपरिभागः ॥ १४ ॥

रथनीडस्तु षट्त्रिंशल्लक्षयोजनायतस्तत्तुरीयभागविशालस्तावान्रविरथयुगो यत्र हयाश्छन्दोनामानः सप्तारुणयोजिता वहन्ति देवमादित्यम् ॥ १५ ॥

पुरस्तात्सवितुररुणः पश्चाच्च नियुक्तः सौत्ये कर्मणि किलास्ते ॥ १६ ॥

तथा वालखिल्या ऋषयोऽङ्गुष्ठपर्वमात्राः षष्टिसहस्राणि पुरतः सूर्यं सूक्तवाकाय नियुक्ताः संस्तुवन्ति ॥ १७ ॥

तथाऽन्ये च ऋषयो गन्धर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्त चतुर्दश मासि मासि भगवन्तं सूर्यमात्मानं नानानामानं पृथङ्नानानामानः पृथक्कर्मभिर्द्वन्द्वश उपासते ॥ १८ ॥

लक्षोत्तरं सार्द्धनवकोटियोजनपरिमण्डलं भूवलयस्य क्षणेन सगव्यूत्युत्तरं द्विसहस्रयोजनानि स भुङ्क्ते ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
ज्योतिश्चक्रसूर्यरथमण्डलवर्णनं नामैक-
विंशतितमोऽध्यायः ॥ २१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वादश मासा अरा यस्य । षड्तवो नेमयो यस्य । त्रीणि चातुर्मास्यानि नाभयो यस्य । कृत इतरभागो यस्य । मानसोत्तरगिरौ लक्षार्द्धोर्ध्वुपरि वायुबद्धभूमाविति द्रष्टव्यं चक्रं वा तावदुच्छ्रितमिति मन्तव्यम् अन्यथायुतमात्रोच्छ्रायत्वान्मानसोत्तरस्य मेरोश्चतुरशीत्युच्छ्रायत्वादक्षस्य साम्यानुपपत्तेः ॥ १३ ॥

तस्मिन्नक्षे चक्रप्रान्ते कृतमूलो निबद्धपूर्वभागः प्रथमाक्षो मेरुमानसोत्तरायतः सार्धसप्तलक्षाधिकसार्धकोटिप्रमाणस्तस्य तुर्यमानेन सार्धसप्तत्रिंशत्सहस्राधिकैकोनचत्वारिंशल्लक्षमानेन ध्रुवे कृतो वायुपाशेन निबद्ध उपरिभागो यस्य ॥ १४ ॥

नीड उपवेशस्थानं गायत्र्यादिच्छन्दोनामानः अरुणेन योजिताः सन्तो देवं वहन्ति ॥ १५ ॥

पुरस्तात्स्थितोऽपि पश्चात्प्रत्यङ्मुख आस्ते । यद्वा । यत्सूर्यस्य पुरस्तात्तस्य वै पश्चिमत्वात्पश्चादित्युक्तम् । अश्वस्थानं च वायुनोक्तम् ।

> सप्ताश्वरूपच्छन्दांसि वहन्ते वामतो रविम् ।
> चक्रपक्षनिबद्धानि चक्रे चाक्षः समाहितः ।

इति ॥ १६ ॥

सूक्तवाकाय सुभाषिताय ॥ १७ ॥

एकैकशश्चतुर्दश द्वन्द्वशः सप्त गणाः सन्तो मासि मास्युपासत इत्यन्वयः ॥ १८ ॥

गव्यूतिः क्रोशद्वयं सगव्यूत्युत्तरं यथा भवति तथा ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकविंशोऽध्यायः ॥ २१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्मिन्नक्षे चक्रप्रान्ते कृतमूलः निबद्धपूर्वभागः द्वितीयोऽक्षः प्रथमोऽक्षः मेरुमानसोत्तरायतः सार्द्धसप्तलक्षोत्तरसार्द्धकोटियोजनप्रमाणः तस्य तुर्यमानेन सार्द्धसप्तत्रिंशत्सहस्राधिकैकोनचत्वारिंशल्लक्षयोजनमानेन संमितः परिमितः ध्रुवे कृतः वायुपाशेन बद्ध उपरिभागो यस्य तथाभूतः तं निदर्शयति । तैलयन्त्राक्षवत्तैलयन्त्राक्षदृष्टान्तेन ज्ञातव्य इत्यर्थः ॥ १४ ॥

रथनीडादेः परिमाणमाह । रथनीड इति । नीडो रथिन उपवेशस्थानं षट्त्रिंशल्लक्षयोजनायामः तुरीयभागविशालः नवलक्षयोजनविशालः रविरथयुगोऽपि तावान् षट्त्रिंशल्लक्षयोजनायामः तुरीयभागविशालः । युगं विशिनष्टि । यत्र युगेऽरुणेन सूतेन

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

योजिताः सप्त हया गायत्र्यादिच्छन्दोनामानः देवं द्योतमानमादित्यं वहन्ति गन्तव्यदेशं प्रापयन्तीत्यर्थः अश्वनामानि श्रीवैष्णवे पुराणे उक्तानि ।

हयाश्च सप्तच्छन्दांसि तेषां नामानि मे शृणु ।
गायत्री च बृहत्युष्णिग् जगती त्रिष्टुबेव च ॥
अनुष्टुप्पङ्क्तिरित्युक्तः छन्दांसि हरयो रवेः ।

इति । नन्वेवम् "एकोऽश्वो वहति सप्तनाम" इति श्रुतिविरोध इति चेदुच्यते एक इत्यनेनैकसूर्य उच्यते अश्व इति जात्यभिप्राय एकत्वनिर्देशः "एको व्रीहिः सुसम्पन्नः" इत्यादिवत् सप्तनामेत्यादि- सप्तनामान इत्युच्यते तथा चैकरूपा गायत्र्यादिसप्तनामानोऽश्वा वहन्तीति श्रुत्यर्थः उपबृंहणानुसरणादेव हि श्रुत्यर्थनिर्णय इति तेषां गायत्र्यादिनामकत्वं तद्रूपध्योपासनार्थमुक्तम् ॥ १५ ॥

अरुणायोजिता देवं वहन्तीत्युक्तं कुत्र स्थितोऽश्वान् योजयति इति तत्राह । पुरस्तादिति । सवितुः पुरस्तात्पुरःस्थितोऽरुणः सौत्ये अश्व- योजनरूपे कर्मण्यास्ते इत्यर्थः पुरस्तात्स्थितोऽपि किं सवितुरभि- मुखतो वर्तते नेत्याह । पश्चाच्च नियुक्तः पुरस्तात्स्थितोऽपि प्रत्यङ्मुख आस्ते यद्वा यत्सूर्यस्य पुरस्तस्यैव पश्चिमत्वादित्युक्तमेवं वालखिल्या ऋषयोऽपि षष्टिसहस्रसंख्याका अङ्गुष्ठपर्वप्रमिताः सूर्यस्य पुरतो रथे स्थिताः सूक्तवाकाय वाक् उक्तिः सूक्तरूपो वाकः सूक्तवाकः तस्मै सुभाषितरूपोक्तये संस्तुतये इति यावन्नियुक्ताः आदिष्टाः सन्तः सूर्यं संस्तुवन्ति ॥ १६ ॥ १७ ॥

तथान्ये ऋष्यादयः सप्त गणा एकैकशः चतुर्दश चतुर्दश द्वन्द्वशः मासे मासे पृथङ्नामभिरादित्यमुपासत इत्यन्वयः तत्र ग्रामण्यो यक्षाः कथंभूतमादित्यमात्मानं सर्वेषां दिगधिष्ठातृत्वा- दात्मानं भगवदात्मकत्वाद्वात्मानं मासभेदभिन्ननामानं कथं भूताः पृथङ्नामानः परस्परविलक्षणनामानः पृथक्कर्माणि श्री- वैष्णवे प्रपञ्चितानि "स्तुवन्ति ऋषयस्तवैर्गन्धर्वैर्गीयते पुरः। नृत्य- न्त्योऽप्सरसो यान्ति तस्य चानु निशाचराः। वहन्ति पन्नगा यक्षैः क्रियतेऽभीषुसङ्ग्रहः । वालखिल्यास्तथैवैनं परिवार्य सहासत" इत्यादिना यद्यप्यत्र मासि चतुर्दश चतुर्दश उपासत इति प्रतीयते श्रीवैष्णवे तु सप्त सप्तेति तथाहि ।

सप्तर्षिभिर्धिष्ठितो देवैरादित्यो मुनिभिस्तथा ।
गन्धर्वैरप्सरोभिश्च ग्रामण्यैर्यक्षराक्षसैः ॥
धाता क्रतुस्थली चैव पुलस्त्यो वासुकिस्तथा ।
रथकृद्ग्रामणी र्हेतिस्तुम्बुरुश्चैव सप्तमः ॥
एते वहन्ति वै चैत्रे मधुमासे सदैव हि ।
मैत्रेय ! स्यन्दने भानोः सप्त मासाधिकारिणः ॥
अर्यमा पुलहश्चैव रथौजाः पुञ्जिकस्थली ।
प्रहेतिः कच्छनीरश्च नारदश्च रथे रवेः ।
माधवे निवसन्त्येते शुकसंज्ञे निबोध मे ।
मित्रोऽत्रिस्तक्षकः रक्षः पौरुषेयोऽथ मेनका ॥
महारथश्चनश्चैव मैत्रेयैते वसन्ति वै ।

इत्यादि तथाप्येकैकस्मिन्मासाधिकारिणि गणे प्रधानभूताः सप्त वैष्णवे कथिता इत्यतो न विरोधः ॥ १८ ॥

पूर्वं मानसोत्तरं परिवर्तमानस्य लक्षोनसार्द्धनवकोटियोज- नानि भवन्ति इत्युक्तं भवति कियता कालेन कति योजनानि गच्छ- तीत्यत्र उक्तमेव मुहूर्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिका- नीति इदानीं क्षणेन कति योजनानि गच्छतीत्यत्राह । लक्षो- त्तरमिति । नव कोट्येकपञ्चाशल्लक्षयोजनपरिमितं सूर्यस्य परिभ्राम्य- माणं भूमण्डलं तस्य भूवलयस्य क्रोशद्वयाधिकद्विसहस्रयोज- नानि स सूर्यः क्षणेन कालेन भुङ्क्ते गच्छतीत्यर्थः ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकविंशोऽध्यायः ॥ २१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यस्य रविरथस्यैकमेव चक्रं द्वादशमासाभिमानिदेवताभि- मन्यमाना द्वादशाराः यस्य तत्तथा षड् ऋत्वभिमानिदेवताभि- मन्यमानाः षण्नेमयो यस्य तत्तथा चातुर्मास्याभिमानिदेवता- भिमन्यमानास्त्रिनाभयो यस्य तत्तथा स्वयं सम्वत्सराभिमानि- देवताभिमन्यमानं तस्य रथस्याक्षप्रमाणं सार्धकोटिद्वयं सप्तलक्षाधिकम् ।

सार्द्धं कोटिद्वयं प्रोक्तं सप्त लक्षाधिकं तथा ।
रथाक्षस्य रवेर्मेरोर्मानसोत्तरवर्तिनः ॥

इति यत्रेतरभागे रविरथचक्रं प्रोतं यः सूर्यरथाक्षस्य प्रोतै- तरभागो मेरुमूर्ध्नि प्रोतैकभागः ॥ १३ ॥

तस्मिन् दीर्घाक्षे चक्रप्रोतैकभागस्तस्मिन् दीर्घाक्षे चक्रप्रो- तद्देशे कृतमूलः कीलितपृष्ठभागस्तुरीयमानेन सम्मितः दीर्घा- क्षचतुर्भागसमानः द्वितीयाक्षोऽस्ति स तु ध्रुवलोके कृतोपरि- भागः रथनीडः सूर्यस्य पीठस्थानीयः तुरीयभागविशालो नवलक्षविस्तारस्तावान् रविरथयुग इति पूर्वप्रस्तुतदीर्घाक्षस- मानः प्रकृते सम्बन्धाभावात् दूरस्थपरामर्शः प्रमाणान्तर- सिद्धत्वाच्च ।

अक्षप्रमाणमुभयोः प्रमाणं तद्युगार्धयोः ।
ह्रस्वाक्षस्तद्युगार्धेन ध्रुवाधारो रथस्य वा ।

इति अक्षप्रमाणमक्षयोः दीर्घाक्षह्रस्वाक्षयोः परिमाणमुभयोर्यु- गार्धयोर्युगं च तदर्धं च युगार्धे तयोर्युगार्धयोर्यथाक्रमं प्रमाणं युगस्योत्तरभागोऽश्वस्कन्धे निवेशितः दक्षिणभागस्तु ध्रुवस्था- नादवलम्बमानो वायुपाशेन बद्धः युगार्धस्त्वश्वस्कन्धान्निर्गतयु- गाग्रे कीलितः चक्रप्रोतदीर्घाक्षाग्रे कीलितापरभागः तत्र रथस्य यो ह्रस्वाक्षस्तत्रैव कीलितस्तेन युगार्धेन सह ह्रस्वाक्षः ध्रुवाधारो भवति उत्तानपादपुत्रलोके वायुपाशेन बद्ध इत्यर्थः अश्वास्थित्या चायमर्थोऽवगम्यते ।

सप्ताश्वरूपच्छन्दांसि वहन्तो वामतो धुरम् ।
चक्रपक्षनिबद्धानि चक्रे चाक्षः समाहितः ॥

इति रविरथनीडविशालसमान इति केचित् तत्वमज्ञा विजानाति ईषादण्डपरिमाणमपि तदनुसारेणोत्प्रेक्षणीयं युगमध्ये निर्गताग्र ईषादण्डः ॥ १४ ॥ १५ ॥

सवितुः पुरस्तात् अश्वानां पश्चात्पृष्ठे ॥ १६-१७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ग्रामण्यस्तल्लक्षणा: "ग्रामाधिपे तत्श्रेष्ठे च ग्रामणीः परिकीर्तितः" इति यादवः ॥ १८-२१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
एकविंशोऽध्यायः ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तस्मात्त इत्यत्र टीकायां चक्रं तत्रावलम्बितमिति तस्मिन् युगपद्गतिद्वयी न सम्भवति वैपरीत्येनाकर्षणयोः परस्परस्तम्भकत्वात् अश्वानां बलवत्त्वेऽपि वायुचक्रस्यैव रथमतिक्रम्य किञ्चिद्विक्रमः स्यात् । न तु रथस्य प्राच्याः ततो रथस्य नक्षत्रान्तरप्राप्तौ सम्भवन्त्यामपि देशान्तरप्राप्तिर्न सम्भवति चन्द्रादौ तु प्रत्यहं देशान्तरप्राप्तिश्च दृश्यते कुलालचक्रपिपीलिकादृष्टान्तेन च सा लभ्येत इति विचार्य ततो मानसोत्तरोपरि वायुबद्धभूमित्व एव पर्यवसितेषु मेरोरुपर्यपि तज्ज्ञेयं किन्तु मानसोत्तरस्योपरि नवतिसहस्रात्मकं मेरोस्तु षोडशसहस्रात्मकमिति ॥ १३ ॥

तस्मिन्नक्षे रविरथस्यैव चक्रं भ्रमति तुर्यमानेन चतुर्थांशेन सम्मितः सम्पादितः अधिक इत्यर्थः ॥ १४ ॥

रथनीडोऽत्र रथाश्रयो रथानुगतवायुमयभूमिः न तु सूर्योपवेशरथमध्यपीठं रथस्याल्पप्रमाणत्वात् । यथैव वैष्णवे । "योजनानां सहस्राणि भास्करस्य रथो नव" इति । एवमेव हि दशसहस्रयोजनात्मकं वक्ष्यमाणं तन्मण्डलं घटत इति ॥ १५ ॥

पुरस्तात् पश्चाच्च नियुक्त इति कायव्यूहेनापि घटते ॥ १६ ॥

ऋषयश्चतुर्दश गन्धर्वाश्चतुर्दशेत्येवमेकैकशश्चतुर्दश द्वन्द्वशो मिलित्वेत्यर्थः । समासवाचिद्वन्द्वशब्दवत् तथा सप्त गणाः मासि मास्युपासत इत्यन्वयः ॥ १७ ॥ १८ ॥

लक्षेत्यादिभूवलयस्येत्यन्तकं गद्यं स सूर्यः ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
एकविंशोऽध्यायः ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यस्य रथस्य द्वादश मासा अरा यस्य षड्ऋतवो नेमयो यस्य त्रीणि चातुर्मास्यानि नाभयो यस्य मेरोर्मूर्द्धनि मूर्द्धाधः प्रदेशे इत्यर्थः । तैलयन्त्रीयाक्षस्य तथा दृष्टेः । मानसोत्तरे लक्षार्द्धोतुपरि वायुबद्धभूमाविति श्रीस्वामिचरणाः ततो मानसोत्तरस्यायुतमात्रोच्छ्रायत्वात् षष्टिसहस्रोपरि वर्त्तमानः स च किञ्चिन्न्यूनसप्तपञ्चाशल्लक्षाधिककोटिप्रमाणः ॥ १३ ॥

तस्मिन्नक्षे चक्रप्रान्तवर्त्तिनि कृतमूलः निबद्धपूर्वभागो द्वितीयोऽक्षः । तुर्यमानेन प्रथमाक्षस्य चतुर्थांशप्रमाणेन सप्तत्रिंशत्सहस्राधिकोनचत्वारिंशल्लक्षमानेन सम्मित इत्यक्षोऽयं लवणसागरसमानसूत्रपाते प्रथमाक्षप्रदेशे प्रथित इति ज्ञेयम् । द्वितीयाक्षस्य प्रथमाक्षादल्पप्रमाणत्वाद्ध्रुवे कृतः वायुपाशेन निबद्ध उपरिभागो यस्य सः ॥ १४ ॥

रथस्य नीडोऽन्तर्गृहं षट्त्रिंशल्लक्षयोजनोच्छ्रितो नवलक्षयोजनविस्तारः । चक्राच्चत्वारिंशत्सहस्रोपरितने स्थाने नीडमध्ये सूर्य उपविष्टो ज्ञेयः । गायत्र्यादिच्छन्दोनामानः अरुणेन सारथिना योजिताः ॥ १५ ॥

पुरस्तात् स्थितोऽपि पश्चात् प्रत्यङ्मुख आस्ते अश्वस्थानं वायुनाक्रम् ।

सप्ताश्वरूपच्छन्दांसि वहन्ते वामतो रविम् ।
चक्रपक्षनिबद्धानि चक्रे वाक्षः समाहित इति ॥ १६ ॥

सूक्तवाकाय सुभाषिताय ॥ १७ ॥

मासि मासि एकैकस्मिन् मासि द्वाभ्यां द्वाभ्यामृषिप्रभृतिभिः सप्तगणा भवन्ति । एकैकशः एकैकेन ऋष्यादिना तु चतुर्दश गणा भवन्तो मासि मासि उपासत इत्यन्वयः ॥ १८ ॥

गव्यूतिः क्रोशयुगं सूर्यः गव्यूति उत्तरं यथा स्यात्तथा ॥ १९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
एकविंशः पञ्चमस्य सङ्गतः सङ्गतः सताम् ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यस्य रथस्यैकं चक्रं परिभ्रमणसम्वत्सरात्मकमामनन्ति उपासनार्थं कथम्भूतं द्वादश मासा अरा यस्य तत् षट् ऋतवो नेमयो यस्य तत् त्रीणि चातुर्मास्यानि नाभयो यस्य तत् यस्य रथस्य अक्षः मेरोर्मूर्द्धनि कृतः उत्तरभागो यस्य सः तथा मानसोत्तरे कृत इतरभागो यस्य सः अयुतयोजनोच्छ्रायमानसोत्तरोपरि रविरथचक्रमत्युच्छ्रितं मन्तव्यमन्यथासाम्यानुपपत्तेः ॥ १३ ॥

तस्मिन्मेरुमानसोत्तरायते सार्धसप्तलक्षोत्तरसार्धकोटियोजनदीर्घे कृतमूलो द्वितीयाक्षः पूर्वाक्षस्य तुर्यमानेन सार्धसप्तत्रिंशत्सहस्रोत्तरैकोनचत्वारिंशल्लक्षमानेन सम्मितः ध्रुवे कृतो वायुपाशेन मानसोत्तरगताक्षाग्रबद्धेन निबद्ध उपरिभागो यस्य सः अत्रेदं बोध्यम् "भूमेर्योजनलक्षं तु सौरं मैत्रेय ! मण्डलम्„ इति श्रीपराशरवचनात् लक्षयोजने भूमण्डलतो रविस्ततो वक्ष्यमाणप्रकारेणाष्टत्रिंशल्लक्षयोजनान्तरे विष्णुपदं तत्र ध्रुवः एवं सति द्वितीयाक्षस्य यत्किञ्चिदाधिक्यं तद्यथासम्भवमुपपत्तिर्भो वा संगतमिति ॥ १४ ॥

गायत्र्यादिच्छन्दोनामानः ॥ १५ ॥

अरुणः सौत्ये सारथ्ये नियुक्तः सवितुः पुरस्तात्स्थितोऽपि पश्चात्प्रत्यङ्मुखः सवितुरभिमुखमास्ते ॥ १६ ॥

सूक्तः सुभाषितः वाको वचनं स्तोत्रमित्यर्थस्तस्मै ॥ १७ ॥

एकैकशश्चतुर्दश द्वन्द्वशः ऋषयो गन्धर्वा अप्सरसः नागाः ग्रामण्यः यातुधाना देवा इति सप्त गणाः पृथक्कर्मभिः पृथङ्नामानं सूर्यं तत्र भगवदुपासनार्थमात्मानं सर्वात्मानं मासि मासि उपासते इत्यन्वयः ॥ १८ ॥

क्षणेन कति योजनानि गच्छतीत्याकाङ्क्षायामाह । लक्षोत्तरमिति तत्र स सूर्यः स गव्यूत्युत्तरं यथा भवति तथा द्विसहस्रयोजनानि क्षणेन भुङ्क्ते गच्छति ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
एकविंशाध्यायार्थप्रकाशः ॥ २१ ॥

भाषा टीका

जिस सूर्यदेव के रथ का द्वादश अरा वाला है नेमिवाला तीन नाभि वाला संवत्सर रूप एक चक्र है ऐसा कहते हैं उस चक्र का धुरा मेरु के मस्तक पर रखा है उसका दूसरा भाग मानसोत्तर पर्वत पर है जिस धुरे में पोहा हुआ सूर्य के रथ का चक्र तेल के कोल्हू सरीका मानसोत्तर पर्वत पर घूमता है ॥ १३ ॥

उस धुराकाष्ठ के ऊपर मूल से रखा हुआ दूसरा अक्ष चालीस लक्ष साढे सैंतीस हजार योजन का लंबा है उसका दूसरा भाग ध्रुवजी में लगा हुआ है ॥ १४ ॥

रथ का भीचा बैठक छत्तीस लाख योजन लंबा नौलाख योजन चौडा है सूर्य के रथ का जुआ भी नौलाख योजन लंबा है जिस जुआ में अरुण के जोडे हुये वेद नाम के सात घोडे सूर्य नारायण को ढोते हैं ॥ १५ ॥

सूर्य के सामने सारथि के कार्य में नियुक्त अरुण हैं सूर्य के सामने मुख करके बैठे हैं ॥ १६ ॥

तैसे ही अंगुष्ठ पर्व के बरोबर साठ हजार वालखिल्य ऋषि सूर्य के आगे वेद पाठके वास्ते नियुक्त हैं सो सूर्य की स्तुति करते हैं ॥ १७ ॥

तैसे ही और भी ऋषि गन्धर्व अप्सरा नाग ग्रामणी यातुधान देवता ये सब सात गण चौदह सङ्ख्या वाले हैं महिना महिना में सब नाना नाम वाले भगवान् सूर्य को भिन्न नाम वाले होकर साथ में मिलकर सेवन करते हैं ॥ १८ ॥

साढे नौ किरोड एक लाख इतने भूमण्डल में एक क्षण में दो हजार दो कोश योजन प्रमाण से माहिक चलते हैं ॥ १९ ॥

इति श्रीभागवत पञ्चमस्कन्ध वीसमे अध्यायका
भाषानुवाद लक्ष्मणाचार्य कृत
समाप्त ॥ २१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे एकविंशोऽध्यायः समाप्तः ॥ २१ ॥

———०:०:०———

॥ द्वाविंशोऽध्यायः ॥

—०:०:०—

॥ राजोवाच ॥

यदेतद्भगवत आदित्यस्य मेरुं ध्रुवं च प्रदक्षिणेन परिक्रामतो राशीनामभिमुखं प्रचलितं चाप्रदक्षिणं भगवतोपवर्णितममुष्य वयं कथमनुमिमीमहीति ॥ १ ॥

॥ स होवाच ॥

यथा कुलालचक्रेण भ्रमता सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशान्तरेष्वप्युपलभ्यमानत्वादेवं नक्षत्रराशिभिरुपलक्षितेन कालचक्रेण ध्रुवं मेरुं च प्रदक्षिणेन परिधावता सह परिधावमानानां तदाश्रयाणां सूर्यादीनां ग्रहाणां गतिरन्यैव नक्षत्रान्तरे राश्यन्तरे चोपलभ्यमानत्वात् ॥ २ ॥

स एष भगवानादिपुरुष एव साक्षान्नारायणो लोकानां स्वस्तय आत्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं कविभिरपि च वेदेन विजिज्ञास्यमानो द्वादशधा विभज्य षट्सु वसन्तादिषु ऋतुषु यथोपजोषमृतुगुणान् विदधाति ॥ ३ ॥

तमेतमिह पुरुषास्त्रय्या विद्यया वर्णाश्रमाचारानुपथा उच्चावचैः कर्मभिराम्नातैर्योगवितानैश्च श्रद्धया यजन्तोऽञ्जसा श्रेयः समधिगच्छन्ति ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वाविंशे सोमशुक्रादेः स्थानमाहोत्तरोत्तरम् ।
तच्चक्रस्यनुसारेण दृष्टादिष्टं तथा नृणाम् ॥ १ ॥

राशीनामभिमुखमप्रदक्षिणं चोपवर्णितं सव्येन चलन् दक्षिणेन करोतीति च, तथा अमुष्य वयं कथमनुमिमीमहि एतत्कथं जानीमो विरुद्धत्वादित्यर्थः ॥ १ ॥

चक्रवशात्स्वतश्च गतिद्वयमविरुद्धमिति परिहारार्थः ॥ २ ॥

तत्तत्कालनियमेन कर्मणां विशुद्धेः साद्गुण्यस्य निमित्तभूतमात्मानं विभज्य विजिज्ञास्यमानो वितर्क्यमाणः । यथोपजोषं यथाकर्मभोगमृतुगुणान् शीतोष्णादीन् ॥ ३ ॥

वर्णाश्रमाचारानुवर्तिनः पुरुषास्त्रय्या आम्नातैः कर्मभिरिन्द्रादिरूपं योगवितानैश्च ध्यानादिभिरन्तर्यामिरूपं यजन्तः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पूर्वमादित्यो नक्षत्राभिमुखं मकरादिषु राशिषु चरतीत्युक्तं तथा मेरुं ध्रुवं च परिवर्तत इति चोक्तं तदिदं गतिद्वयं युगपदेकस्याघटमानमुक्तानुवादपूर्वकं पृच्छति राजा । यदिति । यदेतदित्यादिनोपवर्णितमित्यन्तेनोक्तस्यानुवादः अमुष्येत्यादिना प्रश्नः भगवता त्वया यदुपवर्णितं किं तन्मेरुं ध्रुवं च प्रदक्षिणेन परिभ्रमतो भगवत आदित्यस्य पुनः राशीनामभिमुखं नक्षत्राभिमुखतया राशिषु प्रचलनमित्येतत् द्वयं विरुद्धममुष्य सूर्यस्य कथमनुमिमीमहे कथमुपपन्नं भवतीति विश्वसिम इत्यर्थः ॥ १ ॥

एवमापृष्टो बादरायणिराहेत्याह सूतः । स होवाचेति । शुकोक्तिमाह । यथेत्यादिना राश्यन्तरे चोपलभ्यमानत्वादित्यन्तेन । विरुद्धमप्येकस्य गतिद्वयमुपपन्नमिति सदृष्टान्तमाह । यथेति । भ्रमता कुलालचक्रेण सह भ्रमतां कुलालचक्राश्रयाणां पिपीलिकादीनां गतिरन्यैव दृश्यते दृष्टान्तेऽपि कथं तत्राह । प्रदेशान्तरे चक्रस्यैव प्रदेशान्तरे उपलभ्यमानत्वात् पिपीलिकादीनामित्यनुषङ्गः यदि गतिरनन्या तर्हि प्रदेशान्तरे नोपलभ्येरन् अत उपलम्भाद्गतिरन्यैवेत्यर्थः एवं दृष्टान्ते प्रदर्शितं गतिद्वयं दार्ष्टान्तिके साधयति । एवमिति । एवं तथा नक्षत्रै राशिभिश्च उपलक्षितेन निराश्रयायां नक्षत्रादीनामवस्थानासम्भवात्तदाश्रयं कालचक्रमनुमीयत इत्यभिप्रायेण उपलक्षितेनेत्युक्तं मेरुं ध्रुवं च प्रदक्षिणेन परिभ्रमता कालचक्रेण शिशुमारेण परिभ्रमतां तदाश्रयाणां कालचक्राश्रयाणां सूर्यादीनां ग्रहाणां नक्षत्राभिमुखतया राशिषु गतिरन्यान्या उपपद्यते एव कुतः नक्षत्रान्तरे राश्यन्तरे चोपलभ्यमानत्वादित्यन्वयः ॥ २ ॥

एवं प्रश्नस्योत्तरमभिधायाथ सूर्यरूपेणावस्थितस्य भगवतस्तत्तद्वर्णाश्रमधर्माराध्यत्वं स्वगत्या सम्वत्सरायनर्तुमासपक्षदिवानक्तादिरूपेण कालविभाजकत्वं चाह । स इति । भगवानादि-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पुरुषः जगत्कारणभूतो नारायण एव स सूर्यरूपेणावस्थितः "अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यत" इति सूर्यस्य भगवदात्मकत्वश्रवणात् शरीरात्मभावनिबन्धनं स एष नारायण इति सामानाधिकरण्यम् एनमादित्यवर्णो भगवान्नारायणो लोकानां स्वस्तये त्रयीमयं तत्कालनियमनेन कर्मणां विशुद्धेः साद्गुण्यस्य निमित्तं साद्गुण्यार्थमात्मानं द्वादशधा विभज्य वसन्तादिषु षट्सु ऋतुषु यथोपजोषं यथाकर्मभोगमृतुगुणान् शीतातपवातवर्षान् विदधाति करोतीत्यन्वयः तत्र द्वादशधा विभागो नामादित्याख्यस्तेत्रज्ञे प्रतिमासमृतुगुणविधानोपयुक्तसङ्कल्परूपज्ञानेनानुप्रवेशः ।

मासि मासि रविर्यो यस्तत्र तत्र भिदापरा ।
त्रयीमयी विष्णुशक्तिरवस्थानं करोति वै ॥
विष्णुशक्तिरवस्थानं सदादित्ये करोति सा ।
न केवलं रवेः शक्तिर्वैष्णवी सा त्रयीमयी ॥
एवं सा सात्त्विकी शक्तिर्वैष्णवी या त्रयीमयी ।
अतः सप्तगतापत्तं स्वस्वान्तमधितिष्ठति ॥
तया चाधिष्ठितः सोऽपि जाज्वलीति स्वरश्मिभिः ।
ततः समस्तजगतां नाशं नयति चाखिलम् ॥

इति श्रीविष्णुपुराणोक्तेः त्रयीमयत्वं नाम प्राचुर्येण त्रय्यास्तुल्यत्वं तदपि चोक्तं तत्रैव "ऋचः स्तुवन्ति पूर्वाह्णे मध्याह्ने च यजूंषि च । बृहद्रथन्तरादीनि सामान्याहुः तथैव रवेः । त्रयमेषा त्रयी विष्णोः ऋग्यजुः सामसंज्ञिता" इति कथम्भूतो विदधाति वेदैः तज्ज्ञैः कविभिश्च जिज्ञास्यमानो वेदैर्बोध्यमानः कविभिरुपास्यमान इत्यर्थः एतदेवोपपादयति तमिति । तमेतमादित्यरूपेणावस्थितं भगवन्तमिह लोके पुरुषा वर्णाश्रमाचारानुवर्तिनः त्रय्या विद्यया श्रद्धया यजन्तः त्रय्या यजनमेव प्रपञ्चयति उच्चावचैः कर्मभिराम्नातैर्योगवितानैश्चेति उच्चावचैर्नानाविधैराम्नातैर्वैदिकैः कर्मभिर्यज्ञादिभिः योगवितानैः उपासनविस्तरैश्च आम्नातैरिति पूर्वान्वयः सम्बध्यते वैदिकैरुपासनैश्चेत्यर्थः यजन्त आराधयन्तोऽञ्जसा सुखेन आशु वा श्रेयः स्वर्गमोक्षादिरूपं सम्यक् प्राप्नुवन्तीत्यर्थः ॥ ३ ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उक्तैवार्थोपपत्तिः राशीनां प्रचलनमपि प्रदक्षिणमिति । यस्मात्तस्मादेतस्यादित्यस्य राशीनामभिमुखप्रचलनमप्रदक्षिणगमनं घटते तदनुपपन्नं भगवता तदभिमुखप्रचलनमुपवर्णितं यस्मात्तस्मादमुष्यादित्यस्याभिमुखतया गमनस्य राशीनां प्रचलनस्याभिप्रायं कथमनुमिमीमहि युक्तिपूर्वकं बुद्ध्यामहे इति ॥ १ ॥

प्रदक्षिणतो भ्रमता कुलालचक्रेण सह भ्रमन्तो [illegible] पिपीलिकादयो यथा स्वपथस्य गत्या विपरीतं गच्छन्त्येवं प्रदक्षिणेन भ्रमता उपरिस्थकेन सह प्रदक्षिणक्रियमाणोऽपि सविता स्वगत्या पूर्वापरीभावतया [illegible] राशीनामभिमुखं चलतीत्यभिप्रायः रात्र्यादयः प्रत्याहितं अपृष्ठतो गच्छन्तीत्येके विरुद्धप्रतिबिम्बवत् ॥ २ ॥

वसन्तादिष्वृतुषु क्रियमाणानां कर्मणां विशुद्धेर्निमित्तं तदर्पणत्वेनेति शेषः कविभिः भूतभविष्यद्वर्तमानज्ञैः ब्रह्मादिभिः यथोपजोषं यथाक्रमम् ॥ ३ ॥

द्वादशधा विभक्तेः कारणमाह । तमेतमिति । वर्णाश्रमाचारमनुपथन्ति अनुगच्छन्तीति वर्णाश्रमाचारानुपथाः "पथ गतौ" इति धातोः योगवितानैरीश्वरार्पणबुद्धिलक्षणोपायविस्तारैः आम्नातैः प्रतिपादितैः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अभिमुखमत्र अप्रदक्षिणमित्यर्थः ॥ १ ॥ २ ॥

साक्षान्नारायणः सूर्यरूपो विष्णुः ॥ ३—४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

द्वाविंशे चक्रसूर्यादौ गतिभेदव्यवस्थितिः ।
ग्रहाणां स्थानभेदाश्च दूरत्वानिष्टत्वमीर्यते ॥

पूर्वाध्याये सव्येन चलन् दक्षिणेन करोतीत्यत्र संशयानः पृच्छति । यदेतदिति । प्रदक्षिणेन परिक्रमत्त इति प्रत्यहं दृश्यमानत्वात् । राशीनामभिमुखं तु अप्रदक्षिणं प्रचलनममुष्य त्वया वर्णितम् एतत्कथमनुमिमीमहि ज्ञास्यामो विरुद्धत्वादित्यर्थः ॥ १ ॥

स शुकः ह स्पष्टमुवाच । सह भ्रमता चक्रवैपरीत्येन चलतां चक्रवशात् स्वतश्चेति गतिद्वयमविरुद्धमिति वाक्यार्थः ॥ २ ॥

स प्रसिद्धः एष कालरूपी भगवान् कर्मणां विशुद्धेर्निमित्तं तेषां तत्तत्कालनियतत्वादित्यर्थः । द्वादशधा विभज्य ऋतुरूपेण षोढा च विभज्य यथोपजोषं यथा कर्मभोगम् ऋतुगुणान् शीतोष्णादीन् ॥ ३ ॥

अनुपथा अनुवर्तिनः त्रय्या आम्नातैः कर्मभिरेनं सूर्यमेव इन्द्रादिरूपं योगवितानैश्चाष्टाङ्गैरन्तर्यामिरूपं च यजन्तः ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आदित्यादीनां स्थानानि वर्णयति । तत्र तावत्सूर्यस्याचलं दक्षिणेन करोतीति यदुक्तं गतिद्वयं तत्पृच्छति । यदेतदिति । मेरुं ध्रुवं च प्रदक्षिणेन परिक्रामतः आदित्यस्य पुनः राशीनामभिमुखत्वेनाभिमुखतया अप्रदक्षिणं च प्रचलितं प्रचलनं भगवतोपवर्णितम् इत्येतत् कथममुष्य सूर्यस्य वयं कथमनुमिमीमहि ज्ञास्यामो विरुद्धत्वात् ॥ १ ॥

परिहरति । यथा कुलालचक्रेत्यादि ज्ञातव्यं नाविरुद्धमविरुद्धमिति कलितोऽर्थः ॥ २ ॥

सूर्यं भगवदुपासनार्थमंशांशिनोर्भेदाभेदसम्बन्धाभिप्रायेण च साक्षान्नारायण इत्याद्युक्तिः कर्मणां तत्तत्काले क्रियमाणानां विशुद्धेर्निमित्तमात्मानं द्वादशधा विभज्य यथोपजोषं प्राणिनां कर्मभोगमनतिक्रम्य ऋतुगुणान् शीतोष्णादीन् विदधाति करोति ॥ ३ ॥

कर्मभिः पुरुषा बुभुक्षवः यजन्तः श्रेयः स्वर्गसुखं योगवितानैः ज्ञानभक्त्यादिसाधनविस्तारैर्यजन्तो भगवद्दृष्ट्या यजन्तो मुमुक्षवः श्रेयो मोक्षं समधिगच्छन्ति ॥ ४ ॥

अथ स एष आत्मा लोकानां द्यावापृथिव्योरन्तरेण नभोवलयस्य कालचक्रगतो द्वादशमासान् भुङ्क्ते [१] राशिसंज्ञान् सम्वत्सरावयवान् [२] मासः पक्षद्वयं [३] दिवा नक्तं चेति सपादर्क्षद्वयमुपदिशन्ति यावता षष्ठमंशं भुञ्जीत स वै ऋतुरित्युपदिश्यते सम्वत्सरावयवः ॥ ५ ॥

अथ च यावतार्धेन नभो [४] वीथ्यां प्रचरति तं कालमयनमाचक्षते ॥ ६ ॥

अथ च यावन्नभोमण्डलं सह द्यावापृथिव्योर्मण्डलाभ्यां कार्त्स्न्येन स ह [५] भुञ्जीत तं कालं सम्वत्सरपरिवत्सरमिडावत्सरमनुवत्सरं वत्सरमिति भानोर्मान्द्यशैघ्र्य [६] समगतिभिः समामनन्ति ॥ ७ ॥

एवं चन्द्रमा अर्कगभस्तिभ्य उपरिष्टाल्लक्षयोजनत उपलभ्यमानोऽर्कस्य संवत्सरभुक्तिं पक्षाभ्यां मासभुक्तिं सपादर्क्षाभ्यां दिनेनैव पक्षभुक्तिमग्रचारी द्रुततरगमनो भुङ्क्ते ॥ ८ ॥

अथ चापूर्यमाणाभिश्च [७] कलाभिरमराणां [८] क्षीयमाणाभिश्च कलाभिः पितृणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्वजीवनिवहप्राणो जीवश्चैकमेकं नक्षत्रं त्रिंशता [९] मुहूर्तैर्भुङ्क्ते ॥ ९ ॥

य एष षोडशकलः पुरुषो भगवान् मनोमयोऽन्नमयोऽमृतमयो देवपितृमनुष्यभूतपशुपक्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात्सर्वमय इति वर्णयन्ति ॥ १० ॥

तत [१०] उपरिष्टात्त्रिलक्षयोजनतो नक्षत्राणि मेरुं दक्षिणेनैव कालायन ईश्वरयोजितानि सहाभिजिताष्टाविंशतिः ॥ ११ ॥

तत उपरिष्टादुशना द्विलक्षयोजनत [११] उपलभ्यते पुरतः पश्चात्सहैव वार्कस्य शैघ्र्यमान्द्यसाम्याभिर्गतिभिरर्कवच्चरति लोकानां नित्यदानुकूल एव प्रायेण [१२] वर्षयंश्चारेणानुमीयते स वृष्टिविष्टम्भग्रहोपशमनः ॥ १२ ॥

भाषाटीका

राजा श्रीपरीक्षितजी वोले यह जो आपने कहा कि भगवान् आदित्य मेरु और ध्रुव को दक्षिण तरफ से जव परिक्रमा करते हैं तव राशियों के सन्मुख चलना फिर वायें तरफ कर देना सो इस विरुद्ध कथन को हम कैसे अनुमान करके ठीक समझेंगे ॥ १ ॥

सो श्रीशुकदेवजी वोले जैसे कुम्हार के चक्रके घूंमते समय उसके ऊपर रहने वाले घूंमते हुये चींटी आदि जीवों की चाल दूसरी ही होती है क्यों कि दूसरे ठिकाने फिर वे दीखते हैं इसी प्रकार से नक्षत्र राशियों करके उपलक्षित काल चक्र के साथ ध्रुव तथा मेरु को परिक्रमा क्रमसे, कालचक्र के साथ दौडनेवाले तिसके आश्रय रहने वाले सूर्यादिग्रहों की चाल दूसरी ही होती है क्यों कि वे सूर्यादिक दूसरे नक्षत्र मे दूसरे राशीमेभी दीखते हैं ॥ २ ॥

वैसेही आदिपुरुष भगवान् नारायण लोकों के कल्याण के वास्ते सूर्यरूप से अपने स्वरूप को वारह प्रकार के विभाग कर के कर्मों के शुद्धि के निमित्त त्रयीमय जो आत्मा वेदों करके कवियों करके गाया गया है जिज्ञासित भया है तिसी आत्मा से वसन्तादि ऋतुओं को विधान करते हैं ॥ ३ ॥

इन आदित्य को वर्णाश्रम आचारों के मार्ग मे चलने वाले मनुष्य नाना प्रकार के कर्मों से वैदिक योगादिकों से श्रद्धायुक्त होकर यजन करते हैं तव अनायास से सव पुरुषार्थों को प्राप्त होते हैं ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स एव स्वगत्या मासादिव्यवहारकारणमित्याह । स एष लोकानामात्मा द्यावापृथिव्योरन्तरेण मध्ये यन्नभोवलयमन्तरिक्षं तस्य मध्ये यत्कालचक्रं तद्गतः । राशिभिर्मेषादिभिः संज्ञा येषाम् । चैत्रादिसंज्ञास्तु चान्द्रमासानां मासमाह । पक्षद्वयं मास इति । चान्द्रेण मानेन सपादं महानक्षत्रद्वयं सौरेण दिवा नक्तं चाहोरात्रमिति पित्र्येण षष्ठमंशं राशिद्वयम् ॥ ५ ॥ ६ ॥

---

(१) तानेव इति वि० (२) मासान् (३) दिवानक्तञ्चेति वि० नास्ति (४) नभोवीथ्या (५) सह इति वि० नास्ति (६) समानगतिभिः (७) रुपक्षीयमाणाभिः वि० अ (८) अमराणांक्षीयमाणाभिरि वि० नास्ति (९) त्रिंशन्मुहूर्तैः (१०) उपरिष्टाल्लक्षयोजनतः (११) द्विलक्षयोजनादुपलक्ष्यते (१२) वर्षयंस्थितिद्वारेण ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

मण्डलाभ्यां सह भुञ्जीत। स ह स हि सूर्यः । यदा शुक्लप्रतिपदि संक्रान्तिर्भवति तदा सौरचान्द्रयोर्मासयोर्युगपदुपक्रमो भवति स सम्वत्सरः ततः सौरमानेन वर्षे षट् दिनानि वर्धन्ते चान्द्रमानेन षट् ह्रसन्तीति द्वादशदिनव्यवधानादुभयोरग्रपश्चाद्भावो भवति एवं पञ्च वर्षाणि गच्छन्ति तन्मध्ये द्वौ मलमासौ भवतः ततः पुनः षष्ठः सम्वत्सरो भवति तदेवमवान्तरभेदेन सम्वत्सरादिपञ्चकं समामनन्ति ॥ ७ ॥

सोमादीनामपि स्थानं कार्यं चाह । एवं चन्द्रमा इति । अर्कगभस्तिभ्यो मण्डलरूपेभ्यः । सपादर्क्षाभ्यां सपाददिनद्वयेन ॥ ८ ॥

सर्वेषां जीवनिवहानां प्राणः अन्नमयत्वादमृतमयत्वाच्च अत एव जीवने हेतुत्वाज्जीवश्च ॥ ९ ॥

तदेवाह । य एष इति ॥ १० ॥

दक्षिणेनैव न तु तेषां पृथगन्या गतिरस्तीत्यर्थः । कालायने कालचक्रे उत्तराषाढाश्रवणसन्धावभिजिन्नक्षत्रं फलविशेषेण पृथक्कल्पितं तेन सह। तथा च श्रुतिः। "अभिजिन्नाम नक्षत्रमुपरिष्टादाषाढानामधस्ताच्छ्रोणायाः,, इति ॥ ११ ॥

पुरतः सूर्येण भोक्ष्यमाणे नक्षत्रे पश्चाद्भुङ्क्ते। सहैव भुज्यमाने चारेण क्रमस्थनक्षत्राद्यतिक्रमेण। वृष्टेर्विष्टम्भः स्तम्भनं यस्माद्ग्रहात्तमुपशमयतीति तथा ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ ननु लोकानामन्तरात्मा भगवानेष आदित्यरूपेणावस्थितो द्यावापृथिव्योर्मध्ये यन्नभोवलयमन्तरिक्षं तस्य मध्ये यत्कालचक्रं शिशुमारं कालचक्रस्थमेषादिराशिषु नक्षत्राभिमुखं चरन्नित्यर्थः द्वादश मासान् भुङ्क्ते सम्वत्सरावयवान् मासाख्यान् द्वादश भुङ्क्तेऽनुभवति मकरादिषु राशिषु द्वादशस्वादित्येषु चरत्सु सत्सु द्वादशमासा भवन्तीत्यर्थः । यानेवादित्यो द्वादश सम्वत्सरावयवान् भुङ्क्ते तानेव राशिसंज्ञान् मेषादिराशिसञ्चारनिमित्ता मासादिसंज्ञाः येषां तान् सम्वत्सरावयवान् मासादीन्मानभेदेनवदन्ति तत्र चान्द्रेण मानेन मासः पक्षद्वयमिति वदन्ति तेषामेव चित्रादिनक्षत्रयुक्तपौर्णमासीयुक्तत्वाच्चैत्रादिसंज्ञा भवन्ति सौरेण मानेन सपादमहानक्षत्रद्वयमिति वदन्ति पित्र्येण मानेन दिवानक्तमहोरात्र इति वदन्तीत्यर्थः।एतद्द्वादशभागात्मकस्य सम्वत्सरस्य यावता भागेन मासद्वयात्मकेन षष्ठमंशं राशिद्वयं भुञ्जीत चरेत् आदित्य इति कर्तृपदमध्याहार्यं स वै तावान् काल ऋतुरित्युच्यते स च सम्वत्सरस्य षष्ठोऽश इत्यर्थः अथ सम्वत्सरस्य यावता षण्मासात्मकेनार्द्धेन कालेन नभोवीथ्यां कालचक्रस्य राशिषट्के प्रचलति तं कालमयनमाचक्षते यावता कालेन मकरादिराशिषट्कं संचरितं भवति तावन्तं कालमयनमाचक्षत इत्यर्थः। अथवा द्यावापृथिव्योर्मण्डलाभ्यां सह सान्धितमिति शेषः यावन्नभोमण्डलं द्वादशराश्यात्मकं कार्त्स्न्येन यावता कालेनायनद्वयात्मकेन भुञ्जीत द्वादशराश्यात्मकं कृत्स्नं नभोमण्डलं भानोर्मन्दादिगतिभिर्यावता कालेन सञ्चरितं भवति तं कालं सम्वत्सरादिकमिति समामनन्ति इत्यर्थः अत्रेदमवधेयं यदा शुक्लप्रतिपदि संक्रान्तिभवति तदा सौरचान्द्रमानयोर्युगपदुपक्रमो भवति स सम्वत्सरः सौरमानवर्षे षड् दिनानि वर्द्धन्ते चन्द्रमानेन षट् ह्रसन्तीति द्वादश दिनव्यवधानादुभयोरग्रपश्चाद्भावो भवति एवं पञ्च वर्षाणि गच्छन्ति तन्मध्ये द्वौ मलमासौ भवतः ततः पुनः षष्ठः सम्वत्सरो भवति तदेवमवान्तरभेदेन सम्वत्सरपरिवत्सरेडावत्सरानुवत्सरादिक्रमेण समामनन्तीति ॥ ५ ॥ ६ ॥ ७ ॥

एवं सूर्यस्य गतिभेदस्तत्कृतः कालविभागश्चोक्तः अथ सोमबुधशुक्रादीनां स्थानानि तद्गतिभेदान् तत्कृतशुभाशुभादिकार्यं चाह। एवमित्यादिना यावदध्यायम्। अर्कगभस्तिभ्यो मण्डलरूपेभ्यः लक्षयोजनतः उपरिष्टादुपलभ्यमानः द्रुततरगमनोऽत एव उग्रं चरतीत्युग्रचारी सन्नर्कस्य या सम्वत्सरभुक्तिः सम्वत्सरेण द्वादशराशिसञ्चारात्मिका भुक्तिः तां पक्षाभ्यामेव भुक्तं करोति एवमर्कस्य या मासभुक्तिः तां सपादर्क्षाभ्यां पादाधिकाभ्यां नक्षत्राभ्यां सपादनक्षत्रद्वयाभिमुखगमनेनैव सार्द्धसप्तोत्तरषष्टिमुहूर्त्तात्मककालेनेति यावत् पक्षभुक्तिं दिनेनैव त्रिंशन्मुहूर्त्तात्मककालेनैव करोतीत्यर्थः ॥ ८ ॥

अथ हे राजन्! पूर्यमाणाभिः शुक्लपक्षेऽपक्षीयमाणाभिः कृष्णपक्षे कलाभिः विभक्ताभ्यां पूर्वपक्षापरपक्षाभ्यां शुक्लकृष्णपक्षाभ्यां पितृणामहोरात्राण्यहोरात्रात्मकमेकं दिनं कुर्वाणः सर्वेषां जीवसमूहानां प्राणः प्राणाप्यायनकरः अत एव जीवः जीवयतीति जीवः जीवनहेतुः एवंभूत एकमेकं नक्षत्रं त्रिंशता मुहूर्तैर्भुङ्क्ते षोडशकला यस्य स एव पुरुषश्चन्द्रशरीरको भगवान्मनोमयः मानसाधिदेवतात्वादन्नमयः ओषधीशत्वादमृतमयः सर्वप्राणिजीवनहेतुत्वाद्देवादीनां ये प्राणास्तेषामाप्यायनस्वभावत्वात्सर्वमय इति वर्णयन्ति तत्स्वरूपज्ञा इति शेषः ॥ ९ ॥ १० ॥

ततश्चन्द्रमण्डलस्योपरिष्टात्त्रिलक्षयोजनतः अभिजिता सहाष्टाविंशतिर्नक्षत्राणि भवन्ति तथा च श्रुतिः कालायने कालचक्रे ईश्वरेणान्तरात्मभूतेन चोदितानि प्रेरितानि मेरुं प्रदक्षिणेनैव न तु तेषां सूर्यादिवत् पृथगन्या गतिरस्तीत्यर्थः उत्तराषाढाश्रवणसन्धावभिजिन्नामनक्षत्रं फलविशेषेण पृथक्कल्पितं तेन सहाष्टाविंशतिर्नक्षत्राणि भवन्ति तथा च श्रुतिः "अभिजिन्नाम नक्षत्रमुपरिष्टादाषाढानाम्,,इति ॥ ११ ॥

ततो नक्षत्रमण्डलद्द्विलक्षयोजनत उपर्युशना शुक्रः उपलभ्यते सचार्कस्य पुरतः पश्चात् पुरतः सूर्येण भोक्ष्यमाणं नक्षत्रं पश्चाद्भुङ्क्ते सहैव भुज्यमामे तु नक्षत्रे शैघ्र्यादिगतिभिरर्कवच्चरति स च लोकानां सदानुकूल एव वर्त्तते यस्य शुक्रस्य चारेण क्रमस्थनक्षत्राद्यतिक्रमेण प्रायशो वर्षं वृष्टिरनुमीयतेऽतः स वृष्टिविष्टम्भग्रहोपशमनः वृष्टेर्विष्टम्भस्तम्भनं यस्माद्ग्रहात्तमुपशमयतीति तथा उशनसा शुक्रेणेति प्रकारेण बुधोऽपि बुधगतिरपि व्याख्यातेत्यर्थः सूर्यस्य पुरः पश्चात्सहैव वा चरतीति व्याख्यात इति भावः किञ्चिद्विशेषमाह। तत इत्यादिना। ततः शुक्रमण्डलाद्द्विलक्षयोजनत उपरि सोमस्य सुतो बुधः उपलभ्यमानः लोकानां प्रायेणाशुभकृत् दुःखकृत् अशुभकृत्त्वमेवाह। यदार्काद्व्यतिरिच्यतेऽर्केण सह न चरति तदातिवातः अभ्रप्रायं मेघप्राचुर्यमनावृष्टिरित्यादिरूपं भयमाशंसते सूचयति ॥ १२ ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अथ स इति तच्छब्देन सूर्यान्तर्यामी नारायणः परामृश्यते प्रस्तुतत्वाल्लोकानामात्मेत्युक्तेश्च अथशब्दान्नारायणाधिष्ठानभूतः सूर्यो वा द्यावापृथिव्योरन्तरेण मध्ये स्थितस्य नभोवलयस्य मध्यवर्ती कालचक्रगतः भुङ्क्ते वर्तयति राशीनां संज्ञा येषां मासानां ते तथा तान् मेषवृषादीनित्यर्थः सम्वत्सरस्य द्वादशांशो मास इति ज्ञापनाय सम्वत्सरावयवानिति विशेषणं पक्षद्वयमित्यनेन मासपरिमाणं सपादर्क्षद्वयमित्यनेन नक्षत्रनिमित्तमासपरिमाणं तिथ्यात्मककालांशभोक्तृत्वं चेत्यनेनोक्तं कृत्तिकापादयुक्ताश्विनीभरण्यौ मेष इत्यादिक्रमेण बोद्धव्यं पक्षद्वयात्मककालभोगेन सह सपादर्क्षद्वयात्मकालस्य भुज्यमानत्वादुभयं च युज्यत इत्यर्थः सम्वत्सरस्य षष्ठमंशं मासद्वयं यावता कालेन नभोवीथ्या अर्द्धेन प्रचरति तं कालमयनमाहुः । दक्षिणायनमुत्तरायणमुत्तरायणे मन्दगतिर्दक्षिणायने त्वरिता गतिर्विषुवे समाना गतिरिति ॥ ५ ॥ ६ ॥

द्यावापृथिव्योर्मण्डलाभ्यां सह नभोमण्डलं प्रचलति तं कालं सम्वत्सरादिपञ्चभेदेन सूर्यस्य मन्दादिगतिभेदाद्वदन्ति तज्ज्ञा इति शेषः ॥ ७ ॥

अर्कस्य सम्वत्सरभुक्तिं द्वादशराशिप्राप्तिं पक्षाभ्यां शुक्लकृष्णसंज्ञाभ्यां भुङ्क्ते मासभुक्तिं सपादर्क्षाभ्यां सकृत्तिकाश्विनीभरणीभ्यामित्यादिक्रमेण प्राप्नोति पक्षभुक्तिमेकनक्षत्रसम्मितां दिनेनैव भुङ्क्ते चन्द्र इत्यर्थः अत्र हेतुमाह । अग्रचारीति । नक्षत्राणामग्रणीत्वमग्रचारित्वम् ॥ ८ ॥

सर्वजीवराशिचेष्टकः जीवश्च प्राणधारकश्च दिनेन पक्षभुक्तिं स्पष्टयति । एकमिति । त्रिंशन्मुहूर्तैस्त्रिंशद्भिर्मुहूर्तैः ॥ ९ ॥

सर्वजीवितवद्प्राण इत्युक्तं स्पष्टयति । देवेति । उपजीव्यप्रधानत्वात्सर्वमय इत्यर्थः ॥ १० ॥

कालानयने तादर्थ्ये सप्तमी कालज्ञापनार्थमीश्वरनियुक्तानि कालचक्र इति वा अभिजिदुत्तराषाढाश्रवणयोः संयोगः अश्विनीरेवत्योः सन्धिरिति केचित् ॥ ११ ॥

यस्यो शनसः स्थितिद्वारेण वृष्टिविष्टम्भग्रहोऽङ्गारकः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पक्षद्वयं मास इत्युपदिशन्ति । चान्द्रेण मानेन दिवा नक्तं चेत्युपदिशन्ति पैत्र्येण सपादर्क्षद्वयञ्च मास इत्युपदिशन्ति सौरेण ॥ ५—७ ॥

उच्चारणशीलत्वादेव द्रुततरगमनः ॥ ८—१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सूर्यगत्यैव मासादिव्यवहार इत्याह । अथेति । द्यावापृथिव्योर्मध्ये यन्नभोवलयं तस्य कालचक्रगतः तत्सम्बन्धिज्योतिश्चक्रस्थितः मास एव कस्तत्राह । पक्षद्वयं मास इति । चान्द्रेण मानेन दिवा नक्तमिति पैत्र्येण सपादनक्षत्रद्वयं सौरेण । खगम्यस्य नभोमण्डलस्य यावता द्वादशमंशं भुङ्क्ते सूर्यः स कालो मासः अत्रानुक्तोऽपि ज्ञेयः षष्ठमंशं मासद्वयम् अर्द्धेन अर्द्धं मासषट्कं भुङ्क्ते इत्यर्थः ॥ ५ ॥ ६ ॥

द्यावापृथिव्योरिति द्युमण्डलपृथिवीमण्डलयोर्मध्यवर्त्तिना नभोमण्डलेन तुल्यत्वमेव ज्ञापितं नत्वन्यथाधिक्यं सम्वत्सरादिनामभेदः सौरचान्द्रादिकल्पोपयोगित्वेन तृतीयस्कन्ध एव विवृतः ॥ ७ ॥

चन्द्रादीनामपि स्थानं कार्यञ्चाह । अर्कगभस्तयोऽर्कमण्डलं ततः लक्षेति भूतलाद्विलक्ष इत्यर्थः । सपादर्क्षाभ्यां सपाददिनद्वयेन दिनेनैवेति । यद्युग्रचारी कदाचित्स्यात् तदा द्रुततरगमनः सन् दिनेनैव पक्षभुक्तिं भुङ्क्ते अन्यदा तु सार्द्धसप्तघटिकोत्तरेण दिनेन ॥ ८ ॥

आपूर्यमाणाभिरिति शुक्लकृष्णपक्षाभ्यां देवानामहोरात्रौ । शुक्लकृष्णपक्षाभ्यां पितृणामिति देवपितृपूजार्थं देवपित्रोरहोरात्रव्यवस्थेत्यर्थः । ओषधीशत्वेनान्नमयत्वात् प्राणः । "अन्नं हि प्राणिनां प्राणः" इति स्मृतेः । अत एव जीवनहेतुत्वादमृतमयत्वाच्च जीवः ॥ ९ ॥

मनसोऽधिष्ठातृत्वान्मनोमयः ॥ १० ॥

त्रिलक्षेति भूतलात्तु पञ्चलक्षतः दक्षिणेनैवेति तेषां पृथग्गत्यभावात् । कालायने कालचक्रे सहाभिजितेति "अभिजिन्नाम नक्षत्रं उपरिष्टादाषाढानामधस्ताच्छ्रोणाया" इति श्रुतेः । "उत्तराषाढाशेषार्द्धात् श्रवणादौ लिप्तिकाचतुष्के च अभिजित्"इति ज्योतिषाच्च लिप्तिका दण्डः ॥ ११ ॥

द्विलक्षेति । भूतलात्तु सप्तलक्षतः चारेण सञ्चारेण वृष्टेर्विष्टम्भः स्तम्भनं यस्मात्स प्रतिष्टम्भमुपशमयतीति सः ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सूर्य एव खगत्या मासादिव्यवहारहेतुरित्याह । अथेति । लोकानामात्मा परमपुरुषतयोपास्यत्वाद्द्यावापृथिव्योरन्तरेण मध्ये यन्नभोवलयमन्तरिक्षं तस्य मध्ये यत्कालचक्रं तस्य गतिराशिभिः संज्ञा येषां तान् मासान् भुङ्क्ते चैत्रादिसंज्ञास्तु चान्द्रमासानां मासमाह । पक्षद्वयं मास इति । चान्द्रेण मानेन सपादं महान्नक्षत्रद्वयं मास इति सौरेण मानेन दिवा नक्तमहोरात्रं मास इति च पैत्र्येण मानेनोपदिशन्ति मासद्वाः षष्ठमंशं राशिद्वयं भुञ्जीत चरेत् ॥५—६॥

स हि सूर्यः द्यावापृथिव्योर्मण्डलाभ्यां सह सम्मितं नभोमण्डलं कार्त्स्न्येन यावद्भुञ्जीत तं कालं भानोरेव मन्दादिगतिभिरवान्तरभेदवशात् संवत्सरादिपञ्च समामनन्तीत्यन्वयः । यदा शुक्लप्रतिपदि संक्रान्तिर्भवति तदा सौरचान्द्रयोर्मासयोर्युगपदुपक्रमो भवति स संवत्सरः ततः सौरमानेन वर्षे षड् दिनानि वर्धन्ते चान्द्रमानेन षड् दिनानि ह्रसन्तीति द्वादशदिनव्यवधानादुभयोरग्रपश्चाद्भावो भवति एवं पञ्च वर्षाणि गच्छन्ति तन्मध्ये द्वौ मलमासौ भवतः ततः पुनः षष्ठः सम्वत्सरो भवति तदेवमवान्तरभेदेन सम्वत्सरादिपञ्चसमा भवन्ति ॥ ७ ॥

अर्कगभस्तिभ्यो मण्डलरूपेभ्यः सपादर्क्षाभ्यां पादाधिकाद्दिनयुग्मेन ॥ ८ ॥

आपूर्यमाणाभिः शुक्लपक्षे अपक्षीयमाणाभिः कृष्णपक्षे पितृरूपाणाममराणां देवानामहोरात्राणि वितन्वानः सर्वेषां जीवनि-

उशनसा बुधो व्याख्यातस्तत उपरिष्टाद्द्विलक्षयोजनतो बुधः सोमसुत उपलभ्यमानः प्रायेण शुभकृद्यदा (१) र्कादृयतिरिच्येत तदातिवाताभ्रप्रायानावृष्ट्यादिभयमाशंसते ॥ १३ ॥

अत (२) ऊर्ध्वमङ्गारकोऽपि योजनलक्षद्वितय उपलभ्यमानस्त्रिभिस्त्रिभिः (३) पक्षैरेकैकशो राशीन् द्वादशानुपभुङ्क्ते यदि न (४) वक्रेणाभिवर्त्तते प्रायेणाशुभग्रहोऽघशंसः ॥ १४ ॥

तत उपरिष्टाद्द्विलक्षयोजनान्तरगतो भगवान् बृहस्पतिरेकैकस्मिन् राशौ परिवत्सरं चरति यदि न वक्रः स्यात् प्रायेणानुकूलो ब्राह्मणकुलस्य ॥ १५ ॥

तत उपरिष्टाद्योजनलक्षद्वयात् प्रतीयमानः शनैश्चर एकैकस्मिन् राशौ त्रिंशन्मासान्विलम्बमानः सर्वानेवानुपर्येति तावद्भिरनुवत्सरैः प्रायेण हि सर्वेषामशान्तिकरः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

वहानां प्राणाः अन्नमयत्वादमृतमयत्वाच्च अत एव जीवयतीति जीवः ॥ ९ ॥ १० ॥

कालायने कालचक्रे सहाभिजितेति उत्तराषाढाश्रवणसन्धौ फलविशेषार्थं पृथक्कल्पितेनाभिजिन्नक्षत्रेण सहाष्टाविंशतिः तथा च श्रुतिः।

"अभिजिन्नाम नक्षत्रमुपरिष्टादाषाढानामधस्ताच्छ्रोणायाः"। इति ॥ ११ ॥

चारेण कमस्यनक्षत्राद्यतिक्रमेण प्रायेण वर्षयन् वृष्टिं प्रवर्तयँल्लोकानामनुकूलोऽनुमीयते निश्चीयते अत एव स शुक्रः वृष्टेर्विष्टम्भः स्तम्भनं यस्माद्ग्रहात्तमुपशमयतीति तथा ॥ १२ ॥

भाषा टीका।

इस के अनन्तर यही सब लोकों के आत्मा भगवान् सूर्य आकाशपृथिवी के मध्यमे खगोल के काल चक्र मे प्राप्त होकर सम्वत्सर के अवयव राशि संज्ञक बारा महिनों को भोगते हैं महिना पक्ष दिन रात सवादो नक्षत्र जिस मे भोग होते हैं जितने काल मे वर्ष के छठे अंश को भोगते हैं सो काल सम्वत्सर का अव यव ऋतु कहाता है ॥ ५ ॥

और जितने वर्ष के अर्धभाग से आकाश मार्ग मे सूर्य विचरते हैं तिस काल को अयन कहते हैं ॥ ६ ॥

और जितने काल मे आकाश पृथिवी के सहित खगोल को भोगते हैं उस सम्पूर्ण भोग के काल को सम्वत्सर कहते हैं तसम सूर्य के मन्दशीघ्र समान गति के भेद से संवत्सर परिवत्सर इडावत्सर अनुवत्सर वत्सर ऐसे पांच भेदों को कथन करते हैं ॥ ७ ॥

इसी प्रकार सूर्य के किरणों से ऊपर लाख योजन दीखता हुआ चंद्रमा सूर्य के वर्ष के भोग के काल को दो पक्ष मे मास के भोग को सवादो दिनों में पक्ष के भोग को एक दिन में भोगता हुआ जलदी चलने से आगे चलने वाला भोग करता है ॥ ८ ॥

और भी पूर्ण होती हुई कलाओं से पहिले शुक्ल पक्ष में देवतों के अहोरात्र चन्द्रमा भोग करते हैं औ क्षय होती कलाओं से दूसरे पक्ष मे पितरों के अहोरात्र को विधान करते हैं इस प्रकार सब के जीवन हेतु चन्द्रमा जीवरूप होकर एक एक नक्षत्र को तीस मुहूर्त मे भोगते हैं ॥ ९ ॥

जो यह षोडश कलावाला चन्द्रमा है सो भगवान् सब का मनरूप अन्नरूप अमृत रूप देवता पितर मनुष्य भूत पशु पक्षि सर्प लता इन सबों के पोषण करने मे तत्पर होने से इन को सर्व मय कहते हैं ॥ १० ॥

तिस के ऊपर तीन लक्ष योजन पर नक्षत्र हैं मेरु के प्रदक्षिणा मे काल चक्र में ईश्वर के नियोजित हैं सो अभिजित् के सहित अट्ठाइस हैं ॥ ११ ॥

उस के ऊपर दो लाख योजन मे शुक्र दीखता है सो अपनी शीघ्र मन्द गति के भेद से कभी सूर्य के साथ कभी आगे कभी पीछे सूर्य सरीका चलता है सो वृष्टि के रोकने वाले ग्रहों का नाश करने वाला होने से वृष्टि कर के सब भूतों के अनुकूल रहता है नक्षत्रों की गति से जाना जाता है ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

बुधो व्याख्यातः पुरतः पश्चात्सहैव वा चरतीति किञ्चिद्विशेषं चाह। तत इत्यादिना। आशंसते सूचयति ॥ १३ ॥

अघशंसो दुःखसूचकः। यदि न वक्रेणाभिवर्तते तर्हि त्रिभिस्त्रिभिः पक्षैः ॥ १४ ॥

यदि न वक्रः स्यात्तर्हि परिवत्सरम् ॥ १५ ॥ १६ ॥ १७ ॥

(१) यदार्कमतिरिच्येत (२) ततः (३) त्रिभिःना० (४) वक्रोऽतिवर्तते (५) एवं।

तत उत्तरस्मादृषय एकादशलक्षयोजनान्तर उपलभ्यन्ते य एव [१] लोकानां शमनुभावयन्तो भगवतो विष्णोर्यत् परमं पदं प्रदक्षिणं प्रक्रमन्ति ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे ज्योतिश्चक्रसूर्यरथमण्डलवर्णनं नाम द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो बुधमण्डलाद्द्विलक्षयोजनतः उपरिष्टादङ्गारक उपलभ्यमान एकैकं राशिं पक्षत्रयेण भुङ्क्ते यदि न वक्रेणाभिवर्तते त्रिभिस्त्रिभिः पक्षैर्यदि न वक्रस्थः स्यात्तर्हि द्वादशराशीन् क्रमेण भुङ्क्ते इति पूर्वेणान्वयः अयं प्रायेणाशुभग्रहोऽघशंसः दुःखसूचको वेत्यर्थः । यद्वा । यदि न वक्रेणाभिवर्त्तते तदानुकूल इति शेषः यदि वक्रेणाभिवर्त्तते तदाघशंसोऽपीत्यन्वयः ॥ १४ ॥

ततोऽङ्गारकमण्डलाद्द्विलक्षयोजनानामन्तर उपरि तेन उपरि भागं गतो भगवान् बृहस्पतिरेकैकस्मिन् राशौ परिवत्सरं परिचरति सोऽपि यदि न वक्रः स्यात्तर्हि ब्राह्मणकुलस्य प्रायशोऽनुकूलः ततो बृहस्पतिमण्डलाद्योजनानां लक्षद्वयादुपरि शनैश्चरः प्रतीयमान उपलभ्यमान एकैकस्मिन् राशौ त्रिंशत्त्रिंशन्मासान् विलम्बमानः शनैः शनैर्गच्छन् सर्वानेव द्वादश राशीन् उपर्येति क्रमेण सञ्चरति तावद्भिः परिवत्सरैर्द्वादशजन्मादिराश्यवस्थानसहचरितत्रिंशत्त्रिंशन्मासानां गणनावशात् सम्पन्नैरनुवत्सरैः प्रायशः सर्वेषामशुभकरः इत्यर्थः ॥ १५ ॥ १६ ॥

ततः शनैश्चरमण्डलादुत्तरस्मादुपरिष्टादेकादशलक्षयोजनानामन्तरे देशे सप्तर्षय उपलभ्यन्ते के ते ये ऋषयः लोकानां शं सुखमेवानुभावयन्तः सम्पादयन्तः विष्णोर्यत्पदं स्थानं परममुत्कृष्टं ध्रुवमण्डलं तत्प्रदक्षिणं यथा तथा परिक्रमन्ति परिभ्रमन्ति ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सर्वोपशान्तिकृत् शुभग्रहसंयोगे शुभसूचकोऽन्यथाघशंसो दुःखसूचक इत्यतः प्रायेणाशुभग्रह इति ॥ १३—१५ ॥

तावद्भिस्त्रिंशद्भिरनुवत्सरैः सर्वराशीननुपर्येति राशिषु विलम्ब्य सञ्चरणाच्छनैश्चर इति नाम प्रायेणैकादशे शुभकरत्वात् ॥ १६—१७ ॥ (१)

(१) श्रीविजयध्वजतीर्थमते अत्राध्यायसमाप्तिर्नास्ति किन्तु त्रितीयाध्यायान्ते एव ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

उशनसा बुधो व्याख्यात इति पुरतः पश्चात् सहैव वा चरतीत्यंशेन तत्तुल्यः द्विलक्षेति भूतलात्तु नवलक्ष इत्यर्थः ॥ १३ ॥

लक्षद्वितीय इति भूतलादेकादशलक्षे । यदि न वक्रेणेति पूर्वेणान्वयः । अघशंसः दुःखसूचकः ॥ १४ ॥

द्विलक्षेति । भूतलात्तु त्रयोदशलक्षे यदि न वक्र इति पूर्वेणान्वयः ॥ १५ ॥

योजनलक्षद्वयादिति । भूतलात्तु पञ्चदश लक्षे ॥ १६ ॥

एकादशलक्ष इति । भूतलात्तु षड्विंशलक्षे परमं पदं ध्रुवलोकम् ॥ १७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
द्वाविंशः पञ्चमेऽध्यायः सङ्गतः सङ्गतःसताम् ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

उशनसोपमानभूतेनोपमेयतया बुधः अर्कस्य पुरतः पश्चात्सहैव चरतीति व्याख्यातः किञ्चिद्विशेषं दर्शयति । तत इति । आशंसते द्योतयति ॥ १३ ॥

अघशंसो दुःखद्योतकः यदि वक्रेण नाभिवर्तते अभिवर्तते तदा त्रिभिः त्रिभिः पक्षैः एकैकशो राशीन् भुङ्क्ते ॥ १४ ॥

यदि वक्रो न स्यात्तदा परिवत्सरम् ॥ १५-१७ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
द्वाविंशाध्यायार्थप्रकाशः ॥ २२ ॥

भाषाटीका ।

शुक्र के कथन से बुधका भी कथन होगया तिसके ऊपर दो लाख योजन में जो दीखते हैं सो बुध चन्द्रमा के पुत्र हैं सो प्राय करके सबके शुभ कारक हैं जब सूर्य के सङ्ग से छूटजाते हैं तब अतिचार होनेसे अतिवृष्टि अथवा अनावृष्टि आदि भयको जनाते हैं ॥ १३ ॥

(१) एवामिति श्रीवि० ।

भाषाटीका

इसके ऊपर मङ्गलभी दोलक्ष योजनके ऊपर है तीन तीन पक्षों से एक एक राशी को भोगता हुआ बारा राशियों को भोगता है यदि वक्री होकर न चले तो यह गति है प्राय करके अशुभ ग्रह है पाप का सूचक है ॥ १४ ॥

उस के दो लक्षयोजन में प्राप्त भगवान् बृहस्पति हैं एक एक राशि में एक परिवत्सर चलते हैं यदि वक्र न होवें तो ये मुख्यो प्राय करके ब्राह्मण कुलके अनुकूल हैं ॥ १५ ॥

तिसके ऊपर दो लक्ष योजन ऊपर प्रतीत होने वाला शनैश्चर है सो एक एक राशि मे तीस महिना तक विलम्ब करता हुआ उतने अनुवत्सरों में सबके ऊपर चलता है प्रायः करके सबका अशान्ति करने वाला है ॥ १६ ॥

तिसके उत्तर में एकादश लक्षयोजन में ऋषिगण दीखते हैं जो ऋषि सब लोगों के कल्याण करते हुवे जो विष्णुका परमपद है तिसकी प्रदक्षिणा करते हैं ॥ १७ ॥

इति श्रीभागवत पञ्चमस्कन्ध बाइसमे अध्याय का भाषानुवाद लक्ष्मणाचार्यकृत समाप्त ॥ २२ ॥

॥ १७ ॥ इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे द्वाविंशोऽध्यायः समाप्तः ॥ २२ ॥

त्रयोविंशोऽध्यायः ॥

श्रीशुक उवाच ।

अथ तस्मात्परतस्त्रयोदशलक्षयोजनान्तरतो यत्तद्विष्णोः परमं पदमभिवदन्ति यत्र ह महाभागवतो ध्रुव औत्तानपादिरग्निनेन्द्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः सबहुमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य उपास्ते तस्येहानुभाव उपवर्णितः ॥ १ ॥

स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टम्भ ईश्वरेण विहितः शश्वदवभासते ॥ २ ॥

यथा मेढीस्तम्भ आक्रमणपशवः संयोजितास्त्रिभिस्त्रिभिः सवनैर्यथास्थानं मण्डलानि चरन्त्येवं भगणा ग्रहादय एतस्मिन्नन्तर्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवावलम्ब्य वायुनोदीर्यमाणा आकल्पान्तं (१) परिचङ्क्रमन्ति नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्तन्ते एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः कर्मनिर्मितगतयो भुवि न पतन्ति ॥ ३ ॥

केचनैतज्ज्योतिरनीकं (२) शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयन्ति ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रयोविंशे ध्रुवस्थानं ज्योतिश्चक्राश्रयं ततः ।
शिशुमारस्वरूपेण हरेश्च स्थितिरुच्यते ॥ १ ॥

यत्तत्प्रसिद्धं विष्णोः पदं यत्र ध्रुव उपास्ते तिष्ठतीत्यन्वयः समकालमेव युज्यन्त इति तथा तैर्नक्षत्ररूपैः ॥ १ ॥ २ ॥

मेढीस्तम्भे बद्धा धान्याक्रमणपशवो बलीवर्दाः कर्म सारथिः सहायो येषाम् ॥ ३ ॥

ईश्वराधारत्वात्पतनशङ्कैव नास्तीति वक्तुं मतान्तरमाह । केचनेति । ज्योतिरनीकं ज्योतिश्चक्रं योगधारणायां स्थितमिति शेषः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं सूर्यादीनां गतिविशेषास्तत्स्थानविशेषाः कार्यविशेषाश्चोक्ताः अथ ध्रुवस्य स्थानं व्यापारं चाह । अथेति । तस्मादृषिमण्डलात्परतस्त्रयोदशलक्षयोजनानां परस्ताद्यत्तत्प्रसिद्धं विष्णोः परमपदमामनन्ति विष्णोरभिव्यक्तिस्थानत्वात्परमं पदमित्युक्तं कितत्परमं पदं तदाह । यत्रेति । यत्र परमे पदे महाभागवतो औत्तानपादिः उत्तानपादपुत्रः अग्न्यादिभिः सबहुमानं प्रदक्षिणतः क्रियमाणः उपास्ते तिष्ठति तस्य ध्रुवस्यानुभावः प्रभावः उपवर्णितश्चतुर्थस्कन्धे इति शेषः ॥ १ ॥

स हि ध्रुवः भगवदात्मकेनानभिव्यक्तवेगेन कालचक्रेण भ्राम्यमाणानां ग्रहाणां सूर्यादीनामश्विन्यादिनक्षत्राणां च सर्वेषां स्थाणुरिव निश्चलोऽवष्टम्भोऽवलम्ब ईश्वरेण विष्टम्भत्वेन विहितः स्थापितः शश्वत् सदा एकत्रैवावभासते ॥ २ ॥

स्थाणुरिवावष्टम्भ इत्येतद्दृष्टान्तेनोपपादयति । यथा मेढीस्तम्भः त्रिभिस्त्रिगुणितैः सूत्रैः संयोजिता बद्धा धान्याक्रमणपशवो बलीवर्दाः मेढीस्तम्भमवलम्ब्येह मण्डलानि पादविक्षेपस्थानानि चरन्त्येवं नक्षत्रगणाः सूर्यादयो ग्रहाश्च एतस्मिन् कालचक्रे अन्तर्बहिर्योगेन आयोजिताः केचिदन्तर्योजिताः केचिद्बहिर्योजिताः सन्तो ध्रुवमचलमवलम्ब्यैव वायुना वायुपाशेनोदीर्यमाणाः भ्राम्यमाणा आकल्पान्तं परितः भ्रमन्ति कर्मवशाद्वायुपाशवश्यत्वात् ध्रुवावलम्बत्वाच्च भुवि न पतन्तीति भावः एतदेव दृष्टान्तेन स्पष्टयति । नभसीति । यथा मेघाः श्येनादयः पक्षिणश्च वायुपाशवशाः कर्मसारथयः कर्मावलम्बाः नभसि परिवर्तन्ते न तु भुवि पतन्ति एवं ज्योतिर्गणा अपि प्रकृतिपुरुषयोर्यः संयोगः सम्बन्धः कर्मायत्तः तेनानुगृहीताः नक्षत्रादिरूपतां प्राप्ता जीवा एव कर्मायत्तप्रकृतिसम्बन्धवशान्नक्षत्रादिशरीरभाज इत्यर्थः अत एव कर्मनिमित्ता यासां ता गतयो येषामिति तथा केवलनभःसञ्चारापादककर्मायत्तनभोमात्रगतयो भुवि न पतन्ति कर्मणां तत्परिणामानां च वैचित्र्यादग्न्यूर्ध्वज्वलनवद्वायोस्तिर्यग्गमनवच्च नभसि भ्रमणं भुव्यपतनं च उपपद्यत इति भावः ॥ ३ ॥

एवं ज्योतिर्गणानां कर्मायत्तो नभःसञ्चार उक्तः अथ सर्वाधारस्य भगवत एव शिशुमाराकारेणावस्थितत्वात्तदाश्रयाणां पतनशङ्कैव नास्तीत्यभिप्रयन् ज्योतिर्गणस्य शिशुमाराश्रयत्वं योगिनामुपासनेन स्पष्टयति । केचिदिति । शिशुमारसंस्थानस्य शिशुमारशरीरस्य भगवतो वासुदेवस्य कृत्स्नचिदचिदात्मकजगद्धारकस्य योगधारणायां वासुदेवविषयकमन-

---

(१) परितश्चङ्क्रमन्ति (२) शिशुमारसंस्थानेन । इति श्रीवि० पाठः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

समाधिरूपधारणायामेवैतज्ज्योतिरनीकं ज्योतिर्जालं केचिच्छेद-भागे योगिनो वर्णयन्ति ज्योतिरनीकाश्रयं शिशुमारं भगवदात्मकमुपास्यं बोधयन्तीत्यर्थः ज्योतिरनीकाश्रयं शिशुमारं योगधारणायां विषयीकुर्वन्तीति वार्थः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ध्रुवेण समकालं सायुज्यमाभिरुपास्ते श्रीहरिमिति शेषः ॥ १ ॥

मतिमिषेणोत्सीलितलोचनेन क्रमणपशवः परिवर्त्तमाना बलीवर्दा मेढीस्तम्भे बद्धास्तामभितो भ्रमन्त इत्यर्थः त्रिभिः सवनैः शैघ्र्यमान्द्यसमसञ्चारैर्यथास्थानं विहितादन्यथा न कचिच्चरन्ति भूमण्डलानि मेढीस्तम्भं परितः स्थानानि आदिशब्दगृहीतास्तारकाः केचिद्ध्रुवस्यान्तर्योगेन केचिद्बाह्ययोगेन सञ्चरन्तीत्यर्थः आवहादिशब्दवाच्येन वायुनोदीर्यमाणाः प्रेर्यमाणाः नन्वेते निरालम्बाः कथं न पतन्तीति तत्राह । यथेति । अयनादिलक्षणं कर्मैव सारथिर्येषां ते तथा औत्पत्तिकवेगाख्यसंस्कारो वा अदृष्टं वा स्त्रीपुरुषसंयोगेनानुगृहीतैरपादितैर्नभःसञ्चरणहेतुभूतैः कर्मभिर्निर्मितगतित्वात् ॥ २ ॥ ३ ॥

शिशुमारसंस्थानस्य शिशुमारावयवोपेतस्य योगबलेन धारणाक्रियायां स्थितिमनुवर्तयन्ति ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

त्रिभिः सवनैः पूर्वमध्यापराह्णेषु कृषककर्तृकपरिवर्त्तनेनेत्यर्थः प्रकृतिपुरुषसंयोगानुगृहीताः पुरुषाधिष्ठितमायावशीकृता ॥ १ ॥ २ ॥ ३ ॥

शिशुमारसंस्थानेनोपवर्णितं योगधारणायां विराड्वदुपासनावेशार्थं यथेष्टकल्पनामात्रमयी तस्यामित्यर्थः । अत एव मनसि चन्द्र इति वक्ष्यमाणेन मनोऽपि कल्पयिष्यते स्पष्टमपि वक्ष्यते एतदुक्तमेवेति ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ध्रुवलोकं त्रयोविंशे प्राह विष्णुपदाभिधम् ।

शिशुमाराकारतया ज्योतिश्चक्रञ्च दर्शितम् ॥ २ ॥

त्रयोदशेति । भूतलादेकोनचत्वारिंशल्लक्षे समकालमेव युज्यन्त इति तैरग्न्यादिभिर्नक्षत्ररूपैः ॥ १ ॥

स्थाणुरिवेति श्लेषेण कालचक्रेण चालयितुमशक्यत्वात् स एवैकः स्थिर इत्यर्थः । प्रत्युत कालचक्रस्यावष्टम्भः । तेन सर्वे कालचक्राधीनाः ध्रुवस्तु कालचक्रमध्यधीनीकरोतीति ध्वनिः । नन्वीदृशी योग्यता तस्य कथमभूत्तत्राह । ईश्वरेण कर्तुमकर्तुमन्यथा कर्तुमपि समर्थेन विहितः स्वभक्तोत्कर्षख्यापनार्थमिति भावः ॥ २ ॥

धान्याद्याक्रमणपशवो बलीवर्दाः खलमध्यनिखातस्तम्भो मेढी तत्र संयोजिताः कर्षणेनेत्यर्थः । त्रिभिः सवनैर्मेढीस्तम्भनिकटमध्यदूरवर्त्तिभिर्विभागैः यथास्थानं स्वस्वस्थानस्थितिमनतिक्रम्य चरन्ति दार्ष्टान्तिके त्रिभिः सवनैरुत्तरायणवैषुवतदक्षिणायनैः समयैः । अन्तरधोऽधः स्थलं बहिरुपर्युपरितनं स्थलं तत्र योगेन स्थित्या कालचक्र एव योजिताः । यथा सप्तर्षीणामधोऽधः स्थित्या आयोजिताः शनैश्चरादयः तथा सूर्यादीनामुपर्युपरि स्थित्या आयोजिताः सोमादयः तत्र तत्र आयोजिताः ईश्वरेणैव वायुना तूदीर्यमाणाश्चालयमानाः । ननु कथन्तेऽन्तरीक्षान्न पतन्ति तत्राह । नभसीति । कर्मसारथयः कर्मसहायाः ॥ ३ ॥

ज्योतिरनीकं ज्योतिश्चक्रम् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

त्रयोविंशे ध्रुवस्थानं शिशुमारचक्रं च वर्णयति । अथेति । यद्विष्णोः परं स्थानं वदन्ति तदस्ति अग्न्यादिभिः समकालि युज्यन्ते इति समकालयुजस्तैर्नक्षत्ररूपैर्बहुमानं यथा भवति तथा दक्षिणतः क्रियमाणः यत्र विष्णुपदे उपास्ते तिष्ठति इह अस्मिन्महापुराणे उपवर्णितः चतुर्थस्कन्धे उक्तः ॥ १ ॥ २ ॥

आक्रमणपशवो धान्याक्रमणपशवो बलीवर्दाः कर्म सारथिः सहायो येषां ते तथा प्रकृतिः कार्यकारणरूपा पुरुषो जीवस्तयोरनादिसंयोगानुगृहीताः प्रकृतिगुणात्परिणामदेहेन्द्रियादियुक्ताः ज्योतिर्गणाभूताः जीवा इत्यर्थः ; कर्मनिमित्ता व्यासाः कृताः गतयो येषां ते भुवि न पतन्ति ॥ ३ ॥

किञ्च पतनशङ्कैव नास्तीत्याह । केचिदिति । कांचान्सकान्तिम इत्यर्थः ज्योतिरनीकं ज्योतिश्चक्रं शिशुमारसंस्थानेन शिशुमाराख्यस्वांशरूपेण या योगधारणा तस्यां स्थितमिति शेषः अनुवर्णयन्ति ॥ ४ ॥

भाषाटीका ।

श्रीशुकदेव जी बोले फिर तिस के ऊपर तेरा लाख योजन के ऊपर वह स्थान है जिस को विष्णु का परमपद कहते हैं जहांपर उत्तानपाद के पुत्र महाभागवत ध्रुवजी हैं अग्नि इन्द्र प्रजापति कश्यप धर्म ये सब एकही साथ मिलकर बड़े सन्मान से उनकी प्रदक्षिणा करते हैं वे ध्रुव जी कल्पांतजीवी पुरुषों के आश्रय होकर अभीभी विराजमान हैं इन के प्रभाव को पहिले वर्णन कर आये हैं ॥ १ ॥

जिस की कभी विश्रान्ति नहीं है जिस का वेग अप्रमत्त है ऐसे भगवान काल से जो ज्योतिर्गण ग्रहनक्षत्रादिक घुमाये जाते हैं उन सबों का रोकनेवाला खम्भरूप ध्रुव जीको ईश्वर ने बना कर स्थापन किया है सो प्रकाशमान हैं ॥ २ ॥

जैसे धानादिकों के खला में खंभेसे बंधे हुये धान में घुमाने के पशु तीन तीन कालों में यथा योग्य मंडलों से घूमते हैं इसी प्रकार सूर्यादिक भगण आदि भीतर से इस काल चक्र में युक्त होकर ध्रुवही को अवलम्बन करने से वायु से प्रेरित होते हैं सो भी कल्प पर्यन्त घूमते रहते हैं आकाश में जैसे मेघ बाज आदि पक्षि वायु के वश में होकर कर्म के सहायता से घूमते हैं इसी प्रकार सब

यस्य पुच्छाग्रेऽवाक्शिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितस्तस्य लाङ्गूले प्रजापतिरग्निरिन्द्रो- धर्म इति पुच्छमूले धाता विधाता च कट्यां सप्तर्षयस्तस्य दक्षिणावर्तकुण्डलीभूतशरीरस्य यान्युदग- यनानि दक्षिणपार्श्वे तु नक्षत्राण्युपकल्पयन्ति दक्षिणायनानि तु सव्ये यथा शिशुमारस्य कुण्डलाभोग- सन्निवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवन्ति पृष्ठे त्वजवीथी आकाशगङ्गा चोदरतः ॥५॥

पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्योरार्द्राश्लेषे च दक्षिणवामयोः पादयोरभिजिदुत्त- राषाढे दक्षिणवामयोर्नासिकयोर्यथासंख्यं श्रवणपूर्वाषाढे दक्षिणवामयोर्लोचनयोर्धनिष्ठामूलं च दक्षि- णवामयोः कर्णयोर्मघादीन्यष्ट नक्षत्राणि दक्षिणायनानि वामपार्श्ववङ्क्रिषु युञ्जीत तथैव मृगशीर्षादीन्यु- दगयनानि दक्षिणपार्श्ववङ्क्रिषु प्रातिलोम्येन प्रयुञ्जीत शतभिषाज्येष्ठे स्कन्धयोर्दक्षिणवामयोर्न्यसेत् ॥६॥

उत्तराहनावगस्तिरधराहनौ यमो मुखेषु चाङ्गारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्या- दित्यो हृदये नारायणो मनसि चन्द्रो नाभ्यामुशना स्तनयोरश्विनौ बुधः प्राणापानयो राहुर्गले केतवः सर्वाङ्गेषु रोमसु सर्वे तारागणाः ॥ ७ ॥

एतदुहैव भगवतो विष्णोः सर्वदेवतामयं रूपमहरहः सन्ध्यायां प्रयतो वाग्यतो निरीक्षमाण उप- तिष्ठेत नमो ज्योतिर्लोकाय कालायनायानिमिषां पतये महापुरुषायाभिधीमहीति ॥ ८ ॥

ग्रहर्क्षतारामयमाधिदैविकं पापापहं मन्त्रकृतां त्रिकालम् ।
नमस्यतः स्मरतो वा त्रिकालं नश्येत तत्कालजमाशु पापम् ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां संहितायां
वैयासिक्यां शिशुमारसंस्थानवर्णनो नाम
त्रयोविंशोऽध्यायः ॥ २३ ॥

भाषा टीका

ज्योतिर्गण प्रकृति पुरुष के संयोग से युक्त होकर कर्म की गति के अनुसार पृथिवी में नहीं गिरते हैं ॥ ३ ॥

कोई महापुरुष इस ज्योतिर्गणको शिशुमार संस्था से भगवान् वासुदेव के योगधारणा में स्थित है, ऐसा कहते हैं ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

लाङ्गूले अग्रादधोभागे उदगयनान्यभिजिदादीनि पुनर्वस्व- न्तानि चतुर्दश दक्षिणपार्श्वे दक्षिणायनानि पुष्यादीन्युत्तराषा- ढान्तानि चतुर्दश वामपार्श्वे ॥ ५ ॥

तदेव स्थानविशेषेण विभज्य दर्शयति । पुनर्वसुपुष्यावित्या- दिना । पुनर्वसुरुदगयनान्त्यं नक्षत्रं पुष्यो दक्षिणायनस्याद्यमार्द्रा- श्लेषे तयोर्निरन्तरे अभिजिदुत्तराषाढे उत्तरदक्षिणायनयोराद्यन्त- नक्षत्रे श्रवणपूर्वाषाढे तयोरुत्तरपूर्वे धनिष्ठामूलं च तयोरप्युत्तर- पूर्वे मघादीनि यान्यनुराधान्तानि दक्षिणायनान्यष्ट तानि वामपा- र्श्ववङ्क्रिषु वामपार्श्वास्थिषु मृगशीर्षादीनि प्रातिलोम्येन पूर्वाभाद्र- पदान्तानि यान्युदगयननक्षत्राण्यष्ट तानि दक्षिणपार्श्ववङ्क्रिषु । शतभिषग्ज्येष्ठे उत्तरदक्षिणायनयोर्मे अवशिष्टे ते स्कन्धयोः ॥ ६ ॥

यमो नक्षत्ररूपः तथा नारायणोऽश्विनौ च ककुदि गलपृष्ठ- शृङ्गे ॥ ७ ॥

ज्योतिषो लोकायाश्रयाय कालायनाय कालचक्ररूपाय नमोऽ- भिधीमहीति मन्त्रेणोपतिष्ठेत ॥ ८ ॥

मन्त्रकृतां पूर्वोक्तं मन्त्रं जपताम् ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एतदेव प्रपञ्चयति । यस्येत्यादिना । यस्य भगवदात्मकस्य कुण्डलीभूतदेहस्य सर्पवत्कुण्डलीभूतो वलयीभूतो देहो यस्य अर्वागधस्ताच्छिरो यस्य अनेनोर्ध्वपुच्छस्येत्यवगम्यते तस्य शिशु- मारस्य पुच्छाग्रे ध्रुव उपकल्पितः उपास्यः योगिभिरिति शेषः शिशुमारावयवेषु यत्र यस्यावस्थानं तदाश्रयत्वेन तत्र तस्याव- यवस्योपासनं कृतं किञ्चित्तथैवाधुनापि कर्तव्यं तेषामवस्थिति-

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

स्तत्र तत्रैव ज्ञेयेत्यत्र प्रतिपाद्यते पुच्छाग्रे हि ध्रुवो व्यवस्थितः तथाच श्रीवैष्णवे पुराणे ।

उत्तानपादपुत्रस्तु तमाराध्य जगत्पतिम् ।
स तारशिशुमारस्य ध्रुवः पुच्छे व्यवस्थितः ॥

इति तस्य शिशुमारस्य लाङ्गूले पुच्छाग्रादधोभागे प्रजापत्यादयश्चत्वारो व्यवस्थिताः अतः प्रजापत्याद्याश्रयत्वेन लाङ्गूलोपासनं कर्तव्यमित्यर्थः एवमुत्तरत्रापि द्रष्टव्यम् । पुच्छस्य मूले धाता विधाता चोपकल्पित इत्यनुषङ्गः कट्यां सप्तर्षय इत्यत्रापि प्रजापत्यादयश्चैव व्यवस्थिताः लाङ्गूले प्रजापतिः प्रजापतेरधस्तादग्निस्ततोऽधस्तादिन्द्रः ततोऽप्यधो धर्म इति तस्य दक्षिणावर्तकुण्डलीभूतशरीरस्य दक्षिणपार्श्वे यान्युदगयननक्षत्राण्यभिजिदादीनि पुनर्वस्वन्तानि चतुर्दश उपकल्पयन्ति उपासते यानि दक्षिणायननक्षत्राणि पुष्यादीन्युत्तराषाढान्तानि च तानि वामपार्श्वे उपकल्पयन्ति एतदेव स्थानविशेषेण विभज्य दर्शयितुं दक्षिणोत्तरपार्श्वयोरवयवसाम्यं तावदाह । यस्येति । कुण्डलाकारः सर्पाकारः सन्निवेशो यस्य तस्य शिशुमारस्य उभयोरपि पार्श्वयोर्यावयवाः समसङ्ख्या भवन्ति तस्य पृष्ठे त्वजवीथी नाम सूर्यस्य दक्षिणायनमार्गविशेषः उदरे आकाशगङ्गा उपकल्पिता आर्द्रेत्यादि युञ्जीत ॥ ५ ॥

स्थानविशेषेणोभयनक्षत्राणां स्थानविभागकल्पनामाह । पुनर्वस्वित्यादिना । पुनर्वसुरुदगयनान्तं नक्षत्रं पुष्योदक्षिणायनस्याद्यस्तावुभौ क्रमेण दक्षिणवामयोः श्रोण्योरुपकल्प्यौ आर्द्रेत्यादियुञ्जीतानुसन्दधीत उत्तरायणनक्षत्रेष्वभिजिदादिषु पुनर्वस्वन्तेषु पुनर्वस्वार्द्राभिजिच्छ्रवणधनिष्ठा दक्षिणश्रोणिपादनासिकालोचनकर्णनासिकास्थानेषु ज्ञेया । मृगशीर्षरोहिणीकृत्तिकाभरण्यश्विनीरेवत्युत्तराभाद्रपूर्वाभाद्रपद अष्टौ नक्षत्राणि दक्षिणपार्श्वेऽवगन्तव्यानि शतभिषग्दक्षिणस्कन्धे दक्षिणायननक्षत्रेषु पुष्यप्रभृत्युत्तराषाढान्तेषु पुष्याश्लेषोत्तराषाढापूर्वाषाढामूलाख्यानि पञ्च नक्षत्राणि पादनासिकालोचनकर्णस्थानेषु योज्यानि मघादीन्यनुराधान्तानि क्रमेणाष्टौ नक्षत्राणि वामपार्श्वे योज्यानि ज्येष्ठाख्यं वामस्कन्धे योज्यं हनुः कपोलप्रदेशः अगस्त्ययमावपि नक्षत्ररूपेण वर्तेते इत्यभिप्रायः बृहस्पतिः ककुदि गलपृष्ठे केतव इति बहुवचनं केत्वाकारनक्षत्राणां तारासङ्घाताभिप्रायेण प्रयुक्तं शेषं स्पष्टम् ॥ ६—७ ॥

एवं प्रतिनियतस्थानग्रहनक्षत्रतारामयं शिशुमारचक्रं नित्यमुपास्यमित्याह । एतदिति । एतदुदेव एतद्धि सर्वदेवतामयं भगवतो विष्णो रूपं शरीरं शिशुमारचक्रम् अहरहः सन्ध्यायां प्रयतः समाहितचित्तो वाग्यतो मौनी सन्निरीक्षमाण उपतिष्ठेत वक्ष्यमाणमन्त्रेण स्तुवीत मन्त्रमेवाह । नम इति । ज्योतिषां लोकाय कालायनाय कालस्याश्रयभूताय कालचक्रस्वरूपाय वा अनिमिषां ब्रह्मादीनामपि पतये तेषामपि कालवश्यत्वान्महापुरुषाय परमपुरुषात्मकाय नमः अभिधीमहीति उक्तरूपं महापुरुषं ध्यायेम इत्यर्थः ॥ ८ ॥

एतं शिशुमारचक्रे मग्नतोऽनुसन्धानतमस्कारयोः फलमाह । ग्रहर्क्षेति । ग्रहनक्षत्रतारामयमाधिदैविकमधिदैवे वर्तमानं दुर्लभ्यः उत्कृष्टमित्यर्थः हरे रूपं शिशुमारं त्रिकाले नमस्यतः नमस्कुर्वतः स्मरतो वा त्रिकालं मन्त्रकृतां उक्तमन्त्रं जपतां वा तत्कालजं पापमाशु शीघ्रं नश्येत नष्टं भवेदित्यर्थः तत्कालजमित्यनेन तत्तद्भूतभविष्यद्वर्तमानकालजं विवक्षितम् ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कुण्डलीभूतदेहस्य वक्रीकृतशरीरस्य पुच्छाग्रे उपकल्पितो ध्रुवः पुच्छाग्रव्यतिरिक्ते स्थले लाङ्गूले पुच्छमध्य इत्यर्थः यान्युदगयनानीत्यादिर्विस्तरो मघादीनीत्यादिः प्रातिलोम्येन पूर्वाभाद्रपदामारभ्य मृगशीर्षान्तानीति ॥ ५—७ ॥

अनिमिषा देवास्तेषां नाथाय क्विप्प्रत्ययान्तत्वेनानिमीतीतिरूपं सिद्ध्यति ॥ ८ ॥

शिशुमाररूपस्य हरेः प्रयोजनमाह । ग्रहेति । नमस्कृतो जपतो नमस्यतो नमस्कारं कुर्वतः पुंस इति शेषः प्रातरादित्रिकाले कृतं पापं क्षयं सर्वात्मना नश्यते इत्यन्वयः वा इत्यनेन "नारायणो नाम नरो नराणाम्" इत्यादिवाक्यं प्रमाणयति ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र कुण्डलीभूतस्य पार्श्वतः न तु पृष्ठतः क्रोडतो वा अत एव दक्षिणपार्श्वे उदगयनानि मन्तव्यानि अत्र यद्विपरीतं दृश्यते तत्तु मण्डलत्वेऽपि निगूढवीथी बहुधा चक्रत्वे मन्तव्यम् । अतो मार्गेण्यादीनां हृदयादौ स्थितत्वमिति । अजवीथी दक्षिणमार्गस्य प्रथमो भागः । "मूलाषाढोत्तराषाढा अजवीथीति शब्दिता" इति तत्रोक्तेः अग्रे तु यदेषां कर्णादौ स्थितिर्वक्ष्यते तत्र तत्रापि तत्तदङ्गस्य क्रोडभागो मन्तव्यः आकाशगङ्गायाश्च क्रोडसंस्थत्वे तत्रागमनात् ॥ ५ ॥ ६ ॥

अङ्गारकादीनां शङ्कमन्तस्थलेनत्वेऽपि तत्तदङ्गस्थितत्वमङ्गानाञ्चलनत्वमननात् ॥ ७—९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

उदगयनानि अभिजिदादीनि पुनर्वस्वन्तानि चतुर्दश दक्षिणपार्श्वे दक्षिणायनानि पुष्यादीनि उत्तराषाढान्तानि चतुर्दश वामपार्श्वे अजवीथी दक्षिणमार्गस्य प्रथमो भागः ॥ ५ ॥

उक्तान्येव नक्षत्रस्थानानि विशेषेण विभज्य दर्शयति । पुनर्वसुपुष्यावित्यादिना । वामपार्श्वस्य वह्निषु अस्थिषु प्रातिलोम्येन मृगशिरोरोहिणीकृत्तिकेत्येवं व्युत्क्रमेण पूर्वभाद्रपदान्तान्यष्ट दक्षिणपार्श्वास्थिषु ॥ ६—८ ॥

मन्त्रकृतां पूर्वोक्तमन्त्रं जपतां पापापहमाधिदैविकं परमेश्वरस्य रूपमिदं नमस्यतः स्मरतो वा पुंसः पापं नश्येतेत्यन्वयः अत्र सूर्यमण्डलादष्टत्रिंशल्लक्षे ध्रुवः ध्रुवात् कोटियोजने महर्लोकः महर्लोकात् कोटिद्वये जनलोकः जनलोकात् कोट्यष्टके तपोलोकः । तपोलोकाद्द्वादशकोटिषु सत्यलोकः । एवं सूर्यात् सत्यलोकपर्यन्तमष्टात्रिंशल्लक्षोत्तरत्रयोविंशतिकोट्यः सत्यलोकाद्विषष्टिलक्षोत्तरायां कोटौ वैकुण्ठस्ततोऽण्डगोलक इति श्रीविष्णुपुराणे दर्शितया दिशा सूर्यात् पञ्चविंशतौ कोटिषु कटाहः । एवं सूर्याल्लक्षे भूतलं ततः सप्तसप्ततिसहस्रेषु सप्त पातालानि ततस्त्रिंशत्सहस्रेषु शेषः एवं सूर्याल्लक्षद्वये गर्भोदः स च लक्षद्वयन्यूनपञ्चविंशतिकोटिपरिमितः एवं मिलित्वा ऊर्ध्वाधः पञ्चाशत्कोटि प्रमाणमण्डगोलकमिति ॥ ९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमस्य त्रयोविंशः सङ्गतः सङ्गतः सताम् ॥ २३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यस्य शिशुमारस्य लाङ्गूले पुच्छाग्रादधोभागे तस्य दक्षिणपार्श्वे अभिजिच्छ्रवणधनिष्ठाशतभिषापूर्वाभाद्रपदोत्तराभाद्रपदरेवत्यश्विनीभरणीकृत्तिकारोहिणीमृगशिरआर्द्रापुनर्वस्वाख्यान्युदगयनानि चतुर्दश नक्षत्राणि कल्पयन्ति सव्ये वामपार्श्वे तु पुष्याश्लेषामघापूर्वाफाल्गुन्युत्तराफाल्गुनीहस्तचित्रास्वातिविशाखानुराधाज्येष्ठामूलपूर्वाषाढोत्तराषाढाख्यानि दक्षिणायनानि चतुर्दश नक्षत्राणि शिशुमारस्योभयोः पार्श्वयोरवयवा यथा भवन्ति तथा कल्पयन्ति तथा उदरतः उदरे ॥ ५ ॥

उदगयनदक्षिणायननक्षत्राणां स्थानानि विभज्य दर्शयति । पुनर्वसुपुष्यावित्यादिना । पुनर्वसुपुष्यावुदगयनान्त्यं नक्षत्रं पुष्यो दक्षिणायनान्त्यम् । आर्द्राश्लेषे तयोर्निरन्तरे स्कन्धयोरिति सूच्यमानपादद्वयापेक्षया पश्चिमयोः पादयोः अभिजिदुत्तराषाढे उदगयनदक्षिणायननक्षत्रगणयोराद्यन्ते नक्षत्रे श्रवणपूर्वाषाढे तयोरप्युत्तरपूर्वे धनिष्ठामूले च तयोरप्युत्तरपूर्वे पुनर्वस्वार्द्राभिजिच्छ्रवणधनिष्ठा पञ्च नक्षत्राणि दक्षिणश्रोणिपादनासिकालोचनकर्णेषु पुष्यादीनि पञ्च वामश्रोण्यादिषु च यथासङ्ख्यं युञ्जीतेत्यर्थः मघादीनीति मघापूर्वाफाल्गुनी उत्तराफाल्गुनी हस्तचित्रास्वातिविशाखानुराधाख्यानि अष्ट नक्षत्राणि वामपार्श्ववङ्क्रिषु वामपार्श्वास्थिषु युञ्जीत अनुसन्दधीत मृगशीर्षादीनि प्रातिलोम्येन पूर्वाभाद्रपदान्तानि मृगशिरोरोहिणीकृत्तिकाभरण्यश्विनीरेवत्युत्तराभाद्रपदपूर्वाभाद्रपदाभिधानि अष्ट नक्षत्राणि दक्षिणपार्श्ववङ्क्रिषु प्रतियुञ्जीत शतभिग्ज्येष्ठे शतभिङ्नक्षत्रम् उदगयनेऽवशिष्टं दक्षिणायनेऽवशिष्टं वामस्कन्धे न्यसेत् ॥ ६ ॥

यमो नक्षत्ररूपः बृहस्पतिः ककुदि गलपृष्ठशृङ्गे ॥ ७ ॥

एतच्छिशुमाराख्यं विष्णोः रूपमुपतिष्ठेतानन्तरमन्त्रेण स्तुवीत मन्त्रमाह । नम इति । ज्योतिषां लोकाय वासस्थानाय कालायनाय कालचक्ररूपाय नमोऽभिधीमहीति ॥ ८ ॥

ग्रहर्क्षताराभयं ग्रहाद्यात्मकमत एवाधिदैविकमधिदैवनियन्तृरूपं शिशुमारचक्रं नमस्यतः स्मरतः मन्त्रकृतामुक्तमन्त्रं जपतां च पापमाशु नश्येत ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
त्रयोविंशोऽध्यायः ॥ २३ ॥

भाषा टीका ।

उस शिशुमार चक्र का नीचे को मुख है कुण्डलाकार गोल उसका शरीर है उसके पुच्छ के अग्र भाग में ध्रुव कल्पित हैं उसके लांगूल में प्रजापति हैं अग्नि इन्द्र धर्म ए तीनों पुच्छके मूल में धाता विधाता दोनों कमर में सप्त ऋषीभी उसके दहिने आवर्त कुण्डलाकार देह में उत्तरायण के नक्षत्र दहिने पार्श्व में कल्पित हैं दक्षिणायन के जो नक्षत्र हैं कुण्डलाकार के बांये भाग में हैं ऐसे कल्पना करने से दोनों ओर अवयव समान संख्या के होजाते हैं पीठ में अजवीथी है उदर में आकाश गङ्गा है ॥ ५ ॥

पुनर्वसु पुष्य दोनों दहिने बांये में हैं आर्द्रा अश्लेषा दोनों कटि पार्श्व में हैं दहिने बांये दोनों पादों में अभिजित् उत्तराषाढा हैं दहिने बाये नासिका में क्रम से श्रवण पूर्वाषाढा दहिने बांये दोनो नेत्रों में धनिष्ठा मूल हैं दहिने बांये दोनों कानों में मघादिक आठ नक्षत्र दक्षिणायन के हैं बांये पार्श्व के अस्थि में युक्त करै ते से ही मृगशिर आदि उत्तरायण नक्षत्रों को दहिने पार्श्वके अस्थि में प्रतिलोमता से युक्त करै शतभिषा ज्येष्ठा दोनों को दहिने बांये स्कन्ध में न्यास करै ॥ ६ ॥

ऊपर के हनु में अगस्ति हैं नीचे के हनु में यम हैं मुखों में मङ्गल हैं उपस्थ में शनैश्चर हैं गलपृष्ठ में बृहस्पति हैं वक्षस्थल में आदित्य हैं हृदय में श्रीनारायण हैं मन में चन्द्रमा हैं नाभी में शुक्र हैं स्तनों में अश्विनी कुमार हैं प्राण अपान में बुध हैं गले में राहु हैं सब अङ्गो में केतु हैं रोमों में सब तारागण हैं ॥ ७ ॥

यह श्रीविष्णु भगवान् का सर्व देवता मय रूप है इस रूप का प्रतिदिन सायंकाल में सावधान से मौन होकर दर्शन करता रहता हुआ स्तुति करै यह मन्त्र बोले ज्योतियों के

भाषाटीका ।

आश्रय कालचक्र रूप सूर्यादिकों के पति महा पुरुष आपका हम ध्यान करते हैं आपके अर्थ नमस्कार है ॥ ८ ॥

जिससे कि यह ग्रह नक्षत्र तारा रूप आधि दैविक परमात्मा का रूप है तिससे तीनो कालों में मन्त्र से स्तुति करने वालों के पापका नाश करने वाला है जो तीनों कालों मे स्मरण करै या नमस्कार करै तिसके उस कालके सब पाप नष्ट होजाते हैं ॥ ९ ॥

इति श्रीभागवत पञ्चमस्कन्ध तेईसमे अध्याय का भाषानुवाद लक्ष्मणाचार्यकृत समाप्त ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे त्रयोविंशोऽध्यायः समाप्तः ॥ २३ ॥

—○:०:○—

॥ चतुर्विंशोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

अधस्तात् सवितुर्योजनायुते स्वर्भानुर्नक्षत्रवच्चरतीत्येके योऽसावमरत्वं ग्रहत्वं चालभत भगवदनुकम्पया स्वयमसुरापसदः सैंहिकेयो ह्यतदर्हः तस्य तात ! जन्म कर्माणि चोपरिष्टाद्वक्ष्यामः ॥ १ ॥

यददस्तरणेर्मण्डलं प्रतपतस्तद्विस्तरतो योजनायुतमाचक्षते द्वादशसहस्रं सोमस्य त्रयोदशसहस्रं राहोर्यः पर्वणि तद्व्यवधानकृद्वैरानुबन्धः सूर्याचन्द्रमसावभिधावति ॥ २ ॥

तन्निशम्योभयत्रापि भगवता रक्षणाय प्रयुक्तं सुदर्शनं नाम भागवतं दयितमस्त्रं तत्तेजसा दुर्विषहं मुहुः परिवर्तमानमभ्यवस्थितो मुहूर्तमुद्विजमानश्चकितहृदय आरादेव निवर्तते तदुपरागमिति वदन्ति लोकाः ॥ ३ ॥

ततोऽधस्तात् सिद्धचारणविद्याधराणां सदनानि तावन्मात्र एव ॥ ४ ॥

ततोऽधस्ताद्यक्षरक्षःपिशाचप्रेतभूतगणानां विहाराजिरमन्तरिक्षं यावद्वायुः प्रवाति यावन्मेघा उपलभ्यन्ते ॥ ५ ॥

ततोऽधस्ताच्छतयोजनान्तर इयं पृथिवी यावद्धंसभासश्येनसुपर्णादयः पतत्त्रिप्रवरा उत्पतन्तीति ॥ ६ ॥

उपवर्णितं भूमेर्यथा सन्निवेशावस्थानमवनेरप्यधस्तात् सप्त भूविवरा एकैकशो योजनायुतान्तरेणायामविस्तारेणोपक्लृप्ताः अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालमिति ॥ ७ ॥

एतेषु हि बिलस्वर्गेषु स्वर्गादप्यधिककामभोगैश्वर्यानन्दभूतिविभूतिभिः [1] सुसमृद्धभवनोद्यानाक्रीडविहारेषु दैत्यदानवकाद्रवेया नित्यप्रमुदितानुरक्तकलत्रापत्यबन्धुसुहृदनुचरा गृहपतय ईश्वरादप्यप्रतिहतकामा मायाविनोदा निवसन्ति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं त्रिभिर्दुर्मर्यादापालनं वर्णितं तथा ।
अधोभुवनमर्यादापालनं त्रिभिरुच्यते ॥ १ ॥
चतुर्विंशे रवेरर्वाक् स्वर्भान्वादिस्थितिः क्रमात् ।
अतलादिबिलस्वर्गमर्यादाः सप्त वर्णिताः ॥ २ ॥

सूर्यमारभ्य ध्रुवान्तं सन्निवेशं निरूप्येदानीं सूर्यादधस्तान्निरूपयति । अधस्तादिति । स्वर्भानू राहुः । अलभत लेभे । सिंहिकायाः पुत्रः ॥ १ ॥

ग्रहणं वक्तुमाह । यददः प्रतपतस्तरणेर्मण्डलम् । अमृतपाने मध्यप्रवेशेन तयोर्व्यवधानं करोतीति तथा । अत एवैताभ्यां सूचितत्वात् वैरमनुबध्नातीति तथा ॥ २ ॥

भागवतं चक्रं परिवर्तमानं परिभ्रमदाभि अभिमुखं मुहूर्तमवस्थितः सन् इत्येवमन्तरा तदवस्थानमुपरागं ग्रहणं वदन्ति । तत्र च ऋजुवक्रस्थितिभ्यां सर्वग्रासासर्वग्रासौ न तु वस्तुतो ग्रासोऽस्ति दूरान्तरत्वात् ॥ ३ ॥

तावन्मात्रे योजनायुते ॥ ४ ॥

अन्तरिक्षं गृहहीनं तस्यावधिमाह । यावद्वायुः प्रवाति तीव्रो वाति । तस्याप्यवधिमाह । यावन्मेघाः ॥ ५ ॥

पृथिव्या उपरि भूर्लोकावधिमाह । यावद्धंसादयः पार्थिवा विकाराः ॥ ६ ॥

योजनायुतान्तरेण प्रत्येकमुच्छ्रिताः आयामो यः कटाहस्य तावद्विस्तारेण ॥ ७ ॥

सामान्येन विवराणि वर्णयति । एतेष्वित्यादिना मायातल इत्यतः प्राक्तनेन ग्रन्थेन । एतेषु दैत्यादयो निवसन्तीत्यन्वयः । कथम्भूतेषु । अधिकः कामभोगश्च ऐश्वर्यानन्दश्च विभूतिश्च सम्पत्तिस्तैः सुसमृद्धा भवनादयो येषु । कथम्भूताः । नित्यप्रमुदिता अनुरक्ताः कलत्रादयो येषां न प्रतिहतः कामो येषाम् । मायया विनोदो येषाम् ॥ ८ ॥

---

(१) भूति इत्येतद्देशपुस्तेभ्यः पतितमितिप्रीयते ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं सूर्यादारभ्य ध्रुवपर्यन्तं दिवोमण्डलसन्निवेशमनुवर्ण्याथ सूर्यादधस्तात्स्वर्भान्वादिमण्डलमनुवर्णयति । अधस्तादित्यादिना । सूर्यस्याधस्ताद्योजनानामयुते स्वर्भानुः राहुर्नक्षत्रवच्चरतीत्येके वदन्ति तं विशिनष्टि । योऽसाविति । सोऽसौ स्वर्भानुर्भगवत्कृपयामरत्वं ग्रहत्वं चालभत लेभे केवलभगवत्कृपैव तस्यामरत्वादौ हेतुः न तु तस्य तद्योग्यतास्तीत्याह । हि यतः सिंहिकायाः पुत्रः राहुरसुराधमः अत एवामरत्वाद्यनर्हः किं तस्य भगवत्कृपाविषयत्वोपपादकमित्याह । तस्येति । तस्य राहोर्जन्म कर्माणि च उपरिष्टादष्टमस्कन्धे वक्ष्याम नाधुनेत्यर्थः तत्रैव स्फुटीभविष्यतीति नात्रावसर इति भावः ॥ १ ॥

राहुप्रसङ्गादुपरागस्वरूपं वक्तुमाह । यदद इति । अतपतस्तपनः सूर्यस्य यददः अन्तःप्रसिद्धं मण्डलं तद्विस्तारतो योजनायुतमयुतयोजनविस्तृतमाचक्षते ततः सूर्यमण्डलादुपरितनं सोममण्डलं द्वादशसहस्रयोजनविस्तृतं सूर्यमण्डलादधस्ततो राहोर्मण्डलं तु त्रयोदशसहस्रयोजनविस्तृतमतः सूर्यसोममण्डलाभ्यां स्वर्भानोर्मण्डलस्य विस्तृतत्वात्कदाचित्सूर्यसोममण्डलाच्छादकत्वं सम्भवतीति भावः । यः स्वर्भानुस्तद्वैरानुबन्धादमृतपानदशायां तयोः सूर्याचन्द्रमसोरभिमुखं धावति ताभ्यां कलहाभिमुखो गच्छतीत्यर्थः ॥ २ ॥

तदभिधावनं निशम्य दृष्ट्वोभयोरपि रक्षणाय भगवता परमपुरुषेण भागवतं भगवत्सम्बन्धि तत् सुदर्शनाख्यमस्त्रं तेजसा दुर्विषहं दुःखेनापि सोढुमशक्यं मुहुर्मुहुः परिभ्रममाणं प्रति मुहूर्तमभिमुखतयावस्थितो राहुरुद्विजमानो भयमापन्नश्चकितहृदयश्चलचित्तः आरादेव दूरादेव निवर्तते तदेवोपरागो ग्रहणमिति जनाः वदन्ति अभिधावनदशायां यत् स्वमण्डलेन सूर्याचन्द्रमसोर्मण्डलाच्छादनं तदेव ग्रहणमिति जना उपरागस्वरूपाभिज्ञा वदन्तीत्यर्थः । तत्र ऋजुवक्रस्थितिभ्यामर्धग्राससर्वग्रासौ न तु वस्तुतो ग्रासोऽस्तीति दूरान्तरत्वात् ॥ ३ ॥

ततः स्वर्भानोरधस्तात्तावन्मात्र एवायुतयोजनान्तर एव सिद्धादीनां सदनानि स्थानानि ततोऽधस्तात्सिद्धादिसदनेभ्योऽधस्तात् यक्षादीनां विहाराजिरं विहारस्थानमन्तरिक्षं गृहहीनं वर्तते तस्यावधिमाह । यावद्वायुः प्रधावति भृशं धावति तस्याप्येवधिमाह । यावन्मेघा उपलभ्यन्त इति ततो यक्षादीनां विहारान्तरिक्षादधस्ताच्छतयोजनान्तरेयं पृथिवी भूर्लोको वर्तते पृथिव्या उपरि भूर्लोकस्यावधिमाह । यावदिति । यावद्धंसादयः पक्षिश्रेष्ठा बलिनः उत्पतन्त्युद्गच्छन्ति तावद्भूर्लोकमित्यर्थः ॥ ४ ॥
॥ ५ ॥ ६ ॥

भूमण्डलं तु सप्रपञ्चमुपवर्णितं प्रागित्याह । उपवर्णितमिति । यद्भूमेः सन्निवेशेनावयवविन्यासेनावस्थानं तद्यथा तदुपवर्णितमेव ध्रुवमण्डलादारभ्य भूपर्यन्तो लोकसन्निवेश उक्तः अथ भूमेरधस्तनानां लोकानां सन्निवेशमाह । अधमेरपीत्यादिना उत्तराध्यायान्तेन ग्रन्थेन । अवनेर्भूर्लोकादधस्तात् सप्तभूविवरा भूम्यामेव विवराः सन्ति ते चैकशो योजनानामयुतं तेनान्तरा मध्य उच्छ्रितं भावे क्तः उच्छ्राय औन्नत्यं योजनायुतान्तरोच्छ्रितमायामो दैर्घ्यं विस्तारश्चायुतयोजनपरिमितस्तेषां समाहारद्वन्द्वः तेन योजनायुतान्तरोच्छ्रितायामविस्तारेण उपकल्पिता विवरा भूम्यूर्ध्वे भूमेः योजनायुतोच्छ्रितस्तथा बिलानामायामो विस्तारश्चायुतयोजनपरिमित इत्यर्थः तारतम्येन भोगतारतम्येन चोपक्लृप्ताः भूर्लोकापेक्षया विवरेषु भोगाधिक्यमस्तीत्यर्थः विवराणि सप्त निर्दिशति । अतलमित्यादिना । पातालमित्यन्तेन ग्रन्थेन ॥ ७ ॥

तारतम्येणेत्येतदेव सप्तविवरासाधारण्येन दर्शयति । एतेष्वित्यादिना अथातल इत्यतः प्राक्तनेन ग्रन्थेन । एतेषु बिलस्वर्गेषु दैत्यादयो निवसन्तीत्यन्वयः कथम्भूतेषु स्वर्गादप्यधिकः कामभोगश्चैश्वर्यानन्दः ऐश्वर्यप्रसक्तिसन्तोषश्च भूतिः सम्पत्तिश्च विभूतिरिति द्वन्द्वैकवद्भावोऽस्य विशेषणशब्दस्य नित्यसापेक्षत्वात् समासः अभितः सुसमृद्धानि भवनान्यागाराणि उद्यानादीनि क्रीडास्थानानि विहारस्थानानि च येषु यत्र क्रीडा खेलनं विहारः स्त्रीसम्भोगः कथम्भूताः नित्यप्रमुदिता अनुरक्ताः कलत्रादयो येषां तथाभूताः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अथावशिष्टातलादिलोकनिवासिनामैश्वर्यं श्रीनारायणमाहात्म्यव्यञ्जकमिति तदिह निरूपयति । तत्रादौ शनैश्चरपर्यन्तानां ग्रहाणां स्थितिं निरूप्य राहोः स्थितिः किमिति न निरूपितेति त्वरितमतेर्मन्दस्याशङ्कां परिहरन्तां निरूप्य सूर्यादीनां मण्डलपरिमाणं निरूपयति । अधस्तादिति । एके पौराणिकाः स्वर्भानुर्नक्षत्रवत्सोमध्यमण्डले मेरुं परितः प्रादक्षिण्येन चरतीति वदन्ति केचिन्मौहूर्तिकाः मानसोत्तरबहिर्भूतप्रान्तभूमेरागत्य समुदेत्य पुनः पश्चिमभागे भूमावेवास्तमित्वा पातालविवरमध्य एव पूर्वदिशं गत्वा मानसोत्तरे बहिः प्रान्तभूमावेव पूर्वस्यां दिशि उदेत्य पश्चिमस्यां दिशि भूमावेवास्तमेतीत्येवं सञ्चरन्ते अत एव कदाचित्पातालग्रहणमभूदिति च भाषन्ते अपरे मेरोरप्रादक्षिण्येन तमोवलये चरन् पश्चिमत उदेत्य पूर्वस्यां दिश्यस्तं गच्छतीत्याचक्षते अतदर्हः अमरत्वायोग्यः ॥ १ ॥

तरणिमण्डलं दशसहस्रयोजनविस्तृतं ततो द्विगुणं सोममण्डलं विंशत्सहस्रयोजनविस्तृतं द्वादशसहस्राद्विंशत्सहस्रमित्यर्थः सोममण्डलाद्विगुणं चत्वारिंशत्सहस्रयोजनेन विस्तृतं राहुमण्डलं त्रयोदशसहस्रमित्यनेन त्रिदशेति युक्त्या त्रिंशत्संख्या लभ्यते पुनश्च दशसंख्या सोममण्डलाद्द्विगुणोक्त्या कुत एवं कल्पना यथाश्रुतव्याख्यानमन्तरेणेति चेन्न ।

> "राहुसोमरवीणां तु मण्डला द्विगुणोक्तिताम् ।
> विनैव सर्वमुत्सेधम् इति वचनात् ॥ २ ॥

भागवतं भगवतः प्रियं "तदस्य प्रियम्" इत्यस्मिन्नर्थे अण्प्रत्ययः परिवर्तमानं मण्डलमिति शेषः चक्राभिमुखमवस्थितः उद्विजमानः वेगेन चलन् आरात् दूरात् ॥ ३ ॥

तावन्मात्रे अयुतमात्रे ॥ ४—५—६ ॥

भूविवराः पातालादयः तारतम्येनोपक्लृप्ताः सुखादिसामान्यविशेषाभ्यामूर्ध्वाधः क्रमेणेति वा ॥ ७ ॥

समृद्धिरुद्रेकः विभूतिः सन्ततिपरम्परा समृद्धभवनोद्यानाक्रीडेषु आविहारो यत्र ते तथा तेष्वाक्रीडः मिथुनक्रीडायोग्यपर्वत आविहारो भूलोकविहारविलक्षणत्वादीश्वराच्छिवात्तथात्वं वाच्यम् ॥ ८ ॥

येषु महाराज ! मयेन मायाविना विनिर्मिताः पुरो नानामणिप्रवरप्रवेकविरचितविचित्रभवनप्राकारगोपुरसभाचैत्यचत्वरायतनादिभिर्नागासुरमिथुनपारावतशुकसारिकाकीर्णकृत्रिमभूमिभिर्विवरेश्वरगृहोत्तमैः समलंकृताश्चकासति ॥ ९ ॥

उद्यानानि चातितरां मनइन्द्रियानन्दिभिः कुसुमफलस्तबकसुभगकिसलयावनतरुचिरविटपविटपिनां लताङ्गालिङ्गितानां श्रीभिः समिथुनविविधविहङ्गमजलाशयानाममलजलपूर्णानां झषकुलोल्लङ्घनक्षुभितनीरनीरजकुमुदकुवलयकल्हारनीलोत्पललोहितशतपत्रादिवनेषु कृतनिकेतनानामेकविहाराकुलमधुरविविधस्वनादिभिरिन्द्रियोत्सवैरमरलोकश्रियमतिशयितानि ॥ १० ॥

यत्र ह वाव न भयमहोरात्रादिभिः कालविभागैरुपलक्ष्यते ॥ ११ ॥

यत्र हि महाहिप्रवरशिरोमणयः सर्वं तमः प्रबाधन्ते ॥ १२ ॥

भाषाटीका ।

इतने बिलस्वर्गों में स्वर्ग से भी अधिक काम भोग ऐश्वर्य आनन्द विभूतियों से युक्त बडे भारी मकान बगीचा विहार स्थानों में नित्य मुदित अनुरक्त स्त्री पुत्र बन्धु सुहृद अनुचरों के सहित मालिक होकर ईश्वर से भी जिनको शंका नहीं है ऐसे माया में विनोद करने वाले दानव दैत्य काद्रवेय लोग सब निवास करते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च । हे महाराज ! येषु मयेन निर्मिताः पुरश्च चकासतीत्यन्वयः । कथम्भूताः नाना ये मणिप्रवरास्तेषां प्रवेका मुख्यास्तैर्विरचितैर्विचित्रैर्भवनादिभिस्तथा विवरेश्वराणां गृहोत्तमैश्च समलङ्कृताः । कीदृशैर्गृहोत्तमैः नागाश्चासुराश्च मिथुनभूताः पारावतादयश्च तैराकीर्णाः कृत्रिमा भूमयो येषु तैः । पाठान्तरे नाना स्वनत्वं मिथुनविशेषणम् ॥ ९ ॥

उद्यानानि चातितराममरलोकश्रियमतिशयितानि येषु चकासतीत्यन्वयः । काभिः श्रीभिः । केषां तेषां कुसुमफलस्तबकाश्च सुभगकिसलयानि च तैरवनता रुचिरा विटपा येषां विटपिनां लतानामङ्गैरालिङ्गितानां श्रीभिः तथा समिथुनाश्चक्रवाकादिमिथुनसहिता ये विविधा विहङ्गास्तद्युक्तानां जलाशयानां च श्रीभिः कीदृशानाम् अमलैर्जलैः पूर्णानां पुनरपि कैरतिशयितानि झषकुलोल्लङ्घनेन क्षुभितं यज्जलाशयानां नीरं तस्मिन् यानि नीरजादीनि तेषां वनेषु कृतं निकेतनं यैस्तेषामर्थात् पक्षिणामेकोऽखण्डो यो विहारस्तेनाकुलाश्च ते मधुराश्च विविधाः स्वनादयस्तैर्य इन्द्रियोत्सवास्तैश्च । यद्वा । समिथुनेत्यादेरुत्तरेणैव संबन्धः । मनइन्द्रियानन्दिभिरिति स्वनादीनां विशेषणं तत्र नीरजं सामान्येन कमलं लोहितं शतपत्रं तद्विशेषः ॥ १० ॥

अहोरात्रादिभिर्भयं तत्रोपलक्ष्यते सूर्याद्यभावात् ॥ ११-१२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च हे महाराज ! येषु बिलस्वर्गेषु मायाविनासुरेण मयेन निर्मिता पुरः पुराणि चकासति इत्यन्वयः कथम्भूता नानाविधा ये मणिप्रवरास्तेषां प्रवेका मुख्यास्तैर्विरचितैर्विचित्रैर्भवनादिभिस्तथा विवरेश्वराणां गृहोत्तमैश्च समलङ्कृताः कथम्भूतैः गृहोत्तमैर्नागाश्चासुराश्च मिथुनीभूताः पारावतादयश्च तैराकीर्णाः सङ्कुलाः कृत्रिमा वेदिकादिरूपा भूमयो येषु तैः नानास्वनमिथुनेति पाठे नानास्वनत्वं मिथुनीभूतपारावतादिविशेषणम् ॥ ९ ॥

तथा कनकलताभिरालिङ्गितानां संश्लिष्टानां कुसुमस्तबकैः फलस्तबकैः सुन्दरकिसलयैश्चावनता नम्रा रुचिरा विटपाः शाखा येषां तेषां विटपिनां वृक्षाणामुद्यानानि क्रीडावनानि मनस इन्द्रियाणां चानन्दिनीभिरानन्दकारिणीभिः श्रीभिर्विवरेश्वरश्रीभिरमरलोकश्रियमतिशयितानि अतिक्रान्तानि येषु विवरेषु चकासतीत्यन्वयः पुनः कैरमरलोकश्रियमतिशयितान्युद्यानानि चकासति अमलैः स्वच्छैः जलैः पूर्णानां समिथुनानां चक्रवाकादिभिर्मिथुनसहिता ये विविधा विहङ्गास्तेषां कुलं समूहस्तस्य कोलाहलो येषु तेषां जलाशयानां सत्स्वमिथुनसमूहस्योल्लङ्घनेन विहारेण क्षुभितं सञ्चलितं पक्षिरं जलं तस्मिन् यानि नीरजादीनि तेषां वनेषु कृतं निकेतनं स्थानं येषां पक्षिणामिति शेषः सामर्थ्याज्ज्ञानाविधैर्विहारैराकुला मधुरा ये विविधाः स्वरादयः आदिशब्देन गमनेक्षणादयो विवक्षिताः तैः कथम्भूतैः इन्द्रियाणामानन्दजनकैः स्त्रीभिरिति यावत् उक्तत्रिधाविटपिनामुक्तविधानां मनइन्द्रियाणां चानन्दिभिःस्त्रीभिरिन्द्रियोत्सवैः उक्तविधानां पक्षिणां चोक्तविधैः स्वरादिभिश्चामरलोकश्रियमतिशयितान्युद्यानानि येषु विवरेषु चकासतीत्यर्थः ॥ १० ॥

यत्र ह वाव येषु हि विवरेषु कालविभागैः कालावयवैः अहोरात्रादिभिर्भयं नोपलक्ष्यते तत्रत्यानामायुषो भूयस्त्वादिति भावः यत्र येषु विवरेषु ये महान्तोऽहिप्रवराः सर्पश्रेष्ठास्तेषां ये शिरोमणयः फणामणयः ते सर्वं कृत्स्नं तमोऽन्धकारं प्रबाधन्ते निरस्यन्ति ॥ ११ ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

येषु विवरेषु पुरः पुराणि चकासति विलसन्तीत्यन्वयः मायया अर्थक्रियाकरणशक्तिलक्षणोपादानभूतया निर्मिताः नानामणीनां प्रवेकैः श्रेष्ठैर्विरचितविचित्रभवनादिभिरुपलक्षिताः तैस्तं

न वा एतेषु वसतां दिव्यौषधिरसरसायनान्नपानस्नानादिभिराधयो व्याधयो वलीपलितजरादयश्च देहवैवर्ण्यदौर्गन्ध्यस्वेदक्लमग्लानिरिति वयोऽवस्थाश्च भवन्ति ॥ १३ ॥

न हि तेषां कल्याणानां प्रभवति कुतश्चन मृत्युर्विना भगवत्तेजसश्चक्रापदेशात् ॥ १४ ॥

यस्मिन् प्रविष्टेऽसुरवधूनां प्रायः पुंसवनानि भयादेव स्रवन्ति पतन्ति च ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देवाश्रयमायतनं पाषाणबद्धवृक्षमूलस्थानं नाना ... मिथुनतो वर्तमानैः पारावतादिभिराकीर्णाः कृत्रिमभूमयो येषु ते तथा तैर्विवरेश्वराणां गृहोत्तमैरन्तःपुरश्रेष्ठैः ॥ ९ ॥

येषु विवरेषूद्यानानि चकासति विटपिनां वृक्षाणां मनआदीन्द्रियानन्दहेतुभिर्विटपैः शाखाभिः कृताभिः श्रीभिः समृद्धिभिः कनकेति वृक्षविशेषणममृतजलपूर्णानां समिथुनानां विहङ्गकुलानां कोलाहलशब्दयुक्तानां जलाशयानां सरसां सम्बन्धिनां मत्स्यकुलानामुल्लङ्घनेनोत्पत्य पतनेन क्षुभितनीरचञ्चलनीरजादिसमुदायेषु कृतनिवासानामनेकविहगाकुलानां मधुकराणामिन्द्रियोत्सवैर्मधुकरस्वनादिभिः स्वर्गश्रियमतिशयितानि अतिशयोपेतान्युद्यानानीति सम्बन्धः नीरजं सामान्येन कमलं कह्लारं सौगन्धिकं शतपत्रं रक्तकमलम् आदिशब्देन पुण्डरीकादयो गृह्यन्ते "पुण्डरीकं सिताम्बुजम्" इत्यभिधानम् ॥ १०—११ ॥

(१) ध्वान्तं सर्वदिक्ष्वन्यामिव स्थितं तमः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

येषु पुरश्चकासतीत्यन्वयः । कीदृश्यः नानाभूतेषु मणिप्रवरेष्वपि ये प्रवेका मुख्याः तैर्विरचिता विचित्रा ये भवनादयस्तैर्गृहोत्तमैश्चालङ्कृताः कीदृशैः नागाश्च असुराश्च मिथुनभूताः पारावतादयश्च तैराकीर्णाः कृत्रिमा भूमयो येषु तैः नाना स्वन इति पाठः सुगमः ॥ ९ ॥

यासु उद्यानानि अमरलोकश्रियमतिशयितानि अतिक्रान्तानि चकासतीत्यन्वयः । काभिः कुसुमादिभिरवनता रुचिरा विटपा येषां तेषां विटपिनां श्रीभिः मनइन्द्रियानन्दिभिरिति पुंस्त्वमार्षम् । तथा समिथुनाः सस्त्रीपुंसा विविधा विहङ्गमा येषु तेषां जलाशयानां झषकुलोल्लङ्घनैः क्षुभितेषु नीरेषु यानि नीरजादिवनानि तेषु कृतनिकेतनानामर्थात् पक्षिणामेकोऽखण्डो यो विहारस्तेनाकुला मधुरा विविधाः स्वनादयस्तैर्ये इन्द्रियोत्सवास्तैश्च अत्र लोहितं शतपत्रञ्च नीरजविशेषौ लौहित्यदलशतपत्रत्वाभ्याम् ॥ १०—१२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

हे महाराज ! येष्वतलादिषु मायाविना आश्चर्यप्रकाशकासुरीविद्यावता मयेन विनिर्मिता नानाविधानां मणिप्रवराणां प्रवेकैर्मुख्यैर्विरचितानि यानि विचित्राणि भवनादीनि तैः नागैरसुरैर्मिथुनभूतैः पारावतादिभिराकीर्णाः कृत्रिमा भूमयो येषु तैर्विवरेश्वरगृहोत्तमैश्च समलङ्कृताः पुरः पुराणि चकासति ॥ ९ ॥

(१) ध्वान्तम इति मूले ।

किञ्च । येषु कुसुमफलस्तबकैः सुभगकिसलयैश्चावनता रुचिरा विटपा येषां विटपिनां लतानामङ्गैरालिङ्गितानां श्रीभिः तथा अमलजलपूर्णानां समिथुनाः चक्रवाकादिमिथुनसहिता ये विविधा विहङ्गास्तद्युक्तानां जलाशयानाञ्च श्रीभिः झषकुलोल्लङ्घनक्षुभितेषु नीरेषु यानि नीरजादीनि तेषां वनेषु कृतनिकेतनानामर्थाद्भ्रमरादीनामेकोऽखण्डो यो विहारस्तेनाकुलाश्च ते मधुराश्च विविधस्वनादयस्तैर्मनइन्द्रियानन्दिभिः ये इन्द्रियोत्सवास्तैश्च अतितराममरलोकश्रियमतिशयितानि उद्यानानि चकासति यत्र येषु अहोरात्रादिभिर्यद्भयं तन्नोपलक्ष्यते सूर्याद्यभावात् ॥ १०—११ ॥

तर्हि कुतस्तत्र प्रकाश इत्यत आह । यत्रेति ॥ १२ ॥

भाषाटीका

हे महाराज ! परीक्षितजी जिन भूमि बिलों में माया जाननेवाले मयदैत्य के बनाये पुर हैं सो नानाप्रकार के मणियों में श्रेष्ठ मणियों से रचित विचित्र घर दीवाल गोपुर सभा आयतन गृह अंगना चैत्य इत्यादिकों से युक्त हैं नाग असुर स्त्रियों सहित । इनमें हैं कबूतर तोता मैना इनोंसे वे स्थान भरे हैं अच्छी बनी हुई जहां पर जमीन हैं जहां के मालकों के अच्छे घर हैं इन सबों से पाताखादिक शोभित होरहे हैं ॥ ९ ॥

जिनों मे अत्यन्त मन इन्द्रियों के आनन्द देनेवाले फूलों के गुच्छे सुन्दर कोमलडाली इनों से झुकते हुये मनोहर शाखा वाले पेड हैं जो कि लताओं के अंगो से आलिंगित हैं और पक्षियों के सहित नाना प्रकार के पक्षि जिन मे हैं ऐसे तालावों के निर्मल पूर्णजलों की शोभा से वे स्थान युक्त हैं मछलियों के कूदने से चंचल जो तलावों का जल तिसमे जो कमल तिनके वनोंमे स्थान करने वाले पक्षियों का एक अखण्ड जो विहार तिस से व्याकुल जो भौंरा तिन के जो नाना प्रकार के शब्द तिनोंसे जो इंद्रियों के आनंद तिनों से देवतों की संपत्ति को जीत जाने वाले बगीचा जहां पर लगे हुये हैं ॥ १० ॥

जहांपर सूर्य के विना रात दिन न होने से काल के बीतनेका भय नहीं जाना जाता है ॥ ११ ॥

जहां पर वडे भारी सर्पों के मणियों से सब अन्धकार का नाश होजाता है ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

क्लमः श्रमः ग्लानिरनुत्साहः ॥ १३ ॥

कल्याणानां मङ्गलरूपाणाम् ॥ १४ ॥

यस्मिन् भगवत्तेजसि प्रविष्टे पुंसवनानि गर्भाः "आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः" इति स्रावपातौ ज्ञेयौ ॥ १५ ॥

अथातले मयपुत्रोऽसुरो बलो निवसति येन ह वा इह सृष्टाः षण्णवतिर्मायाः काश्चनाद्यापि मायाविनो धारयन्ति यस्य च जृम्भमाणस्य मुखतस्त्रयः स्त्रीगणा उदपद्यन्त स्वैरिण्यः कामिन्यः पुंश्चल्य इति या वै बिलायनं प्रविष्टं पुरुषं रसेन हाटकाख्येन साधयित्वा स्वविलासावलोकनानुरागस्मितसंलापोपगूहनादिभिः स्वैरं किल रमयन्ति यस्मिन्नुपयुक्ते पुरुष ईश्वरोऽहं सिद्धोऽहमित्ययुतमहागजबलमात्मानमभिमन्यमानः कत्थते मदान्ध इव ॥ १६ ॥

ततोऽधस्ताद्वितले हरो भगवान् हाटकेश्वरः स्वपार्षदभूतगणावृतः प्रजापतिसर्गोपबृंहणाय भवो भवान्या सह मिथुनीभूत आस्ते यतः प्रवृत्ता सरित्प्रवरा हाटकी नाम भवयोर्वीर्येण यत्र चित्रभानुर्मातरिश्वना समिध्यमान ओजसा पिबति तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं भूषणेनासुरेन्द्रावरोधेषु पुरुषाः सह पुरुषीभिर्धारयन्ति ॥ १७ ॥

ततोऽधस्तात् सुतल उदारश्रवाः पुण्यश्लोको विरोचनात्मजो बलिर्भगवता महेन्द्रस्य प्रियं चिकीर्षमाणेनादितेर्लब्धकायो भूत्वा वटुवामनरूपेण पराक्षिप्तलोकत्रयो भगवदनुकम्पयैव पुनः प्रवेशित इन्द्रादिष्वविद्यमानया सुसमृद्धया श्रियाऽभिजुष्टः स्वधर्मेणाराधयंस्तमेव भगवन्तमाराधनीयमपगतसाध्वस आस्तेऽधुनापि ॥ १८ ॥

नो एवैतत् साक्षात्कारो भूमिदानस्य यत्तद्भगवत्यशेषजीवनिकायानां जीवभूतात्मभूते परमात्मनि वासुदेवे तीर्थतमे पात्र उपपन्ने परया श्रद्धया परमादरसमाहितमनसा संप्रतिपादितस्य साक्षादपवर्गद्वारस्य यद्बिलनिलयैश्वर्यम् ॥ १९ ॥

यस्य ह वाव क्षुतपतनप्रस्खलनादिषु विवशः सकृन्नामाभिगृणन् पुरुषः कर्मबन्धनमञ्जसा विधुनोति यस्य हैव प्रतिबाधनं मुमुक्षवोऽन्यथैवोपलभन्ते ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सवर्णा एताः स्वैरिण्यः कामिन्यस्त्वसवर्णा अपि तत्राप्यतिचञ्चलाः पुंश्चल्यः । बिलायनं बिलायतनम् । साधयित्वा सम्भोगसमर्थं कृत्वा । स्वे ये असाधारणा विलासास्तत्पूर्वकोऽवलोकस्तेनानुरागयुक्तं स्मितं तेन संलाप उपगूहनं च तदादिभिः यस्मिन् हाटकाख्ये रसे उपयुक्ते सेविते ॥ १६ ॥

भवयोर्भवस्य भवान्याश्च चित्रभानुरग्निस्तेन निष्ठ्यूतं फूत्कृत्य त्यक्तम् असुरेन्द्राणामवरोधेष्वन्तःपुरेषु पुरुषीभिः स्त्रीभिः ॥ १७ ॥

सुतले बलिरधुनाप्यास्त इत्यन्वयः कथम्भूतः महेन्द्रस्य प्रियं कर्तुमिच्छता भगवता प्रथमं पराक्षिप्तमपहृतं लोकत्रयं यस्य सः । पुनर्भगवतोऽनुकम्पयैव तत्र प्रवेशितः सन् कीदृशेन योऽदितेः सकाशाद्भूत्वा वटुवामनरूपेण लब्धकायस्तेन ॥ १८ ॥

केचित्तस्य सुतलराज्यं भूमिदानफलं मन्यन्ते तन्निराकरोति । नो एवैतदिति । यद्बिलनिलये विवरस्थाने ऐश्वर्यमेतद्भूमिदानस्य साक्षात्कारः फलं न भवत्येव कुत इत्यपेक्षायामपवर्गभूतस्य दानस्य साक्षादपवर्गहेतुत्वादित्याह । यत्तत्प्रसिद्धं दानं तस्य तदेवाह । भगवत्यशेषजीवनिकायानां जीवभूतश्चासावात्मभूतश्च सर्वजीवनियन्ता चासावात्मा चेत्यर्थः तस्मिन् सम्प्रतिपादितस्य ॥ १९ ॥

किञ्च यस्य नाम क्षुतादिषु च विवशोऽपि सकृदपि गृणन् कर्मबन्धं विधुनोति । कथम्भूतं यस्य प्रतिबाधनं स्विह मुमुक्षवोऽन्यथैवोपलभन्ते यन्निवृत्त्यर्थं योगसाङ्ख्यादिक्लेशाननुभवन्तीत्यर्थः तं कर्मबन्धं भजति ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एतेषु विवरेषु वसतामाधयो मनःपीडा व्याधयो रोगाः वलिस्त्वग्गतो विकारः पलितं केशेषु शौक्ल्यमेतदुभयमूलभूता जरा आदिशब्देन मतिभ्रंशादिर्गृह्यते तथा देहस्य वैवर्ण्यं रूपान्तरं दुर्गन्धः पूतिगन्धः स्वेदः खेदः क्लमः श्रमः ग्लानिरनुत्साह इति एते वयोऽवस्थाश्च दिव्यौषधैरसायनपानैर्दिव्यैरन्नस्नानादिभिश्च न भवन्ति ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथा तेषां बिलस्थानां कल्याणानां निर्दुःखानां कस्मादपि मृत्युर्न हि प्रभवति कोऽपि तान्मारयितुं समर्थो न भवतीत्यर्थः भवतीति पाठे मृत्युर्भयं कुतश्चिदपि तेषां नास्तीत्यर्थः तर्हि मरणं तेषां किं तत्राह । विनेति । चक्रापदेशाच्चक्रसंज्ञाद्भगवत्तेजसोऽस्त्ररूपाद्विना सुदर्शनाख्याद्विनान्यस्मान्न मृत्युस्तस्मादेव स्यादेवेत्यर्थः ॥ १४ ॥

तदेवाह । यस्मिन् सुदर्शनाख्ये विवरेषु प्रविष्टे सत्यसुरवधूनां पुंसवनानि गर्भाः प्रायेण चक्रभयात् प्रस्रवन्ति पूर्णाश्च पतन्तीत्यर्थः ॥ १५ ॥

एवं सामान्यतो विवरानुपवर्ण्याथ विशेषेण विवर्णयिषुस्तावदतलं विवरमनुवर्णयति । अथेति । अतलाख्ये विवरे मयस्य पुत्रो बलो नाम निवसति तं विशिनष्टि । येनेति । येन बलिनैव सृष्टा इह षण्णवतिसंख्याका मायाः तासां मायानां मध्ये काश्चन मायाः अद्यापि केचिन्मायाविनो धारयन्ति यस्य बलस्य विजृम्भमाणस्य सतः तन्मुखात्त्रयः स्त्रीणां गणा उद्बभूवुः नामतस्तानाह । स्वैरिण्यः कामिन्यः पुंश्चल्य इति स्वैरं रताः स्वैरिण्यः कामिन्यश्च स्वैरगा रताः तत्राप्यतिचञ्चलाः पुंश्चल्यः त्रिविधास्ता विशिनष्टि । या वै स्वैरिण्यादयः स्त्रियो बिलायनं विवरं प्रविष्टं पुरुषं हाटकाख्येन रसेन रसायनेन साधयित्वा स्ववशीकृत्य बलायनमिति पाठे तत्र प्रविष्टं पुरुषं रसेन बलायनं साधयित्वा सम्भोगसमर्थं कृत्वा स्वेऽसाधारणा विलासावलोकपूर्वको योऽवलोकः अनुरागयुक्तं यत् स्मितं संलापो रहोभाषणमुपगूहनमालिङ्गनमेवमादिभिः स्वैरं रमयन्ति किल हाटकाख्यं रसं विशिनष्टि । यस्मिन्निति । यस्मिन् रसे उपयुक्ते सेविते सत्युपयोक्ता पुरुषः आत्मानमयुतमहाद्विगजबलं मन्यमानो मदान्ध इवाहमीश्वरः सिद्धोऽहमिति कत्थते श्लाघते ॥ १६ ॥

एवमतलाख्यो विवर उपवर्णितः । अथ वितलं वर्णयति । तत इति । ततोऽतलादधस्ताद्वितले विवरे भगवान् हरो रुद्रः हाटकेश्वरः स्वपार्षदैर्भूतगणैः प्रमथगणैः परिवृतः प्रजापतिसर्गः ब्रह्मणादिष्टः सर्गस्तस्योपबृंहणाय वृद्धये भवान्या सह मिथुनीभूयास्ते यदुक्तं हाटकेश्वर इति नाम तस्मिन्निमित्तं स्पष्टयति यत इति । भवानीभवयोर्मिथुनीभूतयोर्वीर्येण हाटकिन्याख्या सरित्प्रवरा यतः प्रवृत्ता तस्माद्भवो हाटकस्य सुवर्णस्य ईश्वर उत्पादकत्वाद्धाटकेश्वर इत्युच्यते इति भावः । ननु हाटकिन्याख्यसरित्प्रवरायाः प्रभवत्वेऽपि न हाटकप्रभवत्वं तत्राह । यत्र हाटकिन्यां सरित्प्रवरायां चित्रभानुरग्निः मातरिश्वना वायुना समिध्यमानः सम्यगुद्दीप्यमानः ओजसा बलेनापिबत् हाटकिनीं पीतवान् तेनाग्निना निष्ठ्यूतं फूत्कृत्य त्यक्तं हाटकाख्यं सुवर्णमसुरेन्द्राणां विवरवासिनामवरोधेष्वन्तःपुरेषु पुरुषा पुरुषीभिः स्त्रीभिः सह भूषणेनाभरणेन धारयन्ति भूषणानि कारयित्वा धारयन्तीत्यर्थः हाटकिन्या अन्ततो हाटकाख्यसुवर्णरूपेण परिणामात्तत्प्रभवोऽपि हाटकेश्वर इति भावः ॥ १७ ॥

अथ सुतलं वर्णयति । तत इति । ततो वितलादधस्तात्सुतले विवरेऽगुरुश्रवा विपुलकीर्तिः पुण्यश्लोकः स्मरतां पुण्यावहकयशःसम्पन्नः महाभागवतो भागवताग्रगण्यः विरोचनस्यात्मजो बलिरधुनाप्यास्ते इत्यन्वयः कथम्भूतः महेन्द्रस्य प्रियं कर्तुमिच्छता प्रथमं दितेः सकाशाद्भूत्वा वटुवामनरूपेण लब्धः कायो देहो येन तेन भगवता प्रथमं पराक्षिप्तमपहृतं लोकत्रयं यस्य तथाभूतः पुनर्भगवतोऽनुकम्पयैव सुतले विवरे प्रवेशितः इन्द्रादीनामपि दुर्लभया सुसमृद्धया श्रिया सम्पदा जुष्टः सेवितः भयरहितः तमेव भगवन्तं स्वधर्मेण स्वोचितधर्मेणाराधयत् ॥ १८ ॥

एतत् सर्वसम्पत्समृद्धं सुतलाधिपत्यं तद्भूदानफलमिति न मन्तव्यमित्याह । नो एवैतदिति । यद्बिलनिलये विवरस्थाने ऐश्वर्यं तदेतद्भूमिदातस्य साक्षात्कारः फलं न भवत्येव कुत इत्यपेक्षायामेवं भूतस्य दातस्य साक्षादपवर्गहेतुत्वादित्याशयेन भूमिदानं विशिनष्टि । भगवति षाड्गुण्यपूर्णेऽशेषभूतजातानां ये जीवभूताः प्रत्यगात्मानस्तेषामप्यात्मभूते परमात्मन्यन्तःप्रविश्य धारके वासुदेवे तीर्थतमे पावनतमे पात्र उपपन्ने समीपं प्राप्ते सति तस्मिन् परया निरुपाधिकया श्रद्धया कर्तव्यविषयत्वरया समाहितं मनश्चित्तं येन तेन बलिना सम्प्रतिपादितस्य कृतस्य साक्षादपवर्गसाधनभूतस्य भगवतस्तीर्थतमत्वमेवोपपादयति । यस्येति । यस्य हि भगवतो नाम सकृदपि विवशोऽपि क्षुत्पतनस्खलनादिष्ववस्थास्वपि गृणन् पुरुषः कर्मरूपबन्धनमञ्जसा सुखेन विधुनोति निरस्यति सकृत् स्मरणमात्रेणापि समस्तवृजिननिरासक्षमनाम्नवतो भगवतस्तीर्थतमत्वं कैमुत्यन्यायसिद्धमिति भावः कर्मबन्धं विशिनष्टि । यस्य इदा इति । यस्य हि कर्मबन्धस्य प्रतिबाधनं निरसनोपायमिह मुमुक्षवोऽन्यथा कर्मयोगादिरूपेण उपलभन्ते जानन्ति तत् कर्मबन्धनं धुनोतीति पूर्वेणान्वयः प्रतिसाधनमिति पाठे प्रतिक्षेपसाधनं निरसनोपायमित्येवार्थः यथा कर्मयोगादिकं भगवद्भक्तियोगोत्पत्तिप्रतिबन्धकप्राचीनकर्मबन्धनिरसनद्वारा भक्तियोगानुग्राहकत्वेन भक्तियोगद्वारा कृत्स्नपूर्वोत्तराघनिवर्तकमेवं नामस्मरणमपीत्यभिप्रेतोऽर्थः अन्यथा भक्तियोगात्तदर्थक्यापत्तेरित्यवगन्तव्यम् एवं तीर्थतमे सर्वेषामात्मनि भागवतानामात्मदे आत्मपर्यन्तवदान्ये आत्मतमे निरतिशयप्रियतमे भगवति विनियुक्तस्य लोकत्रयस्य न बिलनियमनैश्वर्यं फलमिति पूर्वेणैवान्वयः ॥ १९—२१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पानसहितस्नानात् आधयो मनोदुःखानि ग्लानिर्मनोबलक्षयः क्लमः शारीरबलक्षयः वयोऽवस्थाः शैशवादिवयोलक्षणाः ॥ १३ ॥ १४ ॥

यस्मिंश्चक्रे पुंसवनानि गर्भाः ॥ १५ ॥

एवं सामान्येन विवरलक्षणमुक्त्वा विशेषेणाह । अथेति । नाम्ना बलः तासु काश्चन मायाः त्रयो जातिभेदेन स्वैरिण्यः स्वेच्छानुवृत्तयः कामिन्योऽन्तर्गतकामोद्रेकाः पुंश्चल्यः पुरुषमात्रेण सुरतमाकाङ्क्षमाणाः पुरुषदर्शनमात्रेण परिप्लुतेन्द्रिया वा सर्वा अपि नियतपुरुषा न भवन्तीत्याह । या इति । बिलायनं बिलस्थानं संलापो मिथोभाषणमुपगूहनमालिङ्गनं चुम्बनादिकमादिपदगृहीतम् ॥ १६ ॥

यस्मिन् रसे भवयोः पार्वतीपरमेश्वरयोर्यस्तद्वीर्ये चित्रभानुरेध्यमानो वर्धमानः अवरोधा अन्तःपुराणि तेषु पुरुषीभिः पुरुषवद्बलोपेताभिः स्त्रीभिः ॥ १७ ॥

उरुणः बहुनः शास्त्रस्य श्रवः श्रवणं यस्य स तथा पुण्य-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

त्तिसमाकृष्टं स्वाधीनं लोकत्रयं यस्य स तथा प्रवेशितः लोकत्रयेण प्रतिवत्सरं क्रियमाणपूजायामितिशेषः

सर्वस्य जीवराशेराधिकं बलेरैश्वर्यं हरये भूमिदानफलं न तस्य फलं मुक्तिरेव किन्तु पूर्वजन्मार्जितकिञ्चित्पुण्यफलं भवितुमर्हतीत्याह । अधुनापीति । अधुनापि बलेर्बिलनिलये सुतललोके यदैश्वर्यमेतद्भूमिदानस्य साक्षाद्वरो नो एव मुख्यफलं नैव कुतो नेति तत्राह । भगवतीति । परमात्मनि सम्यक् प्रतिपादितस्य स पात्रं न चेत्कथं तदिति तत्राह । पात्र इति । पात्रगुणमाह । तीर्थतम इति । अतिशयेन शुद्धे अतो शुक्तमित्याह । उपपन्न इति अन्येषु महात्मसु सत्स्वस्यैवोपपत्तिः कथमिति तत्राह । जीवेति केषामत्राह । अशेषेति । जीवभूतत्वे दुःखित्वेनाशुद्धिरापन्नेति तत्राह । आत्मभूत इति । सदा स्वामिनि इदं स्वामित्वं न लोकवत् किन्तु सदातनमित्यतो भूत इति स्वतन्त्रत्वाद्दुःखनिवारणसमर्थ इत्यर्थः आत्मवत्सर्वभूतप्रेष्ठ इति वा तर्हि किं तस्य फलमत्राह । साक्षादिति । ननु "अश्रद्धया हुतं दत्तम्" इत्यादेः श्रद्धया सहितेन दत्तस्यासङ्कल्पत्वादस्यापि तथात्वेन कथं मुक्तिद्वारत्वमिति तत्राह । परयेति । प्रत्यक्षफलदर्शनाच्चायमेव पात्रभूत इत्याह । यस्येति "निर्भयं विष्णुनाम्नैव यथेष्टं पदमागतम्" इत्येतदस्मिन्नर्थे प्रमाणमित्याह । हेति । यथा नामसङ्कीर्तनात् कर्मबन्धविध्वंसो भवत्येवं बलेरपीत्यस्मिन्नर्थे वेति "वा विकल्पोपमानयोः" इत्यमरः आदिशब्दात् स्वप्नादिभयदर्शन इति गृह्यते "तमेवं विद्वानमृत इह भवति" इति श्रुतेर्ज्ञानमन्तरेण नाम्नः कर्मबन्धहानिः कथमत्राह । यस्येति । प्रतिबोधनं ज्ञानं नाम सङ्कीर्तनलक्षणकर्मद्वारा ज्ञानं भवति "कर्मणा ज्ञानमातनोति" इति श्रुतेरित्येतद्द्वैत्यनेनाह । अविगानेन सर्वेषां चेतनानामात्मदं "ज्ञानजननद्वारा सायुज्यफलप्रदं" यद्यस्मात्तद्भगवन्नाम मुमुक्षुभिरभ्यसनीयमेवेत्याह । यत्तदिति । तस्मिन् वासुदेव इति पूर्वेणान्वयः ॥ १८—१९—२०—२१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नो एवैतदेतावन्मात्रमित्यर्थः ॥ १९ ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एतेषु वसतां दिव्यौषधिरसरसायनयोरशनादेव हेतोरन्नपानादिभिरप्याधिव्याधयो न भवन्ति तथा हि त्रिविधा वयोऽवस्थाश्च न तत्र प्रथमा वलिप्रभृतयश्चरमाः द्वितीया देहवैवर्ण्यादयोऽचरमाः क्लमः श्रमः ग्लानिर्हर्षक्षयः ॥ १३ ॥ १४ ॥

पुंसवनानि गर्भाः "आचतुर्थाद्भवेत् स्रावः पातः पञ्चमषष्ठयोः" इति स्रावपातौ ज्ञेयौ सवर्णौ रताः स्वैरिण्यः कामिन्यस्त्वसवर्णोऽपि । तत्राप्यतिचञ्चलाः पुंश्चल्यः विलायनं स्वाविलरूपमायतनं साधयित्वा स्वस्वभोगसमर्थं कृत्वा यस्मिन् रसे उपयुक्ते सेविते सति चित्रभानुरग्निः पिबति संशोष्य कठिनीकरोति तेन अग्निना निष्ठ्यूतं काष्ठोत्तीर्णीकृतम् । यद्वा । ताभ्यां भवभवानीभ्यां फूत्कृत्य त्यक्तम् । भूषणेन रत्नालङ्कारेण सह अत्यादरात् ॥ १५—१७ ॥

अथो यशः अत एव पुण्यश्लोकाः श्लोका वर्णनार्थकपद्यानि यस्य सः प्रवेशित इति सुतलमेवेति शेषः ॥ १८ ॥

कैश्चित्तस्य तादृशबिलस्वर्गभोगप्राप्तिर्भूमिदानफलं मन्यते तन्निराकरोति । नो एवैतदिति । यद्बिलनिलयैश्वर्यमेतद्भूमिदानस्य साक्षात्कारः फलं न भवति यद्भूमिदानं तदिति प्रसिद्धमित्यन्वयः अत्र भूमिपदेन त्रिभुवनमेवोपलक्षितम् । अत्र वेदविद्ब्राह्मणमात्रे एव भूप्रदेशदानादक्षयः प्रसिद्धस्वर्गभोगो लभ्यते इति शास्त्रे भगवति त्रिभुवनदानजन्यफलस्य सुतलैश्वर्यभोग एव पर्यवसानस्याभावितत्वादपवर्गस्यैव फलत्वं किञ्चास्यानुषङ्गिकस्यापि सुतलैश्वर्यभोगस्य सर्वस्वर्गभोगेभ्योऽपि परम उत्कर्षो ज्ञेयः । भूमिदानस्य कथम्भूतस्य भगवति वासुदेवे प्रतिपादितस्य जीवभूतो जीवनरूपो य आत्मा अन्तर्यामी तद्भूते परमात्मनि "विष्टभ्याहमिदं कृत्स्नमेकांशेन" इत्युक्तेस्तस्याभिन्नांशत्वात् परमः सर्वोत्कृष्टश्चासावात्मा चेति तस्मिन्नुपपन्ने परमसमुचिते तीर्थतमे परमपावने फलं न भवतीत्यत्र हेतुः । साक्षादपवर्गेति । पत्रपुष्पादिदातुरप्यपवर्गफलत्वादत्रातिकैमुत्यमेवेति भावः ॥ १९ ॥

त्रैलोक्यदानस्य का वार्त्ता भक्त्या पत्रपुष्पाद्यर्पणमपि दूरे वर्त्ततां नामाभासोऽपि सुकृतिभिर्दुर्वारं कर्मबन्धमपि अनायासेनैव ध्वंसयतीत्याह । यस्येति । न च कर्मबन्धोऽपि सुगमप्रतीकार इत्याह यस्य कर्मबन्धस्य प्रतिबाधनं सर्वथा ध्वंसनं मुमुक्षव एव न तु भूमिदानादिसुकृतकोटिमन्तोऽपि अन्यथैवेति यन्निवृत्त्यर्थमष्टाङ्गयोगसाङ्ख्यादिक्लेशाननुभवन्तीत्यर्थः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आधयः मनोव्यथाः व्याधयः देहव्यथाः वली त्वग्विकारः पलितं केशविकारः क्लमः श्रमः ग्लानिरनुत्साहः ॥ १३ ॥

कल्याणानां तत्तल्लोकानुरूपमङ्गलरूपाणाम् ॥ १४ ॥

पुंसवनानि गर्भाः "आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः" इति स्रावपातलक्षणम् ॥ १५ ॥

स्वैरिण्यः स्वेच्छाचारिण्यः तत्र कामिन्यो मदनमोहिताः तत्रापि पुंश्चल्यः पुंसि पुंसि भ्रमणशीलाः निर्मर्यादा इत्यर्थः साधयित्वा स्वानुरूपं कृत्वा यस्मिन् रसे उपयुक्ते सेविते सति ॥ १६ ॥

भवयोः भवान्याः भवस्य च मातरिश्वना वायुना समिध्यमानः चित्रभानुरग्निस्तेन चित्रभानुना निष्ठ्यूतं थूत्कृत्य त्यक्तमसुरेन्द्राणामवरोधिष्वन्तःपुरेषु ॥ १७ ॥

ततो वितलादधस्तात् सुतले बलिरधुनाप्यास्ते इत्यन्वयः कीदृशः अदितेर्महेन्द्रस्य च प्रियं चिकीर्षमाणेन वटुवामनरूपेण भगवता प्रथमं पराक्षिप्तमपहृतं त्रिलोकत्रयं यस्य स लब्धः नागपाशैर्गृहीतः कायो देहो यस्य सः पुनश्च भगवतानुकम्पयैव तत्र प्रवेशितः किं कुर्वन्नास्ते अपगतसाध्वसो भूत्वा तमेव स्वधर्मेणाराधयन् ॥ १८ ॥

ननु भगवता भूमिदानफलभोगार्थं तत्र प्रवेशितः किमित्यत्राह । नो एवेति । यद्बिलनिलये सुतलाख्ये विवरस्थाने ऐश्वर्यमेतद्भूमिदानस्य साक्षात्कारः फलं नो एव तत्र हेतुं वदन् भूमिदानं विशिनष्टि । यत् यस्मात् तत् तस्मिन् सर्वलोकवेदप्रसिद्धे सर्वजीवनिकायानां तीर्थतमे जीवानां क्षेत्रज्ञानां भूतानां क्षेत्राणां

(१) तद्भक्तानामात्मवतां सर्वेषामात्मन्यात्मद आत्मतयैव ॥ २१ ॥

न वै भगवान्नूनममुष्यानुजग्राह यदुत पुनरात्मानुस्मृतिमोषणं मायामयभोगैश्वर्यमेवातनु-तेति ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मभूते उपपन्ने योग्यतातिशयेन प्राप्ते पात्रे श्रद्धादिना सम्प्रतिपादितस्य सम्यगर्पितस्य अत एव साक्षादपवर्गद्वारस्य ॥ १९ ॥

किञ्च । यस्य नाम क्षुदादिषु विवशः ज्वरमरणादिकालेऽपि सकृदपि गृणन् कर्मबन्धनमञ्जसा अनायासेन विधुनोति मुक्तो भवतीत्यर्थः यस्य कर्मबन्धस्य प्रतिबाधनमन्यथा नामोच्चारणादिहरिभजनव्यतिरिक्तं कर्म चित्तवृत्तिनिरोधप्रकृतिपुरुषविवेकादिकं मीमांसकपातञ्जलसांख्यादय उपलभन्ते न तु परमपुरुषाराधने परमानन्दसाधने रुचिं कुर्वन्तीत्यर्थः ते मायामोहिता इति भावः ।

> न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
> माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥

इति श्रीमुखवचनात् ।

येऽन्येऽरविन्दाक्ष ! विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः ।
आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधो नादृतयुष्मदङ्घ्रयः ।

इति तेषामधः पतनार्हतायाः वक्ष्यमाणत्वात् ।

> निरीशैः कर्मभिः केचित् केचिच्छून्यसमाधिना ।
> पुम्प्रकृत्योर्विवेकेन मन्यन्ते कृतकृत्यताम् ॥
> मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
> इत्येव चोदितो वाक्यं वयं त्वर्जुनसारथेः ॥ २० ॥

भाषा टीका ।

इन लोकों में निवास करने वालों को दिव्य ओषधि रस आदिकों के रसायन वाले अन्नपानादिकों के करने से कोई आधि व्याधि वृद्धपना बालकपना देह का विवर्ण होना दुर्गंध पसीना श्रम उत्साह नाश अवस्था का बदलना इत्यादिक कुछ नहीं होते हैं ॥ १३ ॥

एक श्रीनारायण के सुदर्शन चक्र के बिना और किसी हेतु से उन मंगलरूपी पुरुषों को मृत्यु नहीं होता है ॥ १४ ॥

उन सुदर्शन जीके तो उसदेशमे प्रवेश होते मात्र भय के मारे असुरों की स्त्रियों के गर्भ स्त्रवित होजाते हैं गर्भ गिरजाते हैं ॥ १५ ॥

इस के अनन्तर अतल लोक में मय का पुत्र बल असुर निवास करता है जिसकी सृजी हुई छयानवे मायाओं को कोई मायावी लोग अबतक भी धारण करते हैं जिसके जमुहाई लेते समय मुखमें से तीन स्त्रीगण उत्पन्न भये हैं स्वैरिणी कामिनी पुंश्चली ये उनके नाम हैं जो स्त्री लोग बिल में प्रविष्ट होने वाले पुरुष को हाटक नामक रस से पुष्ट करके अपने विलास अवलोकन अनुराग मन्दहास बोलन आलिङ्गन आदि क्रीडों से यथेच्छ रमण कराती है उस रस के सेवन करते मात्र पुरुष अपने को दशहजार बडे हाथियों के बल वाला मान कर मदसे अन्धा होकर अभिमान की बातों को करने लगता है ॥ १६ ॥

तिस के नीचे वितल मे हाटकेश्वर नामक भगवान् हरजी अपने भूतगण पार्षदों के सहित विराजते हैं प्रजापति के सर्ग की वृद्धि के वास्ते भवजी भवानी के साथ संयुक्त होकर रहते हैं जहांसे भव भवानी दोनो के वीर्य से हाटकी नाम की प्रवृत्त हुई श्रेष्ठनदी बहती है जहां पर पवन से बढाया हुआ अग्नि उस नदी के जल को अपने तेज से पान करता है उस के थूक देने से थूक का हाटक नामक सुवर्ण होता है जिस का भूषण बनाकर पुरुष लोग असुरों के अन्तःपुरमे स्त्रियों के सहित आपभी रमण करते हैं ॥ १७ ॥

तिस के नीचे सुतल मे उदार कीर्ति वाले पुण्यश्लोक विरोचन के पुत्र बली महाराज हैं जिनके तीनों लोकोंके ऐश्वर्य को भगवान् ने इन्द्र को प्रसन्न करने की इच्छा से अदिती के यहां अवतार लेकर बटुवामन रूप से मांग कर हरण कर लिया फिर उन्ही भगवान् ने कृपा से इन्द्रादिकों को भी दुर्लभ सम्पत्ति देकर सुखी किया है फिर वे बली महाराज पूजनीय उन्ही भगवान् को पूजन करते हुये अभी पर्यन्त निर्भय होकर रहते हैं ॥ १८ ॥

यह कुछ भूमिदान का फल नहीं है जो कि सब भूतों के समूह के जीवों के अन्तर्यामी परमात्मा सर्व जीवों के नियन्ता आत्माराम परमदान पात्र भगवान् वासुदेव के प्राप्त होने पर बडी श्रद्धासे परम आदर से सावधान चित्त होकर समर्पण किया हुआ जो दान सोतो साक्षात् मोक्षका द्वार है तिससे सुतलका ऐश्वर्य मिलना ही फल होगा यह कुछ बलीका बडी बात नहीं है ॥ १९ ॥

जिन भगवान् के नाम को किसी कष्ट मे परवश हो कर एक बखत भी उच्चारण करने से पुरुष मात्र अनायास से संसार बन्ध की नाश कर सकता है जिस संसार बन्ध के छुडाने के वास्ते मुमुक्षु लोग कर्म ज्ञान योगादिक बडे साधनों को करते हैं ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्तस्मिन् भगवति भक्तानां ज्ञानिनां च यथायथमात्मन्यात्मदे ज्ञानदे चात्मतयैव समर्पितस्य भूमिदानस्य न तत्फलमिति पूर्वेणैव सम्बन्धः ॥ २१ ॥

किञ्च । नेदं भगवदनुकम्पाफलमपि किन्त्वेकान्तभक्तस्य तस्यान्तरायमात्रमित्याह । नेति । भगवानमुष्य अमुं नैवानु॰

(१) तद्भगवतामात्मवतां आत्मतमे च इति श्रीमज्जीवगोस्वामिपाठः ।

यत्तद्भगवताऽनधिगतान्योपायेन याच्ञाच्छलेनापहृतस्वशरीरावशेषितलोकत्रयो वरुणपाशैश्च सम्प्रतिमुक्तो गिरिदर्यां चापविद्ध इति होवाच ॥ २३ ॥

नूनं बतायं भगवानर्थेषु न निष्णातो योऽसाविन्द्रो यस्य सचिवो मन्त्राय वृत एकान्ततो बृहस्पतिस्तमतिहाय स्वयमुपेन्द्रेणात्मानमयाचतात्मनश्चाशिषो नो एव तद्दास्यमतिगम्भीरवयसः कालस्य मन्वन्तरपरिवृत्तं कियल्लोकत्रयमिदम् ॥ २४ ॥

यस्यानुदास्यमेवास्मत्पितामहः किल वव्रे नतु स्वपित्र्यं यदुताकुतोभयं पदं दीयमानं भगवतः परमिति भगवतोपरते खलु स्वपितरि ॥ २५ ॥

तस्य महानुभावस्यानुपथममृजितकषायः को वास्मद्विधः परिहीणभगवदनुग्रह उपजिगमिषतीति ॥ २६ ॥

अथ तस्यानुचरितमुपरिष्टाद्विस्तरिष्यते यस्य भगवान् स्वयमखिलजगद्गुरुर्नारायणो द्वारि गदापाणिरवतिष्ठते निजजनानुकम्पितहृदयो येनाङ्गुष्ठेन पदा दशकन्धरो योजनायुतायुतं दिग्विजय उच्चाटितः ॥ २७ ॥

ततोऽधस्तात्तलातले मयो नाम दानवेन्द्रस्त्रिपुराधिपतिर्भगवता पुरारिणा त्रिलोकीशं चिकीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्धपदो मायाविनामाचार्यो महादेवेन परिरक्षितो विगतसुदर्शनभयो महीयते ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गृहीतवान् । तत्र हेतुः । यदुतेति । आत्मन ईश्वरस्यानुस्मृतिं मुष्णातीति तथा । तदुक्तम् । "वासुदेवे मनो यस्य जपहोमार्चनादिषु । तस्यान्तरायो मैत्रेय ! देवेन्द्रत्वादिकं फलम्" इति ॥ २२ ॥

तस्यैकान्तभक्तिं सप्रपञ्चमाह । यत्तदिति प्रसिद्धमिति वक्ष्यमाणमुवाच हेत्यन्वयः । कथम्भूतः । अनधिगतोऽन्य उपायो येन तेन भगवता याच्ञाच्छलेनापहृतं स्वशरीरमात्रावशेषितं लोकत्रयं यस्य । सम्यक् प्रतिमुक्तो बद्धः अपविद्धः प्रक्षिप्तोऽपि सन् ॥ २३ ॥

बतेति खेदे । भगवान्विद्वानपि योऽसाविन्द्रो यस्यैकान्तेन बृहस्पतिः सचिवः सहायो यतो मन्त्रार्थं वृतः सोऽपि पुरुषार्थेषु नूनं न निष्णातो न निपुणः यत उपेन्द्रेण द्वारभूतेन तमुपेन्द्रं विहायात्मानं मां लोकत्रयमयाचत तं मन्त्रप्रदं बृहस्पतिमतिहायेति वा । तस्मिन् प्रसन्ने स एव वरणीयो न लोकत्रयं यतस्तदतितुच्छमित्याह । अतिगम्भीरमनन्तं वयो यस्य तस्य कालस्य यन्मन्वन्तरं तेन परिवृत्तं विपर्यस्तं लोकत्रयमिदं कियत् ॥ २४ ॥

प्रह्लादस्त्वेक एवार्थे निष्णात इत्याह । यस्यानुदास्यमिति । स्वपितरि उपरते मृते सति स्वपित्र्यं पदं भगवता दीयमानमपि भगवतः खलु परमन्यदिति कृत्वा नतु जग्राहेत्यर्थः ॥ २५ ॥

ननु त्वमतिवीरः कुतस्तमेव बहुमन्यसे तत्राह । तस्यानुपथमनुवर्त्म । अमृजिता अक्षीणाः कषाया रागादयो यस्य । परिहीणो भगवदनुग्रहो यस्य । स को वा उपगन्तुमिच्छतीति ॥ २६ ॥

अथ शुकोक्तिः । नन्वेवम्भूतश्चेद्बलिस्तर्हि तस्यैव चरितं विस्तरेण कथ्यतां तत्राह । तस्य बलेरनुचरितमुपरिष्टादष्टमे विस्तरिष्यते । यस्य द्वार्यवतिष्ठते निजजनेष्वनुकम्पितं कृतानुकम्पं हृदयं यस्य । द्वारपालकर्म दर्शयति । येन श्रीनारायणेन बलेर्द्वारि विशन् दशकन्धर उच्चाटितः । केन । पदा तत्राप्यङ्गुष्ठेनैव ॥ २७ ॥

यथा हरिणा स्वभक्तो बलिः सुतले निहितः सुखमास्ते एवं महादेवभक्तोऽपि मयस्तलातले सुखमास्त इत्याह । तत इति । लब्धं पदं स्थानं येन महीयते पूज्यते ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु यद्येतद्दानमपवर्गद्वारं यदि वा बलिर्महाभागवतः यदि वा भगवानात्मदस्तर्ह्यस्यापवर्गमेव प्रदाय किं नानुजग्राहेत्यपेक्षायामभ्युपगतप्रारब्धस्य विद्यया विनाश्यस्यावश्यानुभाव्यत्वादेनमपवर्गदानेन न तदैवानुजग्राह किं त्वभ्युपगतप्रारब्धफलबिलनिलयनैश्वर्यमेवादादित्याह । न वा इति । भगवानमुष्य बलेर्न निजप्राह तद्देवानुग्रहं न कृतवान् आत्मानुस्मृतिमोषणं स्वविषयस्मृतिघातकं स्वमायया विलसितं भोगरूपमैश्वर्यं भोगनिमित्तं वा ऐश्वर्यं बिलनिलयनैश्वर्यं तदेवातनुत तेने दत्तवानित्यर्थः ॥ २२ ॥

महाभागवत इत्यनेन भगद्दास्ये एवाभिलाषित्वं विवक्षितं तत्तदस्य तदुक्त्यैव स्पष्टयितुमाह । यदिति । यत्तत्प्रसिद्धमिति

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वक्ष्यमाणमुवाचेत्यन्वयः कथम्भूतः अनधिगतः अलब्ध अन्यः याच्ञेतरः उपायो येन तेन भगवता बलेर्भागवतत्वाद्दण्डनानर्हत्वादुपायान्तराभावादनधिगतान्योपायेनेत्युक्तम् एवम्भूतेन भगवता याच्ञाव्योजनापहृतं स्वशरीरमात्रावशेषितमुर्वरितस्वशरीरमात्रं यल्लोकत्रयं तद्यस्य तथाभूतः स्वव्यतिरिक्तभगवदपहृतलोकत्रय इत्यर्थः वरुणपाशैश्च प्रतिमुक्तः प्रतिश्रुतार्थन्यूनतायां वरुणपाशैः प्रतिबद्ध इत्यर्थः गिरिदर्यामपविद्धः प्रक्षिप्तोऽपि सन् ॥ २३ ॥

उक्तिमेवाह । नूनमिति । बतेति खेदे भगवान् विद्वानप्यसाविन्द्रः पुरुषार्थेषु नूनं न निष्णातः न कुशलः पुरुषार्थेषु तारतम्यानभिज्ञ इत्यर्थः यस्यैकान्तेन बृहस्पतिः सचिवः सहायो मन्त्रायालोचनाय वृतः सोऽपि पुरुषार्थेषु नूनं न निष्णातः अनिष्णातत्वमेवाह । तमिति । यतस्तं पुरुषार्थरूपं भगवन्तमतिहाय तद्दास्यमयाचतेत्यर्थः तं मन्त्रप्रदं बृहस्पतिमतिहायेति वा उपेन्द्रेणोन्द्रावरजरूपेण श्रीवामनेन द्वारभूतेनेन्द्र एवात्मानं मामात्मनः स्वस्याशिषः लोकत्रयरूपा याः आशिष अयाचत याचितवानत्वेतस्य भगवतो दास्यमयाचतेत्यर्थः तस्मिन् प्रसन्ने तद्दास्यमेव याचितव्यं नत्वितरदल्पमित्याह । अतिगम्भीररंहस इति अतिशयगम्भीरवेगस्य कालस्य वश्यमिदं मन्वन्तरपरिवृत्तं मन्वन्तरपर्यन्तवर्तिलोकत्रयं लोकत्रयाधिपत्यं कियदत्यल्पमेतदित्यर्थः अतस्तन्न याचितव्यमिति भावः अत इन्द्रः पुरुषार्थेषु न निष्णातः ॥ २४ ॥

अस्मत्पितामहस्तु प्रह्लादः एक एव पुरुषार्थेषु निष्णात इत्याह । यस्येति । अस्मत्पितामहः प्रह्लादो यस्य भगवतोऽनुदास्यं दासानुदासत्वमेव वृतवान्किल ननु स्वपितुर्हिरण्यकशिपोः सम्बन्धि ऐश्वर्यं स अवरणहेतुं तस्याभिप्रायं प्रकाशयति । वतेति । भगवता नृहरिणा स्वपितरि हिरण्यकशिपौ उपरते हते सति भगवता दीयमानमपि स्वपित्र्यं न वव्रे कुतः यद्यस्मात्परिमितमिति परिमितत्वात्पित्र्यं न वव्रे उतापित्वकुतोभयं पदं वव्रे स्वयं देहावसाने मुक्तिं याचितवानित्यर्थः भगवतः परमिति पाठे भगवतोऽन्यदिति पित्र्यं न वव्रे इत्यर्थः ॥ २५ ॥

मादृक्केव गरुत्मतो गतिं को वा तस्य प्रह्लादस्य पन्थानमनुसर्तुं शक्नोतीत्याह । तस्येति । को वा अमृदिता अनुपहताः कषायाः कर्मबन्धा येन परिक्षीणा अपसृतः भगवदनुग्रहो यस्य तथाविधोऽस्मद्विधो मादृशः पुमान् तस्य महानुभावस्य प्रह्लादस्यानुपथं पन्थानमुपजिगमिषति उपगन्तुमिच्छाति इति ॥ २६ ॥

नन्वेवम्भूतश्चेद्बलिस्ततस्तस्यैव चरितं विस्तरेणोच्यतां तत्राह । तस्य बलेरनुचरितमुपरिष्टादष्टमे विस्तरिष्यते विस्तरेण कथयिष्यत इत्यर्थः कार्त्स्न्येन तत्प्रभावः केनापि वर्णयितुं न शक्य इत्यभिप्रायेण पुनस्तमेव विशिनष्टि । यस्येति । यस्य बलेर्द्वारि भगवानवतिष्ठते कथम्भूतः स्वयमखिलजगतां गुरुः अनेन द्वारपालकत्वानर्हता सूच्यते नारायणः सर्वशेषी अनेनापि तदेव सूच्यते एवंभूतो ह्याश्रितवात्सल्यवशो गदापाणिः सन् गदापाणिं तं भगवन्तं विशिनष्टि । येन गदापाणिना बलेर्द्वाःस्थेन भगवता कर्त्रा अङ्गुष्ठेन पद्मा पादावयवेनाङ्गुष्ठेन दिग्विजयसमये स्वसमीपमागतो दशकन्धरो रावणो योजनायुतानामयुतम् उच्चाटितः उच्चाटनं प्रापितः दिग्विजयं कुर्वन् रावणः कदाचिद्बलेर्द्वारि विशन् द्वाःस्थेन गदाभृता भगवता बहुदूरतः क्षिप्त इति श्रीरामायणादौ प्रसिद्धम् ॥ २७ ॥

एवं सुतलमुपवर्ण्याथ तलातलं वर्णयति । तत इति । ततः सुतलादधस्तात्तलातले विवरे मयाख्यो दानवेन्द्रः महीयते तलातलस्थैर्बहुमन्यत इत्यर्थः कथंभूतः प्रथमं त्रिपुराधिपतिर्भूत्वा त्रिलोक्याः शं सुखं कर्तुमिच्छता भगवता त्रिपुरारिणा रुद्रेण निर्दग्धं पुरत्रयं यस्य तस्य पुरारेः प्रसादाल्लब्धं पदं तलातलाख्यं विवरं यस्य स मायाविनामाचार्यो मायातन्त्रोपदेष्टा महादेवेन रुद्रेण परिरक्षितो विगतं सुदर्शनाद्भयं यस्य तथाभूतः सन् सुदर्शनभक्तिमता महादेवेन परिरक्षितत्वाद्विगतसुदर्शनभय इत्युक्तम् ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवन्नामात्मदं चेत्तन्नाम जापिनो मनुष्यान् किमिति नानुजग्राह भगवानित्याशङ्क्य भक्तिज्ञानाद्यतिशयाभावादित्यभिप्रेत्याह । न वा इति । नूनशब्दसामर्थ्यादत्र मनुष्यशब्देन सृनियोग्या गृह्यन्ते मनुष्यानुद्दिश्य नानुजग्राह प्रत्युतस्वादेतादृशमैश्वर्यमितिशेषः तत्रात्मदानलक्षणमोक्षमनुजग्राह किन्नेत्याह । यदिति । पूर्ववाक्यस्थितनञ अध्याहारः कर्तव्यः यत्पुनरात्मानुसंस्मृतिमोक्षणं तत् "यवाग्वा अपि सन्देहे को-कुन्दस्य तु का कथा,, इति तन्नानुजग्राहेति किमुत तर्हि तन्नामोपासनं व्यर्थं किमिति नेत्याह । मायामयेति । मायामयं प्रकृतिनिर्मितं नश्वरं नत्वनश्वरमित्येवार्थः ॥ २२ ॥

इतो भक्त्याद्यतिशय एवैश्वर्यं निमित्तं यतो राज्यापहरणादिलक्षणापकारिणि हरौ भक्त्यतिशयो दरीदृश्यते बलेर्दरीलक्षणकारागृहे निवसतस्तेन बद्धप्रमुक्तस्य तर्हि मनुष्याणामतादृश्यामापद्येतादृशी या भक्तिः समस्तगुणेष्वसूयिनामित्याशयवानाह । यत्तदिति । न अधिगतो भिक्षाव्यतिरेकेणान्यः सुखसाध्य उपायो येन स तथा तेन भगवता याच्ञाव्याजेनापहृतं स्वशरीरावशेषितं लोकत्रयं यस्य स तथा भगवदाज्ञया गरुडेन प्रथमं वरुणपाशैर्बद्धश्च शब्दाद्ब्रह्मादीनां याच्ञया पश्चान्मुक्तः पुनश्च त्वया प्रतिश्रुतं दत्त्वैव गन्तव्यमिति तेन कारागृह इति गिरिदर्यामपविद्ध इव निरुद्धो बलिरिति वक्ष्यमाणप्रकारेण जगादेत्यनेन प्राणात्ययेऽपि भगवद्भक्तिं न मुञ्चामीत्यभिसन्धिं दर्शयतीति यद्यस्मात्तस्मान्मनुष्यान्नानुजग्राहेत्युच्यते ॥ २३ ॥

इन्द्रस्य सचिवो बुद्धिसहायभूतो यदा योऽसौ बृहस्पतिरस्मत्सन्धानार्थमिन्द्रेण प्रेषित एकान्ततो मन्त्राय वृतः स च स्तदा तमप्यतिहाय सन्धानात्पूर्वमेव समागत्य ममार्थेषु त्वत्पादसेवनाद्यभिप्रायेषु निष्णातस्तत्सेवनादिकमेव दातुमुद्युक्तोऽयं भगवान् स्वयमुपेन्द्रेण बटुवामनरूपेणात्मने स्वस्मै त्रीणि पदान्यतदर्हं याचनायोग्यं मामयाचत नो एवाशिष इति यत्तस्यायमभिप्रायः इदं लोकत्रयं चतुर्दशभुवनापेक्षया कियदल्पं हि तदपि कालग्राहग्रस्तमित्याह । गम्भीरवेगस्य महतः कालस्य मन्वन्तरलक्षणावयवमितमत एवानित्यं तस्मादैश्वर्यनिमित्तमदो न स्यादित्यस्मै बलये राज्यं न दास्यामीति त्रिपदच्छलेनापहृतं नूनं निश्चितं बत भक्ते मय्यनुकम्पया "यस्यानुग्रहमिच्छामि हरिष्ये तद्धनं शनैः" इत्यादि स्ववचनात् ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरेरिममभिप्रायमस्मत्पितामह एव वेत्ति न मादृश इत्याह । यस्येति । स्वपितरि हिरण्यकशिपुनाम्नि विरमिते मृते भगवता दीयमानं स्वापित्र्यं पितृधनत्वाद्योग्यमपि यदकुतोभयं निहतकण्टकत्वात् पदं राज्यलक्षणं तन्न वव्रे किन्तु यस्य हरेरनुदास्यं सेवाख्यमेव वव्रे कोऽसावित्यस्मत्पितामहः प्रह्लादः तस्य चास्माकं महदन्तरमस्तीत्याह । तस्येति । तस्य प्रह्लादस्यानुगमनमनुवर्तितुमस्मादृशः पुरुषः को वालं न कोऽपीत्यर्थः कीदृशः परिहीणः भगवदनुग्रहो यस्य स तथा अमृदितकषायोऽनिरस्तपापो नालमिति किं वक्तव्यमित्यर्थः इतिशब्दो वाक्यसमाप्तौ वर्तते २५।२६॥

तस्य प्रह्लादस्य उत्तरस्मात् सप्तमे इदं श्रीशुकवाक्यं पुनरपि हरेर्भक्तानुकम्पितत्वमाह । यस्येति । वामनाख्यो नारायणः स्वदत्तत् वरात्तथावस्थानमिति द्योतयितुमवतिष्ठते इति आत्मनेपदप्रयोगः अखिलजगद्गुरुत्वमुपपन्नं तस्यापादि स्वपादप्रणतजनरक्षकत्वेनेत्यभिप्रेत्याह । येनेति । रावणस्य दिग्विजये उच्चाटितः प्रक्षिप्तः दूरीकृत इत्यर्थः एवंविधस्य हरेर्भक्तजनप्रयोजनार्थितया नापीन्द्रस्य राज्यदानेच्छयास्मद्राज्यापहरणलक्षणं कार्यं नान्यदिति वाक्यशेषः ॥ २७ ॥

शं सुखं महीयते स्वभूत्यैरितिशेषः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तद्भगवतामिति । तत्तु तस्य दानं न चान्यस्मिन् फले निमित्ते तत्र सर्वेषामात्मनि परमात्मनि तथापि ज्ञानिनां विविक्ततया तत्तास्फुरणादात्मतमे भक्तानां त्वात्मदे वशवर्त्तितया स्फुरतीति सर्वथा सर्वेषु परमोपकारकस्वभावत्वं दर्शितम् । ततस्तेनैतादृशतुच्छफलदानं न सम्भवतीत्यर्थः । तत्र परमतमनूद्य खण्डयति । न वै इति । यन्मायामयं भोगैश्वर्यमतनु तेति नैवामुं बलिं प्रत्यनुजग्राहेति न किन्तु स्वसान्निध्यदानादिनैवेत्यर्थः तत्र हेतुः आत्मानुस्मृतिमोषणमिति । यद्वा । तत्रेन्द्रानुग्रहवादं खण्डयति । न वै इति । अमुष्य इन्द्रस्य तं प्रतीत्यर्थः ॥ २१ ॥ २२ ॥

तत्र श्रीबलिवाक्यमेव प्रमाणयति । यत्तादिति गद्यपञ्चकेन यत्तदति प्रसिद्धम् । इति एतदुवाच श्रीबलिः ॥ २३ ॥

तमुपेन्द्रमतिहाय पुरुषार्थत्वेनानभिलक्ष्य स्वयमुपेन्द्रेणैव द्वारभूतेन आत्मानं मां परमक्षुद्रं लोकत्रयमयाचत । अनुदास्यं नय मां निजभृत्यपार्श्वमित्यनेन तद्दासदास्यम् ॥ २४ ॥

स्वापित्र्यं त्रैलोक्यराज्यं यत्तु अकुतोभयं पदं मोक्षं तत्तत्तु वव्रे । कथं भगवतः परमन्यद्विदामिति कृत्वा तदंशाभास तदंशमात्रात्मकत्वात्तयोः कदैवं व्यवहृतमित्याशङ्क्याह । भगवतेति ॥ २५ ॥

परिसर्पतो भावेन हीनस्यको नात्यादृतो भगवदनुग्रहो येन सः । अनुग्रहः प्रार्थनादिबन्धनान्तः ॥ २६ ॥ २७ ॥

मयस्तु मायावीति महेशप्रसादाभासेन तलातले व्यवहारसुखेन तिष्ठन्नपि न तु श्रीबलिवत् परमार्थसुखसम्पन्न इति दर्शयितुमाह । ततोऽधस्तादिति । विगतेति । महादेवस्य महाभागवतस्यानुरोधादिति भावः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तत्तस्मात् सर्वेषामात्मनि परमेश्वरे प्रतिपादितस्य भूमिदानस्य न तत्फलमिति पूर्वेणैवान्वयः । कथम्भूते भगवता नारदादीनां भक्तानामात्मदे वशीभूयात्मानमपि दत्तवति आत्मवतां सनकादीनां ज्ञानिनामात्मतमे परमात्मानुभवरूपे इति क्रमेण प्रेमानन्दब्रह्मानन्ददायिनस्तस्य तद्विषयानन्दमात्रफलदायित्वं कथं घटतामतो बलिराजाय स्ववशीकारमयप्रेमानन्दं खलु भूमिदानस्य फलं ददौ यतः स्वभक्तस्य तस्य स्वयं द्वारपालो बभूवेति भावः ॥ २१ ॥

वस्तुतस्तु भोगैश्वर्यमेकान्तभक्तस्यान्तराय एवेति न तद्भगवदनुकम्पाफलमतो भोगैश्वर्यदानादेवेन्द्रस्यैकान्तिकभक्त्यभावोऽनुमीयत इत्याह । नेति । अमुष्यामुमिन्द्रं तदुक्तम् ।

> वासुदेवे मनो यस्य जपहोमार्चनादिषु ।
> तस्यान्तरायो मैत्रेय ! देवेन्द्रत्वादिकं फलम् ॥

इत्यतो वस्तुतस्त्वेकान्तभक्तं बलिमेवानुजग्राहेति भावः ॥ २२ ॥

बलेस्त्वैकान्तिकी भक्तिर्भगवदनुग्रहप्राप्तिश्च तद्वचनेनैव व्यक्तीबभूवेत्याह । यद्यस्मात्तदतिप्रसिद्धमिति वक्ष्यमाणमुवाचेत्यन्वयः । न अधिगतः अन्य उपायो येन तेन भगवता याच्ञाच्छलेन अपहृतं स्वशरीरमात्रावशेषितं लोकत्रयं यस्य सः । प्रति मुक्तो बद्धः "आमुक्तः प्रतिमुक्तश्च पिनद्धश्चापिनद्धवत्„ इत्यमरः । अपविद्धः प्रक्षिप्तः ॥ २३ ॥

भगवान् विद्वानपि यस्य सचिवो बृहस्पतिः सोऽपि पुरुषार्थेषु न निष्णातः यस्मादिन्द्रं प्रति युक्तं नोपदिदेशेति भावः । यत उपेन्द्रेण द्वारभूतेन आत्मानं मां लोकत्रयमयाचत तमुपेन्द्रं विहायेति तमेव कथं नायाचत यद्ययाचिष्यत तदा किं स दातुं नापारयिष्यत् स्वप्रभुं तं याचकं कथमकरोदिति भावः । तत्राप्यात्मन आशिषो विषयसुखानीति परममोहान्ध इव स इति भावः । यद्वा तं बृहस्पतिमपहायेति बृहस्पतिं प्रेषयित्वा तेनैव कथं मां नायाचत यदि बृहस्पतिर्मामयाचिष्यत तदा तस्मै ब्राह्मणाय त्रिलोकीं किं नादास्यं कथं स्वेष्टदेवं तं याचकमकरोदिति भावः कामितस्य वस्तुनस्तुच्छत्वमाह । अतिगम्भीरमनन्तं रयो वेगो यस्य तस्य कालस्य यन्मन्वन्तरं तेन परिवृत्तं पर्यन्तं लोकत्रयमिदं कियत् ॥ २४ ॥

किञ्चात्र जगत्येकः प्रह्लाद एव परमार्थे निष्णात इत्याह । यस्येति । उपरते मृते सति ॥ २५ ॥

ननु त्वमपि प्रह्लाद सदृश एवेति तत्र स्वत्रपं सदैन्यमाह । तस्येति । अनुपथमनुरूपं वर्त्म ॥ २६ ॥

तस्य बलेः ॥ २७ ॥

महीयते पूज्यते ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत्तस्मिन् सर्वेषां चेतनाचेतनानां पदार्थानामात्मनि स्थितिप्रवृत्त्यादिमूले विशेषतो भगवताम् ।

> उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम् ।
> वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥

इतिस्मृत्युक्तानां सर्वज्ञानां कथम्भूतानामात्मवतामात्मा उपास्यत्वेन विद्यते येषां तेषामेवंभूतानां ज्ञानभक्तिसम्पन्नानां महानुभावानामात्मपर्यन्तसर्वपुरुषार्थप्रदे आत्मतमे च वासुदेवे सम-

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

पितस्य भूमिदानस्य विलनिलयैश्वर्य्यं फलं न भवतीति पूर्वेणा-न्वयः ॥ २१ ॥

विलनिलयैश्वर्यं भगवदनुकम्पाफलमपि न भक्तस्य बलेरन्तरायमात्रमित्याह । नेति । भगवानमुष्य अमुं निवानुगृहीतवान् कर्मणः सम्बन्धमात्रविवक्षया षष्ठी यद्यस्मान्मायामयं मोकृव्यामोहकत्वादनित्यत्वादिदोषयुक्तम् । किञ्च । आत्मस्मृतिं भगवद्विषयकं ज्ञानं मुष्णातीति तथा तत्रैवाह भगवान् पराशरः ।

वासुदेवे मनो यस्य जपहोमार्चनादिषु ।

तस्यान्तरायो मैत्रेय । देवेन्द्रत्वादिकं फलम् इति

यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः ।

इत्यादिभगवद्वचनमप्यत्रानुसन्धेयम् ॥ २२ ॥

बलेरेकान्तभक्तत्वं वर्णयति । यत्तदित्यादिना । यद्यदा तस्येन वामनेन अनधिगतः अन्य उपायो येन तेन भगवता याच्ञाच्छलेनापहृतं स्वशरीरमात्रावशेषितं लोकत्रयं यस्य सः सम्प्रति मुक्तः वरुणपाशैरपि गिरिदर्यामपविद्धः प्रक्षिप्तोऽपि सन् ह स्फुटम् । इति वक्ष्यमाणमुवाच ॥ २३ ॥

बतेति खेदे भगवान् बहुविदपि अयं प्रसिद्धो योऽसाविन्द्रः यस्यैकान्तेनाव्यभिचारिप्रयत्नेन बृहस्पतिः सचिवः कार्य्याकार्यज्ञापकः अतो मन्त्राय वृतः सोऽप्यर्थेषु कार्य्याकार्येषु नूनं निश्चितं न निष्णातः न कुशलः यतस्तं बृहस्पतिमतिहायोल्लङ्घ्य उपेन्द्रेण इन्द्रस्योपरि वर्त्तमानेन भगवता भक्तवत्सलेन द्वारस्थेन आत्मानं मां लोकनाथमात्मनः आशिषः लोकानयाचत नो एव तस्योपेन्द्रस्य दास्यमतिगम्भीरमनन्तं वयो यस्य तस्य कालस्य मन्वन्तरं तेन परिवृत्तं विपर्य्यस्तं लोकत्रयमिदं कियत कियदपि सातिशयत्वादनित्यत्वादिदोषयुक्तत्वादनुपादेयमिति भावः ॥ २४ ॥

अस्मत्पितामहः प्रह्लादः स्वपितरि हिरण्यकशिपौ उपरते मृते सति स्वपित्र्यं पदमनुपादेयमिति हेतोः इतिशब्दः हेतुवाचकः न वव्रे भगवतः पदमकुतोभयं धामापि भगवता दीयमानमपि न वव्रे किन्तु यस्य भगवतोऽनुदास्यमेव वव्रे स अर्थेषु निष्णात इति भावः ॥ २५ ॥

तस्य प्रह्लादस्य अनुपथमनुवर्त्म असृजिताः कषायाः रागादयो यस्य परिहीणो भगवदनुग्रहो यस्य सः को वा उपजिगमिषति उपगन्तुमिच्छति इतिशब्दो बलिवाक्यसमाप्तिपरः ॥ २६ ॥

तस्य बलेः उत्तरस्मादष्टमस्कन्धे वक्ष्य बलेः येन भगवता दिग्विजये प्रभुसो बलिद्वारि प्रविशन् दशकन्धरो रावणः पदा तत्राप्यङ्गुष्ठेनैव ॥ २७ ॥

लब्धपदः प्राप्तस्थानः महीयते पूज्यते ॥ २८ ॥

भाषा टीका

तिस हेतु से आत्मज्ञानि भक्तों को आत्मा को देने वाले सब प्राणियों के आत्मा भगवान् को आत्मता से जो अर्पण किया तिस का फल मोक्षही है ॥ २१ ॥

वस्तुतः भगवान् ने इन बलि महाराज के ऊपर अधिक अनुग्रह नहीं किया जो कि आत्मा के स्मरण के नाश करने वाले मायामय वैभव को दिया है ॥ २२ ॥

जिन बलि महाराज को छलने का और उपाय नहीं जानकर मांगने के छलसे भगवान् ने तीनों लोक के ऐश्वर्य को हरण करलिया केवल शरीर मात्र बाकी छोड़ा फिर वरुण पाशों से बांध दिया पर्वत के कन्दरा में डारदिया तो भी यह वचन बोले ॥ २३ ॥

यह बात निश्चित है कि इन्द्र भगवान् प्रयोजन में चतुर नहीं हैं और जो बृहस्पति जी उनके मन्त्री भये वे भी प्रयोजन में अत्यन्त चतुर नहीं है जिनोंने कि इन्द्र के सहित मेरा जीतना और धन सम्पत्ति इन सब बातों को माँगा परन्तु भगवान् के दास भाव को नहीं माँगा और यह लोक त्रय का वैभव तो बड़े गंभीर वेगवाले काल का मन्वन्तर मात्र ही रहने वाला है इसमें क्या सार है ॥ २४ ॥

जिन भगवान् के दास भाव को हमारे पितामह प्रह्लाद जी ने मांगा है और जो निर्भय अपने पिता का राज्य भगवान् का दिया हुआ भी अपने पिता के मरने के पीछे नहीं ग्रहण किया उनने समुझा कि भगवान् से परे यह नहीं है ॥ २५ ॥

उन महानुभाव प्रह्लाद जी के सदृश करने वाला पाप रहित ऐसा हम सरीखा पुरुष भगवान् की कृपा से रहित कौन होगा जो उनके मार्ग में चलने की इच्छा करेगा ॥ २६ ॥

अब उनका चरित्र आगे के अष्टम स्कन्ध में विस्तार से कहेंगे उन बलि महाराज के दरवाजे में सब जगत् के गुरु भगवान् नारायण गदा को हाथ में लेकर अपने भक्त के ऊपर कृपा करके स्थित हैं जिन भगवान् ने दिग्विजय करते समय आये हुए रावण को अपने पादके अंगूठे से अयुत योजन पर्यन्त दूर फेंकदिया था ॥ २७ ॥

तिसके नीचे तलातल में मय नामक दानवोंका राजा रहता है तीन पुरों का मालिक होकर है तीनों के कल्याण की इच्छा करने वाले भगवान् महादेवजी ने उसके तीनों पुर जलादिये थे फिर कृपा करके उसको स्थान दे दिया है सब माया वालों का गुरु है श्री महादेव जी उसकी रक्षा करते हैं जिससे श्री सुदर्शन चक्र की भय से रहित होकर रहता है ॥ २८ ॥

ततोऽधस्तान्महातले काद्रवेयाणां सर्पाणां नैकशिरसां क्रोधवशोनाम गणः कुहकतक्षककालिय-सुषेणादिप्रधाना महाभोगवन्तः पतत्रिराजाधिपतेः पुरुषवाहादनवरतमुद्विजमानाः स्वकलत्रापत्यसुहृत्कुटुम्बसङ्गेन क्वचित्प्रमत्ता विहरन्ति ॥ २९ ॥

ततोऽधस्ताद्रसातले दैतेया दानवाः पणयो नाम निवातकवचाः कालेया हिरण्यपुरवासिन इति विबुधप्रत्यनीका उत्पत्त्या महौजसो महासाहसिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा प्रतिहतबलावलेपा बिलेशया इव वसन्ति ये वै सरमयेन्द्रदूत्या वाग्भिर्मन्त्रवर्णाभिरिन्द्राद्बिभ्यति ॥ ३० ॥

ततोऽधस्तात्पाताले नागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूडकम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति येषामुह वै पञ्चसप्तदशशतसहस्रशीर्षाणां फणासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमन्ति ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां संहितायां

वैयासिक्यां राह्वादिस्थितिबिलस्वर्गमर्यादानिरूपणं नाम

चतुर्विंशतितमोऽध्यायः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नैकशिरसामनेकफणानां गणोऽस्ति । एतत्प्रपञ्चयति । कुहकेति । महाभोगवन्तो महाकायाः पुरुषवाहाद्गरुडाद्भयात् ॥ २९ ॥

विबुधप्रत्यनीका देवशत्रवः सकलेष्वपि लोकेष्वनुभावो यस्य तस्यैव तेजसा सुदर्शनेन प्रतिहतो बलावलेपो वीर्यमदो येषां बिलेशयाः सर्पा इव इन्द्रदूत्या प्रयुक्ताभिर्मन्त्ररूपाभिर्वाग्भिः एवं हि वैदिकमाख्यानं पणिभिरसुरैर्निगूढां गामन्वेष्टुं सरमां देवशुनीमिन्द्रेण प्रहितां सन्धिमिच्छन्तः पणयः प्राहुः । किमिच्छन्ती सरमेत्यादि सा च सन्धिमनिच्छन्तीन्द्रस्तुतिपूर्वकं तान्प्रति परुषमाह । "हता इन्द्रेण पणयः शयध्वम्" इत्यादि ते च तच्छ्रुत्वा बिभ्यतीति ॥ ३० ॥

महाभोगिनो महाफणाः महानमर्षः क्रोधो येषां पञ्चादिसङ्ख्यानि शीर्षाणि येषां शीर्ष्णामिति वक्तव्ये शीर्षाणामित्यार्षः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीधरस्वामिकृतभावार्थदीपिकायाम्

चतुर्विंशोऽध्यायः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ महातलमनुवर्णयति । तत इति । ततः तलातलादधस्तान्महातले विवरे नैकं शिरो येषां तेषामनेकशिरसामित्यर्थः काद्रवेयाणां कद्रोरपत्यभूतानां सर्पाणां गणः क्रोधवशसंज्ञकोऽस्ति । गणो कांश्चित्प्रधानान्निर्दिशन्विशिनष्टि । कुहकेत्यादिना । कुहकादयः प्रधाना मुख्या येषां ते महाभोगवन्तः दीर्घकायाः महापुरुषस्य भगवतो वाहनभूतात्पक्षिराजानामप्यधिपतेर्गरुत्मतोऽनवरतं निरन्तरं उद्विजमाना बिभ्यतः स्वकलत्रादिरूपकुटुम्बासक्त्या प्रमत्ताः सन्तः क्वचिद्विहरन्ति ॥ २९ ॥

अथ रसातलमनुवर्णयति । तत इति । ततो महातलादधस्ताद्रसातले विवरे दैतेयदानवाः दितेः पुत्राः दनुपुत्राश्च पणय इति प्रसिद्धास्ते च निवातकवचाः कालकेया हिरण्यपुरवासिन इति त्रिविधाः विबुधानां देवानां प्रत्यनीकाः प्रतिपक्षिणः उत्पत्त्यैव महाबलशालिनः महान्तश्च ते साहसिकाः सहसा दर्पेण चरन्तीति साहसिकाः तथाभूताः सन्तः सर्वेषु लोकेष्वनुभावो यस्य तस्य भगवतो हरेस्तेजसैव सुदर्शनास्त्रेण प्रतिहतः बलावलेपः बलनिमित्तो गर्वो येषां ते तादृशा बिलेशया इव सर्पा इव वसन्ति तानेव विशिनष्टि । य इति । ये वै पणयः इन्द्रदूत्या सरमया देवशुन्या प्रयुक्ताभिर्मन्त्रवर्णभूताभिर्वाग्भिरिन्द्राद्बिभ्यति भयं प्राप्नुवन्ति । एवं हि वैदिकमाख्यानं पणिभिरसुरैर्निगूढां गामन्वेष्टुं सरमां देवशुनीमिन्द्रेण प्रहितां सन्धिमिच्छवः पणयः प्राहुः किमिच्छन्ती सरमे ! इत्यादिना सा च सन्धिमनिच्छन्ती इन्द्रस्तुतिपूर्वकं तान्प्रति धर्षणमाह "हता इन्द्रेण पणयः शयध्वम्" इत्यादि ते च तच्छ्रुत्वा बिभ्यतीति ॥ ३० ॥

एवं रसातलमनुवर्ण्याथ पातालमनुवर्णयति । तत इति । ततो रसातलादधस्तात्पाताले विवरे नागलोकानां सर्परूपाणां जनानां पतयो वासुकिः प्रमुखः प्रधानो येषां ते शङ्खादयो महाभोगिनः फणिनः महाफणिनः महानमर्षः क्रोधो येषां महाक्रोधाः निवसन्ति तानेव विशिनष्टि । येषामुह वै येषां हि पञ्चादिस-

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

च्यानि शीर्षाणि येषां शीर्ष्णामिति वक्तव्ये शीर्षाणामित्यार्षं तेषां सर्पाणां फणानां फणासु आधारस्य सम्बन्धमात्रविवक्षया षष्ठी विरचिता धृता ये महामणयो रोचिष्णवः सदा प्रकाशनशीलाः तेषां स्वरोचिषा पातालविवरं पातालविवरसम्बन्धितमोजालं विधमन्त्यपनुदन्तीति ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्
चतुर्विंशोऽध्यायः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

महाभोगवन्तः स्थूलशरीरवन्तः पुरुषोत्तमस्य वाहो वाहनं तस्मात् ॥ २९ ॥

पणयो दैत्या दानवा निवातकवचाः कालकन्यापुत्राः कालेयाः विबुधप्रत्यनीका देवशत्रवः प्रतिहतावलेपा विनाशितगर्वाः योगबलाद्बिलेशयाः सर्पाकारा ये पणय इन्द्रदूत्या सरमया शुन्योक्ताभिर्मन्त्रवर्णाभिर्वाग्भिः "इन्द्रस्य दूतीरिषिता चरामि मह इच्छन्ती पणयो निधी च,, इत्यादिमन्त्रवर्णात्मकगीर्भिः श्रुताभिरिन्द्राद्बिभ्यति भीतास्तिष्ठन्तीति यस्मात्तस्माद्बिलेशयाकारा निवसन्तीत्यर्थः "सरमा त्वं दूराद्ध्वनो बहिर्गतमभिर्जिह्वाभिर्जगुरिः किमपि निगरन्ती किमिच्छन्त्यत्र प्रानड् प्रायासीः" हिगताविति धातोः अस्यास्तव अस्मे अस्मासु हितिर्गतिः का किं कार्यमुद्दिश्यात्रागमनं ते तव कापरितक्मूया तस्यार्थे दूतस्यार्थं दूतक्रियासीत् त्वं रसायाः पयांसि कथमतर इति पणिभिः पृष्टा सरमा ब्रूते अहमिन्द्रस्य दूती तेन प्रेषिता चराम्यागतास्मि"व्यत्ययो बहुलम्,,इति सूत्रात् किमिच्छन्तीत्यस्य परिहारमाह। हे पणयः! वो महोत्तमानिधीनिच्छन्ती अपहर्तुमिति शेषः नोऽस्माकमतिस्कन्दोऽभियसा स्वामिनो भयेन तत्तदावत् आवामागमं तथा तस्माद्रसायाः पयांस्यतरमिति सरमायाः पणीन्प्रति परिहारवचनमिति मन्त्रवर्णार्थः ॥ ३० ॥

महाभोगिनः स्थूलशरीरा बहुभोगयुक्ता वा शीर्ष्णामिति वक्तव्ये शीर्षाणामितीतरपुरुषशिरोवैलक्षण्यद्योतनाय विगतं रचितं रचनं येषां ते तथा आर्षपाक्षिका स्वर्थः विधमन्ति निरस्यन्ति ॥ ३१ ॥ (१)

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

शीर्षस्य "शीर्षश्छन्दसि,,इति भगवान् पाणिनिः ॥ २९—३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
चतुर्विंशोऽध्यायः ॥ २४ ॥

(१) अत्र श्रीविजयध्वजतीर्थमतेऽध्यायसमाप्तिर्नास्ति ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

नैकशिरसामनेकफणानाम् । एतत् प्रपञ्चयति । कुहकेति । पुरुषवाहात् हरेर्वाहनात् ॥ २९ ॥

दैतेयादयोऽसुरभेदाः प्रत्यनीकाः शत्रवः इन्द्रदूत्या प्रयुक्ताभिर्मन्त्ररूपाभिर्वाग्भिः । एवं हि वैदिकमाख्यानं पणिभिरसुरैर्निगूढां गामन्वेष्टुं सरमां देवशुनीमिन्द्रेण प्रहितां सन्धिमिच्छन्तः पणयः प्राहुः । किमिच्छन्ती सरमेत्यादि सा च सन्धिमनिच्छन्ती इन्द्रस्तुतिपूर्वकं तान् प्रतिपरुषमाह "हता इन्द्रेण पणयः पलायध्वम्" इत्यादि ते च तच्छ्रुत्वा बिभ्यतीति ॥ ३० ॥

महाभोगिनो महाफणाः ॥ ३१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमस्य चतुर्विंशः सङ्गतः सङ्गतः सताम् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

महाभोगवन्तो महाकायाः ॥ २९ ॥

तेजसा सुदर्शनेन प्रतिहतो बलावलेपो वीर्य्यगर्वो येषां ते बिलेशयाः सर्पा इव ये पणयः सरमया प्रयुक्ताभिः "हता इन्द्रेण पणयः शयध्वम्"इत्यादिमन्त्रवर्णाभिः बिभ्यति ॥ ३० ॥

महाभोगिनो बृहत्कायाः महामर्षाः अतिक्रोधवन्तः येषां वासुकिप्रमुखानां पञ्चादिसङ्ख्यानि शीर्षाणि येषां तेषां पञ्चादिशीर्ष्णाम् शीर्षाणामित्यार्षः प्रयोगः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
चतुर्विंशाध्यायार्थप्रकाशः ॥ २४ ॥

भाषा टीका ।

तिस के नीचे महातल मे अनेक मस्तकवाले काद्रवेय नामक सर्पों का क्रोधवश नाम का गण है कुहक तक्षक कालिय सुषेण आदि बडे शरीर वाले वे सर्प हैं नारायण के वाहन पक्षिराज गरुड जी से डरते हुये भी अपने स्त्री पुत्र मित्रों के सहित कहींपर प्रमादी हो कर विहार करते हैं ॥ २९ ॥

तिस के नीचे रसातल मे दैतेय दानव पणिनाम वाले निवात कवच कालेय हिरण्यपुरवासी इन नामों वाले देवतों के शत्रु उत्पत्ति सेही बडे तेजवाले बडे साहसवाले केवल सकल लोक विदित प्रभाववाले हरिभगवान् के तेजस से श्री सुदर्शनचक्र सेही डर कर सर्प सरीके वास करते हैं जोकि इन्द्र की दूती सरमा की मन्त्र वर्णरूपावाणी सुनने से इन्द्र से डरते हैं ॥ ३० ॥

भाषा टीका ।

तिसके नीचे पाताल में नाग लोकों के पति वासुकि आदिक शंख कुलिक महाशंख श्वेत धनंजय धृतराष्ट्र शंखचूड कम्बल अश्वतर देवदत्त आदि बड़े सर्प बड़े क्रोधवाले निवासकरते हैं वे कोई पांच फणा वाले कोई सात फणा वाले कोई सौ फणा वाले कोई हजार फणा वाले हैं इनों के फणों में स्थित जो महामणि हैं सो बड़े प्रकाशमान हैं वे मणि अपने प्रकाश से पाताल विवर के सब अन्धकार को नाश करते हैं ॥ ३१ ॥

इति श्रीभागवत पञ्चमस्कन्ध चौबीसमें अध्याय का भाषानुवाद लक्ष्मणाचार्यकृत समाप्त ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे चतुर्विंशोऽध्यायः समाप्तः ॥ २४ ॥

॥ पञ्चविंशोऽध्यायः ॥

—:०:—

॥ श्रीशुक उवाच ॥

तस्य मूलदेशे त्रिंशद्योजनसहस्रान्तर आस्ते या वै कला भगवतस्तामसी समाख्यातानन्त इति (१) सात्वतीया द्रष्टृदृश्ययोः सङ्कर्षणमहमित्यभिमानलक्षणं यं सङ्कर्षणमित्याचक्षते ॥ १ ॥

यस्येदं क्षितिमण्डलं भगवतोऽनन्तमूर्तेः सहस्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्यते ॥ २ ॥

यस्य ह वा इदं कालेनोपसञ्जिहीर्षतोऽमर्षविरचितरुचिरभ्रमद्भ्रुवोरन्तरेण साङ्कर्षणो नाम रुद्र एकादशव्यूहस्त्र्यक्षस्त्रिशिखं शूलमुत्तम्भयन्नुदतिष्ठत् ॥ ३ ॥

यस्याङ्घ्रिकमलयुगलारुणविशदनखमणिषण्डमण्डलेष्वहिपतयः सह सात्वतर्षभैरेकान्तभक्तियोगेनावनमन्तः स्ववदनानि परिस्फुरत्कुण्डलप्रभामण्डितगण्डस्थलान्यतिमनोहराणि प्रमुदितमनसः खलु विलोकयन्ति ॥ ४ ॥

यस्यैव हि नागराजकुमार्य आशिष आशासानाश्चार्वङ्गवलयविलसितविशदविपुलधवलसुभगरुचिरभुजरजतस्तम्भेष्वगुरुचन्दनकुङ्कुमपङ्कानुलेपेनावलिम्पमानास्तदभिमर्शनोन्मथितहृदयमकरध्वजावेशरुचिरललितस्मितास्तदनुरागमदमुदितमदविघूर्णितारुणकरुणावलोकनयनवदनारविन्दं सव्रीडं किल विलोकयन्ति ॥ ५ ॥

स एव भगवाननन्तोऽनन्तगुणार्णव आदिदेव उपसंहृतामर्षरोषवेगो लोकानां स्वस्तय आस्ते ॥ ६ ॥

ध्यायमानः सुरासुरोरगसिद्धगन्धर्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनः सुललितमुखरिकामृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयन्तीं स्वां वनमालां नीलवासा एककुण्डलो हलककुदि कृतसुभगसुन्दरभुजो भगवान् माहेन्द्रो वारणेन्द्र इव काञ्चनीं कक्षामुदारलीलो बिभर्ति ॥ ७ ॥

य एष एवमनुश्रुतो ध्यायमानो मुमुक्षूणामनादिकालकर्मवासनाग्रथितमविद्यामयं हृदयग्रन्थिं सत्त्वरजस्तमोमयमन्तर्हृदयङ्गत आशु निर्भिनत्ति तस्यानुभावान् भगवान् स्वायम्भुवो नारदः सह तुम्बुरुणा सभायां ब्रह्मणः संश्लोकयामास ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पञ्चविंशे ततोऽधस्तादाह शेषस्य संस्थितिम् ।
सञ्जिहीर्षोरिदं काले यत्र रुद्रसमुद्भवः ॥ १ ॥

तस्य पातालस्य कोऽसावनन्तः सात्वतीयाः सात्वततन्त्रनिष्ठाश्चतुर्व्यूहोपासने सङ्कर्षणमित्याचक्षते तथाख्याने हेतुः द्रष्टृदृश्ययोः सम्यक्कर्षणमेकीकरणं येन तत्कुतः अहमित्यभिमानो लक्षणं चिह्नमधिष्ठातुर्यस्य अहङ्काराधिष्ठानेन द्रष्टृदृश्यसङ्कर्षणात् सङ्कर्षण इत्यर्थः ॥ १ ॥

अनन्तत्वमाह । यस्येदमिति । यच्छब्दानां स एष भगवाननन्त इत्युत्तरेणान्वयः ॥ २ ॥

तामसत्वमाह । यस्येदं विश्वमुपसंहर्तुमिच्छतः अमर्षेण विरचिते कुटिलीकृते रुचिरीकृते भ्रमन्त्यौ भ्रुवौ तयोर्मध्ये उत्तम्भयन्नुन्नमयन् ॥ ३ ॥

---

(१) प्रमातारः सात्वतीया इति श्रीवीरराघवाचार्यपादाः ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

सुभगत्वमाह । यस्याङ्घ्रिकमलयुगलेऽरुणा विशदा नखा एव मणयस्तेषां षण्डः समूहस्तस्य मण्डलेषु परिस्फुरतां कुण्डलानां प्रभया मण्डितानि गण्डस्थलानि येषु तानि ॥ ४ ॥

चारुणयङ्गवलये विलसिताश्च ते विशदाश्च विपुलाश्च धवलाश्च सुभगाश्च रुचिराश्च भुजा एव रजतस्तम्भास्तेष्वगुरुचन्दनकुङ्कुमानां पङ्क एवानुलेपस्तेनावलिम्पमानास्तेषामभिमर्शनेनोन्मथिते हृदये मकरध्वजस्यावेशेन रुचिरं च ललितं च स्मितं यासां ताः तस्यानुरागेण मदेन च मुदिते च तन्मदेन विघूर्णिते प्रचलिते च आ ईषदरुणे करुणावलोकयुक्ते नयने यस्मिंस्तद्वदनारविन्दं विलोकयन्ति ॥ ॥ ५ ॥

अमर्षोऽसहनं रोषः क्रोधः उपसंहृतस्तयोर्वेगो येन ॥ ६ ॥

उपासनार्थमाह । सुरादिभिर्ध्यायमानश्चिन्त्यमानः अनवरतं मदेन मुदितश्चासौ विकृतविह्वललोचनश्च, सुललितेन मुखरिकामृतेन वचनामृतेन स्वपार्षदान् विबुधयूथपानां पतींश्चाप्याययमानो हर्षयन्नीले वाससी यस्य एकमेव कुण्डलं यस्य हलस्य ककुदि पृष्ठे कृतो न्यस्तः सुभगश्च सुन्दरश्च भुजो येन उदारा लीला यस्य सः न परिम्लानो रागः कान्तिर्यस्यास्तस्या नवतुलसिकाया आमोदमध्वासवेन सुरभिमधुरसेन माद्यतां मधुकराणां ये व्रातास्तेषां मधुरगीतेन श्रीर्यस्यास्तां वनमालां कलां बरत्रामि ॥ ७ ॥

संश्लोकयामास वर्णयामास ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं पातालान्तान् भूविवराननुवर्ण्याथ पातालपर्यन्तस्य भूमण्डलस्य धारकं रसाया मूले स्थितमनन्तमनुवर्णयति पञ्चविंशेन। तस्य पातालस्य मूलदेशेऽधस्तात्त्रिंशद्योजनसहस्रान्तरे आस्ते का सा या चास्ते तत्राह । या वा इति । अनन्त इति समाख्याता प्रसिद्धानन्तसंज्ञिकेत्यर्थः तामसी तामसाहङ्काराधिष्ठात्री या भगवतः कला अंशरूपा सा इत्यर्थः सैव सङ्कर्षण इत्युच्यते तदाह । प्रमातार इति । सात्वतीयाः सङ्कर्षणप्रोक्तसात्वताख्यपञ्चरात्रनिष्ठाः प्रमातारः उक्तभगवत्कलायाथात्म्यविदस्तमनन्तं सङ्कर्षण इत्याचक्षते किमिदं सङ्कर्षणनामाश्वकर्णादिवत्केवलरूढं किम्वा पङ्कजादिवद्योगरूढमित्यपेक्षायां योगरूढमित्याह । द्रष्टृदृश्ययोरिति । यतोऽयमनन्तः द्रष्टृदृश्ययोर्ज्ञातृज्ञेययोः सन्निकर्षणं सन्निकृष्यते विषयीक्रियतेऽतीन्द्रियार्थोऽनेनेति सन्निकर्षणमतीन्द्रियार्थविषयकज्ञानसाधनं स्वयं यथातीन्द्रियार्थविषयकज्ञानवानेवमितरेषामप्यतीन्द्रियार्थविषयकज्ञानापादक इत्यर्थः अत एवानन्तस्ततस्तं सङ्कर्षण इत्याचक्षते सङ्कर्षणत्वमेव रूपयति । अहमित्यभिमानलक्षण इति । अहमिति प्रतीयमानोऽतीन्द्रियो यो जीवस्तद्विषयकोऽभिमानः अहमिति प्रतीतिस्तस्य लक्ष्यतेऽनेनेति लक्षणं कारणं हेतुरिति यावज्जीववर्गाभिमानिदेवतात्वात्तेषामहमिति बुद्धिवाचिहेतुरित्यर्थः ॥ १ ॥

एवमनन्ताख्योऽपि तस्मिन् योगरूढ इत्याह । यस्येति । यच्छब्दानां स एव भगवाननन्त इत्युत्तरेणान्वयः यस्य भगवतः सहस्रशिरसः अनन्तमूर्तेरेकस्मिन्नेव शीर्षणि ध्रियमाणं धार्यमाणमिदं कृत्स्नभूमण्डलं सिद्धार्थ इव श्वेतसर्षप इव लक्ष्यते दृश्यतेऽतोऽपरिच्छिन्नत्वादनन्त इत्युच्यत इति भावः ॥ २ ॥

यदुक्तं तामसीति तामसाहङ्काराधिष्ठातृत्वं तद्विशदयति । यस्य ह वेति । कालेन द्विपरार्द्धावसानरूपकालेनेदं कृत्स्नं जगत् संजिहीर्षतः संहर्तुमिच्छतः यस्य सङ्कर्षणस्यामर्षेण क्रोधेन विरचिते कुटिलीकृते रुचिरे भ्रमन्त्यौ भ्रुवौ तयोरन्तरेण मध्ये साङ्कर्षणाख्य एकादशानां व्यूहः गण एकादशरुद्रसमुदायरूपः कथम्भूतस्त्र्यक्षः त्रीण्यक्षीणि यस्य स त्र्यक्षः तिस्रः शिखा यस्य तादृशं शूलमुत्तम्भयन्नूर्ध्वं धारयन्नुदतिष्ठदुद्बभूव तामसाहङ्काराधिष्ठातृत्वाज्जगत्संहर्तृतामसरुद्रगणोत्पादक इत्यर्थः ॥ ३ ॥

सुभगत्वमाह । यस्येति । अहीनां पतयः सात्वतश्रेष्ठैः सह यस्य सङ्कर्षणस्याङ्घ्रिकमलयुगलेऽरुणा विशदा नखा एव मणयस्तेषां षण्डस्तस्य मण्डलेषु एकान्तभक्तियोगेनाव्यभिचरितभक्तियोगेनावनमन्तः प्रणमन्तः उक्तविधेषु नखमणिमण्डलेषु प्रतिबिम्बितानि अतिमनोहराणि परितः स्फुरतां कुण्डलानां प्रभया मण्डितानि गण्डस्थलानि येषु तानि स्ववदनानि प्रमुदितं मनो येषां तादृशाः सन्तः मुखं विलोकयन्ति खलु नूनम् ॥ ४ ॥

तथा नागराजानां कुमार्यः आशिषः पुरुषार्थानाशासानाः कामयमानाः यस्य सङ्कर्षणस्य चारुभिः सुन्दरैरङ्गदैर्वलयैश्च विलसिताः प्रकाशिताश्च ते विशदा निर्मलाश्च विपुला दीर्घाः सुभगाः कोमलाश्च रुचिराः सुन्दराश्च भुजास्त एव रजतस्तम्भास्तेष्वगरुकुङ्कुमचन्दनानां पङ्कश्चानुलेपस्तेनावलिम्पमाना लेपनं कुर्वाणास्तेषां भुजानामभिमर्शनेन स्पर्शेन उन्मथिते हृदये मकरध्वजस्य कामस्यावेशेन रुचिरं च ललितं च यत्स्मितं तद्यासां तथाभूताः सत्यः तस्य सङ्कर्षणस्यानुरागमदमुदितमदविघूर्णितारुणकरुणावलोकनयनवदनारविन्दं सव्रीडं यथा तथा विलोकयन्ति स्वाश्रितेषु मदेन स्वानुभवजनितेन च मुदिते तन्मदेन विघूर्णिते प्रचलिते च ईषदरुणे करुणावलोकनयने यस्मिन् तद्वदनारविन्दमिति तस्यार्थः ॥ ५ ॥

स उक्तविध एष सङ्कर्षणाख्योऽनन्तस्त्रिविधपरिच्छेदरहितः अनन्तकल्याणगुणार्णवः जगत्कारणभूतो देवः स्वतेजसा दीप्यमानः उपसंहृतः अमर्षरोषयोर्जगत्संहारविषययोरसहनक्रोधयोर्वेगो येन तथाभूतः लोकानां साधुजनानां स्वस्तये सुखायास्ते तिष्ठतीत्यर्थः ॥ ६ ॥

पुनः कथम्भूतः सुरादीनां गणैर्ध्यायमानः अनवरतं मदेन स्वानुभवजनितमदेन मुदितः स चासौ विकृतविह्वललोचनः विकृते घूर्णिते विह्वले परवशे इव स्थिते लोचने यस्य सः सुललितेन सुन्दरेण भावगर्भेण स्मितेन मुखरिकामृतेन वचनामृतेन स्वपार्षदान् स्वविबुधयूथानां पतींश्चाप्याययमानः हर्षयन् अपरिम्लानः अक्षीणः रागो रक्तिमा यस्यास्तस्या नवतुलसिकाया नूतनकृष्णतुलस्या आमोदः मधुरूपः आसवश्च तयोः समाहारस्तेन माद्यतां मधुकराणां व्रातास्तेषां मधुरगीतेन श्रीर्यस्यास्तां स्वामसाधारणीं वैजयन्त्याख्यां वनमालां दधदिति शेषः बिभर्तीत्यनेन वान्वयः नीले वाससी यस्य एकमेव कुण्डलं यस्य हलस्य ककुदि पृष्ठे कृतो न्यस्तः सुभगः सुकुमारश्च सुन्दरो भुजो येन एवम्भूतो भगवान् सङ्कर्षणः माहेन्द्रः महेन्द्रसम्बन्धी वारणेन्द्र इव ऐरावत इव शुभ्रः उदारा लीला यस्य

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ॥

सः काञ्चनीं स्वर्णमयीं कक्षां रसनां बिभर्ति कक्षे भवा कक्षा वरत्राख्या चर्ममयी वध्रिका "नध्री वध्री वरत्रा स्यात्" इत्यमरकोशोक्ता तामध्यस्य जान्वोश्चावष्टम्भार्थां योगपट्टिकाख्यां स्वर्णमयीं बिभर्ति इत्यर्थः ॥ ७ ॥

एवं सङ्कर्षणं उपवर्णितं इदानीमुक्तविध उपास्यमान उपासकानामन्तर्हृदयं गतः प्रकृतिसम्बन्धं निरस्यतीत्याह । य एष इति । एष भगवाननन्तः एवमनुश्रुतः उक्तविधत्वेन गुरुमुखाच्छ्रुतः अभिध्यायमानः "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति श्रुत्यर्थोऽत्र प्रत्यभिज्ञातः अतः सामर्थ्याच्छ्रवणानन्तरम्मत इति लभ्यते मुमुक्षूणां संसारादात्मानं मोक्तुमिच्छतामनादिकालप्रवृत्ताभिः कर्मवासनाभिर्ग्रथितं सन्दर्भितमविद्यामयं देहात्मभ्रान्तिस्वतन्त्रात्मभ्रान्तिरूपाज्ञानमयं ग्रन्थिं ग्रन्थिवद्दुर्मोच्यं सत्वरजस्तमोमयं सत्वादिगुणप्रचुरं गुणत्रयसम्बन्धप्रयुक्तानादिकालप्रवृत्तकर्मवासनाविद्याग्रन्थिरूपं संसारमित्यर्थः ध्यानेन मुमुक्षूणामन्तर्हृदये सन्निहितः आशु भिनत्ति नितरां निरस्यतीत्यर्थः तस्य भगवतः सङ्कर्षणस्येममुक्तमनुभावं प्रभावं तुम्बुरुणा सह स्वयम्भुवः पुत्रो नारदो ब्रह्मणश्चतुर्मुखस्य सभायां संश्लोकयामास वर्णयामास ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तस्य पातालस्य तामसी तमोगुणप्रवर्तनी अनन्तस्य यत्स्वरूपं द्रष्टुश्चेतनस्य दृश्यस्य शरीरस्य सन्निकर्षणं सामीप्यापादकमभेदग्राहकं कथं देहोऽहमिति तर्हि इदं सत्यं किं नेत्याह । अभिमानलक्षणं भ्रान्तिप्रत्यापादकमित्यर्थः तत्स्वरूपं सङ्कर्षणमित्याचक्षते ॥ १ ॥

सात्वतः गुरुतरक्षितिमण्डलं सर्षपलाघववच्छ्रयतोऽपरिमितबलत्वेनानन्तत्वं युक्तमित्यभिप्रेत्याह । तस्येति । सिद्धार्थः सर्षपः ॥२॥

एकादशव्यूहः एकादशधा विभक्तरूपविशेषः उत्तम्भयन्नुत्कम्पयन् ॥ ३ ॥ ४ ॥

तदभिमर्शनेन भुजस्पर्शनेन सव्रीडमिति क्रियाविशेषणम् ॥ ५ ॥

शृङ्गाराद्यनन्तगुणार्णवः ॥ ६ ॥

अपरिम्लानो रागः कान्तिर्यस्याः सा तथा आमोदमध्वासवेन सौरभरूपमधुरसेन इलस्य निजायुधस्य ककुधग्रे कक्ष्यामुदरबन्धम् ॥ ७ ॥

संश्लोकयामास पद्यलक्षणवाक्यैः कथयामास ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तामसीति तमोगुणाधिष्ठातृरुद्रस्यान्तर्यामित्वात् । "मूर्त्तिं नः पुरुकृपया बभार सत्वं संशुद्धम्" इत्यादिविरोधात् ॥ १ ॥ २ ॥

अमर्षकारणान्तु प्रायः सर्वेषां युगपद्गणवद्बहिर्मुखत्वं ज्ञेयम् ॥ ३—६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पञ्चविंशे तु पातालतले शेषस्य भूभृतः ।
जगत्संहर्तृरुद्रस्याप्यंशिनो वर्णिता गुणाः ॥ ० ॥

तामसी तमःकार्यसंहारप्रवर्त्तयित्री नतु तमोमयी "मूर्त्तिं नः पुरुकृपया बभार सत्त्वं संशुद्धम्" इत्यादिविरोधात् सात्वतीयाः सात्वततन्त्रनिष्ठाः द्रष्टृदृश्ययोर्भोक्तृभोग्ययोः सम्यक्कर्षणं यतः सङ्कर्षण इति तच्च कर्षणमहमस्य भोक्ता इदं मे भोग्यमित्यभिमानलक्षणमेव अभिमन्तुरहन्ताममतयोः शुद्ध्यर्थं तदधिष्ठातृत्वेन यं ध्यायन्तीति भावः ॥ १ ॥ २ ॥

उपसंजिहीर्षत इति । यदैवेदं जगदाधिक्येन संहर्त्तुमैच्छत्तदैव मायायास्तदिच्छाधीनत्वात्तदीयतमःकार्यरोषात्मको रुद्रो भ्रूमध्ये प्रादुरभूदमर्षविरचित इति रुद्रस्य विशेषणं सुलोपः आर्षः । यथा सिसृक्षतो द्वितीयपुरुषस्य नाभिमध्ये रजोगुणात्मकं पद्मं प्रादुर्भवति तद्वत् ॥ ३ ॥

लावण्येन मनोहरत्वमाह । यस्येति । नखमणीनां षण्डः समूहस्तस्य मण्डलेषु दर्पणायमानेष्वित्यर्थः ॥ ४ ॥

यस्य चारुणि अङ्गवलये अङ्गमण्डले विलसितादिविशेषणविशिष्टा ये भुजरजतस्तम्भास्तेषु अगुर्वादिपङ्क एवानुलेपः अनुलेपसाधनं तेन अवलिम्पन्त्यः तदभिमर्शनं तत्समय एव यत्तदङ्गस्पर्शस्तेन उन्मथिते हृदये यो मकरध्वजावेशस्तेन रुचिरं भावसूचकं स्मितं यासां ताः तस्यानुरागमदः साहजिको भक्तविषयकत्वेन मुदिते मदविघूर्णितारुणे च नागकुमारीविषयककरुणावलोकविशिष्टे नयने यत्र तद्वदनारविन्दं सव्रीडं हन्त हन्तास्मद्धृदयविकारं प्रभुरयं ज्ञातवानिति लज्जापर्याकुलं यथा स्यात्तथा ॥ ५ ॥

उपसंहृतेति । स्थितिकाले सम्प्रति रोषस्यानौचित्यादिति भावः । अमर्षोऽसहिष्णुता तदुत्थो रोषः क्रोधः ॥ ६ ॥

सुललितेन मुखरिकामृतेन वचनामृतेन कक्षां बध्नाम ॥ ७ ॥

संश्लोकयामास पुरुषावतारत्वेन श्लोकैस्तुष्टाव ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीमत्सङ्कर्षणवैभवं वर्णयति पञ्चविंशेनाध्यायेन । तस्येति । तामसी प्रलयनिमित्तभूतरुद्राविनियन्त्री सात्वतीयाः वेदार्थभूतभगवत्प्रोक्तसात्वततन्त्रनिष्ठाः श्रीमन्नारदादयश्चतुर्व्यूहोपासने यमनन्तं सङ्कर्षण इत्याचक्षते तदाख्याने हेतुं दर्शयंस्तमेव विशिनष्टि । द्रष्टृदृश्ययोः सम्यक्कर्षणमेकीकरणं येन तं पुनः कीदृशमहमित्येवंभूतस्य रुद्रस्य लक्षणं स्वरूपं यस्मात्तम् ॥ १ ॥

यस्येत्यादियच्छब्दानां स एव भगवानित्यग्रिमेणान्वयः ॥ २ ॥

इदं विश्वमुपसंहर्तुमिच्छतः अमर्षेण विरचिते कुटिलीकृते रुचिरे भ्रमन्त्यौ भ्रुवौ तयोरन्तरेण मध्ये एकादशव्यूहः एकादशभेदवान् रुद्रः शूलमुत्तम्भयन्नुन्नमयन्नुदतिष्ठत् ॥ ३ ॥

सात्वतर्षभैः सह अहिपतयः भवनमन्त्रः यस्य सङ्कर्षणस्य अङ्घ्रिकमलयुगले अरुणाश्च विशदाश्च नखा एव मणयस्तेषां षण्डः समूहस्तस्य मण्डलेषु परिस्फुरतां कुण्डलानां प्रभया मण्डितानि गण्डस्थलानि येषु तानि वदनानि विलोकयन्ति ॥ ४ ॥

उत्पत्तिस्थितिलयहेतवोऽस्य कल्पाः सत्त्वाद्याः प्रकृतिगुणा यदीक्षयासन् ।
यद्रूपं ध्रुवमकृतं यदेकमात्मन्नानाधात्कथमुह वेद तस्य वर्त्म ॥ ९ ॥
मूर्तिं नः पुरुकृपया बभार सत्त्वं संशुद्धं सदसदिदं विभाति यत्र ।
यल्लीलां मृगपतिराददेऽनवद्यामादातुं स्वजनमनांस्युदारवीर्यः ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किञ्च यस्य सङ्कर्षणस्य आशिषः सम्पद आशासानाः चारूणि यान्यङ्गवलयान्यङ्गदानि तद्विलक्षिताश्च ते विशदा विपुलाश्च धवलाः सुभगाश्च रुचिराश्च भुजा एव रजतस्तम्भास्तेषु अगर्वादिपङ्क एवानुलेपस्तेनावलिम्पमानास्तेषामभिमर्शनोन्माथिते हृदये मकरध्वजस्यावेशेन रुचिरं च ललितं च स्मितं यासां ताः तस्यानुरागमदेन भक्तविषयकस्नेहजातेन मदेन मुदिते च मदविघूर्णिते स्वानन्दमदेन प्रचलिते च आ ईषदरुणे च करुणावलोकयुक्ते नयने यस्मिन् तच्च तद्वदनारविन्दं विलोकयन्ति ॥ ५ ॥

अपराधासहनममर्षः अपराधिदमनचेष्टा रोषः उपसंहृतस्तयोर्वेगो येन ॥ ६ ॥

सुरादिभिर्ध्यायमानः अनवरतमदेन नित्यनिरूढानन्दद्योतकस्वाङ्गचेष्टाविशेषेण मुदितश्चासौ विकृतविह्वललोचनश्च सुललितेन मुखरिकामृतेन वचनामृतेन स्वपार्षदादीन् आप्याययमानः संहर्षयन् नीले वाससी यस्य एकमेव कुण्डलं यस्य हलस्य ककुदि पृष्ठे कृतौ न्यस्तः सुभगश्चासौ सुन्दरो भुजो येन उदारलीलः रुचिरक्रीडः न परिम्लानो रागः कान्तिर्यस्य स्रजस्याः नवतुलसिकाया आमोदमध्वासवेन सुरभिमधुररसेन माद्यतां मधुकराणां व्रातास्तेषां मधुरगीतेन श्रीर्यस्यास्तां बिभर्ति कक्षां वरत्रां वारणेन्द्र ऐरावत इव ॥ ७ ॥

तुम्बुरुणा गन्धर्वेण सह संश्लोकयामास ॥ ८ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले उस पाताल के नीचे तीस हजार योजन के अनन्तर भगवान् की तामसी कला अनन्त नाम से प्रख्यात है तिस को पञ्चरात्र तन्त्रवाले आचार्य चेतन अचेतन दोनों के मिश्रभाव करने से अहं ऐसा अभिमान का लक्षण होने से सङ्कर्षण करके कहते हैं ॥ १ ॥

जिन अनन्त मूर्ति भगवान् के हजारों मस्तकों के मध्य मे किसी एक मस्तक में रखा हुआ यह भूमण्डल सरसों के तुल्य प्रतीत होता है ॥ २ ॥

प्रलय काल मे इस जगत्को संहार करने की इच्छा वाले जिन के क्रोध से रचित भूमण्डल के मध्य मे से एकादशव्यूह वाले तीन नेत्र वाले तीन शिखा के शूल को उठाते हुये साङ्कर्षण नाम के रुद्र प्रगट भये हैं ॥ ३ ॥

जिन सङ्कर्षण भगवान् के चरण कमल दोनों के लाल उज्ज्वल नखों के मणियों के समूह के मण्डलों के समीप मे वडे सर्प सात्वतों मे श्रेष्ठ पुरुषों के सहित एकान्त भक्तियोग से नमस्कार करते हुये चारों तरफ मे प्रकाशमान जो कुण्डलों की प्रभा तिस का जो मण्डल तिस मे शोभायमान गण्डस्थलों वाले जो अपने मनोहर वदन तिन को बडे आनन्दित मन से देखते हैं ॥ ४ ॥

नागराजों की कुमारी अपने मनोरथों की चाहना करने वाली होकर उन अनंतजी के मनोहर शरीर मंडल मे शोभायमान अति निर्मल वडे सपेद सौभाग्य वाले सुंदर चांदी के खंभासरी के भुजाओं मे अगुरु चंदन कुङ्कुम के पंकका लेपन को लगाती हुई लगाते समय मे शरीर के स्पर्श से हृदय के क्षुभित होने से कामदेव के वेग से अति सुंदर विलास युक्त मुख वाली होकर इनके अनुराग को जानकर मदसे मुदित मदसे घूमते हुये कुछलाल वर्ण वाले अवलोकन से युक्त भगवान् संकर्षणजी के मुखारविंदको वे नाग कन्या देखती रहती हैं ॥ ५ ॥

सोइ अनंत गुणों के समुद्र भगवान् अनंतजी आदि देव सब क्रोध अमर्ष के वेगको समेटकर सबलोगों के कल्याणके वास्ते स्थित हैं ॥ ६ ॥

सुर असुर उरग सिद्ध गन्धर्व विद्याधर मुनि गण निरन्तर उनका ध्यान करते हैं सर्वदा मदसे मुदित होने से विकार युक्त विह्वल नेत्रों से अनन्तजी हैं सुन्दर मुख भाषण के अमृत से देवताओं के पति अपने पार्षदों को आनन्दित करते हैं नील वस्त्रको धारण किये हैं एक कुण्डल धारण किये हैं हलके पृष्ठ भाग में सुन्दर सुभग भुजों को स्थापन किये हैं कभी म्लान नहीं होने वाली माला चन्दन लेप तुलसी इनके मधुर सुगन्ध के मदसे मतवाले भौरों के समूह के मधुर गानकी शोभा से युक्त अपनी वनमाला को धारण किये हैं उससे भगवान् ऐसे शोभित होते हैं जैसे कि मनोहर लीलावाला महेन्द्रका हस्ती सुवर्ण की कांचनी को धारण करा होवै ॥ ७ ॥

इस प्रकार श्रवण किये हुये ध्यान किये भये संकर्षण भगवान् मुमुक्षु जनों की अनादि काल की जो कर्म वासना रूप ग्रन्थि है जोकि अविद्या से भई है सत्व रज तमो मय है तिस ग्रन्थि को हृदय मे प्रवेश होकर शीघ्र ही भेदन कर देते हैं जिनके प्रभाव को ब्रह्माके पुत्र नारद भगवान् तुंवुरु मुनि के सहितु ब्रह्माजी के सभा मे श्लोक बनाकर गान करते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अस्य जगत उत्पत्त्यादिहेतवो गुणा यदपेक्षया कल्पाः स्वस्वकार्यसमर्था आसन् यस्य तु रूपं ध्रुवमनन्तमकृतमनादि तत्र हेतुः यदेकमेव सदात्मन्यात्मनि नानाकार्यप्रपञ्चमधात्

यन्नाम श्रुतमनुकीर्तयेदकस्मादार्तो वा यदि पतितः प्रलम्भनाद्वा ।
हन्त्यंहः सपदि नृणामशेषमन्यं कं शेषाद्भगवत आश्रयेन्मुमुक्षुः ॥ ११ ॥
मूर्द्धन्यर्पितमणुवत् सहस्रमूर्ध्नो भूगोलं सगिरिसरित्समुद्रसत्त्वम् ।
आनन्त्यादनिमितविक्रमस्य भूम्नः को वीर्याण्यधिगणयेत् सहस्रजिह्वः ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य ब्रह्मरूपस्य वर्त्म तत्त्वं जनः कथमुह वेद नैव वेदे-त्यर्थः ॥ ९ ॥

तर्हि कथमसौ मुमुक्षुभिः सेव्यते तत्राह । मूर्तिमिति । यत्रेदं सदसद्विभाति स नोऽस्माकं भक्तानां बहुकृपया संशुद्धं सत्त्वं मूर्तिं बभार स्वजनानां मनांस्यादातुं वशीकर्तुं कृतां यस्य लीलां मृगपतिः सिंह आददे अशिक्षत । यतः उदाराणि वीर्याणि यस्य तस्मादन्यं मुमुक्षुः कमाश्रयेदित्युत्तरेणान्वयः यद्वा । कृपयेत्यत्र हेतुः । यद्यस्मात्स्वजनानां मनांस्यादातु लीला-मादत्ते मृगपतिरिवोदारवीर्यः । यद्वा । मृग्यन्त इति मृगाः काम-प्रदास्तेषां पतिर्मुख्यः ॥ १० ॥

किञ्च । आस्तां तस्य कृपया वपुर्धारणं तद्भजनं वा तन्ना-मौदार्यमेवातिचित्रमित्याह । यस्य नाम यदि पतितो महा-पातक्यप्यनुकीर्तयेत्तर्हि स शुद्ध्येदिति किमु वक्तव्यं यतोऽसा-वेव नृणामशेषमंहः सद्यो हन्ति । कथमनुकीर्तयेत् । अन्यतः श्रुतं वा कस्माद्वा आर्तो वा सन्प्रलम्भनाद्वा परिहासात् तस्माच्छे-षादन्यम् ॥ ११ ॥

गिर्यादिसहितं भूगोलं सत्त्वानि प्राणिनः सहस्रजिह्वोऽपि को गणयेत् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रथमं तद्ध्याने स्वस्यानधिकारद्योतनाय तत्स्वरूपस्य दुर्ज्ञेय-त्वमभिप्रयन्कारणत्वेन तमुपलक्षयति । उत्पत्तीति । अस्य जगतः उत्पत्त्यादिहेतुभूताः सत्त्वाद्याः प्रकृतिगुणाः सत्त्वरजस्तमोगुणाः क्रमोऽत्राविवक्षितः रजःसत्त्वतमोगुणाः क्रमेण जगदुत्पत्त्या-दिहेतुभूता यस्य भगवत ईक्षया सिसृक्षया कल्पाः सृष्ट्या-दिसमर्था आसन् बभूवुः गुणत्रयात्मिका प्रकृतिः स्वयं मह-दादिकार्यवर्गहेतुभूतापि स्वयमसमर्था सती यस्य सिसृक्षारू-पेक्षया स्रष्ट्रयादिसमर्थाभूदित्यर्थः अनेन जगन्निमित्तकारणत्व-मुक्तम् "तदैक्षत बहु स्याम्" इति श्रौतस्य कर्तृत्वस्यात्र प्रत्यभिज्ञानात् निमित्तकारणत्वं नाम स्वशरीरभूतप्रकृतिपुरुषकालानां स्वकार्या-कारेण परिणामोपयुक्तप्रवर्तनाश्रयत्वं यथा कुलालादेः स्वकी-यमृत्पिण्डादेर्घटादिरूपपरिणामोपयुक्तप्रवर्तनाश्रयत्वम् अथोपादा-नकारणत्वेन वर्णयति । यद्रूपमिति । आत्मन्नात्मनि स्वस्मिन्नेवं देवादिनामरूपाद्यभावादविभागेन स्थितं ध्रुवं नित्यम् "प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि" इति गीतोक्तेः कारणावस्थायामेवम्भूतं यद्रूपं प्रकृतिपुरुषात्मकं शरीरं तत्सिसृक्षानन्तरमात्मनि नानाकृतं देवादिनामरूपविभागविभक्तं कृतमधात् कृतवान् तस्य भगवतः वर्त्म स्वरूपं लोकविलक्षणं कथमुह कथं हि वेद मादृशः इति शेषः पूर्वमात्मन्यविभागेन स्थितमात्मनि नानाकृतं रूपम-धादित्यनेनैकत्वनानात्वे आत्मपर्यन्त इति विज्ञायते इदमेव हि तस्य उपादानत्वं यत्प्रकृतिपुरुषगतदेवादिविभागस्य स्वशरीर-भूतप्रकृतिपुरुषद्वारा आत्मपर्यन्तत्वमिति । यद्वा । पूर्वमेकत्वेनात्मनि स्थितं पश्चान्नानाकृतमात्मन्यधादित्यन्वयः धारणं चात्र अन्तः प्रविश्य प्रशासनेन इयमेव हि परमात्मनः कारणता कार्यता च यदविभक्तनामरूपप्रकृतिपुरुषनियमनं विभक्तनामरूपावस्थ-प्रकृतिपुरुषनियमनं चेति ज्ञातव्यम् ॥ ९ ॥

यद्यप्येवं दुर्ज्ञेयं स्वरूपं तथापि भक्तानुजिघृक्षयैवं साङ्क-र्षणं रूपं कृतवानिति कतिपयधर्मैर्वर्णयितुं शक्य इत्याह । मूर्त्ति-मिति । यत्र यस्मिन् भगवतीदं परिदृश्यमानं सदसच्चिदाचि-दात्मकं जगद्विभाति स भगवान्नोऽस्माकं कृपयास्मासु कृपये-त्यर्थः संशुद्धं रजस्तमोभ्याममिश्रितं यच्छुद्धं सत्त्वं तन्मूर्त्तिं बभार दिव्यमङ्गलविग्रहरूपेण भृतवानित्यर्थः भक्तानां नोऽनुग्र-हार्थम् निरतिशयकृपया मूर्त्तिमिमां बभारेति भावः कथमेवं ज्ञायत इत्यत आह । यदिति । यद्यस्मान्मृगपतिः सिंह इवोदार-वीर्यः । यद्वा । मृग्यन्तेऽन्विष्यन्त इति मृगा ब्रह्मादयो देवास्ते-षामपि पतिः "तं दैवतानां परमं च दैवतं पतिं पतीनां परमं पर-स्तात्" इति श्रुतेः ब्रह्मादीनामप्यन्वेषणीय इति भावः अनेन परत्वं सूच्यते उदारवीर्यः जगत्कर्तृत्वादिसामर्थ्ययुक्त एवम्भूतोऽपि स्वज-नानामस्माकं मनांस्यादातुं ग्रहीतुं स्ववशीकर्तुमिति यावत् अनवद्यामकर्मनिर्मितां लीलामहिपतिः सात्वतर्षभः नागराज-कुमार्यादिसुखाराध्यः सात्वततन्त्रं प्रणयन् भूमण्डलभरणादि-रूपां लीलामादत्ते परिगृहीतवान् सात्वततन्त्रप्रणेतृत्वं महा भारते उक्तम् ।

सात्वतं विधिमास्थाय गीतः सङ्कर्षणेन यः ।
अस्मात् प्रवक्ष्यते धर्मान् मनुः स्वायम्भुवस्तथा । इति ॥

लीलामादत्त इत्यनेन सौलभ्यं सूच्यते अनेनैव तद्ध्याने मादृशा-नामधिकार इति तात्पर्यम् ॥ १० ॥

एवं परत्वसौलभ्ययोगः समाश्रयणीयताहेतुरुक्तः अथ नामप्रभावपर्यालोचनयापि स एव समाश्रयणीय इत्याह । यन्नामेति । आर्तः रोगादिपीडितः महापातक्यपि यस्य भग-वतोऽनन्तस्य नाम यद्यनुकीर्तयेदकस्माद्वा प्रलम्भनाद्वा परि-हासाद्वा यस्य नाम यदि श्रुतं च वा स्यादार्तेन पतितेन वा तर्हि स एव पतितादिः स्वपातित्यादिभिर्विमुक्त इतरेषामपि नृणामा-त्मानं स्मरतामशेषमंहो दुरितं हन्ति अतः मुमुक्षोः परम्पर-यापवर्गशेषदुरितनिरसनक्षमनामधेयाच्छेषादन्यं कमाश्रयेदित्यर्थः शेषयति स्वाश्रितमिति नामनिर्वचनमत्राभिप्रेतम् ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ॥

क्षुत्त्वयान्निवर्तन्ते नान्तरिक्षक्षितित्वयात् ।
मतिक्षयान्निवर्तन्ते न गोविन्दगुणक्षयात् ॥

इत्युक्तरीत्या अनन्तकल्याणगुणगणराशेरनन्तस्य साकल्येन कल्याणगुणान् वर्णयितुं कः प्रभुरित्याशयेनाह । मूर्द्धनीति । गिरिभिः पर्वतैः सहिताः सरितः समुद्राः सत्त्वा जन्तवः यस्मिंस्तद्भूमण्डलं यस्य सहस्रशिरसोऽनन्तस्य मूर्द्धन्यणुवदर्पितं तस्य भूम्नोऽपरिच्छिन्नस्यानन्त्यादेवेतरैरियत्तयाविदितः विक्रमः प्रकारो यस्य तस्यानन्तस्य वीर्याणि कल्याणगुणरूपाणि सहस्रजिह्वोऽपि को वा गणयेदेतावन्तीति गणयेद्गुणानां करोतीति भावः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरेश्चतसृषु मूर्तिषु द्वितीयमूर्तेः शेषे विशेषसन्निधानात्तस्योपक्रमान् गुणांश्छेषरूपेण कीर्तयति । उत्पत्तीति । अस्य जगतः उत्पत्त्यादिहेतवः सत्त्वाद्याः प्रकृतिगुणा यदीक्षया कल्पाः समर्था आसन्नुत्पत्त्यादाविति शेषः । नन्वचेतनस्य स्वतः प्रवृत्त्यनुपपत्तेस्तत्सम्बन्धेन प्रवृत्तौ तस्यापि तद्विकारापत्तिरिति तत्राह । यद्रूपमिति । ध्रुवं शश्वदेकप्रकारं कुतः अकृतमकृत्रिमत्वान्नित्यस्यापि जीवस्य शरीरसम्बन्धेन विकारादकृतस्यापि प्रधानस्य कार्यरूपेण तु तत्त्वदर्शनादस्याकृतत्वमौपचारिकं किं न स्यादिति तत्राह । यदेकमिति । यदेकं केवलं कार्यात्मता तत्सङ्गेन वा विकारि न भवति "सच्चत्यच्चाभवत्" इति श्रुतेः कार्यत्वश्रुतेः कथं न तत्सत्त्वं स्यादित्यत्राह । आत्मन्निति । आत्मन्यात्मनि स्वाधारतया नानाविधं जगद्बभूवेत्यत्र तद्रूपत्वेन "य उ त्रिधा तु पृथिवीमुत द्याम्" इति श्रुतेः किञ्चाचिन्त्यमाहिमत्वात्तत्स्वरूपं दुर्ज्ञेयमित्यभिप्रेत्य यच्चहो सर्वभूतावित्यत्र । कथमिति । तस्य शेषात्मनामिनः सङ्कर्षणनामधेयस्य हरेर्वर्त्म वर्तनं कथमुह वेद न कथमपीत्यर्थः "मुह्यन्ति यं सूरयः" इति श्लोकि हेत्यनेन स्मारयति ॥ ९ ॥

आत्मज्ञानाधारत्वेनात्तलिङ्गमाह । मूर्तिमिति । सत्त्वं बलज्ञानसमाहारलक्षणमत एव संशुद्धं लोकदृष्ट्या मूर्तं परिमितं यत्र रूपे इदं सदसत्कार्यकारणात्मकमधिकरणाधेययोर्नामभेदः शङ्कनीयः मृगपतिः सिंहो यस्य लीलां शौर्यादिलक्षणामादद्दे अशिक्षत लीलाकरणप्रयोजनमाह । आदातुमिति । अनेनात्मज्ञानादिलक्षणाभिव्यक्त्याविर्भावतारा अप्यकृता इति ज्ञायते ॥ १० ॥

यन्नामस्मरणमात्रेणाशेषजन्मार्जितपापक्षयश्रवणाच्चकीर्तनेनाघक्षयो भवतीति किं वक्तव्यमित्यभिप्रेत्य स्तुवता शेषान्तर्यामी श्रीनारायण एव स्तूयते अजामिलादौ दर्शनाच्चान्यनामकीर्तनेन तादृक्फलादर्शनाच्चेति भावेनाह । यन्नामेति । शेषान्तर्यामिणो हरेरन्यं कं पुरुषं मुमुक्षुरित्यनेन "अहं भोगप्रदो वत्स ! मोक्षदस्तु जनार्दनः" इत्युक्तिं स्मारयति ॥ ११ ॥

गुरुगिर्यादिधरधरागोलधृतिरपि शेषस्य हरिसन्निधानादेवान्यकृता नेति भावेनाह । मूर्द्धनीति । विक्रमाणामानन्त्यात्साकल्येनाज्ञातपराक्रमस्य सहस्रजिह्वः शेष इत्यनेन स्पष्टयते ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मृगपतिः श्रीवराहदेवः जहास चाहो वनगोचरो मृग इति । तत्रापि मृगशब्दप्रयोगाद्यस्य लीलां पृथिवीधारणलक्षणामादद्दे स्वीकृतवानिति परममाहात्म्यं दर्शितम् ॥ १० ॥ ११ ॥

भगवद्विग्रहस्य मध्यमपरिमाणायमानत्वेऽपि विभुत्वाद्भूमण्डलस्याणुत्वम् ॥ १२—१५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कल्पाः स्वस्वकार्यसमर्थाः यदीक्षयैव आसन् यावत्पुरुषस्य प्रकृतावीक्षणं नासीत्तावत् प्रकृतिगुणाः सत्त्वाद्या महत्तत्त्वादीनामुत्पत्त्यादिषु न समर्था अभूवन्नित्यर्थः । यस्य रूपमाकारः ध्रुवं नित्यं यतोऽकृतमकृत्रिमं चिन्मयत्वादित्यर्थः । किञ्च । यदेकमेव आत्मनि स्वदेहरोमकूपप्रदेशेषु नानाकार्यप्रपञ्चमभाद्बभार पुपोष तस्य वर्त्म तत्त्वं तत्प्राप्तिमार्गं वा को वेद ॥ ९ ॥

रामकृष्णाद्यवतारत्वेन स्तौति मूर्त्तिं बभार । ननु किं प्राकृतीं न हि न हि संशुद्धं सत्त्वमत एव यत्र यस्यां चिन्मय्यां मूर्त्तौ सदसदिदं जगद्विभाति श्रीब्रजेश्वर्यापि दृष्टत्वादिति भावः । यया मूर्त्या मृगपतिः सिंह इव अनवद्यां लीलामादद्दे "रुदन्निव हसन्मुग्धबालसिंहावलोकनः" इत्युद्धवोक्तेः किमर्थं स्वजनानां मनांसि हस्तिन इव आदातुमाकृष्य ग्रहीतुं य एव उदारवीर्यः गिरिधारणादिपराक्रमवान् ॥ १० ॥

यन्नामापि पतितपावनमिति किं वक्तव्यं यतः पतितमपि पावनीकरोतीति वदन्नेव शेषरूपत्वेनापि स्तौति । द्वाभ्यां यस्य नाम सङ्कर्षण इति । पतितो महापातक्यपि यद्यनुकीर्त्तयेत्तर्हि संशुद्ध्येदिति किं वक्तव्यं यतोऽसावेव स्वदर्शनदानादिना नृणामशेषमंहः सद्यो हन्ति कथमनुकीर्त्तयेदन्यतः श्रुत्वा अकस्माद्वा आर्त्तो वा सन् प्रलम्भनात् परिहासाद्वा किं पुनः श्रद्धाभक्तिभ्याम् ॥ ११ ॥

मूर्द्धनि एकस्मिन्नेव भूगोलमणुवत्तिष्ठति सर्वाणि प्राणिनः सहस्रजिह्वः सन्नपि को गणयेत् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्य विश्वस्योत्पत्त्यादिहेतवः सत्त्वाद्या गुणा यस्य सङ्कर्षणस्येक्षयैव कल्पाः स्वकार्ये समर्था आसन् यस्य रूपं मूर्तिर्ध्रुवं नित्यं यतोऽकृतमनादिसिद्धं यदेकमन्यनिरपेक्षं सदेव आत्मन्यात्मनि विश्वाधारे नानाकार्यजातं विश्वमभात् तस्य वर्त्म कथं वेद जन इति शेषः यदनुग्रहं विना न वेदेत्यर्थः ॥ ९ ॥

नन्वेकस्य स्वरूपमात्रस्य ब्रह्मणः सदानन्दमयस्य मूर्तिधारणे सत्त्वादिना विश्वसृष्ट्यादिलीलायां च किम्प्रयोजनमत्राह । मूर्तिमिति । यत्र भगवति इदं सदसत् स्थूलसूक्ष्मरूपं विश्वं विभाति स नोऽस्माकमुपासकानां पुरुकृपया विपुलकरुणया सम्यक् शुद्धं प्राकृतसत्त्वादिसंसर्गरहितं सत्त्वमप्राकृतं सत्त्वं मूर्त्तिं बभार दधार स्वजनानां मुमुक्षूणां मनांसि आदातुं विश्वसृष्ट्यादिलीलामादद्दे विश्वसृष्ट्यादिलीलाभावे मुमुक्षूणां मनांसि

एवं प्रभावो भगवाननन्तो दुरन्तवीर्योरुगुणानुभावः ।
मूले रसायाः स्थित आत्मतन्त्रो यो लीलया क्ष्मां स्थितये बिभर्ति ॥ १३ ॥

एता ह्येवेह नृभिरुपगन्तव्या गतयो यथाकर्म विनिर्मिता यथोपदेशमनुवर्णिताः कामान् कामयमानैः ॥ १४ ॥

एतावतीर्हि राजन् ! पुंसः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय उच्चावचा विसदृशा यथाप्रश्नं व्याचख्ये किमन्यत् कथयाम इति ॥ १५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
भूविवरविध्युपवर्णनं नाम
पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ध्याने निगूहीतानि न भवेयुरित्यर्थः कथम्भूतामनवद्यां सर्वभावतः समस्तदोषशून्याम् । किञ्च । मृगाः बुभुक्षवो जीवा अत्र मृगशब्दवाच्याः तेषामपि पतिः यत् यत्र एव तेजो ऽवलिह्य ऽपि विश्वसृष्ट्यादिलीलामादत्ते यदुदारवीर्यः तत्सात्वतं मुमुक्षुः कमाश्रयेदित्युत्तरेण सम्बन्धः ॥ १० ॥

किञ्च । यन्नामेति यस्य नाम श्रुतं गुर्वादितः अकस्माद्वा आर्तो वा सन् प्रलम्भनात्परिहासाद्वा पतितो महापातक्यपि यदि कीर्तयेत्तर्हि अशेषमंहो हन्ति तत्रापि सपदि एव न च केवलमात्मन एवाहो हन्ति किन्तु नृणां स्वकीयानामन्येषामपि तत्माच्छेषादन्यं मुमुक्षुः कमाश्रयेत न कं भगवतः उपासनायाः परमपुरुषार्थत्वे का कथा यद्दर्शः सङ्कर्षणो यदंशः शेषस्तन्नामोच्चारणमात्रेणापि पतितोऽपि कृतार्थो भवतीति फलितोऽर्थः ॥ ११ ॥ १२ ॥

भाषा टीका ।

उत्पत्तिस्थिति के हेतु जो सत्वादिक प्रकृति के गुण जिन आप के देखने से समर्थ भये हैं जिन आप का रूप ध्रुव है विना वना है जो पहिले एकही रहा है अपने स्वरूप में जिनने नाना कार्य को धारण किया है तिनके मार्ग को कोई कैसे जान सकता है ॥ ९ ॥

आपने हमलोगों पर कृपा कर के शुद्धसत्वमय मूर्ति को धारण किया है जिसमे यह स्थूल सूक्ष्म जगत प्रकाशित होता है अपने जनों के मन को वशकरने को जिन आपकी लीला को उदार वीर्य वाले सिंहने सीखा है ॥ १० ॥

दुःखी पुरुष जिन आप के नाम को सुनकर अकस्मात् यदि कीर्तन करे गिरपडनेपर करे अथवा वन्दना से करे तब वह नाम मनुष्यों के सब पापों को नाश करता है तिन शेषजी से और कौन के शरण मे मुमुक्षु प्राप्त होवैगा ॥ ११ ॥

हजार मस्तक वाले जिन भगवान् के मस्तक में पर्वत नदी समुद्र सब जीवों सहित सब भूगोल अणु सरीका रहता है अनन्त होने से जिनकी महिमा नहीं जानी जाती है ऐसे विभु आपके वीर्य पराक्रमों को हजार जिह्वा वाला होने से भी कौन गिनती कर सकता है ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दुरन्तं वीर्यं बलं यस्य उरवो गुणा अनुभावश्च यस्य स च रसायाः भूमेर्मूले स्थितस्तिष्ठति आत्मतन्त्रः आत्माधारः १३ उक्तस्य लोकविभागस्योपयोगं वदन्नुपसंहरति । एता ह्येवेह कामान्कामयमानैर्नृभिरुपगन्तव्या इत्यन्वयः ॥ १४ ॥

तस्य प्रश्नः । एतावत्यो विपाकगतयः फलभूता गतयस्ताः व्याचख्ये व्याख्यातवानस्मि ॥ १५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किमिदं भूमण्डलं कर्मवशाद्बिभर्तीत्याह । एवमिति । एवं प्रभावः उक्तविधापरिच्छिन्नप्रभावः अत एवानन्तः अनन्तपदं पुष्कलप्रवृत्तिनिमित्ताभयं दुरन्तमपारं वीर्यं बलं यस्य उरवो गुणास्तेषामनुभावः प्रभावो यस्य स भगवान् सङ्कर्षण आत्मतन्त्रः स्वतन्त्रः अकर्मवश्य एव सँलीलया स्थितयेऽवस्थानाय पालनायेति यावत् पृथ्वीं बिभर्ति ॥ १३ ॥

उक्तमुपसंहरति । एता इति । कामान् कामयमानैर्नृभिरुपगन्तव्याः प्राप्याः तत्तत्कर्मानुसारेणेश्वरेण सृष्टाः गतयः फलरूपा लोका इह ब्रह्माण्डे एता एवैतावत्य एव ताश्च यथोपदेशं सम्प्रदायागतोपदेशमनतिक्रम्यानुवर्णिताः ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमुक्तमुपसंहृत्य राज्ञः प्रश्नावसरप्रदानाय उक्ता गतयो नृभिर्द्धर्मैः प्राप्या इति पुनरुपसंहरति । एता इति । हे राजन् ! पुंसः संसारिणः प्रवृत्तिरूपस्य सकामस्य धर्मस्य विपाकगतयः फलरूपा गतयो नानाविधा विसदृशाः सुखदुःखतारतम्येन व्यवस्थिताः एतावत्य एव ताश्च यथाप्रश्नं व्याख्याताः वर्णिता मयेति शेषः ॥ १५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शेषे त्वसम्भावितगुणकर्मकथनपूर्वकं स्तवनमुपसंहरति । एवमिति । दुरन्तवीर्यं इत्यनेनानन्तनाम हरेरेव मुख्यं नान्यस्य "अतोऽनन्तेन लिङ्गमप्यनन्तः" इत्यादिसूत्रस्मृती प्रमाणमिति दर्शयति । स्वगुणानेवानुभवति भुङ्क्त इति कर्मण्यणप्रत्ययः देहिदेहस्थितत्वेन दुःखानुभवस्यापि सम्भवात्कथं स्वगुणभोग इत्यत उक्तं आत्मतन्त्र इति भारस्य भर्तुः श्रमदर्शनादौपचारिकमिदं स्वातन्त्र्यं किं न स्यादित्यत उक्तं यो लीलयेति ॥ १३ ॥

परीक्षित्प्रश्नपरिहारार्थमुपसंहरति एता हीति । गम्यन्त इति गतयो लोका उपगन्तव्या धर्मफलत्वेन यथा कर्मनिर्मितास्ता एतस्येनेति शेषः एवशब्देन निषिद्धकर्मप्राप्यस्थानमन्तरेणान्यव्यवच्छेदः क्रियते हिशब्दः प्रमाणप्रसिद्धिं वक्ति मुक्तिगतेरन्यस्याः विद्यमानत्वात् कथमेतावत्य इतीयत्तेति तत्राह । कामानिति । मुक्तेरपीच्छाविषयत्वादित्यतः सामान्येनोक्तं विशिनष्टि । प्रवृत्तिलक्षणस्येति । उच्चावचानां सालक्षण्यं नास्तीत्यत्र येनोक्तं विसदृशा इति यथाप्रश्नं व्याख्याताः इत्यनेनान्योऽपि वक्तव्यांशोऽस्तीति श्रूयते तत्र वक्तव्यांशा बहवः सन्ति तेषु किं वक्तव्यं तदाख्याहि तस्यापि परिहारं कथयाम इत्याशयेनाह । किमन्यदिति ॥ १४—१५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दुःशब्दो नञर्थः ॥ १३ ॥

कामान् कामयमानैर्नृभिः ॥ १४ ॥ १५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमे पञ्चविंशोऽयं सङ्गतः सङ्गतः सताम् ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

दुरन्तमनन्तं वीर्यं बलं यस्य उरवो गुणाः अनुभावाश्च यस्य सच सच रसाया भूमेर्मूले आत्मतन्त्रः स्वाधीनः सन् क्ष्मां बिभर्ति ॥ १३ ॥

उक्तलोकविभागमीश्वरकृतं सोपयोगं सम्प्रदायतो मयोक्तमित्याह। एता इति । एताः गतयः विनिर्मिताः कर्मणेति शेषः कामान् कामयमानैर्नृभिर्यथाकर्म उपगन्तव्याः यथोपदेशं मया चानुवर्णिताः नतु स्वबुद्धिमात्रेण ॥ १४ ॥

लोकविभागमुपसंहरति । एतावती एतावत्यः पुंसः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतयः फलभूमयः सन्ति याः व्याचख्ये व्याख्यातवानस्मि ॥ १५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
पञ्चविंशाध्यायार्थप्रकाशः ॥ २५ ॥

भाषा टीका

ऐसे प्रभाव वाले अनन्त पराक्रम वाले बडे प्रभाव वाले अनन्त भगवान् स्वतन्त्र होकर रसातल के नीचे स्थित हैं जो कि अनायास से जगत्के पालन के वास्ते पृथिवी को धारण करते हैं ॥ १३ ॥

इतनी ही कर्मों के अनुसार निर्मितमनुष्यों के जाने की गति हैं जो सकाम करने वालों को प्राप्त होती हैं सो मैंने जैसी सुनी हैं तैसी वर्णन करदी हैं ॥ १४ ॥

हे राजन् ! पुरुषके प्रवृत्ति मार्ग वाले धर्मके परिपाककी ऊंच नीच अनेक प्रकार की इतनी ही गति हैं सो कहिदीनी हैं अब और क्या कहैं जो पूछोगे सो सब कहेंगे ॥ १५ ॥

इति श्रीमद्भागवत पञ्चमस्कन्ध पच्चीसमे अध्यायका
भाषानुवाद लक्ष्मणाचार्यकृत
समाप्त ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पञ्चविंशोऽध्यायः समाप्तः ॥ २५ ॥

॥ षड्विंशोऽध्यायः ॥

——:o:——

॥ राजोवाच ॥

महर्ष एतद्वैचित्र्यं लोकस्य कथमिति ॥ १ ॥

॥ ऋषिरुवाच ॥

[1]त्रिगुणत्वात् कर्तुः श्रद्धया कर्मगतयः पृथग्विधाः सर्वा एव सर्वस्य तारतम्येन भवन्ति ॥ २ ॥

[2]अथेदानीं प्रतिषिद्धलक्षणस्याधर्मस्य तथैव कर्तुः श्रद्धाया वैसादृश्यात् कर्मफलं विसदृशं भवति या ह्यनाद्यविद्यया कृतकामानां तत्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्तास्तासां [3]प्राचुर्येणानुवर्णयिष्यामः ॥ ३ ॥

॥ राजोवाच ॥

नरका नाम भगवन् ! किं देशविशेषा अथवा बहिस्त्रिलोक्या आहोस्विदन्तराल इति ॥ ४ ॥

॥ ऋषिरुवाच ॥

अन्तराल एव त्रिजगत्यास्तु दिशि दक्षिणस्यामधस्ताद्भूमेरुपरिष्टाच्च जलाद्यस्यामग्निष्वात्तादयः पितृगणा दिशि स्वानां गोत्राणां परमेण समाधिना सत्या एवाशिष आशासाना निवसन्ति ॥ ५ ॥

यत्र हवाव भगवान् पितृराजो वैवस्वतः स्वविषयं प्रापितेषु स्वपुरुषैर्जन्तुषु सम्परेतेषु यथाकर्मावद्यं दोषमेवानुल्लङ्घितभगवच्छासनः सगणो दमं धारयति ॥ ६ ॥

तत्र हैके नरकानेकविंशतिं गणयन्ति अथ तांस्ते राजन्नामरूपलक्षणतोऽनुक्रमिष्यामः तामिस्रोऽन्धतामिस्रो रौरवो महारौरवः कुम्भीपाकः कालसूत्रमसिपत्रवनं सूकरमुखमन्धकूपः कृमिभोजनः संदंशस्तप्तसूर्मिर्वज्रकण्टकशाल्मली वैतरणी पूयोदः प्राणरोधो विशसनं लालाभक्षः सारमेयादनमवीचिरयःपानमिति किञ्च क्षारकर्दमो रक्षोगणभोजनः शूलप्रोतो दन्दशूकोऽवटनिरोधनः पर्यावर्तनः सूचीमुखमित्यष्टाविंशतिर्नरका विविधयातनाभूमयः ॥ ७ ॥

तत्र यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकैस्तामिस्रे नरके बलान्निपात्यते अनशनानुदपानदण्डताडनसन्तर्जनादिभिर्यातनाभिर्यात्यमानो जन्तुर्यत्र कश्मलमासादित एकदैव मूर्च्छामुपयाति तामिस्रप्राये ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षड्विंशे तु ततोऽधस्तान्नरकस्थितिरुच्यते ।
पापिनो यत्र दह्यन्ते यमदूतैर्यथायथम् ॥ १ ॥

पुंसो गतय उच्चावचा विसदृशा इति भोगवैचित्र्यमुक्तं तदेतत्कुत इति पृच्छति । महर्ष इति ॥ १ ॥ कर्मणः समानत्वेऽपि श्रद्धावैचित्र्यात्फलवैचित्र्यमिति परिहरति । त्रिगुणत्वादिति । सात्त्विक्या श्रद्धया कर्तुः सुखित्वं राजस्यासुखित्वं दुःखित्वं च तामस्या दुःखित्वं मूढत्वं च । तत्रापि तासां श्रद्धानां तारतम्यात्सुखादितारतम्यं सर्वेषामित्यर्थः ॥ २ ॥

प्रतिषिद्धं प्रतिषेधः स एव लक्षणं प्रमाणं यस्याधर्मस्य कर्तुः श्रद्धावैसादृश्यं तमसस्तारतम्यात् तत्रापि कारणं

---

(१) बहुगुणत्वात इतिश्रीविज० । (२) पथेदानी मिति श्रीवीर० । (३) तास्ताः इतिश्रीवीरर० श्रीविज० पाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

दर्शयन्नाह । अनाद्यविद्याकृतानां कामानां याः सृतयो नरकास्तासां ताः । अथेदानीं ताः प्राचुर्येणानुवर्णयिष्यामः इत्यन्वयः ॥ ३ ॥

किं भूमावेव देशविशेषाः त्रिलोक्या ब्रह्माण्डाद्बहिर्वा आवरणेषु मध्येऽन्तराले वा भूमिव्यतिरिक्ते ॥ ४ ॥ ५ ॥

कर्मदोषमनतिक्रम्य दोषमेव दमं पापफलं दण्डं करोति न उल्लङ्घितं भगवच्छासनं येन ॥ ६ ॥

मतान्तरेणाष्टाविंशतिमाह । किञ्चेति ॥ ७ ॥

पापभेदेन च तत्तन्नरकयातनाभेदं प्रपञ्चयति । तत्र यस्त्वित्यादिना । यात्यमानः पीड्यमानः । एकदैव तदैव ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय इत्यनेनासां पुण्येन प्राप्यत्वोक्तेः केवलापुण्यगम्या अन्ये लोकाः सन्ति नरका इति सूचितं तानेव पिपृच्छिषुस्तावद्युक्तमेष्वपि लोकेषु सुखदुःखयोर्न्यूनाधिकभावलक्षणं वैचित्र्यमुक्तावच्चा विसदृशा इति तत्र कारणं पृच्छति राजा । महर्ष इति । हे महर्षे ! त्वया यद्वैचित्र्यं सुखदुःखयोर्न्यूनाधिकभावलक्षणमेषु लोकेषु जीवलोकस्य व्यवस्थितमुक्तं तद्वैचित्र्यं कथमुपपद्यते को वा तत्र वैचित्र्ये हेतुरैकरूप्येणानुष्ठितेन प्रवृत्त्याख्येन धर्मेण भूरादिलोकान् प्राप्तेषु केषाञ्चित्सुखमेव केषाञ्चिद्दुःखमेवान्येषां तु मिश्रमित्येतद्वैचित्र्ये किं कारणमिति प्रश्नाशयः ॥ १ ॥

सर्वेषां भूरादिलोकप्रापकधर्मस्य समानत्वेऽपि कर्तृवैचित्र्याच्छ्रद्धावैचित्र्याच्च सुखादिफलवैचित्र्यमित्युत्तरमाह । त्रिगुणत्वादिति । कर्तुर्जीवस्य त्रिगुणत्वात्सत्त्वादिगुणत्रययुक्तत्वाच्छ्रद्धया सत्त्वादिगुणभेदभिन्नया त्रिविधया श्रद्धया कर्मणां गतयः फलानि पृथग्विधाः सर्वाः श्रद्धादितारतम्यनिमित्ततारतम्येनैव भवन्ति अत्रेदमवगन्तव्यम् ।

> न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
> सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥

इत्युक्तरीत्या सर्वेषां गुणत्रययोगाद्गुणानां ह्रासोल्लासादिरूपेण परिणामेचाविशिष्टे सति प्राचीनकर्मवासनानुगुणगुणत्रयपरिणामवशात् सात्त्विकादिभेदेन धर्मस्य कर्तारो बुद्धयः श्रद्धाः तन्निमित्तानि कर्माणि च त्रिधा भिद्यन्ते तथा च गीतं भगवता ।

> मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
> सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥
> रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
> हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥
> अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
> विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥
> प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
> बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ ! सात्त्विकी ॥
> यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
> अयथावत्प्रजानाति बुद्धिः सा पार्थ ! राजसी ॥
> अधर्मं धर्ममिति या मन्यते तमसावृता ।
> सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ ! तामसी ॥
> त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
> सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥

इत्यारभ्य ।

> यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।
> प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥

इति श्रद्धायास्त्रैविध्यमुक्तं सात्त्विकाः सात्त्विकया श्रद्धया युक्ताः

> नियतं सङ्गरहितमरागद्वेषतः कृतम् ।
> अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥
> यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः ।
> क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥
> अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम् ।
> मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥

इति एवं स्थिते यः सात्त्विकः कर्ता सात्त्विकीभ्यां बुद्धिश्रद्धाभ्यां धर्माननुतिष्ठति सोऽनन्तसुखं मोक्षाख्यं तारतम्यरहितं प्राप्नोति यश्च राजसो राजसीभ्यां बुद्धिश्रद्धाभ्यां धर्माननुतिष्ठति स भूरादिलोकाननुप्राप्य परिमितसुखं प्राप्नोति तत्रापि श्रद्धातारतम्यकृतं सुखतारतम्यमेव भवति यस्तु तामस इमान् लोकान् प्राप्यापि केवलं दुःखमेव प्राप्नोति भूरादिलोकप्रापकः प्रवृत्ताख्यो धर्मस्तु राजसतामसयोः कर्त्रोः समानो भवतीति ॥ २ ॥

एवं धर्मस्य कर्त्रादितारतम्यमधर्मदृष्टान्तेनाह । यथेति । यथा धर्मस्य श्रद्धादितारतम्यनिमित्तं सुखरूपफलतारतम्यं तथा प्रतिषिद्धलक्षणस्य प्रतिषिद्धरूपस्याधर्मस्य कर्तुः श्रद्धायाः अधर्मनिमित्तभूतायाः केवलतामस्याः श्रद्धायाः वैसादृश्यात्तारतम्यात्कर्मफलं दुःखरूपं विसदृशं तरतमं भवति श्रद्धावैसादृश्ये कारणं वदन्कर्मफलवैसादृश्यमेवोपपादयति । अनाद्यविद्येति । अविद्या कामशब्दः फलकामनापरः कर्मशब्दः तद्वासनापरः फलकामनायाः अज्ञानफलत्वात् । यद्वा । रागादिरविद्या तत्प्रयुक्तानि यानि कामकर्माणि फलकामनापूर्वकमनुष्ठितानि पापानि वासनारूपेणावस्थितानि तेषां वैसादृश्यादित्यनुषङ्गः तेषां नानात्वेनावस्थितत्वाच्छ्रद्धावैसादृश्यं ततः सृतयो गतयः फलरूपाणि दुःखानीति यावत् तत्परिणामलक्षणाः अविद्याकामकर्मपरिपाकस्वरूपाः सहस्रशः आनन्त्येनावान्तरतारतम्येन च प्रवृत्ता अनुभाव्याः सन्तीत्यर्थः एवमुक्ते सति तद्वानन्त्येन प्रवृत्ताः सृतयस्तदनुभवस्थानानि च साकल्येन वर्णनीयानीति राज्ञः प्रश्नोद्योगमालोच्य केवलतमोगुणमूलकानाद्यज्ञानप्रयुक्तकामकर्मरूपाणां पापानामवान्तरभेदेनानन्त्यात्तत्फलरूपाणां दुःखात्मनां गतीनामानन्त्यात्तदनुभवस्थानान्यपि बहूनि सन्तीति तेषां साकल्येन वर्णयितुमशक्यत्वात्तत्र प्रभूतदुःखरूपा गतीस्तत्स्थानानि च कानिचिद्वर्णयिष्यामीत्याह । तास्ताः प्राचुर्येणानुवर्णयिष्याम इति ॥ ३ ॥

एवमुक्ते राजा कार्त्स्न्येन तद्वर्णनप्रश्नं विहायाधर्मफलभूतदुःखानुभवस्थानानि नरकाः किं भूमेरेव देशविशेषा उत त्रिलोक्याः बहिर्वर्तन्ते उतान्तराले कयोश्चिल्लोकयोरन्तराले वर्तन्ते इति पृच्छति । नरका इति । हे भगवन् ! त्रिलोक्या बहिः ब्रह्माण्डाद्बहिरावरणेष्वेव ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

ब्रह्माण्ड एव वर्तन्त इत्याह। अन्तराल एवेति। त्रिजगत्या ब्रह्माण्डस्यान्तराल एव गर्भ एव तत्रापि कस्यां दिशि दक्षिणस्यां तत्रापि कुत्र भूमेरधस्तादण्डजलादुपरि वर्तन्त इत्यर्थः तां दक्षिणां दिशं विशिनष्टि। यस्यामित्यादिना गद्यद्वयेन। यस्यां दक्षिणस्यां दिश्यग्निष्वात्तादयः पितॄणां गणाः परमेण समाधिना ध्यानयोगेन स्वानां गोत्राणां सत्या आशिष आशासानाः कुर्वाणाः एव पाकं पचतीनिवास्निर्देशः निवसन्ति ॥ ५ ॥

यत्र ह यस्यां हि दिशि पितृराजः पितॄणामधिपतिः वैवस्वतो यमः सम्परेतेषु मृतेषु स्वपुरुषैर्दूतैः स्वविषयं स्वदेशं प्रापितेषु जन्तुषु जीवेषु अनुल्लङ्घितमनतिक्रान्तं भगवतो नारायणस्य शासनं येन तथाभूतः सन् सगणः स्वकीयदूतगणसहितः यथाकर्मावद्यं दोषमवद्यं जुगुप्सितं कर्मैव कर्मावद्यं बहुलग्रहणात् विशेष्यस्य पूर्वनिपातः यथा कर्मावद्यमिति पदत्रयं वा अवद्यं वेदशास्त्रजुगुप्सितं कर्म प्रतिषिद्धं हिंसादिकर्म यथा जन्तुभिर्निबन्धादिना यथा कृतं तदनुसारेणैव दोषं प्रति दमं दण्डं धारयति कारयति जुगुप्सितकर्मरूपदोषानुसारेणैव दण्डयतीत्यर्थः ॥ ६ ॥

तत्र नरकाः कतीत्यपेक्षायामेके नरकानेकविंशतिं गणयन्तीत्याह। तत्रेति। के त इत्यपेक्षायां तान्नामरूपलक्षणैः क्रमेण गणयामीत्याह। हे राजन्! तान्नरकान्नामादिभिः तेऽनुक्रमिष्यामः तत्र नामानि वाचकाः शब्दा रूपाणि परस्परविलक्षणदुःखजनकत्वाकाराः लक्षणानि चिन्हानि तत्तद्धिंसादिकर्माणि यानि प्राणिनिबन्धादीनि तादृशनिर्बन्धादिरूपचिन्हानि एभिरनुक्रमिष्यामः एभिः सह क्रमेण तुभ्यं वर्णयिष्याम इत्यर्थः। तानेव क्रमेण गणनया दर्शयति। तामिस्र इत्यादिना अयःपानमित्यन्तेन गद्येन। तत्र वज्रकण्टकशाल्मलीति एको नरकः तथा अवीचिरित्येकः एवमेकविंशतिनरका भवन्ति केचिदित्यत्रारुचिबीजं त्वन्येषां सद्भाव इति। पुनस्तानेव निर्दिशति। किञ्चेत्यादिना सूचीमुखमित्यन्तेन एते सप्तपूर्वोक्तैस्तामिस्रादिभिः सहाष्टाविंशतिर्भवन्ति एते नरका विविधयातनाभूमयः दुःखानुभवभूमयः ॥ ७ ॥

तानेकैकशस्तदनुभवनिमित्तानि पापानि च वर्णयति। यस्त्विहेत्यादिना यावदध्यायसमाप्ति। यो जन्तुरिह लोके परस्य वित्तादीन्यपहरति स हि यमदूतैरतिभयङ्करैः कालपाशेन यमपाशेन बद्धो बलात्तामिस्राख्ये नरके निपात्यते तामिस्रं विशिनष्टि। तामिस्रप्राये तमःप्रचुरे यत्र तामिस्रे निपात्यमानः जन्तुरनशनापानजुष्टे प्रहारमर्दनादिभिर्यातनाभिः यात्यमानः पीड्यमानः कश्मलं दुःखमासादितः प्राप्त एकदैव मूर्च्छां प्राप्नोति तामिस्रप्राये इत्यनेनैषां तामिस्रादिनामानि योगरूढानीति ज्ञापितम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अतिबहुलदुःखभोगस्थानत्वेन नरकलोकस्य हेयत्ववर्णनेन संसारस्यातिहेयत्वेन वैराग्यस्य दार्ढ्यातिशयो जायत इति तन्निरूपयत्यस्मिन्नध्याये। तत्रादौ पूर्वोक्तार्थं प्रश्नमुद्भाव्य परिहृत्य वक्तव्यार्थं प्रतिजानीते। महर्ष इति। अयमर्थः लोकस्य स्वर्गादिपातालान्तस्य स्थानस्य विशेषात्तत्स्थस्य जनस्यैतत्प्रत्यक्षेण स्वकवनादागमेन च सिद्धत्वात् प्रत्यक्षवदेतदित्युच्यते वैचित्र्यं कस्यचित्सुखित्वं कस्यचिद्दुःखित्वं कस्यचिदुभयरूपत्वं कथं घटते सुखादिसामान्यविशेषहेतुत्वं च सुखे दुःखे चाल्पमहत्त्वभेदेन तारतम्यं च कथमिति किञ्चैता गतयः सर्वाः सर्वेषां भवन्ति किञ्चैकैकस्यैकैका गतिरुतैकस्यानेका गतिरित्येतत्सर्वं परिहरति। बहुगुणत्वादिति। अयमर्थः कर्तुः श्रद्धाया "एवमितः प्रेत्याभिसम्भवितास्मि" इति बुद्धिलक्षणाया बहुगुणत्वाद्बहुविधत्वात्सत्त्वादिगुणवैचित्र्येण निर्मितत्वाल्लोकवैचित्र्यं यस्मात्सर्वाः कर्मगतयः सर्वस्य भवन्ति ॥ १—२ ॥

अथ तस्माच्छास्त्रनिषिद्धस्याधर्मस्य तथैव कर्तुः श्रद्धायाः वैसादृश्याद्विरुद्धस्वरूपत्वात्कर्मफलमपि विरुद्धं ततः किं तत्राह। याहीति। अनाद्यविद्यया विलसितकामानां प्राणिनां तत्परिणामलक्षणास्तेषामनाद्यविद्याकामानां परिपाकनिमित्तपापकर्मविकारलक्षणा याः सृतयो गतयः सहस्रशः प्रवृत्तास्ताः प्राधान्येनानुवर्णयिष्याम इत्यन्वयः ॥ ३ ॥

पृष्टेनैवोत्तरं वाच्यमित्यतः परीक्षित्पृच्छति। नरका इति। किं केचन देशविशेषाः उत महादुःखानुभवलक्षणशब्दवाच्याः प्रथमे ते त्रैलोक्याद्बहिरन्तर्वा द्वितीये कस्यां दिशि कियदधस्तात्कियदुपरीति ॥ ४ ॥

परिहरति। अन्तराल इति। दुःखानुभवसद्भावेऽपि न तच्छब्दवाच्याः किन्तु तदधिकरणदेशविशेषास्त्रैलोक्यान्तराले तत्रापि भारतखण्डाद्दक्षिणसूत्रपाते भूमेरधस्तादण्डजलाशयस्य गर्भोदकराशेरुपरिष्टाद्दक्षिणस्यां दिशि निर्ऋत्या धर्मेतद्वचनम् ॥ ५ ॥

यथाकर्मनिर्मितपापमनुल्लङ्घितमनतिक्रान्तं भगवतो हरेः शासनमाज्ञा येन स तथा ॥ ६ ॥

तस्यां दिशि विद्यमानान्नरकानेकविंशतिं संख्याति। तत्र हेति। तत्र हेत्यनेन सप्त प्रधानाः सन्तीति स्मृतिप्रसिद्धिं द्योतयति। नैतावता समाप्तिः किं तथापि सन्तीत्याह। किञ्चेति। तान्देशान्विशिनष्टि। विविधयातनाभूमयः नानाविधदण्डस्थानविशिष्टाः "यातना तीव्रवेदना" इति वचनाद्दुःखासम्भिन्नप्रदेशाः इत्यर्थः ॥ ७ ॥

तत्तन्नरकेषु तत्तद्दुष्कर्मनिमित्तदुःखविशेषानाह। तत्रेति। यात्यमानो दुःखानुभवी क्रियमाणः कश्मलं बहुदुःखमेकदेति विशेषणात्कदाचिन्मूर्च्छां न यातीति विशेषो ज्ञायते यातनाभिः पर्यायेण पीड्यमानत्वादित्यर्थः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

असमानत्वे तावत् फलवैचित्र्यं भवत्येव समानत्वेऽपि तदित्याह। त्रिगुणत्वादिति ॥ १ ॥ २ ॥

प्रतिषिद्धलक्षणस्याधर्मस्य यः कर्ता तस्य तथैव पूर्वोक्तप्रकारेणैव श्रद्धा वैसादृश्यादधर्मलक्षणस्य कर्मणः फलं विसदृशं भवति। तत्र निषेधे प्रतीतावपि सत्यां प्रमादेन तत्करणात्तमसोऽल्पत्वं मोहेन मध्यमत्वं नास्तिकतायां तु पूर्णत्वं ज्ञेयम्। अथातो हेतोर्यास्तत्परिणामलक्षणास्सृतयः सहस्रशः प्रवृत्ताः सन्ति ताः प्राचुर्येण तु वर्णयिष्यामः। केषामादिकारणानां सम्बन्धिन्यस्ता इत्यपेक्षायामाह। अनादीति ॥ ३ ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

स्वानां गोत्राणामिति तत्तदभिमानादेव तत एव यत् किञ्चिच्छान्तिर्भवतीति सत्या एवाशिष इत्युक्तम् ॥ ५ ॥

दोषमेव दमरूपेण परिणमयतीत्यर्थः । अनुल्लङ्घितेति । भगवानश्च ब्रह्मा तथा शासनञ्च विभीषिकयापि जीवान् भगवदन्तर्मुखीकर्तुमिति ज्ञेयम् । यद्वा । भगवच्छासनशब्देनात्र वेद एवोच्यते ॥ ६ ॥ ७ ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भुवोऽधस्ताज्जलादूर्ध्वं नरकस्थानमुच्यते ।
षड्विंशे यत्र दण्ड्यन्ते पापिनो यमकिङ्करैः ॥

पुंसो गतयः उच्चावचा विसदृशा भोगवैचित्र्यमुक्तं तदेतत् कुत इति पृच्छति । महर्षे ! इति ॥ १ ॥

श्रद्धावैसादृश्यात् फलवैचित्र्यमाह । त्रिगुणत्वादिति । सात्विक्या श्रद्धया धर्म एव भवेत्तस्माच्च कर्तुः सुखमेव राजस्या धर्माधर्मौ ताभ्यां सुखदुःखे तामस्या अधर्म एव तस्माच्च दुःखमोहौ तत्रापि तासां श्रद्धानां तारतम्यात् सुखादितारतम्यं सर्वस्य सर्वा इति नहि कश्चित् सर्वदैव सात्विकश्रद्धावानेव तिष्ठति राजसतामसश्रद्धावानेव वा अतः कालभेदेन सर्वत्रिविधस्यैव जीवस्य सर्वविधा गतयः ॥ २ ॥

तत्र शास्त्रविहितस्य धर्मस्य फलभूतानि भौमदिव्यबिलस्वर्गसुखानि दर्शितान्यत एवाधर्मस्यापि फलभूतानि नरकदुःखान्यपि विवक्षितव्यानीत्यत आह । अथेति । प्रतिषिद्धं प्रतिषेधस्तदेव लक्षणं प्रमाणं यस्य तस्य तथैवेति । धर्मस्य कर्तुर्यथा तथैवाधर्मस्यापि कर्तुरित्यर्थः । श्रद्धाया वैसादृश्यादिति । श्रद्धावैसादृश्येऽपि तमस्तारतम्यमेव कारणं तथा हि प्रमादेनाधर्मकरणात्तमसोऽल्पत्वं ज्ञानेन मध्यमत्वं तथापि नास्तिकत्वेन पूर्णत्वं ज्ञेयं तमस्त्रैविध्यस्यापि कारणं दर्शयन्नाह । या इति । अनाद्यविद्यासम्बन्धो जीवस्य कदा कथं वेति वक्तुमशक्तेः अनादिर्या तमआदित्रैविध्यमयी अविद्या तया कृतानां जीवसम्बन्धित्वेनोपपादितानां कामानां वासनानां याः सृतयः कीदृश्यस्तेषां कामानां परिणामलक्षणाः तासां मध्ये प्राचुर्येण नरकानिति शेषः ॥ ३ ॥ ४ ॥

भूमेः सप्तपातालवत्या अधः जलाद्गर्भोदात् ॥ ५ ॥

स्वविषयं स्वदेशं कर्मावद्यं कर्मदोषमनतिक्रम्य दोषं दोषरूपदमं दण्डं तादृश्या विभीषिकयापि जीवान् भगवतोऽन्तर्मुखीकर्तुमिति भावः ॥ ६ ॥

तामिस्रादयः एकविंशतिर्नरकाः मतान्तरेण पूर्वैर्मिलिताष्टाविंशतिमाह । किञ्चेति ॥ ७ ॥

यात्यमानः पीड्यमानः तामिस्रप्रायेऽन्धकारबहुले ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

षड्विंशे नरकस्थितिर्वर्ण्यते धर्मस्य उच्चावचविसदृशविपाकगतय इत्युक्ते भोगवैचित्र्ये कारणं पृच्छति । महर्षे इति ॥ १ ॥

कर्तुर्जीवस्य त्रिगुणत्वात्त्रयो गुणा बन्धनभूताः यस्य स त्रिगुणस्तत्त्वं तस्माच्छ्रद्धया तत्तद्गुणानुरूपया हेतुभूतया कर्मगतयः सात्विकादिकर्मविपाकभूमयः पृथग्विधा बोध्याः

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥

इति श्रीमुखवचनात्तत्रापि गुणवृत्तितारतम्यात्सर्वा गतयः सर्वस्य कर्तुर्भवन्ति ॥ २ ॥

प्रतिषिद्धं प्रतिषेधः ब्राह्मणो न हन्तव्यः आचाराच्च प्रमदितव्यमित्यादि तदेव लक्षणं ज्ञापकं यस्य तस्याधर्मस्य कर्तुः श्रद्धाया वैसादृश्यात्तमोवृत्तिभेदेन श्रद्धाया अपि अनेकविधत्वात् कर्मणोऽधर्मस्य फलं विसदृशं भवति तत्र अनाद्यज्ञानेन कृतानां सम्पादितानां कामानां पापानां याः सृतयस्तासां द्वितीयार्थे षष्ठी ताः अथेदानीं प्राचुर्येण प्राधान्येनानुवर्णयिष्याम इत्यन्वयः ॥ ३ ॥

नरकान् वर्णयितुं प्रवृत्तं मुनिं नरकाः कुत्र सन्तीति पृच्छति । नरका नामेति । भूमावेव देशविशेषाः त्रिलोक्याः ब्रह्माण्डाद्बहिर्वा अन्तराले ब्रह्माण्डमध्ये वा ॥ ४ ॥

अन्तराले त्रिजगत्या इति ब्रह्माण्डमध्ये इत्यर्थः अधस्ताद्भूमेः जलाद्गर्भोदात्तथाह भगवान् पराशरः

अतलं वितलं चैव नितलं च गभस्तिमत् ।
महाख्यं सुतलं चापि पातालञ्चापि सप्तमम् ॥
ततश्च नरका विप्र ! भुवोऽधः सलिलस्य च ।

इति तेभ्योऽप्यधस्तमस्ततो गर्भोदकं ततोऽण्डकटाह इत्याहुः ॥ ५ ॥

यथाकर्मावद्यं कर्मदोषमनतिक्रम्य दोषं यातनालक्षणं दमं दण्डं धारयति योजयति ॥ ६ ॥

मतान्तरेणाष्टाविंशतिर्नरका इत्याह । किञ्चेति । त्रिविधानां यातनानाम् "यातना तीव्रवेदना" इति कोशात्तीव्रवेदनानां भूमयः ॥ ७ ॥

यात्यमानः पीड्यमानः एकवैव तत्क्षणमेव ॥ ८ ॥

भाषा टीका

राजा परीक्षितजी बोले हे महर्षे यह विचित्रता लोक की कैसे होती है ॥ १ ॥

ऋषि शुकदेवजी बोले कर्ता तीन गुणों वाले होते हैं तिस से श्रद्धा के अनुसार कर्मों की गति अनेक प्रकार की होती है सबगती सबों को कमती बढती से होती है ॥ २ ॥

और भी निषिद्ध धर्म करने वाले कोभी कर्ता की श्रद्धा के अनुसार भेद होने से कर्म का फल भी भिन्नही होता है जो कि अनादि काल के अज्ञान से सकाम पुरुषों को उन कर्मों के परिणाम रूप मार्ग हजारों प्रवृत्त हैं तिनमें जो प्रधान अधर्मों की गती हैं तिनको हम कहेंगे ॥ ३ ॥

राजा बोले हे भगवन् ! नरक नाम जो लोक सो किस देश में हैं क्या पृथिवी ही में कोई देश है अथवा तीनों लोकों के बाहिर हैं अथवा भीतरही हैं ॥ ४ ॥

ऋषि बोले त्रिलोकी के मध्यही में नरक हैं परन्तु दक्षिण दिशा में सप्त पाताल वाली भूमी के नीचे गर्भोद

एवमेवान्धतामिस्रे यस्तु वञ्चयित्वा पुरुषं दारादीनुपयुङ्क्ते यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति यथा वनस्पतिर्वृश्च्यमानमूलस्तस्मादन्धतामिस्रं तमुपदिशन्ति ॥ ९ ॥

यस्त्विह वा एतदहमिति ममेदमिति भूतद्रोहेण केवलं स्वकुटुम्बमेवानुदिनं प्रपुष्णाति स तदिह विहाय स्वयमेव तदशुभेन रौरवे निपतति ॥ १० ॥

ये त्विह यथैवामुना विहिंसिता जन्तवः परत्र यमयातनामुपगतं त एव रुरवो भूत्वा तथा तमेव विहिंसन्ति तस्माद्रौरवमित्याहुः रुरुरिति सर्पादतिक्रूरसत्त्वस्यापदेशः ॥ ११ ॥

एवमेव महारौरवो यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयन्ति यः केवलं देहम्भरः ॥ १२ ॥

यस्त्विहवा उग्रः पशून् पक्षिणो वा प्राणत उपरन्धयति तमपकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुम्भीपाके तप्ततैले उपरन्धयन्ति ॥ १३ ॥

यस्त्विह पितृविप्रब्रह्मध्रुक् स कालसूत्रसंज्ञके नरके अयुतयोजनपरिमण्डले ताम्रमये तप्तखले उपर्यधस्तादग्न्यर्काभ्यामतितप्यमानेऽभिनिवेशितः क्षुत्पिपासाभ्यां च दह्यमानान्तर्बहिःशरीर आस्ते शेते चेष्टते अवतिष्ठति परिधावति च यावन्ति पशुरोमाणि तावद्वर्षसहस्राणि ॥ १४ ॥

यस्त्विह वै निजवेदपथादनापद्यपगतः पाखण्डं चोपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरन्ति तत्र हासावितस्ततो धावमान उभयतो धारैस्तालवनासिपत्रैश्छिद्यमानसर्वाङ्गो हा हतोऽस्मीति परमया वेदनया मूर्च्छितः पदे पदे निपतति स्वधर्महा पाखण्डानुगतं फलं भुङ्क्ते ॥ १५ ॥

यस्त्विह वै राजा राजपुरुषो वा अदण्ड्ये दण्डं प्रणयति ब्राह्मणे वा शरीरदण्डं स पापीयान्नरकेऽमुत्र सूकरमुखे निपतति तत्रातिबलैर्विनिष्पिष्यमाणावयवो यथैवेहेक्षुखण्ड आर्त्तस्वरेण स्वनयन् क्वचिन्मूर्च्छितः कश्मलमुपगतो यथैवेहादृष्टदोषा उपरुद्धाः ॥ १६ ॥

भाषा टीका ।

जल से ऊपर हैं जिन मे अग्निष्वात्तादिक पितृगण उस दिशा में हैं परम समाधि से भगवान् का ध्यान करते हैं अपने गोत्र वालों को सत्य आशीर्वाद देते हुये निवास करते हैं ॥ ५ ॥

जहां पर वैवस्वत भगवान् पितृराज मरनेपर अपने पुरुष जिन जन्तुओं को अपने पुरमे पहुचादेते हैं तिन को भगवान् की आज्ञा को लंघन नहीं करके कर्म के अनुसार अपने गणों के सहित दण्ड देते हैं तहां पर कोई नरकों की एक बीस गिनती करते हैं ॥ ६ ॥

हे राजन् ! अब उन सबों को आप से नाम रूप लक्षण से कथन करेंगे तामिस्र अन्धतामिस्र रौरव महारौरव कुम्भीपाक कालसूत्र असिपत्रवन सूकरमुख अन्धकूप कृमिभोजन सन्दंश तप्तसूर्मि वज्रकण्टकशाल्मली वैतरणी पूयोद प्राणरोध विशसन लालाभक्ष सारमेयादन अवीची अयःपान और भी क्षारकर्दम रक्षोगणभोजन शूलप्रोत दन्दशूक अवट निरोधन पर्यावर्तन सूचीमुख ए अठाईस (२८) नरक नाना प्रकार के दुःखो की भूमि हैं ॥ ७ ॥

तिस में जो दूसरे के धन स्त्री पुत्रों को हरता है तिसको काल पाश में बांधकर अति भयानक यमपुरुष लेजाते हैं तामस नरक मे जबरदस्ती डारदेते हैं तर्जना करते हैं बड़ा यातना देते हैं उहां पर वह जन्तु मोह को प्राप्त होकर तामिस्र में एक साथ ही मूर्छित होजाता है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पुरुषं पतिं वञ्चयित्वा ॥ ९ ॥

एतच्छरीरमहमिति इदं धनादि ममेति मत्वा स्वं च कुटुम्बमेव पुष्णाति तेनाशुभेन ॥ १० ॥

रुरवो भूत्वेति । कर्मणैव तथा परिणामं प्राप्येत्यर्थः अतिक्रूरस्य भारुण्डाख्यस्य सत्त्वस्यापदेशः संज्ञा ॥ ११ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

क्रव्येण निमित्तेन मांसार्थमित्यर्थः ॥ १२ ॥
प्राणतः सजीवान् उपरन्धयति पचति अपकरुणं निष्कृपम् ॥१३॥
खले समे देशे ॥ १४ ॥
स्वधर्मद्दा धर्मत्यागी ॥ १५ ॥

स्वनयन् रुदन्कश्मलं मोहमुपगतो भवति अदृष्टदोषास्तेनोपरुद्धाः सन्तो यथा कश्मलमुपगतास्तद्वत् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमिति । यथा तामिस्रे तद्दुःखानुभवः एवमन्धतामिस्रेऽपीत्यर्थः तदनुभवनिमित्तं पापमाह । यस्त्विति । यस्तु जन्तुः पुरुषं पतिं वञ्चयित्वा तद्दारादीनादिशब्दाद्वित्तापत्यादीनि च उपयुङ्क्ते स्वोपयुक्तान् कुरुते तस्यैवमेवेति पूर्वेणान्वयः तर्हि तामिस्रादन्धतामिस्रे को विशेष इत्यपेक्षायां तामिस्रान्तं विशिनष्टि। यत्रेति । यत्रान्धतामिस्रे शरीरी देही विनिपात्यमानः यातनाभिस्तीव्राभिः पीड्यमानः तीव्रवेदनया नष्टा मतिर्यस्य नष्टा दृष्टिश्च यस्य तादृशो भवति वृश्च्यमानं छिद्यमानं मूलं यस्य तादृशो वनस्पतिर्यथा पततीति दृष्टान्तः अस्मात्कारणात्तमन्धतामिस्रमित्युपदिशन्तीत्यर्थः ॥ ९ ॥

रौरवानुभवनिमित्तं पापं तच्च वर्णयति । यस्त्विह वावेति । यस्तु शरीरी इह लोके एतच्छरीरमहमेतदपत्यकलत्रादिकं ममेत्येवं रूपाभ्यामहङ्कारममकाराभ्यां केवलंभूतद्रोहेणैव स्वकुटुम्बमेवानुदिनं प्रपुष्णाति स इह लोके तत्स्वकुटुम्बं विहाय स्वयमेक एव तेन पूर्वाचरितेनाशुभेन पापेन रौरवाख्ये नरके निपतति अमुना तेन निपतितेन पूर्वमिह लोके ये च जन्तवो यथा येन प्रकारेण विहिंसितास्त एव जन्तवः रुरवः रुरुसंज्ञका जन्तवो भूत्वा तेनैव प्रकारेण परत्र रौरवे नरके यातनामुपगतं तमेव विहिंसन्ति यतस्तत्र गतं रुरवो हिंसन्त्यतस्तं नरकं रौरवमित्याहुरित्यर्थः के ते रुरवः यत्र गतं हिंसन्ति इत्यत्राह । रुरुरिति । सर्पादप्यतिक्रूरस्य भूरिश्रृङ्गाख्यस्य सत्त्वस्य जन्तोः रुरुरिति व्यपदेशो व्यवहार इत्यर्थः ॥ १० ॥ ११ ॥

महारौरवमनुवर्णयति । एवमेवेति । यथा रौरवे निपतितं रुरवो हिंसन्ति तथा महारौरवेऽपीत्यर्थः प्रथमान्तपाठे रौरवसदृश एव महारौरव इत्यर्थः सादृश्यं च रुरुभिर्हिंसनेन इयांस्तु ततो विशेष इत्याह । यत्रेति । यत्र महारौरवे निपतितं पुरुषं देहिनं क्रव्यं निपतितस्य मांसमदन्तीति क्रव्यादास्तथाभूताः सन्तो रुरवः क्रव्येण निमित्तेन घातयन्ति निपातितपुरुषस्यापि मांसं भक्षयन्तीत्यर्थः तं क्रव्येणेति विभक्तिव्यत्यय आर्षः अन्यथा "आदिखाद्योर्न" इत्यणौ कर्तुरणौ कर्मत्वनिषेधात्तेनेति तृतीया क्रव्यमिति द्वितीया च स्यात् क्रव्येण निमित्तेन तं खादयन्तीत्यर्थस्त्वसङ्गतः स्यात् क्रव्यादा इत्यनेन पौनरुक्त्याद्यथा क्रव्यादाः क्रव्यादनस्वभावा अत एव क्रव्येण फलस्यैव हेतुत्वविवक्षया तृतीया क्रव्यार्थं तं खादयन्ति "खिदेर्निवृत्तप्रेक्षणायिणच्" खादिरत्र व्यसनपरः खादयन्ति तं दयन्तीत्यर्थः अनेन पूर्वोक्तनिर्वाहः सूचितः अथ कुम्भीपाकं तदनुभवनिमित्तं पापं च वर्णयति । य इति । यः केवलं देहम्भरः शरीरपोषणमात्रपरः यश्चेह लोके उग्रः क्रूरः पशून् पक्षिणः प्राणतः सजीवान् उपरन्धयति पचति तमपकरुणं निष्कृपं पुरुषादैः राक्षसैरपि विगर्हितममुत्र कुम्भीपाके नरके यमानुचरास्तप्ततैल उपरन्धयन्ति पचन्ति तत्र तैलकुम्भ्यां पच्यन्ते यत्र स कुम्भीपाक इत्यवयवार्थो विवक्षितः ॥ १२ ॥ १३ ॥

अथ कालसूत्रस्थनरकानुभवनिमित्तं दुरितं तं च वर्णयति । यस्त्विह लोके पितृहन्ता ब्राह्मणहन्ता च स कालसूत्राख्ये नरके अयुतं योजनानि परितो मण्डलं यस्य तस्मिंस्ताम्रविकारे खले खलसमदेशे खलो नाम धान्यानि वितुषीकर्तुं कृतः कृत्रिमो भूमिविशेषः उपर्यधस्तादग्न्यर्काभ्यामधस्तादग्निना उपर्यर्केण चाभितप्यमानेऽभिनिवेशितः परितः पातितः क्षुत्पिपासाभ्यामन्तर्बहिश्च दह्यमानं शरीरं यस्य सः दह्यमानशब्दस्य पूर्वनिपातः । यद्वा । शरीराद्बहिः शरीरं "अपपरिबहिरञ्चवः पञ्चम्या" इति समासे बहिःशब्दस्य उपसर्जनत्वात्पूर्वनिपातः अत एव समासविधानाज्ज्ञापकादन्तर्बहिःशब्दयोः सम्बन्धसामान्ये पञ्चमी भवति शरीरसम्बन्धिबहिःप्रदेश इत्यर्थः अन्तःशब्देन सन्निधानात् शरीरान्तःप्रदेश एव उच्यते दह्यमानमन्तःशरीरान्तःप्रदेशः बहिःशरीरं च यस्येत्यर्थः एवम्भूतः ताम्रमये फलके उपवेश्यमानो याचनादि करोति याच्ञा चात्र हा हतोऽहं मां हापयेति प्रार्थना एवं यावन्ति पशो रोमाणि तावत्सङ्ख्यानि वर्षाणां सहस्राणि तत्रास्ते इत्यर्थः एवं भूयान् दुःखानुभवः कालः सूच्यते ज्ञायते यस्मिन् स कालसूत्र इत्यवयवार्थोऽत्राभिप्रेतः ॥ १४ ॥

एवं कालसूत्रमभिधायाथासिपत्रवनं नरकं तत्प्राप्तिनिमित्तं च वर्णयति । यस्त्विह वा इति । यस्तु देही निजवेदपथात्स्ववर्णाश्रमोचिताद्वेदविहिताद्धर्मादनापद्यपगतः अतिक्रान्तः आपदत्र देशकालवैपरीत्यप्रयुक्ता रोगादिनिमित्ता शक्तिः अनापद्यपगत इत्यनेनापदि स्वधर्मत्यागो न दोषावह इति सूचितं पाषण्डमवैदिकमस्मार्तं च केवलं स्वमनीषया कल्पितमत एव कुपथं कुत्सितं मार्गमाभासधर्ममुपगतस्तं देहिनमसिपत्रवनाख्यं नरकं प्रवेश्य प्रविष्टं कृत्वा कशया प्रहरन्ति यमभटा इति शेषः कशा हि नामाश्वादीनां ताडयितुं निर्मितो दण्डाकारो रज्जुविशेषः एवं कशया ताडितः तत्रासिपत्रवने आसादित इतस्ततो धावमानः तीव्रदण्डमसहमानो द्रुततरं गच्छति उभयतो धारैः पार्श्वद्वयेऽपि धारायुक्तैः खड्गस्य त्वेकस्मिन्नेव पार्श्वे धारा एभिस्तूभयतोधारैरित्यर्थः तालवनस्यासिपत्रैः खड्गसदृशैः छिद्यमानानि सर्वाण्यङ्गानि यस्य तादृशः हाहाकारपूर्वकं हतोऽस्मीति वदन् परमया तीव्रया वेदनया पदे पदे मूर्च्छां प्राप्नोति पतति एवं स्वधर्महा स्वधर्मत्यागी पाषण्डानुगतं पाषण्डधर्माभासानुगुणं फलं दुःखमनुभवति असिसदृशानि पत्राणि येषां वृक्षाणां वनमसिपत्रवनमित्यवयवार्थः ॥ १५ ॥

अथ सूकरमुखाख्यनरकं तत्प्राप्तिनिमित्तं पापं चानुवर्णयति । यस्त्विहेति । इह लोके राजा वा राजपुरुषो वा कश्चिददण्ड्ये दण्डनानर्हे दण्डं दण्डनं प्रणयति कारयति दण्ड्योऽपि ब्राह्मणो शरीरदण्डं वा कारयति ।

वपनं द्रविणादानं स्थानान्निर्यापणं तथा ।
एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ।

इत्युक्तरीत्या दण्ड्योऽपि ब्राह्मणो देहदण्डानर्हे यः शारीरं दण्डं

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका ।

कारयतीत्यर्थः स पापीयान् सूकरमुखे नरके निपतति तत्र नरके सूकरस्येव मुखं येषां तैर्जन्तुभिः नितरां पीड्यमाना अवयवा यस्य तादृशः यथा इभेन गजेनेक्षुदण्डः पीड्यते तद्वदार्तस्वरेण स्वनयन् रुदन्मूर्च्छितः कश्मलं मोहमुपगतो भवति यथा पूर्वमिह दृष्टदोषा दोषरहितास्तेन उपरुद्धाः पीडिताः सन्तः कश्मलमुपगतास्तद्वदित्यर्थः अवयवार्थस्तु सुव्यक्तः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वृश्च्यमानमूलश्छिद्यमानशिफः यस्मान्नष्टदृष्टिस्तस्मादन्धतामिस्रमन्धत्वापादकान्धकारयुतमित्यर्थस्तावुपदिशन्ति मूर्च्छया बुद्धिनाशात्तामिस्रे अन्धतामिस्रे तु चाक्षुषज्ञानस्य सर्वात्मना नाशादुभयोः सामान्यविशेषसद्भावाद्विशेषः ॥ ९ ॥

एतच्छरीरमहमिदं क्षितिमण्डलं ममेति भ्रान्त्या तुवै महातारतम्यद्योतकौ इतिशब्दौ प्रत्येकं रौरवप्राप्तिनिमित्ते भवत इति द्योतयतः ॥ १० ॥

प्रकारान्तरेण रौरवं निर्वक्ति । ये चेति । एवं द्वयं कर्त्तृत्वव्यावर्त्तकं रुरवः मृगाः किन्नेत्याह । रुरुणेति । रुरुरित्यपदेशो व्यपदेशः "मृगा नानाविषमुखा रुरवः परिकीर्तिताः" इत्यभिधानम् ॥ ११ ॥

रौरवाद्विशेषमाह । यत्रेति । देहम्भरस्तथा पततीति शेषः ॥ १२ ॥

उपरुन्धयन्ति अशक्यश्वासमोचो यथा भवति तथोपरोधं कारयन्तीत्यर्थः ॥ १३ ॥

अधस्तादग्निरुपर्यर्कः खले धान्यादिशोषणस्थलस्थानीये न केवलं पित्रादिध्रुक् चतुष्पाद्धिंसकोऽप्येवमित्याह । यावन्तीति ॥ १४ ॥

अनापदीति विशेषणादापदि कञ्चनानुग्रहं सूचयति "धाराश्वाग्रेऽम्बुसन्तत्यां सैन्याग्रेऽश्वगतिष्वपि" इत्यभिधानात् धाराशब्देन निशितप्रान्तभाग उच्यते तालवनस्य तालसमूहस्यासिवन्निशितधारपत्रैः स्वधर्मः स्ववर्णादिविहितः ॥ १५ ॥

अदण्ड्ये दण्डनायोग्ये शरीरदण्डस्ताडनादिरुपरुद्धः कारागृहे शृङ्खलायां वा निवेशितः दृष्टो दोषश्चौर्यादिलक्षणो यस्य स तथा स दण्ड्यते यथा तथेति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एवमिति । यस्तु तस्यैवमेव भवतीत्यर्थः ॥ ९ ॥ १० ॥

ये त्विति । त एव तद्धिंसाजातकर्मणैवेत्यर्थः रुरुशब्दस्य स्वयं श्रीशुकेन टीकाविधानाल्लोकेष्वप्रसिद्धोऽयं जन्तुविशेष इति सूच्यते ॥ ११—१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पुरुषं पतिम् ॥ ९ ॥

एतच्छरीरमहमिति इदं धनादिकं ममेति मत्वा भूतद्रोहेणेति भूतद्रोहं विना तु केवलाहंममकाराभ्यां न रौरवे निपततीति बुद्ध्यते ॥ १० ॥

रुरवो भूत्वेति कर्मणैव तथा परिणामं प्राप्येत्यर्थः अतिक्रूरस्य भारवाङ्गाण्पसत्त्वस्य अपदेशः संज्ञेति श्रीस्वामिचरणाः रुरुशब्दस्य स्वयं मुनिनैव टीकाविधानाल्लोकेष्वप्रसिद्ध एवायमिति सन्दर्भः ॥ ११ ॥

क्रव्येण निमित्तेन मांसार्थमित्यर्थः केवलमिति भूतद्रोहेणेति शेषः ॥ १२ ॥

प्राणात उपरुन्धयति सप्राणान् पचतीत्यर्थः ॥ १३ ॥

खले समे देशे ॥ १४ ॥ १५ ॥

स्वनयन् रुदन्नदृष्टदोषा निर्दोषा उपरुद्धा दण्डिताः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पुरुषं दारादिस्वामिनम् ॥ ९ ॥

इह कर्मभूमौ एतच्छरीरमहमिति इदं कुटुम्बादिकं ममेति मोहेन स्वेन देहेन सहितं कुटुम्बमेव केवलं प्रपुष्णाति स तदुभयमिहैव विहाय तेनाशुभेन ॥ १० ॥

ते एव रुरवो भूत्वेति रुरवः यातनानिमित्तानि सर्पादतिक्रूरसत्त्वानि भूत्वेत्यर्थः अतिक्रूरस्यातिभयङ्करस्य सत्त्वस्य अपदेशः संज्ञा ॥ ११ ॥

यत्र महारौरवे क्रव्येण मांसेन निमित्तेन ॥ १२-१३ ॥

खले समस्थाने ॥ १४ ॥

स्वधर्महा निजधर्मत्यागी ॥ १५ ॥

स्वनयन् रुदन् यथा तेनोपरुद्धाः कश्मलमुपगतास्तद्वत् ॥ १६ ॥

भाषा टीका ।

इसी प्रकार जो अपने मालिक से छिपाकर उस की स्त्री आदि को भोगता है सो अन्धतामिस्र नरक में डाला जाता है जिसमें डाला हुआ शरीरधारी जीव कष्ट के मारे होस को भूलजाता है उस की दृष्टि मारीजाती है जैसे कि जड के कटने से पेड होता है तैसा दुःखित होजाता है तिसी से उस नरक को अंधतामिस्रकहते हैं ॥ ९ ॥

जो मनुष्य इस संसार मे यह चीज मेरी है मैं इसका मालिक हूँ ऐसी बुद्धि से प्राणियों का द्रोह करके केवल अपने कुटुम्ब को प्रति दिन पालता है सो उन चीजों को यहां पर छोडकर उसी पापसे आपही रौरव मे गिरता है ॥ १० ॥

जिस मनुष्यने यहां पर कोटि जंतु मारे हैं वे जंतु उसके मरे पीछे यमयातना मे आने पर तिसी हेतु से रुरु होकर तिसी प्रकारसे उसी पुरुष को मारते हैं तिस हेतु से उस नरक को रौरव कहते हैं रुरुनाम से सर्पसे भी बडा क्रूर जंतु का व्यवहार होता है ॥ ११ ॥

इसी प्रकार महा रौरव है जो केवल देह मात्र का पोषक है तिसको उहां डालते हैं जहां गिरते पुरुष को क्रव्यादनामके जंतु मांस खाने के वास्ते उस को मारते हैं ॥ १२ ॥

जो पुरुष इहांपर बडा उग्र होकर पशु वा पक्षियों को प्राण से मारता है वह निर्दयी असुर भी उसकी निन्दा करते हैं उस को परलोक में यम के दूत कुम्भीपाक नरक मैं गर्म तेल में पकाते हैं ॥ १३ ॥

यस्त्विह वै भूतानामीश्वरोपकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्तपरव्यथो व्यथामाचरति स परत्रान्धकूपे तदभिद्रोहेण निपतति तत्र हासौ तैर्जन्तुभिः पशुमृगपक्षिसरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्ये केचाभिद्रुग्धास्तैः सर्वतोऽभिद्रुह्यमाणस्तमसि विहतनिद्रानिर्वृतिरलब्धावस्थानः परिक्रामति यथा कुशरीरे जीवः ॥ १७ ॥

यस्त्विह वा असम्विभाज्याश्नाति यत्किञ्चनोपनतमनिर्मितपञ्चयज्ञो वायससंस्तुतः स परत्र कृमिभोजने नरकाधमे निपतति तत्र शतसहस्रयोजने कृमिकुण्डे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः कृमिभोजनो यावत्तदप्रत्ताप्रहुतादोऽनिर्वेशमात्मानं यातयते ॥ १८ ॥

यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्नादीनि ब्राह्मणस्य वापहरत्यन्यस्य वानापदि पुरुषस्तममुत्र राजन्! यमपुरुषा अयस्मयैरग्निपिण्डैः संदंशैस्त्वचि निष्कुषन्ति ॥ १९ ॥

यस्त्विह वा अगम्यां स्त्रियमगम्यं वा पुरुषं योषिदभिगच्छति तावमुत्र कशया ताडयन्तस्तिग्मया सूर्म्या लोहमय्या पुरुषमालिङ्गयन्ति स्त्रियं च पुरुषरूपया सूर्म्या ॥ २० ॥

यस्त्विह वै सर्वाभिगमस्तममुत्र निरये वर्त्तमानं वज्रकण्टकशाल्मलीमारोप्य निष्कर्षन्ति ॥ २१ ॥

ये त्विह वै राजन्या राजपुरुषा वा अपाखण्डा धर्मसेतून् भिन्दन्ति ते सम्परेत्य वैतरण्यां निपतन्ति भिन्नमर्यादास्तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमानाश्चासुभिरुह्यमानाः स्वाघेन कर्मपाकमनुस्मरन्तो विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहिन्यामुपतप्यन्ते ॥ २२ ॥

ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्तलज्जाः पशुचर्यां चरन्ति ते चापि प्रेत्य पूयविण्मूत्रश्लेष्ममलापूर्णार्णवे निपतन्ति तदेवातिबीभत्सितमश्नन्ति ॥ २३ ॥

ये त्विह वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान्निघ्नन्ति तानपि संपरेतांल्लक्ष्यभूतान् यमपुरुषा इषुभिर्विध्यन्ति ॥ २४ ॥

भाषा टीका।

जो पुरुष इहां पिता ब्राह्मण वेद इनोंका द्रोह करता है सो दशहजारयोजन कालसूत्र संज्ञक नरक मे डाला जाताहै उहां पर गरम करेहुये ताम्बेके खवे मे डाला जाता है ऊपर नीचे सूर्य अग्नि से तपायमान होता है फिर उसी मे डार देते हैं क्षुधा प्याससे बाहिर भीतर शरीर उस का जलता रहता है सोता है चलता है खडा होता हैं दौडता है जितने मारे हुये पशुओं के रोम हैं उतने हजार वर्ष तक उहां दुःख भोगता है ॥ १४ ॥

जो पुरुष इहांपर अपने वेदमार्ग से छूटकर पाखण्ड मतमें विना आफत के समय में भी प्रविष्ट होजाता है तिसको असिपत्र वनमे बैठाकर चाबुक से मारते हैं वहांपर वह इधर उधर दौडता है तब दोनों तरफ धारवाले तरवार सरीके तालों के वन हैं तिनसे उसके सब अङ्ग कटते हैं तहां हायमरा ऐसा पुकारता है बडी पीडा से मूर्छित होकर पैंड पैंड मे गिरताहै अपने धर्म के नाश करने वाले पाखण्ड मतके फलको भोगता है ॥ १५ ॥

जो कोई राजा या राजपुरुष विना दंड के योग्य को दण्ड देता है अथवा ब्राह्मण को शरीर दण्ड देता है वह बडा पापी सूकरमुख नरक में गिरता है उहां पर बडे बलिष्ठों से उसके शरीर के सब अवयव पिसजाते हैं जैसे कि ऊखका दंडा पेडने से होजाता है तब आर्त होकर चिल्लाता है कहीं मूर्छित होकर मोहको प्राप्त होकर रहता है. जैसे कि विना दोष वाले पुरुष उसके दण्ड देने से मूर्छित होते थे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

ईश्वरेणोपकल्पिता मनुष्यरक्तपानादिलक्षणा वृत्तिर्येषां मत्कुणादीनां न विविक्ता विज्ञाता परव्यथा यैरविवेकिभिस्तेषां पुरुषेण ब्राह्मणादिभावेन विधिनिषेधपूर्वकमुपकल्पिता वृत्तिर्यस्य विविक्ता परव्यथा येन विवेकिना अभिद्रुग्धा हिंसिताः विहता निद्रारूपा निर्वृतिर्यस्य न लब्धमवस्थानं येन स तमसि परिक्रामति ॥ १७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यत्किञ्चन भक्ष्यादिकमुपनतं प्राप्तं तदसंविभज्य न निर्मिताः पञ्चयज्ञा येन अत एव वायसैः संस्तुतः समत्वेन वर्णितः कृमिभोजनः कृमीनेव भुञ्जानः यावत्तद्यावन्ति योजनानि तत्कृमिकुण्डं तावन्ति वर्षाणि यावद्वा तत्पातकमित्यर्थः अप्रत्तमसंविभक्तमप्रहुतं चात्तीति तथा सः अनिर्वेशमकृतप्रायश्चित्तम् ॥ १८ ॥

निष्कुषन्ति छिन्दन्ति ॥ १९ ॥

तिग्मया तप्तया सूर्म्या प्रतिमया ॥ २० ॥

सर्वाभिगमः पश्वाद्युपगन्ता ॥ २१ ॥

पाषण्डाः सत्कुलीनाः सन्तः द्वितीयान्तपाठे सेतुविशेषणं नदीं विशिनष्टि । विण्मूत्रेति ॥ २२ ॥

पशुचर्यां स्वेच्छाचारम् ॥ २३ ॥

अतीर्थे विहितादन्यत्र विध्यन्तीति प्राणनिरोधो दर्शितः ॥२४॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथान्धकूपं तत्प्राप्तिनिमित्तं पापं च वर्णयति । यस्त्विह वा इति । यस्तु देही इह लोके ईश्वरेणोपकल्पिता मनुष्यरक्तपानादिरूपा वृत्तिर्येषामविदिता परस्य व्यथा यैरविवेकिभिस्तेषाम-ज्ञातपरकृतदुःखानां वा भूतानां मत्कुणमशकादीनां व्यथामाचरति करोति कथम्भूतः स्वयं पुरुषोपकल्पितवृत्तिः परमेण परमपुरुषेण उपकल्पिता वर्णाश्रमादिविभागेन विधिनिषेधपूर्विका कल्पिता वृत्तिर्यस्य विविक्ता विविच्य ज्ञाता परस्य व्यथा येन विवेकी सन्नित्यर्थः स एवम्विधो भूतध्रुक् तदभिद्रोहेण भूतद्रोहेण निमित्तेनान्धकूपाख्ये नरके निपतति तत्रान्धकूपे हीति खेदेऽसौ पतितस्तैस्तैः पूर्वं हिंसितैर्जन्तुभिः कांश्चित्तान् दर्शयति । पश्विस्यादिना । तेषामानन्त्यात्सङ्ग्रहाह । ये केचाभिद्रुग्धा हिंसितास्तैः सर्वैः पश्वादिरूपतामापन्नैः सर्वतोऽभिद्रुह्यमाणस्तैरेव विहता निद्रानिर्वृतिः निद्रासुखं यस्य तथा न लब्धमवस्थानं येन तथाभूतस्तमस्यन्धकारे परिभ्रमति । तत्र दृष्टान्तः यथेति कुशरीरे व्याध्याद्युपहते सञ्चारासमर्थे शरीरे जीवो यथाऽलब्धनिद्रः खिद्यति तथेत्यर्थः अन्धकारावृतकूपोऽन्धकूप इत्यवयवार्थः ॥ १७ ॥

अथ कृमिभोजनं तदनुभवहेतुं पापं च वर्णयति । तु यस्त्विह वा असंविभज्येति यस्तु देही इह लोके यद्वचादिकं दैवादुपनतं प्राप्तमप्यन्नमसंविभज्यातिथिभ्योऽप्रदायेत्यर्थः अश्नाति स्वयं भुङ्क्ते यश्चानिर्मितपञ्चयज्ञः अननुष्ठितपञ्चमहायज्ञः स वायससंस्तुतः वायसैः समत्वेन वर्णितः परत्र परलोके कृमिभोजनाख्ये नरकाधमे निपतति तत्र शतसहस्रयोजनपरिमिते कृमिकुण्डे स्वयमपि कृमिभूतः कृमिभिरेव भक्ष्यमाणः कृमिभोजनः कृमीनेव भुञ्जानः तावद्यावन्ति योजनानि कृमिकुण्डं तावन्ति वर्षाण्यात्मानं यातयते दुःखयति कथम्भूतं अप्रत्ताप्रहुतादः प्रत्तं दत्तावशिष्टं प्रहुतं यज्ञावशिष्टं प्रत्तं च प्रहुतं च प्रत्तप्रहुते न प्रत्तप्रहुते अप्रत्ताहुते ते अत्तीति अप्रत्तप्रहुतादः एवम्भूतोऽहमित्यकृतनिर्वेशः परितापो येन तमात्मानम् ॥ १८ ॥

अथ संदंशाख्यं नरकं पापं च वर्णयति । यस्त्विह वै स्तेयेनेति । इह यो देही स्तेयेन चौर्येण वा अनापदि ब्राह्मणस्यान्यस्य वा हिरण्यरत्नादीन्यपहरति तं देहिनं परत्र संदंशाख्ये नरके हे राजन् ! यमभटाः अग्निवर्णैः सन्तापेनाग्निवर्णतामापन्नैरयस्मयैः लोहमयैः संदंशैः संदशन्त्येभिरिति संदंशाः तैश्छेदनसाधनैः शूलैः निष्कुषन्ति छिन्दन्ति संदंशैः संदशन्ति यत्रेति संदंश इत्यन्वयवार्थः ॥ १९ ॥

अथ तप्तसूर्मिं तत्प्राप्तिहेतुं दुरितं चानुवर्णयति । यस्त्विह वा अगम्यामिति । यस्तु देही स्वयं पुरुषः सन्नगम्यामनुपेयां स्त्रियमभिगच्छति स्वयं योषित् स्त्री सती अगम्यमुपेतुमयोग्यं पुरुषं चोपगच्छति तं देहिनममुत्र सूर्म्याख्ये नरके कशया ताडयन्तः लोहमय्या तिग्मया तप्तया सूर्म्या स्थूणा सैव स्त्रीरूपेण पुरुषरूपेण चोत्कीर्णा तया सूर्म्या प्रतिमया पुरुषं पापिनमालिङ्गयन्ति स्त्रियं पापिनीं पुरुषरूपया सूर्म्यालिङ्गयन्ति तप्ता सूर्मिर्यस्मिन् स तप्तसूर्मिरित्यवयवार्थः ॥ २० ॥

अथ वज्रकण्टकशाल्मलीमाह । यस्त्विह वै सर्वाभिगम इति । सर्वाभिगमः लोभादसेव्यसेवी पश्वाद्युपगन्तेति केचिद्व्याचक्षते तं सर्वाभिगममुत्र निरये वज्रकण्टकशाल्मलीसंज्ञके वर्त्तमानं पतितं वज्रमयानि कण्टकानि यस्य तं शाल्मलीं वृक्षमारोप्यारोप्य निष्कुषन्तीत्यर्थः वज्रकण्टकशाल्मलिर्यस्मिन् स इत्यवयवार्थः ॥ २१ ॥

वैतरणीं वर्णयति । य इति । राजन्याः क्षत्रियास्तेषां पुरुषा वा पाषण्डान्वैदिकान् धर्मसेतून् धर्ममर्यादान् भिन्दन्ति नाशयन्ति कथम्भूताः भिन्नमर्यादा अतिक्रान्तधर्ममर्यादाः ते राजन्यादयः अस्यां वैतरण्यां नरकस्य परिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा अपि आत्मना देहेन न वियुज्यमाना अत्यक्तदेहा इत्यर्थः तत्र हेतुः असुभिः प्राणैरुह्यमाणाः कर्मणः कर्तृत्वविवक्षायां तृतीयोक्तत्वाणा इत्यर्थः तथापि हेतुमाह । स्वाघेनेति स्वकीयदुरितेनेत्यर्थः स्वकीयदुरितेन कर्मपाकं स्वकीयपापकर्मफलमिदमित्येवं स्मरन्त उपतप्यन्ते क्लिश्यन्ति नदीं विशिनष्टि । विण्मूत्रेति । पूयं दुर्गन्धिविण्मूत्ररूपं पूयं विडादीनां वाहिन्यां विडादीनां वाहः प्रवाहः सोऽस्या अस्तीति तथा तस्यां वा नदीरूप एवायं नरक इत्यवयवार्थभेदः ॥ २२ ॥

अथ पूयोदमनुवर्णयति । ये त्विहेति । ये देहिनो इह वृषलीपतयः ब्राह्मणादयः सन्तः शूद्रायाः पतयो नष्टाः त्यक्ताः शौचादयो यैस्ते तत्र शौचं स्नानपर्यन्तं सत्कर्म आचारः सन्ध्योपासनादिनियमः भक्ष्याभक्ष्यादिनियमः अत एव त्यक्ता लज्जा यैस्ते पशुचर्यां स्वेच्छाचारं कुर्वन्ति पापं पचतीतिवन्निर्देशः तेऽपि प्रेत्य मृत्वा विडादिभिः पूर्णे अर्णवकल्पितरे हृदे निपतन्ति सदैव विडादिकमेवातिहेयमश्नन्त्यश्नन्ति पूयमुदकं यस्मिन्नित्यवयवार्थः ॥ २३ ॥

अथ प्राणनिरोधं सपापं वर्णयति । ये त्विह वै श्वगर्दभपतय इति । शुनां गर्दभानां च पतयः पालकाः ब्राह्मणा मृगयैव विहारो येषां तेऽतीर्थे मृगान्निघ्नन्ति अतीर्थेषु लोकरक्षणार्थत्वाभावात्प्राणिवधो दोषावहस्तीर्थेषु तु प्राणिसञ्चाराय कृतो दुष्टसत्त्ववधो न दोषाय भवति यतस्तस्मादतीर्थ इत्युक्तं तानपि श्वगर्दभपतीनपि सम्परेतान् मृतान्वैशसने प्राप्तॉल्लक्ष्यभूतॉल्लक्ष्यीकृत्येत्यर्थः इषुभिर्बाणैर्यमभटा विध्यन्ति ताडयन्ति विध्यन्तीत्यनेन प्राणनिरोधनिमित्ता व्यथाभिप्रेतातोऽस्य नरकस्य प्राणनिरोध इति संज्ञा प्राणानां निरोधो यस्मिन्नित्यवयवार्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अविदितपरव्यथानामज्ञातपरक्लेशानामीश्वरेण विधात्रा कल्पिता सहजत्वेन वृत्तिः मनुष्यादिशरीरभक्षणलक्षणा येषाम्मत्कुणादीनां तानि तथा तेषामपकल्पितवृत्तिः तद्वृत्तिकल्पनासमर्थः पुरुषेण श्रीहरिणोपकल्पिता प्रावरणादिलक्षणा वृत्तिर्यस्य स तथापीति वा यूकाः शूलमुखाः आदिशब्दात्स्वेदजादयः प्राणिविशेषाः शिरआदिनिलया गृह्यन्ते कुशरीरे कुष्ठादिदूषितदेहे ॥ १७ ॥

यस्तु यत्किञ्चन प्राप्तमन्नफलादिकमसंविभज्यातिथिभृत्यबालवृद्धादीनभोजयित्वा स्वयं भुङ्क्ते स च यश्चानिर्वृतयज्ञोपायमकृतदेवतापूजालक्षणयागादिश्रेयःसाधनं तदन्नमश्नाति स च यश्चासंस्कृतयाज्याद्युपस्कारेण शून्यं तदन्नमश्नाति सोऽपि क्रिमिभोजननाम्नि निकृष्टनरके पतति कृमय एव भोजनं यस्य स तथा यावद्यावानप्रमत्तस्यातिथिदेवतादिभ्योऽप्रदत्तस्याकृतस्यासंस्कृतस्य प्रारब्धापरिसमाप्तस्य कर्मणो वा निर्वेशः प्रायश्चित्तलक्षणाप्रतिक्रिया तत् तावतात्मानं नरकाद्यातयति उद्धारयति अप्रमत्तेति पाठे यावदप्रमत्तं बुद्धिपूर्वमकृतो निर्वेशो येन स तथा तावत्समात्मानं नरके पातयति प्रापयतीति बल्येकत्वंश्चानुकर्षणमिमम् ॥ १८ ॥

संदंशैः सूचीविशेषैस्त्वचि निष्कालयन्त्युद्धाटयन्ति ॥ १९ ॥

सूर्म्या लोहादिमयपुत्तल्या ॥ २० ॥

सर्वाभिगमः सर्वाभिः स्त्रीभिः कृतसौरतः सम्वादाभावेऽपि बलाद्गमनमभिगमः शाल्मली कण्टकतरुः ॥ २१ ॥

आत्मना देहेन स्वासुभिः स्वप्राणैश्च ओघेन निरयप्रवाहेण उह्यमाना अपि वियुज्यमाना अपि ते योगं प्राप्यमाणा म्रियमाणा इत्यर्थः विण्मूत्राद्यात्मना स्यन्दमानायाम् ॥ २२ ॥ २३ ॥

अतीर्थे अपात्रमुद्दिश्याविहितकाले वा ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कुशरीरे तिर्यगादिलक्षणे ॥ १७—३८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ईश्वरेण कल्पिता मनुष्यरक्तपानादिलक्षणा वृत्तिर्येषां मत्कुणादीनां न विविक्ता न ज्ञाता परेषां व्यथा यैस्तेषां पुरुषोपकल्पितवृत्तिरीश्वरेणैव विहितानिषिद्धजीविकः । मनुष्यत्वाद्विज्ञातान्यव्यथः ॥ १७ ॥

यत् किञ्चन भक्ष्यभोज्यादिकमुपनतं प्राप्तं तदसंविभज्य वायसैः संस्तुतः समतया वर्णितः वायसतुल्यैर्वा स्तुतः कृमिभोजनः कृमीनेव भुञ्जानः । अप्रत्तमसंविभक्तमप्रहुतं चाश्नाति तथा सः । यत् पापं यावत्तावदित्यर्थः । अनिर्वेशमकृतप्रायश्चित्तम् ॥ १८ ॥

निष्कुषन्ति छिन्दन्ति ॥ १९ ॥

तिग्मया तप्तया सूर्म्या प्रतिमया ॥ २० ॥

सर्वाभिगमः पश्वादीनप्यभिगच्छति ॥ २१ ॥

आत्मना देहेन ॥ २२ ॥

विण्मूत्रेति नदीविशेषणम् ॥ २३ ॥

अतीर्थे विहितादन्यत्र ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

न विविक्ता न ज्ञाता परव्यथा यैस्तेषामभिद्रुग्भिः पीडितः, विहता विनष्टा निद्रारूपा निर्वृत्तिः सुखं यस्य सः ॥ १७ ॥

उपनतं लब्धं वायसैः संस्तुतःसमत्वेन वर्णितः यावत्तद्यावत्पापं तावत् कृमिकुण्डे अप्रत्तमसंविभक्तमप्रहुतं वाश्नाति तथा अनिर्वेशमकृतप्रायश्चित्तमात्मानं यातयते ॥ १८ ॥

निष्कुषन्ति छिन्दन्ति ॥ १९ ॥

सूर्म्या प्रतिमया ॥ २० ॥

सर्वाभिगमः पश्वाद्युपगन्ता ॥ २१—२२ ॥

पशुचर्य्या पशुवत्स्वेच्छाचारम् ॥ २३ ॥

अतीर्थे शास्त्रोक्तप्रकारादन्यत्र इषुभिर्विध्यन्ति प्राणैर्वधं कुर्वन्तीत्यर्थः ॥ २४—२९ ॥

भाषा टीका

जो पुरुष यहां पर ईश्वरने जिन की जो वृत्ति कल्पना कर दी है और वे लोग दूसरे के कष्ट को नहीं जानते हैं ऐसे जो कोई हिंसक भी जंतु हैं तिनको देखकर आप मनुष्य होकर परकी पीडा को भी जानने वाला होकर जो पीडा देता है वह मरे पीछे उस द्रोह से अंधकूप नरक में गिरता है उहां पर वे जन्तु पशु मृग पक्षि सर्प मच्छर जुआं खटमल मक्खि और जिनोंको उसने दुख दिया है वेजनावर सब प्रकार से उसको दुःख देते हैं औ अंधेरे में पडा रहता है कभी निद्राका सुख उसको नहीं होता है कभी ठीक स्थिति भी नहीं उसकी होती है जैसे खोटे शरीर में जीव घूमा करते हैं तैसे घूमता रहता है ॥ १७ ॥

जो पुरुष घरमें किसी पदार्थ के आने से सबको नहीं देकर खाता है अथवा पञ्चयज्ञ विना किये खाता है वो कौवा के तुल्य है वह मरने पर कृमिभोजन अधम नरक में गिरता है उहां पर सौ हजार योजन के कृमि कुण्ड में कीडा होकर स्वयं कीडों से भक्षित होकर कीडों को खाता हुआ जब तक वे अन्न नहीं देने से होम नहीं करने से प्रायश्चित्त न करने से पाप रहते हैं तब तक उन दुःखों को भोगता है ॥ १८ ॥

जो इहां पर चोरी से या जबरदस्ती सुवर्ण रत्नादिक अथवा ब्राह्मण की कोइभी चीज को हरता है अथवा दूसरे की चीज विना आफतके हरता है ऐसा जो कठोर है हे राजन् उसके मरे पीछे यमके पुरुष अग्नि में गरम करे हुये लोहा के गोलों से और चीमटों से उसके शरीर मे लगाकर चींथते हैं ॥ १९ ॥

जो इहां पर अगम्य स्त्री को पुरुष गमन करता है अथवा अगम्य पुरुष को स्त्री गमन करती है उन दोनों को उहां पर चाबुकों के मारते हुये बडी गरम करी हुई स्त्री की मूर्ती

ये त्विह वै दाम्भिका दम्भयज्ञेषु पशून् विशसन्ति तानमुष्मिँल्लोके वैशसे [१] नरके पतितान्निरयपतयो यातयित्वा विशसन्ति ॥ २५ ॥

यस्त्विह वै सवर्णां भार्यां द्विजो रेतः पाययति काममोहितस्तं पापकृतममुत्र रेतःकुल्यायां पातयित्वा रेतः सम्पाययन्ति ॥ २६ ॥

ये त्विह वै दस्यवोऽग्निदा गरदा ग्रामान् सार्थान् वा विलुम्पन्ति राजानो राजभटा वा तांश्चापि हि परेत्य यमदूता वज्रदंष्ट्राः श्वानः सप्तशतानि विंशतिश्च सरभसं खादन्ति ॥ २७ ॥

यस्त्विह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथञ्चित् स वै प्रेत्य नरकेऽवीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रायाद्गिरिमूर्ध्नः संपात्यते यत्र जलमिव स्थलमश्मपृष्ठमवभासते तदवीचिमत्तिलशो विशीर्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति ॥ २८ ॥

यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुरां व्रतस्थोऽपि वा पिबति प्रमादतस्तेषां निरयं नीतानामुरसि पदाक्रम्यास्ये वह्निना द्रवमाणं कार्ष्णायसं निषिञ्चन्ति ॥ २९ ॥

अथ च यस्त्विह वा आत्मसम्भावनेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमवतो वरीयसो न बहुमन्येत स मृतक एव मृत्वा क्षारकर्दमे निरयेऽवाक्शिरा निपातितो दुरन्ता यातना ह्यश्नुते ॥ ३० ॥

ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते याश्च स्त्रियो नृपशून् खादन्ति तांश्च ते पशव इव निहता यमसदने यातयन्तो रक्षोगणाः सौनिका इव स्वधितिनावदायासृक् पिबन्ति नृत्यन्ति च गायन्ति च हृष्यमाणा यथेह पुरुषादाः ॥ ३१ ॥

ये त्विह वा अनागसोऽरण्ये ग्रामे वा वैश्रम्भकैरुपसृतानुपविश्रम्भय्य जिजीविषून् शूलसूत्रादिषूपप्रोतान् क्रीडनकतया यातयन्ति तेऽपि च प्रेत्य यमयातनासु शूलादिषु प्रोतात्मानः क्षुत्तृड्भ्यां चाभिहताः कङ्कवटादिभिश्चेतस्ततस्तिग्मतुण्डैराहन्यमाना आत्मशमलं स्मरन्ति ॥ ३२ ॥

भाषा टीका ।

लोहा की बनाई पुरुष के शरीर में चिपटाते हैं और स्त्री के शरीर में लोहा के पुरुष को चिपटाते हैं ॥ २० ॥

जो कि इहां पर पशु आदि सबका गमन करने वाला है उसको नरक में जाने पर वज्रसे कांटे वाले शेमरके पेड में लगाकर खैंचते हैं ॥ २१ ॥

जो इहां राजवंशी अथवा राजपुरुष आस्तिकवंश में होकर भी धर्म मर्यादों को तोडते हैं वे लोग मरे पीछे भिन्न मर्यादावाले वैतरणी नदीमें गिरतेहैं वह नदी नरककी खाई है उंहां जलजन्तुओं से इधर उधर से भक्षित होते हैं और प्राण नहीं छूटते हैं शरीर भी नहीं छूटताहै पाप से चलते रहते हैं कर्म फल को स्मरण करके दुखित होते रहते हैं विष्ठा मूत्र रक्त केश नख हाड मेद मांस वसा उस नदी मे वहते हैं तिससे वडेही दुःख पाते रहने हैं ॥ २२ ॥

जो इहां शूद्र स्त्रियों के पति हैं शौच आचार नियमों को छोडे हैं लज्जा को भी छोडे हैं पशुओं के आचरण करते हैं वे भी मरे पीछे पीव विष्ठा मूत्र श्लेष्म से भरे समुद्र में गिरते हैं उन्ही खराब चीजों को खाते हैं ॥ २३ ॥

जो इहां कुत्ता गधे इन के पति हैं ब्राह्मणादि हो कर भी सिकार खेलने वाले हैं विना यज्ञ के मृगों को मारते हैं उन को भी मरने के पीछे उन पियों को लक्ष्य बना कर यमराज के पुरुष बाणों से वेधन करते हैं ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निरयपतयो यमपुरुषाः ॥ २५ ॥

लालाभक्षमाह । यस्त्विति । रेतःपानं कारयन्ति ॥ २६ ॥

यमदूता ये श्वानः सरभसं ससम्भ्रमम ॥ २७ ॥

द्रव्यविनिमये क्रयविक्रयादौ निरवकाशे निरालम्बे अवीचिशब्दार्थमाह । यत्रेति । वीचिस्तरङ्गस्तद्रहितत्वादवीचिः ॥ २८ ॥

यो विप्रस्तत्कलत्रं वा सुरां पिबत्यन्योऽपि वा व्रतस्थः सन् राजन्यो वैश्यो वा सोमपीथः कृतसोमपान इत्यन्वयः तयोः सोमस्थाने फलचमसविधानात्सोमपाननिषेधाच्च तथा च श्रुतिः

[१] वैशसने इति श्रीवीरराघवाचार्यपाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

"न्यग्रोधस्तम्भीराहृत्य ताः सम्पिष्य दध्न्युपसृज्य तमस्मै भक्षं सम्प्रयच्छेन्न सोमम्" इति ॥ २९ ॥

स पूर्वमपि मृतक एव सन्मृत्वा ॥ ३० ॥

पुरुषस्य मेधेन हिंसया भैरवादीन् यजन्ते याश्च स्त्रियो नरमांसम्भक्षयन्ति कामरूपा रक्षोगणा भूत्वा यथेह ते पुरुषादाः सन्तः पूर्वमनृत्यन्त तद्वत् ॥ ३१ ॥

वैश्रम्भकैर्विश्वासोपायैरुपविश्रम्भय्य विश्वास्य ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ सपापं विशसनं वर्णयति । ये त्विह वै दाम्भिका इति । इह लोके ये वै देहिनः दाम्भिका लोकवञ्चका दम्भयज्ञेषु वयमपि यज्ञानुष्ठानपरा इति लोकान् प्रलोभयितुमारब्धेषु दम्भार्थयज्ञेषु पशून् विशसन्ति हिंसन्ति तान् दाम्भिकानमुष्मिन् वैशसनामाख्ये नरके निपतितान्निरयपतयः यमपुरुषाः यातयित्वा दुःखयित्वा विशसन्ति विहिंसन्ति यस्मिन् स विशसनः विशसन एव वैशसन इत्यवयवार्थः ॥ २५ ॥

सपापं लालाभक्षमनुवर्णयति । यस्त्विह वै सवर्णामिति । इह लोके यो वै द्विजः कामेन मोहितः सवर्णां भार्यां रेतः स्वरेतः पाययति पानं कारयति तं द्विजं पापकृतं रेतःकुल्यायां पातयित्वा रेतः सम्पाययन्ति यमपुरुषा इति शेषः लाला रेतः तस्य भक्षणं यस्मिन् स लालाभक्षः इत्यत्रयवार्थः ॥ २६ ॥

अथ सारमेयादनं सपापमनुवर्णयति । ये त्विह वै दस्यव इति । इह ये दस्यवो दुष्टसत्त्वाः के ते अग्निदा गृहादीनां दाहका ये च गरदाः विषदाः ये वा राजभटा पुराकरग्रामान् पुराकरग्रामस्थान् आकरः खनिः सार्थान् जीवसमूहान् वा विलुम्पन्ति छिन्दन्ति हिंसन्तीत्यर्थः तान् सम्परेतान् ये वज्रवन्निष्ठुरा दंष्ट्रा येषां ते यमदूताः श्वानः विंशत्यधिकसप्तशतसङ्ख्याकास्ते सरभसं संभ्रमं खादयन्ति खादन्तीत्यर्थः निवृत्तप्रेषणात् खादेर्णिच् सारमेयाणां शुनामदनं सारमेयकर्तृकमदनं यस्मिन्नित्यवयवार्थः ॥ २७ ॥

अथावीचिमन्तं सपापं वर्णयति । यस्त्विह वा अनृतमिति । यस्त्विह लोके देही साक्षिणः कर्म साक्ष्यं तस्मिन् द्रव्यविनिमये वा क्रयविक्रयादिरूपे वाणिज्ये वानृतमसत्यं वदति स वै प्रेत्य कथञ्चिदत्यन्तदुःखेनावीचिमति नरके निरवकाशे निरालम्बे योजनशतपरिमितोन्नत्या तुङ्गतद्गिरिमूर्धसु पर्वतशिखरेष्वधःशिराः निपात्यते अवीचिमच्छब्दस्यावयवार्थमाह । यत्रेति । यत्र नरकेऽश्मपृष्ठरूपं स्थलं जलमिवावभासते तदवीचिमद्वीचिस्तरङ्गः तदस्यास्तीति वीचिमज्जलं न विद्यते वीचिमदस्मिन् सोऽवीचिमज्जलरहितमप्यश्मपृष्ठं जलमिवावभासते तदवीचिमदित्यर्थः एवं निपात्यमानः पापी तिलप्रमाणशः विशीर्यमाणं शरीरं यस्य तथाभूतोऽपि न म्रियमाणः मरणमप्राप्तः पुनरपि तथैवारोपितो निपतति ॥ २८ ॥

अथ सदुरितमयःपानं वर्णयति । यस्त्विह वै विप्र इति । यो विप्रस्तत्कलत्रं वा सुरां पिबत्यन्योऽपि वा व्रतस्थः राजन्यो वै वैश्यो वा प्रमदात्सोमपीथः कृतसोमपान इत्यन्वयः तयोः सोमस्थाने फलचमसविधानात्सोमपाननिषेधाच्च तथा च श्रुतिः "न्यग्रोधस्तिभिनीराहृत्य ताः सम्पिष्य दध्न्युपसृज्य तमस्मै भक्ष्यं प्रयच्छेन्न सोमम्" इति स्तिभिनीः फलानि दधानि दृष्ट्वा तेषां विप्रादीनां निश्चयं प्रापितानामुरसि पदा पादेनाक्रम्य द्रवमाणमत्यन्ततापेन द्रवीभूतं कार्ष्णायसमयोविशेषं तेषामास्ये मुखे निषिञ्चन्ति अयसः पानं यस्मिन्नित्यवयवार्थः ॥ २९ ॥

अथ सपापं क्षारकर्दममाह । यस्त्विह वात्मसम्भावनेति । यो वै देहीह लोके स्वयं जन्मादिभिरधमः निकृष्ट आत्मनः स्वस्य सम्भावनेनोत्कृष्टत्वापादनेन जन्मादिमतः अत एव वरीयसः श्रेष्ठान्न बहुमन्येत किन्त्ववमन्येतेत्यर्थः स पूर्व मृतकप्राय एव मृत्वा क्षारकर्दमे नरकेऽवाक्शिरा अधःशिराः निपातित अपारयातना अश्नुतेऽनुभवति क्षारः कर्दमो यस्मिन्नित्यवयवार्थः ॥ ३० ॥

अथ रक्षोगणभोजनं सदुरितमाह । ये त्विह वै पुरुषा इति । ये चेह पुरुषाः पुरुषस्य मेधेन हिंसया भद्रकाल्यादिदेवता यजेरन् याश्च स्त्रियः अशास्त्रीयान् शास्त्राविहितान्नृपशून्नररूपान्पशून् घातयन्ति तांश्च ताश्च तान् "पुमान् स्त्रिया" इत्येकशेषः तांश्च पुरुषान् ताश्च स्त्रीरित्यर्थः नृपशवस्तैर्निहतास्ते सर्वे यमसदने रक्षोगणा भूत्वा घातयन्ति दुःखयन्ति सौनिका इव सूना नाम पशूनां वधस्थानं तत्र भवाः सौनिकाः "इचजृञ्ब्राह्मणकप्रथमाध्वरपुरश्चरणनामाख्याताट्ठक्" इति इचजृत्वाट्ठक् स्वधितिना विदार्य छित्त्वासृक्पं पिबन्ति यथेह ते पुरुषादा हूयमानाः सन्तः पूर्वमनृत्यन् जगुश्च तद्वन्नृत्यन्ति गायन्ति च रक्षोगणानामसृग्भोजनं यस्मिन्नित्यवयवार्थः ॥ ३१ ॥

अथ शूलप्रोतं तत्प्राप्तिहेतुं दुरितं च वर्णयति । ये त्विह वा अनागस इति इह ग्रामेऽरण्ये वा अनागसो निरपराधान् जीवितुमिच्छून् जन्तून् ये वै देहिनो वैश्रम्भिकैर्विश्वासोपायैरुपविश्रम्भय्य विश्वास्य शूलसूत्रादिषु प्रोतान् संलग्नान् कृत्वेत्यर्थः क्रीडनकतया क्रीडार्थं यातयन्ति दुःखयन्ति तेऽपि च यमयातनासु प्रेत्य सूत्रशूलादिषु प्रोताः संलग्ना आत्मानः देहा येषां ते क्षुत्पिपासाभ्यां पीडिताश्च तिग्मतुण्डैः सूचीमुखवत्तीक्ष्णानि तुण्डानि मुखानि येषां तैः काकादिभिरितस्ततो हन्यमाना आत्मशमलं स्वीयं पापम् अहो एवंविधमित्येवं स्मरन्ति शूले शूलादौ प्रोता यस्मिन्निति शूलप्रोतमित्यवयवार्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दाम्भिका धर्मध्वजिनः विशसन्ति खण्डशः खण्डयन्ति ॥ २५ ॥

सवर्णां स्ववर्णसमानवर्णाम् ॥ २६ ॥

सार्थान् पान्थान् जनान् ॥ २७ ॥

द्रव्यविनिमये वाणिज्यव्यवहारे साक्ष्ये साक्षिणा वक्तव्ये अवीचिमज्जलं यत्तदश्मपृष्ठस्थलं दूरादर्शने जलमिव दृश्यते तस्मिन्नवीचिमति जलशून्ये पाषाणपृष्ठे निरवकाशे निरालम्बने ॥ २८ ॥

सोमपीथाः कृतसोमपानाः विप्राणां नित्यनिषिद्धं राजन्यतद्भार्याणां सोमपानानन्तरं पूर्वं पीयपानलक्षणं वारुणीपानसम्भवात्तद्भार्याणां सुरते मधुपानाद्वैश्यानां च पूर्वोक्तवत्पित्रादिमृतिनिमित्तदीक्षालक्षणव्रतस्थानां वेत्यादिविशेषोऽवगन्तव्यः ॥ २९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वरीयसः बहुमानयोग्यान् पुरुषान्मृतकः जीवन्मृतः क्षारकर्दमे लवणात्मकपङ्के दुरन्तयातना अनवसानदुःखानि ॥ ३० ॥

पुरुषमेधेन पुरुषहत्यालक्षणयज्ञेन यमसादने नरके स्वधितिना विशसनखड्गेनावदाय खण्डयित्वा सौनिका हिंसकाः पशुमारा इत्यर्थः ॥ ३१ ॥

वैशसमकैः विश्वासोपायैः उपविश्रम्भय्य विश्वास्य आदिशब्दाच्छूलपातनं क्रीडनतया लीलाकरणभावेन यमयातनासु यमेनाधिकृतनरकेषु बलाका वीर्यपुण्डा इत्येनविशेषा दन्दशूकाः सदा दंशनशीलाः सर्पाः उद्वेजयन्ति भयमुत्पादयन्ति उपसृज्य प्राप्य इह लोके यथा बिलेशया अजगराः "बिलेशयस्त्वजगरः शयुरुक्तो मनीषिभिः" इति ॥ ३२—३३ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

विशसन्ति घ्नन्ति ॥ २५ ॥

रेतः पाययति वशीकरणकर्मणो विशेषार्थं रेतःपानं कारयति ॥ २६ ॥ २७ ॥

निरवकाशे निरालम्बे अवीचिमच्छब्दार्थमाह । यत्रेति । अवीचिस्तरङ्गहीनं तत्र ॥ २८ ॥

सोमपीथः कृतसोमपानः वह्निना द्रवत् कालायसं लोहम् ॥ २९ ॥

आत्मसम्भावनेन मिथ्याहङ्कारेण ॥ ३० ॥ ३१ ॥

वैशसमकैर्विश्वासोपायैः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

लालाभक्षमाह । यस्त्विहेति ॥ २६ ॥

सरभसं ससम्भ्रमम् ॥ २७ ॥

वीचिस्तरङ्गस्तद्रहितत्वादवीचिमत् स्थलं तदेवावीचिसंज्ञो नरकः ॥ २८ ॥

सोमपीथः सोमस्य पीतं पानं यस्य स एवम्भूतो यो विप्रस्तत्कलत्रं वा सुरां पिबति अन्योऽपि वा व्रतस्थो राजन्यो वैश्योऽपि चेत्यन्वयः तयोः सोमस्थाने फलचमसविधानात् सोमपाननिषेधाच्च तथा च श्रुतिः "न्यग्रोधस्तिमीराहृत्य ताः संपिष्य दधन्युपसृज्य तमस्मै भक्षं प्रयच्छेन्नसोमम्„ इति ब्राह्मणस्य तु अब्रह्मण्यस्यापि सुरापाननिषेध आदिपर्वणि ।

यो ब्राह्मणोऽद्यप्रभृतीह कश्चिन्मोहात्सुरां पास्यति मन्दबुद्धिः ।
अपेतधर्मा ब्रह्महा चैव स स्यादस्मिँल्लोके गर्हितः स्यात्परे च इति ॥ २९ ॥

एवं विंशतिनरकानुक्त्वा सप्त नरकानाह । अथेत्यादिना ॥ ३० ॥

रक्षोगणभोजनमाह । ये इति । यथेह ये पुरुषाः पुरुषादाः सन्तः अनेन हिंसया भैरवादीन् यजन्ते सौनिका इव नृपशून् याश्च स्त्रियः खादन्ति तान् ताश्च ते च ते पशवः रक्षोगणा भूत्वा यातयन्तः असृक् पिबन्ति ॥ ३१ ॥

वैशसमकैर्विश्वासोपायैः ॥ ३२ ॥

भाषा टीका

जो कोई इहां दम्भ करने वाले दम्भ के यज्ञों मे पशुओं को मारते हैं उन लोगों को उस लोक में वैशस नरक में डाल कर नरक अधिकारी लोग मार करके दुखित करते हैं २५

जो इहां पर अपनी जात की स्त्री को किसी निमित्त से काम से मोहित होकर अपने वीर्य का पान कराता है उस पापी को पर लोक में रेतः कुल्या नदी में डालकर वीर्य का पान खूब कराते हैं ॥ २६ ॥

जो इहां पर चोर वृत्ति से आग लगाते हैं विष देते हैं ग्रामों को जन समूहों को लूटते हैं सो राजा हो या राज पुरुष हो उनको भी मरने पर यमदूत वज्र सरी के दांत वाले सात सौ वीस कुत्ता से बड़ी जल्दी से कटवाते हैं ॥ २७ ॥

जो इहां गवाही देने मे धनके व्यवहार मे दानमे किसी प्रकार झूठ कहता है सो मरे पीछे अवीची मान् नरक में नीचे को मुख करके बिना आधारके दश हजार योजन ऊंचे पर्वत के मस्तक पर से गिराया जाता है जहां पर की पत्थरों का स्थल जल सरीका दीखता है अवीचिमान् नरक में तिल सरीके उस के शरीरके टुकडे होजाते हैं मरता नहीं है फिर वहां पर चढाया हुआ गिरता है ॥ २८ ॥

जो इहां पर ब्राह्मण अथवा उसकी स्त्री यज्ञव्रत मे स्थित होकर सुरा पान करता है अथवा क्षत्रिय वैश्य होकर यज्ञ मे सोमपान करता है प्रमाद से भी वे नरक से डरते हैं तोभी यम दूत उन के छाती पर पग रख कर उन के मुख मे गला हुआ गरम लोहा डालते हैं ॥ २९ ॥

और भी जो इहां अपने बडे अभिमान से आप अधम होकर भी जन्म तप विद्या आचार वर्णाश्रम वाले श्रेष्ठ पुरुषों को अच्छी तरह नहीं मानता है सो मराहुआ सा है तोभी मरने पर क्षार कर्दम नरक मे नीचे को मत्था करके डाला जाता है फिर कठिन कष्टों को भोगता है ॥ ३० ॥

जो पुरुष इहां पुरुष मेधयज्ञ करते हैं भैरवादिकों के अर्पण करके मनुष्य पशुओं को खाते हैं वे मरेहुये पशु यम पुर मे जाकर रक्षोगण होकर घातक सरीके होकर हथियारों से इस को काट कर उसके रक्त को पीते हैं जैसे वह पुरुष करता था तैसे हर्षित होकर नाचते हैं गाते हैं ॥ ३१ ॥

जो इहां वन मे या ग्राम मे विश्वास के उपायों से आये हुये उन जीवों को विश्वास देकर जीने की इच्छा वालों को शूलादिकों मे रख कर खेल के तर्ह से पीडा देते हैं वे भी पीछे यमदण्ड मे शूलादिकों मे चढाये जाते हैं क्षुधा तृषा से दुःखित होते हैं कङ्कवट आदि पाखी इधर उधर से खेंचते हैं चोंचों से वे मारे जाते हैं तब अपने पापों को स्मरण करते हैं ॥ ३२ ॥

ये त्विह वै भूतान्युद्वेजयन्ति नरा उल्वणस्वभावा यथा दन्दशूकास्तेऽपि प्रेत्य नरके दन्दशूकाख्ये निपतन्ति यत्र नृप ! दन्दशूकाः पञ्चमुखाः सप्तमुखा उपसृत्य ग्रसन्ति यथा बिलेशयान् ॥ ३३ ॥

ये त्विह वा [1] अन्धावटकुसूलगुहादिषु भूतानि निरुन्धन्ति तथामुत्र तेष्वेवोपवेश्य सगरेण वह्निना धूमेन निरुन्धन्ति ॥ ३४ ॥

यस्त्विह वा अतिथीनभ्यागतान् वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरीक्षते तस्य चापि निरये पापदृष्टेरक्षिणी वज्रतुण्डा गृध्राः कङ्ककाकवटादयः प्रसह्योरुबलादुत्पाटयन्ति ॥ ३५ ॥

यस्त्विह वा आढ्याभिमतिरहंकृतिस्तिर्यक्प्रेक्षणः सर्वतोऽभिविशङ्की अर्थव्ययविनाशचिन्तया परिशुष्यमाणहृदयवदनो निर्वृतिमनवगतो ग्रह इवार्थमभिरक्षति स चापि प्रेत्य तदुत्पादनोत्कर्षणसंरक्षणशमलग्रहः सूचीमुखे नरके निपतति यत्र ह वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायका इव सर्वतोऽङ्गेषु सूत्रैः परिवयन्ति ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

बिलेशयान् मूषकान् ॥ ३३ ॥

सगरेण सविषेण ॥ ३४ ॥

अतिथयोऽज्ञातपूर्वाः अभ्यागता ज्ञातपूर्वास्तान् पापेन वक्रीकृतेन ॥ ३५ ॥

आढ्याभिमतिर्धनगर्वितः अहङ्कृतिः श्रेष्ठोऽहमिति मानी तिर्यक्प्रेक्षणं यस्य सर्वतो गुर्वादेरपि धनं चोरयिष्यन्तीति विशङ्कमानः परिशुष्यमाणं हृदयं वदनं च यस्य अनवगतोऽप्राप्तः तस्यार्थस्योत्पादनादिभिः शमलं गृह्णातीति तथा परिवयन्ति सूत्रप्रोतं कुर्वन्ति ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

अथ दन्दशूकं सपापमाह। ये त्विह वै भूतानीति। ये च जना अत्युल्वणस्वभावाः अत्युग्रस्वभावाः यथा दन्दशूकाः सर्पास्तद्भूतानि उद्वेजयन्ति भीषयन्ति तेऽपि प्रेत्य दन्दशूकाख्ये दन्दशूकसंज्ञके नरके निपतन्ति दन्दशूकं विशिनष्टि। यत्रेति। हे नृप ! दन्दशूके दन्दशूकाः सर्पाः पञ्च मुखानि सप्त मुखानि येषां तादृशाः उपसृत्य समीपमागत्य ग्रसन्ति यथा बिलेशयान् मूषकान् ग्रसन्ति तद्वद्दन्दशूका अस्मिन् सन्तीत्यन्वयवाक्यार्थः अर्शआदेराकृतिगणत्वान्मत्वर्थीयोऽच्प्रत्ययः ॥ ३३ ॥

अथ सपापमवटं वर्णयति। ये त्विह वा वालानिति। इह ये देहिनो बालानन्धान् काणानन्यानि वा बलहीनानि भूतान्यवटादिषु अवटो गर्तः यथा निरुन्धन्ति तथा सम्परेतानमुत्रावटनिरोधाख्ये नरके तेष्वेवावटादिष्वेव उपवेश्य सगरेण विषयुक्तेन वह्निना धूमेन वह्निसम्बन्धिना धूमेन निरुन्धन्ति अवटो निरोधोऽस्मिन्नित्यवटनिरोधः निरुध्यते अन्यानस्मिन्निति निरोधः अवटो निरोधो यस्मिन्निति वाक्यार्थः ॥ ३४ ॥

अक्षिपर्यावर्तं सपुण्यमाह। यस्त्विह वा अतिथीनिति। यश्चेह लोके स्वयं गृहस्वामी सन्नतिथीनज्ञातपूर्वानभ्यागतान् ज्ञातपूर्वानसकृदुपगतमन्युः सञ्जातक्रोधः दग्धुमिच्छुरिव पापेन तिरश्चीनेन चक्षुषा निरीक्षते तस्य च पापदृष्टेः प्रेतस्य निरयेऽक्षिपर्यावर्ताख्येऽक्षिणी तेत्रे वक्रं तुण्डं येषां ते काकादयः प्रसह्य बलादुत्पाटयन्ति अक्ष्णोः पर्यावर्तनमुत्पाटनमस्मिन्नित्यन्वयवार्थः ॥ ३५ ॥

सूचीमुखं सपापमाह। यस्त्विह वा आढ्याभिमतिरिति। यश्चेह लोके आढ्योऽहमित्यभिमतिरभिमानो यस्य स धनगर्ववानित्यर्थः अहङ्कृतः श्रेष्ठोऽहमिति मानी तिर्यक् प्रेक्षणं यस्य सर्वतः गुर्वादेरपि शङ्की धनं चोरयिष्यतीति शङ्कमानः व्ययो विनियोगेनार्थक्षयः विनाशः समूलतः क्षयः तद्विषयया चिन्तया परिशुष्यमाणं हृदयं वदनं यस्य अतः निर्वृतिं सुखमनुपगतः अप्राप्तः ग्रह इव पिशाच इवार्थं वित्तमभितो रक्षति स चापि प्रेत्य तस्यार्थस्योत्पादनादिभिः शमलं पापं गृह्णातीति तथा उत्पादनं प्रथमतो मूलद्रव्यसम्पादनमुत्कर्षणं तस्य पश्चाद्वृद्ध्यादिना वर्द्धनं रक्षणं पालनम् एतत्प्रयुक्तशमलग्रह इत्यर्थः सूचीमुखाख्ये नरके निपतति सूचीमुखं विशिनष्टि। यत्र हेति। तं वित्तग्रहं धनपिशाचमत एव पापपुरुषाकृतिं पापं धर्मराजस्य यमस्य पुरुषाः तन्तुवायका इव सूत्रयुक्तसूच्या वस्त्रादिवेधकारिण इव सर्वेषु अङ्गेषु सूत्रैः परिवयन्ति सूत्रप्रोतान् तस्यावयवान् कुर्वन्तीत्यर्थः नरकावयवार्थः स्पष्ट एव ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अवटं निरुच्छ्वासबिलं कुसूलं व्रीहिगर्तगृहं कारागृहम् आदिशब्दात्तज्जलमज्जनं दारुपात्रं वा सगरेण विषसहितेनाग्निना कृन्तनम् ॥ ३४ ॥

अपचक्षुषा तिरश्चीनेन नेत्रेण ॥ ३५ ॥

अर्थेषु अभिमतिरभिमानो यस्य स तथा अहङ्कृतिरहङ्कारस्वरूपः व्ययविनाशयोश्चिन्तया ग्रहः ब्रह्मराक्षसादिलक्षणो यथा निधिमन्येभ्योऽभिरक्षति तथेति शेषः तस्यार्थस्य सम्पादने अर्जने उत्कर्षणे वृद्धीकरणे संरक्षणे च यच्छमलं तद्-

[1] बालान्धानिति श्रीवीर०।

एवम्विधा नरका यमालये सान्ति शतशः सहस्रशस्तेषु सर्वेषु च सर्व एवाधर्मवर्तिनो ये केचिदिहोदिता अनुदिताश्चावनिपते ! पर्यायेण विशन्ति तथैव धर्मानुवर्तिन इतरत्र इह तु पुनर्भवे त उभयशेषाभ्यां निविशन्ति ॥ ३७ ॥

निवृत्तिलक्षणमार्ग आदावेव व्याख्यातः ।

एतावानेवाण्डकोशो यश्चतुर्दशधा पुराणेषु विकल्पित उपगीयते यत्तद्भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थविष्ठं रूपमात्ममायागुणमयमनुवर्णितमादृतः पठति शृणोति श्रावयति स उपगेयं भगवतः परमात्मनोऽग्राह्यमपि श्रद्धाभक्तिविशुद्धबुद्धिर्वेद ॥ ३८ ॥

श्रुत्वा स्थूलं यथा सूक्ष्मं रूपं भगवतो यतिः ।
स्थूले निर्जितमात्मानं शनैः सूक्ष्मं धिया नयेदिति ॥ ३९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गृह्णातीति तत्सम्पादनोत्कर्षणसंरक्षणाग्रमलग्रहः वित्तग्रहमर्थलुब्धपिशाचं वायकाः पटस्वरैः कन्थानिर्माणनिपुणाः क्षुरधारानिशितैः सूत्रैः परिवयन्ति ओतप्रोतक्रियया विद्धयन्ति ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विलेशयान् मूषकान् ॥ ३३ ॥ ३४ ॥

अथितयोऽज्ञातपूर्वा अभ्यागता ज्ञातपूर्वाः ॥ ३५ ॥

आढ्याभिमतिर्धनगर्वितः । अहङ्कृतिरहङ्कारी सर्वतो गुर्वादिभ्योऽपि धनं मे ग्रहीष्यन्तीत्यभिशङ्की परिवयन्ति सूत्रप्रोतान् कुर्वन्ति इतरत्र स्वर्गे इह भारतभूमौ पुनरपि धर्माधर्मयोर्भव उत्पत्तिर्यतस्तस्मिन् उभयोर्धर्माधर्मयोः शेषाभ्याम् ॥ ३६ ॥ ३७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विलेशयान् मूषकान् ॥ ३३—३४ ॥

पर्यावर्त्तनमाह । अज्ञातपूर्वा अतिथयः ज्ञातपूर्वाः अभ्यागताः ॥ ३५ ॥

तस्यार्थस्योत्पादादिभिः धनकं पापं गृह्णातीति तथा ॥ ३६ ॥

भाषा टीका ।

जो इहां सब प्राणियों को उद्वेग करते हैं ऐसे जो क्रूर स्वभाव वाले मनुष्य जैसे कि सर्प होते हैं वे लोग दन्दशूक नामा नरक में गिरते हैं हे राजन् ! जहां पर पांच मुखवाले सर्प हैं सात मुख वाले हैं आकर ग्रास करते हैं जैसे मूषों को ग्रास करैं तैसे ॥ ३३ ॥

जो इहां अंधेरे गढे कोठी गुफादिकों में किसी प्राणिको रोकते हैं तैसे यमपुर में उन्हीं में रखकर विष के सहित आग से धुआं में वे रोके जाते हैं ॥ ३४ ॥

जो इहां पर घरका मालिक होकर अतिथि अभ्यागतों को वारंवार क्रोध करके जलाने सरीका पापी नजर से देखता है उस पापी पाप दृष्टि वालेके आंखोंको नरक में वज्र चोंचवाले गीध कङ्क काक वटादिक जबरदस्ती उपाडते हैं ॥ ३५ ॥

जो इहां पर धनी बुद्धिसे अहङ्कार से टेढा देखता है अर्थके नाश होने की चिन्ता से सबसे शङ्का रखता है उसके हृदय मुख सूख जाते हैं कभी सुख नहीं पाता है ग्रह सरीका धन की रक्षा करता है सो भी मर कर उसके उत्पादन खर्च के मोहमें पडके सूची मुख नरक में गिरता है उहांपर धन ग्रह पापी पुरुष को धर्मराज के पुरुष दरजी सरी के सब अंगों में सूतों से सीते हैं ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इतरत्र स्वर्गादौ इह मर्त्यलोके पुनर्भवे पुनर्जन्मनिमित्तम् । उभयोर्धर्माधर्मयोः शेषाभ्याम् ॥ ३७ ॥

आदावेव द्वितीयस्कन्धे "वैश्वानरं याति" इत्यादिना उपगेयमौपनिषदं रूपं श्रद्धाभक्तिभ्यां विशुद्धा बुद्धिर्यस्य ॥ ३८ ॥

यथा यथावच्छ्रुत्वा ॥ ३९ ॥

भूद्वीपवर्षसरिदद्रिनभःसमुद्रपातालदिङ्नरकभागणलोकसंस्था ॥
गीता मया तव नृपाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधाम ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां पञ्चमस्कन्धे नरकवर्णनं नाम
षड्विंशोऽध्यायः ॥ २६ ॥

॥ समाप्तोऽयं पञ्चमस्कन्धः ॥

॥ श्रीकृष्णार्पणमस्तु ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कथम्भूता संस्था सकलानां जीवनिकायानां धाम आश्रयभूतं वपुः ॥ ४० ॥

पञ्चमस्कन्धसम्बन्धिपद्यभावार्थदीपनैः ।
प्रीयतां परमानन्दनृहरिर्बालभाषितैः ॥ १ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
षड्विंशतितमोऽध्यायः ॥ २६ ॥
समाप्तेयं पञ्चमस्कन्धव्याख्या ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इदं नरकवर्णनं पापवर्णनं च दिङ्मात्रमित्याह । एवम्विधाः उक्तविधा नरकाश्च शतशः सहस्रशो यमालये सन्ति तेषु नरकेषु सर्वे एवाधर्मवर्तिन अत्रानुक्तबहुविधाधर्मपरा ये चेहोदिता उक्ता अधर्मवर्तिनः उक्तेषु नरकेषु निपतेयुस्तेऽपि पर्यायेण तथैव विशन्ति यथोक्तेषु नरकेषु विशन्ति तथा तेष्वपि विशन्तीत्यर्थः ॥ यथा तयेतरे धर्मानुवर्तिनो नरकेषु विशन्त्येवं धर्मानुवर्तिनः स्वर्गादौ विशन्तीत्याह । तथैवेति । इतरत्र स्वर्गादौ इह लोके विशन्तीत्याह । इह चेति । पुनर्भवे पुनः पुनः भवो जन्म यस्मिंस्तस्मिन्निह मर्त्यलोकादौ उभयशेषाभ्यां धर्माधर्मशेषाभ्यां भुक्तावशिष्टाभ्यामित्यर्थः विशन्ति जायन्त इत्यर्थः एवं प्रवृत्तिधर्मवर्तिनां मार्गः कथितः । अथ निवृत्तिधर्मवर्तिनः क विशन्तीत्यत्राह । निवृत्तिलक्षणमार्ग इति । निवृत्तिधर्मप्राप्तः मार्गः आदावेव द्वितीयस्कन्ध एव "वैश्वानरं याति विहायसा गतः सुषुम्णया ब्रह्मपथेन" इत्यारभ्य कथित इत्यर्थः एवं नरके ब्रह्माण्डकोशान्तर्भूततयैवोपवर्णितेषु सत्सु तर्हि महर्जनादिभुवनानि क सन्तीति राज्ञः प्रश्नोद्योगमन्वीक्ष्याह । एतावानिति । अण्डकोश एतावानेवोक्तविधत्रिलोक्यात्मक एवेत्यर्थः तर्हि चतुर्दशभुवनात्मकः त्रिलोक्यां व्यवहारः कथमिति शङ्कां निराकुर्वन्नण्डकोशं विशिनष्टि । य इति । योऽण्डकोशः त्रिलोक्यात्मकः पुराणेषु चतुर्दशधा चतुर्दशभुवनात्मकत्वेन विकल्पितः विभेदितः उद्भासते अतलादीनि भुवनानि भूर्लोके महरादीनि दिवोमण्डलेऽन्तर्भाव्यान्तरिक्षमण्डलेन सह त्रिलोक्यात्मकाण्डकोशोऽत्रानुवर्णितः अवान्तरभिदामाश्रित्य पुराणान्तरेषु चतुर्दशधोपवर्ण्यत इत्यर्थः एतदण्डकोशवर्णनश्रवणपठनादिफलमनुवर्णयति । य एतदिति । महापुरुषस्य भगवतो नारायणस्य यत्स्थविष्ठं स्थूलतमं रूपमात्ममायागुणमयं प्रकृतिगुणप्रचुरमनुवर्णितं तदादृतो यः तच्छ्रवणरूपमिमं श्रवणमाहात्म्यपूर्वकं यः पठति यश्च शृणोति श्रावयति वा सोऽस्यैव परमात्मनः उपगेयमुपनिषद्गम्यमणिष्ठं सूक्ष्मं सर्वत्र व्यापनस्वभावं दिव्यमङ्गलविग्रहविशिष्टं दिव्यात्मस्वरूपमपि श्रद्धाभक्तिभ्यां विशुद्धा बुद्धिर्यस्य तथाभूतः सन् वेद स्थूलरूपज्ञानं सूक्ष्मरूपज्ञानफलकमिति स्थूलरूपज्ञानतत्सम्पादकमेतच्छ्रवणपठनादिकं परम्परया सूक्ष्मरूपविषयकज्ञानफलकमित्यर्थः ॥ ३७ ॥ ३८ ॥

स्थूलरूपज्ञानस्य सूक्ष्मरूपज्ञानसाधनत्वमेवाह । श्रुत्वेति भगवतः स्थूलसूक्ष्मे उभे अपि रूपे यथावच्छ्रुत्वा गुरुमुखात्पूर्वं स्थूलरूपे निर्जितमात्मानं चित्तं शनैः सूक्ष्मधिया उक्तविधदिव्यात्मस्वरूपविषयकज्ञानात्मकधिया उक्तविधदिव्यात्मस्वरूपं नयेदित्यर्थः एवं सति प्रपञ्चस्यापि भगवद्रूपत्वेन संहितत्वात्कचिदपि व्याप्रियमाणं चित्तं भगवत्येव विशिष्यभूते व्यवस्थितं भवति इति तत्साधनत्वमिति भावः ॥ ३९ ॥

किं तद्भगवतः स्थूलरूपे यच्छ्रवणेनोच्यते इत्यपेक्षायां तद्यदुक्तमुपसंहरति । भूद्वीपेति । भुवः तदवान्तरभेदानां द्वीपवर्षाणां भूमिष्ठानां सरितां नदीनामद्रीणां तथा नभसोऽन्तरिक्षस्य समुद्राणां पातालपर्यन्तानां भूविवराणां दिशां नरकाणां भागणलोकस्य नक्षत्रगणलोकस्य ध्रुवमण्डलस्य च महदस्य दीर्घं आर्यः संस्थाः विन्यासविशेषाः हे नृप ! मया तव तुभ्यं गीताः कथिताः एतदेव ब्रह्मादिभगणलोकपर्यन्तं जगत्सकलजीवसमूहस्य धाम आश्रय-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

भूतस्य भगवतः अद्भुतं विचित्रं स्थूलं वपुः शरीरं भवतीत्यर्थः ॥ ४० ॥

इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः
श्रीशैलगुरोः सुतेन तच्चरणकमलपरिचर्याप्रसङ्गलब्ध-
समधिगतश्रीमद्भागवतहृदयेन श्रीवैष्णवदासेन
श्रीवीरराघवविदुषा कृतायां श्रीमद्भागवत-
चन्द्रचन्द्रिकाख्यायां श्रीभागवतव्याख्यायां
पञ्चमस्कन्धे षड्विंशोऽध्यायः ॥ २६ ॥
श्रीमते रामानुजाय नमः।
श्रीमते निगमान्तमहादेशिकाय नमः ॥
समाप्तेयं पञ्चमस्कन्धव्याख्या ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

न इयन्त एव नरकाः किन्त्वेतादृशा अन्ये नरका असङ्ख्याताः सन्तीत्याह ॥ एवंविधा इति। उभयत्र स्वर्गादौ इह मनुष्यलोके पुनर्भवे पुनरुत्पत्तौ उभयशेषाभ्यां धर्माधर्मशेषाभ्याम् ॥ ३७ ॥

चतुर्दशधा लोकप्रकारेण स्थविष्ठं स्थूलतममणिष्ठं सूक्ष्मतमम् ॥ ३८ ॥

उभयो रूपयोः कस्मिन् रूपे प्रथमप्रतिपत्तिरिति क्रममाह। श्रुत्वेति। आत्मानं मनः सूक्ष्मधिया सूक्ष्मरूपोपासनया ॥ ३९ ॥

उक्तार्थमुपसंहरन् प्रतिपत्त्यर्थं सङ्कल्पयाह। भूद्वीपेति। सकलजीवानां निकायस्य धाम च आश्रयस्तस्य सकलजीवनिकायो धाम यस्य स तथा वा तस्येश्वरस्याद्भुतं स्थूलं वपुर्मया तव गीतमित्यन्वयः कीदृशं भूद्वीपादिलोका एव संस्था अवयवाः यस्य तत्तथा तत् ॥ ४० ॥

वारिजवासावारिजयोनित्रिनयनशतमखमुखसुरमुकुटश्रेणि-
निषयणश्रीपदपीठं ससलिलसलीलरुगतरुचिररुचिरम् ॥
मृदुहासेन्द्वानन्दितलोकं दारितदितिसुतततिमदगिरिशिखरम्।
कृष्णमकृष्णं चिन्तय चेतः शुचितरमतिगुणयदुकुलतिलकम् ॥ १ ॥
विजयध्वजतीर्थार्यैः रचिता प्रीतये हरेः।
पदरत्नावली नाम पञ्चमस्कन्धसङ्गता ॥ २ ॥

इतिश्रीमन्महेन्द्रतीर्थपूज्यपादशिष्यविजयध्वजभट्टारककृत-
श्रीमद्भागवतटीकायां पदरत्नावल्याम्
पञ्चमस्कन्धे चतुर्विंशोऽध्यायः ॥ २४ ॥ (१)
समाप्तेयं पञ्चमस्कन्धव्याख्या ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

यथा स्थूलं श्रुत्वा तथा सूक्ष्मञ्च श्रुत्वा स्थूले रूपे आत्मानं निर्जितं कृत्वा शनैः क्रमेण सूक्ष्मं प्रति धिया व्यवसायात्मिकया बुद्ध्या नयेदित्यन्वयः। पाठान्तरन्तु सुगमं सूक्ष्ममत्र भक्तिमात्रगम्यं रूपं "यावन्न जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोग," इति द्वितीयोक्तेः ॥ ३९ ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
षड्विंशोऽध्यायः ॥ २६ ॥

इति श्रीभागवतक्रमसन्दर्भे पञ्चमस्कन्धस्य क्रमसन्दर्भः समाप्तः।

श्रीमद्भागवतं महामृतनिधिं संमथ्य सन्दर्शितं
कृष्णं पूर्णतमं प्रकाश्य शशिनं हस्तामलक्यादिवत् ॥
यो जानाति तमो विधूय विधिवत् सन्दर्भसन्नाश्रितान्
जीवात्र जीवतीति सद्गुणगणं तं जीवमीशं भज ॥
समाप्तेयं पञ्चमस्कन्धव्याख्या ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

आज्ञावेव। द्वितीयतृतीयादिषु "वैश्वानरं याति," इत्यादिभिः उपगेयमौपनिषदं रूपं ग्रहीतुमशक्यम् ॥ ३८ ॥

यथा यथावत् स्थूले रूपे निर्जितं वशीकृतमात्मानं मनः ॥ ३९-४० ॥

सहिष्णुतादिव्यसुधाप्रवाहान् साधून् समाकर्ण्य जिजीविषामि।
क्षुधाद्यर्थदुर्वारभुजङ्गदष्टस्याहो गतिर्मे कथमन्यथा स्यात् ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
षड्विंशः पञ्चमे स्कन्धे सङ्गतः सङ्गतः सताम् ॥ २६ ॥
पञ्चमस्कन्धटीका श्रीराधाकृष्णसरस्तटे।
कृष्णषष्ठ्यामपूरीयं फाल्गुने भौमवासरे ॥ १ ॥
समाप्तेयं पञ्चमस्कन्धव्याख्या ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

तथैव धर्मतारतम्यतः इतरत्र स्वर्गादौ पुनर्भवे पुनर्जन्मनि उभयोः धर्माधर्मयोः शेषाभ्याम् ॥ ३७ ॥

आदौ द्वितीये स्कन्धे "वैश्वानरं याति विहायसा गतः," इत्यादिना भूद्वीपादिमयभगवद्रूपश्रवणादिफलं दर्शयन्नुक्तार्थमुपसंहरति। यत्तदित्यादिना। उपगेयं शास्त्रगम्यमपि रूपं वेद ॥ ३८—३९ ॥

कथम्भूतं भूद्वीपादिसंस्थाः ईश्वरस्य स्थूलं वपुः ॥ ४० ॥

इतिश्रीमद्भगवन्निम्बार्कचरणचिन्तकशुकसुधीप्रणीते
पञ्चमस्कन्धीये श्रीमद्भागवतप्रदीपे
षड्विंशाध्यायार्थप्रकाशः ॥ २६ ॥
समाप्तेयं पञ्चमस्कन्धव्याख्या ॥ ५ ॥

भाषा टीका।

इस प्रकार के नरक यम पुर मे सैकड़ों हजारों हैं उन सबों मे सबही अधर्मी जो इहां कहे न कहे हैं हे राजन्! क्रम से जाते हैं तैसेही धर्मात्मा दूसरे ठिकाने जाते हैं वे दोनो शेष कर्म से इस संसार मे फिर आते हैं ॥ ३७ ॥

---

(१) मध्येऽध्यायचतुष्टयस्थानेऽध्यायत्रयमेव वर्तत इति टिप्पण्यामुक्तमतोऽत्रचतुर्विंशतिरध्यायाः सन्ति।

भाषा टीका ।

निवृत्ति लक्षण का मार्ग तो पहिले ही कह दिया है इतना ही अण्डकोश है जिस का चौदह प्रकार से पुराणों मे भेद गाया जाता है जो वह साक्षात् महापुरुष भगवान् नारायण का स्थूल रूप आत्ममाया गुण मय वर्णन किया है जो इस को आदर से पढै सुनै सुनावै सो गान करने योग्य भगवान् के अग्राह्य पद को भी श्रद्धा भक्तियुक्त होने से जान जावैगा ॥ ३८ ॥

भगवान् के स्थूल तथा सूक्ष्म रूप को सुन कर त्यागी होवै स्थूल मे पहिले मन को स्थिर कर के फिर सूक्ष्म मे प्रवेश करै ॥ ३९ ॥

हे नृप ! भूमी द्वीप वर्ष नदी पर्वत आकाश समुद्र पाताल दिशा नरक ज्योतिर्गण लोक स्थिति मैनें तुमारे आगे गाये हैं यह ईश्वर का स्थूल शरीर है सम्पूर्ण जीवों के समूह का स्थान है ॥ ४० ॥

॥ दोहा ॥

रामानुज पद वंदि करि कृष्ण चरण चितलाय ।
भाषा पंचम की लिखी लक्ष्मणदास बनाय ॥ १ ॥

इतिश्री भागवत पंचमस्कन्ध छव्वीसमे अध्याय का

भाषानुवाद लक्ष्मणाचार्य कृत

समाप्त ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे षड्विंशोऽध्यायः समाप्तः ॥ २६ ॥

स्कन्धश्च समाप्तः ॥

शोधकश्चास्य ग्रन्थरत्नस्य वृन्दावननिवासि लक्ष्मणाचार्यः ॥

व्याख्यानयुग्भागवतप्रचारी नित्यस्वरूपः किल ब्रह्मचारी ।
विद्वद्गणेष्वत्रकिरीटधारी चेतस्समास्तेविनिवेदकारी ॥ १ ॥